धर्म्मशास्त्रसङ्ग्रहः

(अत्रि)(विष्णु)(हारीत)(याज्ञवल्क्य)(उशना)
(अङ्गिरा)(यम)(आपस्तम्ब)(संवर्त्त)
(कात्यायन)(वृहस्पति)(पराशर)
(व्यास)(शंख)(लिखित)(दक्ष)
(गौतम)(शातातप)(वशिष्ठ) प्रणीत।

स्मृतिसङ्ग्रहः

बि, ए, उपाधि-धारिणा
श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्येण
संस्कृतः प्रकाशितश्च

कलिकातानगरे

सरस्वतीयन्त्रे
मुद्रितः

इं १८७६

धर्म्मशास्त्रसङ्ग्रहस्य पूर्व्वार्द्ध सूचीपत्रम् ।

धर्म्मशास्त्रसङ्ग्रहस्य उत्तरार्द्ध सूचीपत्रम् ।

लघु अत्रिसंहितायाम्।

—००—

हुताग्निहोत्रमासीन मत्रिं श्रुतवतां वरम्।
उपगम्य च पृच्छन्ति ऋषयः शंसितव्रताः॥
भगवन्! केन दानेन जपेन नियमेन च।
शुध्यन्ते पातकैर्युक्ता स्तं ब्रवीषि महामुने॥
अविख्यापितदोषाणां पापानां महतां तथा।
सर्व्वेषां चोपपातानां शुद्धिं वक्ष्यामि तत्वतः॥
प्राणायामैः पवित्रैश्च दानैर्होमैर्जपै स्तथा।
शुद्धिकामाः प्रमुच्यन्ते पातकेभ्यो न संशयः॥
प्राणायामान्पवित्रांश्च व्याहृतीः प्रणवन्तथा।
पवित्रपाणिरासीनोऽध्यभ्यस्य ब्रह्म नैति कम्॥
आवर्त्तयेत्सदायुक्तः प्राणायामान् पुनः पुनः।
आकेशाग्रादानखान्तात्तपस्तप्यत उत्तमम्॥
निरोधाज्जायते वायुर्वायोरग्निर्हि जायते।
तापेनापोहि जायन्ते ततोऽन्तः शुध्यते त्रिभिः॥
तथा चर्म तथानङ्गा दोषा अभ्यति धर्मतः।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात्॥
प्राणायामैर्दहेत् दोषा धारणाभिश्च किल्विषम्।
प्रत्याहारेण विषयान्ध्यानेनानैश्वरान् गुणान्॥
न च तीव्रेण तपसा न स्वाध्यायैर्न वेच्छया।
गतिं गन्तुं सुराः शक्ता योगात्संप्राप्नुवन्ति याम्॥
योगात्सम्प्राप्यते ज्ञानं योगाद्धर्मस्य लक्षणम्।

योगः परं तपो नित्यं तस्माद्युक्तः सदा भवेत् ॥
प्रणवाद्या स्तथा वेदाः प्रणवे पर्यवस्थिताः ।
वाग्मयः प्रणवः सर्वं स्तस्मात्प्रणवमभ्यसेत् ॥
प्रणवे विनियुक्तस्य व्याहृतीषु च सप्तसु ।
त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित् ॥
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ।
ब्रह्माणी चैव गायत्री पावनं परमं स्मृतम् ॥
सव्याहृतीकां सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते ॥

इत्यात्रेयस्मृतौ प्रथमोऽध्यायः ।

प्राणायामां स्तथा कुर्य्याद्यथाविधिरतन्द्रितः ।
अहोरात्रिकतात्पापात्तत्क्षणादेव शुध्यति ॥
कर्म्मणा मनसा वाचा यदेनः कुरुते निशि ।
अतिष्ठत् पूर्वसन्ध्यायां प्राणायामैस्तु शुध्यति ॥
प्राणायामैर्य आत्मानं संयम्यास्ते पुनः पुनः ।
दशद्वादशभिर्वापि चतुर्विंशात्परं तपः ॥
कौत्सं जपत्वाप इत्येतद्वासिष्ठञ्च त्वचं प्रति ।
कुष्माण्डं पावमानं च सुरापोऽपि विशुद्धति ॥
सकृज्जपत्वास्य पानीयं शिवसङ्कल्पमेव च ।
सुवर्णमपहृत्यापि क्षणाद्भवति निर्मलः ॥
हविष्मान्तीयमभ्यस्य नतमंह इतीव च ।
सूक्तन्तु पौरुषं जप्त्वा मुच्यते गुरुतल्पगः ॥
सव्याहृतीकाः सप्रणवाः प्राणायामास्तु षोड़श ।

अपि मूलहनं मासात् पुनन्त्यहरहः कृता: ॥
अपि वापृक्तु निमज्जन्ता त्रिः पठेदघमर्षणम्।
यथाऽश्वमेधः क्रतुराट् तादृशं मनुरब्रवीत् ॥
आरम्भयज्ञः क्षत्रस्य हविर्यज्ञो विशामपि।
परिचर्य्ययज्ञः शूद्रस्तु जपयज्ञो द्विजोत्तमः॥
आरम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः।
उपांशु स्याच्छतगुणः सहस्रो मानसः स्मृतः॥
अधरोष्ठविभागो वा त्रिश्वासोपांशुलक्षणः।
निर्विकारेण वक्त्रेण स्मृत्वा मानसः स्मृतः॥
सहस्रपरमां देवीं शतमध्यां दशावराम्।
गायत्रीं यः पठेद्विप्रो न स पापेन लिप्यते॥
क्षत्रियो बहुवीर्य्येण तरेदापदमात्मनः।
विशेत्ते वैश्यशूद्रास्तु जपहोमैर्द्विजोत्तमः॥
यथाश्वा रथहीनास्तु रथो वाश्वैर्यथा विना।
एवं तपोऽप्यविद्यस्य विद्या वाप्यतपस्विनः॥
यथान्नं मधुसंयुक्तं मधु वान्येन संयुतम्।
एवं तपस्य विद्या च संयुक्तं भेषजं महत्॥
विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपतत्परम्।
कुत्सितैरपि वर्त्तन्ते कर्म्मणा न प्रतिपद्यते॥

इति आत्रेयस्मृतौ द्वितीयोऽध्यायः।

यस्य कार्य्यं मतं साध्यं कृतं वेदाद्य साध्यते॥
सर्व्वं तत्तस्य वेदाग्निर्दहत्यग्नि रिवेन्धनम्।
यथा जातबलो वाग्निर्दहत्यार्द्रानपि द्रुमान्॥
तथा दहति वेदज्ञः कर्म्मजन्दोषमात्मनः।

यथा महाह्रदे लोष्टं क्षिप्तं सर्वं विनश्यति ॥
एवमात्मकृतं पापं त्रयी दहति देहिनः ।
न वेदबलमाश्रित्य पापकर्म्मरतिर्भवेत् ॥
अज्ञानाच्च प्रमादाच्च दह्यते कर्म्म नेतरत् ।
तपस्तपति योऽरण्ये मुनिर्मूलफलाशनः ॥
ऋचमेकाञ्च योऽधीते तच्च तानिच तत्फलम् ।
वेदाभ्यासो यथाशक्त्या महायज्ञक्रिया क्षमा ॥
नाशयत्याशु पापानि महापातकजान्यपि ।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ॥
बिभेत्यल्पश्रुताद्वेदामामयं प्रतरिष्यति ।
याजनाध्यापनाद्दानात्तथैवाहुः प्रतिग्रहात् ॥
विप्रेषु न भवेद्दोषो ज्वलनार्कसमाहिते ।
शङ्कास्थाने समुत्पन्ने भक्ष्यभोज्यप्रतिग्रहे ॥
आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु ।
सर्ववेदपवित्राणि वक्ष्याम्यहं मतः परम् ।
येषां जपैश्च होमैश्च तिलकल्पश्च संवृत्ता ॥
अघमर्षणं वेदव्रतं शुद्धवत्यस्तरत्समाः ।
कुष्माण्डः पावमानश्च दुर्गा सावित्रिरेव च ॥
शतरुद्रं धर्म्मशिरं त्रिसुपर्णं महाव्रतम् ।
अनिषङ्गादयस्तोभासामानि व्याहृति स्तथा ॥
गारुडानि च सामानि गायत्रीं रैवतं तथा ।
पुरुषव्रतञ्च भावञ्च तथा वेदव्रतानि च ॥
अब्लिङ्गा बार्हस्पत्यं च वाक्सूक्तञ्चामृतं तथा ।
गोसूक्तञ्चावसूक्तञ्च इन्द्रशुद्धेश्च सामनि ॥

त्रीण्याज्यदोहानि रथन्तरञ्च अग्नेर्व्रतं वामदेव्यं बृहच्च ।
एतानि जप्यानि पुनाति पापाज्जातिस्मरत्वं लभते यदिच्छेत् ॥
अग्नेरपत्यं प्रथमं हिरण्यं भूर्वैष्णवी सूर्य्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवन्ति दत्ताः यः काञ्चनङ्गाञ्च महीञ्च दद्यात् ॥
सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षितिधेनूनां सप्तजन्मानुगं फलम् ॥
सर्वकामफला वृक्षा नद्यः पायसकर्दमाः ।
काञ्चना यत्र प्रासादा स्तत्र गच्छन्ति गोप्रदाः ॥
वैशाख्यां पौर्णमास्यान्तु ब्राह्मणान् सप्त पञ्च वा ।
तिलक्षौद्रेण संयुक्ता स्तर्पयित्वा यथाविधि ॥
प्रीयतां धर्म्मराजेति यद्वा मनसि वर्त्तते ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥
सुवर्णनाभं यो दद्यात् सुमुखं कृतमार्गकम् ।
तिलैर्दद्यात्तस्य पुष्पफलं पुण्यं च यत् शृणु ॥
सा सुवर्णधरा धेनुसशैलवनकानना ।
या तु सागरपर्यन्ता भवेद्दत्ता न संशयः ॥
तिलान् कृष्णाजिने कृत्वा सुवर्णं मधुसर्पिषा ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥
इति आत्रेयस्मृतौ तृतीयोऽध्यायः ।
अथ रहस्य प्रायश्चित्तानि व्याख्यास्यामः ॥
सीमान्यस्त्रीगमनरहस्येरहस्यप्रकाशे प्रकाशंपावनंअनुतिष्ठेत् ।
अथवाप्सु निमज्य त्वात्रिरात्रन्तरत्समं दीयमावर्त्य मुने
गोवन्ध्यवधे कन्यादूषणे इन्द्रमुद्रग्रा इत्यापः पीत्वा मुच्यते ।
वेद्दस्यकगुणा वापि सद्यः शोधनमुच्यते ॥

एकादशगुणा वापि रुद्रानावर्त्य शुध्यति ।
महापातकोपपातकेभ्यो मलिनीकरणेभ्यो मुच्यते ॥
त्रिपदा नाम गायत्री वेदे वाजसनेयके ।
त्रिः कृत्वोऽन्तर्जले प्रोक्ता सर्वपापं व्यपोहति ॥

ब्राह्मणीगमने स्नात्वा उदकुम्भं ब्राह्मणान् क्षत्रिय वैश्यागमने तापसं निरावृत्य शुद्धति गुरुदाराङ्गत्वा ऋषभं द्वादशावृत्य शुद्धति अपेयं पीत्वाघमर्षणेनापः पीत्वा शुध्येत् । अशक्तप्रायश्चित्ते सर्वरात्रि मनुश्चोच्य शुध्येत् अग्निसोमेन्द्रसोमाकन्यादुषी विमुच्यते सोमं राजानमिति जपित्वा विषदा अग्निदाश्च विमुच्यन्ते ।

सर्वेषामेव पापानां सङ्करे समुपस्थिते ॥
दशसाहस्रमभ्यस्ता गायत्री शोधनी परा ।
ब्रह्महा गुरुतल्पे वा गामी गम्या तथैव च ॥
स्वर्णस्तेयी च गोघ्नी च तथा विस्रम्भघातकः ।
शरणागतघाती च कूटसाक्षित्वकार्य्यवत् ॥
एवमाद्येषु चान्येषु पापेष्वभिरतश्चिरम् ।
प्राणायामांस्तु यः कुर्यात् सूर्यस्योदयनं प्रति ॥
सूर्योदयनमप्राप्य निर्म्मला धौतकल्मषाः ।
भवन्ति भास्कराकारा विधूमाइव पावकाः ॥
न हि ध्यानेन सदृशं पवित्रमिह विद्यते ।
श्वपाकेष्वपि भुञ्जानो ध्यानेनैवात्र लिप्यते ॥
ध्यानमेव वरो धर्मो ध्यानमेव परं तपः ।
ध्यानमेव परं शौचं तस्माद्ध्यानपरो भवेत् ॥

सर्वपापप्रसक्तोऽपि ध्यानं नियतमभ्यसेत्।
सर्वदा ध्यानयुक्तश्च तपस्वी पंक्तिपावनः॥

इति अत्रियस्मृतौ चतुर्थोऽध्यायः।

चतुरस्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य तु।
वर्त्तुलञ्चैव वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्।
ब्रह्मा विष्णुश्च रुद्रश्च श्रीहुताशन एव च॥
मण्डलान्युपजीवन्ति तस्मात् कुर्वीत मण्डलम्।
यातुधानाः पिशाचाश्च क्रूराश्चैव तु राक्षसाः॥
हरन्ति रसमन्नस्य मण्डलेन विवर्जिते।
गोमयं मण्डलं कृत्वा भोक्तव्यमिति निश्चितम्॥
यत्र क्वापतितस्यान्नं भुक्त्वा चान्द्रायणं चरेत्।
यतिश्च ब्रह्मचारी च पक्वान्नस्वामिना वुभौ॥
तयोरन्नमदत्त्वा च भुक्त्वा चान्द्रायणं चरेत्।
यतिहस्ते जलं दद्याद्भैक्ष्यं दद्यात् पुनर्जलम्॥
तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम्।
वामहस्तेन यो भुङ्क्ते पेयं पिवति वा द्विजः॥
सुरापानेन तत्तुल्यं मनुः स्वायम्भुवोऽब्रवीत्।
हस्तदत्तास्तु ये स्नेहाल्लवणव्यञ्जनादि च॥
दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्विषम्।
अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमन्त्रितम्॥
तथैव वृषलस्यान्नं ब्राह्मणेन निमन्त्रितम्।
ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्॥
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्।
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्॥

वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्।
शूद्रान्ने नोदरस्थेन योऽधिगच्छति मैथुनम्॥
यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्त्तते।
शूद्रान्नरसपुष्टाङ्गो अधीयानोऽपि नित्यशः॥
जिह्वा चापि जपन्वापि गतिमूर्द्धान्न विन्दति।
यस्तु वेदमधीयानः शूद्रान्नमुपभुञ्जति॥
शूद्रो वेदफलं याति शूद्रत्वं चाधिगच्छति।
मृतसूतकपुष्टाङ्गो द्विजः शूद्रान्नभोजनम्॥
अहमेव न जानामि काङ्गां योनिङ्गमिष्यति।
श्वानस्तु सप्तजन्मानि नवजन्मानि शूकरः॥
गृध्रो द्वादशजन्मानि इत्येवं मनुरब्रवीत्।
परपाक मुपासन्ते ये द्विजा गृहमेधिनः॥
ते वै खरत्वमुष्ट्रत्वं श्वत्वञ्चैव धिगच्छति।
श्राद्धं दत्त्वा च भुक्त्वा च मैथुनं योऽधिगच्छति॥
भवन्ति पितरस्तस्य तन्मासे रेतसोभुजः।
उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन॥
भूमौ निधाय तद्द्रव्यमाचान्तः शुचितामियात्।
स्पृशन्ति विन्दवः पादौ य आचामयतः परान्॥
भूमिगैस्ते समाज्ञेया न तैरप्रयतो भवेत्।
आचान्तोऽप्य शुचिस्तावद्यावत्पात्र मनुद्धृतम्॥
उद्धृतेप्य: शुचिस्तावद्यावन्मण्डलशोधनम्।
आसने पादमारोप्य ब्राह्मणो यस्तु भुञ्जति॥
मुखेन धमिते चान्नं तुल्यं गोमांसभक्षणम्।
उपदंशाकशेषं वा भोजने मुखनिःसृतम्॥

द्विजातीनामभोज्यान्नं भुक्त्वा चान्द्रायणं चरेत्।
पीतशेषन्तु यत्तोयं ब्राह्मणः पिवति पुनः॥
अपेयं तद्भवेदापः पीत्वा चान्द्रायणं चरेत्।
अनुवंशन्तु भुञ्जीत नानुवंशन्तु संविशेत्॥
अनुवंशन्तु भुञ्जानो दीर्घमायुरवाप्नुयात्।
आर्द्रपादस्तु भुञ्जीत नार्द्रवासस्तु संविशेत्॥
आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात्।
अनार्द्रपादः शयने दीर्घां श्रियमवाप्नुयात्॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रियं प्रत्यङ्मुखे भुङ्क्ते ऋतं भुङ्क्त उदङ्मुखः॥
शावे शवगृहं गत्वा श्मशाने वान्तरे पिव।
आतुरव्यञ्जनं कृत्वा दूरस्थोऽप्यशुचिर्भवेत्॥
अतिक्रान्ते दशाहे तु त्रिरात्र मशुचिर्भवेत्।
सम्वत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति॥
निर्द्दैशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः॥
अशुद्धं स्वयमप्यन्नं न शुद्धस्तु यदि स्पृशेत्।
विशुध्यत्युपवासेन भुङ्क्ते कृच्छ्रेण स द्विजः॥
सूतके सूतकं स्पृष्ट्वा स्नानं शावे च सूतके।
सूतकेनैव शुद्धिः स्यान्मृतस्यान्निर्द्दशे शुचिः॥
सूतके सूतकं स्पृष्ट्वा स्नानं शावे च सूतके।
भुक्त्वा पीत्वा तदज्ञानादुपवासस्त्र्यहं भवेत्॥
मृण्मयानाञ्च पात्राणां दशाहे शुचिरिष्यते।
स्नानादिषु प्रयुक्तानां त्यागएव विधीयते॥

सूतके मृतके चैव मृतान्ते च प्रसूतके।
तस्मात्तु सङ्कताशौचे मृताशौचे न शुध्यति॥
सूतकाद्‌द्विगुणं शावं शावाद्‌द्विगुणमार्त्तवम्।
आर्त्तवाद्‌ द्विगुणा सूतिस्तन्तोऽधिशवदाहकः॥
अनुगच्छेद्यथा प्रेतं ज्ञातिमज्ञातिमेव वा।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥
रजता शुध्यते नारी नदी वेगेन शुध्यति।
भस्मना शुध्यते कांस्यं पुनः पाकेन मृण्मयम्॥
नोदन्वतोऽम्भसि स्नानं क्षुरकर्म्म तथैव च।
अन्तर्वत्नी पतिः कुर्वन्न प्रजा भवति ध्रुवम्॥
दम्पती शिशुना सार्द्धं सूतके दशमेऽहनि।
चौरं कुर्यात्ततः पूता दानभोजनयोग्यताः॥
जलमध्ये जलं देयं पितॄणां जलमिच्छताम्।
घनस्थाने न दातव्यं पितॄणां नोपगच्छति॥
रात्रिं कृत्वा त्रिभागन्तु द्वौ भागौ पूर्व एव च।
उत्तरांशः प्रभातेन युज्यते मृतसूतके॥
इति पश्येत्तु भुक्त्वा तु पादुकारोहणं स्मृतम्।
स्नात्वेन्द्रव्रतमादाय देवताभ्यो निवेदयेत्॥
अपूपं लवणं मुद्गं गुडमिश्रं यथा हविः।
दत्त्वा ब्राह्मणपत्नीभ्यो निशि भोजनमेव च॥
चतुर्थेऽहनि कर्त्तव्यं क्षुरकर्मातियत्नतः।
पुण्याहं वाचयित्वा ते भोक्तव्यं शुद्धिमिच्छता॥
अपुण्याहे तु भुञ्जीत विप्रो धर्म्ममजानतः।
तस्य जातिमयं भुङ्क्ते प्रायश्चित्तं ध्रुवं भवेत्॥

विवाहे वितते तन्त्रे होमकाल उपस्थिते ।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥
हविष्मत्या स्नापयित्वा अन्यवस्त्रमलङ्कृता ।
युञ्जानामाहुतिं कृत्वा ततः कर्म्म प्रवर्त्तते ॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातकी ।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥
आर्त्तवाभिप्लुता नारी चण्डालं पतितं शुनम् ।
भाज्यान्तरे प्रयुज्यन्ते स्नात्वा मान स्तृचं जपेत् ॥
आर्त्तवाभिप्लुतां नारीं दृष्ट्वा भुङ्क्तेऽन्धकातराः ।
तदन्नं च्छर्दयित्वा तु कुशचारी पिवेदपः ॥
ये तां दत्त्वा तु यो भुङ्क्ते प्राजापत्यं विशोधनम् ।
आर्त्तवाभिप्लुता नारी आर्त्तवाभिप्लुता मिथः ॥
भाषयित्वा तु सर्वोहादुपवासस्तयोर्भवेत् ।
उदक्यायाः करेणाथ भुक्त्वा चान्द्रायणं चरेत् ॥
प्राजापत्यं अमत्या चेत् त्रिरात्रं स्पृष्टभोजने ।
तद्धस्ताभाजनञ्चैव त्रिगुणं सह भोजने ॥
चतुर्गुणतदुच्छिष्टे पानीये त्वर्द्धमेव च ।
उदक्याया सम्पदस्य मन्नं भुक्त्वावकामतः ॥
उपवासेन शुद्धिः स्यात्पिवेद् ब्रह्मसुवर्च्चलम् ।
आर्त्तवी यदि चण्डालमुच्छिष्टेन तु पश्यति ॥
अस्नातकालं नाश्नीयादासीना वाग्यता वहिः ।
पादकृच्छ्रन्तु यः कुर्याद् ब्रह्मकृच्छ्रं पिवेत् पुनः ॥
ब्राह्मणान् भोजयेत्पश्चाद्विप्राणा मनुशासनात् ।
मृतसूतकसम्पर्कें ऋतुं दृष्ट्वा कथं भवेत् ॥

अस्नातकालं नाश्नीयादभुक्त्वा चान्द्रायणं चरेत्।
आर्त्तवाभिप्लुता नारी चण्डालं स्पृशते यदि॥
आर्त्तवाभिप्लुता नारी आर्त्तवाभिप्लुता स्पृशेत्।
स्नात्वोपवासं कुर्याच्च पञ्चगव्येन शुध्यति॥
कृच्छ्रमेकञ्चरेत्सा तु तदर्थं चान्तरीक्षते।
आतुरा या ऋतुस्नाता स्नानकर्म्म कथं भवेत्॥
स्नात्वा स्नात्वा पुनःस्पृश्य दशकृत्वस्त्वनातुरः।
वस्त्रापनयनं कृत्वा भस्मना परिमार्जयेत्॥
दत्त्वा तु शक्तितो दानं पुण्याहेन विशुध्यति।

इति आत्रेयस्मृतौ पञ्चमोऽध्यायः।

इष्ट्वा क्रतुशतैरेव देवराजो महाद्युतिः।
स्वगुरुं वाग्मिनां श्रेष्ठं पर्य्यपृच्छद्बृहस्पतिम्॥
भगवन्! केन दानेन स्वर्गतः सुखमेधते।
यदक्षयं महाभाग! त्वं ब्रूहि वदताम्बर!॥
एवं पृष्टः स इन्द्रेण देवदेवपुरोहितः।
वाचस्पतिर्महातेजो बृहस्पतिरुवाच ह॥
हिरण्यदानं गोदानं भूमिदानञ्च वासव!।
एतत्प्रयच्छमानोऽपि स्वर्गतः सुखमेधते॥
सुवर्णं रजतं वस्त्रं मणिरत्नं वसूनि च।
सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति॥
फलाकृष्टां महीं दद्यात् सबीजां सस्यमालिनीम्।
यावत् सूर्यकरा लोके तावत् स्वर्गे महीयते॥

इति श्रीआत्रेयस्मृतौ धर्म्मशास्त्रं सम्पूर्णम्।

श्रीगणेशाय नमः ॥

हुताग्निहोत्रमासीनमत्रिं वेदविदां वरम् ।
सर्वशास्त्रविधिज्ञातमृषिभिश्च नमस्कृतम् ॥
नमस्कृत्य च ते सर्व इदं वचनमब्रुवन् ।
हितार्थं सर्वलोकानां भगवन्! कथयस्व नः ॥
अत्रिरुवाच ॥ वेदशास्त्रार्थतत्त्वज्ञा! यन्मां पृच्छथ संशयम् ।
तत् सर्वं संप्रवक्ष्यामि यथादृष्टं यथाश्रुतम् ।
सर्वतीर्थान्युपस्पृश्य सर्वान् देवान् प्रणम्य च ।
जप्त्वा तु सर्वसूक्तानि सर्वशास्त्रानुसारतः ॥
सर्वपापहरं नित्यं सर्वसंशयनाशनम् ।
चतुर्णामपि वर्णानामत्रिः शास्त्रमकल्पयत् ॥
ये च पापकृतो लोके ये चान्ये धर्मदूषकाः ।
सर्वे पापैः प्रमुच्यन्ते श्रुत्वेदं शास्त्रमुत्तमम् ॥
तस्मादिदं वेदविद्भिरध्येतव्यं प्रयत्नतः ।
शिष्येभ्यश्च प्रवक्तव्यं सद्वृत्तेभ्यश्च धर्मतः ।
अकुलीने ह्यसद्वृत्ते जडे शूद्रे शठे द्विजे ।
एतेष्वेव न दातव्यमिदं शास्त्रं द्विजोत्तमैः ॥
एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणी भवेत् ॥

एकाक्षरं प्रदातारं यो गुरुं नाभिमन्यते।
शुनां योनिशतं गत्वा चाण्डालेष्वपि जायते॥
वेदं गृहीत्वा यः कश्चिच्छास्त्रञ्चैवावमन्यते।
स सद्यः पशुतां याति सम्भवानेकविंशतिम्॥
स्वानि कर्म्माणि कुर्व्वाणा दूरे सन्तोऽपि मानवाः।
प्रिया भवन्ति लोकस्य स्वे स्वे कर्म्मण्यवस्थिताः॥
कर्म्म विप्रस्य यजनं दानमध्ययनं तपः।
प्रतिग्रहोऽध्यापनञ्च याजनञ्चेति वृत्तयः।
क्षत्रियस्यापि यजनं दानमध्ययनं तपः।
शस्त्रोपजीवनं भूतरक्षणञ्चेतिवृत्तयः॥
दानमध्ययनं वापि यजनञ्चेति वै विशः।
शूद्रस्य वार्त्ता शुश्रूषा द्विजानां कारुकर्म्म च॥
मयैष धर्म्मोऽभिहितः संस्थिता यत्र वर्णिनः।
बहुमानमिह प्राप्य प्रयान्ति परमां गतिम्॥
ये त्यक्त्वा स्वधर्म्मस्य परधर्म्मे व्यवस्थिताः।
तेषां शास्तिकरो राजा स्वर्गलोके महीयते।
आत्मीये संस्थितो धर्म्मे शूद्रोऽपि स्वर्गमश्नुते।
परधर्म्मो भवेत्त्याज्यः सुरूपपरदारवत्॥
वध्यो राज्ञा स वै शूद्रो जपहोमपरश्च यः।
ततो राष्ट्रस्य हन्तासौ यथा वह्नेश्च वै जलम्॥
प्रतिग्रहोऽध्यापनञ्च तथाविक्रेयविक्रयः।
याज्यं चतुर्भिरप्येतैः क्षत्रविट्पतनं स्मृतम्॥
सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्॥

अव्रताश्चानधीयाना यत्र भैक्षचरा द्विजाः ।
तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदं बधैः ॥
विद्वद्भोज्यमविद्वांसो येषु राष्ट्रेषु भुञ्जते ।
तेऽप्यनावृष्टिमिच्छन्ति महद्वा जायते भयम् ॥
ब्राह्मणान् वेदविदुषः सर्व्वशास्त्रविशारदान् ।
तत्र वर्षति पर्जन्यो यत्रैतान् पूजयेन्नृपः ॥
त्रयो लोकास्त्रयो वेदा आश्रमाश्च त्रयोऽग्नयः ।
एतेषां रक्षणार्थाय संसृष्टा ब्राह्मणाः पुरा ॥
उभे सन्ध्ये समाधाय मौनं कुर्वन्ति ते द्विजाः ।
दिव्यवर्षसहस्राणि स्वर्गलोके महीयते ॥
य एवं कुरुते राजा गुणदोषपरीक्षणम् ।
यशः स्वर्गं नृपत्वञ्च पुनः कोषं समृद्धयेत् ॥
दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोषस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षाः पञ्चैव यज्ञाः कथिता नृपाणाम् ॥
यत् प्रजापालने पुण्यं प्राप्नुवन्तीह पार्थिवाः ।
न तु क्रतुसहस्रेण प्राप्नुवन्ति द्विजोत्तमाः ॥
अलाभे देवखातानां ह्रदेषु च सरःसु च ।
उद्धृत्य चतुरः पिण्डान् पारके स्नानमाचरेत् ॥
वसाशुक्रमसृङ्मज्जा मूत्रविट् कर्णविम्नखाः ।
श्लेष्मास्थि दूषिकाः स्वेदो द्वादशैते नृणां मलाः ।
षण्णां षण्णां क्रमेणैव शुद्धिरुक्ता मनीषिभिः ।
मृद्वारिभिश्च पूर्व्वेषामुत्तरेषान्तु वारिणा ॥
शौचमङ्गलनायासाअनसूयाऽस्पृहा दमः ।
लक्षणानि च विप्रस्य तथा दानं दयापि च ॥

न गुणान् गुणिनोहन्ति स्तौति चान्यान् गुणानपि।
न हसेच्चान्यदोषांश्च सानसूया प्रकीर्त्तिता॥
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः।
आचारेषु व्यवस्थानं शौचमित्यभिधीयते॥
प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्।
एतद्धि मङ्गलं प्रोक्तमृषिभिर्धर्म्मदर्शिभिः।
शरीरं पीड्यते येन शुभेन त्वशुभेन वा।
अत्यन्तं तन्न कुर्व्वीत अनायासः स उच्यते॥
यथोत्पन्नेन कर्त्तव्यं सन्तोषः सर्व्ववस्तुषु।
न स्पृहेत् परदारेषु साऽस्पृहा परिकीर्त्तिता।
वाह्यमाध्यात्मिकं वापि दुःखमुत्पाद्यतेऽपरैः।
न कुप्यति न चाहन्ति दमइत्यभिधीयते॥
अहन्यहनि दातव्यमदीनेनान्तरात्मना।
स्तोकादपि प्रयत्नेन दानमित्यभिधीयते॥
परस्मिन् बन्धुवर्गे वा मित्रे द्वेष्ये रिपौ तथा।
आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता॥
यस्त्वेतैर्लक्षणैर्युक्तो गृहस्थोऽपि भवेद्द्विजः।
स गच्छति परं स्थानं जायते नेह वै पुनः॥
अग्निहोत्रं तपः सत्यं वेदानाञ्चैव पालनम्।
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते।
वापीकूपतड़ागादिदेवतायतनानि च।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते॥
इष्टं पूर्त्तं प्रकर्त्तव्यं ब्राह्मणेन प्रयत्नतः।
इष्टेन लभते स्वर्गं पूर्त्तेन मोक्षमाप्नुयात्॥

इष्टापूर्त्तौ द्विजातीनां सामान्यौ धर्म्मसाधनौ।
अधिकारी भवेच्छूद्रः पूर्त्ते धर्म्मे न वैदिके॥
यमान् सेवेत सततं न नित्यं नियमान् बुधः।
यमान् पतत्यकुर्व्वाणो नियमान् केवलान् भजन्॥
आनृशंस्यं क्षमा सत्यमहिंसा दानमार्जवम्।
प्रीतिः प्रसादो माधुर्य्यं मार्दवञ्च यमा दश॥
शौच मिज्या तपोदानं स्वाध्यायोपस्थनिग्रहः।
व्रतमौनोपवासाश्च स्नानञ्च नियमा दश॥
प्रतिकृतिं कुशमयीं तीर्थवारिषु मज्जयेत्।
यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः॥
मातरं पितरं वापि भ्रातरं सुहृदं गुरुम्।
यमुद्दिश्य निमज्जेत द्वादशांशफलं लभेत्॥
अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः॥
पिता पुत्रस्य जातस्य पश्येच्च जीवतो मुखम्।
ऋणमस्मिन् संनयति अमृतत्वञ्च गच्छति॥
जातमात्रेण पुत्रेण पितॄणामनृणी पिता।
तदह्नि शुद्धिमाप्नोति नरकात्त्रायते हि सः॥
जायन्ते बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजते चाश्वमेधञ्च नीलं वा वृषमुत्सृजेत्॥
काङ्क्षन्ति पितरः सर्वे नरकान्तरभीरवः।
गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति॥
फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम्।
गयाशीर्षं पदाक्रम्य मुच्यते ब्रह्महत्यया॥

महानदीमुपस्पृश्य तर्पयेत् पितृदेवताः ।
अक्षयान् लभते लोकान् कुलञ्चैव समुद्धरेत् ॥
शङ्कास्थाने समुत्पन्ने भक्ष्यभोगविवर्जिते ।
आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु ॥
अक्षारलवणं भैक्षं पिबेद्ब्राह्मीं सुवर्चसम् ।
त्रिरात्रं शङ्खपुष्पीम्वा ब्राह्मणः पयसा सह ॥
मद्यभाण्डाद्द्विजः कश्चिदज्ञानात् पिबते जलम् ।
प्रायश्चित्तं कथं तस्य मुच्यते केन कर्म्मणा ॥
पलाशविल्वपत्राणि कुशान् पद्मान्युडुम्बरम् ।
क्वाथयित्वा पिबेदापस्त्रिरात्रेणैव शुद्ध्यति ॥
सायं प्रातस्तु यः सन्ध्यां प्रमादाद्विक्रमेत् सकृत् ।
गायत्र्यास्तु सहस्रं हि जपेत् स्नात्वा समाहितः ॥
शोकाक्रान्तोऽथ वा श्रान्तः स्थितः स्नानजपाद्बहिः ॥
ब्रह्मकूर्च्चं चरेद्भक्त्या दानं दत्त्वा विशुद्ध्यति ।
गवां शृङ्गोदके स्नात्वा महानद्युपसङ्गमे ।
समुद्रदर्शनेनैव व्यालदष्टः शुचिर्भवेत् ॥
वृकश्वानशृगालैस्तु यदि दष्टश्च ब्राह्मणः ।
हिरण्योदकसंमिश्रं घृतं प्राश्य विशुद्ध्यति ॥
ब्राह्मणी तु शुना दष्टा जम्बुकेन वृकेण वा ।
उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥
सव्रतश्च शुना दष्टस्त्रिरात्रमुपवासयेत् ।
सघृतं यावकं प्राश्य व्रतशेषं समापयेत् ॥
मोहात् प्रमादात् संलोभाद्व्रतभङ्गं तु कारयेत् ।
त्रिरात्रेणैव शुद्ध्येत पुनरेव व्रती भवेत् ॥

ब्राह्मणान्नं यदुच्छिष्टमश्नात्यज्ञानतोद्विजः ।
दिनद्वयं तु गायत्र्या जपं कृत्वा विशुद्ध्यति ॥
क्षत्रियान्नं यदुच्छिष्टमश्नत्यज्ञानतोद्विजः ।
त्रिरात्रेण भवेच्छुद्धिर्यथा क्षत्रे तथा विशि ॥
अभोज्यान्नं यथा भुक्त्वा स्त्रीशूद्रोच्छिष्टमेव वा ।
जग्ध्वा मांसमभक्ष्यन्तु सप्तरात्रं यवान् पिबेत् ॥
शुना चैव तु संस्पृष्टस्तस्य स्नानं विधीयते ।
तदुच्छिष्टन्तु संप्राश्य षण्मासान् कृच्छ्रमाचरेत् ॥
असंस्पृष्टेन संस्पृष्टः स्नानं तेन विधीयते ।
तस्य चोच्छिष्टमश्नीयात् षण्मासान् कृच्छ्रमाचरेत् ॥
अज्ञानात् प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥
वपनं मेखला दण्डो भैक्षचर्य्यव्रतानि च ।
निवर्त्तन्ते द्विजातीनां पुनः संस्कारकर्म्मणि ॥
गृहशुद्धिं प्रवक्ष्यामि अन्तःस्थशवदूषिताम् ।
प्रायोज्यं मृण्मयं भाण्डं सिद्धमन्नं तथैव च ॥
गृहान्निष्क्रम्य तत्सर्व्वं गोमयेनोपलेपयेत् ।
गोमयेनोपलिप्याथ छागेनाघ्रापयेत् पुनः ॥
ब्राह्मैर्मन्त्रैस्तु पूतन्तु हिरण्यकुशवारिभिः ।
तेनैवाभ्युक्ष्य तद्वेश्म शुद्ध्यते नात्र संशयः ॥
राजान्यैः श्वपचैर्व्वापि बलाद्विचालितो द्विजः ।
पुनः कुर्व्वीत संस्कारं पश्चात् कृच्छ्रत्रयञ्चरेत् ॥
शुना चैव तु संस्पृष्टस्तस्य स्नानं विधीयते ।
तदुच्छिष्टन्तु संप्राश्य यत्नेन कृच्छ्रमाचरेत् ॥

अतः परं प्रवक्ष्यामि सूतकस्य विनिर्णयम् ।
प्रायश्चित्तं पुनश्चैव कथयिष्याम्यतः परम् ।
एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः ।
त्र्यहात् केवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥
व्रतिनः शास्त्रपूतस्य आहिताग्नेस्तथैव च ।
राज्ञस्तु सूतकं नास्ति यस्य चेच्छति ब्राह्मणः ॥
ब्राह्मणो दशरात्रेण द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ।
सपिण्डानान्तु सर्व्वेषां गोत्रजः साप्तपौरुषः ।
पिण्डाश्चोदकदानञ्च शावाशौचं तथानुगम् ॥
चतुर्थे दशरात्रं स्यात् षड्हः पञ्चमे तथा ।
षष्ठे चैव त्रिरात्रं स्यात् सप्तमे त्र्यहमेव वा ॥
अष्टमे दिनमेकन्तु नवमे प्रहरद्वयम् ।
दशमे स्नानमात्रेण सूतके तु शुचिर्भवेत् ॥
मृतसूतके तु दासीनां पत्नीनाञ्चानुलोमिनाम् ।
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनिकम् ।
शवस्पृष्टस्तीयस्तु सचेलः स्नानमाचरेत् ।
चतुर्थे सप्तमेच्यं स्यादेष शावविधिः स्मृतः ॥
एकत्र संस्कृतानान्तु मातृणामेकभोजिनाम् ।
स्वामितुल्यं भवेच्छौचं विभक्तानां पृथक् पृथक् ॥
उच्छ्रौचौरमवौचौरं यच्चान्नं मृतसूतके ।
याचकान्नं नवश्राद्धं भुक्त्वा चान्द्रायणञ्चरेत् ॥
सूतकान्नमधर्म्माय यस्तु प्राश्नाति मानवः ।

त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत् ॥
महायज्ञविधानन्तु न कुर्य्यान्मृतजन्मनि।
होमं तत्र प्रकुर्व्वीत शुष्कान्नेन फलेन वा ॥
बालस्त्वन्तर्दशाहे तु पञ्चत्वं यदि गच्छति।
सद्यएव विशुद्धिः स्यान्न प्रेतं नैव सूतकम् ॥
कृतचूड़स्तु कुर्व्वीत उदकं पिण्डमेव च।
स्वधाकारं प्रकुर्वीत नामोच्चारण मेव च।
ब्रह्मचारी यतिश्चैवं मन्त्रे पूर्व्वकृते तथा।
यज्ञे विवाहकाले च सद्यः शौचं विधीयते ॥
विवाहोत्सवयज्ञेष्वनन्तरामृतसूतके।
पूर्व्वसङ्कल्पितार्थस्य न दोषस्त्वात्रिरब्रवीत् ॥
मृतसंजननादूर्द्ध्वं सूतकादौ विधीयते।
स्पर्शनाचमनाच्छुद्धिः सूतिकान्नेन संस्पृशेत् ॥
पञ्चमेऽहनि विज्ञेयं संस्पर्शं क्षत्रियस्य तु।
सप्तमेऽहनि वैश्यस्य विज्ञेयं स्पर्शनं बुधैः ॥
दशमेऽहनि शूद्रस्य कर्त्तव्यं स्पर्शनं बुधैः।
मासेनैवात्मशुद्धिः स्यात् सूतके मृतके तथा ॥
व्याधितस्य कदर्य्यस्य ऋणग्रस्तस्य सर्व्वदा।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः।
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः।
स्वाध्यायव्रतहीनस्य सततं सूतकं भवेत् ॥
द्वे कृच्छ्रे परिवित्तेस्तु कन्यायाः कृच्छ्रमेव च।
कृच्छ्रातिकृच्छ्रं मातुः स्याद्दातुः सान्तपनं स्मृतम्।
कुब्जवामनखण्डेषु गद्गदेऽथ जड़ेषु च।

जात्यन्धबधिरे मूके न दोषः परिवेदने।
क्लीबे देशान्तरस्थे च पतिते व्रजितेऽपि वा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने॥
पिता पितामहो यस्य अग्रजो वापि कस्यचित्।
नाग्निहोत्राधिकारोऽस्ति न दोषः परिवेदने॥
भार्य्यामरणपक्षे वा देशान्तरगतेऽपि वा।
अधिकारी भवेत् पुत्रस्तथा पातकसंयुते॥
ज्येष्ठो भ्राता यदा नष्टो नित्यं रोगसमन्वितः।
अनुज्ञातस्तु कुर्व्वीत शङ्खस्य वचनं यथा॥
नाग्नयः परिविन्दन्ति न वेदा न तपांसि च।
न च श्राद्धं कनिष्ठो वै विना चैवाभ्यनुज्ञया॥
तस्माद्धर्म्मं सदा कुर्य्याच्छ्रुतिस्मृत्युदितञ्च यत्।
नित्यं नैमित्तिकं काम्यं यच्च स्वर्गस्य साधनम्॥
एकैकं वर्द्धयेन्नित्यं शुक्ले कृष्णे च ह्रासयेत्।
अमावास्यां न भुञ्जीत एष चान्द्रायणोविधिः॥
एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्व्ववत्।
त्र्यहं परञ्च नाश्नीयादतिकृच्छ्रं तदुच्यते॥
इत्येतत् कथितं पूर्व्वैर्महापातकनाशनम्॥
वेदाभ्यासरतं क्षान्तं महायज्ञक्रियापरम्।
न स्पृशन्तीह पापानि महापातकजान्यपि॥
वायुभक्षो दिवा तिष्ठेद्रात्रिञ्चैवाप्सु सूर्य्यदृक्।
जप्त्वा सहस्रं गायत्र्याः शुद्धिर्ब्रह्मवधादृते॥
पर्णोडुम्बरविल्वैश्च कुशाश्वत्थपलाशयोः।
एतेषामुदकं पीत्वा पर्णकृच्छ्रन्तदुच्यते॥

पञ्चगव्यञ्च गोक्षीरं दधिमूत्रशकृद्घृतम्।
जग्ध्वा परेऽह्न्युपवसेदेष सान्तपनो विधिः॥
पृथक्सान्तपनैर्द्रव्यैः षड़हः सोपवासकः।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनं स्मृतम्॥
त्र्यहं सायं त्र्यहं प्रातस्त्र्यहं भुङ्क्ते त्वयाचितम्।
त्र्यहं परञ्च नाश्नीयात् प्राजापत्योविधिः स्मृतः॥
सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः।
अयाचिते चतुर्विंशः परेऽह्न्यनशनं स्मृतम्॥
कुक्कुटाण्डप्रमाणं स्याद्यावद्वास्य मुखं विशेत्।
एतद्ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम्॥
त्र्यहमुष्णं पिबेदापस्त्र्यहमुष्णं पिबेत् पयः।
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्रयम्॥
षट्पलानि पिबेदापस्त्रिपलं तु पयः पिबेत्।
पलमेकन्तु वै सर्पिस्तप्तकृच्छ्रं विधीयते॥
दध्ना च त्रिदिनं भुङ्क्ते त्र्यहं भुङ्क्ते च सर्पिषा।
क्षीरेण तु त्र्यहं भुङ्क्ते वायुभक्षो दिनत्रयम्।
त्रिपलं दधिक्षीरेण पलमेकं तु सर्पिषा।
एतदेव व्रतं पुण्यं वैदिकं कृच्छ्रमुच्यते॥
एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः।
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्।
द्वादशाहोपवासेन पराकः परिकीर्त्तितः॥
पिण्याकदधिशक्तूनां प्राशश्च प्रतिवासरम्।
एकैकमुपवासः स्यात् सौम्यकृच्छ्रः प्रकीर्त्तितः॥

एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्।
तुलापुरुषइत्येष ज्ञेयः पञ्चदशाहिकः॥
कपिलागोस्तु दुग्धाया धारोष्णं यत्पयः पिबेत्।
एष व्यासकृतः कृच्छ्रः श्वपाकमपि शोधयेत्॥
निशायां भोजनञ्चैव तज्ज्ञेयं नक्तमेव तु।
अनादिष्टेषु पापेषु चान्द्रायण मथोदितम्॥
अग्निष्टोमादिभिर्यज्ञैरिष्टैर्द्विगुणदक्षिणैः।
यत्फलं समवाप्नोति तथा कृच्छ्रैस्तपोधनः॥
वेदाभ्यासरतः क्षान्तो धर्म्मशास्त्राण्यवेक्षयेत्।
शौचाचारसमायुक्तो गृहस्थोऽपि हि मुच्यते॥
उक्तमेतद्द्विजातीनां महर्षे! श्रूयतामिति।
अतः परं प्रवक्ष्यामि स्त्रीशूद्रपतनानि च॥
जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम्॥
देवताराधनञ्चैव स्त्रीशूद्रपतनानि षट्॥
जीवद्भर्त्तरि या नारी उपोष्य व्रतचारिणी।
आयुष्यं हरते भर्त्तुः सा नारी नरकं व्रजेत्॥
तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत्।
शङ्करस्यापि विष्णोर्वा प्रयाति परमं पदम्॥
जीवद्भर्त्तरि वामाङ्गी मृते वापि सुदक्षिणे।
श्राद्धे यज्ञे विवाहे च पत्नी दक्षिणतः सदा॥
सोमः शौचं ददौ तासां गन्धर्व्वाश्च तथाङ्गिराः।
पावकः सर्व्वमेध्यं च मेध्यं वै योषितां सदा॥
जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विजउच्यते।
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च॥

वेदशास्त्राण्यधीते यः शास्त्रार्थञ्च निषेवते।
तदासौ वेदवित् प्रोक्तो वचनन्तस्य पावनम्॥
एकोऽपि वेदविद्धर्म्मं यं व्यवस्येद्‌द्विजोत्तमः।
स ज्ञेयः परमो धर्म्मो नाज्ञानामयुतायुतैः॥
पावकाद्दव दीप्यन्ते जपहोमैर्द्विजोत्तमाः।
प्रतिग्रहेण नश्यन्ति वारिणा इव पावकः॥
तान् प्रतिग्रहजान् दोषान् प्राणायामैर्द्विजोत्तमाः।
उत्सादयन्ति विद्वांसो वायु र्मेघानिवाम्बरे॥
भुक्त्वाचम्य यदा विप्र आर्द्रपाणिस्तु तिष्ठति।
लक्ष्मीर्बलं यशस्तेज आयुश्चैव प्रहीयते॥
यस्तु भोजनशालायामासनस्थउपस्पृशेत्।
तस्यान्नं नैव भोक्तव्यं भुक्त्वा चान्द्रायणञ्चरेत्॥
पात्रोपरिस्थितं पात्रं यः संस्थाप्य उपस्पृशेत्।
तस्यान्नं नैव भोक्तव्यं भुक्त्वा चान्द्रायणञ्चरेत्॥
न देवास्तृप्तिमायान्ति दातुर्भवति निष्फलम्।
हस्तं प्रक्षाल्य यस्त्वापः पिवेद्‌भुक्त्वा द्विजोत्तमः।
तदन्नमसुरैर्भुक्तं निराशाः पितरो गताः॥
नास्ति वेदात् परं शास्त्रं नास्ति मातुः परो गुरुः।
नास्ति दानात् परं मित्रमिह लोके परत्र च॥
अपात्रे ह्यपि यद्दत्तं दहत्यासप्तमं कुलम्।
हव्यं देवा न गृह्णन्ति कव्यञ्च पितरस्तथा॥
आयसेन तु पात्रेण यदन्नमुपदीयते।
अन्नं विष्ठासमं भोक्तुर्दाता च नरकं व्रजेत्॥
इतरेण तु पात्रेण दीयमानं विचक्षणः।

न दद्यादामहस्तेन आयसेन कदाचन ॥
मृण्मयेषु च पात्रेषु यः श्राद्धे भोजयेत् पितॄन् ।
अन्नदाता च भोक्ता च तावेव नरकं व्रजेत् ॥
अभावे मृण्मये दद्यादनुज्ञातस्तु तैर्द्विजैः ।
तेषां वचः प्रमाणं स्यात्कृतञ्चानृतमेव च ॥
सौवर्णायसताम्रेषु कांस्यरौप्यमयेषु च ।
भिक्षादातुर्न धर्म्मोऽस्ति भिक्षुर्भुङ्क्ते तु किल्बिषम् ॥
न च कांस्येषु भुञ्जीयादापद्यपि कदाचन ।
मलाशी यतयोऽश्नन्ति गृहस्थः कांस्यभाजने ॥
कांस्यकस्य च यत्पापं गृहस्थस्य तथैव च ।
कांस्यभोजी यतिश्चैव प्राप्नुयात् किल्बिषं तयोः ॥
अत्राप्युदाहरन्ति ॥ सौवर्णायसताम्रेषु कांस्यरौप्यमयेषु च ।
भुञ्जन् भिक्षुर्न दुष्येत दुष्येच्चैव परिग्रहात् ॥
यतिहस्ते जलं दद्याद्भिक्षां दद्यात् पुनर्जलम् ।
तद्भैक्षं मेरुणा तुल्य तज्जलं सागरोपमम् ॥
चरेन्माधुकरीं वृत्तिमपि म्लेच्छकुलादपि ।
एकान्नं नैव भोक्तव्यं बृहस्पतिकुलादपि ॥
अनापदि चरेद्यस्तु सिद्धं भैक्षं गृहे वसन् ।
दशरात्रं पिबेद्गव्यमापस्तु त्र्यहमेव च ॥
गोमूत्रेण तु संमिश्रं यावकं घृतपाचितम् ।
एतद्गव्यमिति प्रोक्तं भगवानत्रिरब्रवीत् ॥
ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥

षण्मासान् कामयेन्मर्त्यो गर्भिणीमिव च स्त्रियम्।
आदन्तजननादूर्द्ध्वमेवं धर्मो विधीयते॥
ब्रह्महा प्रथमश्चैव द्वितीयं गुरुतल्पगः।
तृतीयन्तु सुरापोऽयं चतुर्थं स्तेयमुच्यते॥
पापानाञ्चैव संसर्गः पञ्चमं पातकं महत्।
एषामेव विशुद्ध्यर्थं चरेद्वर्षाण्यनुक्रमात्॥
त्रीणि कृच्छ्राण्यकामश्चेद्ब्रह्महत्यां व्यपोहति।
अर्द्धन्तु ब्रह्महत्यायाः क्षत्रियेषु विधीयते॥
षड्भागो द्वादशश्चैव विट्शूद्रयोस्तथा भवेत्।
त्रीन् मासानक्तमश्नीयाद्भूमौ शयनमेव च॥
स्त्रीघातः शुद्ध्यतेऽप्येवं चरेत् कृच्छ्राब्दमेव च।
रजकः शैलुषश्चैव वेणुकर्मोपजीवनः॥
एतेषां यस्तु भुङ्क्ते वै द्विजश्चान्द्रायणञ्चरेत्।
सर्व्वान्त्यजानां गमने भोजने सम्प्रवेशने॥
पराकेण विशुद्धिः स्याद्भगवानत्रिरब्रवीत्।
चाण्डालभाण्डे यत्तोयं पीत्वा चैव द्विजोत्तमः॥
गोमूत्रयावकाहारः सप्तत्रिंशदहान्यपि।
संसृष्टं यस्तु पक्वान्नमन्त्यजैर्व्वाप्युदक्यया॥
अज्ञानाद्ब्राह्मणोऽश्नीयात् प्राजापत्यार्द्धमाचरेत्।
चाण्डालान्नं यदा भुङ्क्ते चातुर्वर्ण्यस्य निष्कृतिः॥
चान्द्रायणं चरेद्विप्रः क्षत्रः सान्तपनं चरेत्॥
षड्रात्रमाचरेद्वैश्यः पञ्चगव्यं तथैव च।
त्रिरात्रमाचरेच्छूद्रो दानं दत्त्वा विशुद्ध्यति॥
ब्राह्मणो वृक्षमारूढश्चाण्डालो मूलसंस्पृशः।

फलान्यत्ति स्थितं तत्र प्रायश्चित्तं कथं भवेत् ॥
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेत्।
नक्तभोजी भवेद्विप्रो घृतं प्राश्य विशुद्ध्यति ॥
एकवृक्षसमारूढश्चाण्डालो ब्राह्मणस्तथा।
फलान्यत्ति स्थितं तत्र प्रायश्चित्तं कथं भवेत् ॥
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेत्।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥
एकशाखासमारूढश्चाण्डालो ब्राह्मणो यदा।
फलान्यत्ति स्थितं तत्र प्रायश्चित्तं कथं भवेत् ॥
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥
स्त्रिया म्लेच्छस्य सम्पर्काच्छुद्धिः सान्तपने तथा।
तप्तकृच्छ्रं पुनः कृत्वा शुद्धिरेषाभिधीयते ॥
सम्वर्त्तेन यथा भार्य्यां गत्वा म्लेच्छस्य सङ्गताम्।
सचेलं स्नानमादाय घृतस्य प्राशनेन च ॥
स्नात्वा नद्युदकैस्सैव घृतं प्राश्य विशुद्ध्यति।
संगृहीतामपत्यार्थमन्यैरपि तथा पुनः ॥
चाण्डालम्लेच्छश्वपचकपालव्रतधारिणः।
अकामतः स्त्रियो गत्वा पराकेण विशुद्ध्यति ॥
कामतस्तु प्रसूतो वा तत्समो नात्र संशयः।
स एव पुरुष स्तत्र गर्भो भूत्वा प्रजायते ॥
तैलाभ्यक्तो घृताभ्यक्तो विण्मूत्रं कुरुते द्विजः।
तैलाभ्यक्तो घृताभ्यक्तश्चाण्डालं स्पृशते द्विजः।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥
केशकीटनखस्नायु अस्थिकण्टकमेव च।

स्पृष्ट्वा नद्युदके स्नात्वा घृतं प्राश्य विशुध्यति ॥
अस्थ्यास्थिजम्बुकाश्वीनि नखशुक्तिकपर्दिकाः।
स्पृष्ट्वा स्नात्वा हिमतप्तघृतं पीत्वा विशुध्यति ॥
गोकुले कन्दुशालायां तैलचक्रेक्षुचक्रयोः।
अमीमांस्यानि शौचानि स्त्रीणाञ्च व्याधितस्य च ॥
न स्त्री दूष्यति जारेण ब्राह्मणोऽवेदकर्मणा।
नापो मूत्रपुरीषाभ्यां नाग्निर्दहति कर्मणा ॥
पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः।
भुञ्जते मानवाः पश्चान्न ता दूष्यन्ति कर्हिचित् ॥
असवर्णैस्तु यो गर्भः स्त्रीणां योनौ निषेच्यते।
अशुद्धा सा भवेन्नारी यावद्गर्भं न मुञ्चति ॥
विमुक्ते तु ततः शल्ये रजश्चापि प्रदृश्यते।
तदा सा शुध्यते नारी विमलं काञ्चनं यथा ॥
स्वयं विप्रतिपन्ना या यदि वा विप्रतारिता।
बलान्नारी प्रभुक्ता वा चौरभुक्ता तथापि वा।
न त्याज्या दूषिता नारी न कामोऽस्या विधीयते ॥
ऋतुकाले उपासीत पुष्पकालेन शुध्यति ॥
रजकश्चर्मकारश्च नटो वरुड एव च।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ॥
एषां गत्वा स्त्रियो मोहाद्भुक्त्वा च प्रतिगृह्य च।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥
सकृद्भुक्ता तु या नारी म्लेच्छैर्वा पापकर्मभिः।
प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन तु ॥

बलाद्धृता स्वयं वापि परप्रेरितया यदि ।
सकृद्भुक्ता तु या नारी प्राजापत्येन शुद्ध्यति ॥
प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ।
न तेन तद्व्रतं तासां विनश्यति कदाचन ॥
मद्यसंस्पृष्टकुम्भेषु यत्तोयं पिबति द्विजः ।
कृच्छ्रपादेन शुद्ध्येत पुनः संस्कारमर्हति ॥
अन्त्यजस्य तु ये वृक्षा बहुपुष्पफलोपगाः ।
उपभोग्यास्तु ते सर्वे पुष्पेषु च फलेषु च ॥
चाण्डालेन तु संस्पृष्टं यत्तोयं पिबति द्विजः ।
कृच्छ्रपादेन शुद्ध्येत आपस्तम्बोऽब्रवीन्मुनिः ॥
श्लेष्मोपानद्विषम्मूत्रस्त्रीरजोमद्यमेव च ।
एभिः सन्दूषिते कूपे तोयं पीत्वा कथं विधिः ॥
एकं द्व्यहं त्र्यहञ्चैव द्विजातीनां विशोधनम् ।
प्रायश्चित्तं पुनश्चैव नक्तं शूद्रस्य दापयेत् ॥
सद्योवान्ते सचैलं तु विप्रस्तु स्नानमाचरेत् ।
पर्युषिते त्वहोरात्रमतिरिक्ते दिनत्रयम् ॥
शिरःकण्ठोरुपादांश्च सुरया यस्तु लिप्यते ।
दशषट्त्रितयैकाहं चरेदेवमनुक्रमात् ॥
अत्राप्युदाहरन्ति ॥ प्रमादान्मद्यपः सुरां सकृत्पीत्वा द्विजोत्तमः ।
गोमूत्रयावकाहारो दशरात्रेण शुद्ध्यति ॥
मद्यपस्य निषादस्य यस्तु भुङ्क्ते द्विजोत्तमः ।
न देवा भुञ्जते तत्र न पिबन्ति हविर्जलम् ॥
चितिभ्रष्टा तु या नारी ऋतुभ्रष्टा च व्याधितः ॥
प्राजापत्येन शुद्ध्येत ब्राह्मणान् भोजयेद्दश ॥

ये च प्रव्रजिता विप्राः प्रव्रज्याग्निजलावहाः ।
अनाशकान्निवर्त्तन्ते चिकीर्षन्ति गृहस्थितिम् ॥
धारयेत्त्रीणि कृच्छ्राणि चान्द्रायणमथापि वा ।
जातकर्म्मादिकं प्रोक्तं पुनः संस्कारमर्हति ॥
नाशौचं नोदकं नाश्रु नोपवादानुकम्पने ।
ब्रह्मदण्डहतानां तु न कार्य्यं कटधारणम् ॥
स्नेहं कृत्वा भयाद्विभ्यो यस्त्वेतानि समाचरेत् ।
गोमूत्रयावकाहारः कृच्छ्रमेकं विशोधनम् ॥
वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयम् ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् ॥
यस्यैकापि गृहे नास्ति धेनुर्वत्सानुचारिणी ।
मङ्गलानि कुतस्तस्य कुतस्तस्य तमःक्षयः ॥
अतिदोहातिवाहाभ्यां नासिकाभेदनेन वा ।
नदीपर्वतसंरोधमृते पादोनमाचरेत् ॥
अष्टागवं धर्म्महलं षड्गवं व्यावहारिकम् ।
चतुर्गवं नृशंसानां द्विगवं गववध्यकृत् ॥
द्विगवं वाहयेत् पादं मध्याह्नं तु चतुर्गवम् ।
षड्गवं तु त्रिपादोक्तं पूर्णाहस्त्वष्टभिः स्मृतः ॥
काष्ठलोष्ट्रशिलागोघ्नः कृच्छ्रं सान्तपनञ्चरेत् ।
प्राजापत्यं चरेन्मृत्स्ना अतिकृच्छ्रन्तु आयसैः ॥
प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम् ।
अनुडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम् ॥

शरभोष्ट्रहयान्नागान् सिंहशार्दूलगर्द्दभान्।
हत्वा च शूद्रहत्यायाः प्रायश्चित्तं विधीयते॥
मार्ज्जारगोधानकुलमण्डूकांश्च पतत्रिणः।
हत्वा त्र्यहं पिबेत् क्षीरं कृच्छ्रं वा पादिकञ्चरेत्॥
चाण्डालस्य च संस्पृष्टं विण्मूत्रस्पृष्टमेव वा।
त्रिरात्रेण विशुद्धिः स्याद्भुक्तोच्छिष्टं तथाचरेत्॥
वापीकूपतड़ागानां दूषितानाञ्च शोधनम्।
उद्धरेद्घटशतं पूर्णं पञ्चगव्येन शुद्ध्यति॥
अस्थिचर्म्मावसिक्तेषु खरश्वानादिदूषिते।
उद्धरेदुदकं सर्व्वं शोधनं परिमार्जनम्॥
गोदोहने चर्म्मपुटे च तोयं यन्त्राकरे कारुकशिल्पिहस्ते।
स्त्रीबालवृद्धाचरितानि यान्यप्रत्यक्षदृष्टानि शुचीनि तानि॥
प्राकाररोधे विषमप्रदेशे सेनानिवेशे भवनस्य दाहे।
आरब्धयज्ञेषु महोत्सवेषु तथैव दोषा न विकल्पनीयाः॥
प्रपास्वरण्ये भ्रूढकस्य कूपे द्रोण्यां जलं कोशविनिर्गतञ्च।
श्वपाकचण्डालपरिग्रहे तु पीत्वा जलं पञ्चगव्येन शुद्धिः॥
ईतोविण्मूत्रसंस्पृष्टं कौपं यदि जलं पिबेत्।
त्रिरात्रेणैव शुद्धिः स्यात् कुम्भे सान्तपनं तथा॥
छिन्नभिन्नशवं यत् स्यादज्ञानादुदकं पिबेत्।
प्रायश्चित्तं चरेत् पीत्वा तप्तकृच्छ्रं द्विजोत्तमः॥
उष्ट्रीक्षीरं खरीक्षीरं मानुषीक्षीरमेव च।
प्रायश्चित्तं चरेत् पीत्वा तप्तकृच्छ्रं द्विजोत्तमः॥
वर्णबाह्येन संस्पृष्ट उच्छिष्टस्तु द्विजोत्तमः।
पञ्चरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति॥

शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम्।
चर्म्मभाण्डैस्तु धाराभिस्तथा यन्त्रोद्धृतं जलम्॥
चण्डालेन तु संस्पृष्टः स्नानमेव विधीयते।
उच्छिष्टस्तु च संस्पृष्टस्त्रिरात्रेणैव शुद्ध्यति॥
आकराहृतवस्तूनि नाशुचीनि कदाचन।
आकराः शुचयः सर्व्वे वर्जयित्वा सुराकरम्॥
भ्रष्टाभ्रष्टयवाश्चैव तथैव चणकाः स्मृताः।
खर्ज्जूरञ्चैव कर्पूरमन्यद्भ्रष्टतरं शुचि॥
अमीमांस्यानि शौचानि स्त्रीभिराचरितानि च।
अदुष्टाः सततं धारा वातोद्धूताश्च रेणवः॥
बहूनामेव लग्नानामेकश्चेदशुचिर्भवेत्।
अशौचमेकमात्रस्य नेतरेषां कथञ्चन॥
एकपङ्क्त्य पविष्टानां भोजनेषु पृथक् पृथक्।
यद्येको लभते नीलीं सर्व्वे तेऽशुचयः स्मृताः॥
यस्य पटे पट्टसूत्रे नीलीरक्तोहि दृश्यते।
त्रिरात्रं तस्य दातव्यं शेषाश्चैवोपवासिनः॥
आदित्येऽस्तमिते रात्रावस्पृश्यं स्पृशते यदि।
भगवन्! केन शुद्धिः स्यात्ततो ब्रूहि तपोधन!॥
आदित्येऽस्तमिते रात्रौ स्पृशन् होनं दिवा जलम्।
तेनैव सर्व्वशुद्धिः स्याच्छवस्पृष्टन्तु वर्जयेत्॥
देशकालं वयः शक्तिं पापञ्चावेक्षयेत्ततः।
प्रायश्चित्तं प्रकल्प्यं स्याद्यस्य चोक्ता न निष्कृतिः॥
देवयात्राविवाहेषु यज्ञप्रकरणेषु च।
उत्सवेषु च सर्व्वेषु स्पृष्टास्पृष्टिर्न विद्यते॥

आरनालं तथा चीरं कन्दुकं दधिशक्तवः ।
स्नेहपक्वञ्च तक्रञ्च शूद्रस्यापि न दूष्यति ॥
आर्द्रमांसं घृतं तैलं स्नेहाश्च फलसम्भवाः ।
अन्त्यभाण्डस्थिता एते निष्क्रान्ताः शुद्धिमाप्नुयुः ॥
अज्ञानात् पिवति तोयं ब्राह्मणः शूद्रजातिषु ।
अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुद्ध्यति ॥
आहिताग्निस्तु यो विप्रो महापातकवान् भवेत् ।
अप्सु प्रक्षिप्य पात्राणि पश्चादग्निं विनिर्दिशेत् ॥
यो गृहीत्वाऽविवाहाग्निं गृहस्थ इति मन्यते ।
अन्नं तस्य न भोक्तव्यं वृथापाको हि सः स्मृतः ॥
वृथापाकस्य भुञ्जानः प्रायश्चित्तं चरेद्द्विजः ।
प्राणानप्सु त्रिराचम्य घृतं प्राश्य विशुद्ध्यति ॥
वैदिके लौकिके वापि हुतोच्छिष्टे जले क्षितौ ।
वैश्वदेवं प्रकुर्व्वीत पञ्चसूनापनुत्तये ॥
कनीयान् गुणवान् श्रेष्ठः श्रेष्ठश्चेन्निर्गुणो भवेत् ।
पूर्व्वं पाणिं गृहीत्वा च गृह्याग्निं धारयेद्बुधः ॥
ज्येष्ठश्चेद्यदि निर्दोषो गृह्णीयादग्निमग्रतः ।
नित्यं नित्यं भवेत्तस्य ब्रह्महत्या न संशयः ॥
महापातकसंस्पृष्टः स्नानमेव विधीयते ।
संस्पृष्टस्य यदा भुङ्क्ते स्नानमेव विधीयते ॥
पतितैः सह संसर्गं मासार्द्धं मासमेव वा ।
गोमूत्रयावकाहारो मासार्द्धेन विशुद्ध्यति ॥
कृच्छ्रार्द्धं पतितस्यैव सकृद्भुक्त्वा द्विजोत्तमः ।
अविज्ञानाच्च तद्भुक्त्वा कृच्छ्रं सान्तपनञ्चरेत् ॥

पतितान्नं यदा भुक्तं भुक्तं चाण्डालवेश्मनि।
मासार्द्धन्तु पिबेद्वारि इति शातातपोऽब्रवीत्॥
गोब्राह्मणहतानाञ्च पतितानां तथैव च।
अग्निना नच संस्कारः शङ्खस्य वचनं यथा॥
यश्चाण्डालीं द्विजो गच्छेत् कथञ्चित् काममोहितः।
त्रिभिः कृच्छ्रैर्विशुद्ध्येत प्राजापत्यानुपूर्व्वशः॥
पतिताच्चान्नमादाय भुक्त्वा वा ब्राह्मणो यदि।
कृत्वा तस्य समुत्सर्गमतिकृच्छ्रं विनिर्दिशेत्॥
अन्त्यहस्ताच्छ्रवे क्षिप्तं काष्ठलोष्ट्रतृणानि च।
न स्पृशेत्तु तथोच्छिष्टमहोरात्रं समाचरेत्॥
चाण्डालं पतितं म्लेच्छं मद्यभाण्डं रजस्वलाम्।
द्विजः स्पृष्ट्वा न भुञ्जीत भुञ्जानो यदि संस्पृशेत्॥
अतः परं न भुञ्जीत त्यक्त्वान्नं स्नानमाचरेत्।
ब्राह्मणैः समनुज्ञात स्त्रिरात्रमुपवासयेत्।
सघृतं यावकं प्राश्य व्रतशेषं समापयेत्॥
भुञ्जानः संस्पृशेद्यस्तु वायसं कुक्कुटं तथा।
त्रिरात्रेणैव शुद्धिः स्यादथोच्छिष्टस्त्वहेन तु॥
आरूढो नैष्ठिके धर्म्मे यस्तु प्रच्यवते पुनः।
चान्द्रायणं चरेन्मासमिति शातातपोऽब्रवीत्॥
पशुवेश्याभिगमने प्राजापत्यं विधीयते।
गवां गमने मनुप्रोक्तं व्रतं चान्द्रायणञ्चरेत्॥
अमानुषीषु गोवर्ज्जमुदक्यायामयोनिषु।
रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनञ्चरेत्॥
उदक्यां सूतिकां वापि अन्त्यजां स्पृशते यदि।

त्रिरात्रेणैव शुद्धिः स्याद्विधिरेष पुरातनः ॥
संसर्गं यदि गच्छेच्चेदुदक्याम्बा तथान्त्यजैः ।
प्रायश्चित्ती स विज्ञेयः पूर्वं स्नानं समाचरेत् ॥
एकरात्रञ्चरेन्मूत्रं पुरीषे तु दिनत्रयम् ।
दिनत्रयं तथा पाने मैथुने पञ्च सप्त वा ॥
भोजने तु प्रसक्तानां प्राजापत्यं विधीयते ।
दन्तकाष्ठे त्वहोरात्रमेष शौचविधिः स्मृतः ॥
रजस्वला यदा स्पृष्टा श्वानचण्डालवायसैः ।
निराहारा भवेत्तावत् स्नात्वा कालेन शुद्ध्यति ॥
रजस्वला यदा स्पृष्टा उष्ट्रजम्बुकशम्बरैः ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥
स्पृष्टं रजस्वलान्योन्यं ब्राह्मण्या ब्राह्मणी च या ।
एकरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥
स्पृष्टा रजस्वलान्योन्यं ब्राह्मण्या क्षत्रियी च या ।
त्रिरात्रेण विशुद्धिः स्याद्व्यासस्य वचनं यथा ॥
स्पृष्टा रजस्वलान्योन्यं ब्राह्मण्या वैश्यसम्भवा ।
चतूरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥
स्पृष्टा रसस्वलान्योन्यं ब्राह्मण्या शूद्रसम्भवा ।
षड्रात्रेण विशुद्धिः स्याद्ब्राह्मणीकामकारतः ॥
अकामतश्चरेद्दैवं ब्राह्मणी सर्वतः स्पृशेत् ॥
चतुर्णामपि वर्णानां शुद्धिरेषा प्रकीर्त्तिता ॥
उच्छिष्टेन तु संस्पृष्टो ब्राह्मणो ब्राह्मणेन यः ।
भोजने मूत्रचारे च शङ्खस्य वचनं यथा ॥
स्नानं ब्राह्मणसंस्पर्शे जपहोमौ तु क्षत्रिये ।

वैश्ये नक्तञ्च कुर्व्वीत शूद्रे चैव उपोषणं ॥
चर्म्मको रजको वैणो धीवरो नटकस्तथा।
एतान् स्पृष्ट्वा द्विजो मोहादाचामेत् प्रयतोऽपि सन् ॥
एतैः स्पृष्टो द्विजो नित्यमेकरात्रं पयः पिवेत्।
उच्छिष्टैस्त्रिरात्रं स्याद्घृतं प्राश्य विशुद्ध्यति ॥
यस्तु छायां श्वपाकस्य ब्राह्मणस्त्वधिगच्छति।
तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुद्ध्यति ॥
अभिशस्तो द्विजोऽरण्ये ब्रह्महत्याव्रतं चरेत्।
मासोपवासं कुर्व्वीत चान्द्रायणमथापि वा ॥
वृथामिथ्योपयोगेन भ्रूणहत्याव्रतञ्चरेत्।
अब्भक्षो द्वादशाहेन पराकेणैव शुद्ध्यति ॥
शठञ्च ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत्।
निर्गुणं सगुणो हत्वा पराकव्रतमाचरेत् ॥
उपपातकसंयुक्तो मानवो म्रियते यदि।
तस्य संस्कारकर्त्ता च प्राजापत्यद्वयञ्चरेत् ॥
अभुञ्जानोऽतिसस्नेहं कदाचित् स्पृशते द्विजः।
त्रिरात्रमाचरेन्नक्तैर्निस्नेहमथ वाचरेत् ॥
विड़ालकाकाद्युच्छिष्टं जग्ध्वा श्वनकुलस्य च।
केशकीटावपन्नञ्च पिवेद्ब्राह्मीं सुवर्च्चसं ॥
उष्ट्रयानं समारुह्य खरयानञ्च कामतः।
स्नात्वा विप्रो जितश्वासः प्राणायामेन शुद्ध्यति ॥
सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह।
त्रिःपठेद्वा यतप्राणः प्राणायामः स उच्यते ॥
अक्षद्विगुणगोमूत्रं सर्पिर्दद्याच्चतुर्गुणं।

क्षीरमष्टगुणं देयं पञ्चगव्ये तथा दधि ॥
पञ्चगव्यं पिवेच्छूद्रो ब्राह्मणस्तु सुरां पिवेत्।
उभौ तौ तुल्यदोषौ च वसतो नरके चिरं ॥
अजा गावो महिष्यश्च अमेध्यं भक्षयन्ति याः।
दुग्धं हव्ये च कव्ये च गोमयं न विलेपयेत् ॥
अनस्तनीमधिकां वा या चान्या स्तनपायिनी।
तासां दुग्धं न होतव्यं हुतं चैवाहुतं भवेत् ॥
ब्राह्मौदने च सोमे च सीमन्तोन्नयने तथा।
जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥
राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्चसं।
स्वसुतान्नञ्च यो भुङ्क्ते स भुङ्क्ते पृथिवीमलं ॥
स्वसुता अप्रजाता च नाश्नीयात्तद्गृहे पिता।
अन्नं भुङ्क्ते तु मायायां पूयं स नरकं व्रजेत् ॥
अधीत्य चतुरो वेदान् सर्व्वशास्त्रार्थतत्त्ववित्।
नरेन्द्रभवने भुक्त्वा विष्ठायां जायते कृमिः ॥
नवश्राद्धे त्रिपक्षे च षण्मासे मासिकेऽब्दिके।
पतन्ति पितरस्तस्य यो भुङ्क्ते नापदि द्विजः ॥
चान्द्रायणं नवश्राद्धे पराको मासिके तथा।
त्रिपक्षे चैव कृच्छ्रः स्यात् षण्मासे कृच्छ्रमेव च।
आब्दिके पादकृच्छ्र स्यादेकाहः पुनराब्दिके ॥
ब्रह्मचर्य्यमनाधाय मासश्राद्धेषु पर्व्वसु।
द्वादशाहे त्रिपक्षेऽब्दे यस्तु भुङ्क्ते द्विजोत्तमः ॥
पतन्ति पितरस्तस्य ब्रह्मलोके गता अपि ॥
एकादशाहेऽहोरात्रं भुक्त्वा संचयने त्र्यहं।

उपोष्य विधिवद्विप्रः कुष्माण्डीं जुहुयाद्घृतं ॥
पक्षे वा यदि वा मासे यस्य नाश्नन्ति वै द्विजाः ।
भुक्त्वा दुरात्मनस्तस्य द्विजश्चान्द्रायणं चरेत् ॥
यत्र वेदध्वनिध्वान्तं नच गोभिरलङ्कृतम् ।
यत्र बालैः परिवृतं श्मशानमिव तद्गृहं ॥
हास्येऽपि बहवो यत्र विनाऽधर्म्मं वदन्ति हि ।
विनापि धर्म्मशास्त्रेण स धर्म्मः पावनः स्मृतः ॥
हीनवर्णे च यः कुर्य्यादज्ञानादभिवादनं ।
तत्र स्नानं प्रकुर्व्वीत घृतं प्राश्य विशुद्ध्यति ॥
समुत्पन्ने यदा स्नाने भुङ्क्ते वापि पिबेद्यदि ।
गायत्र्यष्टसहस्रं तु जपेत् स्नात्वा समाहितः ॥
अङ्गुल्या दन्तकाष्ठञ्च प्रत्यक्षं लवणं तथा ।
मृत्तिकाभक्षणञ्चैव तुल्यं गोमांसभक्षणं ॥
दिवा कपित्थच्छायायां रात्रौ दधिशमीषु च ।
कार्पासं दन्तकाष्ठञ्च विष्णोरपि हरेच्छ्रियं ॥
सूर्य्यवातनखाग्राम्बु स्नानवस्त्रघटोदकं ।
मार्जनीरेणुकेशाम्बु हन्ति पुण्यं दिवाकृतं ॥
मार्जनीरजकेशाम्बु देवतायतनोद्भवं ।
तेनावगुण्ठितं तेषु गङ्गाम्भःप्लुतएव सः ॥
मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषिकस्थले ।
अन्तर्जले श्मशानान्ते वृक्षमूले सुरालये ।
वृषभैश्च तथोत्खाते श्रेयस्कामैः सदा बुधैः ॥
शुचौ देशे तु संग्राह्या कर्कराश्मविवर्जिता ॥
पुरीषे मैथुने होमे प्रस्रावे दन्तधावने ।

स्नानभोजनजप्येषु सदा मौनं समाचरेत् ॥
यस्तु संवत्सरं पूर्णं भुङ्क्ते मौनेन सर्व्वदा ।
युगकोटिसहस्रेषु स्वर्गलोके महीयते ॥
स्नानं दानं जपं होमं भोजनं देवतार्च्चनं ।
प्रौढपादो न कुर्व्वीत स्वाध्यायं पितृतर्पणं ॥
सर्व्वस्वमपि यो दद्यात् पातयित्वा द्विजोत्तमं ।
नाशयित्वा तु तत् सर्व्वं भ्रूणहत्याफलं लभेत् ॥
ग्रहणोद्वाहसंक्रान्तौ स्त्रीणाञ्च प्रसवे तथा ।
दानं नैमित्तिकं ज्ञेयं रात्रौ चापि प्रशस्यते ॥
क्षौमजं वाथ कार्पासं पट्टसूत्रमथापि वा ।
यज्ञोपवीतं यो दद्याद्वस्त्रदानफलं लभेत् ॥
कांस्यस्य भाजनं दद्याद्घृतपूर्णं सुशोभनम् ।
तथा भक्त्या विधानेन अग्निष्टोमफलं लभेत् ॥
श्राद्धकाले तु यो दद्याच्छोभनौ च उपानहौ ।
स गच्छत्यन्यमार्गेऽपि अन्नदानफलं लभेत् ॥
तैलपात्रं तु यो दद्यात् संपूर्णन्तु समाहितः ।
स गच्छति ध्रुवं स्वर्गं नरो नास्त्यत्र संशयः ॥
दुर्भिक्षे अन्नदाता च सुभिक्षे च हिरण्यदः ।
पानीयदस्त्वरण्ये च स्वर्गलोके महीयते ।
यावदर्द्धप्रसूता गौस्तावत् सा पृथिवी स्मृता ।
पृथिवीं तेन दत्ता स्यादीदृशीं गान्ददाति यः ॥
तेनाग्नयो हुताः सम्यक् पितरस्तेन तर्पिताः ॥
देवाश्च पूजिताः सर्व्वे यो ददाति गवाह्निकं ॥
जन्मप्रभृति यत्पापं मातृकं पैतृकं तथा ।

तत् सर्व्वं नश्यति क्षिप्रं वस्त्रदानान्न संशयः ॥
कृष्णाजिनञ्च यो दद्यात् सर्व्वोपस्करसंयुतम्।
उद्धरेन्नरकस्थानात् कुलान्येकोत्तरं शतम् ॥
आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः।
शूलपाणिस्तु भगवानभिनन्दन्ति भूमिदम् ॥
वालुकानां कृता राशि र्यावत् सप्तर्षिमण्डलम्।
शते वर्षे शते चैव पलमेकं विशीर्य्यति ॥
क्षयश्च दृश्यते तस्य कन्यादानेन चैव हि।
आतुरे प्राणदाता च त्रीणि दानफलानि च ॥
सर्व्वेषामेव दानानां विद्यादानं ततोऽधिकम्।
पुत्रादिस्वजने दद्याद्विप्राय च न कैतवे ॥
सकामः स्वर्गमाप्नोति निष्कामो मोक्षमाप्नुयात्।
ब्राह्मणे वेदविदुषि सर्व्वशास्त्रविशारदे ॥
मातृपितृपरे चैव ऋतुकालाभिगामिनि।
शीलचारित्रसंपूर्णे प्रातःस्नानपरायणे ॥
तस्यैव दीयते दानं यदीच्छेच्छ्रेय आत्मनः ॥
संपूज्य विदुषो विप्रानन्येभ्योऽपि प्रदीयते।
तत्कार्य्यं नैव कर्त्तव्यं न दृष्टं न श्रुतं मया ॥
अतः परं प्रवक्ष्यामि श्राद्धकर्म्मणि ये द्विजाः
पितृणामक्षयं दानं दत्तं येषान्तु निष्फलम् ॥
न हीनाङ्गो न रोगी च श्रुतिस्मृतिविवर्जितः।
नित्यञ्चानृतवादी च तांस्तु श्राद्धे न भोजयेत् ॥
हिंसारतं च कपटं उपगूह्य श्रुतं च यः।
किङ्करं कपिलं काणं श्वित्रिणं रोगिणन्तथा ॥

दुश्चर्माणं शीर्णकेशं पाण्डुरोगं जटाधरं ।
भारवाहकमुग्रञ्च द्विभार्य्यं वृषलीपतिं ॥
भेदकारी भवेच्चैव बहुपीड़ाकरोऽपि वा ।
हीनातिरिक्तगात्रोवा तमप्यपनयेत्तथा ॥
बहुभोक्ता दीनमुखो मत्सरी क्रूरबुद्धिमान् ।
एतेषां नैव दातव्यः कदाचिद्वै प्रतिग्रहः ॥
अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः ।
अदूष्यं तं यमः प्राह पङ्क्तिपावन एव सः ॥
श्रुतिः स्मृतिश्च विप्राणां नयने द्वे प्रकीर्त्तिते ।
काणः स्यादेकहीनोऽपि द्वाभ्यामन्धः प्रकीर्त्तितः ॥
न श्रुतिर्न स्मृतिर्यस्य न शीलं न कुलं यतः ।
तस्य श्राद्धं न दातव्यं त्वन्धकस्यात्रिरब्रवीत् ॥
तस्माद्वेदेन शास्त्रेण ब्राह्मण्यं ब्राह्मणस्य तु ।
न चैकेनैव वेदेन भगवानत्रिरब्रवीत् ॥
योगस्थैर्लोचनैर्युक्तः पादाप्यञ्च प्रयच्छति ।
लौकिकञ्चैव शास्त्रोक्तं पश्येच्चैवाधरोत्तरं ।
वेदैश्च ऋषिभिर्गीतं दृष्टिमान् शास्त्रवेदवित् ॥
व्रतिनञ्च कुलीनञ्च श्रुतिस्मृतिरतं सदा ।
तादृशं भोजयेच्छ्राद्धे पितॄणामक्षयं भवेत् ॥
यावतो ग्रसते ग्रासान् पितॄणां दीप्ततेजसाम् ।
पिता पितामहश्चैव तथैव प्रपितामहः ।
नरकस्था विमुच्यन्ते ध्रुवं यान्ति त्रिपिष्टपम् ॥
तस्माद्विप्रं परीक्षेत श्राद्धकाले प्रयत्नतः ॥
न निर्व्वपति यः श्राद्धं प्रमीतपितृको द्विजः ।

दृन्दुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः॥
सूर्य्ये कन्यागते कुर्य्याच्छ्राद्धं यो न गृहाश्रमी।
धनं पुत्रान् कुलं तस्य पितृनिश्वासपीड़या॥
कन्यागते सवितरि पितरो यान्ति सत्सुतान्।
शून्या प्रेतपुरी सर्व्वा यावद्वृश्चिकदर्शनम्॥
ततो वृश्चिकसंप्राप्ते निराशाः पितरोगताः।
पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम्॥
पुत्रं वा भ्रातरं वापि दौहित्रं पौत्रकं तथा।
पितृकार्य्ये प्रसक्ता ये ते यान्ति परमां गतिम्॥
यथा निर्मन्थनादग्निः सर्व्वकाष्ठेषु तिष्ठति।
तथा स दृश्यते धर्म्मःश्राद्धदानान्न संशयः॥
सर्व्वशास्त्रार्थगमनं सर्व्वतीर्थावगाहनम्।
सर्व्वयज्ञफलं विन्द्याच्छ्राद्धदानान्न संशयः॥
महापातकसंयुक्तो यो युक्तश्चोपपातकैः।
घनैर्मुक्तो यथा भानूराहुमुक्तश्च चन्द्रमाः॥
सर्व्वपापविनिर्म्मुक्तः सर्व्वपापं विलङ्घयेत्।
सर्व्वसौख्यं स्वयं प्राप्तः श्राद्धदानान्न संशयः॥
सर्व्वेषामेव दानानां श्राद्धदानं विशिष्यते।
मेरुतुल्यं कृतं पापं श्राद्धदानं विशोधनम्॥
श्राद्धं कृत्वा तु मर्त्त्यो वै स्वर्गलोके महीयते॥
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्।
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं भवेत्॥
एतत् सर्व्वं मया ख्यातं श्राद्धकाले समुत्थिते।
वैश्वदेवे च होमे च देवताभ्यर्च्चने जपे॥

अमृतं तेन विप्रान्नमृग्यजुःसामसंस्कृतम् ॥
व्यवहारानुपूर्वेण धर्म्मेण बलिभिर्जितम् ।
क्षत्रियान्नं पयस्तेन घृतान्नं यन्नपालने ॥
देवो मुनिर्द्विजो राजा वैश्यं शूद्रो निषादकः ।
पशुर्म्लेच्छोऽपि चाण्डालो विप्रा दशविधाः स्मृताः ॥
सन्ध्यां स्नानं जपं होमं देवतानित्यपूजनम् ।
अतिथिं वैश्वदेवञ्च देवब्राह्मण उच्यते ॥
शाके पत्रे फले मूले वनवासे सदा रतः ।
निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते ॥
वेदान्तं पठते नित्यं सर्वसङ्गं परित्यजेत् ।
साङ्ख्ययोगविचारस्थः स विप्रो द्विज उच्यते ॥
अस्त्राहताश्च धन्वानः संग्रामे सर्वसंमुखे ।
आरम्भे निर्जिता येन स विप्रः क्षत्र उच्यते ॥
कृषिकर्म्मरतो यश्च गवाञ्च प्रतिपालकः ।
वाणिज्यव्यवसायश्च स विप्रो वैश्यउच्यते ॥
लाक्षालवणसंमिश्रं कुसुम्भं क्षीरसर्पिषः ।
विक्रेता मधुमांसानां स विप्रः शूद्र उच्यते ॥
चौरश्च तस्करश्चैव सूचको दंशकस्तथा ।
मत्स्यमांसे सदालुब्धो विप्रो निषाद उच्यते ॥
ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्व्वितः ।
तेनैव स च पापेन विप्रः पशुरुदाहृतः ॥
वापीकूपतड़ागानामारामस्य सरःसु च ।
निःशङ्कं रोधकश्चैव स विप्रो म्लेच्छ उच्यते ॥
क्रियाहीनश्च मूर्खश्च सर्वधर्म्मविवर्जितः ।

निर्दयः सर्वभूतेषु विप्रश्चाण्डालउच्यते ॥
वेदैर्विहीनाश्च पठन्ति शास्त्रं शास्त्रेण हीनाश्च पुराणपाठाः।
पुराणहीनाः कृषिणो भवन्ति भ्रष्टास्ततो भागवता भवन्ति ॥
ज्योतिर्विदो ह्यथर्व्वाणः कीराः पौराणपाठकाः।
श्राद्धे यज्ञे महादाने वरणीयाः कदाच न ॥
श्राद्धञ्च पितरं घोरं दानं चैव तु निष्फलम्।
यज्ञे च फलहानिः स्यात्तस्मात्तान् परिवर्जयेत् ॥
आविकश्चित्रकारश्च वैद्यो नक्षत्रपाठकः।
चतुर्विप्रा न पूज्यन्ते बृहस्पतिसमा यदि।
मागधो माथुरश्चैव कापटः कौटकानजौ।
पञ्च विप्रा न पूज्यन्ते बृहस्पतिसमा यदि ॥
क्रयक्रीता च या कन्या पत्नी सा न विधीयते।
तस्यां जाताः सुतास्तेषां पितृपिण्डं न विद्यते ॥
अष्टशल्यागतो नीरं पाणिना पिवते द्विजः।
सुरापानेन तत्तुल्यं तुल्यं गोमांसभक्षणम् ॥
ऊर्द्धजङ्घेषु विप्रेषु प्रक्षाल्य चरणद्वयम्।
तावच्चाण्डालरूपेण यावद्गङ्गां न मज्जति ॥
दीपशय्यासनच्छाया कार्पासं दन्तधावनम्।
अजारेणुस्पृशं चैव शक्रस्यापि श्रियं हरेत् ॥
गृहाद्दशगुणं कूपं कूपाद्दशगुणं तटम्।
तटाद्दशगुणं नद्यां गङ्गासंख्या न विद्यते।
स्रवदुयद्ब्राह्मणं तोयं रहस्यं क्षत्रियं तथा।
वापीकूपे तु वैश्यस्य शौद्रं भाण्डोदकं तथा ॥
तीर्थस्नानं महादानं यच्चान्यत्तिलतर्पणम्।

अष्टमैकं न कुर्व्वीत महागुरुनिपाततः ॥
गङ्गा गया त्वमावस्या वृद्धिश्राद्धे क्षयेऽहनि ।
मघापिण्डप्रदानं स्यादन्यत्र परिवर्ज्जयेत् ॥
घृतं वा यदि वा तैलं पयोवा यदि वा दधि ।
चत्वारो ह्याज्यसंस्थानं हुतं नैव तु वर्जयेत् ॥
श्रुत्वैतानृषयो धर्म्मान् भाषितानत्रिणा स्वयम् ।
इदमूचुर्महात्मानं सर्वे ते धर्म्मनिष्ठिताः ॥
य इदं धारयिष्यन्ति धर्म्मशास्त्रमतन्द्रिताः ।
इह लोके यशः प्राप्य ते यास्यन्ति त्रिपिष्टपम् ॥
विद्यार्थी लभते विद्यां धनकामो धनानि च ।
आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियम् ॥

इति श्रीअत्रिमहर्षिस्मृतिः समाप्ता ।

श्रीरामचन्द्राय नमः ॥

—००—

अथ वृद्धात्रेयस्मृतिप्रारम्भः ॥

अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ! ।
प्रसीद सुमुखोनाथ ! ज्ञानदृष्टिप्रदो भव ॥
हुताग्निहोत्रमासीन मत्रिं श्रुतवतां वरम् ।
उपगम्य प्रपृच्छन्ति ऋषयः संशितव्रताः ॥
भगवन् ! केन दानेन जप्येन नियमेन च ।
शुध्यन्ति पातकैर्युक्ता स्तद्ब्रूहि त्वं महामुने
अपि ख्यापितदोषाणां पापानां महतां तथा ।
सर्वेषां चोपपातानां शुद्धिं वक्ष्यामि तत्वतः ॥
प्राणायामैः पवित्रैश्च दानैर्होमैर्जपैस्तथा ।
शुद्धिकामाः प्रमुच्यन्ते पापेभ्यश्च द्विजर्षभाः॥
प्राणायामान् पवित्रांश्च व्याहृतिं प्रणवं तथा ।
पवित्रपाणिरासीनो ह्यभ्यसेद्ब्रह्म नैत्यिकं ॥
आवर्तयेत्सदा विप्रः प्राणायामान् पुनः पुनः ।
आकेशादानखाग्राच्च तपस्तप्यत उत्तमम् ॥
निरोधाज्जायते वायु र्वायोरग्निर्हि जायते ।
अग्नेरापोऽभिजायन्ते ततोऽन्तः शुध्यते त्रिभिः ॥
त्वक्चर्ममांस रुधिर मेदोमज्जास्थिभिः कृताः ।
तथेन्द्रियकृता दोषाः दह्यन्ते प्राणनिग्रहात् ॥

प्राणायामै र्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।
प्रत्याहारेण विषयान् ध्यानेनानीश्वरान् गुणान् ॥
नच तीव्रेण तपसा न स्वाध्यायैर्नचेज्यया ।
गतिं गन्तुं द्विजाः शक्ता योगात्संप्राप्नुवन्ति याम् ॥
योगात्संप्राप्यते ज्ञानं योगाद्धर्मस्य लक्षणम् ।
योगः परं तपो नित्यं तस्माद्युक्तः सदा भवेत् ॥
प्रणवाद्या स्तथा देवाः प्रणवे पर्युपस्थिताः ।
वाङ्मयः प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत् ॥
प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु ।
त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित् ।
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥
गायत्री ब्राह्मणी प्रोक्ता पावनं परमं त्रयम् ।
सव्याहृति सप्रणवां गायत्रीं शिरसा सह ॥
त्रिःपठेदायतः प्राणः प्राणायामः स उच्यते ।

इति वृद्धात्रेयस्मृतौ प्रथमोऽध्यायः ॥

प्राणायामांस्तु यः कुर्याद्यथाविधि समाहितः ।
अहोरात्रकृतं पापं तत्क्षणादेव नश्यति ॥
कर्मणा मनसा वाचा यदेनः कुरुते निशि ।
उत्तिष्ठन् पूर्वसन्ध्यायां प्राणायामै स्तु शुध्यति
प्राणायामैः स्वमात्मानं संयम्यास्ते पुनः पुनः ॥
दश द्वादशभिर्वापि चतुर्विंशात्परं तपः
कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च त्रिचं प्रति ॥
कूश्माण्डं पावमानंच सुरापोऽपि हि शुध्यति
सकृज्जप्त्वास्य वामीयं शिवसङ्कल्पमेवच ॥
सुवर्णं मपहृत्यापि क्षणाद्भवति निर्मलः ॥

हविष्यांस्तु यमभ्यस्य न तमस्य इतीतिच।
सूक्तं तु पौरुषं जप्त्वा मुच्यते गुरुतल्पगः॥
सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोड़श।
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः।
अथवाप्सु निमज्जन्त स्त्रिः पठेदघमर्षणम्॥
यथाश्वमेधः क्रतुराट्ताहृशं मनुरब्रवीत्।
आरम्भयज्ञः चत्रस्य हविर्यज्ञो विशामपि॥
पाकयज्ञस्तु शूद्राणां जपयज्ञो द्विजोत्तमे।
आरम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः॥
उपांशु स्याच्छतगुणः सहस्रो मानसः स्मृतः।
उपांशुस्तु चलज्जिह्वादशनच्छद ईरितः॥
निर्विकारेण वक्त्रेण मनसा मानसः स्मृतः।
सहस्रं परमां देवीं शतमध्यं दशावराम्॥
गायत्रीं यः पठेद्विप्रः न स पापेन लिप्यते।
चत्रियो बाहुवीर्येण तरेदापदमात्मनः॥
वित्तेन वैश्यशूद्रौ तु जपहोमै र्द्विजोत्तमः।
यथाश्वा रथहीनास्तु रथो वाश्वैर्यथा विना॥
एवं तपोऽप्यविद्यस्य विद्या वाप्यतपस्विनः।
यथान्नं मधुसंयुक्तं मधु वान्नेन संयुतम्॥
एवं तपश्च विद्याच संयुक्तं भेषजं महत्।
विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपतत्परम्॥
कुत्सितैरपि वर्तन्तं एनो न प्रतियुज्यते॥

इति वृद्धात्रियस्मृतौ द्वितीयोऽध्यायः॥

अथाकार्यशतं साग्रं कृतं वेदश्च साध्यति ।
सर्वं हिनस्ति वेदाग्निर्दहत्यग्निरिवेन्धनम् ॥
यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् ।
तथा दहन्ति वेदज्ञाः कर्मजं दोषमात्मनः ॥
यथा महाह्रदे लोष्टं क्षिप्रमप्सु विनश्यति ।
एवमात्मकृतं पापं त्रयी दहति देहिनः ॥
न वेदबलमाश्रित्य पापकर्मरतो भवेत् ।
अज्ञानाच्च प्रमादाच्च दहेत्कर्म च नेतरत् ॥
तपस्तपति योऽरण्ये मुनिर्मूलफलाशनः ।
ऋचमेकां च योऽधीते तच्छतानि च तत्फलम् ॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥
याजनाध्यापनाद्दानात्तथैवाहुः प्रतिग्रहात् ।
विप्रेषु नभवेद्दोषो ज्वलनार्कसमा द्विजाः ।
शङ्कास्थाने समुत्पन्ने भक्ष्यभोज्यप्रतिग्रहे ।
आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु ।
सर्ववेदपवित्राणि वक्ष्याम्यहमतः परम्
एषां जपैश्च होमैश्च शुध्यन्ति मलिना जनाः ॥
अघमर्षणं देवव्रतं शुद्धवत्यः शरत्समाः ।
कुष्माण्डाः पावमानाश्च दुर्गासावित्रयापि च ॥
शतरुद्रमथर्वशिरसं त्रिसुपर्णमहाव्रतम् ॥
अतिष्ठन् गाः पदस्तोमाः सामनि व्याहृतिस्तथा ॥

गारुडानि च सामानि गायत्रीं रैवतन्तथा ॥
पुरुषव्रतञ्च भावञ्च तथा वेदव्रतानि च ॥
अब्लिङ्गा वार्हस्पत्यञ्च वाक्सूक्तञ्च ब्रुवंस्तथा ॥
गोसूक्तञ्चाश्वसूक्तञ्च इन्द्रशुद्दे च सामनि ।
त्रीण्याज्यदोहानि रथन्तरं अग्नेर्व्रतं वामदेव्यंवृहच्च ॥
एतानि जप्यानि पुनाति पापांज्जातिस्मरत्वं लभते यदिच्छेत् ।
अग्नेरपत्यं प्रथमं सुवर्णः भूर्वैष्णवी सूर्यसुताश्च गावः ॥
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गाञ्च महीञ्च दद्यात् ॥
सर्वेषा मेव दानानामेकजन्मानुगं फलम् ॥
हाटकक्षितिधेनूनां सप्तजन्मानुगं फलम् ।
सर्वकामफला वृक्षा नद्यः पायसकर्दमाः ॥
काञ्चना यत्र प्रासादा स्तत्र गच्छन्ति गोप्रदाः ।
वैशाख्यां पौर्णमास्यान्तु ब्राह्मणान् सप्त पञ्च वा ॥
तिलान् क्षौद्रेण संयुक्तांस्तर्पयित्वा यथाविधि ।
प्रीयतां धर्मराजेति तद्दे श्मनि स वर्द्धते ॥
यावज्जीवकृतं पापन्तत्क्षणादेव नश्यति ।
सुवर्णानि तु यो दद्यात् सुमुखं कृतमङ्गलम् ॥
तिलैर्दद्यात्तु यो भूमिन्तस्य पुण्यफलं शृणु ।
ससुवर्णा धरा धेनुः सशैलवनकानना ॥
या तु सागरपर्यन्ता भवेद्दत्ता न संशयः ।
तिलान् कृष्णाजिने कृत्वा सुवर्णमधुसर्पिषः ॥
ददाति यस्तु विप्राय सर्वन्तरति दुष्कृतम् ।

इति वृद्धात्रेयस्मृतौ तृतीयोऽध्यायः ॥

अथातो रहस्यप्रायश्चित्तानि व्याख्यास्यामः सामान्य मगम्यागमनन्दुरन्नभोजनात्तौ रहस्यौ रहस्यं प्रकाशस्वा वनमनुतिष्ठेत्। अथवाप्सुनिमज्जन् स मन्त्रोऽयं त्रिरावृत्य शुध्येत्। गोवैश्यवधे कन्यादूषणे इन्द्रशुच इत्यपः पीत्वा मुच्यते॥

वेदस्यैव गुणं जप्त्वा सद्यः शोधनमुच्यते।
एकादशगुणान्वापि रुद्रानावृत्य शुध्यति॥

महापातकोपपातकेभ्यो मलिनीकरणेभ्यो मुच्येत। द्रुपदा नाम गायत्री वेदे वाजसनेयके त्रिः कृत्वाऽन्तर्जले प्रोच्य विमुच्येत महैनसः॥

ब्राह्मणीगमने स्नालोदकुम्भान् ब्राह्मणाय दद्यात् चत्रियावैश्यागमने तापसांस्त्रिरावृत्य शुध्यति॥ शूद्रागमने अघमर्षणं त्रिरावृत्य शुध्यति। गुरुदारान् गत्वा वृषभद्वादशा हत्या शुध्यति अपेयं पीत्वा अघमर्षणेनापः पीत्वा विशुध्यति

अशक्तः प्रायश्चित्ते सर्वरात्रमनुशोच्य शुध्येत॥ अग्निसोम इन्द्रसोम इति जपित्वा कन्यादूषी विमुच्यते॥

सोमं राजानमिति जपित्वा विषदा अग्निदाश्च विमुच्यन्ते॥

सर्वेषामेव पापानां सङ्करे समुपस्थिते॥
दशसाहस्रमभ्यस्ता गायत्री शोधनी परा।
ब्रह्महा गुरुतल्पी वाऽगम्यागामी तथैव च॥
स्वर्णस्तेयी च गोघ्नश्च तथा विस्रम्भघातकः।
शरणागतघाती च कूटसाची त्वकार्यकृत्॥
एवमाद्येषु चान्येषु पापेष्वभिरतश्चिरम्।
प्राणायामांस्तु यः कुर्यात् सूर्यस्योदयनं प्रति॥
सूर्यस्योदयनं प्राप्य निर्मला धौतकल्मषाः।

भवन्ति भास्कराकारा विधूमा इव पावकाः॥
न हि ध्यानेन सदृशं पवित्रमिह विद्यते।
श्वपाकेष्वपि भुञ्जानो ध्यानेनैवात्र लिप्यते॥
ध्यानमेव परो धर्म्मो ध्यानमेव परन्तपः।
ध्यानमेव परं शौचं तस्माद्‌ध्यानपरो भवेत्॥
सर्वपापप्रसक्तोऽपि ध्यायन् निमिषमुच्यते।
पुनस्तपस्वी भवति पङ्‌क्तिपावनपावनः॥

इति वृद्धात्रेयस्मृतौ चतुर्थोऽध्यायः।

चतुरस्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य च॥
वर्त्तुलं चैव वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्।
ब्रह्मा विष्णुश्च रुद्रश्च श्रीर्हुताशन एव च॥
मण्डलान्युपभुञ्जन्ते तस्मात् कुर्वन्ति मण्डलम्।
यातुधानाः पिशाचाश्च क्रूराश्चैव तथा सुराः॥
हरन्ति रसमन्नस्य मण्डलेन विवर्जितम्।
गोमयैर्मण्डलं कृत्वा भोक्तव्यमिति निश्चितम्॥
यत्र क्व पति तस्यान्नं भुक्त्वा चान्द्रायणं चरेत्।
यतिश्च ब्रह्मचारी च पक्वान्नस्वामिना वुभौ॥
तयोरन्नमदत्त्वातु भुक्त्वा चान्द्रायणं चरेत्।
यतिहस्ते जलं दद्याद्भैक्षं दद्यात् पुनर्जलम्॥
तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम्।
वामहस्तेन यो भुङ्क्ते पयः पिवति यो द्विजः॥
सुरापानेन तत्तुल्यमित्येवं मनुरब्रवीत्।
हस्तदत्तास्तु ये स्नेहा लवणं व्यञ्जनानि च।

दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्तेच किल्बिषम् ॥
अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमन्त्रितम् ।
ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् ॥
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत् ।
अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतम् ॥
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् ।
शूद्रान्ने नोदरस्थेन योऽधिगच्छति मैथुनम् ॥
यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रः प्रवर्त्तते ।
शूद्रान्नरसपुष्टाङ्गोऽधीयानोऽपि च नित्यशः ॥
जुह्वचापि जपंश्चापि गतिमूर्द्ध्वां न विन्दति ।
यस्त्रिवेदमधीयानः शूद्रान्नमुपभुञ्जते ॥
शूद्रो वेदफलं याति शूद्रत्वं चाधिगच्छति ।
मृतसूतकपुष्टाङ्गो द्विजः शूद्रान्नभोजी च ॥
अहमेवं न जानामि कां कां योनिं गमिष्यति ।
श्वानस्तु सप्त जन्मानि नव जन्मानि शूकरः ॥
गृध्रोऽष्टादश जन्मानि इत्येवं मनुरब्रवीत् ।
परपाकमुपासन्ते ये द्विजा गृहमेधिनः ॥
ते वै खरत्वं गृध्रत्व श्वत्व चानुभवन्ति हि ।
श्राद्धं दत्त्वाच भुक्त्वाच मैथुनं योऽधिगच्छति ॥
भवन्ति पितरस्तस्य तन्मासे रेतसोभुजः ।
उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन ॥
भुमौ निधाय तद्द्रव्यमाचान्तः शुचितामियात् ।
स्पृशन्ति विन्दवः पादौ य आचामयतः परान् ॥
भूमिगैस्ते समाज्ञाता न तैरप्रयतोभवेत् ।

आचान्तोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् ॥
उद्धृतेऽप्यशुचिस्तावद्यावन्नमण्डलशोधनम्।
आसने पादमारोप्य ब्राह्मणो यस्तु भुञ्जते ॥
मुखेन वमितं चान्नं तुल्यं गोमांसभक्षणम्।
उपदंशान्नशेषं वा भोजने मुखनिःसृतम् ॥
द्विजातीनामभोज्यं तत् भुक्त्वा चान्द्रायणं चरेत्।
पीतशेषंतु यत्तोयं ब्राह्मणः पिबते पुनः ॥
अपेयं तद्भवेदम्भः पीत्वा चान्द्रायणं चरेत्।
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ॥
आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात्।
अनार्द्रपादशयनो दीर्घां श्रियमवाप्नुयात् ॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रियः प्रत्यङ्मुखो भुङ्क्ते ऋतंभुङ्क्ते उदङ्मुखः॥
शवि शवगृहं गत्वा श्मशाने वान्तरेऽपि वा।
आतुरं व्यञ्जनं कृत्वा दूरस्थोऽप्यशुचिर्भवेत् ॥
अतिक्रान्ते दशाहे तु त्रिरात्र मशुचिर्भवेत्।
संवत्सरेऽप्यतीते तु स्पृष्ट्वैवापो विशुध्यति ॥
अशुद्धः स्वयमपान्यानशुद्धांश्च यदि स्पृशेत्।
स शुध्यत्युपवासेन भुङ्क्ते कृच्छ्रेण स द्विजः ॥
सूतकं सुतके स्पृष्ट्वा स्नानं शावे च सूतके।
भुक्त्वा पीत्वा तदज्ञानादुपवासो त्र्यहं भवेत् ॥
मृण्मयानां च पात्राणां दाहे शुद्धिरिहेष्यते।
स्नानादिषु प्रयुक्तानां त्यागएव विधीयते ॥
सूतके मृतके चैव मृतके च प्रसूतके।

तस्मात्तु संहताशौचे मृताशौचे न शुध्यति॥
सूतकाद् द्विगुणं शावं शावाद्‌द्विगुणमार्तवम्।
आर्तवाद्‌द्विगुणं सूति स्ततोऽधिशवदाहकः॥
अनुगम्येच्छया प्रेत मज्ञातीबन्धुमेवच।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥
रजसा शुध्यते नारी नदी वेगेन शुध्यति।
भस्मना शुध्यते कांस्यं पुनः पाकेन मृण्मयं॥
उदन्वदम्भसा स्नानं क्षुरकर्म तथैवच।
अन्तर्वत्नयाः रतीकुर्वन्नप्रजा भवति ध्रुवं॥
दम्पत्योः शिशुना सार्द्धं सूतके दशमेऽहनि।
स्नानं चौरं पिता कुर्याद् भवेद्दानादियोग्यता॥
केशादि दूषिते तीरे न कुर्यात्तिलतर्पणं।
जलमध्ये जलं देयं पितृणां जलमिच्छतां॥
रात्रिं कुर्य्यात् त्रिभागन्तु द्वौ भागौ पूर्वएवतु।
उत्तरांशः प्रभातेन युज्यते ऋतुसूतके॥
यदि पर्शिरष्टतुं पूर्वं क्रूरवारे मृतिः स्मृता।
स्नात्वेन्द्रं व्रतमादाय देवताभ्यो निवेदयेत्।
अपूप लवणं मुद्गं गुडमिश्रं तथा हविः॥
दत्त्वा ब्राह्मणपत्नीभ्यो निशि भोजन मेवच।
चतुर्थेऽहनि कर्तव्या ऋतुशान्तिश्च यत्नतः।
पुण्याहं वाचयित्वा तु होतव्यं यज्ञिमिच्छता।
विवाहे वितते तन्त्रे होमकाल उपस्थिते।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः।
हविषत्वा स्नापयित्वा त्वन्यवस्त्रैरलङ्कृताम्।

शुद्धाना माहुतिं कृत्वा ततः कम प्रवर्त्तते ॥
प्रथमेऽहनि चण्डाली द्वितीये ब्रह्मघातकी।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥
आर्त्तवाभिप्लुतां नारीं चण्डालम्पतितं शुनम्।
भोज्यान्तरे तु सम्पृशन् स्नात्वा वाचस्पतिं जपेत् ॥
आर्त्तवाभिप्लुतां नारीं दृष्ट्वा भुङ्क्ते तु कामतः ॥
तदन्नं छर्दयित्वा तु कुशवारि पिबेदपः।
ये तां दृष्ट्वा तु यो भुङ्क्ते प्राजापत्यं विशोधनम् ॥
आर्त्तवाभिप्लुतां नारी मार्त्तवाभिप्लुताभिधः।
भाषते यदि संमोहा दुपवासस्तयोर्भवेत् ॥
उदक्यायाः करेणाथ भुक्त्वा चान्द्रायणं चरेत्।
प्राजापत्य मसत्याच्चेत् त्रिरात्रं स्पृष्टभोजने ॥
तद्वस्त्रभोजने चैव त्रिगुणं सह भोजने।
चतुर्गुणं तदुच्छिष्टे पानीयेऽप्यर्द्ध मेवच ॥
उदक्यायाः समीपस्थ मन्नं भुक्त्वा त्वकामतः।
उपवासेन शुद्धिः स्यात्पिवेद् ब्रह्म सुवर्चसं ॥
आर्त्तवा यदि चण्डाल मुच्छिष्टात्तु प्रपश्यति।
आस्नानकालान्नाश्नीयादासीना वाग्यता बहिः ॥
पादकृच्छ्रं ततः कुर्याद् ब्रह्म कूर्च पिवेत् पुनः।
ब्राह्मणान् भोजयेत्पश्चाद्द्विप्राणा मनुशासनात् ॥
आर्त्तवाभिप्लुतां नारी मार्त्तवाभिप्लुता स्पृशेत्।
स्नात्वोपवासं कुर्यातां पञ्चगव्येन शुध्यतः ॥
कृच्छ्रमेकञ्चरेत्सा तु तदर्द्धं चान्तरीकृते।
आतुरा या ऋतुर्भुत्वा स्नानकर्म कथं भवेत् ॥

स्नात्वा स्नात्वा पुनः स्पृशेत् दशकृत्वस्त्वनातुराः ।
वस्त्रापनयनं कृत्वा भस्मना परिमार्जनम् ॥
दत्त्वातु शक्तितो दानं पुण्याहेन विशुध्यति
ब्राह्मणानां करैर्मुक्तं तोयं शिरसि धारयेत् ॥
सर्वतीर्थतटात्पुण्याद्विशिष्टतरमुच्यते ।
रजस्वलायाः प्रेतायाः संस्कारं नाचरेद्द्विजः ॥
ऊर्ध्वं त्रिरात्रात् स्नातायाः शावधर्मेण दाहयेत् ।
रजस्वले च द्वे स्पृष्टे चातुर्वर्ण्यस्य याः स्त्रियः ॥
अतिकृच्छ्रं चरेत् पूर्वं कृच्छ्रमेकं क्रमेण तु ।
रजस्वलायाः स्नातायाः पुनरेव रजस्वला ॥
विंशतेर्दिवसादूर्ध्वं त्रिरात्रमशुचिर्भवेत् ।
प्रसूतिका तु या नारी स्नानतो विंशतेः परम् ॥
रजस्वला तु सा प्रोक्ता प्राक्तु नैमित्तिकं रजः ।
शुद्धा नारी शुद्धवासाः पुनरार्तवदर्शने ॥
वस्त्रं तु मलिनं त्यक्त्वा तिलमाप्लुत्य शुध्यति ।
आतुर स्नानसंप्राप्तौ दशकृत्व स्त्वनातुरः ॥
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्धो भविष्यति ।
चन्द्रसूर्यग्रहे नाद्यात् स्नात्वा मुक्ते तु भुञ्जते ॥
अमुक्तयो रस्तगयो रद्याद् दृष्ट्वा परेऽहनि ।
यस्य स्वजन्मनक्षत्रे गृह्येते शशिभास्करौ ॥
व्याधिः प्रवाहे मृत्युश्च दारिद्र्यञ्च महद्भयम् ।
तस्माद्दानं च होमञ्च देवताभ्यर्चनं जपम् ॥
कुर्यात्तस्मिन् दिने युक्तो तस्य शान्तिर्भविष्यति ।
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ॥

यो नरः स्नाति तत्तीर्थे समुद्रे सेतुबन्धने ।
उपोष्य रजनीमेकां राहुग्रस्ते दिवाकरे ॥
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।
सोमेऽप्येवं सूर्यतुल्यं तस्मात् सर्वं समाचरेत् ॥

इति वृद्धात्रेयस्मृतौ पञ्चमोऽध्यायः ॥

इति श्रीवृद्धात्रेयप्रोक्तं धर्मशास्त्रं सम्पूर्णम् ॥

विष्णुस्मृतिः ॥

महामते ! महाप्राज्ञ ! सर्वशास्त्रविशारद ! ॥
अक्षीणकर्मबन्धस्तु पुरुषो द्विजसत्तम ! ।
सततं किं जपन् जप्यं विबुधः किमनुस्मरन् ॥
मरणे यज्जपं जपरं यच्च भाव मनुस्मरन् ।
यच्चध्यात्वा द्विजश्रेष्ठ ! पुरुषो मृत्यु मागतः ॥
परम्पद मवाप्नोति तन्मे वद महामुने : ।
शौनक उवाच ॥ इदमेव महाराज ! पृष्टवांस्ते पितामहः ॥
भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ॥
युधिष्ठिर उवाच ॥ पितामह! महाप्राज्ञ! सर्वशास्त्र विशारद! ॥
प्रयाणकाले यच्चिन्त्यं सूरिभि स्तत्वचिन्तकैः ।
किन्नु स्मरन् कुरुश्रेष्ठ ! मरणे पर्युपस्थिते ॥
प्राप्नुयात् परमां सिद्धिं श्रोतु मिच्छामि तद्वद ॥
भीष्म उवाच ॥ अद्भुतं च हितं सूक्ष्मं उक्तं प्रश्नं त्वयानघ! ।
शृणुष्वावहितो राजन् ! नारदेन पुरा श्रुतम् ॥
श्रीवत्साङ्कं जगद्बीज मनन्तं लोकसाक्षिणम् ।
पुरा नारायणं देवं नारदः परिपृष्टवान् ॥
नारद उवाच ॥ त्वमक्षरं परं ब्रह्म निर्गुणं तमसः परम् ।
आहुर्वेद्यं परं धाम ब्रह्मादि कमलोद्भवम् ॥
भगवन् ! भूतभव्येश ! श्रद्दधानै र्जितेन्द्रियैः ।

कथं भक्तैर्विचिन्त्योऽसि योगिभिर्देहमोक्षिभिः ॥
किंच जप्यं जपेन्नित्यं कल्यमुत्थाय मानवः ।
कथं युञ्जन् सदा ध्यायन् ब्रूहि तत्त्वं सनातनम् ॥
भीष्म उवाच ॥ श्रुत्वा तस्य तु देवर्षेर्वाक्यं वाचस्पतिः स्वयम् ।
प्रोवाच भगवान् विष्णुर्नारदं वरदः प्रभुः ॥
श्रीभगवानुवाच ॥—
हन्त ते कथयिष्यामि इमां दिव्यामनुस्मृतिम् ।
मरणे मामनुस्मृत्य प्राप्नोति परमां गतिम् ॥
यामधीत्य प्रयाणे तु मद्भावायोपपद्यते ।
ओङ्कार मग्रतः कृत्वा मां नमस्कृत्य नारद ! ॥
एकाग्रः प्रयतो भूत्वा इमं मन्त्र मुदीरयेत् ।
श्रवणेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
ओमित्येव परं ब्रह्म शाश्वतं परमव्ययम् ।
एतदुच्चारयन्मर्त्यो ब्रह्मभूयाय कल्पते ॥
ब्रह्मा विष्णुश्च रुद्रश्च सर्वमो मिति चोच्यते ।
सम्पन्नेऽसुरसंयाने नम्यते च मुमुक्षुभिः ॥
मोक्षश्च ज्ञानिनां प्रोक्तो मोहश्चाज्ञानिनां स्मृतः ।
यस्य यादृग्विधो भाव स्तस्य तादृग्विधो हरिः ॥
भवे भवनविश्वात्मा भूतानां हितकाम्यया ।
सृजते आत्मनात्मान मात्मन्येव स्वमायया ।
हरिरेव सतां नित्यं शरण्यः शरणार्थिनाम् ॥
नहि नारायणादन्य स्त्रिषु लोकेषु विद्यते ।
वसत्यक्षतमव्ययं यस्मिन् लोकाः ससागराः ॥

तएव सृजते लोकान् सृष्टिकाले जगत्प्रभुः ।
तेजांसि येन दिव्यन्ते महोत्पन्नेन तेजसा ॥
वासुदेवात्मकं सर्वं तत्तेजोऽपि हि नान्यथा ।
वासनाद्या स्तु ये भावाः संभवन्ति युगे युगे ॥
लोकत्रयहितार्थाय स्वोपकाराय नो हरिः ।
यतश्चोत्पद्यते विश्वं यस्मिन्नेव प्रलिप्यते ॥
चराचरविसृष्टस्तु सोऽच्युतः पुरुषोत्तमः ।
अव्यक्तं शाश्वतं देवं प्रभवं पुरुषोत्तमम् ॥
प्रपद्ये प्राञ्जलिर्विष्णु मक्षय्यं भक्तवत्सलम् ।
पुराणं पुरुषं दिव्य मद्भुतं लोकपावनम् ॥
प्रपद्ये पुण्डरीकाक्षं देवं नारायणं हरिम् ।
लोकनाथं सहस्राक्ष मक्षरं परमं पदम् ॥
भगवन्तं प्रपन्नोऽस्मि भूतभव्यप्रभुं विभुम् ।
स्रष्टारं सर्वलोकाना मनन्तं विश्वतोमुखं ॥
पद्मनाभं हृषीकेशं प्रपद्ये सत्यमच्युतम् ।
हिरण्यगर्भ ममृतं भूगर्भं परतः परम् ॥
प्रभुं विभुमनाद्यन्तं प्रपद्ये तं रविप्रभम् ।
सहस्रशीर्षं पुरुषं महर्षिं सत्यभावनम् ॥
प्रपद्ये सूक्ष्ममचलं वरेण्य मभयप्रदम् ।
नारायणं पुराणेशं योगात्मानं सनातनम् ॥
संज्ञानां सर्वसत्वानां प्रपद्ये ध्रुवमीश्वरम् ।
यः प्रभुः सर्वलोकानां येन सर्वमिदं ततम् ॥
चराचरगुरुर्देवः स मे विष्णुः प्रसीदतु ।
यस्मादुत्पद्यते ब्रह्मा पद्मयोनिः पितामहः ॥

ब्रह्मयोनिर्हि विश्वस्य स मे विष्णुः प्रसीदत ।
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच ॥
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।
पर्जन्यः पृथिवी सस्यं कालो धर्मः क्रियाक्रिये ॥
गुणाकरः स मे विष्णुर्वासुदेवः प्रसीदतु ।
अग्निसोमार्कताराणां ब्रह्मरुद्रेन्द्रयोगिनां ॥
यस्तेजयति तेजांसि स मे विष्णुः प्रसीदतु ॥
कार्य्यं क्रियाच करणं कर्त्ता हेतुः प्रयोजनम् ।
अक्रिया करणी कार्यं स मे विष्णुः प्रसीदतु ॥
शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ।
रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु ।
अबलो येन बालेन कंसमल्लो महाबलः ॥
चाणूरो निहतो रङ्गे स मे विष्णुः प्रसीदतु ।
शङ्खः करवरे यस्य स मे विष्णुः प्रसीदतु ॥
येन क्रान्तास्त्रयो लोका दानवाश्च वशीकृताः ॥
शरणं सर्वभूतानां स मे विष्णुः प्रसीदतु ।
योगावास ! नमस्तुभ्यं सर्वावास ! वरप्रद ! ॥
सर्वादि वासनाद्यादि वासुदेव ! प्रधानकृत् ।
यज्ञगर्भ ! हिरण्याङ्ग ! पञ्चयज्ञ ! नमोऽस्तु ते ॥
चतुर्मूर्त्तिः परन्धाम लक्ष्मानन्दवरार्चित ! ।
अजस्त्वमगमः पन्था ह्यमूर्त्तिर्विश्वमूर्त्तिधृक् ॥
श्रीकर्तः ! पञ्चकालज्ञ ! नमस्ते ज्ञानसागर ! ।
अव्यक्ताद्व्यक्तमुत्पन्नमव्यक्तादयः परोऽक्षरः ॥
यस्मात्परतरन्नास्ति तमस्मि शरणं गतः ।

न प्रधानो नच महान् पुरुषश्चेतनो ह्यजः ॥
अनयोर्यः परतरस्तमस्मि शरणं गतः ।
चिन्तयन्तोऽपि यन्नित्यं ब्रह्मेशानादयः प्रभुम् ॥
निश्चयं नाधिगच्छन्ति तमस्मि शरणं गतः ।
जितेन्द्रिया जितात्मानो ज्ञानध्यानपरायणाः ॥
यं प्राप्य न निवर्त्तन्ते तमस्मि शरणं गतः ।
एकांशेन जगत् कृत्स्नमवष्टभ्य विभुः स्थितः ॥
अग्राह्यो निर्गुणो नित्यस्तमस्मि शरणं गतः ।
सोमार्काग्निगतन्तेजो या च तारामयी द्युतिः ॥
दिवि संजायते यो यः स महात्मा प्रसीदतु ।
सूर्यमध्यस्थितः सोमस्तस्य मध्ये च या स्थिता ॥
भूतवाह्याचरा दीप्तिः स महात्मा प्रसीदतु ।
सगुणो निर्गुणश्चासौ लक्ष्मीवान् चेतनो ह्यजः ॥
सूक्ष्मः सर्वगतो देही स महात्मा प्रसीदतु ।
साङ्ख्ययोगाश्च ये चान्ये सिद्धाश्च परमर्षयः ॥
यं विदित्वा विमुच्यन्ते स महात्मा प्रसीदतु ।
अव्यक्तः समधिष्ठाता ह्यचिन्त्यः सदसत्परः ॥
आस्थितः प्रकृतिं भुङ्क्ते स महात्मा प्रसीदतु ।
क्षेत्रज्ञः पञ्चधा भुङ्क्ते प्रकृतिं पञ्चभिर्मुखैः ॥
निर्विकार ! नमस्तेऽस्तु साक्षिवत्त्रिभुवस्थितः ।
अतीन्द्रिय ! नमस्तुभ्यं लिङ्गैर्व्यक्तैर्न मीयसे ॥
येच त्वां नाभिजानन्ति संसारे सञ्चरन्ति ते ।
कामक्रोधविनिर्मुक्ता भक्तास्त्वां प्रविशन्ति च ॥
अव्यक्तमत्यहङ्कारा मनोभूतेन्द्रियाणि च ।

त्वयि तानि चलेषु त्वं नतेषुत्वं नते त्वयि ॥
एकत्वान्यत्वनानात्वं ये विदु र्यान्ति ते परम् ।
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ॥
समत्वमभिकाङ्क्षन्तभक्त्या वै नान्यचेतसः ।
चराचरमिदं सर्वं भूतग्रामञ्चतुर्विधम् ॥
त्वया त्वय्येव तत्प्रोतं सूत्रे मणिगणाइव ।
स्रष्टा ! भोक्तासि कूटस्थो ह्यतत्वस्तत्वसंज्ञितः ॥
अकर्ता हेतुरचरः पृथगात्मन्यवस्थितः ।
न मे भूतेषु संयोगो न भूतत्वगुणाधिकः ॥
अहङ्कारेण बुद्ध्या वा न मे योगास्त्रिभिर्गुणैः ।
न मे धर्मो ह्यधर्मो वा नारम्भोजन्मवा पुनः ॥
जरामरणमोक्षार्थं त्वां प्रपन्नोऽस्मि सर्वगः ।
विषयैरिन्द्रियैर्वापि न मे भूयः समागतः ॥
ईश्वरोऽसि जगन्नाथ ! किमतः परमुच्यते ।
भक्तानां यद्धितं देव ! तद्देहि त्रिदशेश्वर ! ॥
पृथिवीं यातु मे घ्राणं यातु मे रसनञ्जलम् ।
रूपं हुताशनं यातु स्पर्शो यातुच मारुतम् ॥
श्रोत्रमाकाशमप्येतु मनो वैकारिकं पुनः ।
इन्द्रियाणि गुणान् यातु स्वासु स्वासु च योनिषु ॥
पृथिवी यातु सलिलमापोऽग्नि मनलोऽनिलम् ।
वायुराकाशमप्येतु मनश्चाकाशमेवच ॥
अहङ्कारं मनो यातु मोहनं सर्वदेहिनाम् ।
अहङ्कारस्तथा बुद्धिं बुद्धिरव्यक्तमेवच ॥
प्रधाने प्रकृतिं याते गुणसाम्ये व्यवस्थिते ॥

स्वयम्विबुद्धश्च पठेद्यत्र तत्र समभ्यसेत् ।
मरणे समनुप्राप्ते यस्त्विमामनुसंस्मरेत् ॥
अपि पापसमाचारः स याति परामाङ्गतिम् ।
यद्यहङ्कारमाश्रित्य यज्ञदानतपःक्रियाः ॥
कुर्व्वंस्तत्फलमाप्नोति पुनरावर्त्तते नतु ।
अभ्यर्चयन् पितॄन्देवान् पठन् जुह्वन् बलिन्ददन् ॥
ज्वलदग्निं स्मरेद्यो मां लभते परमाङ्गतिम् ।
यज्ञोदानं तपः कर्म पावनानि मनोषिणाम् ॥
यज्ञोदानं तपस्तस्मात्कुर्यादाशाविवर्जितः ।
पौर्णमास्याममावास्यां द्वादश्यां च विशेषतः ॥
श्रावयेच्छ्रद्धधानांश्चमद्भक्तांश्च विशेषतः ।
नम इत्येव यो ब्रूयान्मद्भक्तः श्रद्धयान्वितः ॥
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि नारद ! ।
किं पुनर्ये यजन्ते मां साधकाविधिपूर्व्वकम् ॥
श्रद्धावन्तो यतात्मान स्ते मां यान्ति मदाश्रिताः ।
कर्माण्याद्यन्तवन्तीह मद्भक्तोऽनन्तमश्नुते ॥
मामेव तस्माद्देवर्षे । ध्याहि नित्यमतन्द्रितः ।
अवाप्स्यसि तपःसिद्धिं लप्स्यसेच पदं मम ।
अज्ञाना मिच्छया ज्ञानं दद्याद्धर्मोपदेशनम् ॥
कृत्स्नां वा पृथिवीं दद्यात्तेन तुल्यं न तत्फलम् ।
अस्मात् प्रदेयं साधुभ्यो जन्मबन्धभयापहम् ॥
अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ।
नासौ फल मवाप्नोति मद्भक्तैर्यदवाप्यते ॥
भीष्म उवाच॥ एव पृष्टः पुरा तेन नारदेन सुरर्षिणा ।

यदुवाच तथा शम्भुस्तदुक्तं तव सुव्रत ! ॥
त्वमप्येकमना भूत्वा ध्येयं ज्ञेयं गुणाधिकम् ।
भज सर्वेण भावेन परमात्मान मव्ययम् ॥
श्रुत्वैतत् नारदो वाक्यं दिव्यं नारायणेरितम् ।
अत्यन्तभक्तिमान् देवे एकान्तित्व मुपेयिवान् ॥
नारायण मृषीन् देवं दशवर्षाण्यनन्यभाक् ।
इदं जपन्वै प्राप्नोति तद्विष्णोः परमम्पदम् ॥
किं तस्य बहुभिर्मन्त्रैः किं तस्य बहुभिर्व्रतैः ।
नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ॥
नारायणाय नम ओ मिति वेदमन्त्रं
यो नित्यमेव मनसापि समभ्यसेच्च
पापैः प्रमुच्य परमे त्वपयातिविष्णोः-
स्थानं हि सर्वं मिति वेदविदो वदन्ति ॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
यो नित्यं ध्यायते देव ! नारायण मनन्यधीः ॥
चीरवासा जपी वापि त्रिदण्डी मुण्ड एववा ।
भूषितो वा द्विजश्रेष्ठ ! न लिङ्गं धर्मकारणम् ॥
ये नृशंसा दुरात्मानः पापधर्मविवर्जिताः ।
तेऽपि यान्ति परं स्थानं नारायणपरायणाः ॥
अन्यथा मन्दबुद्धीनां प्रतिभाति दुरात्मनाम् ।
कुतर्कभ्रान्तदृष्टीनां विभ्रान्तेन्द्रियवर्त्मनाम् ॥
नमो नारायणायेति ये विदुर्ब्रह्म शाश्वतम् ।
अन्तकाले जपन्नेति तद्विष्णोः परमं पदम् ॥
आचारहीनोऽपि मुनिप्रवीर ! भक्त्या विहीनोऽपितु विन्दतोऽपि ।

'कीर्त्य' नारायणशब्दमात्रं विमुक्तपापो विशतेऽच्युतां गतिम् ॥

कान्तारवनदुर्गेषु कृत्स्नेष्वापत्सु संयुगे।

दस्युभिः सन्निरोधेच नामभि र्मां प्रकीर्तयेत् ॥

न दिव्यपुरुषो धीमान् येषु स्थानेषु मां स्मरेत् ।

चौरव्याघ्र महासर्पैः क्रूरैरपि न बाध्यते ॥

जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः ।

नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥

नामास्ति याति शक्तिश्च पापे निर्हरणे हरेः ।

श्वपचोऽपि नरः कर्तुं क्षमस्तावन्न किल्बिषम् ॥

न तावत् पापमस्तीह यावन्नामहतं हरेः ।

अतिरेक भयादाहुः प्रायश्चित्तान्तरं बुधाः ॥

गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः ।

अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः ॥

न वासुदेवात्परमस्ति मङ्गलं न वासुदेवात्परमस्ति पावनम् ।

न वासुदेवात्परमस्ति दैवतं न वासुदेवं प्रणिपत्य सीदति ॥

इमां रहस्यां परमामनुस्मृतिं ह्यधीत्य बुद्धिं लभतेच नैष्ठिकम् ।

विहाय दुःखानि विमुच्य सङ्कटात्

स वीतरागो विचरेन्महीमिमाम् ।

गङ्गायां मरणं चैव दृढा भक्ति श्च केशवे

ब्रह्मविद्याप्रबोधश्च नाल्पस्य तपसः फलम् ॥

इति विष्णुस्मृतिः समाप्ता ॥

श्रीगणेशाय नमः।

ब्रह्मरात्र्यां व्यतीतायां प्रवुद्धे पद्मसम्भवे।
विष्णुः सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलानुगाम्॥
जलक्रीड़ारुचि शुभं कल्पादिषु यथा पुरा।
वाराहमास्थितोरूपमुज्जहार वसुन्धराम्॥
वेदपादो यूपदंष्ट्रः क्रतुवक्त्रश्चितामुखः।
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः॥
अहोरात्रेक्षणो दिव्यो वेदाङ्गश्रुतिभूषणः।
आज्यनासः स्रुवस्तुण्डः सामघोषमहास्वनः॥
धर्म्मसत्यमयः श्रीमान् क्रमविक्रमसत्कृतः।
प्रायश्चित्तमयो वीरः प्रांशुजानुर्महावृषः॥
उद्गातन्त्रो होमलिङ्गो वीजौषधिमहाफलः।
वेद्यन्तरात्मा मन्त्रस्फिग्विकृतः सोमशोणितः॥
वेदस्कन्धो हविर्गन्धो हव्यकव्यादिवेगवान्।
प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरन्वितः॥
दक्षिणाहृदयो योगमहामन्त्रमयो महान्।
उपाकर्म्मोष्ठरुचिरः प्रवर्ग्यावर्त्तभूषणः॥
नानाच्छन्दोगतिपथो गुह्योपनिषदासनः।
छायापत्नीसहायोऽसौ मणिशृङ्ग इवोदितः॥
महीं सागरपर्य्यन्तां सशैलवनकाननाम्।
एकार्णवजलभ्रष्टामेकार्णवगतः प्रभुः॥

दंष्ट्राग्रेण समुद्धृत्य लोकानां हितकाम्यया।
आदिदेवो महायोगी चकार जगतीं पुनः॥
एवं यज्ञवराहेण भूत्वा भूतहितार्थिना।
उद्धृता पृथिवी सर्व्वा रसातलगता पुरा॥
उद्धृत्य निश्चले स्थाने स्थापिता च तथा स्वके।
यथास्थानं विभज्यापस्तद्गता मधुसूदनः॥
सामुद्राश्च समुद्रेषु नादेयाश्च नदीषु च।
पल्वलेषु च पाल्वल्यः सरःसु च सरोवराः॥
पातालसप्तकं चक्रे लोकानां सप्तकं तथा।
द्वीपानामुदधीनाञ्च स्थानानि विविधानि च॥
स्थानपालांल्लोकपालान्नदीशैलवनस्पतीन्।
ऋषींश्च सप्त धर्म्मज्ञान् वेदान् साङ्गान् सुरासुरान्॥
पिशाचोरगगन्धर्व्वयक्षराक्षसमानुषान्।
पशुपक्षिमृगाद्यांश्च भूतग्रामं चतुर्व्विधम्॥
मेघेन्द्रचापसम्पातान् यज्ञांश्च विविधांस्तथा॥
एवं वराहो भगवान् कृत्वेदं सचराचरम्।
जगज्जगाम लोकानामविज्ञातां तदा गतिम्॥
अविज्ञातां गतिं याते देवदेवे जनार्द्दने।
वसुधा चिन्तयामास का धृतिर्म्मे भविष्यति॥
पृच्छामि कश्यपं गत्वा स मे वक्ष्यत्यसंशयम्।
मदीयां वहते चिन्तां नित्यमेव महामुनिः॥
एवं स निश्चयं कृत्वा देवी स्त्रीरूपधारिणी।
जगाम कश्यपं द्रष्टुं दृष्टवांस्ताञ्च कश्यपः॥
नीलपङ्कजपत्राक्षीं शारदेन्दुनिभाननाम्।

अलिसङ्घालकां शुभ्रां बन्धुजीवाधरां शुभाम् ॥
सुशुभ्रस्पृष्टदशनां चारुनासां नतभ्रुवम् ।
कम्बुकण्ठीं संहतोरूं पीनोरुजघनस्थलीम् ॥
विरेजतुस्ततो यस्याः समौ पीनौ निरन्तरौ ।
मत्तेभकुम्भसङ्काशौ शातकुम्भसमद्युती ॥
मृणालकोमलौ बाहू करौ किशलयोपमौ ।
रुक्मस्तम्भनिभावूरू गूढे श्लिष्टे च जानुनी ॥
जङ्घे त्रिरोमे सुषमे पादावतिमनोरमौ ।
जघनञ्च घनं मध्यं यथा केशरिणः शिशोः ॥
प्रभायुता नखास्ताम्रा रूपं सर्व्वमनोहरम् ।
कुर्व्वाणां वीक्षितैर्नित्यं नीलोत्पलयुता दिशः ॥
कुर्व्वाणां प्रभया देवीं तथा वितिमिरा दिशः ।
सुसूक्ष्मशुक्लवसनां रत्नोत्तमविभूषिताम् ॥
पदन्यासैर्व्वसुमतीं सपद्मामिव कुर्व्वतीं ।
रूपयौवनसम्पन्नां विनीतवदुपस्थिताम् ॥
समीपमागतां दृष्ट्वा पूजयामास कश्यपः ।
उवाच तां वरारोहे ! विज्ञातं हृद्गतं मया ॥
धरे ! तव विशालाक्षि ! गच्छ देवि ! जनार्द्दनं ।
स ते वक्ष्यत्यशेषेण भाविनी ते यथा स्थितिः ॥
क्षीरोदे वसतिस्तस्य मया ज्ञाता शुभानने ! ।
ध्यानयोगेन चार्व्वङ्गि ! तज्ज्ञानं तत्प्रसादतः ॥
इत्येवमुक्ता सम्पूज्य कश्यपं वसुधा ततः ।
प्रययौ केशवं द्रष्टुं क्षीरोदमथ सागरम् ॥
सा ददर्शामृतनिधिं चन्द्ररश्मिमनोहरम् ।

पवनक्षोभसंजातवीचीशतसमाकुलम् ॥
हिमवच्छृतसङ्काशं भूमण्डलमिवापरम् ।
वीचीहस्तैर्धवलितैराह्वयानमिव क्षितिम् ॥
तैरेव शुभ्रतां चन्द्रे विदधानमिवानिशम् ।
अन्तरस्थेन हरिणा विगताशेषकल्मषम् ॥
यस्मात्तस्मात्तु विभ्रन्तं सुशुभ्रां तनुमूर्ज्जिताम् ।
पाण्डरं खगमागम्यमधोभुवनवर्त्तिनम् ॥
इन्द्रनीलकडाराढ्यं विपरीतमिवाम्बरम् ।
फलावलीसमुद्भूतवनसङ्घसमाचितम् ॥
निर्म्मोकमिव शेषाहेर्विस्तीर्णं तमतीव हि ।
तं दृष्ट्वा तत्र मध्यस्थं ददर्श केशवालयम् ॥
अनिर्द्देश्यपरामाणमनिर्द्देश्यर्द्धिसंयुतम् ।
शेषपर्य्यङ्कशयं तस्मिन् ददर्श मधुसूदनम्॥
शेषाहिफणरत्नांशुदुर्व्विभाव्य मुखाम्बुजम् ।
शशाङ्कशतसङ्काशं सूर्य्यायुतसमप्रभम् ॥
पीतवाससमक्षोभ्यं सर्व्वरत्नविभूषितम् ।
मुकुटेनार्कवर्णेन कुण्डलाभ्यां विराजितम् ॥
संवाह्यमानाङ्घ्रियुगं लक्ष्म्या करतलैः शुभैः ।
शरीरधारिभिः शस्त्रैः सेव्यमानं समन्ततः ॥
तं दृष्ट्वा पुण्डरीकाक्षं ववन्दे मधुसूदनम् ।
जानुभ्यामवनीं गत्वा विज्ञापयति चाप्यथ ॥
उद्धृताहं त्वया देव ! रसातलतलङ्गता ।
स्वे स्थाने स्थापिता विष्णो ! लोकानां हितकाम्यया॥
तस्याधुना मे देवेश ! का धृतिर्वै भविष्यति ।

एवमुक्तस्तदा देव्या देवी वचनमब्रवीत् ॥
वर्णाश्रमाचाररताः शास्त्रैकतत्परायणाः।
त्वां धरे! धारयिष्यन्ति तेषां तद्भार आहितः ॥
एवमुक्ता वसुमती देवदेवमभाषत।
वर्णानामाश्रमाणाञ्च धर्म्मान् वद सनातनान्।
त्वत्तोऽहं श्रोतुमिच्छामि त्वं हि मे परमा गतिः।
नमस्ते देव! देवेश! देवारिबलसूदन!।
नारायण! जगन्नाथ! शङ्खचक्रगदाधर! ॥
पद्मनाभ! हृषीकेश! महाबलपराक्रम!।
अतीन्द्रिय! सुदुष्पार! देव! शार्ङ्गधनुर्द्धर! ॥
वराह! भीम! गोविन्द! पुराण! पुरुषोत्तम!।
हिरण्यकेश! विश्वाक्ष! यज्ञमूर्त्ते! निरञ्जन! ॥
क्षेत्र! क्षेत्रज्ञ! लोकेश! सलिलान्तरशायक!।
यज्ञमन्त्रवहाचिन्त्य! वेदवेदाङ्गविग्रह! ॥
जगतोऽस्य समग्रस्य सृष्टिसंहारकारक! ॥
सर्व्वधर्म्मज्ञ! धर्म्माङ्ग! धर्म्मयोने! वरप्रद!।
विश्वक्सेनामृत! व्योम! मधुकैटभसूदन! ॥
बृहतां बृहणाजेय! सर्व्व! सर्व्वाभयप्रद!।
वरेण्यानघ! जीमूताव्यय! निर्व्वाणकारक! ॥
आपद्रायन! अपांस्थान! चैतन्याधार! निष्क्रिय!।
सप्तशीर्षाध्वरगुरो! पुराण! पुरुषोत्तम!।
ध्रुवाक्षर! सुसूक्ष्मेश! भक्तवत्सलपावन!।
त्वंगतिः सर्व्वदेवानां त्वं गतिर्ब्रह्मवादिनाम् ॥
तथा विदितवेद्यानां गतिस्त्वं पुरुषोत्तम!।

प्रपन्नोऽस्मि जगन्नाथ! ध्रुवं वाचस्पतिं प्रभुम्॥
सुब्रह्मण्यमनाधृष्यं वसुखेलं वसुप्रदम्।
महायोगबलोपेतं प्रश्निगर्भं घृतार्च्चिषम्॥
वासुदेवं महात्मानं पुण्डरीकाक्षमच्युतम्।
सुरासुरगुरुं देवं विभुं भूतमहेश्वरम्॥
एकव्यूहं चतुर्वक्त्रं जगत्कारणकारणम्।
ब्रूहि मे भगवन्! धर्म्मांश्चातुर्वर्ण्यस्य शाश्वतान्॥
आश्रमाचारसंयुक्तान् सरहस्यान् ससंग्रहान्।
एवमुक्तस्तु देवेशः पुनः क्षौणीमभाषत॥
शृणु देवि! धरे! धर्म्मांश्चातुर्वर्ण्यस्य शाश्वतान्।
आश्रमाचारसंयुक्तान् सरहस्यान् ससंग्रहान्॥
ये तु त्वां धारयिष्यन्ति सन्तस्तेषां परायणान्।
निषसा भव वामोरु! काञ्चनेऽस्मिन् वरासने॥
सुखासीना निबोध त्वं धर्म्मान्निगदतो मम।
शुश्रुवे वैष्णवान् धर्म्मान् सुखासीना धरा तदा॥
इति वैष्णवे धर्म्मशास्त्रे प्रथमोऽध्यायः॥

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति वर्णाश्चत्वारः। तेषामाद्या द्विजातयः। तेषां निषेकाद्यः श्मशानान्तो मन्त्रवत् क्रियासमूहः। तेषाञ्च धर्म्माः ब्राह्मणस्याध्यापयनं क्षत्रियस्य शस्त्रनिष्ठता वैश्यस्य पशुपालन शूद्रस्य द्विजातिशुश्रूषा। द्विजानां यजनाध्ययने। अथैतेषां वृत्तयः ब्राह्मणस्य याजनप्रतिग्रहौ क्षत्रियस्य क्षितित्राणं कृषिगोरक्षवाणिज्यकुसीदयोनिपोषणानि वैश्यस्य, शूद्रस्य सर्व्वशिल्पानि। आपद्यनन्तरा वृत्तिः।

क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया॥
आर्ज्जवत्वमलोभश्च देवब्राह्मणपूजनम्।
अनभ्यसूया च तथा धर्म्मः सामान्यउच्यते॥
इति वैष्णवे धर्म्मशास्त्रे द्वितीयोऽध्यायः।

अथ राजधर्म्माः॥ प्रजापरिपालनं वर्णाश्रमाणां स्वे स्वे धर्म्मे व्यवस्थापनम्। राजा च जाङ्गलं पशव्यं शस्योपेतं देशमाश्रयेत् वैश्यशूद्रपादश्च तत्र धन्वनृमहीवारिवृक्षगिरिदुर्गाणामन्यतमं दुर्गमाश्रयेत्। तत्र ग्रामाध्यक्षानपि कुर्य्यात्। दशाध्यक्षान्। शताध्यक्षान्। देशाध्यक्षांश्च। ग्रामदोषाणां ग्रामाध्यक्षः परीहारं कुर्य्यात्। अशक्तो दशग्रामाध्यक्षाय निवेदयेत्। सोऽप्यशक्तः शताध्यक्षाय। सोऽप्यशक्तो देशाध्यक्षाय। देशाध्यक्षोऽपि सर्व्वात्मना दोषमुच्छिन्द्यात्। आकरशुल्कतरनागवनेष्वाप्तान्नियुञ्जीत। धर्म्मिष्ठान् धर्म्मकार्य्येषु। निपुणानर्थकार्य्येषु। शूरान् संग्रामकर्म्मसु। उग्रानुग्रेषु षण्डान् स्त्रीषु॥ प्रजाभ्यो वल्यर्थं सम्वत्सरेण धान्यतः षष्ठमंशमादद्यात्। सर्व्वशस्येभ्यश्च द्विकं शतम्। पशुहिरण्येभ्यो वस्त्रेभ्यश्च। मांसमधुघृतौषधिगन्धमूलफलरसदारु पत्राजिनमृद्भाण्डाश्मभाण्डवैदलेभ्यः षष्ठभागम्। ब्राह्मणेभ्यः करादानं न कुर्य्यात् ते हि राज्ञो धर्म्मकरदाः। राजा च प्रजाभ्यः सुकृतदुष्कृतषष्ठांशभाक्। स्वदेशपण्याच्च शुल्कांशं दशममादद्यात् परदेशपण्याच्च विंशतितमम्। शुल्कस्थानमपक्रामन् सर्व्वापहारित्वमाप्नुयात्।

शिल्पिनः कर्म्मजीविनश्च शूद्राश्च मासेनैकं राज्ञः कर्म्म कुर्य्युः। स्वाम्यमात्यदुर्गकोषदण्डराष्ट्रमित्राणि प्रकृतयः। तद्दूषकांश्च हन्यात्। स्वराष्ट्रपरराष्ट्रयोश्च चारचक्षुः स्यात्। साधूनां पूजनं कुर्य्यात्। दुष्टांश्च हन्यात्। शत्रुमित्रोदासीनमध्यमेषु सामभेददानदण्डान् यथार्हं यथाकालं प्रयुञ्जीत। सन्धिविग्रहयानासनसंश्रयद्वैधीभावांश्च यथाकालमाश्रयेत्। चैत्रे मार्गशीर्षे वा यात्रां यायात्। परस्य व्यसने वा। परदेशावाप्तौ तद्देशधर्म्मान्नोच्छिन्द्यात्। परेणाभियुक्तश्च सर्व्वात्मना राष्ट्रं गोपायेत्। नास्ति राज्ञां समरे तनुत्यागसदृशो धर्म्मः। गोब्राह्मणनृपतिमित्रधनदारजीवितरक्षणाद्ये हतास्ते स्वर्गभाजः। वर्णसङ्कररक्षणार्थे च। राजा पुरावाप्तौ तु तत्र तत्कुलीनमभिषिञ्चेत्॥ न राजकुलमुच्छिन्द्यात्। अन्यत्राकुलीनराजकुलात्। मृगयाक्षस्त्रीपानेष्वभिरतिं न कुर्य्यात्। वाक्पारुष्यदण्डपारुष्ये च नार्थदूषणं कुर्य्यात्। आयद्वाराणि नोच्छिन्द्यात्। नापात्रवर्षी स्यात्। आकरेभ्यः सर्वमादद्यात्॥ निधिं लब्ध्वा तदर्द्धं ब्राह्मणेभ्यो दद्यात् द्वितीयमर्द्धं कोशे प्रवेशयेत्। निधिं ब्राह्मणो लब्ध्वा सर्वमादद्यात्। क्षत्रियश्चतुर्थमंशं राज्ञे दद्यात् चतुर्थमंशं ब्राह्मणेभ्योऽर्द्धमादद्यात्। वैश्यश्चतुर्थमंशं राज्ञे दद्यात् ब्राह्मणेभ्योऽर्द्धमंशमादद्यात्। शूद्रश्चावाप्तं द्वादशधा विभज्य पञ्चांशान् राज्ञे दद्यात् पञ्चांशान् ब्राह्मणेभ्योंऽशद्वयमादद्यात्। अनिवेदितविज्ञातस्य सर्वमपहरेत्। स्वनिहिताद्राज्ञे ब्राह्मणवर्ज्जं द्वादशमंशं दद्युः। परनिहितं स्वनिहितमिति ब्रुवंस्तत्समं

दण्डमावहेत्॥ बालानाथस्त्रीधनानि च राजा परिपालयेत्। चौरहृतं धनमवाप्य सर्व्वमेव सर्व्ववर्णेभ्यो दद्यात्। अनवाप्य च स्वकोशादेव दद्यात्। शान्तिस्वस्त्ययनैर्दैवोपघातान् प्रशमयेत्। परचक्रोपघातांश्च शस्त्रनित्यतया। वेदेतिहासधर्म्मशास्त्रार्थकुशलं कुलीनमव्यङ्गं तपस्विनं पुरोहितञ्च वरयेत्। शुचीनलुब्धानवहिताञ्छक्तिसम्पन्नान् सर्व्वार्थेषु च सहायान् स्वयमेव व्यवहारान् पश्येद्विद्वद्भिर्ब्राह्मणैः सार्द्धम्। व्यवहारदर्शने ब्राह्मणं वा नियुञ्ज्यात्। जन्मकर्म्मव्रतोपेताश्च राज्ञा सभासदः कार्य्या रिपौ मित्रे च ये समाः कामक्रोधलोभादिभिः कार्य्यार्थिभिरनाहार्य्याः। राजा च सर्व्वकार्य्येषु सम्वत्सराधीनः स्यात्। देवब्राह्मणान् सततमेव पूजयेत्। वृद्धसेवी भवेत्। यज्ञयाजी च। नचास्य विषये ब्राह्मणः क्षुधार्त्तोऽवसीदेत्। नचान्योऽपि सत्कर्म्मनिरतः। ब्राह्मणेभ्यश्च भुवं प्रतिपादयेत्। येषाञ्च प्रतिपादयेत्तेषां स्ववंश्यानन्तरप्रमाणं दानच्छेदोपवर्णनञ्च पटे ताम्रपत्रे वा लिखितं स्वमुद्राङ्कितञ्चागामिनृपविज्ञापनार्थं दद्यात्। परदत्ताञ्च भुवं नापहरेत्। ब्राह्मणेभ्यः सर्व्वदायान् प्रयच्छेत्। सर्व्वतश्चात्मानं गोपायेत् सुदर्शनश्च स्यात्। विषघ्नागदमन्त्रधारी च। नापरीक्षितमुपयुञ्ज्यात्। स्मितपूर्व्वाभिभाषी स्यात्। बध्येष्वपि न भ्रुकुटीमाचरेत्। अपराधानुरूपञ्च दण्डं दण्ड्येषु दापयेत्। सम्यग्दण्डप्रणयनं कुर्य्यात्। द्वितीयमपराधं न कस्यचित् क्षमेत। स्वधर्म्ममपालयन्नादण्ड्यो नामास्ति राज्ञः।

यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भयः।

प्रजास्तत्र विवर्द्धन्ते नेता चेत् साधु पश्यति।
स्वराष्ट्रे न्यायदण्डः स्यादभृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः।
एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः।
विस्तीर्य्यते यशो लोके तैलविन्दुरिवाम्भसि।
प्रजासुखे सुखी राजा तद्दुःखे यश्च दुःखितः।
स कीर्त्तियुक्तो लोकेऽस्मिन् प्रेत्य स्वर्गे महीयते॥

इति वैष्णवे धर्म्मशास्त्रे तृतीयोऽध्यायः॥

जालस्थार्कमरीचिगतं रजस्त्रसरेणुसंज्ञकम्। तदष्टकं लिख्या। तत्त्रयं राजसर्षपः। तत्त्रयं गौरसर्षपः। तत्षट्कं यवः। तत्त्रयं कृष्णलम्। तत्पञ्चकं माषः। तद्द्वादशकमक्षार्द्धम्। अक्षार्द्धमेव सचतुर्माषकं सुवर्णः। चतुःसुवर्णको निष्कः। द्वे कृष्णले समधृते रूप्यमाषकः। तत्षोड़शकं धरणम्। ताम्रकार्षिकः कार्षापणः।

पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः॥

इति वैष्णवे धर्म्मशास्त्रे चतुर्थोऽध्यायः॥

अथ महापातकिनो ब्राह्मणवर्ज्जं सर्व्वे बध्याः। न शारीरो ब्राह्मणस्य दण्डः। स्वदेशाद्ब्राह्मणं कृताङ्कं विवासयेत्। तस्य च ब्रह्महत्यायामशिरस्कं पुरुषं ललाटे कुर्य्यात्। सुराध्वजं सुरापाने। श्वपदं स्तेये। भगं गुरुतल्पगमने। अन्यत्रापि बध्यकर्म्मणि तिष्ठन्तं समग्रधनमक्षतं विवासयेत्।

कूटशासनकर्त्तृंश्च राजा हन्यात्। कूटलेख्यकारांश्च। गर-दाग्निदप्रसह्यतस्करान् स्त्रीबालपुरुषघातिनश्च। ये च धान्यं दशभ्यः कुम्भेभ्योऽधिकमपहरेयुः। धरिममेयानां शताद-भ्यधिकं। ये चाकुलीना राज्यमभिकामयेयुः। सेतुभेद-कांश्च प्रसह्यतस्कराणामवकाशभक्तप्रदांश्च। अन्यत्र राजा-शक्तेः स्त्रियमशक्तभर्तृकां तदतिक्रमणाच्च। हीनवर्णोऽधि-कवर्णस्य येनाङ्गेनापराधं कुर्य्यात्तदेवास्य शातयेत्। एकास-नोपवेशी कट्यां कृताङ्को निर्व्वास्यः। निष्ठीव्योष्ठद्वयविहीनः कार्य्यः अवशब्दयिता च गुदहीनः। आक्रोशयिता च विजिह्वः। दर्पेण धर्म्मोपदेशकारिणो राजा तप्तमासेचयेत्-तैलमास्ये। द्रोहेण च नामजातिग्रहणे दशाङ्गुलोऽस्य शङ्कुर्निखेयः। श्रुतदेशजातिकर्म्मणामन्यथावादी कार्षा-पणशतद्वयं दण्ड्यः। काणखञ्जादिनां तथावाद्यपि कार्षा-पणद्वयम्। गुरूनाक्षिपन् कार्षापणशतं। परस्य पतनी-याक्षेपे कृते तूत्तमसाहसं। उपपातकयुक्ते मध्यमम् त्रैवि-द्यवृद्धाक्षेपे जातिपूगानाञ्च। ग्रामदेशयोः प्रथमसाहसम्। व्यङ्गतायुक्ताक्षेपे कार्षापणशतम्। मातृयुक्ते तूत्तमं सवर्णा-क्रोशने द्वादशपणान् दण्ड्यः। हीनवर्णाक्रोशने षड्दण्ड्यः। यथाकालमुत्तमसवर्णाक्षेपे तत्प्रमाणो दण्डः। तयोर्व्वा कार्षापणात्त्रयः शुष्कवाक्याभिधाने त्वेवमेव। पारजायी सवर्णागमने तूत्तमसाहसं दण्ड्यः। हीनवर्णागमने मध्य-मम् गोगमने च। अन्त्यागमने वध्यः पशुगमने कार्षाप-णशतं दण्ड्यः॥ दोषमनाख्याय कन्यां प्रयच्छंश्च ताञ्च बिभृयात्। अदुष्टां दुष्टामिति ब्रुवन्नुत्तमसाहसम्। गजा-

श्वोष्ट्रगोघाती त्वेककरपादः कार्य्यः। विमांसविक्रयी कार्षापणशतम् ग्राम्यपशुघाती च। पशुस्वामिने तन्मूल्यं दद्यात्। आरण्यपशुघाती पञ्चाशतं कार्षापणान्। पक्षिघाती मत्स्यघाती च कार्षापणान्। फलोपगमद्रुमच्छेदी कीटोपघाती तूत्तमसाहसं दण्ड्यः। पुष्पोपगमद्रुमच्छेदी मध्यमम्। वल्लीगुल्मलताच्छेदी कार्षापणशतम्। तृणच्छेद्येकं सर्व्वं च तत्स्वामिनां तदुत्पत्तिम्॥ हस्तेनावगोरयिता दशकार्षापणान्। पादेन विंशतिं। काष्ठेन प्रथमसाहसम्। पाषाणेन मध्यमम्। शस्त्रेणोत्तमम्। पादकेशांशुककरलुण्ठने दशपणान् दण्ड्यः। शोणितेन विना दुःखमुत्पादयिता द्वात्रिंशत्पणान्। सह शोणितेन चतुःषष्टिं। करपाददन्तभङ्गे कर्णनासाविकर्त्तने मध्यमम्। चेष्टाभोजनवाग्रोधे प्रहारदाने च। नेत्रकन्धराबाहुसक्थ्यंसभङ्गे चोत्तमम्। उभयनेत्रभेदिनं राजा यावज्जीवं बन्धनान्न विमुञ्चेत्। तादृशमेव वा कुर्य्यात्। एकं बहूनां निघ्नतां प्रत्येकमुक्ताद्दण्डाद्द्विगुणः। क्रोशन्तमभिधावतां तत्समीपवर्त्तिनां संसरताञ्च। सर्व्वे च पुरुषपीड़ाकरास्तदुत्थानव्ययं दद्युः॥ ग्राम्यपशुपीड़ाकराश्च। गोश्वोष्ट्रगजापहार्य्येकपादकरः कार्य्यः अजाव्यपहार्य्येककरश्च। धान्यापहार्य्येकादशगुणं दण्ड्यः। शस्यापहारी च॥ सुवर्णरजतवस्त्राणां पञ्चाशतस्त्वभ्यधिकमपहरन् विकरः तदूनमेकादशगुणं दण्ड्यः। सूत्रकार्पासगोमयगुड़दधिक्षीरतक्रतृणलवणमृद्भस्मपक्षिमत्स्यघृततैलमांसमधुवैदलवेणुमृण्मयलोहदण्डानामपहर्त्ता मूल्यात्त्रिगुणं दण्ड्यः। पक्वान्नानाञ्च

पुष्पहरितगुल्मवल्लीलतापर्णानामपहरणे पञ्चकृष्णलान्। शाकमूलफलानाञ्च रत्नापहार्य्युत्तमसाहसम्। अनुक्तद्रव्याणामपहर्त्ता मूल्यसमम्। स्तेनाः सर्व्वमपहृतं धनिकस्य दाप्याः। ततस्तेषामभिहितदण्डप्रयोगः। येषां देयः पन्थास्तेषामपथदायी कार्षापणानां पञ्चविंशति दण्ड्यः। आसनार्हस्यासनमदद्‌च्च। पूजार्हमपूजयंश्च। प्रातिवेश्यब्राह्मणे निमन्त्रणातिक्रमे च। निमन्त्रयित्वा भोजनादायिनश्च। निमन्त्रितस्तथेत्युक्त्वा चानभुञ्जानः सुवर्णमाषकं निमन्त्रयितुश्च द्विगुणमन्नम्। अभक्ष्येण ब्राह्मणदूषयिता षोड़शसुवर्णान्। जात्यपहारिणा शतं सुरया बध्यः। क्षत्रियं दूषयितुस्तदर्द्धं। वैश्यं दूषयितुस्तदर्द्धमपि। शूद्रं दूषयितुः प्रथमसाहसम्। कामकारेणास्पृश्यस्तैवर्णिकंस्पृशन् बध्यः। रजस्वलां शिफाभिस्ताड़येत्। पथ्युद्यानोदकसमीपेऽशुचिकारी पणशतं। तच्चापास्यात्। गृहभूकुड्यादुपभेत्ता मध्यमसाहसं दण्ड्यः। तच्च योजयेत्। गृहेपीड़ाकरं द्रव्यं प्रक्षिपन् पणशतं॥ साधारण्यापलापी च। प्रोषितस्याप्रदाता च। पितृपुत्राचार्य्ययाज्यर्त्विजामन्योन्यापतितत्यागी च। नच तान् जह्यात्। शूद्रप्रव्रजितानां दैवे पित्र्ये भोजकश्च। अयोग्यकर्म्मकारी च। समुद्रगृहभेदकः। अनियुक्तः शपथकारी पशूनां पुंस्त्वोपघातकारी च। पितापुत्रविरोधे तु साक्षिणां दशपणो दण्डः। यस्तयोश्चान्तरः स्यात्तस्योत्तमसाहसम्। तुलामानकटकर्म्मकृतश्च।

तद्कूटे कूटवादिनश्च द्रव्याणां प्रतिरूपविक्रयिकस्य च। सम्भूयवणिजां पण्यमनर्घेणावरुन्धतां। प्रत्येकं विक्रीणताञ्च।

गृहीतमूल्यं पण्यन्तु क्रेतुर्नैव दद्यात्तस्यासौ सोदयं दाप्यः। राज्ञा च पणशतं दण्ड्यः। क्रीतमक्रीणतो या हानिः सा क्रेतुरेव स्यात्। राजविनिषिद्धं विक्रीणतस्तदपहारः। तारिकः स्थलजं शुल्कं गृह्णन् दश पणान् दण्ड्यः। ब्रह्मचारिवानप्रस्थभिक्षुगुर्व्विणीतीर्थानुसारिणां नाविकः शौल्किकः शुल्कमाददानश्च। तच्च तेषां दद्यात्। द्यूते कूटाक्षदेविनां करच्छेदः। उपधिदेविनां सन्दंशच्छेदः। ग्रन्थिभेदकानां करच्छेदः। दिवा पशूनां वृकाद्युपघाते पाले त्वनापदि पालदोषः। विनष्टपशुमूल्यञ्च स्वामिने दद्यात्। अननुज्ञातां दुहन् पञ्चविंशतिकार्षापणान् दण्ड्यः। महिषी चेच्छस्यनाशं कुर्य्यात्तत्पालकस्त्वष्टौ माषकान् दण्ड्यः। अपालायाः स्वामी अश्वस्तूष्ट्रोगर्द्दभो वा। गौश्चेत्तदर्द्धं तदर्द्धमजाविकं। भक्षयित्वोपविष्टेषु द्विगुणं। सर्व्वत्र स्वामिने विनष्टशस्यमूल्यञ्च। पथिग्रामसीमान्ते न दोषः अनावृते च अल्पकानां उत्सृष्टवृषभसूतिकानाञ्च। यस्तत्समवर्णान् दास्ये नियोजयेत्तस्योत्तमसाहसदण्डः। त्यक्तप्रव्रज्यो राज्ञोदास्यं कुर्य्यात्। भृतकश्चापूर्णकाले भृतिं त्यजन् सकलमेव मूल्यं दद्यात्। राज्ञे च पणशतं दद्यात् तद्दोषेण यद्विनश्येत्तत् स्वामिने। अन्यत्र दैवोपघातात्। स्वामी चेद्भृतकमपूर्णे काले जह्यात्तस्य सर्व्वं मूल्यं दद्यात्। पणशतञ्च राजनि अन्यत्र भृतकदोषात्। यः कन्यां पूर्व्व दत्तामन्यस्मै दद्यात् स चौरवच्छास्यः। वरदोषं विना निर्द्दोषां परित्यजन् पत्नीञ्च अजानन् प्रकाशं यः परद्रव्यं क्रीणीयात्तत्र तस्यादोषः। स्वामी द्रव्यमाप्नुयात्। यद्यप्रकाशं

हीनमूल्यञ्च क्रीणीयात्तदा क्रेता विक्रेता च चौरवच्छास्यौ। गणद्रव्यापहर्त्ता विवास्यः तत्सम्बिदं यश्च लङ्घयेत्। निक्षेपापहार्य्यर्थवृद्धिसहितं धनं धनिकस्य दाप्यः। राज्ञा चौरवच्छास्यः यश्चानिक्षिप्तं निक्षिप्तमिति ब्रूयात्। सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनः सीमां लिङ्गान्वितां कारयेत्। जातिभ्रंशकरस्याभक्ष्यस्य भक्षयिता विवास्यः। अभक्ष्यस्याविक्रेयस्य च विक्रयी देवप्रतिमाभेदकश्चोत्तमसाहसं दण्डनीयः। भिषङ्मिथ्याचरन्नुत्तमेषु पुरुषेषु। मध्यमेषु मध्यमं तिर्य्यक्षु प्रथमम्। प्रतिश्रुतस्याप्रदायी तद्दापयित्वा प्रथमसाहसं दण्ड्यः। कूटसाक्षिणां सर्व्वस्वापहारः कार्य्यः। उत्कोचोपजीविनां सभ्यानाञ्च। गोचर्म्ममात्राधिकां भुवमन्यस्याधीकृतां तस्मादानिश्चौच्यान्यस्य यः प्रयच्छेत् स वध्यः। ऊनाञ्चेत् षोड़शसुवर्णान् दण्ड्यः।

एकोऽश्नीयाद्यदुत्पन्नं नरः सम्वत्सरं फलम्।
गोचर्म्ममात्रा सा क्षौणी स्तोका वा यदि वा बहुः॥
ययोर्निक्षिप्तआधिस्तौ विवदेतां यदा नरौ।
यस्य भुक्तिः फलं तस्य बलात्कारं विना कृता॥
सागमेन च भोगेन भुक्तं सम्यग्यदा भवेत्।
आहर्त्ता लभते तत्र नापहार्य्यन्तु तत् क्वचित्॥
पित्रा भुक्तन्तु यद्द्रव्यं भुक्त्याचारेण धर्म्मतः।
तस्मिन् प्रेते न वाच्योऽसौ भुक्त्या प्राप्तं हि तस्य तत्॥
त्रिभिरेव च या भुक्ता पुरुषैर्भूर्य्यथाविधि।
लेख्याभावेऽपि तां तत्र चतुर्थः समवाप्नुयात्॥
नखिनां दंष्ट्रिणाञ्चैव शृङ्गिणामाततायिनाम्।

हस्त्यश्वानां तथान्येषां वधे हन्ता न दोषभाक्॥
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥
नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति॥
उद्यतासिविषाग्निश्च शापोद्यतकरं तथा।
आथर्व्वणेन हन्तारं पिशुनश्चैव राजसु।
भार्य्यातिक्रामणश्चैव विद्यात् सप्ताततायिनः।
यशोवित्तहरानन्यानाहुधर्म्मार्थहारकान्॥
उद्देशतस्ते कथितो धरे! दण्डविधिर्म्मया।
सर्व्वेषामपराधानां विस्तरादतिविस्तरः॥
अपराधेषु चान्येषु ज्ञात्वा जातिं धनं वयः।
दण्डं प्रकल्पयेद्राजा सम्मन्त्र्य ब्राह्मणैः सह॥
दण्ड्यं प्रमोचयन् दण्ड्याद्द्विगुणं दण्डमावहेत्।
नियुक्तश्चाप्यदण्ड्यानां दण्डकारी नराधमः॥
यस्य चौरः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्।
न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक्॥
इति वैष्णवे धर्म्मशास्त्रे पञ्चमोऽध्यायः॥

अथोत्तमर्णोऽधमर्णादृयथादत्तमर्थं गृह्णीयात्। द्विकं त्रिकं चतुष्कं पञ्चकञ्च शतं वर्णानुक्रमेण प्रतिमासम् सर्वे वर्णा वा स्वप्रतिपन्नां वृद्धिं दद्युः। अकृतामपि वत्सरातिक्रमेण यथाविहिताम्। आध्युपभोगे वृद्ध्यभावः। दैवराजोपघाताद्दृते विनष्टमाधिमुत्तमर्णो दद्यात्। अन्तर्वृद्धौ प्रविष्टायामपि। न स्थावरमाधिमृते वचनात् गृहीतधनप्रवेशार्थं-

मेव यत् स्थावरं दत्तं तदगृहीतधनप्रवेशे दद्यात् । दीयमानं प्रयुक्तमर्थमुत्तमर्णस्याग्रह्णतस्ततः परं न वर्द्धते । हिरण्यस्य परा वृद्धिर्द्विगुणा । धान्यस्य त्रिगुणा । वस्त्रस्य चतुर्गुणा । सन्ततिः स्त्रीपशूनाम् । किण्वकार्पाससूत्रचर्म्मायुधेष्टकाङ्गाराणामक्षया । अनुक्तानां द्विगुणा । प्रयुक्तमर्थं यथाकथञ्चित् साधयन्न राज्ञो वाच्यः स्यात् । साध्यमानश्चेद्राजानमभिगच्छेत्तत्समं दण्ड्यः । उत्तमर्णश्चेद्राजानमियात्तद्विभावितोऽधमर्णो राज्ञे धनदशभागसम्मितं दण्डं दद्यात् । प्राप्तार्थश्चोत्तमर्णो विंशतितमसंशम् । सर्व्वापलाप्येकदेशविभावितोऽपि सर्वं दद्यात् । तस्य च भावनास्तिस्रो भवन्ति लिखितं साक्षिणः समयक्रिया च । ससाक्षिकमात्तं ससाक्षिकमेव दद्यात् । लिखितार्थप्रविष्टोलिखितं पाटयेत् । असमग्रदाने लेख्यासन्निधाने चोत्तमर्णोलिखितं दद्यात् । धनग्राहिणि प्रेते प्रव्रजिते द्विदशसमाः प्रवसिते वा तत्पुत्रपौत्रैर्धनं देयम् । नातः परमनीप्सुभिः । सपुत्रस्य वाऽपुत्रस्य वा ऋक्थग्राही ऋणं दद्यात् । निर्धनस्य स्त्रीग्राही । न स्त्री पतिपुत्रकृतम् । नस्त्रीकृतं पतिपुत्रौ न पिता पुत्रकृतम् । अविभक्तैः कृतमृणं यस्तिष्ठेत् स दद्यात् । पैतृकमृणमविभक्तानां भ्रातॄणाञ्च । विभक्ताश्च दायानुरूपमंशम् । गोपशौण्डिकशैलषरजकव्याधस्त्रीणां पतिर्दद्यात् । वाक्प्रतिपन्नं नादेयं कस्यचित् । कुटुम्बार्थे कृतञ्च ।

यो गृहीत्वा ऋणं सर्वं श्वोदास्यामीतिसामकम् ।
न दद्याल्लोभतः पश्चात्तथा वृद्धिमवाप्नुयात् ॥
दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।

आधौ तु वितथे दाप्यावितरस्य सुता अपि ॥
बहवश्चेत् प्रतिभुवो दद्युस्तेऽर्थं यथाकृतम् ।
अर्थेऽविशेषिते तेषु धनिकच्छन्दतः क्रिया ॥
यमर्थं प्रतिभूर्दद्याद्धनिकेनोपपीड़ितः ।
ऋणिकस्तं प्रतिभुवे द्विगुणं दातुमर्हति ॥
इति वैष्णवे धर्म्मशास्त्रे षष्ठोऽध्यायः ॥

अथ लेख्यं त्रिविधं राजसाक्षिकं ससाक्षिकमसाक्षिकञ्च। राजाधिकरणे तन्नियुक्तकायस्थकृतं तदध्यक्षकरचिह्नितं राजसाक्षिकम्। यत्र क्वचन येन केनचिल्लिखितं साक्षिभिः स्वहस्तचिह्नितं ससाक्षिकम्। स्वहस्तलिखितमसाक्षिकम्। तद्बलात्कारितमप्रमाणम्। उपधिकृताश्च सर्वएव। दूषितकर्म्म दुष्टसाक्ष्यं तत्ससाक्षिकमपि। तादृग्विधेन-लिखितञ्च। स्त्रीबालास्वतन्त्रमत्तोन्मत्तभीतताड़ितकृतञ्च। देशाचाराविरुद्धं व्यक्ताधिकृतलक्षणमलुप्तक्रमाक्षरं प्रमाणम्।

वर्णैश्च तत्कृतैश्चिह्नैः पत्रैरेव च युक्तिभिः।
सन्दिग्धं साधयेल्लेख्यं तद्युक्तिप्रतिरूपितैः ॥
यत्रर्णी धनिको वापि साक्षी वा लेखकोऽपि वा।
म्रियते तत्र तल्लेख्यं तत्स्वहस्तैः प्रसाधयेत् ॥
इति वैष्णवे धर्म्मशास्त्रे सप्तमोऽध्यायः ॥

अथ साक्षिणः न राजश्रोत्रियप्रव्रजितकितवतस्कर-पराधीनस्त्रीबालसाहसिकातिवृद्धमत्तोन्मत्ताभिशस्तपतितक्षु-त्तृष्णार्त्तव्यसनिरागान्धाः। रिपुमित्रार्थसम्बन्धिविकर्म्मदृ-ष्टदोषसहायाश्च। अनिर्द्दिष्टस्तु साक्षित्वे यश्चोपेत्य ब्रूयात्। एकश्चासाक्षी। स्तेयसाहसवाग्दण्डपारुष्यसंग्रहणेषु

साक्षिणो न परीक्ष्याः। अथ साक्षिणः कुलजावृत्तवित्तसम्पन्ना यज्वनस्तपस्विनः पुत्रिणो धर्मज्ञा अधीयानाः सत्यवन्तस्त्रैविद्यवृद्धाश्च। अभिहितगुणसम्पन्न उभयानुमत एकोऽपि। द्वयोर्विवदमानयोर्यस्य पूर्ववादस्तस्य साक्षिणः प्रष्टव्याः। आधर्य्यं कार्य्यवशाद्यत्र पूर्वपक्षस्य भवेत्तत्र प्रतिवादिनोऽपि। उद्दिष्टसाक्षिणि मृते देशान्तरगते वा तदभिहितश्रोतारः प्रमाणम्। समक्षदर्शनात् साक्षी श्रवणाद्वा। साक्षिणश्च सत्येन पूयन्ते। वर्णिनां यत्र बधस्तत्रानृतेन। तत्पावनाय कुश्माण्डीभिर्द्विजोऽग्निं जुहुयात्। शूद्र एकाह्निकं गोदशकस्य ग्रासं दद्यात्। स्वभावविकृतौ मुखवर्णविनाशेऽसम्बद्धप्रलापे च कूटसाक्षिणं विद्यात्। साक्षिणश्चाहूयादित्योदये कृतशपथान् पृच्छेत्। ब्रूहीति ब्राह्मणं पृच्छेत्। सत्यं ब्रूहीति राजन्यम्। गोबीजकाञ्चनैर्वैश्यम्। सर्वमहापातकैस्तु शूद्रम्। साक्षिणः श्रावयेत्। ये महापातकिनो लोका ये चोपपातकिनस्ते कूटसाक्षिणामपि। जननमरणान्तरे कृतहानिश्च। सत्येनादित्यस्तपति सत्येन भाति चन्द्रमाः। सत्येन वाति पवनः। सत्येन भूर्धारयति। सत्येनापस्तिष्ठन्ति। सत्येनाग्निस्तिष्ठति। स्वश्च सत्येन। सत्येन देवाः। सत्येन यज्ञाः॥

अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥
जानन्तोऽपि हि ये साक्ष्ये तूष्णीम्भूता उपासते।
ते कूटसाक्षिणां पापैस्तुल्या दण्डेन चाप्यथ॥
एवं हि साक्षिणः पृच्छेद्वर्णानुक्रमतो नृपः।

यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्॥
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः।
बहुत्वं प्रतिगृह्णीयात् साक्षिद्वैधे नराधिपः॥
समेषु च गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान्।
यस्मिन् यस्मिन् विवादे तु कूटसाक्ष्यनृतं वदेत्।
तत्तत्कार्य्यं निवर्त्तेत कृतं वाप्यकृतं भवेत्॥
इति वैष्णवे धर्म्मशास्त्रे ऽष्टमोऽध्यायः॥

अथ समयक्रिया। राजद्रोहसाहसेषु यथाकामम्। निक्षेपस्तेयेष्वर्थप्रमाणम्। सर्व्वेष्वेवार्थेषु मूल्यं कनकं कल्पयेत्। तत्र कृष्णलोने शूद्रं दूर्व्वाकरं शापयेत्। द्विकृष्णलोने तिलकरम्। त्रिकृष्णलोने रजतकरम्।
चतुःकृष्णलोने सुवर्णकरम्। पञ्चकृष्णलोने शीतोद्धृतमहीकरम्। सुवर्णार्द्धे कोशो देयः शूद्रस्य। ततः परं यथार्हं धटाग्न्युदकविषाणामन्यतमम्। द्विगुणेऽर्थे यथाभिहिता समयक्रिया वैश्यस्य। त्रिगुणे राजन्यस्य। कोशवर्ज्जं चतुर्गुणे ब्राह्मणस्य। न ब्राह्मणस्य कोशं दद्यात्। अन्यत्रागामिकालसमयनिबन्धनक्रियातः। कोशस्थाने ब्राह्मणं शीतोद्धृतमहीकरमेव शापयेत्। प्रागदृष्टदोषमप्यर्थे दिव्यानामन्यतममेव कारयेत्। सत्सु विदितसच्चरित्रं न महत्यर्थेऽपि। अभियोक्ता वर्त्तयेच्छीर्षं। अभियुक्तश्च दिव्यं कुर्य्यात्। राजद्रोहसाहसेषु विनापि शीर्षवर्त्तनात्। स्त्रीब्राह्मणविकलासमर्थरोगिणां तुला देया। सा च न वाति वाती। न कुष्ठसमर्थलोहकाराणामग्निर्देयः। शरद्ग्रीष्मयोश्च न कुष्ठिपैत्तिकब्राह्मणानां विषं देयं प्रावृषि च न श्लेष्मव्या-

ध्यर्हितानां भीरूणां श्वासकासिनामम्बुजीविनाञ्चोदकम् । हेमन्तशिशिरयोश्च नास्तिकेभ्य कोशो देयः न देशे व्याधिमयकोपसृष्टे च ।

सचैलं स्नातमाहूय सूर्य्योदयउपोषितम् ।
कारयेत् सर्व्वदिव्यानि देवब्राह्मणसन्निधौ ॥

॥ इति वैष्णवे धर्म्मशास्त्रे नवमोऽध्यायः ॥

अथ धटः । चतुर्हस्तोच्छ्रितौ द्विहस्तायतः । तत्र सार-वृक्षोद्भवपञ्चहस्तायतो भवतः शिक्या तुला । ताञ्च सुवर्णकारकांस्यकाराणामन्यतमोविध्यात् । तत्र चैकस्मिन् शिक्ये पूरुषमारोपयेद्द्वितीये प्रतिमानं शिलादि। प्रतिमानपुरुषौ समधृतौ सुचिह्नितौ कृत्वा पुरुषमवतारयेत् । धटञ्च समयेन गृह्णीयात् तुलाधारञ्च ॥

ब्रह्मघ्नो ये स्मृता लोका ये लोकाः कूटसाक्षिणः ।
तुलाधारस्य ते लोकास्तुलां धारयतोमृषा ॥
धर्म्मपर्य्यायवचनैर्धटइत्यभिधीयते ।
त्वमेव धट । जानीषे न विदुर्यानि मानुषाः ॥
व्यवहाराभिशस्तोऽयं मानुषस्तुलत्रते त्वयि ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥
ततस्तमारोपयेच्छिक्ये भूय एवाथ तं नरम् ।
तुलितो यदि वर्द्धेत ततः स धर्म्मतः शुचिः ॥
शिक्यच्छेदेऽक्षभङ्गेषु भूयस्तमारोपयेन्नरम् ।
एवं निःसंशयं ज्ञानं यतो भवति निर्णय. ॥

॥ इति वैष्णवे धर्म्मशास्त्रे दशमोऽध्याय. ॥

अथाग्निः । षोड़शाङ्गुलं तावदन्तरं मण्डलं सप्तकं

कुर्य्यात्। ततः प्राङ्मुखस्य प्रसारितभुजद्वयस्य सप्ताश्वत्थ पत्राणि करयोर्दद्यात्। तानि च करद्वयसहितानि सूत्रेण वेष्टयेत्। ततस्तत्राग्निवर्णं लोहपिण्डं पञ्चाशत्पलिकं संन्यसेत्। तमादाय नातिद्रुतं नाविलम्बितं मण्डलेषु पदन्यासं कुर्व्वन् व्रजेत्। ततः सप्तमण्डलमतीत्य भूमौ पिण्डं जह्यात्।

यश्चान्यच्चिह्नितकरस्तमशुद्धं विनिर्द्दिशेत्।
न दग्धः सर्व्वथा यस्तु स वै शुद्धो भवेन्नरः॥
भयाद्वा पातयेद्यस्तु दग्धो वा न विभाव्यते।
पुनस्तं धारयेत् पिण्डं समयस्याविशोधनात्॥
करौ विमृदितव्रीहिस्तस्यादावेव लक्षयेत्।
अभिमन्त्र्यास्य करयोर्लोहपिण्डं ततो न्यसेत्॥
त्वमग्ने। सर्व्वभूतानामन्तश्चरसि साक्षिवत्।
त्वमेवाग्ने। विजानीषे न विदुर्य्यानि मानवाः॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति।
तदेनं संशयादस्मात् धर्म्मतस्त्रातुमर्हसि॥
॥ इति वैष्णवे धर्म्मशास्त्रे एकादशोऽध्यायः॥

अथोदकम्। पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिववर्जितेऽम्भसि। तत्र नाभिमग्नस्यारागद्वेषिणः पुरुषस्यान्यस्य जानुनी गृहीत्वाभिमन्त्रितन्त्वम्भः प्रविशेत्। तत्समकालञ्च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः शरक्षेपं कुर्य्यात्।

तच्चापरश्च पुरुषो जवेन शरमानयेत्।
तन्मध्ये यो न दृश्येत स शुद्धः परिकीर्त्तितः॥
अन्यथा त्वविशुद्धः स्यादेकाङ्गस्यापि दर्शने।

त्वमम्भः ! सर्व्वभूतानामन्तश्चरसि साक्षिवत् ॥
त्वमेवाम्भो ! विजानीषे न विदुर्यानि मानुषाः ॥
व्यवहाराभिशस्तोऽयं मानुषस्त्वयि मज्जति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥
॥ इति वैष्णवे धर्म्मशास्त्रे द्वादशोऽध्यायः ॥

अथ विषम् । विषाण्यदेयानि सर्व्वाणि ऋते हिमाचलो-द्भवाच्छार्ङ्गात् । तस्य च यवसप्तकं घृतप्लुतमभिशस्ताय दद्यात् ।

विषं वेगक्रमापेतं सुखेन यदि जीर्य्यते ।
विशुद्धं तमिति ज्ञात्वा दिवसान्ते विसर्जयेत् ॥
विषत्वाद्विषमत्वाच्च क्रूर ! त्वं सर्व्वदेहिनाम् ।
त्वमेव विष ! जानीषे न विदुर्यानि मानुषाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥
॥ इति वैष्णवे धर्म्मशास्त्रे त्रयोदशोऽध्यायः ॥

अथ कोशः । उग्रान् देवान् समभ्यर्च्य तत्स्नानोदकात् प्रसृतित्रयं पिबेत् ।

इदं मया न कृतमिति व्याहरन् देवताभिमुखः ।
यस्य पश्येत्द्विसप्ताहात्त्रिसप्ताहादथापि वा ॥
रोगोऽग्निर्ज्ञातिमरणं राजातङ्कमथापि वा ।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्य्यये ।
दिव्ये च शुद्धं पुरुषं सत्कुर्य्याद्धार्म्मिको नृपः ॥
॥ इति वैष्णवे धर्म्मशास्त्रे चतुर्द्दशोऽध्यायः ॥

अथ द्वादश पुत्रा भवन्ति । स्वे चेत्रे संस्कृतायामुत्-

पादितः स्वयमौरसः प्रथमः। नियुक्तायां सपिण्डेनोत्तम-वर्णेन वोत्पादितः क्षेत्रजो द्वितीयः। पुत्रिकापुत्रस्तृतीयः। यस्तस्याः पुत्रः स मे पुत्रो भवेदिति या पित्रा दत्ता सा पुत्रिका पुत्रिकाविधिना प्रतिपादिता पितृभ्रातृविहीना पुत्रिकैव। पौनर्भवश्चतुर्थः अक्षता भूय संस्कृता पुनर्भूः। भूयस्त्वसंस्कृतापि परपूर्व्वा। कानीनः पञ्चमः। पितृगृहेऽसंस्कृतयैवोत्पादितः। स च पाणिग्राहस्य गृहे च गूढ़ोत्पन्नः षष्ठः। यस्य तल्पजस्त-स्यासौ सहोढः सप्तम। गर्भिणी या संस्क्रियते तस्याः पुत्रः स च पाणिग्राहस्य दत्तकश्चाष्टमः। स च मातापितृभ्यां यस्य दत्तः क्रीतश्च नवम। स च येन क्रीतः स्वयमुपगतो दशमः। स च यस्योपगतः अपविद्धस्त्वेकादशः। पित्रा माता च परित्यक्तः स च येन गृहीतः यत्र क्वचनोत्-पादितश्च द्वादश। एतेषां पूर्व्वः पूर्व्वः श्रेयान्। स एव दायहारः। स चान्यान्बिभृयात्। अनूढानां स्वविंत्तानुरूपेण संस्कारं कुर्य्यात्। पतितक्लीवाचिकित्सरोगविकला स्त्वभा-गहारिणः। ऋक्थग्राहिभिस्ते भर्त्तव्याः। तेषाञ्चौरसाः पुत्रा भागहारिणः। नतु पतितस्य पतनीये कर्म्मणि कृते त्वनन्तरोत्पन्नाः। प्रतिलोमासु स्त्रीषु चोत्पन्नाश्चाभागिनः तत्पुत्राः पैतामहेऽप्यर्थे अंशभाग्भिस्ते भरणीयाः। यश्चार्यहरः स पिण्डदायी। एकोढानामप्येकस्याः पुत्रः सर्व्वासां पुत्रएव च। भ्रातृणामेकजातानाञ्च। पुत्रः पितृ-वित्तालाभेऽपि पिण्डं दद्यात्।

पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुत।
तस्मात् पुत्रइति प्रोक्तः स्वयमेव स्वयम्भुवा॥

ऋणमस्मिन् सन्नयति अमृतत्वञ्च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतोमुखम् ॥
पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपम् ॥
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते ।
दौहित्रोऽपि ह्यमुत्र नं सन्तारयति पौत्रवत् ॥
इति वैष्णवे धर्म्मशास्त्रे पञ्चदशोऽध्यायः ॥

समानवर्णासु पुत्राः सवर्णा भवन्ति । अनुलोमासु मातृवर्णाः । प्रतिलोमास्वार्य्यविगर्हिताः । तत्र वैश्यापुत्रः शूद्रेणायोगवः । पुक्कसमागधौ क्षत्रियापुत्रौ वैश्यशूद्राभ्यां । चाण्डालवैदेहकसूताश्च ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियैः । सङ्करसङ्कराश्चासंख्येयाः । रङ्गावतरणमायोगवानां । व्याधता पुक्कसानां । स्तुतिक्रिया मागधानां । बध्यघातित्वं चाण्डालानाम् । स्त्रीरक्षा तज्जीवनञ्च वैदेहकानाम् । अश्वसारथ्यं सूतानां । चाण्डालानां वहिर्ग्रामनिवसनं मृतचेलधारणमिति विशेषः । सर्व्वेषाञ्च समानजातिभिर्विवाहाः स्वपितृवित्तानुहरणञ्च ।

सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्म्मभिः ॥
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ।
स्त्रीबालाभ्युपपत्तौ च वाह्यानां सिद्धिकारणम् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे षोड़शोऽध्यायः ॥

पिता चेत् पुत्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे । पैतामहे त्वर्थे पितृपुत्रयोस्तुल्यं स्वामित्वम् । पितृविभक्ताविभागानन्तरोत्पन्नस्य भागं दद्युः । अपुत्रस्य धनं पत्न्य-

भिगामि । तदभावे दुहितृगामि । तदभावे पितृगामि । तदभावे मातृगामि । तदभावे भ्रातृगामि । तदभावे भ्रातृपुत्रगामि । तदभावे बन्धुगामि । तदभावे सकुल्यगामि । तदभावे सहाध्यायिगामि । तदभावे ब्राह्मणधनवर्ज्जं राजगामि । ब्राह्मणार्थो ब्राह्मणानाम् । वानप्रस्थधनमाचार्य्यो गृह्णीयात् शिष्योवा ।

संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।
दद्यादपहरेच्चांशं जातस्य च मृतस्य च ॥
पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम् ।

आधिवेदनिकं बन्धुदत्तं शुल्कमन्वाधेयकमिति स्त्रीधनम् । ब्राह्मादिषु चतुर्षु विवाहेष्वप्रजायामतीतायां तद्भर्त्तुः । शेषेषु च पिता हरेत् । सर्व्वेष्वेव प्रसूतायां यद्धनं तद्दुहितृगामि ।

पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥
अनेकपितृकाणाञ्च पितृतो भागकल्पना ।
यस्य यत् पैतृकं रिक्थं स तद्गृह्णीत नेतरः ॥

इति वैष्णवे धर्म्मशास्त्रे सप्तदशोऽध्यायः ॥

ब्राह्मणस्य चतुर्षु वर्णेषु चेत् पुत्रा भवेयुस्ते पैतृकमृक्थं दशधा विभजेयुः । तत्र ब्राह्मणीपुत्रश्चतुरोऽंशा-नादद्यात् । क्षत्रियापुत्रस्त्रीन् । द्वावंशौ वैश्यापुत्रः । शूद्रापुत्रस्त्वेकं अथ चेच्छूद्रापुत्रवर्ज्जं ब्राह्मणस्य पुत्रत्रयं भवेत्तदा तद्धनं नवधा विभजेयुः । वर्णानुक्रमेण चतुस्त्रिद्विभागकृतानंशानादद्युः । वैश्यवर्ज्जमष्टधाकृतं चतुरस्त्रीनेकञ्चादद्युः । च-

त्रियवर्ज्जं सप्तधाकृतं चतुरो द्वावेकञ्च । ब्राह्मणवर्ज्जं षड्धाकृतं त्रीन् द्वावेकञ्च । क्षत्रियस्य क्षत्रियवैश्याशूद्रापुत्रेष्वयमेव विभागः । अथ ब्राह्मणस्य ब्राह्मणक्षत्रियौ पुत्रौ स्यातां तदा सप्तधाकृतादृक्थादु ब्राह्मणश्चतुरोंऽशानादद्यात्त्रीन् राजन्यः । अथ ब्राह्मणस्य ब्राह्मणवैश्यौ तदा षड्धाविभक्तस्य चतुरोंऽशान् ब्राह्मण आदद्याद्द्वावंशौ वैश्यः । अथ ब्राह्मणस्य ब्राह्मणशूद्रौ पुत्रौ स्यातां तदा तद्धनं पञ्चधा विभजेयातां चतुरोंऽशान् ब्राह्मणस्त्वादद्यादेकं शूद्रः । अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रियवैश्यौ स्यातां तदा तद्धनं पञ्चधा विभजेयातां त्रीनंशान् क्षत्रियस्त्वादद्याद्द्वावंशौ वैश्यः । अथ ब्राह्मणस्य क्षत्रियस्य वा क्षत्रियशूद्रौ पुत्रौ स्यातां तदा तद्धनं चतुर्द्धा विभजेयातां त्रीनंशान् क्षत्रियस्त्वादद्यादेकं शूद्रः । अथ ब्राह्मणस्य क्षत्रियस्य वैश्यस्य वा वैश्यशूद्रौ पुत्रौ स्यातां तदा तद्धनं त्रिधा विभजेयातां द्वावंशौ वैश्यस्त्वादद्यादेकं शूद्रः । अथैकपुत्रा ब्राह्मणस्य ब्राह्मणक्षत्रियवैश्याः सर्वहराः । क्षत्रियस्य राजन्यवैश्यौ । वैश्यस्य वैश्यः । शूद्रः शूद्रस्य । द्विजातीनां शूद्रस्त्वेकः पुत्रोऽर्द्धहरः । अपुत्रस्य रिक्थस्य या गतिः सात्रार्द्धस्य द्वितीयस्य । मातरः पुत्रभागानुसारेण भागहारिण्यः । अनूढाश्च दुहितरः । समवर्णाः पुत्राः समानंशानादद्युः । ज्येष्ठाय श्रेष्ठमुद्धारं दद्युः । यदि द्वौ ब्राह्मणीपुत्रौ स्यातामेकः शूद्रापुत्रस्तदा ब्राह्मणपुत्रावष्टौ भागानादद्यातामेकं शूद्रापुत्रः । अथ शूद्रापुत्रावुभौ स्यातामेको ब्राह्मणीपुत्रस्तदा षड्विभक्तस्यार्थस्य चतुरोंऽशान् ब्राह्मण-

स्यादद्याद्द्वावंशौ शूद्रापुत्रौ। अनेन क्रमेणान्यत्राप्यंशकल्पना भवति।

विभक्ताः सहजीवन्तो विभजेरन् पुनर्यदि।
समस्तत्र विभागः स्यज्ज्यैष्ठं तत्र न विद्यते॥
अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जितम्।
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति॥
पैतृकन्तु यदा द्रव्यमनवाप्य यदाप्नुयात।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम्॥
वस्त्रं पत्रमलङ्कारः कृतान्नमुदकं स्त्रियः।
योगक्षेमं प्रचारञ्च न विभाज्यञ्च पुस्तकम्॥
॥ इति वैष्णवे धर्म्मशास्त्रेऽष्टादशोऽध्यायः॥

मृतं द्विजं न शूद्रेण निर्हारयेत्। न शूद्रं द्विजेन। पितरं मातरञ्च पुत्रा निर्हरेयुः। न द्विजं पितरमपि शूद्रा. ब्राह्मणमनाथं ये ब्राह्मणा निर्हरन्ति ते स्वर्गलोकभाजः। निर्हृत्य च बान्धवं प्रेतं सत्कृत्वाप्रदक्षिणेन चितामभिगम्याप्सु सवाससो निमज्जनं कुर्युः। प्रेतस्योदकनिर्वपणं कृत्वैकपिण्डं कुशेषु दद्युः। परिवर्त्तितवाससश्च निम्बपत्राणि विदश्य द्वार्य्यश्मनि पदन्यासं कृत्वा गृहं प्रविशेयुः। अक्षतांश्चाग्नौ क्षिपेयुः चतुर्थे दिवसेऽस्थिसञ्चयं कुर्य्युः। तेषाञ्च गङ्गाम्भसि प्रक्षेपः। यावत्सङ्ख्यमस्थि पुरुषस्य गङ्गाम्भसि तिष्ठति तावद्वर्षसहस्राणि स्वर्गलोकमधितिष्ठति। यावदाशौचं तावत् प्रेतस्योदकं पिण्डमेकञ्च दद्युः। क्रीतलब्धाशनाश्च भवेयु.। अमांसाशनाश्च। स्थण्डिलशायिनश्च। पृथक्शायिनश्च। ग्रामान्निष्क्रम्याशौचान्ते कृतश्मश्रुकर्म्माणस्तिलकल्कैः

सर्षपकल्कैर्व्वा स्नाताः परिवर्त्तितवाससो गृहं प्रविशेयुः। तत्र शान्तिं कृत्वा ब्राह्मणानाञ्च पूजनं कुर्य्युः। देवाः परोक्षदेवाः प्रत्यक्षदेवा ब्राह्मणाः। ब्राह्मणैर्लोका धार्य्यन्ते।

ब्राह्मणानां प्रसादेन दिवि तिष्ठन्ति देवताः।
ब्राह्मणाभिहितं वाक्यं न मिथ्या जायते क्वचित॥

यद्ब्राह्मणास्तुष्टतमा वदन्ति तद्देवताः प्रत्यभिनन्दयन्ति।
तुष्टेषु तुष्टाः सततं भवन्ति प्रत्यक्षदेवेषु परोक्षदेवाः॥

दुःखान्वितानां मृतबान्धवानामाश्वासनं कुर्य्युरदीनसत्त्वाः।
वाक्यैस्तु यैर्भूमि तवाभिधास्ये वाक्यान्यहं तानि मनोऽभिरामे॥

॥ इति वैष्णवे धर्म्मशास्त्रे एकोनविंशोऽध्यायः॥

यदुत्तरायणं तदहर्द्देवानाम्। दक्षिणायनं रात्रिः। सम्वत्सरोऽहोरात्रः तत्त्रिंशता मासः मासा द्वादश वर्षम्। द्वादशवर्षशतानि दिव्यानि कलियुगम्। द्विगुणानि द्वापरम्। त्रिगुणानि त्रेता चतुर्गुणानि कृतयुगम् द्वादशवर्षसहस्राणि दिव्यानि चतुर्युगम्। चतुर्युगानामेकसप्ततिर्मन्वन्तरम्। चतुर्युगसहस्रञ्च कल्पः। स च पितामहस्याहः। तावती चास्य रात्रिः। एवंविधेनाहोरात्रेण मासवर्षगणनया सर्व्वस्यैव ब्रह्मणो वर्षशतमायुः। ब्रह्मायुषा च परिच्छिन्नः पौरुषो दिवसः। तस्यान्ते महाकल्पः। तावत्येवास्य निशा। पौरुषाणामहोरात्राणामतीतानां संख्यैव नास्ति। नच भविष्याणाम्। अनाद्यन्तता कालस्य॥

एवमस्मिन्निरालम्बे काले सततयायिनि।
न तद्भूतं प्रपश्यामि स्थितिर्यस्य भवेद्ध्रुवा॥
गङ्गायाः सिकताधारास्तथा वर्षति वासवे।

शक्या गणयितुं लोके न व्यतीताः पितामहाः ॥
चतुर्द्दश विनश्यन्ति कल्पे कल्पे सुरेश्वराः ।
सर्व्वलोकप्रधानाश्च मनवश्च चतुर्द्दश ॥
बहूनीन्द्रसहस्राणि दैत्येन्द्रनियुतानि च ।
विनष्टानीह कालेन मनुजेष्वथ का कथा ॥
राजर्षयश्च बहवः सर्व्वैः समुदिता गुणैः ।
देवा ब्रह्मर्षयश्चैव कालेन निधनं गताः ॥
ये समर्था जगत्यस्मिन् सृष्टिसंहारकारिणः ।
तेऽपि कालेन लीयन्ते कालोहि दुरतिक्रमः ॥
आक्रम्य सर्व्वः कालेन परलोकञ्च नीयते ।
कर्म्मपाशवशो जन्तुः का तत्र परिदेवना ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
अर्थे दुष्परिहार्य्येऽस्मिन्नास्ति लोके सहायता ॥
शोचन्तो नोपकुर्वन्ति मृतस्येह जना यतः ।
अतो न रोदितव्यं हि क्रियाः कार्य्याः स्वशक्तितः ॥
सुकृतं दुष्कृतञ्चोभौ सहायौ यस्य गच्छतः ।
बान्धवैस्तस्य किं कार्य्यं शोचद्भिरथवा न वा ॥
बान्धवानामशौचे तु स्थितिं प्रेतो न विन्दति ।
अतस्त्वभ्येति तानेव पिण्डतोयप्रदायिनः ॥
अर्व्वाक् सपिण्डीकरणात् प्रेतो भवति यो मृतः ।
प्रेतलोकगतस्यान्नं सोदकुम्भं प्रयच्छत ॥
पितृलोकगतस्यान्नं श्राद्धे भुङ्क्ते स्वधामयम् ।
पितृलोकगतस्यास्य तस्माच्छ्राद्धं प्रयच्छत ॥
देवत्वे यातनास्थाने तिर्य्यग्योनौ तथैव च ।

मानुष्ये च तथाप्नोति श्राद्धं दत्तं स्वबान्धवैः ॥
प्रेतस्य श्राद्धकर्त्तुश्च पुष्टिः श्राद्धे कृते ध्रुवम् ।
तस्माच्छ्राद्धं सदा कार्य्यं शोकं त्यक्त्वा निरर्थकम् ॥
एतावदेव कर्त्तव्यं सदा प्रेतस्य बन्धुभिः ।
नोपकुर्य्यान्नरः शोकात् प्रेतस्यात्मनएव वा ॥
दृष्ट्वा लोकमनाक्रन्दं म्रियमाणांश्च बान्धवान् ।
धर्म्ममेकं सहायार्थं वरयध्वं सदा नराः ॥
मृतोऽपि बान्धवः शक्तो नानुगन्तुं नरं मृतम् ।
जायावर्ज्जं हि सर्वस्य याम्यः पन्था विरुध्यते ॥
धर्म्मएकोऽनुयात्येनं यत्र क्वचन गामिनम् ।
नन्वसारे नृलोकेऽस्मिन् धर्म्मं कुरुत मा चिरम् ॥
श्वःकार्य्यमद्य कुर्व्वीत पूर्व्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतं वास्य न वाऽकृतम् ॥
क्षेत्रापणगृहासक्तमन्यत्र गतमानसम् ।
वृकीवोरणमासाद्य मृत्युरादाय गच्छति ॥
न कालस्य प्रियः कश्चिद्द्वेष्यश्चास्य न विद्यते ।
आयुष्ये कर्म्मणि क्षीणे प्रसह्य हरते जनम् ॥
नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥
नौषधानि न मन्त्राश्च न होमा न पुनर्जपाः ।
त्रायन्ते मृत्युनोपेतं जरया वापि मानवम् ॥
आगामिनमनर्थं हि प्रविधानशतैरपि ।
न निवारयितुं शक्तास्तत्र का परिदेवना ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।

तथा पूर्व्वकृतं कर्म्म कर्त्तारं विन्दते ध्रुवम् ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि चाप्यथ ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥
गृह्णातीह यथा वस्त्रं त्यक्त्वा पूर्व्वधृताम्बरम् ।
गृह्णात्येवं नवं देहं देही कर्म्मनिबन्धनम् ॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
नचैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सततगः स्थाणुरचलोऽयं सनातनः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हथ ॥
इति वैष्णवे धर्म्मशास्त्रे विंशोऽध्यायः ॥

अथाशौचव्यपगमे सुस्नातः सुप्रक्षालितपाणिपाद आचान्तस्त्वेवंविधान् ब्राह्मणान् यथाशक्त्युदङ्मुखान् गन्धमाल्यवस्त्रालङ्कारादिभिः पूजितान् भोजयेत् । एकवच्चान्नाहृते-कोद्दिष्टे । उच्छिष्टसन्निधावेकमेव तन्नामगोत्राभ्यां पिण्डं निर्व्वपेत् । भुक्तवत्सु ब्राह्मणेषु दक्षिणयाभिपूजितेषु प्रेतनामगोत्राभ्यां दत्ताक्षय्योदकश्चतुरङ्गुलपृथ्वीस्तावदन्तरास्तावदधःखाता वितस्त्यायतास्तिस्रः कर्षूः कुर्य्यात् । कर्षूसमीपे चाग्नित्रयमुपसमाधाय परिस्तीर्य्य तत्रैकैकस्मिन्नाहुतित्रयं जुहुयात् । सोमाय पितृमते स्वधा नमः । अग्नये कव्यवाहनाय स्वधा नमः । यमायाङ्गिरसे स्वधा नमः । स्थानत्रये च

प्राग्वत्पिण्डनिर्वपणं कुर्य्यात्। अन्नदधिघृतमधुमांसैः कर्षूत्रयं पूरयित्वैतदिति जपेत्। एवंमृताहे प्रतिमासं कुर्य्यात्। सम्वत्सरान्ते प्रेताय तत्पित्रे तत्पितामहाय तत्प्रपितामहाय च ब्राह्मणान् देवपर्व्वान् भोजयेत्। अत्राग्नौकरणमावाहनं पाद्यञ्च कुर्य्यात्। संसृजतु त्वा पृथिवीसमानीवइति च प्रेतपाद्यपात्रं पितृपाद्यपात्रत्रये योजयेत्। उच्छिष्टसन्निधौ पिण्डचतुष्टयं कुर्य्यात्। ब्राह्मणांश्च स्वाचान्तान्दत्तदक्षिणांश्चानुव्रज्य विसर्ज्जयेत्। ततः प्रेतपिण्डं पाद्यपात्रोदकवत् पिण्डत्रये निदध्यात्। कर्षूत्रयसन्निकर्षेऽप्येवमेव। सपिण्डीकरणं मासिकार्थवद्द्वादशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्य्यात्। मन्त्रवर्जं हि शूद्राणां द्वादशेऽह्नि। सम्वत्सराभ्यन्तरे यद्यधिमासो भवेत्तदा मासिकार्थे दिनमेकञ्च वर्द्धयेत्।

सपिण्डीकरणं स्त्रीणां कार्य्यमेवं तथा भवेत्।
यावज्जीवं तथा कुर्य्याच्छ्राद्धन्तु प्रतिवत्सरम्॥
अर्वाक् सपिण्डीकरणं यस्य सम्वत्सरात् कृतम्।
तस्याप्यन्नं सोदकुम्भं दद्याद्वर्षं द्विजन्मने॥

इति वैष्णवे धर्म्मशास्त्रे एकविंशोऽध्यायः॥

ब्राह्मणस्य सपिण्डानां जननमरणयोर्दशाहमशौचम्। द्वादशाहं राजन्यस्य। पञ्चदशाहं वैश्यस्य। मासं शूद्रस्य। सपिण्डता च पुरुषे सप्तमे विनिवर्त्तते। अशौचे होमदानप्रतिग्रहस्वाध्याया निवर्त्तन्ते। नाशौचे कस्यचिदन्नमश्नीयात्। ब्राह्मणादीनामशौचे यः सकृदेवान्नमश्नाति तस्य तावदशौचं यावत्तेषाम्। अशौचापगमे प्रायश्चित्तं कुर्य्यात्। सवर्णस्या-

शौचे द्विजो भुक्ता स्रवन्तीमासाद्य तन्निमग्नस्त्रिरघमर्षणं जप्तोत्तीर्य्य गायत्र्यष्टसहस्रं जपेत्। क्षत्रियाशौचे ब्राह्मणस्त्वेतदेवोपोषितः कृत्वा शुद्ध्यति। वैश्याशौचे राजन्यश्च। वैश्याशौचे ब्राह्मणस्त्रिरात्रोपोषितश्च। ब्राह्मणाशौचे राजन्यः क्षत्रियाशौचे वैश्यः स्रवन्तीमासाद्य गायत्रीशतपञ्चकं जपेत्॥

वैश्यश्च ब्राह्मणाशौचे गायत्र्यष्टशतं जपेत्।

शूद्राशौचे द्विजो भुक्ता प्राजापत्यव्रतञ्चरेत्। शूद्रश्च द्विजाशौचे स्नानमाचरेत्। शूद्रः शूद्राशौचे स्नातः पञ्चगव्यं पिबेत्। पत्नीनां दासानाञ्चानुलोम्येन स्वामिनस्तुल्यमशौचम्। मृते स्वामिन्यात्मीयम्। हीनवर्णानामधिकवर्णेषु तदपगमे शुद्धिः। ब्राह्मणस्य क्षत्रविट्शूद्रेषु षड्रात्रत्रिरात्रैकरात्रैः। क्षत्रियस्य विट्शूद्रयोः षड्रात्रत्रिरात्राभ्याम्। वैश्यस्य शूद्रेषु षड्रात्रेण। मासतुल्यैरहोरात्रैर्गर्भस्रावे। जातमृते मृतजाते वा कुलस्य सद्यःशौचम्। अदन्तजाते बाले प्रेते सद्य एव। नास्याग्निसंस्कारो नोदकक्रिया। दन्तजाते त्वकृतचूडे त्वहोरात्रेण। कृतचूडे त्वसंस्कारे त्रिरात्रेण। ततः परं यथोक्तकालेन। स्त्रीणां विवाहः संस्कारः। संस्कृतासु स्त्रीषु नाशौचं भवति पितृपक्षे। तत्प्रसवमरणे चेत् पितृगृहे स्यातां तदैकरात्रं त्रिरात्रञ्च। जननाशौचमध्ये यद्यपरं जननाशौचं स्यात्तदा पूर्व्वाशौचव्यपगमे शुद्धिः। रात्रिशेषे दिनद्वयेन। प्रभाते दिनत्रयेण। मरणाशौचमध्ये ज्ञातिमरणेऽप्येवम्॥ श्रुत्वा देशान्तरस्थजननमरणे शेषेण शुद्ध्येत्। व्यतीतेऽशौचे सम्वत्सरान्तस्त्वेकरात्रेण। ततः परं स्नानेन। आचार्य्ये मातामहे च व्यतीते त्रिरात्रेण॥

अनौरसेषु पुत्रेषु जातेषु च मृतेषु च। परपूर्व्वासु भार्य्यासु प्रसूतासु मृतासु च। आचार्य्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्य्यसहाध्यायिशिष्येष्वतीतेष्वेकरात्रेण। स्वदेशराजनि च। असपिण्डे स्ववेश्मनि मृते च। भृग्वग्न्यनाशकाम्बुसंग्रामविद्युन्नृपहतानां नाशौचम्। न राज्ञां राजकर्म्मणि। न व्रतिनां व्रते। न सत्रिणां सत्रे। न कारूणां स्वकर्म्मणि। न राजाज्ञाकारिणां तदिच्छया। न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोः। न देशविप्लवे। आपद्यपि च कष्टायाम्। आत्मत्यागिनः पतिताश्च नाशौचोदकभाजः। पतितस्य दासी मृतेऽह्नि पादाभ्यां घटमपवर्ज्जयेत्। उद्बन्धनमृतस्य यः पाशं छिन्द्यात् स तप्तकृच्छ्रेण शुद्ध्यति। आत्मघातिनां संस्कर्त्ता च। तदश्रुपातकारी च। सर्व्वस्यैव प्रेतस्य बान्धवैः सहाश्रुपातं कृत्वा स्नानेन। अकृते त्वस्थिसञ्चये सचैलस्नानेन। द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवन्तीमासाद्य तन्निमग्नस्त्रिरघमर्षणं जीप्त्वोत्तीर्य्य गायत्र्यष्टसहस्रं जपेत्। द्विजप्रेतस्याष्टशतम्। शूद्रः प्रेतानुगमनं कृत्वा स्नानमाचरेत्। चिताधूमसेवने सर्व्वे वर्णाः स्नानमाचरेयुः। मैथुने दुःस्वप्ने रुधिरोपगतकण्ठे वमनविरेकयोश्च। श्मश्रुकर्म्मणि कृते च। शवस्पृशञ्च स्पृष्ट्वा रजस्वलाचाण्डालयूपांश्च। भक्ष्यवर्ज्जं पञ्चनखशवं तदस्थि सस्नेहञ्च। सर्व्वेष्वेतेषु स्नानेषु पूर्व्वं वस्त्रं नाप्रक्षालितं बिभृयात्। रजस्वला चतुर्थेऽह्नि स्नानाच्छुद्ध्यति। रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धा। सवर्णामधिकवर्णां वा स्पृष्ट्वा स्नात्वाश्नीयात्। क्षुत्वा सुप्त्वा भोजनाध्ययने

पीत्वा स्नात्वा निष्ठीव्य वासः परिधाय रथ्यामाक्रम्य मूत्रपुरीषे कृत्वा पञ्चनखस्य सस्नेहास्थि स्पृष्ट्वा चाचामेत्। चाण्डालम्लेच्छसम्भाषणे च। नाभेरधस्तात् प्रबाहुषु च कायिकैर्मलैः सुराभिर्म्मद्यैर्वोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्य शुद्ध्यति। अन्यत्रोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्य स्नानेन। वक्त्रोपहतस्तूपोष्य स्नात्वा पञ्चगव्येन। दशनच्छदोपहतश्च॥

वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविड्नखाः।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः॥
गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्व्वा न पातव्या द्विजातिभिः॥
माधूकमैक्षवं टाङ्कं कौलं खार्ज्जूरपानसे।
मृद्वीकारसमाध्वीके मैरेयं नारिकेलजम्॥
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य च।
राजन्यश्चैव वैश्यश्च स्पृष्ट्वैतानि न दुष्यतः॥
गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्।
प्रेताहारैः समं तत्र दशरात्रेण शुध्यति॥
आचार्य्यं स्वमुपाध्यायं पितरं मातरं गुरुम्।
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते॥
आदिष्टी नोदकं कुर्य्यादाव्रतस्य समापनात्।
समाप्ते तूदकं कृत्वा त्रिरात्रेण विशुद्ध्यति॥
ज्ञानं तपोऽग्निराहारो मृन्मनोवार्य्युपाञ्जनम्।
वायुः कर्म्मार्ककालौ च शुद्धिकर्तॄणि देहिनाम्॥
सर्वेषामेव शौचानामन्नशौचं परं स्मृतम्।
योऽन्ने शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः॥

क्षान्त्या शुद्ध्यन्ति विद्वांसो दानेनाकार्य्यकारिणः।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः॥
मृत्तोयैः शुद्ध्यते शोध्यं नदी वेगेन शुद्ध्यति।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः॥
अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति॥
एष शौचस्य ते प्रोक्तः शारीरस्य विनिर्णयः।
नानाविधानां द्रव्याणां शुद्धेः शृणु विनिर्णयम्॥

इति वैष्णवे धर्म्मशास्त्रे द्वाविंशोऽध्यायः॥

शारीरैर्मलैः सुराभिर्मद्यैर्व्वा यदुपहतं तदत्यन्तोपहतम्। अत्यन्तोपहतं सर्व्वं लोहभाण्डमग्नौ प्रक्षिप्तं शुद्ध्येत्। मणिमयमश्ममयमब्जञ्च सप्तरात्रं महीनिखननेन। शृङ्गदंष्ट्रास्थिमयं तक्षणेन। दारवं मृण्मयञ्च जह्यात्। अत्यन्तोपहतस्य वस्त्रस्य यत्प्रक्षालितं विरज्येत तच्छिन्द्यात्। सौवर्णराजताब्जमणिमयानां निर्लेपानामद्भिः शुद्धिः। अश्ममयानाञ्चमसानां ग्रहाणाञ्च। चरुस्रुक्स्रुवाणामुष्णेनाम्भसा। यज्ञकर्म्मणि यज्ञपात्राणां पाणिना संमार्ज्जनेन। स्फ्यशूर्पशकटमुषलोलूखलानां प्रोक्षणेन। शयनयानासनानाञ्च। बहूनाञ्च धान्याजिनरज्जुतान्तववैदलसूत्रकार्पासवाससाञ्च। शाकमूलफलपुष्पाणाञ्च। तृणकाष्ठशुष्कपलाशानां च। एतेषां प्रक्षालनेन। अल्पानाञ्च। ऊषैः कौशेयाविकयोः। अरिष्टकैः कुतपानाम्। श्रीफलैरंशुपट्टानाम्। गौरसर्षपैः क्षौमाणाम् शृङ्गास्थिदन्तमयानाञ्च। पद्माक्षैर्मृगलोमिकानाम्। ताम्ररीतित्रिपुसीसमयानामम्लोदकेन। भस्मना कांस्यलौ-

ह्योः। तत्क्षणेन दारवाणाम्। गोबालैः फलसम्भवानाम्। प्रोक्षणेन संहतानाम्। उत्पवनेन द्रव्याणाम्। गुड़ादीनामिक्षुविकाराणां प्रभूतानां गृहनिहितानां वार्य्यग्निदानेन। सर्वलवणानाञ्च। पुनः पाकेन मृण्मयानाम्। द्रव्यवत्कृतशौचानां देवतार्च्चानां भूयः प्रतिष्ठापनेन। असिद्धस्यान्नस्य यावन्मात्रमुपहतं तन्मात्रं परित्यज्य शेषस्य कण्डनप्रक्षालने कुर्य्यात्। द्रोणाद्यधिकं सिद्धमन्नमुपहतं न दुष्यति। तस्योपहतमात्रमपास्य गायत्र्याभिमन्त्रितं सुवर्णाम्भः प्रक्षिपेत् वस्तस्य च प्रदर्शयेदग्नेः।

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्।
दूषितं केशकीटैश्च मृदः क्षेपेण शुद्ध्यति॥
यावन्नापैत्यमेध्याक्ताद्गन्धो लेपश्च तत्कृतः।
तावन्मृद्वारि देयं स्यात् सर्वासु द्रव्यशुद्धिषु॥
अजाश्वं मुखतो मेध्यं न गौर्न्नरजा मलाः।
पन्थानश्च विशुद्ध्यन्ति सोमसूर्य्यांशुमारुतैः॥
रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः।
मारुतेनैव शुद्ध्यन्ति पक्केष्टकचितानि च॥
प्राणिनामथ सर्वेषां मृद्भिरद्भिश्च कारयेत्।
अत्यन्तोपहतानाञ्च शौचं नित्यमतन्द्रितः॥
भूमिष्ठमुदकं पुण्यं वैतृष्ण्यं यत्र गोर्भवेत्।
अव्याप्तञ्चेदमेध्येन तद्वदेव शिलागतम्॥
वह्निप्रज्वालनं कुर्य्यात् कूपे पक्केष्टकाचिते।
पञ्चगव्यं न्यसेत् पश्चान्नवतोयसमुद्भवे॥
जलाशयेष्वथाल्पेषु स्थावरेषु वसुन्धरे!।

कूपवत् कथिता शुद्धिर्महत्सु च न दूषणम् ॥
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्।
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥
नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम्।
ब्राह्मणान्तरितं भैक्ष्यमाकराः सर्व्वएव च ॥
नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने।
प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥
श्वभिर्हतस्य यन्मांसं शुचि तत् परिकीर्त्तितम्।
क्रव्याद्भिश्च हतस्यान्यैश्चाण्डालाद्यैश्च दस्युभिः।
ऊर्द्धं नाभेर्यानि खानि तानि मेध्यानि निर्द्दिशेत्।
यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥
मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः।
रजोभूर्व्वायुरग्निश्च मार्ज्जारश्च सदा शुचिः ॥
नोच्छिष्टं कुर्व्वते मुख्या विप्रुषोऽङ्गे न यान्ति याः।
न श्मश्रूणि गतान्यास्यं न दन्तान्तरवेष्टितम् ॥
स्पृशन्ति बिन्दवः पादौ य आचामयतः परान्।
भौमिकैस्ते समाज्ञेया न तैरप्रयतो भवेत् ॥
उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥
मार्ज्जनोपाञ्जनैर्वेश्म प्रोक्षणेन च पुस्तकम्।
समार्ज्जनेनाञ्जनेन सेकेनोल्लेखनेन च ॥
दाहेन च भुवः शुद्धिर्वासेनाप्यथवा गवाम्।
गावः पवित्रं मङ्गल्यं गोषु लोकाः प्रतिष्ठिताः।
गावो वितन्वते यज्ञं गावः सर्व्वाघसूदनाः ॥

गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना।
षडङ्गमेतत्परमं मङ्गल्यं सर्वदा गवाम्॥
शृङ्गोदकं गवां पुण्यं सर्व्वाघविनिसूदनम्।
गवां कण्डूयनञ्चैव सर्वकल्मषनाशनम्।
गवां ग्रासप्रदानेन स्वर्गलोके महीयते॥
गवां हि तीर्थे वसतीह गङ्गा पुष्टिस्तथा सा रजसि प्रवृद्धा।
लक्ष्मीः करीषे प्रणतौ च धर्म्मस्तासां प्रणामं सततञ्च कुर्य्यात्॥

इति वैष्णवे धर्म्मशास्त्रे त्रयोविंशोऽध्यायः॥

अथ ब्राह्मणस्य वर्णानुक्रमेण चतस्रो भार्य्या भवन्ति। तिस्रः क्षत्रियस्य। द्वे वैश्यस्य। एका शूद्रस्य। तासां सवर्णावेदने पाणिर्ग्राह्यः। असवर्णावेदने शरः क्षत्रियकन्यया। प्रतोदो वैश्यकन्यया। वसनदशान्तः शूद्रकन्यया। न सगोत्रां न समानार्षप्रवरां भार्य्यां विन्देत् मातृतस्त्वा पञ्चमात् पुरुषात् पितृतश्चासप्तमात्। नाकुलीनाम् नच व्याधिताम्। नाधिकाङ्गीम्। न हीनाङ्गीम्। नातिकपिलाम्। न वाचाटाम्। अथाष्टौ विवाहा भवन्ति। ब्राह्मो दैव आर्षः प्राजापत्यो गान्धर्व आसुरो राक्षसः पैशाचश्चेति। आहूय गुणवते कन्यादानं ब्राह्मः। यज्ञस्थऋत्विजे दैवः। गोमिथुनग्रहणेनार्षः। प्रार्थिताप्रदानेन प्राजापत्यः। द्वयोः सकामयोर्म्मातापितृरहितो योगो गान्धर्वः। क्रयेणासुरः। युद्धहरणेन राक्षसः। सुप्तप्रमत्ताभिगमनात् पैशाचः। एतेष्वाद्याश्चत्वारो धर्म्याः। गान्धर्व्वोऽपि राजन्यानाम्। ब्राह्मीपुत्रः पुरुषानेकविंशतिं पुनीते। दैवीपुत्रश्चतुर्द्दश। आर्षीपुत्रश्च सप्त। प्राजापत्यश्चतुरः। गान्धर्व

विवाहेन कन्यां ददद्ब्रह्मलोकं गमयति । दैवेन स्वर्गम् । प्राजापत्येन देवलोकम् । गान्धर्वेण गन्धर्वलोकं गच्छति । पिता पितामहो भ्राता सकुल्यो मातामहो माता चेति कन्याप्रदाः । पूर्व्वाभावे प्रकृतिस्थः परः परः ।

ऋतुत्रयमुपास्यैव कन्या कुर्य्यात् स्वयम्वरम् ।
ऋतुत्रये व्यतीते तु प्रभवत्यात्मनः सदा ॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया हरंस्तां न विदुष्यति ॥

॥ इति वैष्णवे धर्म्मशास्त्रे चतुर्विंशोऽध्यायः ॥

अथ स्त्रीणां धर्म्माः । भर्त्तुः समानव्रतचारित्वम् । श्वश्रूश्वशुरगुरुदेवतातिथिपूजनम् । सुसंस्कृतोपस्करता । अमुक्तहस्तता । सुगुप्तभाण्डता । मूलक्रियास्वनभिरतिः । मङ्गलाचारतत्परता । भर्त्तरि प्रवासितेऽप्रतिकर्म्मक्रिया । परगृहेष्वनभिगमनम् । द्वारदेशगवाक्षकेषु नावस्थानम् । सर्व्वकर्म्मस्वस्वतन्त्रता । बाल्ययौवनवार्द्धकेष्वपि पितृभर्तृपुत्राधीनता ।

मृते भर्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा ।
नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषणम् ।
पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥
पत्यौ जीवति या योषिदुपवासव्रतञ्चरेत् ।
आयुः सा हरते भर्त्तुर्नरकञ्चैव गच्छति ॥
मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥

॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चविंशोऽध्यायः ॥

सवर्णासु बहुभार्य्यासु विद्यमानासु ज्येष्ठया सह धर्म्म-

कार्य्यं कुर्य्यात्। मिश्रासु च कनिष्ठयापि समानवर्णया। समानवर्णाभावे त्वनन्तरयैवापदि च। नत्वेव द्विजः शूद्रया।

द्विजस्य भार्य्या शूद्रा तु धर्म्मार्थे न भवेत् क्वचित्।
रत्यर्थमेव सा तस्य रागान्धस्य प्रकीर्त्तिता॥
हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम्॥
दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु।
नादन्ति पितृदेवास्तु नच स्वर्गं स गच्छति॥

॥ इति वैष्णवे धर्म्मशास्त्रे षड्विंशोऽध्यायः॥

गर्भस्य स्पष्टताज्ञाने निषेककर्म्म। स्पन्दनात् पुरा पुंसवनम् षष्ठेऽष्टमे वा सीमन्तोन्नयनं। जाते च दारके जातकर्म्म। अशौचव्यपगमने नामधेयं। मङ्गल्यं ब्राह्मणस्य। बलवत् क्षत्रियस्य। धनोपेतं वैश्यस्य। जुगुप्सितं शूद्रस्य। चतुर्थे मासग्रादित्यदर्शनम्। षष्ठेऽन्नप्राशनम्। तृतीयेऽब्दे चूड़ाकरणम्। एताएव क्रियाः स्त्रीणाममन्त्रकाः। तासां समन्त्रको विवाहः। गर्भाष्टमेऽब्दे ब्राह्मणस्योपनयनं। गर्भैकादशे राज्ञः। गर्भद्वादशे विशः। तेषां मुञ्जज्यावल्वजमय्यो मौञ्ज्यः। कार्पासशणाविकान्युपवीतानि वासांसि च। मार्गवैयाघ्रवास्तानि चर्म्माणि। पालाशखादिरौडुम्बरा दण्डाः। केशान्तललाटनासादेशतुल्याः सर्व्व एव वा। भवदाद्यं भवन्मध्यं भवदन्तञ्च भैक्ष्यचरणम्।

आषोड़शाद्ब्राह्मणस्य सावित्री नातिवर्त्तते।
आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः॥
अतऊर्द्धं त्रयोऽप्येते यथाकालमसंस्कृताः।

सावित्री पतिता व्रात्या भवन्त्यार्य्यविगर्हिताः ॥
यद्यस्य विहितं चर्म्म यत्सूत्रं या च मेखला ।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि ॥
मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे सप्तविंशोऽध्यायः ॥

अथ ब्रह्मचारिणां गुरुकुले वासः । सन्ध्याद्वयोपासनम् । पूर्वां सन्ध्यां जपेत्तिष्ठन् पश्चिमामासीनः । कालद्वयमभिषेकाग्निकर्मकरणम् । अप्सु दण्डवन्मज्जनम् । आहूताध्ययनम् । गुरोः प्रियहिताचरणम् । मेखलादण्डाजिनोपवीतधारणम् । गुरुकुलवर्जं गुणवत्सु भैक्ष्याचरणम् । गुर्वनुज्ञातो भैक्ष्याभ्यवहरणम् । श्राद्धक्षारलवणशुक्तपर्य्युषितनृत्यगीतस्त्रीमधुमांसाञ्जनोच्छिष्टप्राणिहिंसाश्लील परिवर्ज्जनम् । अधः शय्या । गुरोः पूर्व्वोत्थानं चरमं संवेशनम् । कृतसन्ध्योपासनश्च गुर्व्वभिवादनं कुर्य्यात् । तस्य च व्यत्यस्तकरः पादावुपस्पृशेत् । दक्षिणं दक्षिणेनेतरमितरेण । स्वञ्च नामास्याभिवादनान्ते भोःशब्दान्तं निवेदयेत् । तिष्ठन्नासीनः शयानो भुञ्जानः पराङ्मुखश्च नास्याभिभाषणं कुर्य्यात् । आसीनस्योपस्थितः कुर्य्यात्तिष्ठतोऽभिगच्छन्नागच्छतः प्रत्युद्गम्य पश्चाद्धावन् धावतः । पराङ्मुखस्याभिमुखः दूरस्थस्यान्तिकमुपेत्य । शयानस्य प्रणम्य । तस्य च चक्षुर्विषये न यथेष्टासनः स्यात् । नचास्य केवलं नाम ब्रूयात् । गतिचेष्टाभाषितादिकं नास्य कुर्य्यात् । यत्रास्य निन्दापरीवादौ स्यातां न तत्र तिष्ठेत् । नास्यैकासनो भवेत् ।

ऋते शिलाफलकनौयानेभ्यः। गुरोर्गुरौ सन्निहिते गुरुवद्वर्त्तेत। अनिर्दिष्टो गुरुणा स्वान् गुरूंन्नाभिवादयेत्। बाले समानवयसि वाध्यापके गुरुपुत्रे गुरुवद्वर्त्तेत। नास्य पादौ प्रक्षालयेत् नोच्छिष्टमश्नीयात्। एवं वेदं वेदौ वेदान् वा स्वीकुर्य्यात्। ततो वेदाङ्गानि। यस्त्वनधीतवेदोऽन्यत्र श्रमं कुर्य्यादसौ ससन्तानः शूद्रत्वमेति। मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनम्। तत्रास्य माता सावित्री भवति पिता त्वाचार्य्यः। एतेनैव तेषां द्विजत्वम्। प्राङ्मौञ्जीबन्धनाद्द्विजः शूद्रसमो भवति। ब्रह्मचारिणा मुण्डेन जटिलेन वा भाव्यम्। वेदस्वीकरणादूर्द्ध्वं गुर्व्वनुज्ञातस्तस्मै वरं दत्त्वा स्नायात्। ततो गुरुकुलएव जन्मनः शेषं नयेत्। तत्राचार्य्ये प्रेते गुरुवद्गुरुपुत्रे वर्त्तेत। गुरुदारेषु सवर्णेषु वा। तदभावेऽग्निशुश्रूषुर्नैष्ठिको ब्रह्मचारी स्यात्॥

एवञ्चरति यो विप्रो ब्रह्मचर्य्यमतन्द्रितः।
स गच्छत्युत्तमं स्थानं न चेहा जायते पुनः॥
कामतो रेतसः सेको व्रतस्थस्य द्विजन्मनः।
अतिक्रमं व्रतस्याहुर्ब्रह्मज्ञा ब्रह्मवादिनः॥
एतस्मिन्नेनसि प्राप्ते वसित्वा गर्द्दभाजिनम्।
सप्तागारं चरेद्भैक्ष्यं स्वकर्म्म परिकीर्त्तयन्॥
तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नेककालिकम्।
उपस्पृशंस्त्रिषवणमब्देन स विशुद्ध्यति॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्म्मामित्यृचं जपेत्॥
अकृत्वा भैक्ष्यचरणमसमिध्य च पावकम्।

अनातुरः सप्तरात्रमवकीर्णी व्रतञ्चरेत् ॥
तञ्चेदभ्युदियात् सूर्य्यः शयानं कामकारतः।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ॥
इति वैष्णवे धर्म्मशास्त्रेऽष्टाविंशोऽध्यायः ॥

यस्तूपनीय व्रतादेशं कृत्वा वेदमध्यापयेत्तमाचार्य्यं विद्यात्। यस्त्वेनं मूल्येनाध्यापयेत्तमुपाध्यायमेकदेशं वा। यो यस्य यज्ञे कर्म्माणि कुर्य्यात्तमृत्विजं विद्यात्। नापरीक्षितं याजयेत् नाध्यापयेत् नोपनयेत् ॥

अधर्म्मेण च यः प्राह यश्च धर्म्मेण पृच्छति।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ॥
धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा।
तत्र विद्या न वप्तव्या शुभं वीजमिवोषरे।
विद्याह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवेऽयताय न मां ब्रूया वीर्य्यवती तथा स्याम् ॥
यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम्।
यस्तेन द्रुह्येत् कतमांश्च नाह तस्मै मां ब्रूया निधिपाय ब्रह्मन्! ॥
॥ इति वैष्णवे धर्म्मशास्त्रे एकोनत्रिंशोऽध्यायः ॥

श्रावण्यां प्रौष्ठपद्यां वा च्छन्दांस्युपाकृत्यार्द्धपञ्चमान् मासानधीयीत। ततस्तेषामुत्सर्गं बहिः कुर्य्यान्नानुपाकृतानां। उत्सर्गोपाकर्म्मणोर्मध्ये वेदाङ्गाध्ययनं कुर्य्यात्। नाधीयीताहोरात्रं चतुर्द्दश्यष्टमीषु च। नर्त्तन्त्यन्तरमहसूतके। नेन्द्रियप्रयाणे। न वाति चण्डपवने। नाकालवर्षविद्युत्स्तनितेषु। न भूकम्पोल्कापातदिग्दाहेषु। नान्तःशवे

ग्रामे। न शस्त्रसंपाते। न श्वसृगालगर्द्दभनिर्ह्रादे। न वादित्रशब्दे। न शूद्रपतितयोः समीपे। न देवतायतनश्मशानचतुष्पथरथ्यासु। नोदकान्तः। न पीठोपहितपादः। न हस्त्यश्वोष्ट्रनौगोयानेषु। न वान्तः। न विरिक्तः। नाजीर्णी। न पञ्चनखान्तरागमने। न राजश्रोत्रियगोब्राह्मणव्यसने। नोपाकर्म्मणि। नोत्सर्गे न सामध्वनावृग्यजुषी। नापररात्रमधीत्य शयीत। अभियुक्तोऽप्यनध्यायेष्वध्ययनं परिहरेत्। यस्मादनध्ययनाधीतं नेहनामुत्र फलदम्। तदध्ययनेनायुषः क्षयो गुरुशिष्ययोश्च। तस्मादनध्यायवर्जं गुरुणा ब्रह्मलोककामेन विद्या सच्छिष्यक्षेत्रेषु वप्तव्या। शिष्येण ब्रह्मारम्भावसानयोर्गुरोः पादोपसंग्रहणं कार्य्यम्। प्रणवश्च व्याहर्त्तव्यः। तत्र च यदृचोऽधीते तेनास्याज्येन पितॄणां तृप्तिर्भवति। यद्यजूंषि तेन मधुना। यत्सामानि तेन पयसा। यच्चाथर्व्वणन्तेन मांसेन। यत्पुराणेतिहासवेदाङ्गधर्म्मशास्त्राण्यधीते तेनास्यान्नेन यश्च विद्यामासाद्यास्मिंल्लोके तया जीवेन्न सा तस्य परलोके फलप्रदा भवेत्। यश्च विद्यया यशः परेषां हन्ति। अनुज्ञातश्चान्यस्मादधीयानान्न विद्यामादद्यात्। तदादानमस्य ब्रह्मणः स्तेयं नरकाय भवति।

लौकिकं वैदिकं चापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं न तं द्रुह्येत् कदाचन॥
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम्॥
कामान्माता पिता चैनं यदुत्पादयतो मिथः।

सम्भूतिं तस्य तां विद्याद्यद्योनाविह जायते ॥
आचार्य्यस्त्वस्य यां जातिं विधिवद्वेदपारगः ।
उत्पादयति सावित्र्या सा सत्या साजरामरा ॥
य आवृणोत्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् ।
तं वै मन्येत् पितरं मातरञ्च तस्मै न द्रुह्येत् कृतमस्य जानन् ।

॥ इति वैष्णवे धर्म्मशास्त्रे त्रिंशोऽध्यायः ॥

त्रयः पुरुषस्यातिगुरवो भवन्ति । माता पिता आचार्य्यश्च । तेषां नित्यमेव शुश्रूषुणा भवितव्यम् । यत्ते ब्रूयुस्तत्कुर्य्यात् । तेषां प्रियहितमाचरेत् । न तैरननुज्ञातः किञ्चिदपि कुर्य्यात् ।

एतएव त्रयो वेदा एतएव त्रयः सुराः ।
एतएव त्रयो लोका एतएव त्रयोऽग्नयः ॥
पिता गार्हपत्योऽग्निर्दक्षिणाग्निर्माता गुरुराहवनीयः ।
सर्वं तस्यादृता धर्म्मा यस्यैते त्रय आदृताः ॥
अनादृतास्तु यस्यैते सर्व्वास्तस्याफलाः क्रियाः ।
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ॥
गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ।

॥ इति वैष्णवे धर्म्मशास्त्रे एकत्रिंशोऽध्यायः ॥

राजर्त्विक्श्रोत्रियाधर्म्मप्रतिषेद्धुरुपाध्यायपितृव्यमातामहमातुलश्वशुरज्येष्ठभ्रातृसम्बन्धिनश्चाचार्य्यवत् । पत्न्य एतेषां सवर्णाः । मातृष्वसा पितृष्वसा ज्येष्ठा स्वसा च । श्वशुरपितृव्यमातुलर्त्विजां कनीयसां प्रत्युत्थानमेवाभिवादनम् । हीनवर्णानां गुरुपत्नीनां दूरादभिवादनं न पादोपसंस्पर्शनम् । गुरुपत्नीनां गात्रोत्सादनाञ्जनकेशसंय-

मनपादप्रक्षालनं न कुर्य्यात्। असंस्तुतापि परपत्नी भगिनीति वाच्या पुत्रीति मातेति वा। न च गुरूणां त्वमिति ब्रूयात्। तदतिक्रमे निराहारो दिवसान्ते तं प्रसाद्याश्नीयात्। न च गुरुणा सह विगृह्य कथां कुर्य्यात्। नैव चास्य परीवादम्। न चानभिप्रेतम्।

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णे विंशतिवर्षे च गुणदोषौ विजानता॥
कामन्तु गुरुपत्नीनां युवतीनां युवा भुवि।
अभिवादनकं कुर्य्याद्सावहमिति ब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन्॥
वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मानस्थानानि गरीयो यद्यदुत्तरम्॥
ब्राह्मणं दशवर्षञ्च शतवर्षञ्च भूमिपम्।
पिता पुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता॥
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्य्यतः।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मनः॥

इति वैष्णवे धर्म्मशास्त्रे द्वात्रिंशोऽध्यय

अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं सुघोरं भवति। परिग्रहप्रसङ्गाद्विशेषेण गृहाश्रमिनः। तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु प्रवर्त्तते। जातिभ्रंशकरेषु सङ्करीकरणेष्वपात्रीकरणेषु च। मलावहेषु प्रकीर्णकेषु च।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।

कामक्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥

इति वैष्णवे धर्म्मशास्त्रे त्रयस्त्रिंशोऽध्यायः ॥

मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानि।

अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनम्।

नह्यन्या निष्कृतिस्तेषां विद्यते हि कथञ्चन।

इति वैष्णवे धर्म्मशास्त्रे चतुस्त्रिंशोऽध्यायः।

ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति महापातकानि। तत्संयोगश्च।

सम्वत्सरेण पतति पतितेन सहाचरन्।

एकयानभोजनाशनशयनैः। यौनस्रौवमौखसम्बन्धात् सद्यएव।

अश्वमेधेन शुद्ध्येयुर्महापातकिनस्त्विमे।

पृथिव्यां सर्वतीर्थानां तथानुसरणेन वा।

इति वैष्णवे धर्म्मशास्त्रे पञ्चत्रिंशोऽध्यायः।

यागस्थस्य क्षत्रियस्य वैश्यस्य च रजस्वलायाश्चान्तर्व्वत्न्याश्चात्रिगोत्रायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानीति। कौटसाक्ष्यं सुहृद्वध एतौ सुरापानसमौ। ब्राह्मणस्य भूम्यपहरणं निक्षेपापहरणं सुवर्णस्तेयसमम्। पितृव्यमातामहमातुलश्वशुर नृपपत्न्यभिगमनं गुरुदारगमनसमम्। पितृष्वसृमातृष्वसृस्वसृगमनञ्च। श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनञ्च। स्वसुः सख्याः सगोत्राया उत्तमवर्णायाः कुमार्य्या अन्त्यजाया रजस्वलायाः शरणागतायाः प्रव्रजिताया निक्षिप्तायाश्च।

अनुपातकिनस्त्वेते महापातकिनो यथा।

अश्वमेधेन शुद्यन्ति तीर्थानुसरणेन वा।

इति वैष्णवे धर्म्मशास्त्रे षट्त्रिंशोऽध्यायः।

अनृतवचनमुत्कर्षे। राजगामि च पैशुन्यम्। गुरोश्चालीकनिर्बन्धः। वेदनिन्दा। अधीतस्य च त्यागः। अग्निमातृपितृसुतदाराणाञ्च। अभोज्यान्नाभक्ष्यभक्षणम्। परस्वापहरणम्। परदाराभिगमनम्। अयाज्ययाजनम्। विकर्म्मणा जीवनञ्च। असत्प्रतिग्रहञ्च। क्षत्रविट्शूद्रगोबधः। अविक्रेयविक्रयः। परिविन्त्तितानुजेन ज्येष्ठस्य परिवेदनम्। तस्य च कन्यादानम्। याजनञ्च। व्रात्यता। भृतकाध्यापनम्। भृताच्चाध्ययनादानम्। सर्व्वाकरेष्वधिकारः। महायन्त्रप्रवर्त्तनम्। द्रुमगुल्मवल्लीलतौषधीनां हिंसा। स्त्रीजीवनम्। अभिचारबलकर्म्मसु प्रवृत्तिः। आत्मार्थे क्रियारम्भः। अनाहिताग्निता। देवर्षिपितृऋणानामनपाक्रिया। असच्छास्त्राभिगमनम्। नास्तिकता। कुशीलवता। मद्यपस्त्रीनिषेवणम्। इत्युपपातकानि।

उपपातकिनस्त्वेते कुर्य्युश्चान्द्रायणं नराः।

पराकञ्च तथा कुर्य्युर्यजेयुर्गोमखेन वा।

इति वैष्णवे धर्म्मशास्त्रे सप्तत्रिंशोऽध्यायः।

ब्राह्मणस्य रुजः करणम्। अपेयमद्ययोर्घ्रातिः जैह्म्यम्। पशुषु मैथुनाचरणं पुंसि च। इति जातिभ्रंशकराणि।

जातिभ्रंशकरं कर्म्म कृत्वान्यतममिच्छया।

कुर्य्यात् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया॥

इति वैष्णवे धर्म्मशास्त्रे अष्टात्रिंशोऽध्यायः।

ग्राम्यारण्यानां पशूनां हिंसा सङ्करीकरणम्।

सङ्करीकरणं कृत्वा मासमश्नीत यावकम्।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तन्तु कारयेत्॥
इति वैष्णवे धर्म्मशास्त्रे एकोनचत्वारिंशत्तमोऽध्यायः।

निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनमसत्यभाषणं शूद्रसेवनमित्यपात्रीकरणम्।

अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति।
शीतकृच्छ्रेण वा भूयो महासान्तपनेन वा॥
इति वैष्णवे धर्म्मशास्त्रे चत्वारिंशत्तमोऽध्यायः।

पक्षिणां जलचराणां जलजानाञ्च घातनम्। कृमिकीटानाञ्च। मद्यानुगतभोजनम्। इति मलावहानि।

मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनम्।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं विशोधनम्॥
इति वैष्णवे धर्म्मशास्त्रे एकचत्वारिंशत्तमोऽध्यायः।

यदनुक्तं तत्प्रकीर्णकम्।
प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम्।
प्रायश्चित्तं बुधः कुर्य्याद् ब्राह्मणानुमतः सदा॥
इति वैष्णवे धर्म्मशास्त्रे द्विचत्वारिंशत्तमोऽध्यायः।

अथ नरकाः। तामिस्रम्। अन्धतामिस्रम्। रौरवम् महारौरवम्। कालसूत्रम्। महानरकम्। संजीवनम् अवीचि। तापनम्। सम्प्रतापनम्। संघातकम्। काकोलम्। कुड्मलम्। कुट्टानम्। पूतिमृत्तिकम्। लोहशङ्कुः। ऋचीसम्। विषमपन्थानम्। कण्टकशाल्मलिः। दीपनदी। असिपत्रवनम्। लोहचारकमिति। एतेष्वकृतप्रायश्चित्ता अतिपातकिनः पर्य्यायेण कल्पं पच्यन्ते। महापातकिनो मन्वन्त-

रम्। अनुपातकिनश्चातुर्युगम्। कृतसङ्करीकरणाश्च सम्वत्-सरसहस्रम्। कृतजातिभ्रंशकरणाश्च। कृतापात्रीकरणाश्च। कृतमलिनीकरणाश्च। प्रकीर्णकपातकिनश्च बहून् वर्षयुगान्।

कृतपातकिनः सर्वे प्राणत्यागादनन्तरम्।
याम्यं पन्थानमासाद्य दुःखमश्नन्ति दारुणम्॥
यमस्य पुरुषैर्घोरैः कृष्यमाणा यतस्ततः।
सुकृच्छ्रेणानुकारेण नीयमानाश्च ते यथा॥
श्वभिः शृगालैः क्रव्यादैः काककङ्कबकादिभिः।
अग्नितुण्डैर्भक्ष्यमाणा भुजङ्गैर्वृश्चिकैस्तथा॥
अग्निना दह्यमानाश्च नुद्यमानाश्च कण्टकैः।
क्रकचैः पाट्यमानाश्च पीड्यमानाश्च तृष्णया॥
क्षुधया व्यथमानाश्च घोरैर्व्याघ्रगणैस्तथा।
पूयशोणितगन्धेन मूर्च्छमानाः पदे पदे॥
परान्नपानं लिप्सन्तस्ताड्यमानाश्च किङ्करैः।
काककङ्कबकादीनां भीमानां सदृशाननैः॥
क्वचित् क्वाथ्यन्ति तैलेन ताड्यन्ते मुषलैः क्वचित्।
आयसीषु च बिध्यन्ते शिलासु च तथा क्वचित्॥
क्वचिद्वान्तमथाश्नन्ति क्वचित् पूयमसृक् क्वचित्।
क्वचिद्विष्ठां क्वचिन्मांसं पूयगन्धि सुदारुणम्॥
अन्धकारेषु तिष्ठन्ति दारुणेषु तथा क्वचित्।
कृमिभिर्भक्ष्यमाणाश्च वह्नितुण्डैश्च दारुणैः॥
क्वचिच्छीतेन बाध्यन्ते क्वचिद्वा मेध्यमध्यगाः।
परस्परमथाश्नन्ति क्वचित् प्रेताः सुदारुणाः॥
क्वचिद्भूतेन ताड्यन्ते लम्बमानास्तथा क्वचित्।

कश्चित् क्षिप्यन्ति वाणैर्वैकृत्कृत्यन्ते तथा कश्चित् ॥
कण्ठेषु दत्तपादाश्च भुजङ्गाभोगवेष्टिताः।
पीड्यमानास्तथा यन्त्रैः कृष्यमाणाश्च जानुभिः॥
भग्नपृष्ठशिरोग्रीवाः सूचीकण्ठाः सुदारुणाः।
कूटागारप्रमाणैश्च शरीरैर्यातनाक्षमैः॥
एवं पातकिनः पापमनुभूय सुदुःखिताः।
तिर्य्यग्योनीः प्रपद्यन्ते दुःखानि विविधानि च॥
॥ इति वैष्णवे धर्म्मशास्त्रे त्रिचत्वारिंशत्तमोऽध्यायः॥

अथ पापात्मनां नरकेष्वनुभूतदुःखानां तिर्य्यग्योनयो-भवन्ति। अतिपातकिनां पर्य्यायेण सर्व्वाः स्थावरयोनयः। महापातकिनाञ्च कृमियोनयः। उपपातकिनां जलजयोनयः। अनुपातकिनां शकुनानां जलचरयोनयः। कृतसङ्करीकरण-कर्म्मणां मृगयोनयः। कृतापात्रीकरणकर्म्मणां पशुयोनयः। कृतमलिनीकरणकर्म्मणां मनुष्येष्वस्पृश्ययोनयः। प्रकीर्णेषु प्रकीर्णा हिंस्राः क्रव्यादा भवन्ति। अभोज्यान्नाभक्ष्याशी कृमिः। स्तेनः श्येनः। प्रकृष्टवस्त्रापहारी विलेशयः। आखु-र्धान्यहारी। हंसः कांस्यापहारी। जलं हृत्वाभिप्लवः। मधु दंशः। पयः काकः। रसं श्वा। घृतं नकुलः। मांसं गृध्रः। वसां मद्गुः। तैलं तैलपायिकः। लवणं चीचिवाक्। दधि वलाका। कौशेयं हृत्वा भवति तित्तिरिः। क्षौमं दर्द्दुरः। कार्पासतान्तवं क्रौञ्चः। गोधा गाम्। वान्तुदो गुडम्। छुच्छुन्दरिर्गन्धान्। पत्रशाकं वर्हो। कृतान्नं श्वावित्। अकृतान्नं शल्लकः। अग्निं वकः। गृहकार्य्यपस्करम्। रक्त-

वासांसि जविज्ञबिकः। गजं कूर्म्मः। अश्वं व्याघ्रः। फलं पुष्पं वा मर्कटः। ऋक्षः स्त्रियम्। यानमुष्ट्रः। पशूनजः। श्वेतः पारजायी॥

यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः।
अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुतं हविः॥
स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः।
एतेषामेव जन्तूनां भार्य्यात्वमुपयान्ति ताः॥

॥ इति वैष्णवे धर्म्मशास्त्रे चतुश्चत्वारिंशत्तमोऽध्यायः॥

अथ नरकानुभूत दुःखानां तिर्य्यक्त्वमुत्तीर्णानां मनुष्येषु लक्षणानि भवन्ति। कुष्ठ्यतिपातकी। ब्रह्महा यक्ष्मी। सुरापः श्यावदन्तकः। सुवर्णहारः कुनखः। गुरुतल्पगो दुश्चर्म्मा। पूतिनासः पिशुनः। पूतिवक्त्रः सूचकः। धान्यचौरोऽङ्गहीनः मिश्रचौरोऽतिरिक्ताङ्गः। अन्नापहारकस्त्वामयावी। वागपहारको मूकः। वस्त्रापहारकः श्वित्री। अश्वापहारकः पङ्गुः। देवब्राह्मणाक्रोशको मूकः। लोलजिह्वो गद्गदः। उन्मत्तोऽग्निदः। गुरुप्रतिकूलोऽपस्मारी। गोघ्नस्त्वन्धः। दीपापहारकश्च। काणश्च दीपनिर्व्वापकः। त्रपुचामरसीसकविक्रयी रजकः। एकशफविक्रयी मृगव्याधः। कुण्डाशी भगास्यः। घाण्टिकः स्तेनः। वार्द्धुषिको भ्रामरी। मिष्टाश्येकाकी वातगुल्मी। समयभेत्ता खल्वाटः। स्त्रीपद्यवकीर्णी। परवृत्तिघ्नो दरिद्रः परपीड़ाकरो दीर्घरोगी।

एवं कर्म्मविशेषेण जायन्ते लक्षणान्विताः।
रोगान्वितास्तथान्धाश्च कुब्जखञ्जैकलोचनाः॥

वामना वधिरा मूका दुर्ब्बलाश्च तथापरे ।
तस्मात् सर्वैः प्रयत्नेन प्रायश्चित्तं समाचरेत् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चचत्वारिंशत्तमोऽध्यायः ॥

अथ कृच्छ्राणि भवन्ति । त्र्यहं नाश्नीयात् प्रत्यहञ्च त्रिषवणं स्नानमाचरेत्त्रिः प्रतिस्नानमप्सु मज्जनं मग्नस्त्रिरघमर्षणं जपेत् दिवास्थितस्तिष्ठेत् रात्रावासीनः कर्म्मणोऽन्ते पयस्विनीं दद्यादित्यघमर्षणम् । त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमयाचितमश्नीयादेष प्राजापत्यः । त्र्यहमुष्णाः पिवेदपस्त्र्यहमुष्णं घृतं त्र्यहमुष्णं पयस्त्र्यहञ्च नाश्नीयादेष तप्तकृच्छ्रः । एष एव शीतैः शीतकृच्छ्रः । कृच्छ्रातिकृच्छ्रः पयसा दिवसैकविंशतिक्षपणम् । उदकसक्तूनां मासाभ्यवहारेणोदककृच्छ्रः । विसाभ्यवहारेण मूलकृच्छ्रः । विल्वाभ्यवहारेण श्रीफलकृच्छ्रः पद्माक्षैर्वा । निराहारस्य द्वादशाहेनैव पराकः । गोमूत्रगोमयक्षीरदधिसर्पिःकुशोदकान्येकदिवसमश्नीयाद्द्वितीयमुपवसेदेतत्सान्तपनम् । गोमूत्रादिभिः प्रत्यहाभ्यस्तैर्महासान्तपनम् । त्र्यहाभ्यस्तैश्चातिसान्तपनम् । पिण्याकाचमतक्रोदकसक्तूनामुपवासान्तरितोऽभ्यवहारस्तुलापुरुषः । कुशपलाशोडुम्बरपद्मशङ्खपुष्पीवटब्रह्मसुवर्चलानां पत्रैः क्वथितस्याम्भसः प्रत्येकं पानेन पर्णकृच्छ्रः ॥

कृच्छ्राण्येतानि सर्व्वाणि कुर्व्वीत कृतपावनः ।
नित्यं त्रिषवणस्नायी अधःशायी जितेन्द्रियः ॥
स्त्रीशूद्रपतितानाञ्च वर्ज्जयेच्चाभिभाषणम् ।

पवित्राणि जपेन्नित्यं जुहुयाच्चैव शक्तितः॥

॥ इति वैष्णवे धर्म्मशास्त्रे षट्चत्वारिंशत्तमोऽध्यायः॥

अथ चान्द्रायणम्।

ग्रासानविकारानश्नीयात्तांश्चन्द्रकलाभिवृद्धौ क्रमेण वर्द्धयेद्धानौ ह्रासयेदमावास्यां नाश्नीयादेष चान्द्रायणो यवमध्यः। पिपीलिकामध्योवा। यस्यामावास्या मध्ये भवति स पिपीलिकामध्यः। यस्य पौर्णमासी स यवमध्यः। अष्टौ ग्रासान् प्रतिदिवसं मासमश्नीयात् स यतिचान्द्रायणः। सायं प्रातश्चतुरश्चतुरः स शिशुचान्द्रायणः यथा कथञ्चित् षट्कोनां त्रिशतीं मासेनाश्नीयात् स सामान्यचान्द्रायणः॥

व्रतमेतत् पुरा भूम कृत्वा सप्तर्षयो वरम्।
प्राप्तवन्तः परं स्थानं ब्रह्मा रुद्रस्तथैव च॥

॥ इति वैष्णवे धर्म्मशास्त्रे सप्तचत्वारिंशत्तमोऽध्यायः॥

अथ कर्म्मभिरात्मकृतैर्गुरुमात्मानमन्येतात्मार्थे प्रसृतियावकं श्रपयेत्। न ततोऽग्नौ जुहुयात्। न चात्र बलिकर्म। अशृतं श्रप्यमाणे शृतञ्चाभिमन्त्रयेत्। श्रप्यमाणे रक्षां कुर्य्यात्। ब्रह्मा देवानां पदवी कवीनां ऋषिर्विप्राणां श्येनो गृध्राणां महिषो मृगाणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्निति दर्भान् बध्नाति। शृतञ्च तमश्नीयात् पात्रे निषिच्य। ये देवा मनोजाता मनोजुषः सुदक्षा दक्षपितरः। ते नः पान्तु ते नोऽवन्तु तेभ्योनमस्तेभ्यः स्वाहेत्यात्मनि जुहुयात्। अथाचान्तो नाभिमालभेत। स्नाताः पीता भव-

न्तो यूयमापोऽस्माकमुदरे यवाः । ता अस्मानमीवा अयक्ष्मा अनागसा सन्तु देवीरमृता ऋता वृद्ध इति । त्रिरात्रं मेधावी । षड्रात्रं पापकृत् । सप्तरात्रं पीत्वा महापातकिनामन्यतमः पुनाति । द्वादशरात्रेण पूर्वपुरुषकृतमपि पापं निर्दहति । मासं पीत्वा सर्वपापानि । गोनिर्हारमुक्तानां यवानामेकविंशतिरात्रञ्च ।

यवोऽसि धान्यराजोऽसि वारुणो मधुसंयुतः ।
निर्णोदः सर्वपापानां पवित्र ऋषिभिः स्मृतम् ॥
घृतमेव मधु यवा आपो वा अमृतं यवाः ।
सर्वं पुनीत मे पापं यन्मे किञ्चन दुष्कृतम् ॥
वाचा कृतं कर्मकृतं मनसा च विचिन्तितम् ।
अलक्ष्मीं कालकर्णीञ्च नाशयध्वं यवा ! मम ॥
श्वशूकरावलीढञ्च उच्छिष्टोपहतञ्च यत् ।
मातापित्रोरशुश्रूषां पुनीध्वञ्च यवा ! मम ॥
गणान्नं गणिकान्नञ्च शूद्रान्नं श्राद्धसूतकम् ।
चौरस्यान्नं नवश्राद्धं पुनीध्वञ्च यवा ! मम ॥

॥ इति वैष्णवे धर्मशास्त्रे अष्टाचत्वारिंशत्तमोऽध्यायः ॥

मार्गशीर्षशुक्लैकादश्यामुपोषितो द्वादश्यां भगवन्तं वासुदेवमर्च्चयेत् । पुष्पधूपानुलेपनदीपनैवेद्यैर्ब्राह्मणतर्पणैश्च । व्रतमेतत् सम्वत्सरं कृत्वा पाप्येभ्यः पूतो भवति । यावज्जीवं कृत्वा श्वेतद्वीपमाप्नोति । उभयद्वादशीष्वेकं स्वर्गलोकमाप्नोति यावज्जीवं कृत्वा विष्णोर्लोकमाप्नोति । एवमेव पञ्चदशीष्वपि ।

ब्रह्मभूतममावास्यां पौर्णमास्यान्तथैव च।
योगभूतं परिचरन् केशवं महदाप्नुयात्॥
दृश्येत सहितौ यस्यां दिवि चन्द्रबृहस्पती।
पौर्णमासी तु महती प्रोक्ता सम्वत्सरे तु सा॥
तस्यां दानोपवासाद्यमक्षतं परिकीर्त्तितम्।
तथैव द्वादशी शुक्ला या स्याच्छ्रवणसंयुता॥
॥ इति वैष्णवे धर्मशास्त्रे एकोनपञ्चाशत्तमोऽध्यायः॥

वने पर्णकुटीं कृत्वा वसेत् त्रिषवणं स्नायात् स्वकर्म चाचक्षाणो ग्रामं ग्रामे भैक्ष्यमाचरेत् तृणशायी च स्यात्। एतन्महाव्रतं ब्राह्मणं हत्वा द्वादशसम्वत्सरं कुर्य्यात्। यागस्थं क्षत्रियं वा। गुर्व्विणीं रजस्वलां वा। अत्रिगोत्रां वा नारीम्। मित्रं वा। नृपतिबधे महाव्रतमेव द्विगुणं कुर्य्यात्। पादोनं क्षत्रियबधे। अर्द्धं वैश्यबधे। तदर्द्धं शूद्रबधे। सर्व्वेषु शवशिरोध्वजी स्यात्। सर्व्वेषु जीवेषु क्षमी स्यात्। मासमेकं कृतपावनो गवानुगमनं कुर्य्यात् आसीनास्वासीत स्थितासु स्थितः स्यात् अवसन्नाञ्चोद्धरेत् भयेभ्यश्च रक्षेत् तासां शीतादित्राणमकृत्वा नात्मनः कुर्य्यात् गोमूत्रेण स्नायात् गोरसैश्च वर्त्तेत। एतद्गोव्रतं गोबधे कुर्य्यात्। गजं हत्वा पञ्च नीलान् वृषभान् दद्यात्। तुरगं वासः। एकहायनमनड्वाहं खरबधे। मेषाजबधे च। सुवर्णकृष्णलमुष्ट्रबधे। श्वानं हत्वा त्रिरात्रमुपवसेत्। हत्वा मूषकमार्ज्जारनकुलमण्डूकडुण्डुभाजगराणामन्यतममुपोषितः कृसरान्नं भोजयित्वा लोहदण्डं दक्षिणां दद्यात्। गोधोलूककाकमत्स्यबधे

त्रिरात्रमुपवसेत्। हंसबककबलाकमद्गुवानरश्येनभासचक्रवाकानामन्यतमं हत्वा ब्राह्मणाय गां दद्यात्। सर्पं हत्वाभ्रीं-काष्र्णायसीम्। षण्डं हत्वा पलालभारकम्। वराहं हत्वा-घृतकुम्भम्। तित्तिरिं तिलद्रोणम्। शुकं द्विहायनं वत्सम्। क्रौञ्चं त्रिहायणम्। क्रव्यादमृगबधे पयस्विनीं गां दद्यात्। अक्रव्यादमृगबधे वत्सतरीम्। अनुक्तमृगबधे त्रिरात्रं पयसा वर्त्तेत। पक्षिवधे नक्ताशी स्यात् रूप्यमाषकं वा दद्यात्। हत्वा जलचरमुपवसेत्।

अस्थिमताञ्च सत्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्यनस्थ्नान्तु शूद्रहत्याव्रतञ्चरेत् ॥
किञ्चिदेव तु विप्राय दद्यादस्थिमतां बधे ।
अनस्थ्नां चैव हिंसायां प्राणायामेण शुध्यति ॥
फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम् ।
गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम् ॥
अन्नजानाञ्च सत्वानां रसजानाञ्च सर्वशः ।
फलपुष्पोद्भवानाञ्च घृतप्राशो विशोधनम् ॥
कृष्टजानामोषधीनां जातानाञ्च स्वयं वने ।
वृथालम्भे तु गच्छेद्गां दिनमेकं पयोव्रतम् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चाशत्तमोऽध्यायः ॥

सुरापः सर्वकर्मवर्जितः कणान् वर्षमश्नीयात्। मद्यानां मद्यानां चान्यतमस्य प्राशने चान्द्रायणं कुर्य्यात्। लशुन-पलाण्डुगृञ्जनैतद्गन्धिविड्वराहग्राम्यकुक्कुटवानरगोमांसभक्षणे च। सर्वेष्वेतेषु द्विजानां प्रायश्चित्तान्ते भूयः संस्कारं कु-

र्य्यात् । वपनमेखलादण्डभैक्ष्यचर्य्याव्रतानि पुनःसंस्कारकर्मणि वर्जनीयानि । शशकशल्लकगोधाखड्गकूर्मवर्जं पञ्चनखमांसाशने सप्तरात्रमुपवसेत् । गणगणिकास्तेनगायनान्नानि भुक्त्वा सप्तरात्रं पयसा वर्त्तेत । तक्षकान्नं चर्मकर्त्तुश्च । वार्द्धुषिककदर्य्यदीक्षितबद्धनिगडाभिशस्तषण्डानाञ्च । पुंश्चलीदाम्भिकचिकित्सकलुब्धकक्रूरोग्रोच्छिष्टभोजिनाञ्च । अवीरास्त्रीसुवर्णकारसपत्नपतितानाञ्च । पिशुनानृतवादित्यक्तधर्मात्मरसविक्रयिणाञ्च । शैलूषतन्तुवायकृतघ्नरजकानाञ्च । कर्मकारनिषादरङ्गावतारिवेणुशस्त्रविक्रयिणाञ्च । श्वजीविशौण्डिकतैलिकचैलनिर्णेजकानाञ्च । रजस्वलासद्दोपपतिवेश्मनाञ्च । भ्रूणघ्नावेक्षितमुदक्या संस्पृष्टं पतत्रिणावलीढं शुना संस्पृष्टं गवाघ्रातञ्च । कामतो यदा संस्पृष्टमवक्षुतम् । मत्तक्रुद्धातुराणाञ्च । नार्च्चितं वृथामांसं च । पाठीनरोहितराजीवसिंहतुण्डशकुलवर्जं सर्वमत्स्यमांसाशने त्रिरात्रमुपवसेत् । सर्वजलजमांसाशनेषु च । आपः सुराभाण्डस्थाः पीत्वा सप्तरात्रं शङ्खपुष्पीशृतम्पयः पिबेत् । मद्यभाण्डस्थाश्च पञ्चरात्रम् । सोमपः सुरापस्याघ्रायास्यगन्धमुदकमग्नस्त्रिरघमर्षणं जप्त्वा घृतप्राशनो भवेत् । खरोष्ट्रकाकमांसाशने चान्द्रायणं कुर्य्यात् । प्राश्याज्ञातं सूनास्थं शुष्कमांसञ्च । क्रव्यादमृगपक्षिमांसाशने तप्तकृच्छ्रम् । कलविङ्कप्लवचक्रवाकहंसरज्जुदालसारसदात्यूहशुकसारिकावकबलाकाकोकिलखञ्जरीटाशने त्रिरात्रमुपवसेत् । एकशफोभयदन्ताशने च । तित्तिरिकापिञ्जललावकवर्त्तिकामयूरवर्ज्जं सर्वपक्षिमांसाशने चाहोरात्रम् । कीटाशने दिनमेकं

ब्रह्मसुवर्च्चलां पिबेत् । शुनां मांसाशने च । छत्राककरका-शने सान्तपनम् । यवगोधूमपयोविकारं स्नेहाक्तं शुक्तं खाण्डवञ्च वर्जयित्वा पर्य्युषितं तत्प्राश्योपवसेत् । ब्रश्चना-मेध्यप्रभवाँल्लोहितांश्च वृक्षनिर्यासान् । शालूकतथाक्रसरसं-यावपायसापूपशष्कुलीदेवान्नानि हवींषि च । गोऽजामहिषी-वर्ज्जं सर्व्वपयांसि च । अनिर्द्दशाहानि तान्यपि । स्यन्दिनी-सन्धिनीविवत्साक्षीरञ्च । अमेध्यभुजश्च । दधिवर्ज्जं केव-लानि च शुक्तानि । ब्रह्मचर्य्याश्रमी श्राद्धभोजने त्रिरात्र-मुपवसेत् दिनमेकं चोदके वसेत् । मधुमांसाशने प्राजा-पत्यम् । विड़ालकाकनकुलाखूच्छिष्टभक्षणे ब्रह्मसुवर्च्चलां पिबेत् । श्वोच्छिष्टाशने दिनमेकमुपोषितः पञ्चगव्यं पिबेत् । पञ्चनखविण्मूत्राशने सप्तरात्रम् । आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत । ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रम् । वैश्यो-च्छिष्टाशने पञ्चरात्रम् । राजन्योच्छिष्टाशने त्रिरात्रम् । ब्राह्मणोच्छिष्टाशने त्वेकाहम् । राजन्यः शूद्रोच्छिष्टाशी पञ्चरात्रम् । वैश्योच्छिष्टाशी त्रिरात्रम् । वैश्यः शूद्रो च्छिष्टाशी च । चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् । सिद्धं भुक्त्वा पराकः ।

असंस्कृतान् पशून्मन्त्रैर्नाद्याद्विप्रः कथञ्चन ।
मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः ॥
यावन्ति पशुरोमाणि तावत् कृत्वेह मारणम् ।
वृथा पशुघ्नः प्राप्नोति प्रेत्य चेह च निष्कृतिम् ॥
यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञोहि भूत्यै सर्व्वस्य तस्माद्यज्ञे वधोऽवधः ॥

न तादृशं भवत्येनो मृगं हन्तुर्धनार्थिनः।
यादृशं भवति प्रेत्य वृथामांसानि खादतः॥
ओषध्यः पशवो वृक्षास्तिर्य्यञ्चः पक्षिणस्तथा।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः॥
मधुपर्के च यज्ञे च पितृदैवतकर्म्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेति कथञ्चन॥
यज्ञार्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः।
आत्मानञ्च पशूंश्चैव गमयत्युत्तमां गतिम्॥
गृहे गुरावरण्ये वा निवसन्नात्मवान् द्विजः।
नावेदविहितां हिंसामापद्यपि समाचरेत्॥
या वेदविहिता हिंसा नियतास्मिंश्चराचरे।
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ॥
योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया।
स जीवंश्च मृतश्चैव न क्वचित् सुखमेधते॥
यो बन्धनवधक्लेशान् प्राणिनां न चिकीर्षति।
स सर्व्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते॥
यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च।
तदवाप्नोति यत्नेन यो हिनस्ति न किञ्चन॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत्॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम्।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात्॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते।

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
अनभ्यर्च्य पितॄन् देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तस्य पुण्यफलं समम् ॥
फलमूलाशनैर्दिव्यैर्मुन्यन्नानाञ्च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ॥
मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥
॥ इति वैष्णवे धर्म्मशास्त्रे एकपञ्चाशत्तमोऽध्यायः ॥

सुवर्णस्तेयकृद्राज्ञे कर्म्माचक्षाणो मुषलमर्पयेत्। बधात्त्यागाद्वा पूतो भवति। महाव्रतं द्वादशाब्दानि वा कुर्य्यात्। निक्षेपापहारी च। धान्यधनापहारी च कृच्छ्रमब्दम्। मनुष्यस्त्रीकूपक्षेत्रवापीनामपहरणे चान्द्रायणम्। द्रव्याणामल्पसाराणां सान्तपनम्। भक्ष्यभोज्यपानशय्यासनपुष्पमूलफलानां पञ्चगव्यपानम्। तृणकाष्ठद्रुमशुष्कान्नगुड़वस्त्रचर्म्मामिषाणां त्रिरात्रमुपवसेत्। मणिमुक्ताप्रवालताम्ररजतायःकांस्यानां द्वादशाहं कणानश्नीयात्। कार्पासकीटजोर्णाद्यपहरणे त्रिरात्रं पयसा वर्त्तेत। द्विशफैकशफहरणे त्रिरात्रमुपवसेत्। पक्षिगन्धौषधिरज्जुवैदलानामपहरणे दिनमुपवसेत् ॥

दत्त्वैवापहृतं द्रव्यं धनिकस्याप्युपायतः ।

प्रायश्चित्तं ततः कुर्य्यात् कल्मषस्यापनुत्तये ॥
यद्यत्परेभ्य आदद्यात् पुरुषस्तु निरङ्कुशः।
तेन तेन विहीनः स्याद्यत्र यत्राभिजायते ॥
जीवितं धर्म्मकामौ च धने यस्मात् प्रतिष्ठितौ।
तस्मात् सर्व्वप्रयत्नेन धनहिंसा विवर्ज्जयेत् ॥
प्राणिहिंसापरो यस्तु धनहिंसापरस्तथा।
महादुःख मवाप्नोति धनहिंसापरस्तयोः ॥
॥ इति वैष्णवे धर्म्मशास्त्रे द्विपञ्चाशत्तमोऽध्यायः ॥

अथागम्यागमने महाव्रतविधानेनाब्दं चीरवासा वने प्राजापत्यं कुर्य्यात्। परदारगमने च। गोव्रतं गोगमने च। पुंस्ययोनावाकाशेऽप्सु दिवा गोयाने च सवासाः स्नानमाचरेत्। चाण्डालीगमने तत्साम्यमवाप्नुयात्। अज्ञानतश्चान्द्रायणद्वयं कुर्य्यात्। पशुवेश्यागमने प्राजापत्यम्। सकृद्दुष्टा स्त्री यत् पुरुषस्य परदारे तद्व्रतं कुर्य्यात् ॥

यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः।
तद्भैक्ष्यभुग् जपन्नित्यं त्रिभिर्व्वर्षैर्व्यपोहति ॥
॥ इति वैष्णवे धर्म्मशास्त्रे त्रिपञ्चाशत्तमोऽध्यायः ॥

यः पापात्मा येन सह संयुज्यते स तस्यैव प्रायश्चित्तं कुर्य्यात्। हृतपञ्चनखात् कूपादत्यन्तोपहताच्चोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेत्। द्व्यहं राजन्यः। एकाहं वैश्यः। शूद्रो नक्तम्। सर्व्वे चान्ते व्रतस्य पञ्चगव्यं पिवेयुः ॥

पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत् ।
उभौ तौ नरकं यातो महारौरवसंज्ञितम् ।

पर्व्वानारोग्यवर्जमृतावगच्छन् पत्नीं त्रिरात्रमुपवसेत् ।
कूटसाक्षी ब्रह्महत्याव्रतञ्चरेत् । अनुदकमूत्रपुरीषकरणे सचेलस्नानं महाव्याहृतिहोमश्च । सूर्य्याभ्युदितनिर्म्मुक्तः सचेलस्नातः सावित्र्यष्टशतमावर्त्तयेत् । श्वसृगालविड्वराहखरवानरवायसपुंश्चलीभिर्दष्टः स्रवन्तीमासाद्य षोड़श प्राणायामान् कुर्य्यात् । वेदाग्न्युत्सादी त्रिषवणस्नाय्यधःशायी सम्वत्सरं सकृद्भैक्ष्येण वर्त्तेत । समुत्कर्षानृते गुरोश्चालीकनिर्बन्धे तदाक्षेपणे च मासं पयसा वर्त्तेत । नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नश्चैते सम्वत्सरं भैक्ष्येण वर्त्तेरन् । परिवित्तिः परिवेत्ता या च परिवेत्ता या च परिविद्यते दाता याजकश्च चान्द्रायणं कुर्य्यात् । प्राणिभूपुष्पलोमविक्रयी तप्तकृच्छ्रं कुर्य्यात् । आर्द्रौषधिगन्धपुष्पफलमूलचर्म्मवेत्रवैदलतुषकपालकेशभस्मास्थिगोरसपिण्याकतिलतैलविक्रयी प्राजापत्यम् । श्लेष्मजतुमधूच्छिष्टशङ्खशुक्तिसीसकृष्णलोहोडुम्बरखड्गपात्रविक्रयी चान्द्रायणं कुर्य्यात् । रक्तवस्त्ररङ्गरत्नगन्धगुड़मधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत् । मांसलवणलाक्षाक्षीरविक्रयी चान्द्रायणं कुर्य्यात् । तञ्च भूयश्चोपनयेत् । उष्ट्रेण खरेण वा गत्वा नग्नः स्नात्वा सुप्त्वा भुक्त्वा प्राणायामत्रयं कुर्य्यात् ॥

जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥
अयाज्ययाजनं कृत्वा परेषामन्त्यकर्म्म च ।

अभिचारमहीनञ्च त्रिभिः कृच्छ्रैर्व्यपोहति ॥
येषां द्विजानां सावित्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनापयेत् ॥
प्रायश्चित्तं चिकीर्षन्ति विकर्म्मस्थास्तु ये द्विजाः ।
ब्राह्मण्याच्च परित्यक्तास्तेषामप्येतदादिशेत् ॥
यद्गर्हितेनार्जयन्ति कर्म्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुद्ध्यन्ति जप्येन तपसा तथा ॥
वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥
अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने ।
कृच्छ्रातिकृच्छ्रं कुर्व्वीत विप्रस्योत्पाद्य शोणितम् ।
एनस्विभिरनिर्णिक्तैर्नार्थं कश्चित् समाचरेत् ॥
कृतनिर्णेजनांश्चैतान्न जुगुप्सेत धर्म्मवित् ।
बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्म्मतः ।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् ॥
अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोड़शः ।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च ॥
अनुक्तनिष्कृतीनाञ्च पापानामपनुत्तये ।
शक्तिञ्चावेक्ष्य पापञ्च प्रायश्चित्तं प्रकल्पयेत् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे चतुःपञ्चाशत्तमोऽध्यायः ॥

अथ रहस्यप्रायश्चित्तानि भवन्ति । स्रवन्तीमासाद्य स्नातः प्रत्यहं षोड़श प्राणायामान् कृत्वैककालं हविष्याशी मासेन पूतो ब्रह्महा भवति । कर्म्मणोऽन्ते पयस्विनीं गां

दद्यात् । व्रतेनाघमर्षणेन च सुरापः पूतो भवति । गायत्री-दशसाहस्रजपेन सुवर्णस्तेयकृत् त्रिरात्रोपोषितः पुरुष-सूक्तजपहोमाभ्यां गुरुतल्पगः ॥

यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्वपापापनोदनम् ॥
प्राणायामं द्विजः कुर्य्यात् सर्वपापापनुत्तये ।
दह्यन्ते सर्वपापानि प्राणायामैर्द्विजस्य तु ॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः ।
वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च ॥
त्रिभ्य एव च वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥
एतदक्षरमेताञ्च जपन् व्याहृतिपूर्विकाम् ।
सन्ध्ययोर्वेदविदुषो वेदपुण्येन युज्यते ॥
सहस्रकृत्वस्त्वभ्यस्य वहिरेतत्त्रिकं द्विजः ।
महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥
एतयाऽपरिसंयुक्ता काले च क्रियया स्वया ।
विप्रक्षत्रियविड्जातिर्गर्हणं याति साधुषु ॥
ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणोमुखम् ॥
योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः ।
स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान् ॥
एकाक्षरं परं ब्रह्म प्राणायामः परन्तपः ।

सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते ॥
क्षरन्ति सर्ववैदिक्यो जुहोतियजतिक्रियाः।
अक्षरं त्वक्षरं ज्ञेयं ब्रह्मा चैव प्रजापतिः ॥
विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः।
उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ॥
ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः।
कुर्य्यादन्यन्नवा कुर्य्यान्मैत्रो ब्राह्मणउच्यते ॥
॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चपञ्चाशत्तमोऽध्यायः ॥

अथातः सर्ववेदपवित्राणि भवन्ति। येषां जपैश्च होमैश्च द्विजातयः पापेभ्यः पूयन्ते। अघमर्षणं देवकृतं शुद्धवत्यः तरत्समन्दीयं कुष्माण्ड्यः पावमान्यः दुर्गासावित्री अतीषङ्गाः पदस्तोमाः सामानि व्याहृतयः भारुण्डानि चन्द्रसामपुरुषव्रते भासं वार्हस्पत्यं गोसूक्तं अश्वसूक्तं सामनीचन्द्रसूक्ते च शतरुद्रियं अथर्वशिरः त्रिसुपर्णं महाव्रतं नारायणीयं पुरुषसूक्तञ्च।
त्रीण्याज्यदोहानि रथन्तरञ्च अग्निव्रतं वामदेव्यं वृहच्च।
एतानि गीतानि पुनन्ति जन्तून् जातिस्मरत्वं लभते य इच्छेत् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे षट्पञ्चाशत्तमोऽध्यायः ॥

अथ त्याज्याः। व्रात्याः पतितास्त्रिपुरुषं मातृतः पितृतश्चाशुद्धाः सर्वएवाभोज्याश्चाप्रतिग्राह्याः। अप्रतिग्राह्येभ्यश्च

प्रतिग्रहप्रसङ्गं वर्जयेत्। प्रतिग्रहेण ब्राह्मणानां ब्राह्मं तेजः प्रणश्यति । द्रव्याणां वाऽविज्ञाय प्रतिग्रहविधिं यः प्रतिग्रहं कुर्य्यात् स दात्रा सह निमज्जति। प्रतिग्रहसमर्थश्च यः प्रतिग्रहं वर्ज्जयेत् स दातृलोकमाप्नोति । एधोदकमूलफलाभयामिषमधुशय्यासनगृहपुष्पदधिशाकांश्चाभ्युद्यतान्न निर्णुदेत ॥

आहृयाभ्युद्यतां भिक्षां पुरस्तादनुचोदिताम् ।
ग्राह्यां प्रजापतिर्मेने अपि दुष्कृतकर्म्मणः ॥
नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च ।
नच हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥
गुरून् भृत्यानुज्जिहीर्षुरर्च्चिष्यन् पितृदेवताः ।
सर्वतः प्रतिगृह्णीयान्नतु तृप्येत् स्वयं ततः ॥
एतेष्वपि च कार्य्येषु समर्थस्तत्प्रतिग्रहे ।
नादद्यात् कुलटाषण्डपतितेभ्यस्तथा द्विषः ॥
गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् ।
आत्मनोवृत्तिमन्विच्छन् गृह्णीयात् साधुतः सदा ॥
आर्द्धिकः कुलमित्रञ्च दासगोपालनापिताः ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे सप्तपञ्चाशत्तमोऽध्यायः ॥

अथ गृहाश्रमिणस्त्रिविधोऽर्थो भवति । शुक्लः शवलोऽसितश्चार्थः। शुक्लेनार्थेन यदैहिकं करोति तद्देवमासादयति। यच्छवलेन तन्मानुष्यम्। यत्कृष्णेन तत्तिर्य्यक्त्वम्। स्ववृत्त्युपार्जितं सर्व्वं सर्व्वेषां शुक्लम्। अनन्तरवृत्त्युपात्तं

शबलम्। अन्तरितवृत्त्युपात्तञ्च कृष्णम्।

क्रमागतं प्रीतिदायं प्राप्तञ्च सह भार्य्यया।
अविशेषेण सर्वेषां धनं शुक्लं प्रकीर्त्तितम्॥
उत्कोचशुल्कसंप्राप्तमविक्रेयस्य विक्रये।
कृतोपकारादाप्तञ्च शबलं समुदाहृतम्॥
पार्श्विकद्यूतचौर्य्याप्तं प्रतिरूपकसाहसौ।
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम्॥
यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः।
तथाविधमवाप्नोति स फलं प्रेत्य चेह च॥

॥ इति वैष्णवे धर्म्मशास्त्रे अष्टपञ्चाशत्तमोऽध्यायः॥

गृहाश्रमी वैवाहिकाग्नौ पाकयज्ञान् कुर्य्यात्। सायं प्रातश्चाग्निहोत्रम्। देवताभ्योजुहुयात्। चन्द्रार्कसन्निकर्ष-विप्रकर्षयोर्द्दर्शपूर्णमासाभ्यां यजेत। प्रत्ययनं पशुना। शर-द्ग्रीष्मयोश्चाग्रहायणेन। व्रीहियवयोर्वा पाके। त्रैवार्षिकाभ्य-धिकान्नः प्रत्यब्दं सोमेन। वित्ताभावे इष्ट्या वैश्वानर्य्या। शूद्रान्नं यागे परिहरेत्। यज्ञार्थं भिक्षितमवाप्तमर्थं सकल-मेव वितरेत्। सायं प्रातर्वैश्वदेवं जुहुयात्। भिक्षां च भिक्षवे दद्यात्। अर्च्चितभिक्षादानेन गोदानफलमवाप्नोति। भिक्ष्वभावे तन्मात्रं गवां दद्यात्। अग्नौ वा प्रक्षिपेत्। भुक्तेऽप्यन्ने विद्यमाने न भिक्षुकं प्रत्याचक्षीत। कण्डनी पेषणी चुल्ली कुम्भउपस्कर इति पञ्चसूना गृहस्थस्य। तन्निष्कृत्यर्थञ्च ब्रह्मदेवभूतपितृनरयज्ञान् कुर्य्यात्। स्वाध्यायो ब्रह्मयज्ञः। होमो दैवः। बलिर्भौतः। पितृतर्पणं पित्र्यः। नृयज्ञश्चाति-

थिपूजनम् ।

देवतातिथिभृत्यानां पितॄणामात्मनस्तथा ।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ॥
ब्रह्मचारी यतिर्भिक्षुर्जीवन्त्येते गृहाश्रमात ।
तस्मादभ्यागतानेतान् गृहस्थो नावमानयेत् ॥
गृहस्थएव यजते गृहस्थस्तप्यते तपः ।
ददाति च गृहस्थस्तु तस्माज्ज्येष्ठो गृहाश्रमी ॥
ऋषयः पितरो देवा भूतान्यतिथयस्तथा ।
आशासते कुटुम्बिभ्यस्तस्माच्छ्रेष्ठो गृहाश्रमी ॥
त्रिवर्गसेवां सततान्नदानं सुरार्चनं ब्राह्मणपूजनञ्च ।
स्वाध्यायसेवां पितृतर्पणञ्च कृत्वा गृही शक्रपदं प्रयाति ॥

॥ इति वैष्णवे धर्म्मशास्त्रे एकोनषष्टितमोऽध्यायः ॥

ब्राह्मे मुहूर्त्ते उत्थाय मूत्रपुरीषोत्सर्गं कुर्यात् । दक्षिणाभिमुखो रात्रौ दिवा चोदङ्मुखः सन्ध्ययोश्च । नाप्रच्छादितायां भूमौ । न फालकृष्टायाम् । न च्छायायाम् । नचोषरे । न शाद्वले । न ससत्वे । न गर्त्ते । न वल्मीके । न पथि । न रथ्यायाम् । न पराशुचौ । नोद्याने । नोद्यानोदकसमीपयोः । नाङ्गारे । न भस्मनि । न गोमये । न गोव्रजे । नाकाशे । नोदके । न प्रत्यनिलानलेन्द्वर्कस्त्रीगुरुब्राह्मणानाञ्च । नैवावगुण्ठितशिराः । लोष्टेष्टकाभिः परिमृज्य गुदं गृहीतशिश्नश्चोत्थायाद्भिर्मृद्भिश्चोद्धृताभिर्गन्धलेपक्षयकरं शौचं कुर्य्यात् ॥

एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।

उभयोः सप्त दातव्या मृदस्तिस्रस्तु पादयोः॥
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्।
त्रिगुणञ्च वनस्थानां यतीनाञ्च चतुर्गुणम्॥
॥ इति वैष्णवे धर्म्मशास्त्रे षष्टितमोऽध्यायः॥

अथ पालाशं दन्तधावनं नाद्यात्। नैव श्लेष्मातकारिष्टविभीतकधववधन्वनजम्। नच बन्धूकनिर्गुण्डीशिग्रुतिल्वतिन्दुकजम्। नच कोविदारशमीपीलुपिप्पलेङ्गुदगुग्गुलुजम्। न पारिभद्रकाम्लिकामोचकशाल्मलीशणजम्। न मधुरम्। नाम्लम्। नोर्द्ध्वशुष्कम्। न शुषिरम्। न पुतिगन्धि। न पिच्छिलम्। न दक्षिणापराभिमुखः। अद्यादुदङ्मुखः प्राङ्मुखोवा। वटासनार्कखदिरकरञ्जवदरसर्ज्जनिम्बारिमेदापामार्गमालतीककुभविल्वानामन्यतमम्। कषायं तिक्तं कटुकञ्च॥

कनीन्यग्रसमस्थौल्यं सकूर्च्चं द्वादशाङ्गलम्।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम्॥
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे प्रयत्नतः।
अमावास्यां नचाश्नीयाद्दन्तकाष्ठं कदाचन॥
॥ इति वैष्णवे धर्म्मशास्त्रे एकषष्टितमोऽध्यायः॥

अथ द्विजातीनां कनीनिकामूले प्राजापत्यं नाम तीर्थम्। अङ्गुष्ठमूले ब्राह्मम्। अङ्गुल्यग्रे दैवम्। तर्ज्जनीमूले पित्र्यम्। अनग्न्युष्णाभिरफेनिलाभिर्न शूद्रैककरावर्जिताभिरक्षराभिरद्भिः शुचौ देशे स्वासीनोऽन्तर्जानुः प्राङ्मुखश्चोद-

ङ्मुखोवा तन्मनाः सुमनाश्चाचामेत् । ब्राह्मेण तीर्थेन त्रिरा-चामेत् । द्विःप्रमृज्यात् । खान्यद्भिर्मूर्द्धानं हृदयं स्पृशेत् ।

हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ।
शुद्ध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥

॥ इति वैष्णवे धर्म्मशास्त्रे द्विषष्टितमोऽध्यायः ॥

अथ योगक्षेमार्थमीश्वरमुपगच्छेत् । नैकोऽध्वानं प्रप-द्येत । नाधार्म्मिकैः सार्द्धम् । न वृषलैः । न द्विषद्भिः । नाति-प्रत्युषसि । नातिसायम् । न सन्ध्ययोः । न मध्याह्ने न सन्नि-हितपानीयम् । नातितूर्णम् । न रात्रौ । न सन्ततं व्याल व्याधितार्त्तैर्वाहनैः । न हीनाङ्गैः न रोगिभिः । न दीनैः । न गोभिः । नादान्तैः । यवसोदकैर्वाहनानामदत्त्वात्मनः क्षुत्तृष्णापनोदने न कुर्य्यात् । न चतुष्पथमधितिष्ठेत् । न रात्रौ वृक्षमूलम् । न शून्यालयं न तृणम् । न पशूनां-बन्धनागारम् । न केशतुषकपालास्थिभस्माङ्गारान् । न का-र्पासास्थि । चतुष्पथं प्रदक्षिणीकुर्य्यात् देवताश्च प्रज्ञातांश्च वनस्पतीन् । अग्निब्राह्मणगणिकापूर्णकुम्भादर्शच्छत्रध्वज-पताकाश्रीवृक्षवर्द्धमाननन्द्यावर्त्तांश्च तालवृन्तचामराश्वगजा-जगोदधिक्षीरमधुसिद्धार्थकांश्च वीणाचन्दनायुधार्द्रगोमय-पुष्पशाकगोरोचनादूर्व्वाप्ररोहांश्च उष्णीषालङ्कारमणिकनक-रजतवस्त्रासनयानामिषांश्च भृङ्गारोद्धृतोर्व्वरारज्जुबद्धपशु-कुमारीमीनांश्च दृष्ट्वा प्रयायादिति । अथ मत्तोन्मत्तव्यङ्गान् दृष्ट्वा निवर्त्तेत । वान्तविरिक्तमुण्डमलिनवसनजटिलवामनांश्च । काषायिप्रव्रजितमलिनांश्च । तैलगुड़शुष्कगोमयेन्धनतृणकुश-

पलाशभस्माङ्गारांश्च। लवणक्लीवासवनपुंसककार्पासरज्जुनिगडमुक्तकेशांश्च। वीणाचन्दनार्द्रशाकोष्णीषालङ्करणकुमारीः प्रस्थानकालेऽभिनन्दयेदिति। देवब्राह्मणगुरुबभ्रुदीक्षितानां छायां नाक्रामेत्। निष्ठ्यूतवान्तरुधिरविण्मूत्रस्नानोदकानि वा। न वत्सतन्त्रीं लङ्घयेत्। प्रवर्षति न धावन्। न वृथा नदीं तरेत्। न देवताभ्यः पितृभ्यश्चोदकामप्रदाय। न बाहुभ्याम्। न भिन्नया नावा। न कूलमधितिष्ठेत। न कूपमवलोकयेत् न लङ्घयेत्॥

वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम्।
पन्था देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः॥

॥ इति वैष्णवे धर्म्मशास्त्रे त्रिषष्टितमोऽध्यायः॥

परनिपानेषु न स्नानमाचरेत्। आचरेत् पञ्चपिण्डानुद्धृत्यापदि। नाजीर्णे। नचातुरः। न नग्नः। न रात्रौ राहुदर्शनवर्जम्। न सन्ध्ययोः। प्रातःस्नायदरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायात्। स्नातः शिरो नावधुनेत्। नाङ्गेभ्यस्तोयमुद्धरेत्। न तैलवस्तु स्पृशेत्। नाप्रक्षालितं पूर्वधृतं वसनं बिभृयात्। स्नातः सोष्णीषो धौतवाससी बिभृयात्। न म्लेच्छान्त्यजपतितैः सह सम्भाषणं कुर्य्यात्। स्नायात् प्रस्रवणदेवखातसरोवरेषु। उद्धृताद्भूमिष्ठमुदकं पुण्यं स्थावरात् प्रस्रवणं तस्मान्नादेयं तस्मादपि साधुपरिगृहीतं सर्वतएव गाङ्गम्। मृत्तोयैः कृतमलापकर्षोऽप्सु निमज्यापोहिष्ठेति तिसृभिर्हिरण्यवर्णाइतिचतसृभिरिदमापः प्रवहतइति चतुर्थमभिमन्त्रयेत्। ततोऽप्सु निमग्नस्त्रिरघम-

षेण जपेत्। तद्विष्णोः परमं पदमिति वा। द्रुपदां सावित्रीं वा। युञ्जते मनइत्यनुवाकं वा। पुरुषसूक्तं वा। स्नातश्चार्द्रवासा देवपितृतर्पणमम्भःस्थ एव कुर्य्यात्। परिवर्त्तितवासाश्चेत्तीर्थमुत्तीर्य्य। अकृत्वा देवपितृतर्पणं स्नानवस्त्रादि न पीड़येत्। स्नात्वाचम्य विधिवदुपस्पृशेत्। पुरुषसूक्तेन प्रत्यृचं पुरुषाय पुष्पाणि दद्यात्। उदकाञ्जलिं पश्चात्। आदावेव दिव्येन तीर्थेन देवतानां कुर्य्यात्। तदनन्तरं पित्र्येण पितॄणाम्। तत्रादौ स्ववंश्यानां तर्पणं कुर्य्यात्। ततः सम्बन्धिबान्धवानाम्। ततः सुहृदाम्। एवं नित्यस्नायी स्यात्। स्नातश्च पवित्राणि यथाशक्ति जपेत्। विशेषतः सावित्रीं त्ववश्यं जपेत् पुरुषसूक्तञ्च। नैताभ्यामधिकमस्ति॥

स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्म्मणि।
पवित्राणां तथा जप्ये दाने च विधिनोदिते॥
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम्।
स्नातस्य जलमात्रेण नश्यते इतिधारणा॥
याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति।
नित्यस्नानेन पूयन्ते येऽपि पापकृतो नराः॥
॥ इति वैष्णवे धर्म्मशास्त्रे चतुःषष्टितमोऽध्यायः॥

अथातः सुस्नातः प्रक्षालितपाणिपादः स्वाचान्तो देवतार्च्चायां स्थले वा भगवन्तमनादिनिधनं वासुदेवमभ्यर्च्चयेत्। अश्विनेः प्राणैस्त्वेति इति कीचकीयमन्त्रेणाष्टव्य जीवस्य भगवती जीवादानं दत्त्वा युञ्जते मनइत्यनुवाकेनावाहनं कृत्वा जानुभ्यां पाणिभ्यां शिरसा च नमस्कारं कुर्य्यात्।

आपोहिष्ठेति तिसृभिरर्घ्यं निवेदयेत्। हिरण्यवर्णाइति चतसृभिः पाद्यम्। शन्न आपो धन्वन्या इत्याचमनीयम्। इदमापः प्रवहत इति स्नानीयम्। रथे अक्षेषु वृषभराजा इत्यनुलेपनालङ्कारौ। युवा सुवासा इतिवासः। पुष्पवतीरिति पुष्पम्। धूरसि धूर्वमितिधूपम्। तेजोऽसि शुक्रमितिदीपम्। दधिक्राव्ण इतिमधुपर्कः। हिरण्यगर्भ इत्यष्टाभिर्नैवेद्यम्।

चामरं व्यजनं मालां छत्रं पानासने तथा।
सावित्र्यैव तत् सर्व्वं देवाय विनिवेदयेत्॥
एवमभ्यर्च्च्य च जपेत् सूक्तं वै पौरुषं ततः।
तेनैव जुहुयाच्चाज्यं य इच्छेत्शाश्वतं पदम्॥

॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चषष्टितमोऽध्यायः॥

न नक्तं गृहीतेनोदकेन दैवपितृकर्म्म कुर्य्यात्। चन्दनमृगमदागुरुकर्पूरकुङ्कुमजातीफलवर्जमनुलेपनं न दद्यात्। न वासो नीलीरक्तम्। न मणिसुवर्णयोः प्रतिरूपमलङ्करणम्। नागन्धि। नोग्रगन्धि। न कण्टकिजम्। कण्टकिजमपि शुक्लं सुगन्धिकं दद्यात्। रक्तमपि कुङ्कुमं जलजञ्च दद्यात्। न धूपार्थे जीवजातम्। न घृततैलं विना किञ्चन दीपार्थे। नाभक्ष्यं नैवेद्यार्थे। न भक्ष्ये अप्यजामहिषीक्षीरे। पञ्चनखमत्स्यवराहमांसानि च।

प्रयतश्च शुचिर्भूत्वा सर्व्वमेव निवेदयेत्।
तन्मनाः सुमना भूत्वा त्वराक्रोधविवर्जितः॥

॥ इति वैष्णवे धर्म्मशास्त्रे षट्षष्टितमोऽध्यायः॥

अथाग्निं परिसमूह्य पर्य्युक्ष्य परिस्तीर्य्य परिषिच्य सर्व्वतः पाकादग्रमुद्धृत्य जुहुयात् । वासुदेवाय सङ्कर्षणाय प्रद्युम्नायानिरुद्धाय पुरुषाय सत्यायाच्युताय वासुदेवाय । अथाग्नये सोमाय मित्राय वरुणाय इन्द्रायेन्द्राग्निभ्यां विश्वेभ्यो देवेभ्यः प्रजापतये अनुमत्यै धन्वन्तरये वास्तोष्पतये अग्नये स्विष्टिकृतेच । ततोऽन्नशेषेण वलिमुपहरेत् । भक्ष्योपभक्ष्याभ्यामभितः पूर्व्वेणाग्नेः । अवानामासीति त्वलानामासीति नितन्तीनामासीति क्षिप्रणिकानामासीति सर्व्वासाम् । नन्दिनि सुभगे सुमङ्गलि भद्रकालीतिस्रक्ष्विष्वभिप्रदक्षिणाम् । स्थूणायां ध्रुवायां श्रियै । हिरण्यकेश्यै वनस्पतिभ्यः । धर्म्माधर्म्मयोर्द्वारे मृत्यवे च । उदपाने वरुणाय । विष्णव इत्युलूखले । मरुद्भ्य इति दृषदि । उपरिशरणे वैश्रवणाय राज्ञे भूतेभ्यश्च । इन्द्रायेन्द्रपुरुषेभ्य इतिपूर्व्वार्द्धे । यमाय यमपुरुषेभ्य इतिदक्षिणार्द्धे । वरुणाय वरुणपुरुषेभ्य इतिपश्चार्द्धे । सोमाय सोमपुरुषेभ्य इत्युत्तरार्द्धे । ब्रह्मणे ब्रह्मपुरुषेभ्य इतिमध्ये । ऊर्द्ध्वमाकाशाय । दिवाचरेभ्यो भूतेभ्य इतिस्थण्डिले । नक्तञ्चरेभ्य इतिनक्तम् । ततो दक्षिणाग्रेषु दर्भेषु पित्रे पितामहाय प्रपितामहाय मात्रे पितामह्यै प्रपितामह्यै स्वनामगोत्राभ्याञ्च पिण्डनिर्व्वपणं कुर्य्यात् । पिण्डानाञ्चानुलेपनपुष्पधूपनैवेद्यादि दद्यात् । उदककलशमुपनिधाय स्वस्त्ययनं वाचयेत् । श्वकाकश्वपचानां भुवि निर्वपेत् । भिक्षाञ्च दद्यात् । अतिथिपूजने च परं फलमधितिष्ठेत् । सायमतिथिं प्राप्तं प्रयत्नेनार्च्चयेत् । अनाश्रितमतिथिं गृहे न वासयेत् । यथा

वर्णानां ब्राह्मणः प्रभुर्यथा स्त्रीणां भर्त्ता तथा गृहस्थस्यातिथिः। तत्पूजायां स्वर्गमाप्नोति॥

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते।
तस्मात् सुकृतमादाय दुष्कृतन्तु प्रयच्छति॥
एकरात्रं हि निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्या हि स्थितिर्यस्मात्तस्मादतिथिरुच्यते॥
नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा।
उपस्थितं गृहे विद्याद्भार्य्या यत्राग्नयोऽपिवा॥
यदि त्वतिथिधर्मेण क्षत्रियो गृहमागतः।
भुक्तवत्सु च विप्रेषु कामं तमभिपूजयेत्॥
वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्म्मिणौ।
भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजयन्॥
इतराण्यपि सख्यादीन् संप्रीत्या गृहमागतान्।
प्रकृतान्नं यथाशक्ति भोजयेत् सह भार्य्यया॥
सुवासिनीं कुमारीञ्च रोगिणीं गुर्व्विणीं तथा।
अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्॥
अदत्त्वा यस्तु एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः॥
भुक्तवत्सु च विप्रेषु भृत्येषु स्वेषु चैव हि।
भुञ्जीयातां ततः पश्चादवशिष्टन्तु दम्पती॥
देवान् पितॄन् मनुष्यांश्च भृत्यान् गृह्याश्च देवताः।
पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत्॥
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्।
यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते॥

स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा।
नचाप्नोति गृही लोकान् यथा त्वतिथिपूजनात्॥
सायंप्रातस्त्वतिथये प्रदद्यादासनोदकम्।
अन्नञ्चैव यथा शक्त्या सत्कृत्य विधिपूर्वकम्॥
प्रतिश्रयं तथा शय्यां पादाभ्यङ्गं सदीपकम्।
प्रत्येकदानेनाप्नोति गोप्रदानसमं फलम्॥
॥ इति वैष्णवे धर्म्मशास्त्रे सप्तषष्टितमोऽध्यायः॥

चन्द्रार्कोपरागे नाश्नीयात्। स्नात्वा मुक्तयोरश्नीयात्। अमुक्तयोरस्तंगतयोर्दृष्ट्वा स्नात्वा चापरेऽह्नि। न गोब्राह्मणो-परागेऽश्नीयात्। न राजव्यसने। प्रवसिताग्निहोत्री यदा-ग्निहोत्रं कृतं मन्येत तदाश्नीयात्। यदा कृतं मन्येत वैश्व-देवमपि। पर्वणि च यदा कृतं मन्येत पर्व। नाश्नीयाच्चा-जीर्णे। नार्द्धरात्रे। न मध्याह्ने। न सन्ध्ययोः। नार्द्र-वासाः। नैकवासाः। न नग्नः। न जलस्थः। नोत्कुटुकः। न भिन्नासनगतः। नच शयनगतः। न भिन्नभाजने। नोत्-सङ्गे। न भुवि। न पाणौ। लवणञ्च यत्र दद्यात् नचाश्नी-यात्। न वालकान्निर्भर्त्सयेत्। नैको मिष्टम्। नोद्धृत-स्नेहम्। न दिवा धानाः। न रात्रौ तिलसंयुक्तम्। न दधि सक्तून्। न कोविदारवटपिप्पलशाणशाकम्। नादत्त्वा। ना-हुत्वा। नानार्द्रपादः। नानार्द्रकरमुखश्च। नोच्छिष्टश्च घृतमादद्यात् न चन्द्रार्कतारका निरीक्षेत। न मूर्द्धानं स्पृशेत्। न ब्रह्म कीर्त्तयेत्। प्राङ्मुखोऽश्नीयात् दक्षिणा-

मुखो वा। अभिपूज्यान्नम्। सुमनाः स्रग्व्यनुलिप्तः। न निः-शेषकृत् स्यात्। अन्यत्र दधिमधुसर्पिःपयःसक्तुपलमोदकेभ्यः।

नाश्नीयाद्भार्य्यया सार्द्धं नाकाशे न तथोत्थितः।
बहूनां प्रेक्षमाणानां नैकस्मिन् बहवस्तथा॥
शून्यागारे वह्निगृहे देवागारे कथञ्चन।
पिबेन्नाञ्जलिना तोयं नातिसौहित्यमाचरेत्॥
न तृतीयमथाश्नीयान्नचापथ्यं कथञ्चन।
नातिप्रगे नातिसायं न सायं प्रातराशितः॥
न भावदुष्टमश्नीयान्न भाण्डे भावदूषिते।
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम्॥

॥ इति वैष्णवे धर्म्मशास्त्रे अष्टषष्टितमोऽध्यायः॥

नाष्टमीचतुर्द्दशीपञ्चदशीषु स्त्रियमुपेयात्। न श्राद्धं भुक्त्वा। न श्राद्धं दत्त्वा। नोपनिमन्त्रितः श्राद्धे। न स्नात्वा। न हुत्वा। न व्रती। नोपोष्य भुक्त्वा वा। न दीक्षितः। न देवायतनश्मशानशून्यालयेषु। न वृक्षमूलेषु। न दिवा। न सन्ध्ययोः। न मलिनाम्। न मलिनः। नाभ्यक्ताम्। नाभ्यक्तः। न रोगार्त्ताम्। न रोगार्त्तः।

न हीनाङ्गीं नाधिकाङ्गीं तथैव च वयोधिकाम्।
नोपेयाद्गुर्व्विणीं नारीं दीर्घमायुर्जिजीविषुः॥

॥ इति वैष्णवे धर्म्मशास्त्रे एकोनसप्ततितमोऽध्यायः॥

नार्द्रपादः स्वप्यात्। नोत्तरापरावाक्शिराः। न

नग्नः । नार्द्रवंशे । नाकाशे । न पलाश शयने । न पञ्चदारुकृते । न गजभग्नकृते । न विद्युद्दग्धकृते न भिन्ने । नाग्निव्युष्टे । न घटासिक्तद्रुमजे । न श्मशानशून्यालयदेवतायतनेषु । न चपलमध्ये । न नारीमध्ये । न धान्यगोगुरुहुताशनसुराणामुपरि ।

नोच्छिष्टो न दिवा स्वप्यात् सन्ध्ययोर्न च भस्मनि ।
देशे नचाशुचौ नार्द्रे न च पर्वतमस्तके ॥

॥ इति वैष्णवे धर्म्मशास्त्रे सप्ततितमोऽध्यायः ॥

अथ न कञ्चनावमन्येत । न च हीनाङ्गाधिकाङ्गामूर्खान् धनहीनानवहसेत् । न हीनान् सेवेत । स्वाध्यायविरोधि कर्म्म नाचरेत् । वयोऽनुरूपं वेशं कुर्य्यात् श्रुतस्याभिजनस्य धनस्य देशस्य च । नोद्धतः । नित्यं शास्त्राद्यवेक्षी स्यात् । सति विभवे न जीर्णमलवद्वासाः स्यात् । न नास्तीत्यभिभाषेत । न निर्गन्धोग्रगन्धिरक्तञ्च माल्यं विभृयात् । विभृयाज्जलजं रक्तमपि । यष्टिञ्च वैणवीम् । कमण्डलुञ्च सोदकम् । कार्पासमुपवीतम् । रौक्मे च कुण्डले । नादित्यमुद्यन्तमीक्षेत । नास्तं यान्तम् । न वाससा तिरोहितम् । नचादर्शे जलमध्यगतम् । न मध्याह्ने । न क्रुद्धस्य गुरोर्मुखम् । न तैलोदकयोः स्वच्छायाम् । न मलवत्यादर्शे । न पत्नीं भोजनसमये । न स्त्रियं नग्नाम् । न कञ्चन मेहमानम् । न चालानभ्रष्टकुञ्जरम् । न च विमुक्तस्थोदृषं दियुद्धम् । न मत्तम् । नामेध्यमग्नौ प्रक्षिपेत् । नासृक् । न विषम् । नापकृपि । नाग्निं लङ्घयेत् । न

पाद्दौ प्रतापयेत् । न कुशैस्तेषु वा परिमृज्यात् । न कांस्य-भाजने चार्पयेत् । न पादं पादेन । न मुत्रमालिखेत् । न लोष्टमर्द्दी स्यात् । न तृणच्छेदी स्यात् । न दन्तैर्नख-लोमानि च्छिन्यात् । द्यूतं वर्जयेत् बालातपसेवाञ्च । वस्त्रोपानहमाल्योपवीतान्यन्यधृतानि न धारयेत् । न शूद्राय मतिं दद्यात् नोच्छिष्टहविषी न तिलान् । न चास्योपदिशेद्धर्म्मं न व्रतम् । न संहताभ्यां पाणिभ्यां शिर-उदरञ्च कण्डूयेत । न दधिसुमनसौ प्रत्याचक्षीत । नात्मनः स्रजमपकर्षयेत् । सुप्तं न प्रबोधयेत् । नोदक्यामभि-भाषेत न म्लेच्छान्त्यजान् । अग्निदेवब्राह्मणसन्निधौ प्रद-क्षिणम् पाणिमुद्धरेत । न परक्षेत्रे चरन्तीं गामाचक्षीत न पिबन्तं वत्सकम् । नोद्धतान् प्रहर्षयेत् । न शूद्रराज्ये निवसेत् नाधार्म्मिकजनाकीर्णे । न संवसेद्वैद्यहीने । नो-पसृष्टे । न चिरं पर्व्वते । न वृथाचेष्टां कुर्य्यात् । न नृत्य-गीते । नास्फोटनं कार्य्यम् । नाश्लीलं कीर्त्तयेत् । नानृ-तम् । नाप्रियम् । न किञ्चिन्मर्म्माणि स्पृशेत् । नात्मानम-वजानीयाद्दीर्घमायुर्जिजीविषुः । चिरं सन्ध्योपासनं कु-र्य्यात् । न सर्पशस्त्रैः क्रीडेत । अनिमित्ततः खानि खानि न स्पृशेत् । परस्य दण्डं नोद्यच्छेत । शास्यं शासनार्थं ताड़येत् । तन्वा वेणुदलेन रज्ज्वा वा पृष्ठे । देवब्राह्मणशास्त्रमहात्मनां परीवादं परिहरेत् । धर्म्मवि-रुद्धौ चार्थकामौ । लोकविद्विष्टञ्च धर्म्ममपि । पर्व्वसु शान्ति-होमं कुर्य्यात् । न तृणमपि च्छिन्द्यात् । अलङ्कृतश्च तिष्ठेत् । एवमाचारसेवी स्यात् ॥

श्रुतिस्मृत्युदितं सम्यक् साधुभिश्च निषेवितम्।
तमाचारं निषेवेत धर्म्मकामो जितेन्द्रियः॥
आचाराल्लभते चायुराचारादीप्सितां गतिम्।
आचाराद्धनमक्षय्यमाचाराद्धन्त्यलक्षणम्॥
सर्व्वलक्षणहीनोऽपि यः सदाचारवान्नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति॥
॥ इति वैष्णवे धर्म्मशास्त्रे एकसप्ततितमोऽध्यायः॥

दमपरेण तिष्ठेत्। दमश्चेन्द्रियाणां प्रकीर्त्तितः दान्तस्यायं लोकः परश्च। नादान्तस्य क्रिया काचित् समृध्यति॥
दमः पवित्रं परमं मङ्गल्यं परमं दमः।
दमेन सर्व्वमाप्नोति यत्किञ्चिन्मनसेच्छति॥
दशार्द्धयुक्तेन रथेन याति मनोवशेनार्थपथानुवर्त्तिना।
तच्चेद्रथं नापहरन्ति वाजिनस्तथागतं नावजयन्ति शत्रवः॥
आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामा यं प्रविशन्ति सर्व्वे स शान्तिमाप्नोति न कामकामी॥
॥ इति वैष्णवे धर्म्मशास्त्रे द्विसप्ततितमोऽध्यायः॥

अथ श्राद्धेप्सुः पूर्व्वेद्युर्ब्राह्मणानामन्त्रयेत्। द्वितीयेऽह्नि शुक्लपक्षस्य पूर्व्वाह्णे कृष्णपक्षस्यापराह्णे विप्रान् सुस्नातान् स्वाचान्तान् यथाभूयो विद्याक्रमेण कुशोत्तरेष्वासनेषूपवेशयेत्। द्वौ दैवे प्राङ्मुखौ त्रींश्च पित्र्ये उदङ्मुखान् एकैकमुभयत्र वेति। आमश्राद्धेषु काम्येषु च प्रथम पञ्चकेनाग्निं हुत्वा। पशुश्राद्धेषु मध्यमपञ्चकेन। अमावास्यासूत्तमपञ्च-

केन। आग्रहायण्या ऊर्द्ध्वं कृष्णाष्टकासु च क्रमेणैव प्रथम-मध्यमोत्तमपञ्चकैः। अन्वष्टकासु च। ततोब्राह्मणानुज्ञातः पितॄनावाहयेत्। अपयान्त्वसुरा इति श्राद्धविघ्नकर्त्तॄन्। यातुधानानपसार्य्य तिलैर्यातुधानानां विसर्जनं कृत्वा। एत पितरः सर्व्वांस्तान् अमाय सन्त्वितद्वः पितरइत्यावाहनं कृत्वा कुश तिलमिश्रेण गन्धोदकेन यस्तिष्ठन्त्यमृतागाविति यन्मे-मातेति च पाद्यं निर्वर्त्य निवेद्यार्घ्यं कृत्वा निवेद्य चानुलेपनं कृत्वा कुशतिलवस्त्रपुष्पालङ्कारधूपदीपैर्यथाशक्त्या विप्रान् समभ्यर्च्य व्रतष्टुत्मन्द्रमादायादित्यारुद्रावसवइति वीच्याग्नौ करवाणीत्युक्त्वा तत्र विप्रैः कुर्व्वित्युक्ते आहुतित्रयं दद्यात्। ये मामकाः पितर एतद्वः पितरोऽयं यज्ञ इति च हविरनु-मन्त्रणं कृत्वा यथोपपन्नेषु पात्रेषु विशेषाद्रजतमयेष्वन्न नमो विश्वेभ्यो देवेभ्यइत्यन्नमादौ प्राङ्मुखयोर्न्निवेदयेत्। पित्रे पितामहाय प्रपितामहाय च नामगोत्राभ्यामुदङ्मु-खेषु। तददत्सु ब्राह्मणेषु यन्मे प्रकामा अहोरात्रैर्यद्वा क्रव्यादिति जपेत्। इतिहासपुराणधर्म्मशास्त्राणि चेति। उच्छिष्टसन्निधौ दक्षिणाग्रेषु दर्भेषु पृथिवी दर्व्वी रक्षिता-इत्येकं पिण्डं पित्रे निदध्यात्। अन्तरीक्षं दर्व्वी रक्षिता-इति द्वितीयं पितामहाय। द्यौर्द्दर्व्वी रक्षिता इति तृतीयं प्रपितामहाय। अत्र पितरः मेता इति वासोदेयम्। वीरान्नः पितरो धत्त इत्यन्नम्। अत्र पितरो मादयध्वं यथाभागमावृ-षायध्वमिति दर्भमूले करघर्षणम्। ऊर्जं वहन्तीरित्यनेन सोदकेन प्रदक्षिणं पिण्डानां विकरणं सेचनं कृत्वा अर्घ-पुष्पधूपालेपनान्नादिभक्ष्यभोज्यानि च निवेदयेत्। उदक-

पात्रञ्च मधुघृततिलैः संयुक्तञ्च । भुक्तवत्सु ब्राह्मणेषु तृप्तिमागतेषु मामिश्रेष्ठेत्यन्नं सलवणमभ्युक्ष्यान्नविकिरमुच्छिष्टाग्रतः कृत्वा तृप्ताभवन्तः सम्पन्नमिति पृष्ट्वोदङ्मुखेभ्याचमनमादौ दत्त्वा ततः प्राङ्मुखेषु दत्त्वा ततश्च सुसुप्रोक्षितमिति श्राद्धदेशं संप्रोक्ष्य दर्भपाणिः सर्व्वं कुर्य्यात् । ततः प्राङ्मुखाग्रतोयन्मे नाम इति प्रदक्षिणं कृत्वा प्रत्येत्य च यथाशक्ति दक्षिणाभिः समभ्यर्च्याभिरमन्तु भवन्त इत्युक्ता तैरुक्तोऽभिरताः स्मइति देवाश्च पितरश्चेत्यभिजपेत् । अक्षय्योदकञ्च नामगोत्राभ्यां दत्त्वा विश्वे देवाः प्रीयन्तामिति प्राङ्मुखेभ्यस्ततः प्राञ्जलिरिदं तन्मनाः सुमना याचेत । दातारो नोऽभिवर्द्धन्तां वेदः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति । तथास्त्विति ब्रूयुः । अन्नञ्च नोबहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कञ्चन । इत्येताभ्यामाशिषः प्रतिगृह्य ।

वाजेवाजे इति ततोब्राह्मणांश्च विसर्जयेत् ।
पूजयित्वा यथान्यायमनुव्रज्याभिवाद्य च ॥

॥ इति वैष्णवे धर्म्मशास्त्रे त्रिसप्ततितमोऽध्यायः ॥

अष्टकासु दैवपूर्व्वं शाकमांसापूपैः श्राद्धं त्वन्वष्टकास्वष्टकावदह्नौ दैवपूर्वमेवं हुत्वा मात्रे पितामह्यै प्रपितामह्यै च पूर्ववद्ब्राह्मणान् भोजयित्वा दक्षिणाभिश्चाभ्यर्च्यानुव्रज्य विसर्जयेत् । ततः कर्षूः कुर्य्यात् । तत्र त्रे प्रागुदगग्न्युपसमाधानं कृत्वा पिण्डनिर्वपणम् । कर्षूत्रयमूले पुरुषाणां कर्षत्रयमूले स्त्रीणाम् । पुरुषकर्षत्रयं सान्नेनोदकेन पूर-

यत्। स्तौकर्षत्रयं सान्नेन पयसा। दध्ना मांसेन पयसा च प्रत्येकं कर्षत्रयं पूरयित्वा जपेद्भवतीभर्गोऽस्तु चाचरम्।

॥ इति वैष्णवे धर्म्मशास्त्रे चतुःसप्ततितमोऽध्यायः॥

पितरि जीवति यः श्राद्धं कुर्य्यात् स येषां पिता कुर्य्यात्तेषां कुर्य्यात्। पितरि पितामहे च जीवति येषां पितामहः कुर्य्यात्तेषां कुर्य्यात्। त्रिषु जीवत्सु नैव कुर्य्यात्। यस्य पिता प्रेतः स्यात् स पित्रे पिण्डं निधाय प्रपितामहात् परं द्वाभ्यां दद्यात्। यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिण्डौ दत्त्वा पितामहपितामहाय दद्यात्। यस्य पितामहः प्रेतः स्यात् स तस्मै पिण्डं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिण्डं निधाय पितामहात् परं द्वाभ्यां दद्यात्।

मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः।
मन्त्रोहेण यथान्यायं शेषाणां मन्त्रवर्जितम्॥

॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चसप्ततितमोऽध्यायः॥

अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टका माघी प्रौष्ठपद्यूर्द्ध्वं कृष्णत्रयोदशी व्रीहियवपाकौ चेति।

एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते॥

॥ इति वैष्णवे धर्म्मशास्त्रे षट्सप्ततितमोऽध्यायः॥

आदित्यस्य क्रमणं विषुवद्द्वयं विशेषेणायनद्वयं व्यतीपातो जन्मर्क्षमभ्युदयश्च। एतांस्तु श्राद्धकालान् वै काम्यानाह प्रजापतिः। श्राद्धमेतेषु यद्दत्तं तदानन्त्याय कल्पते॥

सन्ध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः।
तयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम्॥
राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम्।
गुणवत् सर्व्वकामीयं पितॄणामुपतिष्ठते॥

॥ इति वैष्णवे धर्म्मशास्त्रे सप्तसप्ततितमोऽध्यायः॥

सततमादित्येऽह्नि श्राद्धं कुर्व्वन्नारोग्यमाप्नोति। सौभाग्यं चान्द्रे। समरविजयं कौजे। सर्व्वान् कामान् बौधे। विद्यामभीष्टां जैवे। धनं शौक्रे। जीवितं शनैश्चरे। स्वर्गं कृत्तिकासु। अपत्यं रोहिणीषु। ब्रह्मवर्च्चस्यं सौम्ये कर्म्मसिद्धिं रौद्रे। भुवं पुनर्वसौ पुष्टिं पुष्ये। श्रियं सार्पे। सर्व्वान् कामान् पैत्रे। सौभाग्यं भाग्ये। धनमार्य्यमणे। ज्ञातिश्रैष्ठ्यं हस्ते। रूपवतः सुतां स्त्वाष्ट्रे। वाणिज्यसिद्धिं स्वातौ। कनकं विशाखासु। मित्राणि मैत्रे। राज्यं शाक्रे। कृषिं मूले। समुद्रयानसिद्धिमाप्ये। सर्व्वान् कामान् वैश्वदेवे। श्रैष्ठमभिजिति। सर्व्वान् कामान् श्रवणे। लवणं वासवे। आरोग्यं वारुणे। कुप्यद्रव्यमाजे। गृहमाहिर्व्रध्ने। गाः पौष्णे। तुरङ्गमाश्विने। जीवितं याम्ये। गृहसुरूपाः स्त्रियः प्रतिपदि। कन्यां वरदां द्वितीयायाम् सर्व्वान् कामां स्तृतीयायाम्। पशूंश्चतुर्थ्याम्। श्रियं पञ्चम्याम्। द्यूतविषयं षष्ठ्याम्। कृषिं सप्तम्याम्। वाणिज्यमष्टम्याम्।

पशूनवम्याम् वाजिनो दशम्याम्। ब्रह्मवर्चस्विनः पुत्रानेकादश्याम्। आयुर्वसुराज्यजयान् द्वादश्याम्। सौभाग्यं त्रयोदश्याम्। सर्वकामान् पञ्चदश्याम् शस्त्रहतानाम्। श्राद्धकर्म्मणि चतुर्द्दशी शस्ता। अपि पितृगीते गाथे भवतः।

अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः।
प्रावृट्काले ऽसिते पक्षे त्रयोदश्यां समाहितः॥
मधूत्कटेन यः श्राद्धं पायसेन समाचरेत्।
कार्त्तिकं सकलं मासं प्राक्छाये कुञ्जरस्य च॥
॥ इति वैष्णवे धर्म्मशास्त्रे अष्टसप्ततितमोऽध्यायः॥

अथ न नक्तं गृहीतेनोदकेन श्राद्धं कुर्य्यात्। कुशाभावे कुशस्थाने काशान् दूर्वां वा दद्यात्। वाससोऽर्थे कार्पासौर्णं सूत्रम्। दशां विवर्जयेद् यद्यप्याहतवस्त्रजा स्यात्। उग्रगन्धीन्यगन्धीनि कण्टकिजातानि रक्तानि च पुष्पाणि। शुक्लानि सुगन्धीनि कण्टकिजातान्यपि जलजानि रक्तान्यपि दद्यात्। वसां मेदश्च दीपार्थे न दद्यात्। घृतं तैलं वा दद्यात्। जीवजं सर्वधूपार्थे न दद्यात्। मधुघृतसंयुक्तं गुग्गुलुं दद्यात्। चन्दनकुङ्कुमकर्पूरागुरुपद्मकान्यनुलेपनार्थे। न प्रत्यक्षलवणं दद्यात् हस्तेन च घृतव्यञ्जनादि। तैजसानि पात्राणि दद्यात्। विशेषतो राजतानि। खड्गकुतपकृष्णाजिनतिलसिद्धार्थकाक्षतानि च पवित्राणि रक्षोघ्नानि चेति दद्यात्। पिप्पलीमुकुन्दकभूस्तृणशिग्रुसर्षप-

सुरसासर्जकसुवर्चलकुष्माण्डालाबुवार्त्ताकुपालङ्क्योपोदकीतण्डुलीयककुसुम्भपिण्डालुकमहिषीक्षीराणि वर्जयेत्। राजमाषमसूरपर्य्युषितकृतलवणानि च। कोपं परिहरेत्। नाश्रुपातयेत्। न त्वरां कुर्य्यात्। घृतादिदाने तैजसानि पात्राणि खड्गपात्राणि फल्गुपात्राणि च प्रशस्तानि। अत्र च श्लोको भवति॥

सौवर्णराजताम्याश्च खड्गेनौडुम्बरेण च।
दत्त मक्षय्यतां याति फल्गुपात्रेण चाप्यथ॥

॥ इति वैष्णवे धर्म्मशास्त्रे एकोनाशीतितमोऽध्यायः॥

तिलैर्व्रीहियवैर्मासैरद्भिर्मूलफलैः शाकैः श्यामाकैः प्रियङ्गुभिर्नीवारैर्मुद्गैर्गोधूमैश्च मासं प्रीयन्ते। द्वौ मासौ मत्स्यमांसेन। त्रीन्हारिणेन। चतुरश्चौरभ्रेण पञ्च शाकुनेन। षट्छागेन। सप्त रौरवेण। अष्टौ पार्षतेन। नव गवयेन। दश माहिषेण। एकादश कौर्मेण। सम्वत्सरं गव्येन पयसा तद्विकारैर्व्वा। अत्र पितृगीता गाथा भवति॥

कालशाकं महाशल्कं मांसं वाध्रीणसस्य च।
विषाणवर्ज्या ये खड्गास्तांश्च भक्षामहे सदा।

॥ इति वैष्णवे धर्म्मशास्त्रेऽशीतितमोऽध्यायः॥

चान्नमासनमारोपयेत्। न पदा स्पृशेत। उच्छिष्टं भूमिगतमजिह्मस्याशठस्य वा। दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते।

॥ इति वैष्णवे धर्म्मशास्त्रे एकाशीतितमोऽध्यायः॥

दैवे कर्म्मणि ब्राह्मणं न परीक्षेत। प्रयत्नात् पित्र्ये परीक्षेत। हीनाधिकाङ्गान् विवर्जयेत्। विकर्म्मस्थांश्च वैड़ालव्रतिकान् वृथालिङ्गिनो नक्षत्रजीविनो देवलकांश्च चिकित्सकान् अनूढ़ापुत्रान् तत्पुत्रान् बहुयाजिनो ग्रामयाजिनः शूद्रयाजिनोऽयाज्ययाजिनो व्रात्यांस्तद्याजिनः पर्व्वकारान् सूचकान् भृतकाध्यापकान् भृतकाध्यापितान् शूद्रान्नपुष्टान् पतितसंसर्गान् अनधीयानान् सन्ध्योपासनाननुष्ठान् राजसेवकान् नग्नान् पितृमातृगुर्व्वग्निस्वाध्यायत्यागिनश्चेति॥

ब्राह्मणापसदा ह्येते कथिताः पङ्क्तिदूषकाः।
एतान् विवर्ज्जयेच्छ्रेषाच्छ्राद्धकर्म्मणि पण्डितः॥

॥ इति वैष्णवे धर्म्मशास्त्रे द्व्यशीतितमोऽध्यायः॥

अथ पङ्क्तिपावनाः। त्रिणाचिकेतः पञ्चाग्निर्ज्येष्ठसामगो वेदपारगो वेदाङ्गस्याप्येकस्य पारगः पुराणेतिहासव्याकरणपारगो धर्म्मशास्त्रस्याप्येकस्य पारगस्तीर्थपूतो यज्ञपूतस्तपःपूतः सत्यपूतो मन्त्रपूतो गायत्रीजपनिरतो ब्रह्मदेयानुसन्तानस्त्रिसुपर्णो जामाता दौहित्रश्चेति। विशेषेण च योगिनः। अत्र पितृगीता गाथा भवति॥

अपि स स्यात् कुलेऽस्माकं भोजयेद्यस्तु योगिनम्।
विप्रं श्राद्धे प्रयत्नेन येन तृप्यामहे वयम्।

॥ इति वैष्णवे धर्म्मशास्त्रे त्र्यशीतितमोऽध्यायः॥

न म्लेच्छविषये श्राद्धं कुर्य्यात्। न गच्छेन्म्लेच्छविषयम्। परनिपानेष्वपः पीत्वा तत्साम्यमुपगच्छतीति॥

चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते।
स म्लेच्छदेशो विज्ञेय आर्य्यावर्त्तस्ततः परः॥
॥ इति वैष्णवे धर्म्मशास्त्रे चतुरशीतितमोऽध्यायः॥

अथ पुष्करेषु श्राद्धम्। जप्यहोमतपांसि च। पुष्करे स्नानमात्रतः सर्वपापेभ्यः पूतो भवति। एवमेव गयाशीर्षे अक्षयवटे अमरकण्टकपर्वते वराहपर्वते यत्र क्वचन नर्म्मदातीरे यमुनातीरे गङ्गायां विशेषतः कुशावर्त्ते विल्वके नीलपर्वते कनखले कुजाम्रे भृगुतुङ्गे केदारे महालये नड़न्तिकायां सुगन्धायां शाकम्भर्य्यां फल्गुतीर्थे महागङ्गायां त्रिहलिकाश्रमे कुमारधारायां प्रभासे यत्र क्वचन सरस्वत्यां विशेषतः।

गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे।
सततं नैमिषारण्ये वाराणस्यां विशेषतः॥

अगस्त्याश्रमे कण्वाश्रमे कौशिक्यां सरयूतीरे शोणस्य ज्योतिषायाश्च सङ्गमे श्रीपर्वते कालोदके उत्तरमानसे वड़वायां मतङ्गवाप्यां सप्तार्षे विष्णुपदे स्वर्गमार्गपदे गोदावर्य्यां गोमत्यां वेत्रवत्यां विपाशायां वितस्तायां शतद्रुतीरे चन्द्रभागायां इरावत्यां सिन्धोस्तीरे दक्षिणे पञ्चनदे औजसे। एवमादिष्वथान्येषु तीर्थेषु सरिद्वरासु सर्वेष्वपि स्वभावेषु पुलिनेषु प्रस्रवणेषु पर्वतेषु निकुञ्जेषु वनेषूपवनेषु गोमयपलिप्तेषु मनोज्ञेषु। अत्र च पितृगीता गाथा भवन्ति॥

कुलेऽस्माकं स जन्तुः स्याद्यो नो दद्याज्जलाञ्जलीन्।
नदीषु बहुतोयासु शीतलासु विशेषतः॥

अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः।
गयाशीर्षे वटे श्राद्धं यो नः कुर्य्यात् समाहितः॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चाशीतितमोऽध्यायः॥

अथ वृषोत्सर्गः कार्त्तिक्यामाश्वयुज्यां वा। तत्रादावेव वृषभं परीक्षेत। जीववत्सायाः पयस्विन्याः पुत्रं सर्वलक्षणोपेतं नीलं लोहितं वा मुखपुच्छपादशृङ्गशुक्लं यूथस्याच्छादकम्। ततो गवां मध्ये सुसमिद्धमग्निं परिस्तीर्य्य पौष्णं चरुं पयसा श्रपयित्वा पूषा गा अन्वेतु न इह रतिरिति च हुत्वा वृषमयस्कारस्त्वङ्कयेत्। एकस्मिन् पार्श्वे चक्रेणापरस्मिन् पार्श्वे शूलेन। अङ्कितञ्च हिरण्यवर्णा इति चतसृभिः शन्नोदेवीति च स्नापयेत्। स्नातमलङ्कृतं स्नातालङ्कृताभिश्चतसृभिर्वत्सतरीभिः सार्द्धमानीय रुद्रान् पुरुषसूक्तं कुष्माण्डीश्च जपेत्। पिता वत्सेतिवृषभस्य दक्षिणे कर्णे पठेत् इमञ्च।

वृषोहि भगवान् धर्म्मश्चतुष्पादः प्रकीर्त्तितः।
वृणोमि तमहं भक्त्या स मे रक्षतु सर्व्वतः॥

एनं युवानं पतिं वो ददाम्यनेन क्रीड़न्तीश्चरथ प्रियेण।
महासहिप्रजया मातनुभिर्माऽधाम हिषते सोम! राजन्!॥

वृषं वत्सतरीयुक्तमैशान्यां कारयेद्दिशि।
होतुर्वस्त्रयुगं दद्यात् सुवर्णं कांस्यमेव च॥
अयस्कारस्य दातव्यं वेतनं मनसेप्सितम्।

भोजनं बहुसर्पिष्कं ब्राह्मणांश्चात्र भोजयेत् ॥
उत्सृष्टो वृषभो यस्मिन् पिबत्यथ जलाशये ।
जलाशयं तत्सकलं पितृंस्तस्योपतिष्ठति ॥
शृङ्गेणोल्लिखते भूमिं यत्र क्वचन दर्पितः ।
पितृणामन्नपानं तत् प्रभूतमुपतिष्ठति ॥
॥ इति वैष्णवे धर्म्मशास्त्रे षड़शीतितमोऽध्यायः ॥

अथ वैशाख्यां पौर्णमास्यां कृष्णमृगाजिनं सुवर्णशृङ्गं रौप्यखुरं मौक्तिकलाङ्गूलभूषितं कृत्वा आविके वस्त्रे च प्रसारयेत । ततस्तिलैः प्रच्छादयेत् । सुवर्णनाभिञ्च कुर्य्यात् । आहतेन वासोयुगेन प्रच्छादयेत् । सर्व्वगन्धरत्नैश्चालङ्कृतं कुर्य्यात् । चतसृषु दिक्षु चत्वारि तैजसपात्राणि क्षीरदधिमधुघृतपूर्णानि निधायाहिताग्नये ब्राह्मणायालङ्कृताया वासोयुगेन प्रच्छादिताय दद्यात । अत्र च गाथा भवन्ति ॥

यस्तु कृष्णाजिनं दद्यात् सखुरं शृङ्गसंयुतम् ।
तिलैः प्रच्छाद्य वासोभिः सर्व्वरत्नैरलङ्कृतम् ॥
ससमुद्रगुहा तेन सशैलवनकानना ।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥
कृष्णाजिने तिलान् कृत्वा हिरण्यं मधुसर्पिषी ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे सप्ताशीतितमोऽध्यायः ॥

अथ प्रसूयमाना गौः पृथिवी भवति तामलङ्कृतां ब्राह्म-

णाय दत्त्वा पृथिवीदानफलमाप्नोति। अत्र च गाथा भवति।

सवत्सा रोमतुल्यानि युगान्युभयतोमुखीम्।
दत्त्वा स्वर्गमवाप्नोति श्रद्दधानः समाहितः॥

॥ इति वैष्णवे धर्म्मशास्त्रेऽष्टाशीतितमोऽध्यायः॥

मासः कार्त्तिकोऽग्निदैवत्यः। अग्निश्च सर्वदेवानां मुखम्। तस्मात्तु कार्त्तिकं मासं वहिःस्नायी गायत्रीजपनिरतः सकृदेव हविष्याशी संवत्सरकृतात् पापात् पूतो भवति।

कार्त्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः।
जपन् हविष्यभुग्दाता सर्वपापैः प्रमुच्यते॥

इति वैष्णवे धर्म्मशास्त्रे एकोननवतितमोऽध्यायः॥

मार्गशीर्षशुक्लपञ्चदश्यां मृगशिरःसंयुक्तायां चूर्णित लवणस्य सुवर्णनाभं प्रस्थमेकं चन्द्रोदये ब्राह्मणाय प्रदापयेत्। अनेन कर्म्मणा रूपसौभाग्यवानभिजायते। पौषी चेत् पुष्ययुक्ता स्यात्तस्यां गौरसर्षपकल्कोद्वर्त्तितशरीरो गव्यघृतपूर्णकुम्भेनाभिषिक्तः सर्व्वौषधिभिः सर्वगन्धैः सर्ववीजैश्च स्नातो घृतेन भगवन्तं वासुदेवं स्नापयित्वा गन्धपुष्पधूपदीपनैवेद्यादिभिश्चाभ्यर्च्य वैष्णवैः शाक्रैर्वार्हस्पत्यैश्च मन्त्रैः पावके हुत्वा ससुवर्णेन घृतेन ब्राह्मणान् स्वस्ति वाचयेत्। वासोयुगं कर्त्रे दद्यात्। अनेन कर्म्मणा पुष्यते। माघी मघायुता चेत्तस्यां तिलैः श्राद्धं कृत्वा पूतो भवति। फाल्गुनी फल्गुनीयुता चेत्स्यात्तस्यां ब्राह्मणाय सुसंस्कृतं स्वास्तीर्णं शयनं

निविद्य भार्य्यां मनोज्ञां रूपवतीं द्रविणवतीञ्चाप्नोति । नार्य्यपि भर्त्तारम् । चैत्री चित्रायुता स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति । वैशाखी विशाखायुता चेत्तस्यां ब्राह्मणसप्तकं क्षौद्रयुक्तैस्तिलैः सन्तर्प्य धर्म्मराजानं प्रीणयित्वा पापेभ्यः पूतो भवति । ज्यैष्ठी ज्येष्ठायुता चेत्तस्यां छत्रोपानद्प्रदानेन गवाधिपत्यं प्राप्नोति । आषाढ्यामाषाढायुक्तायामन्नपानदानेन तदेवाक्षयमाप्नोति । श्रावण्यां श्रवणायुक्तायां जलधेनुं सान्नां वासोयुगाच्छादितां दत्त्वा स्वर्गमाप्नोति । प्रौष्ठपद्यां प्रौष्ठपदायुक्तायां गोदानेन सर्वपापविनिर्मुक्तो भवति । आश्वयुज्यामश्विनीगते चन्द्रमसि घृतपूर्णं भाजनं सुवर्णयुतं विप्राय दत्त्वा दीप्ताग्निर्भवति । कार्त्तिकी कृत्तिकायुता चेत्तस्यां सितमुक्षाणमन्यवर्णं वा शशाङ्कोदये सर्वसस्यरत्नगन्धोपेतं दीपमध्ये ब्राह्मणाय दत्त्वा कान्तारभयं नश्यति । वैशाखशुक्लतृतीयायामुपोषितोऽक्षतैर्वासुदेवमभ्यर्च्य तानेव हुत्वा दत्त्वा च सर्वपापेभ्यः पूतो भवति । यच्च तस्मिन्नहनि प्रयच्छति तदक्षयमाप्नोति । पौष्यां समतीतायां कृष्णपक्षद्वादश्यां सोपवासस्तिलैः स्नातस्तिलोदकं दत्त्वा तिलैर्वासुदेवमभ्यर्च्य तानेव हुत्वा दत्त्वा भुक्त्वा च पापेभ्यः पूतो भवति । माघ्यां समतीतायां कृष्णद्वादश्यां सोपवासः श्रवणं प्राप्य वासुदेवाग्रतो महावर्त्तिद्वयेन दीपद्वयं दद्यात् । दक्षिणपार्श्वे महारजनरक्तेन समग्रेण वाससा घृततुलामष्टाधिकां दत्त्वा वामपार्श्वे तिलतैलतुलां साष्टां दत्त्वा श्वेतेन समग्रेण वाससा । एतत् कृत्वा कृतकृत्यो यस्मिन् राष्ट्रेऽभिजायते यस्मिन् देशे यस्मिन् कुले स तत्रोज्ज्वलो

भवति। आश्विनं सकलं मासं ब्राह्मणेभ्यः प्रत्यहं घृतं प्रदद्यादश्विनौ प्रीणयित्वा रूप भाग्भवति। तस्मिन्नेव मासि प्रत्यहं गोरसैर्ब्राह्मणान् भोजयित्वा राज्यभाग्भवति। प्रतिमासं रेवतीयुते चन्द्रमसि मधुघृतयुतं रेवतीप्रीत्यै परमान्नं ब्राह्मणान् भोजयित्वा रेवतीं प्रीणयित्वा रूपभाग्भवति। माघे मासेऽग्निं प्रत्यहं तिलैर्हुत्वा सघृतं कुल्माषं ब्राह्मणान् भोजयित्वा दीप्ताग्निर्भवति। सर्व्वां चतुर्द्दशीं नदीजले स्नात्वा धर्म्मराजानं पूजयित्वा सर्व्वपापेभ्यः पूतो भवति।

यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपगान्।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥

॥ इति वैष्णवे धर्म्मशास्त्रे नवतितमोऽध्यायः॥

अथ कूपकर्त्तुस्तत्प्रवृत्ते पानीये दुष्कृतस्यार्द्धं विनश्यति। तड़ागकृन्नित्यतृप्तो वारुणं लोकमश्नुते। जलप्रदः सदा तृप्तो भवति। वृक्षारोपयितुर्वृक्षाः परलोके पुत्रा भवन्ति। वृक्षप्रदो वृक्षप्रसूनैर्द्देवान् प्रीणयति फलैश्चातिथीन् छायया चाभ्यागतान् देवे वर्षत्युदकेन पितॄन्। सेतुकृत् स्वर्गमाप्नोति देवायतनकारय्यस्य देवायतनं करोति तस्यैव लोकमाप्नोति। सुधासिक्तं कृत्वा यशसा विराजते। विविक्तं कृत्वा गन्धर्व्वलोकमाप्नोति। पुष्पप्रदानेन श्रीमान् भवति। अनुलेपनप्रदानेन कीर्त्तिमान् भवति। दीपप्रदानेन चक्षुष्मान् सर्व्वतोज्ज्वलश्च। अन्नप्रदानेन बलवान्। धूपप्रदानेनोर्द्ध्वं गच्छति। देवनिर्म्माल्यापनयनाद्गोप्रदानफलमाप्नोति। देवा-

यतनमार्जनात्तदुपलेपनाद्ब्राह्मणोच्छिष्टमार्जनात् पादादिशौचोदकल्पपरिचरणाच्च ॥

कूपारामतड़ागेषु देवतायतनेषु च।
पुनःसंस्कारकर्त्ता च लभते मौलिकं फलम् ॥

॥ इति वैष्णवे धर्म्मशास्त्रे एकनवतितमोऽध्यायः ॥

सर्वदानाधिकमभयप्रदानम्। तत्प्रदानेनाभीप्सितं लोकमाप्नोति भूमिप्रदानेन च। गोचर्म्ममात्रमपि भुवं प्रदाय सर्वपापेभ्यः पूतो भवति। गोप्रदानेन स्वर्गलोकमाप्नोति। दशधेनुप्रदो गोलोकान्। शतधेनुप्रदो ब्रह्मलोकान्। सुवर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलां कांस्योपदोहां वस्त्रोत्तरीयां दत्त्वा धेनुरोमसंख्यानि वर्षाणि स्वर्गलोकमाप्नोति। विशेषतः कपिलाम्। दान्तं धुरन्धरं दत्त्वा दशधेनुप्रदो भवति। अश्वदः सूर्य्यसालोक्यमाप्नोति। वासोदश्चन्द्रसालोक्यम्। सुवर्णदानेनाग्निसालोक्यम्। रूप्यप्रदानेन रूप्यम्। तैजसानां पात्राणां प्रदानेन पात्रं भवेत् सर्वकामानामौषधप्रदानेन च। लवणप्रदानेन च लावण्यम्। धान्यप्रदानेन तृप्तिं शस्यप्रदानेन च। अन्नदः सर्वम्। धान्यप्रदानेन सौभाग्यम्। अकीर्त्तितानामन्येषां दानात् स्वर्गमवाप्नुयादिति। तिलप्रदः प्रजामिष्टां इन्धनप्रदानेन दीप्ताग्निर्भवति। आसनप्रदानेन स्थानम्। शय्याप्रदानेन भार्य्याम्। उपानत्प्रदानेनाश्वतरीयुक्तं रथम्। छत्रप्रदानेन स्वर्गम्। तालवृन्तचामरप्रदानेनाध्वसुखित्वम्। वास्तुप्रदानेन नगराधिपत्यम् ॥

यद्यदिष्टतमं लोके यच्चास्ति दयितं गृहे।

तत्तद्गुणवते देयं तदेवाक्षय्यमिच्छता ॥

॥ इति वैष्णवे धर्म्मशास्त्रे द्विनवतितमोऽध्यायः ॥

अब्राह्मणे दत्तं तत्समभेव पारलौकिकम्। द्विगुणं ब्राह्मणब्रुवे। सहस्रगुणं प्राधीते। अनन्तं वेदपारगे। पुरोहितस्त्वात्मन एव पात्रम्। स्वसा दुहिता जामातरश्च पात्रम्।

न वार्य्यपि प्रयच्छेत वैड़ालव्रतिके द्विजे।
न वकव्रतिके पापे नावेदविदि धर्म्मवित् ॥
धर्म्मध्वजी सदालुब्धश्छाद्मिको लोकदाम्भिकः।
वैड़ालव्रतिको ज्ञेयो हिंस्रः सर्व्वाभिसन्धिकः ॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः।
शठो मिथ्याविनीतश्च वकव्रतपरो द्विजः ॥
ये वकव्रतिनो लोके ये च मार्जारलिङ्गिनः।
ते पतत्यन्धतामिस्रे तेन पापेन कर्म्मणा ॥
न धर्म्मस्यापदेशेन पापं कृत्वा व्रतं चरेत्।
व्रतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदम्भनम् ॥
प्रेत्येह चेदृशो विप्रो गर्ह्यते ब्रह्मवादिभिः।
छद्मनाचरितं यच्च तद्वै रक्षांसि गच्छति ॥
अलिङ्गो लिङ्गिवेशेन यो वृत्तिमुपजीवति।
स लिङ्गिनाहरत्येन स्तिर्य्यग्योनौ प्रजायते ॥
न दानं यशसे दद्यान्नभयान्नोपकारिणे।
न नृत्यगीतशीलेभ्यो धर्म्मार्थमिति निश्चितम् ॥

॥ इति वैष्णवे धर्म्मशास्त्रे त्रिनवतितमोऽध्यायः ॥

गृही बलीपलितदर्शने वनाश्रयो भवेत्। अपत्यस्य चापत्यदर्शनेन वा। पुत्रेषु भार्य्यां निक्षिप्य तयानुगम्यमानो वा। तत्नाप्यग्नीनुपचरेत्। अफालकृष्टेन पञ्चयज्ञान्न हापयेत्। स्वाध्यायं च न जह्यात्। ब्रह्मचर्य्यं पालयेत्। चर्म्मचीरवासाः स्यात्। जटाश्मश्रुलोमनखांश्च बिभृयात्। त्रिषवणस्नायी स्यात्। कपोतवृत्तिर्मासनिचयः सम्वत्सरनिचयो वा। सम्वत्सरनिचयी पूर्वनिचितमाश्वयुज्यां जह्यात्॥

ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन्।
पुटेनैव पलाशेन पाणिना शकलेन वा॥

॥ इति वैष्णवे धर्म्मशास्त्रे चतुर्नवतितमोऽध्यायः॥

वानप्रस्थस्तपसा शरीरं शोषयेत्। ग्रीष्मे पञ्चतपाः स्यात्। आकाशशायी प्रावृषि। आर्द्रवासा हेमन्ते। नक्ताशी स्यात्। एकान्तरद्व्यन्तरत्र्यन्तराशी वा स्यात्। पुष्पाशी। फलाशी। शाकाशी। पर्णाशी। मूलाशी। यवान्नं पक्षान्तयोर्वा सकृदश्नीयात्। चान्द्रायणैर्वा वर्त्तेत। अश्मकुट्टः। दन्तोलूखलिकोवा॥

तपोमूलमिदं सर्वं दैवमानुषजं जगत्।
तपोमध्यं तपोऽन्तञ्च तपसा च तथावृतम्॥
यद्दुस्तरं यद्दुरापं यद्दूरं यच्च दुष्करम्।
सर्वं तत्तपसा साध्यं तपोहि दुरतिक्रमम्॥

॥ इति वैष्णवे धर्म्मशास्त्रे पञ्चनवतितमोऽध्यायः॥

अथ त्रिष्वाश्रमेषु पक्वकषायः प्राजापत्यामिष्टिं कृत्वा सर्वं वेदं दक्षिणां दत्त्वा प्रव्रज्याश्रमी स्यात्। आत्मन्यग्नीनारोप्य भिक्षार्थं ग्राममियात्। सप्तागारिकं भैक्ष्यमाददद्यात्। अलाभे न व्यथेत। न भिक्षुकं भिक्षेत। भुक्तवति जनेऽतीते पात्रसम्पाते भैक्ष्यमाददद्यात्। मृण्मये दारुपात्रेऽलावुपात्रे वा। तेषाञ्च तस्याद्भिः शुद्धिः स्यात्। अभिपूजितलाभादुद्विजेत। शून्यागारनिकेतनः स्यात्। वृक्षमूलनिकेतनो वा। न ग्रामे द्वितीयां रात्रिमावसेत्। कौपीनाच्छादनमात्रमेव वसनमाददद्यात्। दृष्टिपूतं न्यसेत् पादम्। वस्त्रपूतं जलमाददद्यात्। सत्यपूतं वदेत्। मनःपूतं समाचरेत्। मरणं नाभिकामयेत जीवितञ्च। अतिवादांस्तितिक्षेत। न कञ्चनावमन्येत। निराशीः स्यात्। निर्नमस्कारः॥

वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः।

नाकल्याणं च कल्याणं तयोरपि च चिन्तयेत्॥

प्राणायामधारणाध्याननित्यः स्यात्। संसारस्यानित्यतां पश्येत्। शरीरस्याशुचिभावम्। जरया रूपविपर्य्ययम्। शारीरमानसागन्तुकव्याधिभिश्चोपतापम्। सहजैश्च। नित्यान्धकारे गर्भे वसतिं मूत्रपुरीषमध्ये च। तत्र च शीतोष्णदुःखानुभवनम्। जन्मसमये योनिसङ्कटनिर्गमान्महद्दुःखानुभवनम्। बाल्ये मोहं गुरुपरवश्यताम्। अध्ययनादनेकक्लेशम्। यौवने च विषयप्राप्त्यावमार्गेण तदवाप्तौ विषयसेवनान्नरके पतनम्। अप्रियैर्वसतिं प्रियैश्च विप्रयोगम्। नरकेषु च सुमहद्दुःखम्। संसारसंसृतौ तिर्य्य-

ग्योनिषु च। एवमस्मिन् सततपापिनि संसारे न कि-
ञ्चित्। यदपि किञ्चिद्दुःखापेक्षया सुखसंज्ञं तदप्यनित्यम्।
तस्येवाशक्तावलम्भने वा महद्दुःखम्। शरीरं चेदं सप्तधा-
तुकं पश्येत् वसारुधिरमांसास्थिमेदोमज्जाशुक्रात्मकं चर्म्मा-
वनद्धं दुर्गन्धि च मलायतनं सुखशतैरपि वृत्तं विकारि
प्रयत्नाद्धृतमपि विनाशि कामक्रोधलोभमोहमदमात्सर्य्य-
स्थानं पृथिव्यप्तेजोवाय्वाकाशात्मकं अस्थिशिराधमनिस्ना-
युयुतं रजस्वलं षट् त्वक्पेशि अस्थ्नां त्रिभिः शतैः षष्ठ्यधि-
कैर्धार्य्यमाणम्। तेषां विभागः। सूक्ष्मैः सह. चतुःषष्टिर्द-
शनाः, विंशतिर्नखाः, पाणिपादशलाकाश्च, षष्टिरङ्गुलीनां
पर्व्वाणि, द्वे पार्ष्णोः, चतुष्टयं गुल्फेषु, चत्वार्य्यरत्न्योः,
चत्वारि जङ्घयोः, द्वे द्वे, जानुकपोलयोः द्वे द्वे अक्षताल्-
षकश्रोणिफलकेषु, भगास्थ्येकं, पृष्ठास्थि पञ्चचत्वारिंशद्भागं,
पञ्चदशास्थीनि ग्रीवा, जान्वेकं, तथा हनुः, तन्मूले च
द्वे, द्वे ललाटाक्षिगण्डे, नासा घनास्थिका, अर्वुदैः स्थान-
कैश्च सार्द्धं द्वासप्ततिः पार्श्वकाः, उरः सप्तदश, द्वौ शङ्कौ,
चत्वारि कपालानि शिरश्चेति। शरीरेऽस्मिन् सप्तशिराश-
तानि। नव स्नायुशतानि। धमनीशते द्वे। पञ्चपेशीश-
तानि। क्षुद्रधमनीनामेकोनत्रिंशल्लक्षाणि नवशतानि षट्-
पञ्चाशद्धमन्यः। लक्षत्रयं श्मश्रुकेशकूपानाम्। सप्तोत्तरं
मर्म्मशतम्। सन्धिशते द्वे। चतुःपञ्चाशद्रोमकोटयः सप्तष-
ष्टिश्च लक्षाणि। नाभिरोजोगुदं,शुक्रं शोणितं शङ्कौ मूर्द्धा
कण्ठोहृदयञ्चेति प्राणायतनानि। बाहुद्वयं जङ्घाद्वयं
मध्यं शीर्षमिति षड़ङ्गानि। वसा वपा अवहननं नाभिः

क्लोमो यकृत् प्लीहा क्षुद्रान्त्रं वृक्कौ वस्तिः पुरीषाधानमामाशयोहृदयं स्थूलान्त्रं गुदमुदरं गुदकोष्ठम्। कनीनिके अक्षिकूटे शष्कुली कर्णौ कर्णपत्रकौ गण्डौ भ्रुवौ शङ्खौ दन्तवेष्टावोष्ठौ ककुन्दरे वंक्षणौ वृषणौ वृक्कौ श्लेष्मसङ्घातकौ स्तनौ उपजिह्वा स्फिचौ बाहू जङ्घे ऊरूपिण्डिके तालूदरं वस्तिशीर्षौ चिबुकं गलशुण्डिके अवटश्चेत्यस्मिन् शरीरके स्थानानि। शब्दस्पर्शरसरूपगन्धाश्च विषयाः। नासिकालोचनत्वग्जिह्वाश्रोत्रमिति बुद्धीन्द्रियाणि। हस्तौ पादौ पायूपस्थं जिह्वेति कर्मेन्द्रियाणि। मनोबुद्धिरात्मा चाव्यक्तमितीन्द्रियातीताः॥

इदं शरीरं वसुधे! क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः॥
क्षेत्रज्ञमेव मां विद्धि सर्वक्षेत्रेषु भाविनि!।
क्षेत्रं क्षेत्रज्ञविज्ञानं ज्ञेयं नित्यं मुमुक्षुणा॥

॥ इति वैष्णवे धर्म्मशास्त्रे षस्णवतितमोऽध्यायः॥

ऊरुस्थोत्तानचरणः सव्ये करे करमितरं न्यस्य तालुस्थाचलजिह्वोदन्तैर्दन्तानसंस्पृशन् स्वनासिकाग्रं पश्यन् दिशश्चानवलोकयन् विभीः प्रशान्तात्मा चतुर्विंशत्या तत्त्वैर्व्यतीतं चिन्तयेत्। नित्यमतीन्द्रियमगुणं शब्दस्पर्शरसरूपगन्धातीतं सर्वज्ञमतिस्थूलं सर्वगमतिसूक्ष्मं सर्वतःपाणिपादं सर्वतोऽक्षिशिरोमुखं सर्वतःसर्वेन्द्रियशक्तिम्। एवं ध्यायेत्। ध्याननिरतस्य च संवत्सरेण योगाविर्भावो भवति। अथ निराकारे लक्षबन्धं कर्त्तुं न शक्नोति तदा पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यात्माव्यक्तपुरुषाणां पूर्वं पूर्वं ध्यात्वा तत्र

तच्च लक्षन्तत् परित्यज्यापरमपरं ध्यायेत्। एवं पुरुषध्याभमारभेत। अत्राप्यसमर्थः स्वहृदयपद्मस्यावाङ्मुखस्य मध्ये दीपवत् पुरुषं ध्यायेत्। तत्राप्यसमर्थोभगवन्तं वासुदेवं किरीटिन कुण्डलिनमङ्गदिनं श्रीवत्साङ्क वनमालाविभूषितोरस्कं सौम्यरूपं चतुर्भुजं शङ्खचक्रगदापद्मधरं चरणमध्यगतभुवं ध्यायेत्। यद्ध्यायति तदाप्नोति ध्यानगुह्यम्। तस्मात् सर्वमेव चरं त्यक्त्वा अचरमेव ध्यायेत्। नच पुरुषं विना किञ्चिदप्यचरमस्ति। तं प्राप्य मुक्तोभवति॥

पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः।
तस्मात् पुरुष इत्येवं प्रोच्यते तत्त्वचिन्तकैः॥
प्राणायामपरस्तेषु योगी नित्यमतन्द्रितः।
ध्यायेत पुरुषं विष्णुं निर्गुणं पञ्चविंशकम्॥
तत्त्वात्मानमगम्यञ्च सर्वतत्त्वविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणंगुणभोक्तृ च॥
वहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थञ्चान्तिके च तत्॥
अविभक्तञ्च भूतेन विभक्तमिव च स्थितम्।
भूतभव्यभवद्रूपं ग्रसिष्णु प्रभविष्णु च॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्॥
इति चैवं तथा ज्ञानं ज्ञेयञ्चोक्तं समासतः।
मद्भक्तएतद्विज्ञाय मद्भावायोपपद्यते॥

॥ इति वैष्णवे धर्मशास्त्रे सप्तनवतितमोऽध्यायः॥

इत्येवमुक्ता वसुमती जानुभ्यां शिरसा च नमस्कारं

क्ष्मोवाच। भगवंस्त्वत्समीपे सततमेव चत्वारि महाभूता-न्ययान्याकाशः शब्दरूपी वायुश्चक्ररूपी तेजश्च गदारूपश्चा-ऽम्भोरुहरूपि अहमपरेनैव रूपेण भगवत्पादमध्यपरिव-र्त्तिनी भवितुमिच्छामि। इत्येवमुक्तोभगवांस्तथेत्युवाच। वसुधापि लब्धकामा तथा चक्रे देवदेवञ्च तुष्टाव। ओं नम-स्ते देवदेव वासुदेव आदिदेव कामदेव महीपाल अनादि-मध्यनिधन प्रजापते सुप्रजापते महाप्रजापते ऊर्ज्जस्पते वाच-स्पते जगत्पते दिवस्पते वनस्पते पयस्पते पृथिवीपते सलिल-पते दिक्पते महत्पते मरुत्पते लक्ष्मीपते ब्रह्मरूप ब्राह्मण-प्रिय सर्वग अचिन्त्य ज्ञानगम्य पुरुहूत पुरुष्टुत ब्रह्मण्य ब्रह्मप्रिय ब्रह्मकायिक महाकायिक महाराजिक-चतुर्म्महाराजिक भास्वर महाभास्वर सप्त महाभाग स्वर तुषित महातुषित प्रतर्द्दन परिनिर्म्मित अपरिनिर्म्मित वश-वर्त्तिन् यज्ञ महायज्ञ यज्ञयोग यज्ञगम्य यज्ञनिधन अजित वैकुण्ठ अपार पर पुराण लेव्य प्रजाधर चित्राङ्गखण्डधर यज्ञभागहर पुरोडाशहर विश्वक् विश्वधर शुचिश्रवः अच्यु-तार्च्चन हृतार्च्चिः खड्गपरशो पद्मनाभ पद्मधर पद्माराधर हृषीकेश एकशृङ्ग महावराह द्रुहिण अच्युत अनन्त पुरुष महापुरुष कपिल सांख्याचार्य्य विष्वक्सेन धर्म्माधर्म्मद धर्म्माङ्ग धर्मवसुप्रद वरप्रद विष्णो जिष्णो सहिष्णो कृष्ण पुण्डरीकाक्ष नारायण परायण जगत्परायण नमोनम इति॥

स्तुत्वा त्वेवं प्रसन्नेन मनसा पृथिवी तदा।
उवाच सम्मुखं देवं लब्धकामा वसुन्धरा॥

॥ इति वैष्णवे धर्मशास्त्रेऽष्टनवतितमोऽध्यायः॥

दृष्ट्वा श्रियं देवदेवस्य विष्णोर्गृहीत पादां तपसा ज्वलन्तीम् ।
सुतप्तजाम्बूनदचारुवर्णां पप्रच्छ देवीं वसुधाप्रहृष्टा ॥
उन्निद्रकोकनदचारुकरे वरेण्ये ।
उन्निद्रकोकनदनाभि गृहीतपादे ॥
उन्निद्रकोकनदसद्मसदास्थितीते ।
उन्निद्रकोकनदमध्यसमानवर्णे ॥
नीलाब्जनेत्रे तपनीयवर्णे शुक्लाम्बरे रत्नविभूषिताङ्गि ।
चन्द्रानने सूर्य्यसमानभासे महाप्रभावे जगतःप्रधाने ॥
त्वमेव निद्रा जगतः प्रधाना लक्ष्मीर्धृतिः श्रीर्विरतिर्जया च ।
कान्तिःप्रभा कीर्त्तिरथो विभूतिः सरस्वती वागथ पावनी च ॥
स्वधा तितिक्षा वसुधा प्रतिष्ठा स्थितिःसुदीक्षा च तथा सुनीतिः ।
ख्यातिर्विशाला च तथानसूया स्वाहा च मेधा च तथैव बुद्धिः ॥
आक्रम्य सर्व्वांन्तु यथा त्रिलोकीं तिष्ठत्ययं देववरोऽसिताङ्गि ।
तथा स्थिता त्वं वरदे तथापि पृच्छाम्यहं ते वसतिं विभूत्याः ॥
इत्येवमुक्ता वसुधां बभाषे लक्ष्मीस्तदा देववराग्रतस्था ।
सदा स्थिताहं मधुसूदनस्य देवस्य पार्श्वे तपनीयवर्णे ॥
अस्याज्ञयायं मनसा स्मरामि श्रियायुतं तं प्रवदन्ति सन्तः ।
संस्मारणे वाप्यथ यत्र चाहं स्थिता सदा तच्छृणु लोकधात्रि ॥
वसाम्यथार्के च निशाकरे च तारागणाढ्ये गगने विमेघे ।
मेघे तथालम्बपयोधरे च शक्रायुधाढ्ये च तडित्प्रकाशे ॥
तथा सुवर्णे विमले च रूप्ये रत्नेषु वस्त्रेष्वमलेषु भूमे ।
प्रासादमालासु च पाण्डुरासु देवालयेषु ध्वजभूषितेषु ॥
सद्यः कृते चापय्थ गोमये च मत्ते गजेन्द्रे तुरगे प्रहृष्टे ।
वृषे तथा दर्पसमन्विते च विप्रे तथैवाध्ययनप्रपन्ने ॥

सिंहासने चामलके च बिल्वे छत्रे च शङ्खे च तथैव पद्मे ।
दीप्ते हुताशे विमले च खड्गे आदर्शबिम्बे च तथास्थिताहम् ॥
पूर्णोदकुम्भेषु सचामरेषु सतालवृन्तेषु विभूषितेषु ।
भृङ्गारपात्रेषु मनोहरेषु भृदिस्थिताहञ्च नवोद्धृतायाम् ॥
क्षीरे तथा सर्पिषि शाद्वले च क्षौद्रे तथा दध्नि पुरन्ध्रिगात्रे ।
देहे कुमार्य्याश्च तथा सुराणां तपस्विनां यज्ञभृताञ्च देहे ॥
शूरे च संग्रामविनिर्गते च स्थितास्मि स्वर्गसदःप्रयाते ।
वेदध्वनौ चापरथ शङ्खशब्दे स्वाहास्वधायामथ वाद्यशब्दे ॥
राजाभिषेके च तथा विवाहे यज्ञे वरे स्नातशिरस्यथापि ।
पुष्पेषु शुक्लेषु च पर्वतेषु फलेषु रम्येषु सरिद्वरासु ॥
सरःसु पूर्णेषु तथा जलेषु सशाद्वलायां भुवि पद्मखण्डे ।
वने च वत्से च शिशौ प्रहृष्टे साधौ नरे धर्म्मपरायणे च ॥
आचारसेविन्यथ शास्त्रनित्ये विनीतवेशे च तथा सुवेशे ।
सुशुद्धदान्ते मलवर्जिते च मिष्टाशने चातिथिपूजके च ॥
स्वदारतुष्टे निरते च धर्मे धर्मोत्कटे चात्यशनाद्विरक्ते ।
सदा सपुष्पे च सुगन्धिगात्रे सुगन्धलिप्ते च विभूषिते च ॥
सत्ये स्थिते भूतहिते निविष्टे क्षमान्विते क्रोधविवर्ज्जिते च ।
स्वकार्य्यदक्षे परकार्य्यदक्षे कल्याणचित्ते च सदाविनीते ॥
नारीषु नित्यं सुविभूषितासु पतिव्रतासु प्रियवादिनीषु ।
अमुक्तहस्तासु सुतान्वितासु सुगुप्तभाण्डासु बलिप्रियासु ॥
सम्मृष्टवेश्मासु जितेन्द्रियासु कलिव्यपेतासु विलोलुपासु ।
धर्म्मव्यपेक्षासु दयान्वितासु स्थिता सदाहं मधुसूदने तु ॥

॥ इति वैष्णवे धर्म्मशास्त्रे नवनवतितमोऽध्यायः ॥

धर्म्मशास्त्रमिदं श्रेष्ठं स्वयं देवेन भाषितम् ।
ये द्विजाधारयिष्यन्ति तेषां स्वर्गे गतिः परा ॥
इदं पवित्रं मङ्गल्यं स्वर्गमायुष्यमेव च ।
ज्ञानञ्चैव यशस्यं च धनसौभाग्यवर्द्धनम् ॥
अध्येतव्यं धारणीयं श्राव्यं श्रोतव्यमेव च ।
श्राद्धेषु श्रावणीयं च भूतिकामैर्नरैः सदा ।
इदं रहस्यं परमं कथितं वसुधे ! तव ॥
मया प्रसन्नेन जगद्धितार्थं सौभाग्यमेतत् परमं रहस्यम् ।
दुःस्वप्ननाशं बहुपुण्ययुक्तं शिवालयं शाश्वतधर्मशास्त्रम् ॥
॥ इति वैष्णवे धर्म्मशास्त्रे शततमोऽध्यायः ॥

समाप्ता चेयं श्रीभगवद्विष्णुसंहिता ॥

लघुहारीतस्मृतिः ।

—००—

ये वर्णाश्रमधर्म्मस्थास्ते भक्ताः केशवं प्रति ।
इतिपूर्वं त्वया प्रोक्तं भूर्भुवःस्वर्द्विजोत्तमाः ॥
वर्णानामाश्रमाणाञ्च धर्म्मान्नो ब्रूहि सत्तम ! ।
येन सन्तुष्यते देवो नारसिंहः सनातनः ॥
अत्राहं कथयिष्यामि पुरावृत्तमनुत्तमम् ।
ऋषिभिः सह संवादं हारीतस्य महात्मनः ॥
हारीतं सर्वधर्म्मज्ञमासीनमिव पावकम् ।
प्रणिपत्याब्रुवन् सर्वे मुनयोधर्मकाङ्क्षिणः ॥
भगवन् ! सर्वधर्मज्ञ ! सर्वधर्मप्रवर्त्तक ! ।
वर्णानामाश्रमाणाञ्च धर्मान्नोब्रूहि भार्गव ! ॥
समासाद्योगशास्त्रञ्च विष्णुभक्तिकरं परम् ।
एतच्चान्यच्च भगवन् ! ब्रूहि नः परमो गुरुः ॥
हारीतस्तानुवाचाथ तैरेवं चोदितो मुनिः ।
शृण्वन्तु मुनयः ! सर्वे ! धर्मान् वक्ष्यामि शाश्वतान् ॥
वर्णानामाश्रमाणाञ्च योगशास्त्रञ्च सत्तमाः ! ।
सन्धार्य्य मुच्यते मर्त्या जन्मसंसारबन्धनात् ॥
पुरा देवो जगत्स्रष्टा परमात्मा जलोपरि ।
सुष्वाप भोगिपर्य्यङ्के शयने तु श्रिया सह ॥
तस्य सुप्तस्य नाभौ तु महत् पद्ममभूत् किल ।
पद्ममध्येऽभवद् ब्रह्मा वेदवेदाङ्गभूषणः ॥

स चोक्तो देवदेवेन जगत् सृज पुनः पुनः ।
सोऽपि सृष्ट्वा जगत् सर्वं सदेवासुरमानुषम् ॥
यज्ञसिद्ध्यर्थमनघान् ब्राह्मणान्मुखतोऽसृजत् ।
असृजत् क्षत्रियान् बाह्वो वैश्यानप्यूरुदेशतः ॥
शूद्रांश्च पादयोः सृष्ट्वा तेषाञ्चैवानुपूर्वशः ।
यथा प्रोवाच भगवान् ब्रह्मयोनिं पितामहः ॥
तद्वचः संप्रवक्ष्यामि शृणुत द्विजसत्तमाः ! ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं मोक्षफलप्रदम् ॥
ब्राह्मण्यां ब्राह्मणेनैवमुत्पन्नो ब्राह्मणः स्मृतः ।
तस्य धर्मं प्रवक्ष्यामि तद्योग्यं देशमेव च ॥
कृष्णसारो मृगो यत्र स्वभावेन प्रवर्त्तते ।
तस्मिन्देशे वसेद्धर्मः सिद्ध्यति द्विजसत्तमाः ! ॥
षट् कर्माणि निजान्याहुर्ब्राह्मणस्य महात्मनः ।
तैरेव सततं यस्तु वर्त्तयेत् सुखमेधते ॥
अध्यापनं चाध्ययनं याजनं यजनं तथा ।
दानं प्रतिग्रहश्चेति षट् कर्माणीति चोच्यते ॥
अध्यापनञ्च त्रिविधं धर्मार्थमृक्थकारणात् ।
शुश्रूषाकरणाच्चेति त्रिविधं परिकीर्त्तितम् ॥
एषामन्यतमाभावे वृषाचारो भवेद्द्विजः ।
तत्र विद्या न दातव्या पुरुषेण हितैषिणा ॥
योग्यानध्यापयेच्छिष्यानयोग्यानपि वर्जयेत् ।
विदितात् प्रतिगृह्णीयाद्गृहे धर्मप्रसिद्धये ॥
वेदञ्चैवाभ्यसेन्नित्यं शुचौ देशे समाहितः ।
धर्मशास्त्रं तथा पाठ्यं ब्राह्मणैः शुद्धमानसैः ।

वेदवित्पठितव्यञ्च श्रोतव्यञ्च दिवा निशि।
स्मृतिहीनाय विप्राय श्रुतिहीने तथैव च।
दानं भोजनमन्यच्च दत्तं कुलविनाशनम्॥
तस्मात् सर्वप्रयत्नेन धर्म्मशास्त्रं पठेद्द्विजः।
श्रुतिस्मृती च विप्राणां चक्षुषी देवनिर्मिते।
काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्त्तितः॥
गुरुशुश्रूषणञ्चैव यथान्यायमतन्द्रितः।
सायं प्रातरुपासीत विवाहाग्निं द्विजोत्तमः!॥
सुस्नातस्तु प्रकुर्व्वीत वैश्वदेवं दिने दिने।
अतिथीनागतांश्छक्त्या पूजयेदविचारतः॥
अन्यानभ्यागतान् विप्राः! पूजयेच्छक्तितो गृही।
स्वदारनिरतो नित्यं परदारविवर्जितः॥
कृतहोमस्तु भुञ्जीत सायं प्रातरुदारधीः।
सत्यवादी जितक्रोधो नाधर्मे वर्त्तयेन्मतिम्॥
स्वकर्म्मणि च संप्राप्ते प्रमादान्न निवर्त्तते।
सत्यां हितां वदेद्वाचं परलोकहितैषिणीम्॥
एष धर्मः समुद्दिष्टो ब्राह्मणस्य समासतः।
धर्ममेव हि यः कुर्य्यात् स याति ब्रह्मणः पदम्॥
इत्येष धर्मः कथितो मयायं पृष्टो भवद्भिस्त्वखिलाघहारी।
वदामि राज्ञामपि चैव धर्मान् पृथक् पृथग्बोधत विप्रवर्य्याः॥
॥ इति हारीते धर्मशास्त्रे प्रथमोऽध्यायः॥

क्षत्रादीनां प्रवक्ष्यामि यथावदनुपूर्वशः।
येषु प्रवृत्ता विधिना सर्वे यान्ति परां गतिम्॥

राज्यस्थः क्षत्रियश्चापि प्रजाधर्म्मेण पालयन्।
कुर्य्यादध्ययनं सम्यग्यजेद्यज्ञान् यथाविधि॥
दद्याद्दानं द्विजातिभ्यो धर्मबुद्धिसमन्वितः।
स्वभार्य्यानिरतो नित्यं षड्भागार्हः सदा नृपः॥
नीतिशास्त्रार्थकुशलः सन्धिविग्रहतत्त्ववित्।
देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा॥
धर्म्मेण यजनं कार्य्यमधर्मपरिवर्जनम्।
उत्तमां गतिमाप्नोति क्षत्रियोऽप्येवमाचरन्॥
गोरक्षां कृषिवाणिज्यं कुर्य्याद्वैश्यो यथाविधि।
दानं देयं यथाशक्त्या ब्राह्मणानाञ्च भोजनम्॥
दम्भमोहविनिर्मुक्तस्तथा वागनसूयकः।
स्वदारन्निरतो दान्तः परदारविवर्जितः॥
धनैर्विप्रान् भोजयित्वा यज्ञकाले तु याजकान्।
अप्रभुत्वञ्च वर्त्तेत धर्म्मेष्वादेहपातनात्॥
यज्ञाध्ययनदानानि कुर्य्यान्नित्यमतन्द्रितः।
पितृकार्य्यपरश्चैव नरसिंहार्च्चनापरः॥
एतद्वैश्यस्य धर्मोऽयं स्वधर्म्ममनुतिष्ठति।
एतदाचरते योहि स स्वर्गी नात्र संशयः॥
वर्णत्रयस्य शुश्रूषां कुर्य्याच्छूद्रः प्रयत्नतः।
दासवद्ब्राह्मणानाञ्च विशेषेण समाचरेत्॥
अयाचितप्रदाता च कष्टं वृत्त्यर्थमाचरेत्।
पाकयज्ञविधानेन यजेद्देवमतन्द्रितः॥
शूद्राणामधिकं कुर्य्यादर्च्चनं न्यायवर्त्तिनाम्।
धारणं जीर्णवस्त्रस्य विप्रस्योच्छिष्टभोजनम्।

स्वदारेषु रतिश्चैव परदारविवर्जनम् ॥
इत्थं कुर्य्यात् सदा शूद्रो मनोवाक्कायकर्म्मभिः।
स्थानमैन्द्रमवाप्नोति नष्टपापः सुपुण्यकृत् ॥
वर्णेषु धर्म्मा विविधा मयोक्ता यथातथा ब्रह्ममुखेरिताः पुरा।
शृणुध्वमन्नाश्रमधर्म्ममाद्यं मयोच्यमानं क्रमशो मुनीन्द्राः ॥
॥ इति हारीते धर्म्मशास्त्रे द्वितीयोऽध्यायः ॥

उपनीतो माणवको वसेद्गुरुकुलेषु च।
गुरोः कुले प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ॥
ब्रह्मचर्य्यमधःशय्या तथा वह्नेरुपासना।
उदकुम्भान् गुरोर्दद्याद्गोग्रासञ्चेन्धनानि च।
कुर्य्यादध्ययनञ्चैव ब्रह्मचारी यथाविधि।
विधिं त्यक्त्वा प्रकुर्व्वाणो न स्वाध्यायफलं लभेत् ॥
यः कश्चित् कुरुते धर्मं विधिं हित्वा दुरात्मवान्।
न तत्फलमवाप्नोति कुर्व्वाणोऽपि विधिच्युतः ॥
तस्मादेतद्व्रतानीह चरेत् स्वाध्यायसिद्धये।
शौचाचारमशेषं तु शिक्षयेद्गुरुसन्निधौ ॥
अजिनं दण्डकाष्ठञ्च मेखलाञ्चोपवीतकम्।
धारयेदप्रमत्तश्च ब्रह्मचारी समाहितः ॥
सायं प्रातश्चरेद्भैक्ष्यं भोज्यार्थं संयतेन्द्रियः।
आचम्य प्रयतो नित्यं न कुर्य्याद्दन्तधावनम् ॥
छत्त्रञ्चोपानहञ्चैव गन्धमाल्यादि वर्जयेत्।
नृत्यगीतमथालापं मैथुनञ्च विवर्जयेत् ॥
हस्त्यश्वारोहणञ्चैव संत्यजेत् संयतेन्द्रियः।

सन्ध्योपास्तिं प्रकुर्व्वीत ब्रह्मचारी व्रतस्थितः ॥
अभिवाद्य गुरोः पादौ सन्ध्याकर्मावसानतः ।
तथा योगं प्रकुर्व्वीत मातापित्रोश्च भक्तितः ॥
एतेषु त्रिषु नष्टेषु नष्टाः स्युः सर्वदेवताः ।
एतेषां शासने तिष्ठेद्ब्रह्मचारी विमत्सरः ॥
अधीत्य च गुरो र्वेदान् वेदौ वा वेदमेव वा ।
गुरवे दक्षिणां दद्यात् संयमी ग्राममावसेत् ॥
यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरं करः ।
संन्याससमयं कृत्वा ब्राह्मणो ब्रह्मचर्य्यया ॥
तस्मिन्नेव नयेत् कालमाचार्य्ये यावदायुषम् ।
तदभावे च तत्पुत्रे तच्छिष्ये वाथवा कुले ॥
न विवाहो न संन्यासो नैष्ठिकस्य विधीयते ॥
इमं योविधिमास्थाय त्यजेद्देहमतन्द्रितः ।
नेह भूयोऽपि जायेत ब्रह्मचारी दृढव्रतः ॥
यो ब्रह्मचारी विधिना समाहितश्चरेत् पृथिव्यां गुरुसेवने रत.
संप्राप्य विद्यामतिदुर्लभां शिवां फलञ्च तस्याः सुलभं तु विन्दति॥
॥ इति हारीते धर्म्मशास्त्रे तृतीयोऽध्यायः ॥

गृहीतवेदाध्ययनः श्रुतशास्त्रार्थतत्त्ववित् ।
असमानार्षगोत्रां हि कन्यां सभ्रातृकां शुभाम् ॥
सर्व्वावयवसंपूर्णां सुवृत्तामुद्वहेन्नरः ।
ब्राह्मेण विधिना कुर्य्यात् प्रशस्तेन द्विजोत्तमः ॥
तथान्ये बहवः प्रोक्ता विवाहा वर्णधर्म्मतः ।
औपासनञ्च विधिवदाहृत्य द्विजपुङ्गवाः ! ॥

सायं प्रातश्च जुहुयात् सर्वकालमतन्द्रितः ।
स्नानं कार्य्यं ततोनित्यं दन्तधावनपूर्व्वकम् ॥
उषःकाले समुत्थाय कृतशौचो यथाविधि ।
मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ॥
तस्माच्छुष्कमथार्द्रं वा भक्षयेद्दन्तकाष्ठकम् ।
करञ्जं खादिरं वापि कदम्बं कुरवं तथा ॥
सप्तपर्णप्रश्निपर्णीजम्बनिम्बं तथैव च ।
अपामार्गञ्च विल्वञ्चार्कञ्चोडुम्बरमेव च ॥
एते प्रशस्ताः कथिता दन्तधावनकर्म्मणि ।
दन्तकाष्ठस्य भक्षश्च समासेन प्रकीर्त्तितः ॥
सर्वे कण्टकिनः पुण्याः चीरिणश्च यशस्विनः ।
अष्टाङ्गुलेन मानेन दन्तकाष्ठमिहोच्यते ।
प्रादेशमात्रमथवा तेन दन्तान् विशोधयेत् ॥
प्रतिपत्पर्वषष्ठीषु नवम्याञ्चैव सत्तमाः ! ।
दन्तानां काष्ठसंयोगाद्दहत्यासप्तमं कुलम् ॥
अभावे दन्तकाष्ठानां प्रतिषिद्धदिनेषु च ।
अपां द्वादशगण्डूषैर्म्मुखशुद्धिं समाचरेत् ॥
स्नात्वा मन्त्रवदाचम्य पुनराचमनं चरेत् ।
मन्त्रवत् प्रोक्ष्य चात्मानं प्रक्षिपेदुदकाञ्जलिम् ॥
आदित्येन सह प्रातर्मन्देहा नाम राक्षसाः ।
युध्यन्ति वरदानेन ब्रह्मणोऽव्यक्तजन्मनः ॥
उदकाञ्जलिनिःक्षेपा गायत्र्या चाभिमन्त्रिताः ।
निघ्नन्ति राक्षसान् सर्व्वान् मन्देहाख्यान् द्विजेरिताः ॥
ततः प्रयाति सविता ब्राह्मणैरभिरक्षितः ।

मरीच्याद्यैर्महाभागैः सनकाद्यैश्च योगिभिः ॥
तस्मान्न लङ्घयेत् सन्ध्यां सायं प्रातः समाहितः।
उल्लङ्घयति यो मोहात् स याति नरकं ध्रुवम् ॥
सायं मन्त्रवदाचम्य प्रोक्ष्य सूर्य्यस्य चाञ्जलिम्।
दत्त्वा प्रदक्षिणं कुर्य्याज्जलं स्पृष्ट्वा विशुद्ध्यति ॥
पूर्व्वां सन्ध्यां सनक्षत्रामुपासीत यथाविधि।
गायत्रीमभ्यसेत्तावद् यावदादित्यदर्शनात् ॥
उपास्य पश्चिमां सन्ध्यां सादित्याञ्च यथाविधि।
गायत्रीमभ्यसेत्तावद्यावत्तारा न पश्यति ॥
ततश्चावसथं प्राप्य कृत्वा होमं स्वयं बुधः।
सञ्चिन्त्य पोष्यवर्गस्य भरणार्थं विचक्षणः ॥
ततः शिष्यहितार्थाय स्वाध्यायं किञ्चिदाचरेत्।
ईश्वरञ्चैव कार्य्यार्थमभिगच्छेद्द्विजोत्तमः ॥
कुशपुष्पेन्धनादीनि गत्वा दूरं समाहरेत्।
ततो माध्याह्निकं कुर्य्याच्छुचौ देशे मनोरमे ॥
विधिं तस्य प्रवक्ष्यामि समासात् पापनाशनम्।
स्नात्वा येन विधानेन मुच्यते सर्वकिल्बिषात् ॥
स्नानार्थं मृदमानीय शुद्धाक्षततिलैः सह।
सुमनाश्च ततो गच्छेन्नदीं शुद्धजलाधिकाम् ॥
नद्यां तु विद्यमानायां न स्नायादन्यवारिषि।
न स्नायादल्पतोयेषु विद्यमाने बहूदके ॥
सरिद्वरं नदीस्नानं प्रतिस्रोतःस्थितश्चरेत्।
तड़ागादिषु तोयेषु स्नायाच्च तदभावतः ॥
शुचिदेशं समभ्युक्ष्य स्थापयेत् सकलाम्बरम्।

मृत्तोयेन स्वकं देहं लिम्पेत् प्रक्षाल्य यत्नतः ॥
स्नानादिकञ्च संप्राप्य कुर्य्यादाचमनं बुधः ।
सोऽन्तर्जलं प्रविश्याथ वाग्यतो नियमेन हि ।
हरिं संस्मृत्य मनसा मज्जयेच्चोरुमज्जले ॥
ततस्तीरं समासाद्य आचम्यापः समन्वतः ।
प्रोक्षयेद्वारुणैर्मन्त्रैः पावमानीभिरेव च ॥
कुशाग्रकृततोयेन प्रोक्ष्यात्मानं प्रयत्नतः ।
स्योनापृथिवीतिमन्त्राच्चे इदं विष्णुरिति द्विजाः ! ॥
ततो नारायणं देवं संस्मरेत् प्रतिमज्जनम् ।
निमज्ज्यान्तर्जले सम्यक् क्रियते चाघमर्षणम् ॥
स्नात्वा क्षततिलैस्तद्वद्देवर्षिपितृभिः सह ।
तर्पयित्वा जलं तस्मान्निष्पीड्य च समाहितः ॥
जलतीरं समासाद्य तत्र शुक्ले च वाससी ।
परिधायोत्तरीयञ्च कुर्य्यात् केशान्न धनयेत् ॥
न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते ।
मलाक्तं गन्धहीनञ्च वर्जयेदम्बरं बुधः ॥
ततः प्रक्षालयेत् पादौ मृत्तोयेन विचक्षणः ।
दक्षिणन्तु करं कृत्वा गोकर्णाकृतिवत् पुनः ॥
त्रिः पिवेद्वीक्षितं तोयमास्यं द्विःपरिमार्जयेत् ।
पादौ शिरस्ततोऽभ्युक्ष्य त्रिभिराद्यमुपस्पृशेत् ॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुषी समुपस्पृशेत् ।
तथैव पञ्चभिर्मूर्द्ध्नि स्पृशेदेवं समाहितः ॥
अनेन विधिनाचम्य ब्राह्मणः शुद्धमानसः ।
कुर्व्वीत दर्भपाणिस्तदङ्मुखः प्राङ्मुखोऽपि वा ॥

प्राणायामत्रयं धीमान् यथान्यायमतन्द्रितः।
जपयज्ञं ततः कुर्य्याद्गायत्रीं वेदमातरम्॥
त्रिविधो जपयज्ञः स्यात्तस्य तत्त्वं निबोधत।
वाचिकश्च उपांशुश्च मानसश्च त्रिधाकृतिः॥
त्रयाणामपि यज्ञानां श्रेष्ठः स्यादुत्तरोत्तरः॥
यदुच्चनीचोच्चरितैः शब्दैः स्पष्टपदाक्षरैः।
मन्त्रमुच्चारयन् वाचा जपयज्ञस्तु वाचिकः॥
शनैरुच्चारयन्मन्त्रं किञ्चिदोष्ठौ प्रचालयेत्।
किञ्चिच्छ्रवणयोग्यः स्यात् स उपांशुर्जपः स्मृतः॥
धिया पदाक्षरश्रेण्या अवर्णमपदाक्षरम्।
शब्दार्थचिन्तनाभ्यान्तु तदुक्तं मानसं स्मृतम्॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति।
प्रसन्ने विपुलान् भोगान् प्राप्नुवन्ति मनीषिणः॥
राक्षसाश्च पिशाचाश्च महासर्पाश्च भीषणाः।
जपितान्नोपसर्पन्ति दूरादेव प्रयान्ति ते॥
छन्द ऋष्यादि विज्ञाय जपेन्मन्त्रमतन्द्रितः।
जपेदहरहर्ज्ञात्वा गायत्रीं मनसा द्विजः॥
सहस्र परमां देवीं शतमध्यां दशावराम्।
गायत्रीं यो जपेन्नित्यं स न पापेन लिप्यते॥
अथ पुष्पाञ्जलिं कृत्वा भानवे चोर्द्ध्वबाहुकः।
उदुत्यञ्च जपेत् सूक्तं तच्चक्षुरिति चापरम्॥
प्रदक्षिणमुपावृत्य नमस्कुर्य्याद्दिवाकरम्।
ततस्तीर्थेन देवादीनद्भिः सन्तर्पयेद्द्विजः॥
स्नानवस्त्रन्तु निष्पीड्य पुनराचमनं चरेत्।

तदङ्गत्वात्प्रत्यहं स्नानं दानं प्रकीर्त्तितम् ॥
दर्भासीनो दर्भपाणिर्ब्रह्मयज्ञविधानतः ।
प्राङ्मुखो ब्रह्मयज्ञं तु कुर्य्याच्छ्रद्धासमन्वितः ॥
ततोऽर्घ्यं भानवे दद्यात्तिलपुष्पाक्षतान्वितम् ।
उत्थाय मूर्द्धपर्य्यन्तं हंसः शुचिषदित्यृचा ॥
ततो देवं नमस्कृत्य गृहं गच्छेत्ततः पुनः ।
विधिना पुरुषसूक्तस्य गत्वा विष्णुं समर्च्चयेत् ॥
वैश्वदेवं ततः कुर्य्याद्बलिकर्म्मविधानतः ।
गोदोहमात्रमाकाङ्क्षेदतिथिं प्रति वै गृही ॥
अदृष्टपूर्व्वमज्ञातमतिथिं प्राप्तमर्च्चयेत् ।
स्वागतासनदानेन प्रत्युत्थानेन चाम्बुना ॥
स्वागतेनाग्नयस्तुष्टा भवन्ति गृहमेधिनः ।
आसनेन तु दत्तेन प्रीतो भवति देवराट् ॥
पादशौचेन पितरः प्रीतिमायान्ति दुर्लभाम् ।
अन्नदानेन युक्तेन तृप्यते हि प्रजापतिः ॥
तस्मादतिथये कार्य्यं पूजनं गृहमेधिना ।
भक्त्या च शक्तितो नित्यं विष्णोरर्चादनन्तरम् ।
भिक्षाञ्च भिक्षवे दद्यात् परिव्राड्ब्रह्मचारिणे ॥
अकल्पितान्नादुद्धृत्य सव्यञ्जनसमन्विताम् ।
अकृते वैश्वदेवेऽपि भिक्षौ च गृहमागते ।
उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्ज्जयेत् ॥
वैश्वदेवाकृतान् दोषाञ्छक्तो भिक्षुर्व्यपोहितुम् ।
नहि भिक्षुकृतान् दोषान् वैश्वदेवो व्यपोहति ॥
तस्मात् प्राप्ताय यतये भिक्षां दद्यात् समाहितः ।

विष्णुरेव यतिश्छायइति निश्चत्य भावयेत् ॥
सुवासिनीं कुमारीञ्च भोजयित्वा नरानपि ।
बालवृद्धां स्ततः शेषं स्वयं भुञ्जीत वा गृही ॥
प्राङ्मुखोदङ्मुखो वापि मौनी च मितभाषकः ।
अन्नमादौ नमस्कृत्य प्रहृष्टेनान्तरात्मना ॥
एवं प्राणाहुतिं कुर्य्यान्मन्त्रेण च पृथक् पृथक् ।
ततः स्वादुकरान्नञ्च भुञ्जीत सुसमाहितः ॥
आचम्य देवतामिष्टां संस्मरन् उदरं स्पृशेत् ।
इतिहासपुराणाभ्यां कञ्चित् कालं नयेद्बुधः ॥
ततः सन्ध्यामुपासीत वहिर्गत्वा विधानतः ।
कृतहोमस्तु भुञ्जीत रात्रौ चातिथिभोजनम् ॥
सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।
नान्तराभोजनं कुर्य्यादग्निहोत्रसमोविधिः ॥
शिष्यानध्यापयेच्चापि अनध्याये विसर्जयेत् ।
स्मृत्युक्तानखिलांश्चापि पुराणोक्तानपि द्विजः ॥
महानवम्यां द्वादश्यां भरण्यामपि पर्व्वसु ।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्द्विजः ।
माघमासे तु सप्तम्यां रथ्याख्यायां तु वर्जयेत् ॥
अध्यापनं समभ्यञ्जन् स्नानकाले च वर्जयेत् ॥
नीयमानं शवं दृष्ट्वा महीस्थं वा द्विजोत्तमाः ।
न पठेद्रुदितं श्रुत्वा सन्ध्यायां तु द्विजोत्तमः ॥
दानानि च प्रदेयानि गृहस्थेन द्विजोत्तमाः ।
हिरण्यदानं गोदानं पृथिवीदानमेव च ॥
एवं धर्मो गृहस्थस्य सायंभूत उदाहृतः ।

यएवं श्रद्धया कुर्य्यात् स याति ब्रह्मणः पदम् ॥
ज्ञानोत्कर्षश्च तस्य स्यान्नारसिंहप्रसादतः।
तस्मान्मुक्तिमवाप्नोति ब्राह्मणो द्विजसत्तमाः! ॥
एवं हि विप्राः! कथितो मया वः समासतः शाश्वतधर्म्मराशिः।
गृही गृहस्थस्य सतोहि धर्मं कुर्व्वन् प्रयत्नाद्धरिमेति युक्तम् ॥
॥ इति हारीते धर्म्मशास्त्रे चतुर्थोऽध्यायः ॥

अतः परं प्रवक्ष्यामि वानप्रस्थस्य सत्तमाः!।
धर्माश्रमं महाभागाः! कथ्यमानं निबोधत ॥
गृहस्थः पुत्रपौत्रादीन् दृष्ट्वा पलितमात्मनः।
भार्य्यां पुत्रेषु निःक्षिप्य सह वा प्रविशेद्वनम् ॥
नखरोमाणि च तथा सितगात्रत्वगादि च।
धारयन् जुहुयादग्निं वनस्थोविधिमाश्रितः ॥
धान्यैश्च वनसंभूतैर्नीवाराद्यैरनिन्दितैः।
शाकमूलफलैर्व्वापि कुर्य्यान्नित्यं प्रयत्नतः ॥
त्रिकालस्नानयुक्तस्तु कुर्य्यात्तीव्रं तपस्तदा।
पक्षान्ते वा समश्नीयान्मासान्ते वा स्वपक्वभुक् ॥
तथा चतुर्थकाले तु भुञ्जीयादष्टमेऽथवा।
षष्ठे च कालेऽप्यथवा वायुभक्षोऽथवा भवेत् ॥
घर्म्मे पञ्चाग्निमध्यस्थस्तथा वर्षे निराश्रयः।
हेमन्ते च जले स्थित्वा नयेत् कालं तपश्चरन् ॥
एवञ्च कुर्व्वता येन कृतबुद्धिर्यथाक्रमम्।
अग्निं स्वात्मनि कृत्वा तु प्रव्रजेदुत्तरां दिशम् ॥
आदेहपातं वनगो मौनमास्थाय तापसः।

स्मरन्नतीन्द्रियं ब्रह्म ब्रह्मलोके महीयते ॥
तपोहि यः सेवति वन्यवासः समाधियुक्तः प्रयतात्मरात्मा ।
विमुक्तपापो विमलः प्रशान्तः स याति दिव्यं पुरुषं पुराणम् ॥
॥ इति हारीते धर्म्मशास्त्रे पञ्चमोऽध्यायः ॥

अतः परं प्रवक्ष्यामि चतुर्थाश्रममुत्तमम् ।
श्रद्धया तदनुष्ठाय तिष्ठन्मुच्येत बन्धनात् ॥
एवं वनाश्रमे तिष्ठन् पातयंश्चैव किल्बिषम् ।
चतुर्थमाश्रमं गच्छेत् संन्यासविधिना द्विजः ॥
दत्त्वा पितृभ्यो देवेभ्यो मानुषेभ्यश्च यत्नतः ।
दत्त्वा श्राद्धं पितृभ्यश्च मानुषेभ्य स्तथात्मनः ॥
इष्टिं वैश्वानरीं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा ।
अग्निं स्वात्मनि संरोपय मन्त्रवित् प्रव्रजेत् पुनः ॥
ततः प्रभृति पुत्रादौ स्नेहालापादि वर्जयेत् ।
बन्धूनामभयं दद्यात् सर्व्वभूताभयं तथा ॥
त्रिदण्डं वैणवं सम्यक् सन्ततं समपर्वकम् ।
वेष्टितं कृष्णगोवालरज्जुमच्चतुरङ्गुलम् ॥
शौचार्थं मानसार्थञ्च मुनिभिः समुदाहृतम् ।
कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम् ॥
पादुके चापि गृह्णीयात् कुर्य्यान्नान्यस्य संग्रहम् ।
एतानि तस्य लिङ्गानि यतेः प्रोक्तानि सर्वदा ॥
संगृह्य कृतसंन्यासो गत्वा तीर्थमनुत्तमम् ।
स्नात्वाचम्य च विधिवद्वस्त्रपूतेन वारिणा ॥
तर्पयित्वा तु देवांश्च मन्त्रवद्भास्करं नमेत् ।

आत्मनः प्राङ्मुखो मौनी प्राणायामत्रयं चरेत् ॥
गायत्रीञ्च यथाशक्ति जप्त्वा ध्यायेत् परंपदम् ॥
स्थित्यर्थमात्मनोनित्यं भिक्षाटनमथाचरेत् ।
सायंकाले तु विप्राणां गृहाण्यभ्यवपद्य तु ।
सम्यक् याचेच्च कवलं दक्षिणेन करेण वै ॥
पात्रं वामकरे स्थाप्य दक्षिणेन तु शेषयेत् ।
यावतान्नेन तृप्तिः स्यात्तावद्भैक्षं समाचरेत् ॥
ततोनिवृत्य तत्पात्रं संस्थाप्यान्यत्र संयमी ।
चतुर्भिरङ्गुलैश्छाद्य ग्रासमात्रं समाहितः ॥
सर्वव्यञ्जनसंयुक्तं पृथक् पात्रे नियोजयेत् ।
सूर्य्यादिभूतदेवेभ्यो दत्त्वा संप्रोक्ष्य वारिणा ।
भुञ्जीत पात्रपुटके पात्रे वाक्यतो यतिः ॥
वटकाश्वत्थपर्णेषु कुम्भीतैन्दुकपात्रके ।
कोविदारकदम्बेषु न भुञ्जीयात् कदाचन ॥
मलाक्ताः सर्व्व उच्यन्ते यतयः कांस्यभोजिनः ॥
कांस्यभाण्डेषु यत् पाको गृहस्थस्य तथैव च ।
कांस्ये भोजयतः सर्व्वं किल्बिषं प्राप्नुयात्तयोः ॥
भुक्त्वा पात्रे यतिर्नित्यं क्षालयेन्मन्त्रपूर्व्वकम् ।
न दूष्यते च तत्पात्रं यज्ञेषु चमसाइव ॥
अथाचम्य निदिध्यास्य उपतिष्ठेत भास्करम् ।
जपध्यानेतिहासैश्च दिनशेषं नयेद्बुधः ॥
कृतसन्ध्यस्ततो रात्रिं नयेद्देवगृहादिषु ।
हृत्पुण्डरीकनिलये ध्यायेदात्मानमव्ययम् ॥
यदि धर्म्मरतिः शान्तः सर्व्वभूतसमो वशी ।

प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्त्तते ॥
त्रिदण्डभृद्योहि पृथक् समाचरेच्छनैः शनैर्यस्तु वहिर्मुखाच्चः।
संमुच्य संसारसमस्तबन्धनात् स याति विष्णोरमृतात्मनः पदम् ॥

॥ इति हारीते धर्म्मशास्त्रे षष्ठोऽध्यायः ॥

वर्णानामाश्रमाणाञ्च कथितं धर्म्मलक्षणम्।
येन स्वर्गापवर्गञ्च प्राप्नुवन्ति द्विजातयः ॥
योगशास्त्रं प्रवक्ष्यामि सङ्क्षेपात् सारमुत्तमम्।
यस्य च श्रवणाद्यान्ति मोक्षञ्चैव मुमुक्षवः ॥
योगाभ्यासबलेनैव नश्येयुः पातकानि तु।
तस्माद्योगपरो भूत्वा ध्यायेन्नित्यं क्रियापरः ॥
प्राणायामेन वचनं प्रत्याहारेण चेन्द्रियम्।
धारणाभिर्वशे कृत्वा पूर्व्वं दुर्धर्षणं मनः ॥
एकाकारमना मन्दं बुधैरुपमलामयम्।
सूक्ष्मात् सूक्ष्मतरं ध्यायेत् जगदाधारमुच्यते ॥
आत्मानं वहिरन्तस्थं शुद्धचामीकरप्रभम्।
रहस्येकान्तमासीनो ध्यायेदामरणान्तिकम् ॥
यत्सर्वप्राणि हृदयं सर्वेषाञ्च हृदि स्थितम्।
यच्च सर्वजनैर्ज्ञेयं सोऽहमस्मीति चिन्तयेत् ॥
आत्मलाभसुखं यावत्तपोध्यानमुदीरितम्।
श्रुतिस्मृत्यादिकं धर्म्मं तद्विरुद्धं न चाचरेत् ॥
यथा रथोऽश्वहीनस्तु यथाश्वो रथिहीनकः।
एवं तपश्च विद्या च संयुतं भेषजं भवेत् ॥
यथान्नं मधुसंयुक्तम् मधुवान्नेन संयुतम्।

उभाभ्यामपि पक्षाभ्यां यथा खे पक्षिणां गतिः।
तथैव ज्ञानकर्म्मभ्यां प्राप्यते ब्रह्म शाश्वतम्॥
विद्यातपोभ्यां संपन्नो ब्राह्मणो योगतत्परः।
देहद्वयं विहायाशु मुक्तो भवति बन्धनात्।
न तथा क्षीणदेहस्य विनाशो विद्यते क्वचित्॥
मया ते कथितः सर्व्वो वर्णाश्रमविभागशः।
संक्षेपेण द्विजश्रेष्ठा! धर्म्मस्तेषां सनातनः॥
श्रुत्वैवं मुनयो धर्मं स्वर्गमोक्षफलप्रदम्।
प्रणम्य तमृषिं जग्मुर्मुदिताः स्वं स्वमाश्रमम्॥
धर्म्मशास्त्रमिदं सर्वं हारीतमुखनिःसृतम्।
अधीत्य कुरुते धर्मं स याति परमां गतिम्॥
ब्राह्मणस्य तु यत् कर्म्म कथितं बाहुजस्य च।
ऊरुजस्यापि यत् कर्म्म कथितं पादजस्य च।
अन्यथा वर्त्तमानस्तु सद्यः पतति जातितः॥
यो यस्याभिहितो धर्म्मः स तु तस्य तथैव च।
तस्मात् स्वधर्मं कुर्व्वीत द्विजो नित्यमनापदि॥
वर्णाश्चत्वारो राजेन्द्र! चत्वारश्चापि चाश्रमाः॥
स्वधर्मे ये तु तिष्ठन्ति ते यान्ति परमां गतिम्॥
स्वधर्मेण यथा नृणां नारसिंहः प्रसीदति।
न तुष्यति तथान्येन कर्म्मणा मधुसूदनः॥
अतः कुर्वन्निजं कर्म्म यथाकालमतन्द्रितः।
सहस्रानीकदेवेशं नारसिंहञ्च सालयम्॥
उत्पन्नवैराग्यबलेन योगी ध्यायेत् परं ब्रह्म सदा क्रियावान्।
सत्यं सुखं रूपमनन्तमाद्यं विहाय देहं पदमेति विप्राः॥

॥ इति हारीते धर्म्मशास्त्रे सप्तमोऽध्यायः॥

—००—

अम्बरीषस्तु तं गत्वा हारीतस्याश्रमं नृपः
ववन्दे तं महात्मानं बालार्कसदृशप्रभम् ॥
संस्पृष्टकुशलस्तेन पूजितः परमासने।
उपविष्ट स्ततो विप्रमुवाच नृपनन्दनः ॥
भगवन्! सर्वधर्म्मज्ञ! तत्ववेदविदाम्बर!।
पृच्छामि त्वां महाभाग! परमं धर्म्ममव्ययम् ॥
ब्रूहि वर्णाश्रमाणान्तु नित्यनैमित्तिकक्रियाः।
कर्त्तव्या मुनिशार्द्दूल! नारीणाञ्च नृपस्य च ॥
स्वरूपं जीवपरयोः कथं मोक्षपथस्य च।
तत्प्राप्ते साधनं ब्रह्मन्! वक्तुमर्हसि सुव्रत! ॥
एवमुक्तस्तु विप्रर्षिस्तेन राजर्षिणा तदा।
उवाच परमप्रीत्या नमस्कृत्य जनार्दनम् ॥
शृणु राजन्! प्रवक्ष्यामि सर्वं वेदोपबृंहितम्।
यदुक्तं ब्रह्मणा पूर्वं पृच्छतो मम भूपते! ॥
तद्ब्रवीमि परं धर्मं शृणुष्वैकाग्रमानसः।
सर्वेषामेव देवाना मनादिः पुरुषोत्तमः ॥
ईश्वरस्तु स एवाद्ये जगतो विभुरव्ययः।
नारायणो वासुदेवो विष्णुर्ब्रह्मात्मनो हरिः ॥
स्रष्टा धाता विधाता च स एव परमेश्वरः।
हिरण्यगर्भः सविता गुणष्ड्भिर्गुणोऽव्ययः ॥
परमात्मा परं ब्रह्म परं ज्योतिः परात्परः।
इन्द्रः प्रजापतिः सूर्य्यः शिवो वह्निः सनातनः ॥

सर्व्वात्मकः सर्वसुहृत् सर्वभृद्भूतभावनः ।
यमी च भगवान् कृष्णो मुकुन्दोऽनन्तएव च ॥
यज्ञो यज्ञपतिर्यज्वा ब्रह्मण्यो ब्रह्मणः पतिः ।
सए व पुण्डरीकाक्षः श्रीशो नाथोऽधिपो महान् ॥
सहस्रमूर्द्धा विश्वात्मा सहस्रनरपादवान् ।
यद्गत्वा न विवर्त्तन्ते तद्धाम परमं हरेः ॥
चतुर्भिः शोभनोपायैः साध्योऽयं सुमहात्मनः ।
तुरीयपदयोर्भक्त्या सुसिद्धोऽय मुदाहृतः ॥
तं स्वीकुर्वन्ति विद्वांसः स्वस्वरूपतया सदा ।
नैसर्गिकं हि सर्वेषां दास्यमेव हरेः सदा ॥
स्वाम्यं परस्वरूपं स्याद्दास्यं जीवस्य सर्वदा ।
प्रकृत्यार त्वात्मनो रूपं स्वाम्यं दास्यमिति स्थितिः ॥
दास्यमेव परं धर्मं दास्यमेव परं हितम् ।
दास्येनैव भवेन्मुक्तिरन्यथा निरयं भवेत् ॥
विष्णोर्दास्यं परा भक्तिरेषा तु न भवेत् क्वचित् ।
तेषामेव हि संस्पृष्टं निरयं ब्रह्मणा नृप ! ॥
नारायणस्य दासा ये न भवन्ति नराधमाः ।
जीवन्त एव चण्डाला भविष्यन्ति न संशयः ॥
तस्माद्दास्यं परं भक्तिमालम्ब्यत्र नृपसत्तम ! ।
नित्यं नैमित्तिकं सर्वं कुर्य्यात्प्रीत्यै हरेः सदा ॥
तस्य स्वरूपं रूपञ्च गुणांश्चापि विभूतयः ।
ज्ञात्वा समर्च्चयेद्विष्णु यावज्जीव मतन्द्रितः ॥
तमेव मनसा ध्यायेद्वाचा सङ्कीर्तयेत्प्रभुम् ।
जपेच्च जुहुयाद्भक्तो तद्दानेकविलक्षणः ॥

शङ्खचक्रोर्ध्वं पुण्ड्रादिधारणं दास्यलक्षणम्।
तन्नामकरणञ्चैव वैष्णवन्त्वदिहोच्यते॥
अवैष्णवाश्च ये विप्रा हर्षदास्ते नराधमाः।
तेषां तु नरके वासः कल्पकोटिशतैरपि॥
तदादि वर्षसञ्चारी मन्त्ररत्नार्थतत्त्ववित्।
वैष्णवः स जगत्पूज्यो याति विष्णोः परं पदम्॥
अचक्रधारी यो विप्रो बहुवेदश्रुतोऽपि वा।
स जीवन्नेव चण्डालो मृतो निरयमाप्नुयात्॥
तस्मात्ते हरिसंस्काराः कर्त्तव्या धर्म्मकाङ्क्षिणाम्।
अयमेव परं धर्म्मः प्रधानं सर्वकर्म्मणाम्॥

इति वृद्धहारीतस्मृतौ विशिष्टधर्म्मशास्त्रे पञ्चसंस्कार-
प्रतिपादनं नाम प्रथमोऽध्यायः॥

अम्बरीषउवाच॥

भगवन्! वैष्णवाः पञ्च संस्काराः सर्व्वकर्मणाम्।
प्रधानमिति यच्चोक्तं सर्वैरेव महर्षिभिः॥
तद्विधानं ममाचक्ष्व विस्तरेणैव सुव्रत!।

हारीत उवाच।

शृणु राजन्! प्रवक्ष्यामि निर्मला वैष्णवाः क्रियाः॥
यदुक्तं ब्रह्मणा पूर्वं वशिष्ठाद्यैश्च वैष्णवैः॥
संस्काराणां तु सर्वेषा माद्यं चक्रादिधारणम्॥
तत् कर्तव्यं हि सर्वेषां विधीनां वै द्विजन्मनाम्।
आचार्यं संश्रयेत् पूर्वमनघं वैष्णवं द्विजम्॥
शुद्धसत्त्वगुणोपेतं नवज्याकर्मकारणम्।
सत्सम्प्रदायसंयुक्तं मन्त्ररत्नार्थकोविदम्॥

ज्ञानवैराग्यसम्पन्नं वेदवेदाङ्गपारगम्।
शासितारं सदाचार्यैः सर्वधर्मविदाम्वरम्॥
महाभागवतं विप्रं सदाचारनिषेवणम्।
आलोक्य सर्वशास्त्राणि पुराणानि च वैष्णवाः॥
तदर्थमाचरेद्यस्तु आचार्यः स उदाहृतः।
आस्तिक्यमानसं सद्भिरुपेतं धर्म्मवत्सलम्॥
श्रद्दधानं सदाचारे गुरुशुश्रूषतत्परम्।
सम्वत्सरं प्रतीक्ष्याथ तं शिष्यं शासयेद्गुरुः॥
तस्यादौ पञ्च संस्कारान् कुर्यात् समविधानतः।
प्रातः स्नात्वा शुचौ देशे पूजयित्वा जनार्दनम्॥
स्नातं शिष्यं समानीय तेनैव सह देशिकः।
स्नाप्य पञ्चामृतैर्गव्यैश्चक्रादीनर्च्चयेत्ततः॥
पुष्पैर्धूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि।
तत्तत्प्रकाशकैर्मन्त्रैरर्च्चयेत् पुरतो हरेः॥
अग्नौ होमं प्रकुर्व्वीत इध्माधानादिपूर्वकम्।
पौरुषेण तु सूक्तेन पायसं घृतमिश्रितम्॥
आज्येन मूलमन्त्रेण हुत्वा चाष्टोत्तरं शतम्।
वैष्णव्या चैव गायत्र्या जुहुयात् प्रयतो गुरुः॥
पश्चादग्नौ विनिक्षिप्य चक्राद्यायुधपञ्चकम्।
पूजयित्वा सहस्रारं ध्यात्वा तद्वह्निमण्डले॥
षडक्षरेण जुहुयादाज्यं विंशतिसंख्यया।
सर्वैश्च हेतिमन्त्रैश्च एकैकाज्याहुतिं क्रमात्॥
ततः प्रदक्षिणं कृत्वा स शिष्यो वह्निमात्मवान्।
नमस्कृत्वा ततो विष्णुं जप्त्वा मन्त्रवरं शुभम्॥

प्राङ्मुखं तु समासीनं शिष्यमेकाग्रचेतसम्।
प्रतपेच्चक्रशङ्खौ द्वौ हेतिभिर्मन्त्रमुच्चरन्॥
दक्षिणे तु भुजे चक्रं वामांसे शङ्खमेव च।
गदां च भालमध्ये तु हृदये नन्दकं तदा॥
मस्तके तु तथा शार्ङ्गं मङ्कयेद्विमलं तदा।
पश्चात् प्रक्षाल्य तोयेन पुनः पूजां समाचरेत्॥
होमशेषं समाप्याथ वैष्णवान् भोजयेत्ततः।
एवं तापः क्रियाः कार्याः वैष्णव्यः कल्मषापहाः॥
प्रधानं वैष्णवं तेषां तापसंस्कारमुत्तमम्।
तापसंस्कारमात्रेण परां सिद्धिमवाप्नुयात्॥
केचित्तु चक्रशङ्खौ द्वौ प्रतप्तौ बाहुमूलयोः।
धारयन्ति महात्मानश्चक्रमेकं तु वापरे॥
वैष्णवानां तु हेतीनां प्रधानं चक्रमुच्यते।
तेनैव बाहुमूलौ तु प्रतप्तेनाङ्कयेद्बुधः॥
जात पुत्रे पिता स्नात्वा होमं कृत्वा विधानतः।
तेनाग्निनैव सन्तप्तचक्रेण भुजमूलयोः॥
अङ्कयित्वा शिशोः पश्चान्नाम कुर्याच्च वैष्णवम्।
पश्चात्सर्वाणि कर्माणि कुर्वीतास्य विधानतः॥
अङ्कयित्वा स चक्रेण यत्किञ्चित्कर्म सञ्चरेत्।
तत्सर्वं याति वैफल्यमिष्टापूर्तादिकं नृप!॥
कारयेन्मन्त्रदीक्षायां चक्राद्याः पञ्च हेतयः।
चक्रं वै कर्मसिध्यर्थं जातकर्मणि धारयेत्।
अचक्रधारी विप्रस्तु सर्वकर्मसु गर्हितः॥
अवैष्णवः समापन्नो नरकं चाधिगच्छति।

चक्रादिचिह्नरहितं प्राकृतं कलुषान्वितम् ॥
अवैष्णवन्तु तं दूरात् श्वपाकमिव सन्त्यजेत् ।
अवैष्णवस्तु यो विप्रः श्वपाकादधमः स्मृतः ।
अश्राद्धेयो ह्यपाङ्क्तेयो रौरवं नरकं व्रजेत् ॥
अवैष्णवस्तु यो विप्रः सर्वधर्मयुतोऽपिवा ।
गवां षण्डति विज्ञेयः सर्वकर्मसु नार्हति ॥
तस्माच्चक्रं विधानेन तप्तं वै धारयेद्द्विजः ।
सर्वाश्रमेषु वसतां स्त्रीणां च श्रुतिचोदनात् ॥
अनायुधासो असुता अदेवा इति वै श्रुतिः ।
चक्रेण तामपवप इत्यृचा समुदाहृतम् ॥
अपेत्यमङ्कमित्युक्तं वपेति श्रवणं तदा ।
तस्माद्वै तप्तचक्रस्य चाङ्कनं मुनिभिः श्रुतम् ।
पवित्रं विततं ब्राह्मं प्रभोर्गात्रे तु धारितम् ॥
श्रुत्यैव चाङ्कयेद्गात्रे तद्ब्रह्मसमवाप्तये ।
यत्ते पवित्रमर्चिषग्रमग्ने वीतमनन्तरा ॥
ब्रह्मेति निहितन्नैव ब्रह्मणो श्रुतिबृंहितम् ।
पवित्रमिति चैवाग्निरग्निर्वै चक्रमुच्यते ॥
अग्निरेव सहस्त्रारः सहस्त्रा नेमिरुच्यते ।
नेमितप्ततनुः सूर्यो ब्रह्मणा समतां व्रजन् ॥
यत्ते पवित्रमर्चिषग्रमग्नेस्तु न सुनिहितः ।
दक्षिणे तु भुजे विप्रो विभृयाद्वै सुदर्शनम् ॥
सव्ये तु शङ्खं विभृयादिति ब्रह्मविदो विदुः ।
इत्यादि श्रुतिभिः प्रोक्तं विष्णोश्चक्रस्य धारणम् ॥
पुराणेष्वितिहासेषु सात्विकेषु स्मृतिष्वपि ।

शङ्खचक्रोर्द्ध पुण्ड्रादिरहितं ब्राह्मणं नृप ! ॥
यः श्राद्धे भोजयेद्विप्रः पितॄणां तस्य दुर्गतिः ।
शङ्खचक्रोर्ध्वं पुण्ड्रादिचिह्नैः प्रियतमैर्हरेः ॥
रहितः सर्वधर्मेभ्यश्च्युतो नरकमाप्नुयात् ।
रुद्रार्चनं त्रिपुण्ड्रस्य धारणं यत्र दृश्यते ॥
तच्छूद्राणां विधिः प्रोक्तो न द्विजानां कदाचन ।
प्रतिलोमानुलोमानां दुर्गागणसुभैरवाः ॥
पूजनीया यदार्हेण विल्वचन्दनधारिणाम् ।
यक्षराक्षसभूतानि विद्याधरगणास्तदा ॥
चण्डालानामर्चनीया मद्यमांसनिषेवणाम् ।
स्ववर्णविहितं धर्ममेवं ज्ञात्वा समाचरेत् ॥
रुद्रार्चनाद्ब्राह्मणस्तु शूद्रेण समतां व्रजेत् ।
यक्षभूतार्चनात् सद्यश्चण्डालत्वमवाप्नुयात् ॥
न भस्म धारयेद्विप्रः परमापद्गतोऽपि वा ।
मोहाद्वै बिभृयाद्यस्तु ससुरापो भवेद्ध्रुवम् ॥
तिर्यक् पुण्ड्रधरं विप्रं पट्टाम्बरधरं तथा ।
श्वपाक इव वीक्षेत न सम्भाषेत कुत्रचित् ।
तस्माद्द्विजातिभिर्धार्य्यं मूर्द्धपुण्ड्रविधानतः ॥
मृदा शुभ्रेण सततं सान्तरालं मनोहरम् ।
स्नात्वा शुद्धेऽपि पूर्वाह्णे विष्णुमभ्यर्च्य देशिकः ॥
स्नातं शिष्यं समाहूय होमं कुर्वीत पूर्ववत् ।
परोमात्रेति सूक्तेन पायसं मधुमिश्रितम् ॥
हुत्वोदमूलमन्त्रेण शतमष्टोत्तरं घृतम् ।
स्थण्डिले तु ततः पश्चान्मण्डलानि यदा क्रमात् ॥

दीक्षस्थमध्ये चत्वारि विन्यसेत् पुरतो हरिः।
विलिखेत्तत्र पुण्ड्रादि विस्तारायामभेदतः॥
तेष्वर्चयेत्ततो धीमान् केशवादीननुक्रमात्।
तत्र तत्र च तन्मूर्त्तिं ध्यात्वा मन्त्रैः समर्चयेत्॥
गन्धपुष्पादि सकलं मन्त्रेणैवार्चयेद्गुरुम्।
प्रदक्षिणमनुव्रज्य स शिष्यः प्रणमेत्तथा॥
तद्बाहौ निक्षिपेच्छिष्यः केशवादीननुक्रमात्।
हृदि विन्यस्य पुण्ड्राणि गुरूक्तानि स वैष्णवः॥
शुभ्रेणैव मृदा पश्चाद्बिभृयात् सुसमाहितः।
त्रिसन्ध्यासु मृदा विप्रो यागकाले विशेषतः॥
श्राद्धे दाने तथा होमे स्वाध्याये पितृतर्पणे।
अज्ञालुरूर्द्धपुण्ड्राणि बिभृयाद्द्विजसत्तमः॥
श्राद्धो होमस्तथा दानं स्वाध्यायः पितृतर्पणम्।
भस्मीभवन्ति तत्सर्वं मूर्ध्वं पुण्ड्रं विनाकृतम्॥
ऊर्ध्वं पुण्ड्रं विना यस्तु श्राद्धं कुर्व्वीत स द्विजः।
सर्वं तद्राक्षसैर्नीतं नरकं चाधिगच्छति॥
ऊर्ध्वपुण्ड्रविहीनन्तु यः श्राद्धे भोजयेद्द्विजम्।
अश्नन्ति पितरस्तस्य विण्मूत्रं नात्र संशयः॥
तस्मात्तु सततं धार्य्यमूर्ध्वपुण्ड्रं द्विजन्मकः।
धारयेन्न तिर्य्यक् पुण्ड्रमापद्यपि कदाचन॥
तिर्य्यक्पुण्ड्रधरं विप्रं चण्डालमिव सन्त्यजेत्।
सोऽनर्हः सर्वकृत्येषु सर्वलोकेषु गर्हितः॥
ऊर्ध्वपुण्ड्रविहीनः सन् सन्ध्याकर्म्म समाचरेत्।
सर्वं तद्राक्षसैर्नीतं नरकञ्च स गच्छति॥

यदि स्यात् मनुष्याणां मूर्ध्वं पुण्ड्रविवर्जितम्।
द्रष्टव्यन्नैव तत्किञ्चित् श्मशानमिव तद्भवेत्॥
ऊर्ध्वपुण्ड्रं मृदा शुभ्रं ललाटे यस्य दृश्यते।
चण्डालोऽपि हि शुद्धात्मा विष्णुलोके महीयते॥
ऊर्ध्वपुण्ड्रस्य मध्येतु ललाटे सुमनोहरे।
लक्ष्म्या सह समासीनो रमते तत्र वै हरिः॥
निरन्तरालं यः कुर्य्यादूर्ध्वपुण्ड्रं द्विजाधमः।
स हि तत्र स्थितं विष्णुं श्रियञ्चैव व्यपोहति॥
अथेदमूर्ध्वपुण्ड्रन्तु यः करोति द्विजाधमः।
कल्पकोटिसहस्राणि रौरवं नरकं व्रजेत्॥
तस्माद्रागान्वितं पुण्ड्रस्थरेद्विष्णुपदाकृति।
ललाटादिषु चाङ्गेषु सर्व्वकर्म्मसु वैष्णवः॥
नासिकामूलमारभ्य ललाटान्तेषु विन्यसेत्।
अङ्गुलद्वयमात्रन्तु मध्यच्छिद्रं प्रकल्पयेत्॥
पार्श्वे चाङ्गुलमात्रन्तु विन्यसेद्द्विजसत्तमः।
पुण्ड्राणामन्तराले तु हारिद्रां धारयेच्छ्रियम्॥
ललाटे पृष्ठयोः कण्ठे भुजयोरुभयोरपि।
चतुरङ्गुलमात्रन्तु बिभृयादायकं द्विजः॥
उरस्यष्टाङ्गुलं धार्य्यं भुजयोरायतं तदा।
उदरे पार्श्वयोर्नित्यमायतन्तु दशाङ्गुलम्॥
केशवादि नमोऽन्तैश्च प्रीणनाद्यैरनुक्रमात्।
ललाटे केशवं रूपं कुक्षौ नारायणं न्यसेत्॥
वक्षःस्थले माधवञ्च गोविन्दं कण्ठदेशतः।
विष्णुञ्च दक्षिणे पार्श्वे बाह्वोश्च मधुसूदनम्॥

त्रिविक्रमन्तु वामांसे वामनं वामपार्श्वतः ।
श्रीधरं वामवाहौ तु हृषीकेशं तदा भुजे ॥
पृष्ठञ्च पद्मनाभन्तु ग्रीवे दामोदरं तदा ।
तत्प्रक्षालनतोयेन वासुदेवेति मूर्धनि ॥
केशवस्तु सुवर्णाभः शङ्खचक्रगदाधरः ।
शुक्लाम्बरधरः सौम्यो मुक्ताभरणभूषितः ॥
नारायणो घनश्यामः शङ्खचक्रगदासिभृत् ।
पीतवासा मणिमयैर्भूषणैरुपशोभितः ॥
माधवश्चोत्पलप्रख्यश्चक्रशार्ङ्गगदासिभृत् ।
चित्रमाल्याम्बरधरः पुण्डरीकनिभेक्षणः ॥
गोविन्दः शशिवर्णः स्यात्पद्मशङ्खगदासिभृत् ।
रक्तारविन्दपादाब्ज स्तप्तकाञ्चनभूषणः ॥
गौरवर्णो भवेद्विष्णुश्चक्रशङ्खहलासिभृत् ।
क्षौमाम्बरधरः स्रग्वी केयूराङ्गदभूषितः ॥
अरविन्दनिभः श्रीमान् मधुजित्कमलाननः ।
चक्रं शार्ङ्गञ्च मुसलं पद्मं दोर्भिर्बिभर्त्यसौ ॥
त्रिविक्रमो रक्तवर्णः शङ्खचक्रगदासिभृत् ।
किरीटहारकेयूरकुण्डलैश्च विराजितः ॥
वामनः कुन्दवर्णः स्यात् पुण्डरीकायतेक्षणः ।
दोर्भिर्वज्रं गदां चक्रं पद्मं हैमं बिभर्त्यसौ ॥
श्रीधरः पुण्डरीकाख्य श्चक्रशार्ङ्गी च पद्मधृक् ।
रक्तारविन्दनयनो मुक्तादामविभूषितः ॥
विद्युद्वर्णो हृषीकेशश्चक्रशार्ङ्गहलासिभृत् ।
रक्तमाल्याम्बरधरः पुण्डरीकावतंसकः ॥

इन्द्रनीलनिभश्चक्रशङ्खपद्मगदाधरः।
पद्मनाभः पीतवासा श्वितमाल्यानुलेपनः।
दामोदरः सार्व्वभौमः पद्मशार्ङ्गासिशङ्खभृत्॥
पीतवासा विशालाक्षो नानारत्नविभूषितः।
एवं पुण्ड्राणि सततं धारयेद्वैष्णवोत्तमः॥
पुण्ड्रसंस्कार इत्येवं शिषेणापि च कारयेत्।
मन्त्रशेषं समाप्याथ वैष्णवान् भोजयेत्ततः॥

इति पुण्ड्रसंस्कारो द्वितीयः।

तृतीयं नाम संस्कारं कुर्व्वीत शुभवासरे॥
स्नात्वा संपूज्य देवेशं गन्धपुष्पादिभिर्गुरून्।
नानाधिदैवतं पश्चात् पूजयेत् प्रयतात्मवान्॥
द्वादशैव तु मासास्तु केशवाद्यैरधिष्ठिताः।
आरभ्य मार्गशीर्षं तु यदा संख्या द्विजोत्तमः॥
यस्मिन्मासि भवेद्दीक्षा तन्मूर्त्तेर्नाम चोदितम्।
नृसिंहरामकृष्णाख्यं दासनाम प्रकल्पयेत्॥
शक्त्या दशावताराणां वर्जयेन्नाम वैष्णवः।
नाम दद्यात्प्रयत्नेन वैष्णवं पापनाशनम्॥
यस्य वै वैष्णवं नाम नास्ति चेत्तु द्विजन्मनः।
अनामिकः स विज्ञेयः सर्वकर्मसु गर्हितः॥
चक्रस्य धारणं यस्य जातकर्मणि सम्भवेत्।
तत्र वै मासनामापि दद्याद्विप्रो विधानतः।
ध्यात्वा समर्च्चयेन्नाममूर्त्तिं मन्त्रेण देशिकः॥
धूपं दीपञ्च नैवेद्यं ताम्बूलञ्च समर्पयेत्।

प्रदक्षिण मनुव्रज्य भक्त्या सम्यक् प्रणम्य च॥
तन्मन्त्रं मूलमन्त्रं वा जपेत्साहस्रसङ्ख्यया।
पश्चाद्धोमं प्रकुर्वीत शतमष्टोत्तरं हविः॥
वैष्णवैरनुवाकैश्च जुहुयात् सर्पिषा तदा।
नाम दद्यात् ततः शिष्यं मन्त्रतोये समाप्लुतम्॥
ततः पुष्पाञ्जलिं दत्त्वा होमशेषं समापयेत्।
वैष्णवान् भोजयेत्पश्चाद्दक्षिणाद्यैश्च तोषयेत्॥
एवं हि नामसंस्कारं कुर्वीत द्विजसत्तमः।
गुणयोगेन चान्यानि विष्णोर्नामानि लौकिके॥
विशिष्टं वैष्णवं नाम सर्वकर्मसु चोदितम्।
हरेः परं पितुर्नाम यो ददात्यपरं सुतम्॥
अतिरोचनकं दिव्यं तृतीयं श्रुतिचोदितम्।
तस्माद्भगवतो नाम सर्वेषां मुनिभिः स्मृतम्॥

॥ इति नामसंस्कारस्तृतीयः॥

एवं तृतीयसंस्कारं कृत्वा वै वैदिकोत्तमः॥
चतुर्थमन्त्रसंस्कारं कुर्वीत द्विजसत्तमः।
ततः स्नात्वा विधानेन पूजयेत् जगतां पतिम्।
अष्टोत्तरसहस्रं तु मन्त्ररत्नं जपेद्गुरुः॥
स्नातं शिष्यं समाहूय सुवेषं समलङ्कृतम्।
आदाय कलशं रम्यं पवित्रोदकपूरितम्॥
पञ्चत्वक्पल्लवयुतं पञ्चरत्नसमन्वितम्।
मङ्गलद्रव्यसंयुक्तं मन्त्रेणैवाभिमन्त्रयेत्॥
सम्मार्जयेत् ततः शिष्यं तज्जलेन कुशैः शुभैः।

सूक्तैश्च विष्णुदैवत्यैः पावमानैस्तथैव च ॥
अष्टोत्तरशतं पश्चान्मन्त्ररत्नेन मार्जयेत् ।
अभिषिच्य ततो मूर्ध्नि शुक्लवस्त्रधरं शुचिम् ॥
स्वलङ्कृतं समाचान्तं मूर्ध्वपुण्ड्रधरं तदा ।
पवित्रहस्तं पद्माक्षमालया समलङ्कृतम् ॥
निवेश्य दक्षिणे स्वस्य आसने कुशनिर्म्मिते ।
स्वगृह्योक्तविधानेन पुरतोऽग्निं प्रकल्पयेत् ॥
पौरुषेण तु सूक्तेन श्रीसूक्तेन तथैव च ।
मध्वाज्यमिश्रितं रम्यं पायसं जुहुयाद्गुरुः ॥
अष्टोत्तरशतं पश्चादाज्यं मन्त्रद्वयेन च ।
मूलमन्त्रेण जुहुयाच्चरुं घृतविमिश्रितम् ॥
केशवादीन् समुद्दिश्य नित्यान् मुक्तांस्तथैव च ।
एकैकमाहुतिं हुत्वा होमशेषं समापयेत् ॥
ततः प्रदक्षिणं कृत्वा नमस्कृत्वा जनार्दनम् ।
आचार्य्यः स्वगुरुं नत्वा जपेद्गुरुपरम्पराम् ॥
मातरं सर्वजगतां प्रपद्येत श्रियं ततः ।
त्वं माता सर्वलोकानां सर्वलोकेश्वरप्रिये ! ॥
अपराधशतैर्जुष्टं नम स्तेन मम च्युतम् ।
एवं प्रपद्य लक्ष्मीं तां श्रियं सद्गुरुभावतः ॥
नित्ययुक्तं तया देव्या वात्सल्यादिगुणान्वितम् ।
शरण्यं सर्वलोकानां प्रपद्येत सनातनम् ।
नारायण ! दयासिन्धो ! वात्सल्यगुणसागर ! ॥
एनं रक्ष जगन्नाथ ! बहुजन्मापराधिनम् ।
इत्याचार्येण सन्दिष्टः प्रपद्येत जनार्दनम् ॥

प्रपद्येत ततः शिष्यो गुरुमेव दयानिधिम्।
गुरो! त्वमेव मे देव स्त्वमेव परमा गतिः॥
त्वमेव परमो धर्म्म स्त्वमेव परमं तपः।
इति प्रपन्नमाचार्य्यो निवेश्य पुरतो हरेः॥
प्रागग्रेषु समासीनं दर्भेषु सुसमाहितः।
स्वाचार्यं पुरतो ध्यात्वा नमस्कृत्वाथ भक्तिमान्॥
गुरोः परम्परां जप्त्वा हृदि ध्यात्वा जनार्दनम्।
कृपया वीक्षितं शिष्यं दक्षिणं ज्ञानदक्षिणम्॥
निक्षिप्य हस्तं शिरसि वामं हृदि च विन्यसेत्।
पादौ गृहीत्वा शिष्यस्तु गुरोः प्रयतमानसः॥
भो! गुरो! ब्रूहि मन्त्रं मे ब्रूयादिति दयानिधे!।
अध्यापयेत्ततस्तस्मै मन्त्ररत्नं शुभाह्वयम्॥
सन्न्यासञ्च समुद्रञ्च सपिण्डोऽधिदैवतम्।
सार्थमध्यापयेच्छिष्यं प्रयतं शरणागतम्॥
अष्टाक्षरं द्वादशार्णं षट्कुक्षिं वैष्णवीं तदा।
रामकृष्णनृसिंहाख्यान् मन्त्रान् तस्मै निवेदयेत्॥
न्यासे वाप्यर्चने वापि मन्त्रमेकान्तिनं श्रयेत्।
अवैष्णवोपदिष्टेन मन्त्रेण नरकं व्रजेत्॥
अवैष्णवाद्गुरोर्म्मन्त्रं यः पठेद्वैष्णवो द्विजः।
कल्पकोटिसहस्राणि पच्यते नारकात्मना॥
अचक्रधारिणं यस्तु मन्त्रमध्यापयेद्गुरुः।
रौरवं नरकं प्राप्य चाण्डालीं योनिमाप्नुयात्॥
तस्माद्दीक्षाविधानेन शिष्यं भक्तिसमन्वितम्।
मन्त्रमध्यापयेद्विद्वान् वैष्णवं पापनाशनम्॥

अनधीत्य द्वयं मन्त्रं योग्यवैष्णवमुत्तमम् ।
अधीत्य मन्त्रसंसिद्धिं न प्राप्नोति न संशयः ॥
जातकर्म्मणि वा चौले तदा मौञ्जिनिबन्धने ।
चक्रस्य धारणं यत्र भवेत्तस्य तु तत्र वै ॥
उपनीय गुरुः शिष्यं गृह्योक्तविधिना ततः ।
अध्यापयेच्च सावित्रं तपोमन्त्रं द्वयं शुभम् ॥
प्राप्तमन्त्र स्ततः शिष्यः पूजयेच्छ्रद्धया गुरुम् ।
गोभूहिरण्यरत्नाद्यैः वासोभिर्भूषणैरपि ॥
सद्वृत्त्या शासयेच्छिष्यमाचार्य्यः संशितव्रतः ।
स्वरूपं साधनं साध्यं मन्त्रेणास्मै निवेदयेत् ॥
द्वयेन वृत्तियाथात्म्यं सम्यगस्मै निवेदयेत् ।
आचार्य्याधीनवृत्तिस्तु संयतस्तु वसेत् सदा ॥
कर्म्मणा मनसा वाचा हरिमेव भजेत् सुधीः ।
यावच्च तीरपातन्तु द्वयमावर्तयेत्सदा ॥
एवं हि विधिना सम्यङ्मन्त्रसंस्कारसंस्कृतः ।

॥ इति मन्त्रसंस्कारश्चतुर्थः ॥

मन्त्रार्थतत्त्वविदुषं यागतन्त्रे नियोजयेत् ।
पूर्व्वाह्णे पूजयेद्देवं तस्य प्रियतरं शुभः ॥
मन्त्ररत्नविधानेन गन्धपुष्पादिभिर्गुरुः ।
अर्चयित्वाच्युतं भक्त्या होमं पूर्ववदाचरेत् ॥
सर्वैश्च वैष्णवैः सूक्तैः पायसं घृतमिश्रितम् ।
आज्यं मन्त्रेण होतव्यं शतमष्टोत्तरं तदा ॥
शक्त्या च वैष्णवैर्मन्त्रैः सर्वैर्होमं समाचरेत् ।

एकैकमाहुतिं हुत्वा सर्वावरणदेवताः ॥
प्रणवादिचतुर्थ्यन्तै स्तेषां वै नामभिर्यजेत् ।
होमशेषं समाप्याथ वैष्णवान् भोजयेत्तदा ॥
मन्त्ररत्नेन तद्विम्बं पुष्पाञ्जलिशतं यजेत् ।
प्रणम्य भक्त्या देवेशं जप्त्वा मन्त्रमनुत्तमम् ॥
आहूय प्रणतं शिष्यं तद्विम्बं दर्शयेद्गुरुः ।
कृपयाथ ततस्तस्मै दद्याद्विम्बं हरे ! गुरुः ! ॥
एनं रक्ष जगन्नाथ ! केवलं कृपया तव ।
अर्चनं यत्कृतं तेन विभो ! स्वीकर्त्तुमर्हसि ॥
एवं लब्ध्वा गुरोर्विम्बं पूजयेत्तं प्रयत्नतः ।
हिरण्यवस्त्राभरणयानशय्यासनादिभिः ॥
ततः प्रभृति देवेशमर्च्चयेद्विधिना सदा ।
शीतस्मार्त्तागमोक्तानां ज्ञात्वान्यतममच्युतम् ॥
। इति वृद्धहारीतस्मृतौ विशिष्टधर्म्मशास्त्रे पञ्चसंस्कार-
विधानं नाम द्वितीयोऽध्यायः ॥

अम्बरीष उवाच ।
भगवन् ! सर्वमन्त्राणां विधानं मम सुव्रत ! ।
ब्रूहि सर्वमशेषेण प्रयोगं साथसंस्कृतम् ॥
हारीत उवाच ॥
शृणु राजन् ! प्रवक्ष्यामि मन्त्रयोग मनुत्तमम् ।
यथोक्तं विष्णुना पूर्वं ब्रह्मणा परमात्मना ॥
सर्वेषामेव मन्त्राणां प्रथमं गुह्यमुत्तमम् ।
मन्त्ररत्नं नृपश्रेष्ठ ! सद्यो मुक्तिफलप्रदम् ॥

सर्वैश्वर्य्यप्रदं पथ्यं सर्वेशं सर्व्वकामदम् ।
यस्योच्चारणमात्रेण परितुष्टो भवेद्धरिः ॥
देशकालादिनियममरिमित्रादिशोधनम् ।
स्वरवर्णादिदोषश्च पौरश्चरणकं न तु ॥
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रास्तथेतराः ।
तस्याधिकारिणः सर्वे सत्वशीलगुणा यदि ॥
पञ्चसंस्कारसम्पन्नाः श्रद्धावन्तोऽनसूयकाः ।
भक्त्या परमयाविष्टा युक्तास्तस्याधिकारिणः ॥
पञ्चविंशाक्षरो मन्त्रः पदैः षड्भिः समन्वितः ।
वाक्यद्वयं परं ज्ञेयं मन्त्ररत्नमनुत्तमम् ॥
यदाश्रयति विद्यादिः संश्रिता जगतां पतिम् ।
तया विद्याऽनपायिन्या संयुतः परमः पुमान् ॥
नारायणोऽच्युतः श्रीमान् वात्सल्यगुणसागरः ।
नाथः सुशीलः सुलभः सर्वज्ञः शक्तिमान् परः ॥
आपद्बन्धुः सदा नित्यं परिपूर्णमनोरथः ।
दयासुधाब्धिः सविता शौर्य्यवान् द्युतिमान् विभुः ॥
प्रपद्ये चरणौ तस्य शरणं श्रेयसे मम ।
श्रीमते विष्णवे नित्यं सर्वावस्थासु सर्व्वदा ॥
निर्ममो निरहङ्कारः कैङ्कर्यं करवाण्यहम् ।
एवमर्थं विदित्वैव पश्चान्मन्त्रं प्रयोजयेत् ॥
नारायणो महाशब्दो गायत्री च परा शुभा ।
स्वयं नारायणः श्रीमान् देवता समुदाहृतः ॥
करयोः स्तलयोराद्य मक्षरं विन्यसेद्द्विजः ।
शेषाक्षराणि देयानि चतुर्विंशतिपर्वसु ॥

षट्पदैरङ्गुलिन्यास मङ्गेषु च यथाक्रमम् ।
षडङ्गं षट्पदैः कृत्वा मन्त्रार्थैश्च यथाक्रमम् ॥
मूर्ध्नि भाले नेत्रनासाश्रवणेषु तथानने ।
भुजयोर्हृत्प्रदेशेच स्तनयोर्नाभिमण्डले ॥
पृष्ठे च जघने कट्योरूर्वोर्जान्वोश्च पादयोः ।
पञ्चविंशाक्षराख्यस्य क्रमेणाङ्गेषु विन्यसेत् ॥
एवं न्यासविधिं कृत्वा पश्चाद्ध्यानं समाचरेत् ।
इन्दीवरदलश्यामं कोटिसूर्य्याग्निवर्च्चसम् ॥
चतुर्भुजं सुन्दराङ्गं सर्वाभरणभूषितम् ।
पद्मासनस्थं देवेशं पुण्डरीकनिभेक्षणम् ॥
रक्तारविन्दसदृशदिव्यहस्तपदाम्बुजम् ।
माणिक्यमकुटोपेतं नीलकुन्तलशीर्षजम् ॥
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम् ।
दिव्यचन्दनलिप्ताङ्गं दिव्यपुष्पावतंसकम् ॥
हारकुण्डल केयूर नूपुरादिविराजितम् ।
कटकैरङ्गुरीयैश्च पीतवस्त्रेण शोभितम् ॥
शङ्खपद्मगदाचक्रपाणिनं पुरुषोत्तमम् ।
वामाङ्के चिन्तयेत्तस्य देवीं कमललोचनाम् ॥
तरुणीं सुकुमाराङ्गीं सर्वलक्षणशोभिताम् ।
दुकूलवस्त्रसंयुक्तां सर्वाभरणभूषिताम् ॥
तप्तकाञ्चनसङ्काशां पीतोन्नतपयोधराम् ।
रत्नकुण्डलसंयुक्तां नीलकुन्तलशीर्षजाम् ॥
दिव्यचन्दनलिप्ताङ्गीं दिव्यपुष्पावतंसकाम् ।
मातुलुङ्गं च रक्ताब्जं दर्पणं वरदं तथा ॥

देवीं च बिभ्रतीं दोर्भिश्चिन्तयेदिष्टदां सदा।
एवं ध्यात्वा परं नित्यमर्चयेदच्युतं द्विजः॥
यथात्मनि तथा देवे स्नानकर्म समाचरेत्।
अर्चयेदुपचारैश्च मनसा वा जनार्दनम्॥
आवाहनासने पाद्यमर्घ्यमाचमनीयकम्।
स्नानं वस्त्रोपवीते च भूषणं गन्धमेव च॥
पुष्पं धूपं तथा दीपं नैवेद्यं च प्रदक्षिणम्।
नमस्कारञ्च ताम्बूलं पुष्पमालां निवेदयेत्॥
नमस्कृत्वा गुरून् पश्चाज्जपेन्मन्त्रं समाहितः।
अष्टोत्तरसहस्रन्तु शतमष्टोत्तरं तथा॥
ध्यायन्वै मनसा देवं जपेदेकाग्रमानसः।
प्राङ्मुखोदङ्मुखो वापि समासीनः कुशासने॥
त्रिसन्ध्यासु जपेद्देवं सर्वसिद्धिमवाप्नुयात्।
आदावन्ते जपस्यास्य प्राणायामान् समाचरेत्॥
पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः।
वामेन पूरयेद्वायुं वाह्यं नासा जपन्मनुम्॥
उभाभ्यां धारणं वायोः कुम्भकं समुदाहृतम्।
तद्रेचनं दक्षिणेन रेचणं समुदाहृतम्॥
पर्यावृत्त्या पुनश्चैवं प्राणायामत्रयं क्रमात्।
पूरके कुम्भके चैव रेचके च विशेषतः॥
अष्टाविंशतिवारं तु जपन् मन्त्रं समाहितः।
उत्तमं मुनिभिः प्रोक्तं प्राणायामं नृपोत्तम!॥
जपन् द्वादशवारं तु उत्तमं तत्प्रकीर्तितम्।
षड्वारन्तु कनीयः स्यात्त्रिवार मधमं स्मृतम्॥

मनसैवार्चयेद्देवं पश्चादर्थं विचिन्तयेत् ।
प्राणायामत्रयं कृत्वा पश्चान्न्यासं समाचरेत् ॥
स्नात्वा शुक्लाम्बरधरः कृत्वा सन्ध्यादिकर्म च ।
धृतोर्द्धपुण्ड्रदेहश्च पवित्रकर एव च ॥
धृत्वा पद्माक्षमालां च सन्निधा वासने स्थितः ।
भूतशुद्धिविधानञ्च कृत्वा मन्त्रं प्रयोजयेत् ॥
अष्टाक्षरस्य मन्त्रस्य गुरुर्नारायणः स्मृतः ।
छन्दश्च दैवी गायत्री परमात्मा च देवता ।
जपश्चाष्टाक्षरो मन्त्रः सर्वपापप्रणाशनः ॥
सर्वदुःखहरः श्रीमान् सर्वकामफलप्रदः ।
सर्वदेवात्मको मन्त्र स्ततो मोक्षप्रदो नृणाम् ॥
ऋचो यजूंषि सामानि तथैवाथर्वणानि च ।
सर्वमष्टाक्षरान्तस्थं तच्चान्यदपि वाङ्मयम् ॥
सर्व्वार्थो वेदगर्भस्थः वेदाश्चाष्टाक्षरे स्थिताः ।
अष्टाक्षरस्तु प्रणवे अकारे प्रणवः स्थितः ॥
इह लौकिकमैश्वर्य्यं स्वर्गाद्यं पारलौकिकम् ।
कैवल्यं भगवत्त्वञ्च मन्त्रोऽयं साधयिष्यति ॥
सकृदुच्चारणान्नॄणां चतुर्वर्गफलप्रदम् ।
स्वरूपं साधनं प्राप्यं ददाति हि समञ्जसा ॥
महापापं चातिपापं विद्यते वोपपापकम् ।
जपादस्य मनोराशु प्रणश्यन्ति न संशयाः ।
अश्वमेधसहस्राणि राजसूयशतानि च ।
सकृदष्टाक्षरं जप्त्वा लभते नात्र संशयः ॥
गवामयुतदानस्य पृथिव्या मण्डलस्य च ।

कन्याशतसहस्रस्य गजाश्वानां तथैव च ॥
दानस्य यत्फलं नृणां तत्प्राप्ते नृपनन्दन ! ।
शतवारं मनुं जप्त्वा तत्फलं सर्वमाप्नुयात् ॥
सार्थं समुद्रं सन्न्यासं सर्षिच्छन्दोऽधिदैवतम् ।
अष्टाक्षरमनुञ्जप्त्वा विष्णुसायुज्यमाप्नुयात् ॥
पदत्रयात्मकं मन्त्रं चतुर्थ्या सहितं तदा ।
स्वरूपसाधनोपेयमिति मत्वा जपेद्बुधः ॥
प्रणवेन स्वरूपं स्यात् साधनं नमसा तथा ।
संविभक्त्या चतुर्थ्यात्र पुरुषार्थो भवेन्मनोः ॥
अकारश्चाप्युकारश्च मकारश्चेति तत्त्वतः ।
तान्येकदा समभवत्तदोमित्येतदुच्यते ॥
तस्मादोमिति प्रणवो विज्ञेयः साक्षरात्मकः ।
वेदत्रयात्मकं ज्ञेयं भूर्भुवःस्वरितीति वै ॥
अकारस्तु भवेद्विष्णुः स्वदृग्वेद उदाहृतः ।
उकारस्तु भवेल्लक्ष्मीर्यजुर्वेदात्मको महान् ॥
मकारस्तु भवेज्जीव स्तयोर्दास उदाहृतः ।
पञ्चविंशाक्षरः साक्षात् सामवेदस्वरूपवान् ॥
पञ्चविंशोऽयं पुरुषः पञ्चविंश आत्मेति श्रुतिः ।
आत्मा पञ्चविंशः स्यादिति ममात्मानं संस्मरेत् ॥
इत्यौपनिषदं ह्यर्थं विदित्वा स्वं निवेदयेत् ।
अवधारणमन्येतु मध्यमार्णं वदन्ति ह ॥
तदेवाग्नि स्तदायु स्तत्सूर्य स्तदपि चन्द्रमाः ।
इत्येवं धारणाश्रुतेरेवमेवोपबृंहितम् ॥
उकारेणैव श्रीशब्दः प्रोच्यते मुनिसत्तमैः ।

न्यायेन गुणसिद्धिस्तु तस्यैव श्रीपतेर्वरी ॥
श्रीरस्येशाना जगतो विष्णुपत्नीति वै श्रुतिः ।
कल्याणगुणसिद्धिस्तु लक्ष्मीभर्तुश्च नेतरा ॥
सामानाधिकरण्यत्वात्कारणत्वं तदोच्यते ।
अकार एव सर्वेषामक्षराणां हि कारणम् ॥
अकारो वै सर्वा वागित्यादि श्रुतिवचं स्तथा ।
स्पर्शोष्मभिर्व्यज्यमानो नानाबहुविधोऽभवत् ॥
कारणत्वं तथैवास्य विष्णोर्वै जगतां पतेः ।
तस्मात् स्रष्टा च दाता च विधाता जगतां हरिः ॥
रक्षिता जीवलोकस्य गुणवानेव सर्वगः ।
अनन्या विष्णुना लक्ष्मी र्भास्करेण प्रभा यथा ॥
लक्ष्मी मनुपगामिनीमिति श्रुतिवचो महत् ।
तस्मादकारो वै विष्णुः श्रीश एव जगत्पतिः ॥
लक्ष्मीपतित्वं तस्यैव नान्यस्येति सुनिश्चितम् ।
नित्यैवैषा जगन्माता हरेः श्रीरनपायिनी ॥
यथा सर्वगतो विष्णु स्तथैवैषा जगन्मयी ।
तस्मादकारो वै विष्णुर्लक्ष्मीभर्त्ता जगत्पतिः ॥
तस्मिंश्चतुर्थीयुक्तत्वात् त्रिपदस्य च संग्रहः ।
अकारप्रथमां तस्माच्चतुर्थीं संग्रहं ननु ॥
तच्च श्रुतिविरोधत्वान्न युक्तमिति चोदितम् ।
महसे ब्रह्मणे त्वा वै ओमित्यात्मानं युञ्जीत ॥
परस्य चात्मनां तस्माच्छेद स्तत्र सुनिश्चितः ॥
त्वमस्माकं तपस्यैव श्रुत्युक्तमपि पार्थिव ! ।
तौ शाश्वतौ विपश्चिता वियन्ताविति वै तथा ॥

ऋभिष्वदया प्रागेववात्मा न विश्वभृत्।
असोग्रमर्त्यो मर्त्येन नयेनेत्येवयोनिता॥
इत्यादि श्रुतयो भेदं वदन्ति परजीवयोः।
दास्यमेवात्मनां विष्णोः स्वरूपं परमात्मनः॥
साम्यं लक्ष्मीवरप्रोक्तं देवादीनां तथात्मनाम्।
अनन्यशेषरूपा वै जीवास्तस्य जगत्पतेः॥
दास्यं स्वरूपं सर्वेषामात्मनां सततं हरेः।
भगवच्छेषमात्मानमन्यथा यः प्रपद्यते॥
स चैव हि महापापी चण्डालः स्यात् नसंशयः।
तस्मान्मकारवाच्योऽसौ पञ्चविंशात्मकः पुमान्॥
अकारवाच्यस्येशस्य दास एवाभिधीयते।
अनुज्ञानाश्रयो नित्यो निर्विकारोऽव्ययः सदा।
देहेन्द्रियात् परो ज्ञाता कर्त्ता भोक्ता सनातनः॥
मकारवाच्यो जीवोऽसौ दास एव हरेः सदा।
शेषस्याकारवाच्यस्य विष्णोरस्य जगत्पतेः॥
स्वस्वामिनोरुकारेण ह्यवधारणमुच्यते।
स जीवः स्यादतः स्वामी सर्वदा नृपसत्तम!॥
अनयोर्नान्यथेत्युक्तमुकारेण महर्षिभिः।
इत्येवं प्रणवस्यार्थं प्रणवस्य पदस्य तु॥
आत्मनश्च स्वरूपत्वाद्विजेय नृपिसत्तमैः।
सर्वेषामेव मन्त्राणां कारणं प्रणवः स्मृतः॥
तस्माद्व्याहृतयो जातास्ताभ्यो वेदत्रयं तथा।
भूरित्येव हि ऋग्वेदो भुवरिति यजुस्तथा॥
स्वरिति सामवेदः स्यात्प्रणवो भूर्भुवःसुवः।

भूर्विष्णुश्च तदा लक्ष्मीर्भुव इत्यभिधीयते ॥
तयोः स्वरिति जीवस्तु सव इत्यभिधीयते ।
अग्निर्वायु स्तथा सूर्य्यस्तेभ्य एव हि जज्ञिरे ॥
य एता व्याहृतीर्हुत्वा सर्वं वेदं जुहोति वै ।
प्रसङ्गात्महितं चेदं मन्त्रशेषमुदीर्य्यते ॥
अस्वातन्त्र्यात्तु जीवानामधीनं परमात्मनः ।
नमसा प्रोच्यते तस्मान्नहन्ताममतोऽर्पितम् ॥
स्वरूपादित्रिवर्गस्य संसिद्धिर्नैतु सैव हि ।
नमसा रहितं सर्वं विफलं सम्प्रकीर्त्तितम् ॥
नमसैव हि संसिद्धिर्भवेदत्र न संशयः ।
पुरतः पृष्ठतश्चैव पार्श्वतश्चावशेषतः ।
नमसैवेच्यते राजन् ! त्रिवर्गः सर्वदेहिनाम् ॥
मकारेण स्वतन्त्रः स्यान्नरकस्तं निषिध्यति ।
तस्माच्च नम इत्यत्र स्वातन्त्र्यमपनोदति ॥
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरस्तु हि शाश्वतम् ।
ममेति द्व्यक्षरं मृत्युर्नममेति तु शाश्वतम् ॥
न ममेति च सर्वत्र स्वातन्त्र्यरहिताय वै ।
युज्यते मुनिभिः सम्यक् सर्वकर्मसु पार्थिव ! ॥
तस्मात्तु नमसा युक्ता मन्त्राः सर्वे च पार्थिव ! ।
सर्वसिद्धिप्रदा नृणां भवन्त्यत्र न संशयः ।
नमसा रहिता येतु न तु मुक्तिप्रदा नृणाम् ॥
तस्मात्तु नमसैवैषां पारतन्त्र्यत्वमीशितुः ।
पारतन्त्र्याल्लभेत् सिद्धिं स्वातन्त्र्यान्नाशमेष्यति ॥
दास्यमेव हि जीवानां प्रोच्यते नमसैव तु ।

नमसा रहितं लोके किञ्चिदत्र न विद्यते॥
नमो देवेभ्यो नम इति येषामीशे तथा मनः।
हतच्छिदेनो नमसा अविवाक्येति वै श्रुतिः॥
अयैरकारः सम्प्रोक्तो नकारस्तं निषिध्यति।
तस्मात्तु नर इत्येव नित्यत्वेनोच्यते जनः॥
नारा इति समूहत्वे बाहुल्यत्वाज्जनस्य च।
तेषामयनमावासस्तेन नारायणः स्मृतः॥
महाभूतान्यहङ्कारो महदव्यक्तमेव च।
अण्डं तदन्तर्गता ये लोकाः सर्वे चतुर्दश॥
चतुर्व्विधशरीराणि कालः कर्मेति वै जगत्।
प्रवाहरूपेणैवैषां नारत्वेनोच्यते बुधैः॥
तेषामपि निवासत्वान्नारायण इतीरितः।
अन्तर्वहिश्च जगतो धाता सच सनातनः॥
स्रष्टा नियन्ता शरणं विधाता भूतभावनः।
माता पिता सखा भ्राता निवासश्च सुहृद्गतिः॥
योनी श्रियः श्रीः परमस्तेन नारायणः स्मृतः।
नराणां सर्वजगतामयनं शरणं हरिः॥
तस्मान्नारायण इति मुनिभिः सम्प्रकीर्त्यते।
सर्वेषु देशकालेषु सर्वावस्थासु सर्वदा॥
तस्यैव किङ्करोऽस्मीति चतुर्थी परमात्मनः।
भगवत्परिचर्यैव जीवानां फलमुच्यते॥
तद्विना किं शरीरेण यातनस्य जनस्य तु।
यस्मिन् शरीरे जीवानां न दास्यं परमात्मनः॥
तदेव निरयं प्रोक्तं सर्वदुःखफलं भवेत्।

दास्यमेव फलं विष्णोर्दास्यमेव परं सुखम् ॥
दास्यमेव हरेर्मोक्षं दास्यमेव परं तपः ।
ब्रह्माद्याः सकला देवा वशिष्ठाद्या महर्षयः ।
काङ्क्षन्तः परमं दास्यं विष्णोरेव यजन्ति तम् ॥
तस्माच्चतुर्थी मन्त्रस्य प्रधानं दास्यमुच्यते ।
न दास्यवृत्ति जीवानां नाशहेतुः परस्य हि ॥
इत्थं सञ्चिन्त्य मन्त्रार्थं जपेन्मन्त्रमतन्द्रितः ।
अविदित्वा मनोरर्थं जपेत् प्रयतमानसः ॥
न संसिद्धिमवाप्नोति स्वरूपञ्च न विन्दति ।
संसारञ्च समुद्रञ्च सर्षिचण्डोऽधि दैवतम् ॥
साङ्गं न यज्ञं सज्ञानं मन्त्रमेवम्प्रपूजयेत् ।
नारायणार्षं गायत्री देवी चन्द्रोऽधिदेवता ॥
परमात्मा च लक्ष्मीशो विष्णुरेवाच्युतो हरिः ।
प्रणवस्तु भवेद्वीजं चतुर्थी शक्तिरुच्यते ॥
क्रुद्धोल्काय महोल्काय विष्णूल्काय तथैव च ।
जाल्काय सहस्रोल्काय पञ्चाङ्गो न्यास उच्यते ॥
हृन्मूर्ध्नोश्च शिखायाञ्च कवचो नेत्रयोर्न्यसेत् ।
पञ्चाङ्गन्यासमित्युक्तं सर्वमन्त्रेषु वैष्णवैः ॥
यदा त्रयेण कुर्वीत षडङ्गं तु यथाक्रमम् ।
मूर्ध्न्यानने च हृदये भुजयोर्जघने तथा ॥
पृष्ठे च जान्वोः पदयोर्मन्त्रार्णानि यदा न्यसेत् ।
अष्टाक्षराण्यष्टदिक्षु क्रमेण तदनन्तरम् ॥
नासिकायां तथाक्ष्णोश्च श्रोत्रयोराननै तथा ।
कण्ठे च स्तनयोर्नाभौ गुह्ये च तदनन्तरम् ॥

अचक्राय विचक्राय सुचक्राय तथैव च ।
ज्वालामहासुचक्राय त्रैलोक्याय तदन्तरम् ॥
आधारकालचक्राय दशदिक्षु यथाक्रमम् ।
स्वाहान्तं प्रणवाद्यन्तं न्यसेच्चक्राणि वैष्णवः ॥
एवन्न्यासविधिं कृत्वा पश्चाद्ध्यानं समाचरेत् ।
हृदये प्रतिमायां वा जले सवितृमण्डले ॥
वह्नौ च स्थण्डिले स्वापे चिन्तयेद्विष्णुमव्ययम् ।
बालार्ककोटिसङ्काशं पीतवस्त्रं चतुर्भुजम् ॥
पद्मपत्रविशालाक्षं सर्वाभरणभूषितम् ।
चक्रमब्जं गदां शङ्खं चतुर्दोर्भिर्धृतं तथा ॥
श्रीभूमिसहितं देवमासीनं परमासने ।
तत्र चाधारशक्त्याद्यैर्धर्माद्यैः सूरिभिर्धृतैः ॥
दिव्यरत्नमये पीठे पङ्कजेऽष्टदले शुभे ।
तत्कर्णिकोपरितले तप्तकाञ्चनसन्निभे ॥
देवीभ्यां सहितं तस्मिन्नासीनं पङ्कजासने ।
चिन्तयेद्दक्षिणे पार्श्वे लक्ष्मीं काञ्चनसन्निभाम् ॥
पद्महस्तविशालाक्षीं दुकूलवसनां शुभाम् ।
वामे दूर्वादलश्यामां विचित्राम्बरभूषिताम् ॥
चिन्तयेद्धरणीं देवीं नीलोत्पलधरां शुभाम् ।
महिष्यष्टदलाग्रेषु चिन्तयेद्धृतचामराम् ॥
एवं ध्यात्वा हरिं नित्यं जपेत्प्रयतमानसः ।
स्नातः शुक्लाम्बरधरः कृतकृत्यो यथाविधि ॥
धृतोर्द्ध्वपुण्ड्रदेहश्च पवित्रकर एव च ।
शुचिः कृष्णाजिनासीनः प्राणायामी च न्यासकृत् ॥

शङ्खचक्रगदाखड्‌गशार्ङ्गं पद्मान्यनुक्रमात्।
तार्क्ष्यञ्च वनमालाञ्च मुद्रा अष्टौ प्रपूजयेत्॥
पश्चात् ध्यात्वा जगन्नाथं मनसैवार्चयेद्विभुम्।
गन्धपुष्पादि सकलं मन्त्रेणैव निवेदयेत्॥
अनेनाभ्यर्चितो विष्णुः प्रीतो भवति तत्‌क्षणात्।
अयुतं वा सहस्रं वा त्रिसन्ध्यासु जपेन्मनुम्।
विष्णोः समानरूपेण शाश्वतं पदमाप्नुयात्॥
आयुष्कामो जपेन्नित्यं षण्मासं नियतेन्द्रियः।
अयुतं तु जपेन्मन्त्रं सहस्रं जुहुयाद् घृतम्॥
आयुर्निरामयं सम्पद्भवेद्वर्षशताधिकम्।
विद्याकामो जपेद्वर्षं त्रिसन्ध्यास्वयुतं मनुम्॥
जुहुयाद्विमलैः पुष्पैः सहस्रं नियतेन्द्रियः।
अष्टादशानां विद्यानां भवेद्व्याससमो द्विजः॥
विवाहार्थी जपेन्नित्यमेवं वर्षचतुष्टयम्॥
राजहोमी सहस्रं तु लभेत्कन्यां सुशोभिताम्।
सम्पत्कामो जपेन्नित्यं त्वयुतं वत्सरत्रयम्॥
पद्मैर्वा पद्मपत्रैर्वा तथा होमी श्रियं लभेत्।
भूकामी तु जपेन्नित्यं वत्सरं त्रिजितेन्द्रियः॥
दूर्वाभिर्जुहुयात्तद्वल्लभेद्भूमिमभीप्सिताम्।
राज्यकामो जपेन्नित्यं षडब्दं त्वयुतं तथा॥
सहस्रं जुहुयात् नित्यं पायसं घृतमिश्रितम्।
चक्रवर्त्ती भवेत् सद्यः पद्माभर्त्तुः प्रसादतः॥
द्वादशाब्दं जपेदेवं सततं विजितेन्द्रियः।
आत्महोमी तु यो नित्यमिन्द्रत्वं लभते नरः॥

लक्षञ्जपेच्च यो नित्यं त्रिंशद्वर्षं जितेन्द्रियः।
ब्रह्मत्वं वा शिवत्वं वा समाप्नोति न संशयः॥
यावज्जीवं तु यो नित्यमयुतं सुसमाहितः।
सहस्रं वा शतं वापि होतव्यं वह्निमण्डले॥
आज्येन चरुणा वापि तिलैर्वा शर्करान्वितैः।
पद्मै र्वा बिल्वपत्रै र्वा समिद्भिः पिप्पलस्य वा।
कोमलैस्तुलसीपत्रैरर्चयित्वा सनातनम्॥
अनन्तविहगेशानां क्षिप्रमन्यतमो भवेत्।
किमत्र बहुनोक्तेन सर्वसिद्धिप्रदो नृणाम्॥
श्रीमदष्टाक्षरो मन्त्रो नित्यप्रियतमो हरेः।
आसीनो वा शयानो वा तिष्ठन्वा यत्र कुत्रचित्॥
जपेदष्टाक्षरं मन्त्रं तस्य विष्णुः प्रसीदति।
संस्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः॥
अभितः सर्वदेवानां यो जपेत्सततं मनुम्।
ब्रह्मघ्नो वा कृतघ्नो वा महापापयुतोऽपि वा॥
अष्टाक्षरस्य जप्तारं दृष्ट्वा पापैः प्रमुच्यते।
अष्टाक्षरस्य जप्तारो यथा भागवतोत्तमाः॥
पुनन्ति सकलं लोकं सदेवासुरमानुषम्।
अष्टाक्षरस्य जप्तारं प्रणमेद्यस्तु भक्तितः॥
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते।
अचिन्त्यमेतन्माहात्म्यं मनोरस्य जगत्पतेः॥
न हि वक्तुं मया शक्यं ब्रह्मादित्रिदशैरपि।
अथ वक्ष्यामि माहात्म्यं द्वादशार्णस्य पार्थिव!॥
यस्योच्चारणमात्रेण द्वादशाब्दफलं लभेत्।

नमो भगवते नित्यं वासुदेवाय शार्ङ्गिणे ॥
प्रणवेन समायुक्तं द्वादशार्णमनुं जपेत्।
पूर्ववत्प्रणवस्यार्थं नमसश्च महामते॥
ऐश्वर्यं च तथा वीर्यं तेजः शक्तिरनुत्तमा।
ज्ञानं बलं यदेतेषां षण्णां भगवदीरितः॥
एभिर्गुणैः पूर्ववाक्यैः स एव भगवान् हरिः।
नित्या च या भगवती प्रोच्यते मुनिसत्तमैः॥
ऐश्वर्यरूपा सा देवी सुभगा कमलालया।
ईश्वरी सर्वजगतां विष्णुपत्नी सनातनी॥
तस्याः पतित्वा धीशस्य भगवानिति चोच्यते।
तस्मात् तु भगवान् श्रीमानेकार्थो मुनिभिः स्मृतः॥
भगवानिति शब्दोऽयं तथा पुरुषइत्यपि।
निरुपाधी च वर्तेत वासुदेवेऽखिलात्मनि॥
वक्ष्यन्ति केचिद्भगवान् ज्ञानवानिति सत्तमाः।
तद्वासुदेवेनोक्तं स्यात्सामान्यत्वात्ततोऽन्यथा॥
तस्मात्कल्याणगुणवान् श्रीमान् योऽसौ जगत्पतिः।
स एव भगवान् विष्णुर्वासुदेवः सनातनः॥
भगवते श्रीमते चेत्येकार्थो हि प्रोच्यते बुधैः।
गुणवान् भगवानेव सृष्टिस्थितिविनाशकृत्॥
द्वौ द्वौ गुणावधिष्ठाय सर्वाद्यमकरोत्प्रभुः।
प्रद्युम्नश्चानिरुद्धश्च सङ्कर्षण इतीरितः॥
भगवान् वासुदेवोऽसौ सृष्ट्याद्यमकरोत् स्वयम्।
ऐश्वर्यवीर्यवान् सर्गं प्रद्युम्नः पर्यपद्यत॥
तेजःशक्तिं समाविश्य अनिरुद्धो ह्यपालयत।

बलज्ञाने तथा द्वे तु सङ्कर्षणो ह्यधिष्ठितः ॥
अकरोद्भगवानेव संहारं जगतः पुनः ।
एवं षड्गुणपूर्णत्वात् पतित्वात्त्वपि च श्रियः ॥
सर्गादेः कारणत्वाच्च भगवानिति चोच्यते ।
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ॥
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ।
चतुर्थी पूर्वविद्विद्यात् कैङ्कर्यार्थं महात्मनः ॥
एवं ज्ञात्वा मनोरर्थं द्वादशार्णस्य चक्रिणः ।
स सिद्धिं परमाप्नोति सम्यगावर्त्य चेतसा ॥
गत्वा गत्वा निवर्तन्ते सर्वक्रतुफलैरपि ।
तद्गत्वा न निवर्तन्ते द्वादशाक्षरचिन्तकाः ॥
द्वादशार्णं सकृज्जप्त्वा सर्वपापैः प्रमुच्यते ।
ब्रह्महत्यादिपापानि तत्संसर्गकृतानि च ॥
द्वादशार्णं मनोर्जप्तॄन् दहत्यग्निरिवेन्धनम् ।
सर्वसौभाग्यसुखदं पुत्रपौत्राभिवर्द्धनम् ॥
सर्वकामप्रदं नृणामायुरारोग्यवर्द्धनम् ।
देवत्वममरेशत्वं शिवब्रह्मत्वमेव च ॥
द्वादशार्णं मनुं जप्त्वा समाप्नोति न संशयः ।
दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकोऽपि वा ॥
द्वादशार्णमनुं जप्त्वा विष्णुसायुज्यमाप्नुयात् ।
प्रजापतिः कश्यपश्च मनुः स्वायम्भुवस्तथा ॥
सप्तर्षयो घृतश्चेति ऋषयस्तस्य कीर्त्तिताः ।
वशिष्ठः कश्यपोऽत्रिश्च विश्वामित्रश्च गौतमः ॥
जमदग्निर्भरद्वाजस्त्वेते सप्त ह्यर्षयः ।

भगवान् वासुदेवो वै देवतास्य प्रकीर्त्तितः॥
छन्दश्च परमा दैवी गायत्री समुदाहृता।
साधकानां सदा राजन्! कामधेनुरितीरितः॥
दशाङ्गुलीषु तलयोर्द्वादशार्णानि विन्यसेत्।
पदैश्चतुर्भिरङ्गेषु विन्यसेत्तदनन्तरम्॥
चतुरङ्गेषु विन्यस्य मन्त्रेणोत्तरयोर्द्वयोः।
मूर्द्ध्नास्ये नेत्रयोर्नासाकर्णयोर्भुजयो स्तथा।
हृदि कुक्षौ तथा गुह्ये ऊर्वोर्जान्वोश्च पादयोः॥
मन्त्रार्णानि तु विन्यस्य क्रमेणैव नृपोत्तम!।
अचक्राय विचक्राय सुचक्राय तथैव च॥
तथा त्रैलोक्यचक्राय महाचक्राय वै तथा।
असुरान्तकचक्राय स्वाहान्तं प्रणवादिकम्॥
हृदयादिषडङ्गेषु यथाशास्त्रं प्रयोजयेत्।
क्षीराब्धौ शेषपर्य्यङ्के समासीनं श्रिया सह॥
नीलजीमूतसङ्काशं तप्तकाञ्चनभूषणम्।
पीताम्बरधरं देवं रक्ताब्जदललोचनम्॥
दीर्घैश्चतुर्भिर्दोर्भिश्च सर्वाभरभूषितैः।
शङ्खचक्रगदाशार्ङ्गान् बिभ्राणं परमेश्वरम्॥
नानाकुसुमसम्बन्धनीलकुन्तलशीर्षजम्।
श्रीवत्सकौस्तुभोरस्कं वनमालाविभूषितम्॥
समाश्लिष्टं श्रिया दिव्या पद्मया पद्महस्तया।
स्तूयमानं विमानस्थैर्देवगन्धर्वकिन्नरैः॥
मुनिभिः सनकाद्यैश्च सेवितञ्च सुरर्षिभिः।
एवं ध्यात्वा हरिं नित्यं जपेन्मन्त्रं समाहितः॥

अर्चयित्वा हृषीकेशं सुगन्धकुसुमैः सदा ।
सालग्रामादिकस्थानेष्वर्च्यमानं जपेद् बुधः ॥
जपित्वा दशसाहस्रं यावज्जीवं समाहितः ।
वैष्णवं पदमाप्नोति पुनरावृत्तिवर्जितम् ॥
आयुष्कामो जपेन्नित्यं वत्सरं विजितेन्द्रियः ।
संख्या द्वादशसाहस्रं होमं तिलसहस्रकम् ॥
लभेतायुः शतसमा दुःखरोगविवर्जितम् ।
विवाहकामो षण्मासं जपेन्नित्यं जितेन्द्रियः ॥
आज्यहोमी सहस्रन्तु लभेत्कन्यां सलक्षणाम् ।
सम्पत्कामो जपेन्नित्यं वत्सरन्तु सहस्रशः ॥
साज्यैश्च व्रीहिभिर्होमी सहस्रं श्रियमाप्नुयात् ।
राज्यमिन्द्रपदं वापि शिवत्वं ब्रह्मतामपि ॥
बहुकालं बिल्वपत्रैः कमलैर्वा जपेन्मनुम् ।
जुहुयाच्च जपेन्नित्यं तत्तत्प्राप्नोत्यसंशयम् ॥
यं यं कामयते चित्ते तत्र तत्र नृपोत्तम ! ।
जुहुयान्मालतीपुष्पैरयुतं विजितेन्द्रियः
तां तां सिद्धिमवाप्नोति पदं चाप्नोति वैष्णवम् ।
द्वादशार्णेन मनुना पक्षे पक्षे द्विजोत्तमः ॥
द्वादश्यां पूजयेद्विष्णुं कोमलैः तुलसीदलैः ।
विष्णुतुल्य वपुः श्रीमान् ! मोदते परमे पदे ॥
द्वादशार्णमनोरेवं विधानं प्रोच्यते नृप ! ।
अद्य ते सम्प्रवक्ष्यामि षडक्षरमनोरिदम् ॥
विधानं सर्वफलदं जन्ममृत्युविकृन्तनम् ।
ॐ।नमो विष्णवे चेति षड़क्षर मुदाहृतम् ॥

पूर्ववत्प्रणवस्यार्थं नमःशब्द उदाहृतः ।
व्याप्तत्वाद्व्यापकत्वाच्च विष्णुरित्यभिधीयते ॥
सदैकरूपरूपत्वात् सर्व्वात्मत्वाद्विभुत्वतः ।
अनामयत्वादीशत्वाद्भस्त्रत्वाद्दृष्णित्वतः ।
यथेष्टफलदातृत्वाद्विष्णुरित्यभिधीयते ॥
णकारो बलमित्युक्तः षकारः प्राण उच्यते ।
तयोस्तु सङ्गतिर्यत्र तदात्मेत्युच्यते श्रुतिः ।
तस्मात्सकारषकारावनुसंहितमुत्तमम् ।
सप्राणं सबलं देव ! संहितामुत्तमां तु यः ॥
तस्यैवायुष्यमित्युक्तं नेतरस्यैव च श्रुतेः ।
एतदेव हि विद्वांसो वच्यन्ते ये महर्षयः ॥
एवं वच्यामहे किन्तु किमुत व्यामहे वयम् ।
इमौ णकारषकारावसुसंहितमेति यत् ॥
तदेव विष्णुः कृष्णेति जिष्णुरित्यभिधीयते ।
विष्णवे नम इत्येष मन्त्रः सर्वफलप्रदः ॥
ऐश्वर्यं तु विकारः स्यात्तादात्म्यात्तद्वयं स्मृतम् ।
ऐश्वर्य्यद्वयवीजं स्याद्विष्णुमन्त्रमनुत्तमम् ॥*
तत् षडर्णविधानेन केवलं वै जपेमहि ।
इत्युक्त्वा मुनयः सर्वे वेदवेदान्तपारगाः ॥
परित्यज्येतरं धर्मं तदेकशरणं गताः ।
एवं महामनुं जप्त्वा विधानेनाच्युतं गताः ॥
तस्मादेतन्महामन्त्रं सर्वसिद्धिप्रदं नृप ! ।
सकृदुच्चारणेनास्य हरिस्तत्र प्रसीदति ॥
ब्रह्माद्याः सनकाद्याश्च मुनयश्च जपन्ति हि ।

च्छन्दस्तु तस्य गायत्री देवता विष्णुरच्युतः॥
स्यादोम्बीजं नमः शक्तिर्मनोरस्य प्रकीर्तितम्।
त्रिभिः पदैः षडङ्गेषु यथासंख्यं सुविन्यसेत्॥
अङ्गुलीष्वपि चाङ्गेषु मन्त्रार्णानि यथाक्रमात्।
मूर्ध्न्यास्ये हृदये वाह्वोः पृष्ठे गुह्ये यथाक्रमम्॥
विन्यस्य चक्रन्यासं च पश्चाद्ध्यानेषु तन्मयम्।
प्रणवेनोन्मुखीकृत्य हृत्पङ्कजमधोमुखम्॥
विकासयेच्च मन्त्रेण विमलं तस्य केशरम्।
तस्योपरि च वह्न्यर्कसोमविम्बानि चिन्तयेत्॥
तत्र रत्नमयं पीठं तन्मध्येऽष्टदलाम्बुजम्।
तस्मिन् कोटिशशाङ्काभं सर्वलक्षणलक्षितम्॥
चतुर्भुजं सुन्दराङ्गं युवानं पद्मलोचनम्।
कोटिकन्दर्पलावण्यं नीलभ्रूलतिकालकम्॥
श्लक्ष्णनासं रक्तगण्डं विम्बितोज्ज्वल कुण्डलम्।
शङ्खचक्रगदापद्मधारणं दोर्भिरुज्ज्वलैः॥
केयूराङ्गदहाराद्यैर्भूषणैश्चन्दनैरपि।
अलङ्कृतं गन्धपुष्पै रक्तहस्ताङ्घ्रिपङ्कजम्॥
मुक्ताफलाभदन्तालिं वनमालाविभूषितम्।
श्रीवत्सकौस्तुभोरस्कं दिव्यपीताम्बरं हरिम्॥
तप्तकाञ्चनवर्णाभं पद्मया पद्महस्तया।
समाश्लिष्टममुं देवं ध्यात्वा विष्णुमयो भवेत्॥
मनसैवोपचाराणि कृत्वा मन्त्रं जपेत्ततः।
त्रिसन्ध्यासु जपेन्नित्यं सहस्रं साष्टकं द्विजः॥
विष्णोर्लोकमवाप्नोति पुनरावृत्तिवर्जितम्।

पूर्वं तज्जपहोमाज्यं कृत्वा सिद्धिं न्वरलभे: ॥
भगवत्सन्निधौ वापि तुलसीकाननेऽपि वा ।
समाहितमना जप्त्वा षडर्णं नियतेन्द्रियः ॥
तिलहोमायुतं कृत्वा सर्वसिद्धिमवाप्नुयात् ।
एवं विष्णुमनोः प्रोक्तं विधानं नृपसत्तम ! ॥
विधानैरधुनामुष्य मन्त्रस्यापि ब्रवीमि ते ।
षडक्षरं दाशरथेस्तारकब्रह्म कथ्यते ॥
सर्वैश्वर्यप्रदं नृणां सर्वकामफलप्रदम् ।
एतमेव परं मन्त्रं ब्रह्मरुद्रादिदेवताः ॥
ऋषयश्च महात्मानो मुक्ता जप्त्वा भवाम्बुधौ ।
एतन्मन्त्रमगस्त्यस्तु जप्त्वा रुद्रत्वमाप्नुयात् ॥
ब्रह्मत्वं काश्यपो जप्त्वा कौशिकस्त्वमरेशताम् ।
कार्त्तिकेयो मनुत्वञ्च इन्द्रार्कौ गिरिनारदौ ॥
बालखिल्यादिमुनयो देवतात्वं प्रपेदिरे ।
एष वै सर्वलोकानामैश्वर्यस्यैव कारणम् ॥
इममेव जपेन्मन्त्रं रुद्रस्त्रिपुरघातकः ।
ब्रह्महत्यादि निर्मुक्तः पूज्यमानोऽभवत् सुरैः ॥
अद्यापि काश्यां रुद्रस्तु सर्वेषां त्यक्तजीविनाम् ।
दिशत्येतन्महामन्त्रं तारकब्रह्मनामकम् ॥
तस्य श्रवणमात्रेण सर्व एव दिवं गताः ।
श्रीरामाय नमो ह्येष तारकब्रह्मनामकः ॥
नाम्नां विष्णोः सहस्राणां तुल्यएव महामनुः ।
अनन्तो भगवन्मन्त्रो नानेव तु समाः कृताः ।
श्रियो रमणसामर्थ्यात्सौकर्यगुणगौरवात् ॥

श्रीराम इति नामेदं तस्य विष्णोः प्रकीर्त्तितम् ।
रमया नित्ययुक्तत्वाद्राम इत्यभिधीयते ॥
रकारमैश्वर्यबीजं मकारस्तेन संयुतः ।
अवधारणयोगेन रामेत्यस्मान्मनोः स्मृतः ॥
शक्तिः श्री रुच्यते राजन् ! सर्व्वाभीष्टफलप्रदा ।
श्रियो मनोरमो योऽसौ स राम इति विश्रुतः ॥
चतुर्थ्यां नमसश्चैव सोऽर्थः पूर्ववदेव हि ।
ब्रह्मा विष्णुश्च रुद्रश्च अगस्त्याद्या महर्षयः ॥
छन्दश्च परमा दैवी गायत्री समुदाहृता ।
श्रीरामो देवता प्रोक्तः सर्वैश्वर्यप्रदो हरिः ॥
अङ्गुलीष्वपि चाङ्गेषु न्यासकर्माग्निबीजतः ।
मूर्ध्न्यास्ये हृदये पृष्ठे गुह्ये चरणयोस्तथा ॥
वैष्णवाच्च गुरोः पञ्चसंस्कारविधिपूर्वकम् ।
अधीत्य मन्त्रं विधिना पश्चाद्देवं जपेद्बुधः ॥
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रास्तथेतराः ।
मन्त्राधिकारिणः सर्वे ह्यनन्यशरणा यदि ॥
स्नानादिकृतकृत्यः सन्नूर्ध्वपुण्ड्रः पवित्रधृत् ।
कृष्णाजिने समासीनः प्राणायामी च न्यासकृत् ॥
ध्यायेत्कमलपत्राक्षं जानकीसहितं हरिम् ।
नैव ध्यानं प्रकुर्वीत विग्रहे सति शार्ङ्गिणः ॥
चन्दनागुरुकर्पूरवासिते रत्नमण्डपे ।
वितानैः पुष्पमालाद्यैर्धूपैर्दिव्यैर्विराजिते ॥
तन्मध्ये कल्पवृक्षस्य छायायां परमासने ।
नानारत्नमये दिव्ये सौवर्णे सुमनोहरे ॥

तस्मिन् बालार्कसङ्काशे पङ्कजेऽष्टदले शुभे ।
वीरासने समासीनं वामाङ्कश्रितसीतया ॥
सुस्निग्धशाद्वलश्यामं कोटिवैश्वानरप्रभम् ।
युवानं पद्मपत्राक्षं कनकाम्बरशोभितम् ॥
सिंहस्कन्धानुरूपांसं कम्बुग्रीवं महाहनुम् ।
पीनवृत्तायतस्निग्धमहाबाहुचतुष्टयम् ॥
विशालवक्षसं रक्तहस्तपादतलं शुभम् ।
बन्धूकस्मितमुक्ताभदन्तौष्ठद्वयशोभितम् ॥
पूर्णचन्द्राननं स्निग्धं भ्रूयुगं घननासिकम् ।
रम्भोरुद्वयमानीलकुन्तलं स्मितचन्दनम् ॥
तरुणादित्यसङ्काशकुण्डलाभ्यां विराजितम् ।
हारकेयूरकटकैरङ्गुलीयैश्च भूषणैः ॥
श्रीवत्सकौस्तुभाभ्याञ्च वैजयन्त्या विभूषितम् ।
हरिचन्दनलिप्ताङ्गं कस्तुरीतिलकाञ्चितम् ॥
शङ्खचक्रधनुर्बाणान् बिभ्राणं दोर्भिरायतैः ।
वामाङ्के सुस्थितां देवीं तप्तकाञ्चनसन्निभाम् ॥
पद्माक्षीं पद्मवदनां नीलकुन्तलशीर्षजाम् ।
आरूढयौवनां नित्यां पीनोन्नतपयोधराम् ॥
दुकूलवस्त्रसम्वीतां भूषणैरुपशोभिताम् ।
भज तां कामदां पद्महस्तां सीतां विचिन्तयेत् ॥
लक्ष्मणं पश्चिमे भागे धृतच्छत्रं महाबलम् ।
पार्श्वे भरतशत्रुघ्नौ बालव्यजनपाणिनौ ॥
अग्रतस्तु हनूमन्तं बद्धाञ्जलिपुटं तथा ।
सुग्रीवं जाम्बवन्तञ्च सुषेणञ्च विभीषणम् ॥

नीलं नलञ्चाङ्गदञ्च ऋषभं दिक्षु पूजयेत् ॥
वशिष्ठो वामदेवश्च जाबालिरथ कश्यपः ॥
मार्कण्डेयश्च मौद्गल्य स्तथा पर्वतनारदौ ।
द्वितीयावरणं प्रोक्तं रामस्य परमात्मनः ॥
धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः ।
अलको धर्मपालश्च सुमन्तुश्चाष्टमन्त्रिणः ॥
तृतीयावरणं तस्य तत्र चन्द्रादिदेवताः ।
कुमुदाद्याश्च चण्डाद्या विमाने चान्तरीयकाः ॥
एवं ध्यात्वा जगन्नाथं पूजयेन्मनसाऽपि वा ।
षट्सहस्रं जपेन्मन्त्रं जुहुयाच्च सहस्रकम् ॥
जुहुयाच्चरुणा वापि शतं पुष्पाञ्जलिं न्यसेत् ।
एवं संपूज्य देवेशं यावज्जीवमतन्द्रितः ॥
तद्देहपतने तस्य सारूप्यं परमे पदे ।
विद्या स्त्री राज्यवित्ताद्यं यं यं कामयते हृदि ॥
अन्यं देवं नमस्कृत्वा सर्वसिद्धिमवाप्नुयात् ।
विना वै वैष्णवं मन्त्रमन्यमन्त्रान्विसर्जयेत् ॥
तमेव पूजयेद्रामं तन्मन्त्रं वै जपेत् सदा ।
अन्यथा नाशमाप्नोति इह लोके परत्र च ॥
अद्वितीयं यदा मन्त्रं तारकब्रह्मनामकम् ।
जपित्वा सिद्धिमाप्नोति अन्यथा नाशमाप्नुयात् ॥
सावित्री मन्त्ररत्नञ्च तथा मन्त्रद्वयं शुभम् ।
सर्वमन्त्रं जपेत् पूर्वं संसिध्यर्थं जपेत् सदा ॥
अजपेत्रतान्महामन्त्रान्न तु संसिद्धिमाप्नुयात् ।
तस्माच्छक्त्या जपित्वैतान् पश्चान्मन्त्रं प्रयोजयेत् ॥

विद्यास्त्रीवित्तराज्यादिरूपारोग्यजयार्थिनः ।
पुष्पाजरविल्वरक्ताञ्ज जातिदूर्वाङ्कुरैस्तथा ॥
आरक्तकरवीरैश्च हुत्वा सिद्धिमवाप्नयुः ।
सर्वसिद्धिमवाप्नोति तिलहोमेन वैष्णवः ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
सायं प्रातश्च जुहुयात् षण्मासं विजितेन्द्रियः ॥
यावज्जीवं जपेद्यस्तु भक्त्या राममनुस्मरन् ।
सदारपुत्रः सगणः प्रेत्य स्वर्गे महीयते ॥
षट्कारयुक्तं स्वाहान्तं रामास्त्रं सम्प्रकीर्त्तितम् ।
सर्वापत्सु जपेन्मन्त्रं रामं ध्यात्वा महाबलम् ॥
चौराग्निशत्रुसम्बाधे तथा रोगभयेषु च ।
तोयवातग्रहादिभ्यो भयेषु च सभक्तिकम् ॥
शङ्खचक्रधनुर्वाणपाणिनं सुमहाबलम् ।
लक्ष्मणानुचरं रामं ध्यात्वा राक्षसनाशनम् ॥
सहस्रन्तु जपेन्मन्त्रं सर्वापद्भ्यो विमुच्यते ।
सूर्य्योदये यदा नाशमुपैति ध्वान्तमाशु वै ॥
तथैव रामस्मरणाद्विनाशं यान्त्युपद्रवाः ।
एवं श्रीराममन्त्रस्य विधानं ज्ञायतें नृप ! ॥
विधानं कृष्णमन्त्रस्य वक्ष्यामि शृणु पार्थिव ! ।
श्रीकृष्णाय नमो ह्येष मन्त्रः सर्वार्थसाधकः ॥
कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति राजेन्द्र ! महापातककोटयः ॥
सकृत् कृष्णेति यो ब्रूयाद् भक्त्या वापि च मानवः ।
पापकोटिविनिर्मुक्तो विष्णुलोकमवाप्नुयात् ॥

अश्वमेधसहस्राणि राजसूयशतानि च।
भक्त्या कृष्णमनुं जप्त्वा समाप्नोति नसंशयः॥
गवाश्च कन्यकानाञ्चा ग्रामाणाञ्च युतानि च।
दत्त्वा गोदावरी कृष्णा यमुना च सरस्वती॥
कावेरी चन्द्रभागादिस्नानं कृष्णेति योऽसमम्।
कृष्णेति पञ्चकृज्जप्त्वा सर्वतीर्थफलं लभेत्॥
कोटिजन्मार्जितं पापं ज्ञानतोऽज्ञानतः कृतम्।
भक्त्या कृष्णमनुं जप्त्वा दह्यते तूलराशिवत्॥
अगम्यागमनात्पापादभक्ष्याणाञ्च भक्षणात्।
सकृत् कृष्णमनुं जप्त्वा मुच्यते नात्र संशयः॥
सकृद् भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
उभयोः सङ्गतिर्यत्र तद्ब्रह्मेत्यभिधीयते॥
णकारस्य षकारस्य बलप्राणा वुभौ स्मृतौ।
आत्मन्येतौ समायुक्तौ जगतोऽस्यापि कृष्णतः॥
तस्मात् कृष्णेति मन्त्रोऽयं वाचकः परमात्मनः।
कृष्णेति परमो मन्त्रः सर्ववेदाधिकः स्मृतः॥
श्रियः सतः प्राणपदात् श्रीकृष्ण इति वै स्मृतः।
एवमर्थं विदित्वैव पश्चान्मन्त्रं जपेद् बुधः॥
सर्वकामप्रदत्वाच्च बीजं कान्दर्पमुच्यते।
नित्यानपाया श्रीशक्तिर्मणोरस्य प्रयुज्यते॥
देवर्षि र्नारदस्तस्य गायत्री छन्दउच्यते।
देवता रुक्मिणी भर्त्ता कृष्णः सर्वफलप्रदः॥
पूर्ववद्विधिना मन्त्रं गृहीत्वा वैष्णवाद्गुरोः।
स्नानवस्त्रादिभिः शुद्धः कृत्यं कृत्वोर्ध्वपुण्ड्रधृत्॥

तुलसीकानने रम्ये देशे वा प्राङ्मुखः शुभे ।
कुशे कृष्णाजिने वापि पुष्पे वा शुभवासरे ॥
समासीनस्तु कुर्वीत प्राणायामांश्च पूर्ववत् ।
आदिवीजेन कुर्वीत षड़ङ्गेषु यथाक्रमम् ॥
अङ्गुलीष्वपि तेनैव न्यासकर्म्म समाचरेत् ।
मुखे वाह्वोश्च हृदये ध्वजे जान्वोश्च पादयोः ॥
विन्यस्य मन्त्रवर्णानि चक्रं न्यासं ततः कृतम् ।
पूर्ववन्मन्त्रपादीनि स्मरेच्छाभरण न च ॥
विचित्रशुभपर्य्यङ्के दिव्यकल्पतरो रधः ।
सुगन्धपुष्पसङ्कीर्णे सर्वतः सुविचिच्चिते ॥
तस्मिन् देव्या समासीनं रुक्मिण्या रुक्मवर्णया ।
नीलोत्पलाभं कन्दर्पलावण्यं पद्मलोचनम् ॥
चन्द्राननं जवापुष्परक्तहस्तपदाम्वुजम् ।
नीलकुञ्चितकेशञ्च सुकपोलं सुनासिकम् ॥
सुभ्रूयुगं सुविम्बोष्ठं सुदन्तालिविराजितम् ।
उन्नतांसं दीर्घवाहुं पीनवक्षसमन्वयम् ॥
निरङ्कचन्द्रनखरं सर्वलक्षणलक्षितम् ।
श्रीवत्सकौस्तुभोद्भासं वनमालामनोरमम् ॥
पीताम्बरं भूषणाढ्यं वालार्काभं सुकुण्डलम् ।
हारकेयूरकटकैरङ्गुलीयैश्च शोभितम् ॥
मौक्तिकान्वितनासाग्रं कस्तूरीतिलकाञ्चितम् ।
हरिचन्दनलिप्ताङ्गं सदैवारूढ़यौवनम् ॥
मन्दारपारिजातादिकुसुमैः कवलीकृतम् ।
अनर्घ्यमुक्ताहारैश्च तुलसी वनमालया ॥

चक्रशङ्खसमेताभ्यामूर्द्ध्वबाहुभ्यां विराजितम् ।
इतराभ्यां तथा देवीं समाश्लिष्टं निरन्तरम् ॥
अलङ्कृताभिः सत्यादिमहिषीभिः समावृतम् ।
कालिन्दी सत्यभामा च मित्रविन्दा च सत्यवित् ॥
सुनन्दा च सुशीला च जाम्बवती सुलक्षणा ।
एता महिष्यः संप्रोक्ताः कृष्णस्य परमात्मनः ॥
ताभिश्च राजकन्यानां सहस्रैः परिसेवितम् ।
तारकावृत्तराजेव शोभितं निधिभिर्वृतम् ॥
एवं ध्यात्वा हरिं नित्यमर्च्चयित्वा जपेन्मनुम् ।
शालग्रामे च तुलसीवने वा स्थण्डिले हृदि ॥
स्मृत्वा जपेत त्रिसन्ध्यासु षट्सहस्रं मनुं द्विजः ।
विष्णुतुल्यवपुः श्रीमान्विष्णुलोकमवाप्नुयात् ॥
सर्वसिद्धिमवाप्नोति इह लोके परत्र च ।
विद्यार्थी वेणुगायन्तं जपेत् ध्यायन् ऋतुत्रयम् ॥
जुहुयात् कुसुमैः शश्वै विद्यासिद्धिमवाप्नुयात् ।
आयुष्कामो तु पूर्वाह्णे वत्सरान् ह्ययुतं जपेत् ॥
ध्यायेच्छिशुतनुं कृष्णं तिलैर्हुत्वायुराप्नुयात् ।
कन्यार्थी तु जपेत्सायं षोडशं त्वयुतं हरिम ॥
ध्यात्वा सहस्रं जुहुयाल्लाजैर्मधुविमिश्रितैः ।
स्त्रियं लभेत् स्वाभिमतां रूपे दार्यवतीं सतीम् ॥
सम्पत्कामो जपेन्नित्यं मध्याह्ने तु ऋतुत्रयम् ।
द्वारकायां सुधर्मायां रत्नसिंहासनस्थितम् ॥
शङ्खादिनिधिभी राजकुलैरपि सुसेवितम् ।
हारादिभूषणैर्युक्तं शङ्खाद्यायुधधारिणम् ॥

ध्यात्वा संपूज्य होमं च जपश्चायुत सङ्ख्या।
अब्जविल्वदलैर्वापि होमं मधुविमिश्रितम्॥
शाश्वतीं श्रियमाप्नोति कुवेरसदृशो भवेत्।
रूपलावण्यकामी तु रामममण्डलमध्यगम॥
ध्यायन् त्रिमासमयुतं जप्त्वा लावण्यवान् भवेत्।
एवं कृष्णमनोरस्य माहात्म्यं परिकीर्त्तितम्॥
अनन्तान भगवन्मन्त्रान् वक्तुं शक्यं न ते मया।
वाराहं नारसिंहञ्च वामनं तुरगाननम्॥
क्रमेणैव तु वक्ष्यामि यथावच्छृणु पार्थिव!।
हुङ्कारं प्रथमं वीजं आद्यं वाराहमुच्यते॥
पश्चात् तु धरणीवीजं लक्ष्मीवीजं ततः परम्।
त्रीन् वीजानादितः कृत्वा पश्चान्मन्त्रं प्रयोजनम्॥
ओं नमो भगवते पश्चाद्वराहरूपाय भूर्भुवः।
सुपः पतयेति भूपतित्वं मे देहीति तदाप्य।यस्व ति॥
अङ्गुलीषु यथाङ्गेषु वीजेनाद्येन वै क्रमात्।
यथा सन्त्रासवद्भूत्वा पश्चाद्ध्यानं समाचरेत्॥
वृहत्तनुं वृहद्ग्रीवं वृहद्दंष्ट्रं सुशोभनम्।
समस्तवेदवेदाङ्गसाङ्गोपाङ्गयुतं हरिम्॥
रजताद्रिसमप्रख्यं शतवाहुं शतेक्षणम्।
उद्धृत्य दंष्ट्रया भूमिं समालिङ्ग्य भुजैर्मुदा॥
ब्रह्मादित्रिदशैः सर्वैः सनकाद्यैर्मुनीश्वरैः।
स्तूयमानं समन्ताच्च गीय मानञ्च किन्नरैः॥
एवं ध्यात्वा हरिं नित्यं प्रातरष्टोत्तरं शतम्।
जप्त्वा लभेच्च भूपत्वं ततो विष्णुपुरं व्रजेत्॥

नमो यज्ञवराहाय इत्यष्टाक्षरको मनुः ।
उक्तबीजत्रयं पूर्वं कृत्वा मन्त्रं जपेद्बुधः ॥
मूलमन्त्रमिदं प्राहुर्वाराहं मुनिपुङ्गवाः ।
एतमेव परं मन्त्रं जप्त्वा भूमिपतिर्भवेत् ॥
नित्यमष्टसहस्रं तु जपेद्विष्णुं विचिन्तयन् ।
कमलैर्बिल्वपत्रैर्वा जुहुयाच्च दशांशकम् ॥
एवं संवत्सरं जप्त्वा सार्वभौमो भवेद्ध्रुवम् ।
राज्यं कृत्वा च धर्मेण पश्चाद्विष्णुपदं व्रजेत् ॥
विधानं नारसिंहस्य मनोर्वक्ष्यामि सुव्रत ! ।
उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ॥
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम् ।
आर्षं ब्रह्मानुष्टुप्छन्दो देवता च नृकेशरी ॥
चतुश्चतुश्च षट् षट् च षट्चतुश्च यथाक्रमात् ।
शिरो ललाटे नेत्रेषु मुखबाह्वङ्घ्रिसन्धिषु ॥
साग्रेषु कुक्षौ हृदये गले पार्श्वद्वयेऽपि च ।
अपराङ्गे ककुद्मे च न्यसेद्वर्णान्यनुक्रमात् ॥
वायोर्दशाक्षरं यत्तु बहूङ्कारं जपेत् सकृत् ।
विन्दुना सहितं यत्तु नृसिंहं बीजमुच्यते ॥
अङ्गुलीषु तथाङ्गेषु न्यासस्तेनैव चोदितम् ।
तद्बीजमादितः कृत्वा मन्त्रं पश्चात्प्रयोजयेत् ॥

ओं नमो भगवते नरसिंहाय ज्वालामालिने । दीर्घदंष्ट्रायाग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय दहदहपच पच रक्षरक्ष हुम्फट् स्वाहा । इति ज्वालामालिपातालनृसिंहाय नमः ॥ बीजेनैवन्यासः आं ह्रीं चौं क्रौं हुं फट् ।

अस्य मन्त्रस्य ब्रह्मार्षं पङ्क्तिश्छन्दो नृसिंहो देवता नृसिंहास्त्रमिदं बीजेनैव न्यासः।

ओंकारपूर्वो नृसिंहोऽद्विजयादुपरिस्थितः।
त्रिःसप्तकल्पो जप्तुः स्यान्महाभयनिवारणम्॥
अस्य ब्रह्मा च रुद्रश्च प्रह्लादश्च महर्षयः।
तथैव जगति च्छन्दो देवता च नृकेशरी॥
न्यासं बीजेन कुर्वीत ततो ध्यानं नृपोत्तम।।
माणिक्याद्रिसमप्रभं निजरुचा सन्त्रस्तरक्षोगणम्
जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम्॥
बाहुभ्यां धृतशङ्खचक्र मनिशन्दंष्ट्रोल्लसत्स्वाननम्।
ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं प्रभुम्॥
उद्यत्कोटिरविप्रभं नरहरिं कोटिरपिशोज्वलम्
दंष्ट्राभिः सुमुखोज्वलं नखमुखै दीर्घैरनेकैर्भुजैः।
निर्भिन्नासुरनायकन्तु शशभृत्सूर्य्याग्निनेत्रत्रयम्
विद्युद्जिह्वसटाकलापभयदं वह्निं वहन्तं भजे॥
कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्य्याग्निनेत्र-
पादादानाभिरक्तं प्रसभमुपरि संभिन्नदैत्येन्द्रगात्रम्।
चक्रं शङ्खं सपाशाङ्कुशमुसलगदाशार्ङ्गबाणान्वहन्तम्
भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम्॥
महाभयेष्विदं ध्यानं सौम्यमभ्युदयेषु च॥
सौवर्णं मण्डपान्तस्थं पद्मं ध्यायेत्सकेशरम्।
पञ्चास्यवदनं भीमं सोमसूर्य्याग्निलोचनम्॥
तरुणादित्यसङ्काशकुण्डलाभ्यां विराजितम्।
उपेयन्यासं सुमुखं तीक्ष्णदंष्ट्रविराजितम्॥

व्यात्तास्यं महर्णोष्ठञ्च भीषणैर्नयनैर्युतम्।
सिंहस्कन्धानुरूपांसं वृत्तायतचतुर्भुजम्॥
जपासमाङ्घ्रिहस्ताब्जं पद्मासनसुसंस्थितम्।
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम्॥
केयूराङ्गदहाराढ्यं नूपुराभ्यां विराजितम्।
चक्रशङ्खाभयवरचतुर्हस्तं विभुं स्मरेत्॥
वामाङ्के संस्थितां लक्ष्मीं सुन्दरीं भूषणान्विताम्।
दिव्यचन्दनलिप्ताङ्गीं दिव्यपुष्पोपशोभिताम्॥
गृहीतपद्मयुगलमातुलुङ्गकरां चलाम्।
एवं देवीं नृसिंहस्य वामाङ्कोपरिसंस्थिताम्॥
ध्यात्वा जपेज्जपं नित्यं पूजयेच्च यथाविधि।
चौं क्लीं श्रीं श्रीं नृसिंहाय नमः॥
इमं लक्ष्मीनृसिंहस्य जपेत् सर्व्वार्थदं मनुम्।
अष्टोत्तरसहस्रं वा जपेत् सन्ध्यासु वाग्यतः॥
अखण्डबिल्वपत्रैश्च जुहुयादाज्यमिश्रितैः।
सर्वसिद्धिमवाप्नोति षण्मासं प्रयतो भवेत्॥
देवत्वममरेशत्वं गन्धर्वत्वं तथा नृप!।
प्राप्नुवन्ति नराः सर्वे स्वर्गं मोक्षञ्च दुर्लभम्॥
यं यं कामयते चित्ते तं तमेवाप्नुयाद् ध्रुवम्।
ब्रह्मार्षी तत्र गायत्री नरसिंहश्च देवता॥
तदेव वीजं शक्तिः श्रीर्मनोरस्य विधीयते।
न्यासमायेन वीजेन चार्चनं तुलसीदलैः॥
पूर्वोक्तविधिना पीठे पूजयित्वा समाहितः।
परितः पूजयेद्दिक्षु गरुडं शङ्करं तथा॥

शेषञ्च पद्मयोनिञ्च श्रियं मायां धृतिं तथा।
पुष्टिं समर्च्चयेद्विद्वान् ततो लोकेश्वरान् यजेत्॥
महाभागवतं दैत्यनाशकं देवमग्रतः।
एवं सम्पूज्य देवेशं नारसिंहं सनातनम्॥
तत्पदं समवाप्नोति मुदितः सज्जनैः सह।
कर्पूरधवलं देवं दिव्यकुण्डलभूषितम्॥
किरीटकेयूरधरं पीताम्बरधरं प्रभुम्।
पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम्॥
सूर्य्यकोटिप्रतीकाशं पूर्णचन्द्रनिभाननम्।
मेखलाजिनदण्डादिधारणं वटुरूपिणम्॥
कलधौतमयं पात्रं दधानं वसुपूजितम्।
पीयूषकलशं वामे दधानं द्विभुजं हरिम्॥
सनकाद्यैः स्तूयमानं सर्वदेवैरुपासितम्।
एवं ध्यात्वा जपेन्नित्यं स्वासने च समाहितः॥
विष्णवे वामनायेति प्रणवादिनमोऽन्तकः।
इन्द्रार्षेश्च विराट्‌चन्द्रो देवता वामनः स्वयम्॥
सुधावीजं सुदीर्घन्तु बीजमाद्यन्तु वामनम्।
तेनैव तु षड़ङ्गाद्यं न्यासं कुर्व्वीत वैष्णवः॥
दध्यन्नं पायसं वापि जुहुयात्प्रत्यहं द्विजः।
औपासनाग्नौ जुहुयादष्टोत्तरशतं बुधः॥
कुवेरसदृशः श्रीमान् भवेत्सद्यो न संशयः।
ओंनमो विष्णवे पतये महाबलाय स्वाहा॥

इति वामनमन्त्रः।

कृत्वा त्रैविक्रमं रूपं जपेन्मन्त्र मनन्यधीः॥

मुक्तो बन्धाद्भवेत् सद्यो नात्र कार्य्या विचारणा ।
ह्रीं श्रीं श्री वामनाय नम इति मूलमन्त्रः ॥
ब्रह्मार्षं चैव गायत्री देवता च त्रिविक्रमः ।
न्यासं बीजेन जपवानष्टोत्तरसहस्रकम् ॥
इति वामनमन्त्रस्य जपाद्ब्रह्मयतिर्भवेत् ।
उद्गीथप्रणवोद्गीथसर्ववागीश्वरेश्वर ! ॥
सर्ववेदमयाचिन्त्य ? सर्वं बोधय मे पितः ! ।
ह्रूं ऐं हयग्रीवाय नमः ॥
नित्यार्षं चैव गायत्री हयग्रीवोऽस्य देवता ।
न्यासं बीजेन कृत्वाथ पश्चाद्ध्यानं समाचरेत् ॥
शरच्छशाङ्कप्रभमश्ववक्त्रं मुक्तामयैराभरणैरुपेतम् ।
रथाङ्गशङ्खाञ्चितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः ॥
शङ्खाभः शङ्खचक्रे करसरसिजयोः पुस्तकं चान्यहस्ते
बिभ्रद्व्याख्यानमुद्रालसदितरकरो मण्डलस्थः सुधांशोः ।
आसीनः पुण्डरीके तुरगवरशिराः पूरुषो मे पुराणः
श्रीमानज्ञानहारी मनसि निवसता ऋग्यजुःसामरूपः ॥
एवं ध्यात्वा जपेन्मन्त्रं सन्ध्यासु विजितेन्द्रियः ।
सर्ववेदार्थतत्त्वज्ञो भवेदत्र न संशयः ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरन्तु वा ।
जपेच्च जुहुयाच्चैवं साज्यैः शुभ्रैः सुतण्डुलैः ।
विद्यासिद्धिमवाप्नोति षण्मासं द्विजसत्तमः ॥
अष्टादशानां विद्यानां बृहस्पतिसमो भवेत् ।
सहस्रारं हुं फडित्येवं मूलं सौदर्शनं मनुम् ॥
अहिर्बुध्न्योऽनुष्टुभस्य देवता च सुदर्शनम् ।

अचक्राय विचक्राय सुचक्राय तथैव च ॥
विचक्राय सुचक्राय ज्वालाचक्राय वै क्रमात् ।
षड़ङ्गेषु च विन्यस्य पश्चाद्ध्यानं समाचरेत् ॥
नमश्चक्राय स्वाहेति दशदिक्षु यथाक्रमम् ।
चक्रेण सह बध्नोमीत्युक्त्या प्रतिदिशेत्ततः ॥
त्रैलोक्यं रक्ष रक्ष हुंफट् स्वाहेति वै क्रमात् ।
अग्निप्राकारमन्त्रोऽयं सर्वरक्षाकरः परः ॥
ओं मूर्ध्नि स भ्रूमध्ये ह मुखे स्वाहमधीत्यतः ।
रङ्घ्रे हन्तु जान्वोश्च फट् पदद्वयसन्धिषु ॥
कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तम्
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदम्भीमदंष्ट्राजहासम् ।
शङ्खं चक्रं गदाब्जं पृथुतरमुसलं चापपाशाङ्कुशाद्यम्
बिभ्राणन्दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्रसंज्ञम् ॥
ओं नमो भगवते महासुदर्शनाय हुंफट् ।
इति षोडशाक्षरं इति सुदर्शनविधानम् ॥
इति हारीतस्मृतौ विशिष्टधर्मशास्त्रे भगवन्मन्त्र-
विधानं नाम तृतीयोऽध्यायः ॥
अथ वक्ष्यामि राजेन्द्र ! विष्णोराराधनं परम् ।
प्रत्यूषे सहसोत्थाय सम्यगाचम्य वारिणा ॥
आत्मानं देहमीशञ्च चिन्तयेत् संयतेन्द्रियः ।
ज्ञानानन्दमयो नित्यो निर्विकारो निरामयः ॥
देहेन्द्रियात्परः साक्षात्त्वञ्च विश्वात्मको ह्यहम् ।
अस्मिन् देशे वसाम्यस्य शेषभूतो हि शार्ङ्गिणः ॥
शुक्रशोणितसम्भूते जरारोगाद्युपद्रवे ।

मेदोरक्तास्थिमांसादिदेहद्रव्यसमाकुले ॥
मलमूत्रवसापङ्के नानादुःखसमाकुले ।
तापत्रयमहावह्निदह्यमानेऽनिशम्भृशम् ॥
दूषणत्रयकृष्णाहिबाध्यमाने दुरत्यये ।
क्लिश्यामि पापभूयिष्ठे कारागृहनिभे शुभे ॥
बहुजन्मबहुक्लेशगर्भवासादि दुःखिते ।
वसामि सर्वदोषाणामालये दुःखभाजने ॥
अस्माद्विमोक्षणायैव चिन्तयिष्यामि केशवम् ।
वैकुण्ठे परमव्योम्नि दुग्धाब्धौ वैष्णवे पदे ॥
अनन्तभोगिपर्य्यङ्के समासीनं श्रिया सह ।
इन्द्रनीलविभाश्यामं चक्रशङ्खगदाधरम् ॥
पीताम्बरधरं देवं पद्मपत्रायतेक्षणम् ।
श्रीवत्सकौस्तुभोरस्कं सर्वाभरणभूषितम् ॥
चिन्तयित्वा नमस्कृत्वा कीर्त्तयेद्दिव्यनामभिः ।
सङ्कीर्त्य नामसाहस्रं नमस्कृत्वा गुरूनपि ॥
तुलसीं काञ्चनं गाञ्च संस्पृश्याथ समाहितः ।
दूराद्बहिर्विनिष्क्रम्य शुचौ देशे च निर्जने ॥
कर्णस्थ ब्रह्मसूत्रस्तु शिरः प्रावृत्य वाससा ।
कुर्यान्मूत्रपुरीषे च ष्ठीवनोच्छ्वासवर्जितः ॥
अहन्युदङ्मुखो रात्रौ दक्षिणाभिमुखस्तथा ।
समाहितमना मौनी विण्मूत्रे विसृजेत्ततः ॥
उत्थाय तन्द्रितः शौचं कुर्यादभ्युद्धृतैर्जलैः ।
गन्धलेपक्षयकरं यथासङ्ख्य मृदा शुचिः ॥
अर्द्धप्रसृतिमात्रन्तु मृदं दद्याद्यथोक्तवत् ।

उदपाने त्रिलिङ्गे तु सव्यहस्ते तथा दश ॥
उभयोः सप्त दद्याच्च तिस्रस्तिस्रस्तु पादयोः।
आजङ्घान्मणिबन्धात्तु प्रक्षाल्य शुभवारिणा ॥
उपविष्टः शुचौ देशे अन्तर्जानुकरस्तथा।
पवित्रपाणिराचामेत् प्रसृतिस्थः स वारिणा ॥
त्रिः प्राश्याङ्गुष्ठमूलेन द्विधोन्मृज्य कपोलकौ।
मध्यमाङ्गुलिभिः पश्चाद्द्विरोष्ठौ मृजयेत्तथा ॥
नासिकौष्ठान्तरं पश्चात् सर्वाङ्गुलिभिरेव च।
पादौ हस्तौ शिरश्चैव जलैः संमार्जयेत्ततः ॥
अङ्गुष्ठतर्जनीभ्यां तु स्पृशेत्तौ नासिकापुटौ।
अङ्गुष्ठानामिकाभ्यां तु चक्षुःश्रोत्रे जले स्पृशेत् ॥
कनिष्ठाङ्गुष्ठनाभिञ्च तलेन हृदयन्ततः।
सर्वाङ्गुलिभिः शिरसि बाहुमूले तथैव च।
नामभिः केशवाद्यैश्च यथासङ्ख्यमुपस्पृशेत् ॥
द्विराचामेत्तु सर्वत्र विण्मूत्रोत्सर्जने त्वयम्।
सामान्यमेतत् सर्वेषां शौचं तु द्विगुणोदितम् ॥
आचम्यातःपरं मौनी दन्तान् काष्ठेन शोधयेत्।
प्राङ्मुखोदङ्मुखो वापि कषायं तिक्तकण्टकम् ॥
कनिष्ठाग्रमितस्थूलं द्वादशाङ्गुलमायतः।
पर्वाधः कृतकूर्चेन तेन दन्तानिकर्षयेत् ॥
अपां द्वादशगण्डूषैः वक्त्रं संशोधयेद्द्विजः।
मुखं संमार्जयित्वाथ पश्चादाचमनं चरेत्।
पवित्रपाणिराचम्य पश्चात् स्नानं समाचरेत् ॥
नद्यां तडागे खाते वा तथा प्रस्रवणे जले।

तुलसीमृत्तिकां धात्रीमुपलिप्य कलेवरे ॥
अभिमन्त्र्य जलं पश्चान्मूलमन्त्रेण वैष्णवः ।
निमज्य तुलसीमिश्रं जलं सम्प्राशयेत्ततः ॥
आचम्य मार्जनं कुर्यात् कुशैः सतुलसीदलैः ।
पौरुषेण तु सूक्तेन आपोहिष्ठादिभिस्तथा ॥
निमज्याप्सु जले पश्चात्त्रिवारमघमर्षणम् ।
उत्थाय पुनराचम्य पश्चादप्सु निमज्य वै ॥
मन्त्ररत्नं त्रिवारं तु जपेद्ध्यायन् सनातनम् ।
पिवेदुत्थाय तेनैव त्रिवारमभिमन्त्रितम् ॥
आचम्य तर्पयेद्देवान् पितॄनपि विधानतः ।
निष्पीड्य कूले वस्त्रं तु पुनराचमनं चरेत् ॥
धौतवस्त्रं सोत्तरीयं सकौपीनं धरेस्थितम् ।
निबद्धशिखकच्छस्तु द्विराचम्य यथाविधि ॥
धारयेदूर्द्ध्वपुण्ड्राणि मृदा शुभ्राणि वैष्णवः ।
श्रीकृष्णतुलसीमूलमृदा वापि प्रयत्नतः ॥
मन्त्रेणैवाभिमन्त्र्याथ ललाटादिषु धारयेत् ।
नासिकामूलमारभ्य विभृयाच्छ्रीपदाकृति ॥
सान्तरालं भवेत् पुण्ड्रं दण्डाकारं तु वा यथा ।
ललाटादि तथा पश्चाद्ग्रीवान्तं केशवादिभिः ॥
नाम्नां द्वादशभि मूर्ध्नि वासुदेवं तलाम्बुना ।
पवित्रपाणिः शुद्धात्मा सन्ध्यां कुर्यात् समाहितः ॥
प्रादेशमात्रौ नैशेयौ साग्रं मूलयुतौ तथा ।
अन्तर्गर्भौ सुविमलौ पवित्रं कारयेद्द्विजः ॥
देवार्चने जपे होमे कुर्याद्ब्राह्मंत्र पवित्रकम् ।

इतरे वर्त्तुलग्रन्थिदेवं धर्मो विधीयते ॥
पथि दर्भाश्रिता दर्भा ये दर्भा यज्ञभूमिषु ।
स्तरणासमपिण्डेषु ब्रह्मयज्ञे च तर्पणे ॥
पानभोजनकाले च धृतान् दर्भान् विसर्जयेत् ।
सपवित्रकरेणैव आचामेत्प्रयतो द्विजः ॥
आचान्तस्य शुचिः पाणिर्यथापाणि स्तथा कुशः ।
सन्ध्याचमनकाले तु धृतं न परिवर्जयेत् ॥
अप्रसूताः स्मृता दर्भाः समिधस्तु कुशाः स्मृताः ।
समूलास्तु कुशा ज्ञेयाः छिन्नाग्रास्तृणसंज्ञिताः ॥
कुशोदकेन यत् कण्ठं नित्यं संशोधयेद्द्विजः ।
न पर्युषन्ति पापानि ब्रह्मकूर्चं दिने दिने ॥
कुशासनं सदा पूतं जपहोमार्च्चनादिषु ।
कुशैनेव कृतं कर्म्म सर्वमानन्त्यमश्नुते ॥
तस्मात् कुशपवित्रेण सन्ध्यां कुर्यात् यथाविधि ।
स्वगृह्योक्तविधानेन सन्ध्योपास्तिं समाचरेत् ॥
ध्यात्वा नारायणं देवं रविमण्डलमध्यगम् ।
गायत्र्यार्घ्यं प्रदद्याच्च जपन् कुर्वीत भक्तिमान् ॥
सूर्यस्याभिमुखो जप्त्वा सावित्रीं नियतात्मवान् ।
उपस्थानं ततः कृत्वा नमस्कुर्यात्ततो हरिम् ॥
नमो ब्रह्मणेत्यादि जपित्वाथ विसर्जयेत् ।
ततः सन्तर्पयेद्विष्णुमन्त्ररत्नेन मन्त्रवित् ॥
शतवारं सहस्रं वा तुलसीमिश्रितैर्जलैः ।
वैकुण्ठपार्षदं पश्चात्तर्पयेच्च यथाविधि ॥
अनन्तद्वीपारिखादिदेवतानामनुक्रमात् ।

एकैकमञ्जलिं दत्त्वा पश्चादाचमनं चरेत्।
श्रीशस्याराधनार्थं वै कुर्यात् पुष्पस्य सञ्चयम्॥
तुलसीविल्वपत्राणि दूर्वां कौशेयमेव च।
विष्णुक्रान्तं मरुवकं केशाम्बुददलं तथा॥
उशीरं जातिकुसुमं कुन्दञ्चैव कुरन्दकम्।
शमीचम्पाङ्कदन्तञ्च चुतपुष्पं च माधवीम्॥
पिप्पलस्य प्रवालानि जाम्ववं पाटलं तथा।
आस्फोटं कुटजं लोध्रं कर्णिकारञ्च किंशुकम्॥
नीपार्जुने शिंशपञ्च श्वेतकिंशुकनामकम्।
जम्बीरं मातुलङ्गं च यूथिकारचयं तथा॥
पुन्नागं वकुलं नागकेशराशोकमल्लिकाः।
शतपत्रं च हारिद्रं करवीरं प्रियङ्गु च॥
नीलोत्पलं तूत्पलञ्च नन्द्यावर्तञ्च कैतकम्।
घटजं स्थलपद्मं च सर्वाणि जलदानि च॥
तत्कालसम्भवं पुष्पं गृहीत्वाथ गृहं विशेत्।
वितानादियुते दिव्यधूपदीपैर्विराजिते॥
चन्दनागरुकस्तूरी कर्पूरामोदवासिते।
त्रिचित्ररङ्गवल्याढ्ये मण्डपे रत्नपीठके॥
विस्तीर्णपुष्पपर्यङ्के देव्या सहितमच्युतम्।
सन्निधा वासने स्थित्वा कुशे पद्मासने स्थितः॥
प्राणायामविधानेन भूतशुद्धिं विधाय च।
प्राणायामत्रयं कृत्वा पश्चाद्ध्यानं यथोक्तवत्॥
परव्योम्नि स्थितं देवं लक्ष्मीनारायणं विभुम्।
पराभिः शक्तिभिर्युक्तं भूलीलाविमलादिभिः॥

अनन्तविहगाधीशसेन्याद्यैः सुरसत्तमैः।
चण्डाद्यैः कुमुदाद्यैश्च लोकपालैश्च सेवितम्॥
चतुर्भुजं सुन्दराङ्गं नानारत्नविभूषणम्।
वामाङ्कस्थश्रिया युक्तं शङ्खचक्रगदाधरम्॥
मन्त्ररत्नविधानेन न्याससुद्रादिकर्मकृत्।
पञ्चौपनिषदं न्यासं कुर्यात् सर्वत्र कर्मसु॥
ओँ शौशाय नमः परायेति परमेष्ठ्यात्मने नमः।
ओँ यां नमः परायेति ततः पुरुषात्मने नमः॥
ओँ रां नमः परायेति ततो विश्वात्मने नमः।
ओँ वामनः परायेति स्वनिवृत्यात्मने नमः॥
ओँ लां नमः परायेति ततः सर्वात्मने नमः।
शिरोनासाग्रहृदयगुह्यपादेषु विन्यसेत्॥
यथाक्रमेण तन्मन्त्रान् पञ्चाङ्गेषु क्रमान्न्यसेत्।
तन्मुद्रया तदावाह्य दद्यादासनमेव च॥
पाद्यार्घ्याचमन स्नानपात्राणि स्थाप्य पूजयेत्।
पूरयित्वा शुभजलं पात्रेषु कुसुमैर्युतम्॥
द्रव्याणि निक्षिपेत् तेषु मङ्गलानि यथाक्रमात्।
उशीरं चन्दनं कुष्ठं पाद्यपात्रं विनिक्षिपेत्॥
विष्णुक्रान्तञ्च दूर्वाञ्च कौशेयान् तिलसर्षपान्।
अक्षतांश्च फलं पुष्पमर्घ्यपात्रे विनिक्षिपेत्॥
जातीफलञ्च कर्पूरमेलाञ्चाचमनीयके।
मकरन्दं प्रवालञ्च रत्नं सौवर्णमेव च॥
तानि दद्यात् स्नानपात्रे धात्रीं सुरतरुं तथा।
द्रव्याणामप्यलाभे तु तुलसीपत्रमेव च॥

चन्दनं वा सुवर्णं वा कौशेयं वा विनिक्षिपेत्।
दर्शयेत् सुरभेर्मुद्रां पूजयेत् कुसुमव्रजैः॥
अभिमन्त्र्य च मन्त्रेण धूपदीपैर्निवेदयेत्।
अनन्तं चोद्धरण्या च दद्यात्पाद्यादिकं तथा॥
तत्पात्रक्षालनं कृत्वा तथा पुष्पाञ्जलिं न्यसेत्।
सौवर्णानि च रौप्याणि ताम्रकांस्यानि योजयेत्॥
पात्राणामप्यलाभे तु शङ्खमेकं विशिष्यते।
शङ्खोदकं सदा पूतमति प्रियतरं हरेः॥
उद्धरिण्या जलं दद्यान्नाप्सु शङ्खं निमज्जयेत्।
अष्टाक्षरेण मनुना मन्त्ररत्नं च वा यजेत्॥
पाद्यार्घ्याचमनं दत्त्वा मधुपर्कं निवेदयेत्।
पुनराचमनं दत्त्वा पादपीठं निवेदयेत्॥
दन्तधावनगण्डूषदर्पणालोचनं तथा।
निवेद्याभ्यञ्जनं तैलैर्नोर्द्ध्वं केशरञ्जनम्॥
सुखोष्णितजलैः स्नानं पुनरुद्वर्तनं हरेत्।
कुङ्कुमेन हरिद्रेण चन्दनेन सुगन्धिना॥
उद्वर्त्य गन्धतोयेन स्नापयेच्च पुनस्ततः।
स्नानपात्रोदकं पश्चादादाय कुसुमैः सह॥
पौरुषेण तु सूक्तेन स्नापयेत्कमलापतिम्।
मार्जयेच्छुभवस्त्रेण दीपैर्नीराजयेत्तदा॥
वस्त्रञ्चैवोपवीतञ्च दद्यादाभरणानि च।
कस्तूरीतिलकं गन्धपुष्पाणि सुरभीणि च।
अन्तर्निवेश्य देवस्य लक्ष्मीं संपूजयेत्तथा॥
पार्श्वयोरुर्वधरणी महिष्यः पतिता स्तथा।

विमलोत्कर्षणीत्याद्याः पूर्वमेव प्रकीर्त्तिताः ॥
चण्डादि द्वारपालांश्च कुमुदादींस्तथार्चयेत् ।
वासुदेवः सीरपाणिः प्रद्युम्नश्च उषापतिः ।
दिक्षु कोणेषु तत्पत्न्यो लक्ष्मीरेव रती उषा ॥
द्वितीयावरणं पश्चात्केशवाद्याः सशक्तयः ।
संकर्षणादयः पश्चान्मत्स्यकूर्मादय स्तथा ॥
श्रीः लक्ष्मीः कमला पद्मा पद्मिनी कमलालया ।
रमा वृषाकपेर्धन्या वृत्तिर्यज्ञान्तदेवता ॥
शक्तयः केशवादीनां संप्रोक्ताः परमे पदे ।
हिरण्या हरणी सत्या नित्यानन्दा जयी सुखा ॥
सुगन्धा सुन्दरी विद्या सुशीला च सुलक्षणा ।
सङ्कर्षणादिमूर्त्तीनां शक्तयः समुदाहृताः ॥
वेदा वेदवती धात्री महालक्ष्मीः सुखालया ।
भार्गवी च तदा सीता रेवती रुक्मिणी प्रभा ॥
मत्स्यकूर्मादिमूर्त्तीनां शक्तयः सम्प्रकीर्त्तिताः ।
एवं सशक्तयः पूज्याः केशवाद्याः सुरेश्वराः ॥
पश्चात्सशक्तयः पूज्या चक्रशङ्खादिहेतयः ।
शङ्खं चक्रं गदां पद्मं शार्ङ्गञ्च मुसलं हलम् ॥
वाणञ्च खड्गखेटं च च्छुरिका दिव्यहेतयः ।
भद्रा सौम्या तथा माया जया च विजया शिवा ॥
सुमङ्गला सुनन्दा च हिता रम्या सुरक्षिणी ।
शक्तयो दिव्यहेतीनां पूजनीयाः सनातनाः ॥
वहिर्लोकेश्वराः पूज्याः साध्याश्च समरुद्गणाः ।
एवमावरणं सर्वमर्चयेत्परमात्मनः ।

पुनरर्घ्यादिकं दत्त्वा धूपदीपैर्निवेदयेत् ॥
प्रागुदीच्याञ्च सद्दृश्यं नागराजं तथापरे।
पुरतो वै नयेत् यञ्च पूजयेच्छक्तिभिः सह ॥
सेनापतेः सूत्रवतीं नागराजस्य वारुणीम्।
भद्राञ्चलां तथा यस्य पूजयेद्वैष्णवोत्तमः ॥
गुग्गुलुं सहिषाक्षीञ्च सालनिर्यासमेव च।
अगरुं देवदारुञ्च उशीरं श्रीफलं तथा ॥
ह्रीवेरं चन्दनं मुस्ता दशाङ्गं धूपमुच्यते।
गवाज्येन च संयोज्य दद्याद्धूपं सुवासितम् ॥
कार्पासमार्कं क्षौमञ्च शाल्मलीक्षीरकोद्भवम्।
अम्भोजं कीटजं काशतूलिकाष्टाङ्गमुच्यते ॥
गवाज्यं तिलतैलं वा कुसुमैश्च सुवासितम्।
संयोज्य वह्निना दीपं भक्त्या विष्णोर्निवेदयेत् ॥
नैवेद्यं शुभहृद्यान्नं पायसापूपसंयुतम्।
फलैश्च भक्ष्यभोज्यैश्च पानकैर्व्यञ्जनैः सह ॥
गवाजञ्च दधि क्षीरं शर्कराञ्च निवेदयेत्।
शुद्धं हविष्यं हृद्यञ्च सुरुच्यं वै निवेदयेत् ॥
यच्छास्त्रेषु निषिद्धं तु तत्प्रयत्नेन वर्जयेत्।
कोद्रवं चौलकं लुब्धं यावनालं तद्वासितम् ॥
निष्पावञ्च मसूरञ्च तुच्छधान्यानि सर्व्वशः।
भुक्तं पर्युषितं रूक्षं यज्ञे कर्म्मणि वर्जयेत् ॥
वर्जयेदारनालञ्च मद्यमांससमानि च।
निर्यासान्वर्जयेत् सर्व्वान्विना हिङ्गु च गुग्गुलुम् ॥
छत्राकं मूलकं शीग्रुं करञ्जं लशुनं तथा।

कुम्भीदलञ्च पिण्याकं श्वेतवृन्ताकमेव च ॥
आवञ्च नालिकाशाकं नालिकेर्याख्यमेव च ।
विल्वञ्च शणपुष्पञ्च भूस्तृणं भौतिकं तथा ॥
कोशातकीं विम्बफलं मद्यमांससमानि च ।
अभक्ष्याण्यप्यशेषाणि वर्जयेद्यज्ञकर्मणि ॥
कालिङ्गं कतकं बिल्वफलं जन्तुफलं तथा ।
वंशाङ्कुरमलावुञ्च तालहिन्तालके फले ॥
अश्वत्थं प्लक्षनीपञ्च वटमारग्वधं तथा ।
कलम्बिका च निर्गुण्डिमुण्डिवार्त्ताकमेव च ॥
ऊषरं लवणञ्चैव श्वेतञ्च वृहतीफलम् ।
नखचर्मातकञ्चैव चिञ्चिलञ्चेति यत्नतः ॥
विज्ञेयानि च भक्ष्याणि वर्जयेद्यज्ञकर्म्मणि ।
श्लेष्मातकञ्च विड्जानि प्रत्यक्षलवणं तथा ॥
अविर्दशा वशीक्षीरमवत्साया स्तथाविकम् ।
औष्ट्रमेकशफञ्चैव पशूनां विड्भुजामपि ॥
अतिदीर्णं तथा तक्रं करनिर्म्मथितन्दधि ।
ताम्रेण संयुतं गव्यं क्षीरञ्च लवणान्वितम् ॥
घृतं लवणसंयुक्तं प्रयत्नेन विवर्जयेत् ।
सूपान्नञ्च गुड़ान्नञ्च शर्करामधुसंयुतम् ॥
मरीचिमिश्रं दध्यन्नं पायसान्नं फलैः सह ।
तुलसीदलसम्मिश्रं जलैः सम्प्रोक्ष्य वाग्यतः ॥
अष्टाविंशतिवारन्तु मूलमन्त्राभिमन्त्रितम् ।
मुद्राञ्च सौरभेयीन्तां दर्शयेन्मन्त्रमुच्चरन् ॥
सुधाब्धिममृतं वीजं चिन्तयन् परमात्मनः ।

दद्यात् पुष्पाञ्जलिं पश्चाद्दशवारं समाहितः ॥
प्रेषणक्रियया पूर्वमन्नमस्मै निवेदयेत् ।
शतवारं जपेन्मन्त्रं घण्टाशब्दं निनादयन् ॥
जपेत्पौरुषदैवत्यान्मन्त्रानेकाग्रचेतसा ।
हरेर्भुक्तवतः पश्चाद्दद्याद्वारि सुवासितम् ॥
पश्चादाचमनं दद्याज्जलैर्गन्धविमिश्रितैः ।
अभ्यर्च्यापौरुषस्यास्य सूक्तस्य सुरसत्तमान् ॥
विष्वक्सेनार्पितचतुर्भागं क्रमाद्धव्यस्य चार्पयेत् ।
अनन्तताक्ष्यसेनेशपवित्राणां निवेदयेत् ॥
तीर्थेन सहितं हव्यं पृथक् पात्रेषु निक्षिपेत् ।
सर्वेषां वारिपूर्वेण पश्चात् पुष्पाञ्जलिञ्चरेत् ॥
नीराजनं ततो दत्त्वा ताम्बूलञ्च निवेदयेत् ।
प्रणमेच्च ततो भक्त्या रम्यैः स्तोत्रैः शुभाह्वयैः ॥
प्रसार्य बाहुपादौ च वक्त्रेणाञ्जलिना सह ।
स्तुवन् स्तुतिभिरेवं तु प्रणामो दीर्घ उच्यते ॥
नत्वा दीर्घप्रणामैश्च स्तुत्वा स्तुतिभिरेव च ।
सर्वैश्च वैष्णवैर्मन्त्रैः कुर्यात् पुष्पाञ्जलिं ततः ॥
सूक्तैश्च विष्णुदैवत्यैर्नामभिः शार्ङ्गिणस्तथा ।
ततः शुभासने स्थित्वा जपेन्मन्त्रमनुत्तमम् ॥
न्यासमुद्रादिपूर्वेण ध्यायन्वै कमलेक्षणम् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥
जप्त्वा पुष्पाञ्जलिं दद्याद्यथाशक्त्या च मन्त्रतः ।
नमेद्योगेन देवेशं हृदिस्थं कमलेक्षणम् ॥
मनसैवार्चयित्वास्मिन् समाधौ विरमेत् सुधीः ।

प्रातरौपासनं कृत्वा तत्र होमं समाचरेत् ॥
आज्येन चरुणा वापि समिद्भिर्वा च यज्ञियैः ।
तण्डुलैष्ट तमिश्रैर्वा विल्वपत्रैरथापि वा ॥
तिलैर्वा कुसुमैर्वापि यवैर्मिश्रभिरेव वा ।
यज्ञरूपं हरिं ध्यात्वा सर्ववेदमयं विभुम् ॥
दिव्याभरणसम्पन्नं शङ्खचक्रगदाधरम् ।
वरदं पुण्डरीकाक्षं वामाङ्कस्थश्रियं हरिम् ॥
यज्ञस्वरूपिणं वह्नौ ध्यायन् मन्त्रद्वयेन च ।
सर्वैश्च वैष्णवैर्मन्त्रैरेकैकेनाहुतिं तथा ॥
नामभिः केशवाद्यैश्च सूक्तैर्विष्णुप्रकाशकैः ।
वैकुण्ठपार्षदं सर्वं हुत्वा चैव ततो बलिम् ॥
क्षिपेच्चतुर्विधान् भूतानुद्दिश्य च ततो भुवि ।
आचम्य पूजयेत्पश्चात्तदीयान् सुसमाहितः ॥
तेभ्यः प्रणम्य भक्त्याथ सन्तर्प्य पितृदेवताः ।
वेदमध्यापयेच्छक्त्या धर्मशास्त्रञ्च संहिताः ॥
सात्विकानि पुराणानि सेतिहासानि वैष्णवः ।
सर्वोपनिषदामर्थं सद्भिः सह विचिन्तयेत् ॥
योगक्षेमार्थवृद्धिञ्च कुर्य्याच्छक्त्या यथार्हतः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णा यथाक्रमम् ॥
आद्यास्त्रयो द्विजाः प्रोक्ता स्तेषां वै मन्त्रसत्क्रियाः ।
सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ॥
तेषां सङ्करयोगाश्च प्रतिलोमानुलोमजाः ।
विप्रान्मूर्धाभिषिक्तस्तु क्षत्रियायामजायत ॥
वैश्यायान्तु तथाम्बष्ठो निषादः शूद्रया तथा ।

राजन्याद्वैश्यशूद्राभ्यां माहिष्योग्रौ तु तौ स्मृतौ ॥
शूद्रायां वैश्यात् तु करणश्चैरैर्वा तेऽनुलोमजाः ।
विप्रायां क्षत्रियात् सूतः वैश्याद्वैदेहिकस्तथा ॥
चण्डालस्तु तथा शूद्रात्सर्वकर्म्मसु गर्हितः ।
मागधः क्षत्रियायां वै वैश्या क्षत्रात् तु शूद्रतः ॥
शूद्रादयोगवं वैश्या जनयामास वै सुतम् ।
रथकारः करण्यान्तु माहिष्येण प्रजायते ॥
असत्सन्ततयो ज्ञेयाः प्रतिलोमानुलोमजाः ।
प्रतिलोमासु वै जाता गर्हिताः सर्वकर्म्मणाम् ॥
एतेषां ब्राह्मणाद्याश्च षट्कर्म्मसु नियोजिताः ।
त्रिकर्मसु क्षत्रविशावेकस्मिन् शूद्रयोनिजः ॥
प्रतिग्रहञ्च वृत्त्यर्थं ब्राह्मणस्तु समाचरेत् ।
असदेवासतां प्रोक्तं निषिद्धं तद्विवर्जयेत् ॥
पाषण्डाः पतिताः पापास्तथैव प्रतिलोमजाः ।
कुलटाश्च विकर्म्मस्था असतः परिकीर्त्तिताः ॥
लवणं तिलकार्पासं चर्म्मच त्रपुसीसकम् ।
आयसं मधुमांसञ्च विषमन्नं घृतं रुजम् ॥
किल्विषं गजमुष्ट्रञ्च सर्षपं जलमेव च ।
तृणकाष्ठञ्च कूष्माण्डं शिंशपाञ्च विवर्जयेत् ॥
महिषीं गर्दभञ्चैव वाजिनञ्च तथाविकम् ।
दासीमजां यानवृत्ता न पश्चानडुहस्तुलाम् ॥
एवमाद्य मसद्द्रव्यं प्रयत्नेन विवर्जयेत् ।
धान्यं वासांसि भूमिञ्च सुवर्णं रत्नमेव च ॥
पुष्पाणि फलमूलाद्यं सद्द्रव्यं मुनिभिः स्मृतम् ।

सर्वत्र परिगृह्णीयाद्भूमिं धान्यं फलाधिकम् ॥
भूमिं यस्तु प्रगृह्णाति भूमिं यस्तु प्रयच्छति ।
तावुभौ पुण्यकर्म्माणौ नियतौ स्वर्गगामिनौ ॥
धान्यं करोति दातारं प्रगृहीतारमेव च ।
धान्यं नृपवरश्रेष्ठ ! इहलोके परत्र च ॥
तस्माद्धान्यं धरित्रीञ्च प्रतिगृह्णीत सर्वतः ।
कुसुम्भधान्य एव स्यात् कुसुम्भधान्यवान् नृप ! ॥
शीलोञ्छेनापि वा जीवेच्छ्रेयानेषां परो वरः ।
जीवेद्यायावरेणैव विप्रः सर्वत्र सर्वदा ॥
वर्जयित्वैव पाषण्डान् पतितांश्चान्यदैविकान् ।
कृषिणा वापि जीवेत सतां चानुमतेन वा ॥
न वाहयेदनडुहं क्षुधार्त्तं श्रान्तमेव च ।
तस्य पुंस्त्वं भङ्क्त्वैव वाहयेद् द्विजपुङ्गवः ॥
कर्म्मलोपमकुर्व्वन्वै कृषिं कुर्वीत वै द्विजः ।
हरेः पूजां यथाकालं कृषिलोपे समाचरेत् ॥
न ब्राह्मं सन्त्यजेद्विप्र स्तथा यज्ञादिकर्म्म च ।
आपद्यपि न कुर्वीत सेवां वाणिज्यमेव च ॥
असत्प्रतिग्रहं स्तेयं तथा धर्मस्य विक्रयम् ।
अन्यायोपार्जितं द्रव्यमापद्यपि विवर्जयेत ॥
भृतकाध्यापनं चैव सद्दासत्कर्म्मभावनम् ।
प्रीतये वासुदेवस्य यद्दत्तमसतामपि ।
महाभागवतस्पर्शात्तत्सदित्युच्यते बुधैः ॥
तापादीन् पञ्च संस्कारां स्तथाकारैस्त्रिभिर्युतः ।
हरेरनन्यशरणो महाभागवतः स्मृतः ॥

अचराचसभूतानां तामसानां दिवौकसाम् ।
तेषां यत्प्रीतये दत्तं तथा यद्यपि वर्जयेत् ॥
बुहरुद्रौ तथा वायुर्दुर्गागणसुभैरवाः ।
यमः स्कन्दो नैऋतश्च तामसा देवताः स्मृताः ।
एवं विशुद्धिं द्रव्यस्य ज्ञात्वा गृह्णीत सत्तमः ॥
कृषिस्तु सर्ववर्णानां सामान्यो धर्म्म उच्यते ।
प्रतिग्रहस्तु विप्राणां राज्ञां क्ष्मापालनं तथा ॥
कुसीदञ्चैव वाणिज्यं विशामेव प्रकीर्त्तितम् ।
सेवावृत्तिस्तु शूद्राणां कृषिर्वा सम्प्रकीर्त्तिता ॥
अशक्तस्तु भवेद्राजा पृथिव्याः परिपालने ।
जीवेद्वापि विशां वृत्त्या शूद्राणां वा यथासुखम् ॥
कृषिर्भृतिः पाशुपाल्यं सर्वेषां न निषिध्यते ।
स्तेयं परस्त्रीहरणं हिंसा कुहककौशिके ॥
स्त्रीमद्यमांसलवणविक्रयं पतितं स्मृतम् ।
अपकृष्टनिकृष्टानां जीवनं शिल्पकर्म्मभिः ॥
हीनन्तु प्रतिलोमानामहीन मनुलोमिनाम् ।
चर्मवैणवबस्त्राणां हिंसाकर्म्मच नेजनम् ॥
माणिक्यं वपनाग्निञ्च मद्यमांसक्रिया तथा ।
सारथ्यं वाहकानाञ्च रथानां भूभृतामपि ॥
एवमादि निषिद्धं यत्प्रातिलोम्यं तदुच्यते ।
यत्सौम्यशिल्पं लोकेऽस्मिन् सौम्यं तदनुलोमकम् ॥
मृद्दारुशैललोहानां शिल्पं सौम्यमिहोच्यते ।
न्यायेन पालयेद्राजा पृथिवीं शास्त्रमार्गतः ॥
स्वराष्ट्रकृतधर्म्मस्य सदा षड्भागसिद्धये ।

राज्ञा राष्ट्रकृतं पापमिति धर्म्मविदो विदुः ॥
तस्मादपापसंयुक्तां यथा संरक्षयेद्भुवम् ।
अग्निदङ्गरदश्चौरं हिंस्रं दुर्वृत्तमेव च ॥
धूर्त्तं पतितमित्यादीन् हन्यादेवाविचारयन् ।
अङ्कयित्वा श्वपादेन गर्द्दभे चाधिरोह्य वै ॥
प्रवासयेत् स्वराष्ट्रात्तु ब्राह्मणं पतितं नृपः ।
कुलटां कामचारेण गर्भघ्नीं भर्त्तृहिंसकाम् ॥
निकृत्तकर्णनासोष्ठीं कृत्वा नारीं प्रवासयेत् ।
न्यायेन दण्डनं राज्ञः स्वर्गकीर्तिविवर्धनम् ।
अदण्ड्यान् दण्डयन् राजा तथा दण्ड्यानदण्डयन् ॥
अयशो महदाप्नोति नरकं चाधिगच्छति ।
दिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा ॥
ज्ञात्वापराधं देशं च जनं कालमदोऽपि वा ।
वयः कर्म्म च वित्तञ्च दण्डं न्यायेन पातयेत् ॥
निश्चित्य शास्त्रमार्गेण विद्वद्भिः सह पार्थिवः ।
गुरूणां तु गुरुं दण्डं पापानां च लघोर्लघुम् ॥
व्यवहारान् स्वयं पश्यन् कुर्यात् सभ्यैर्वृतोऽन्वहम् ।
मिथ्यापवादशुद्ध्यर्थं पञ्च दिव्यानि कल्पयेत् ॥
ज्ञात्वा शुद्धेषु दिव्येषु शुद्धान्वै मानयेत्तथा ।
तन्मिथ्याशंसिनं दुष्टं जिह्वाच्छेदेन दण्डयेत् ॥
अपद्रव्यादिहरणं परदाराभिमर्शनम् ।
यः कुर्यात् तु बलात् यस्य हस्तच्छेदः प्रकीर्तितः ॥
यो गच्छेत् परदारांस्तु बलात्कामाच्च वा नरः ।
सर्वस्वहरणं कृत्वा लिङ्गच्छेदञ्च दापयेत् ॥

दहेत्कटाग्निना देहं गुरुस्त्रीगामिनं तदा ।
ब्रह्मघ्नं च सुरापं वा गोस्त्रीबालनिषूदनम् ॥
देवविप्रस्वहर्तारं शूलमारोपयेन्नरम् ।
दैवतं ब्राह्मणं गाञ्च पितृमातृगुरूंस्तथा ॥
पादेन ताडयेद्यस्तु तस्य तच्छेदनं स्मृतम् ।
तेषामुपरि हस्तं तु दोष्णो श्छेदन्तु कामतः ॥
प्रत्येकं दण्डनं कुर्याद्वृत्तस्य परस्त्रियाम् ।
चुम्बने तालुविच्छेदो द्वौ हस्तौ परिरम्भणे ॥
हस्तस्याङ्गुलिविच्छेदः केशादिग्रहणे स्त्रियः ।
दाहयेत्तप्ततैलेन हस्तमुष्ट्या च ताडनम् ॥
सुरतं याचमानस्य जिह्वाच्छेदं च कामतः ।
कामेङ्गितेषु सर्वत्र तान्त्रोष्ठ दहनं स्मृतम् ॥
दृष्ट्वा मुहुः प्रेरणे तु नेत्रयोः स्फोटनं चरेत् ।
मानकूटं तुलाकूटं कूटसाक्ष्यकृतां नृणाम् ॥
सहस्रं दापयेद्दण्डं वृत्त्या स्वस्यापनायने ।
येषु केषु च पापेषु शरीरे दण्डनं स्मृतम् ॥
तेषु तेष्वङ्कनेनैव अच्चतो ब्राह्मणो व्रजेत् ।
पापानिवाङ्कयित्वास्य मुण्डयित्वा शिरोरुहान् ॥
सर्वस्वहरणं कृत्वा राष्ट्रात् सम्यक् प्रास्येत् ।
अवैष्णवं विकर्मस्थं हरिवासरभोजनम् ॥
ब्राह्मणं गार्दभं यानमारोप्येव विवासयेत् ।
न्यायेन पालयेद्राजा धर्म्मान् षड्भाग माहरेत् ॥
त्रिभागमाहरेद्धान्याङ्कनात् षड्भागमेव च ।
गोभूहिरण्यवासोभिर्धान्यरत्नविभूषणैः ॥

पूजयेद्ब्राह्मणान् भक्त्या पोषयेच्च विशेषतः॥
विम्बानि स्थापयेद्विष्णोर्ग्रामेषु नगरेषु च।
चैत्यान्यायतनान्यस्य रम्याण्येव तु कारयेत्॥
वस्त्रपुष्पोपहारौघं भूधेन्वादि समर्पयेत्।
इतरेषां सुराणां च वैदिकानां जनेश्वरः॥
धर्मतः कारयेद् यश्च चैत्यान्यायतनानि तु।
वापी कूपतड़ागादि फलपुष्पवनानि च॥
कुर्वीत सुविशालानि पूर्वकाण्यपि पालयेत्।
फलितं पुष्पितं वापि वनं च्छिन्द्यात्तु यो नरः॥
तड़ागसेतुं यो भिन्द्यात् तं शूलेनानुरोहयेत्।
अग्निदं गरदं गोघ्नं बालस्त्रीगुरुघातिनम्॥
भगिनीं मातरं पुत्रीं गुरुदारान् स्नुषामपि।
साध्वीं तपस्विनीं वापि गच्छन्तमतिपापिनम्॥
हिंस्रयन्त्रप्रयोक्तारं दाहयेद् वै कटाग्निना।
अदण्डयित्वा दुर्वृत्तान् तत्पापं पृथिवीपतिः॥
सम्प्राप्य निरयं गच्छेत्तस्मात्तान् दण्डयेत्तथा।
यः स्ववर्णाश्रमं हित्वा स्वच्छन्देन तु वर्तयेत्॥
तं दण्डयेद्वर्षशतं नाशयेत्तद्दिने शतम्।
सर्वेष्वित्येषु पापेषु धनदण्डं प्रयोजयेत्॥
पितेव पालयेद्भृत्यान् प्रजाश्च पृथिवीपतिः।
प्रजासंरक्षणार्थाय संग्रामं कारयेन्नृपः॥
तस्मिन् मृत्युर्भवेच्छ्रेयो राज्ञः संग्राममूर्द्धनि।
मृतेन लभ्यते स्वर्गं जितेन पृथिवी त्वियम्॥
यशः कीर्त्तिविवृध्यर्थं धर्मसंग्राममाचरेत्।

मुक्तशीर्षं मुक्तवस्त्रं त्यक्तहेतिं पलायितम्॥
न हन्याद्वदिनं राजा युद्धे प्रेक्षणकज्जनान्।
भग्ने स्वसैन्यपुञ्जे च संग्रामे विनिवर्त्तिनः॥
पदे पदे समग्रस्य यज्ञस्य फलमश्नुते।
नातः परतरो धर्मो नृपाणां मरशालिनाम्॥
युद्धलब्धा मही शस्या दीयते नृपसत्तमैः।
जित्वा शत्रून्महीं लब्ध्वा लब्धां यत्नेन पालयेत्॥
पालितां वर्धयेन्नित्यं वृद्धां पात्रे विनिक्षिपेत्।
पात्रमित्युच्यते विप्रस्तपोविद्यासमन्वितः॥
न विद्यया केवलया तपसा वापि पात्रता।
श्रुतमध्ययनं शीलं तपइत्युच्यते बुधैः॥
ईश्वरस्यात्मनश्चापि ज्ञानं विद्येति चोच्यते।
तथाविधेषु पात्रेषु दत्त्वा भूमिं धनं नृपः॥
शासनं कारयेत्सम्यक् स्वहस्तलिखितादिभिः।
उपजीव्योपसर्पेश्च रम्ये देशे नृपोत्तमः॥
दुर्गाणि तत्र कुर्वीत जनकस्यात्मगुप्तये।
तत्र कर्म्मसु निष्णातान् कुशलान् धर्मनिष्ठितान्॥
सत्यशौचयुतान् शुद्धानध्यक्षान् स्थापयेत् नृपः।
अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके॥
अबन्धके स्याद्द्विगुणं यथा तत्कालमात्रकम्।
लिखयेत्तदृणं सम्यक् सममासादिकल्पनैः॥
देयं सवृद्ध्याधविके पुरुषैस्त्रिभिरेव तत्।
निर्धनस्तु शनैर्दद्याद्यथाकालं यथोदयम्॥
औद्धत्याद्वा बलाद्वा तु न दद्याद्धनिने ऋणम्।

दण्डयित्वैव तं राजा धनिने दापयेदृणम्॥
छिन्ने दग्धेऽथवा पत्रे साक्षिभिः परिकल्पयेत्।
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणादिभिः॥
न सन्ति साक्षिणः स्तत्र देशकालान्तरादिभिः।
शोधयित्वा तु दिव्येन दापयेद्धनिने ऋणम्॥
मध्यस्थस्थापितं द्रव्यं वर्धते न ततः परम्।
कृते प्रतिग्रहे चाधौ पूर्वो वै बलवत्तराः॥
अवधिर्द्विविधं प्रोक्तं भोग्यं गोप्यं तथैव च।
क्षेत्रारामादिकं भोग्यं गोप्यं द्रव्यमुपस्करम्॥
गोप्याधिभोगेऽत्र नो वृद्धिः सोपस्कारे तथापि ते।
नष्टं देयं विनष्टञ्च द्रव्यं राजकृताद्दृते॥
उपस्थितस्य मोक्तव्य आधिस्तेनोऽन्यथा भवेत्।
प्रयोजने सति धनं कुलेऽन्यस्याधिमाप्नुयात्॥
तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकम्।
विना धारणकाद्वापि विक्रीणितमसाक्षिकम्॥
तं वनस्थमनाख्याय धान्यमस्य न दीयते।
तदा यदधिकं द्रव्यं प्रतिदेयं तथैव च॥
न दाप्योऽपहृतन्यस्तराजदैविकतस्करैः।
न प्रदद्यात्तु तन्मोहात्स दण्ड्यश्चोरवत्तदा॥
ददीत स्वेच्छया दण्डं दापयेद्वापि सोदरम्।
याचितान्वाहितं न्यायान्निक्षेपादिष्वयं विधिः॥
सुराकामद्यूतकृतं वृथा दानं तथैव च।
दण्डशुल्कानुशिष्टञ्च पुत्रो दद्यान्न पैतृकम्॥
पितरि प्रोषिते प्रेते व्यसनाभिष्टतेऽपि वा।

पुत्रपौत्रै ऋणं देयं निह्नुते साक्षिचोदितम् ॥
रिक्थग्राही ऋणं दद्याद्योषिद्ग्राहस्तथैव च ।
पुत्रो न स्वाश्रितद्रव्यः पुत्रहीनस्तु रिक्थिनः ॥
प्रातिभाव्य मृणं साक्ष्यं देयं तस्मै यथोचितम् ।
दीयते स्वात्प्रतिभुवा धनिने तु ऋणं यथा ॥
द्विगुणं तत्प्रदातव्यं दण्डं राज्ञे च तत्समम् ।
पुत्रादिभिर्न दातव्यं प्रतिभाव्य मृणं स्त्रियाम् ॥
प्रतिपन्नं स्त्रिया देयं पत्या चैवहि यत् कृतम् ।
स्वयं कृतं तु यदृणं नान्यस्त्री दातुमर्हति ॥
पत्यै स्वकं धनं पुत्रा विभजेयुः सुनिश्चितम् ।
मातृकञ्चेद् दुहितरस्तदभावे तु तत्सुतः ॥
भगिन्यश्च प्रमुदिताः पैतृकादाहरेद्धनात् ।
न स्त्रीधनं तु दायादा विभजेयुरनापदि ॥
पितृमातृसुताभ्रातृपत्यपत्यादुपागतम् ।
आधिवेतनिकाद्यं च स्त्रीधनं परिकीर्त्तितम् ॥
अपुत्रा योषितश्चैव भर्तव्या साधुवृत्तयः ।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥
नैव भागं वनस्थानां यतीनां ब्रह्मचारिणाम् ।
पाषण्डपतितानां च नचावैदिककर्मणाम् ॥
विभक्तेष्वनुजो जातः सवर्णो यदि भागभाक् ।
अविभक्तपितृकाणां पितृव्यात् भागकल्पना ॥
द्वैमातृणां मातृतश्च कल्पयेद्वा समोऽपिवा ।
विभक्तस्यास्य पुत्रस्य पत्नी दुहितरस्तथा ॥
पितरौ भ्रातरश्चैव तत्सुताश्च सपिण्डिनः ।

सम्बन्धिबान्धवाश्चैव क्रमाद् वै रिक्थभागिनः॥
सीम्नोपवादे क्षेत्रेषु सामन्ताः स्थविरादयः।
गोपाः सीमाकृषाणां च सर्वे भवनगोचराः॥
नयेयु रेते सीमानं स्थूणाङ्गारतुषद्रुमैः।
सन्तु वल्मीकलिम्नास्थिचैत्याद्यैरुपशोभिताः॥
औरसो दत्तकश्चैव क्रीतः कृत्रिमएव च।
क्षेत्रजः कानिकश्चैव दौहित्रः सप्तमः स्मृतः॥
पिण्डजश्च परश्चैषां पूर्वाभावे परः परः।
पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्रएव च॥
पुत्री च भ्रातरश्चैव पिण्डदाः स्युर्यथाक्रमात्।
एवं धर्मेण नृपतिः शासयेत्सर्वदा प्रजाः॥
यदुक्तं मनुना धर्मं व्यवहारपदं प्रति।
विलोक्य तच्च विद्वद्भिर्वीतरागैर्विमत्सरैः॥
विमृश्य धर्मविद्भिश्च विमलैः पापभीरुभिः।
धर्मेणैव सदा राजा शासयेत् पृथिवीं स्वकाम्॥
विपरीतां दण्डयेद्वै यावद्दर्पोपनाशनम्।
अस्या अपि च दण्ड्या वै शास्त्रमार्गविरोधिनः॥
राजधर्मोऽयमित्येवं प्रसङ्गात् कथितो मया।
कात्यायनेन मनुना याज्ञवल्क्येन धीमता॥
नारदेन च सम्प्रोक्तं विस्तरादिदमेव हि।
तस्मान्मया विस्तरेण नोक्त मत्र नृपोत्तम !॥
परं भागवतं धर्मं विस्तरेण ब्रवीमि ते।
विष्णोरभ्यर्चनं यत्तु नित्यं नैमित्तिकं नृप !।
यदाह भगवान् धातुस्तेन स्वायम्भुवस्य च॥

नारदस्य च मे सम्यक् तदद्य कथयामि ते।

इति हारीतस्मृतौ विशिष्टधर्मशास्त्रे प्रातःकालभगवत्-
समाराधनविधिर्नाम चतुर्थोऽध्यायः।

अम्बरीष उवाच।

भगवन्! ब्रह्मणा यत् तु सम्प्रोक्तं स्वात्मनोः पुरा।
तत्सर्वं परमं धर्मं वक्तुमर्हसि मेऽनघ!॥

हारीत उवाच।

सर्गादौ लोककर्तासौ भगवान् पद्मसम्भवः।
मन्वादिप्रमुखान् विप्रान् ससृजे धर्मगुप्तये॥
मनुश्च गुर्वशिष्ठश्च मरीचिर्दक्ष एव च।
अङ्गिराः पुलहश्चैव पुलस्त्योऽत्रिर्महातपाः॥
वेदान्तपारगास्ते च तं प्रणम्य जगद्गुरुम्।
भगवन्! परमं धर्मं भवबन्धापनुत्तये॥
वद सर्वमशेषेण श्रोतुमिच्छामहे वयम्।
इत्युक्तः स द्विजैः सोऽपि ब्रह्मा नत्वा जनार्दनम्॥
वेदान्तगोचरं धर्मं तेषां वक्तुं प्रचक्रमे।
सर्वेषामवलोकानां स्रष्टा धाता जनार्दनः॥
सर्ववेदान्ततत्त्वार्थसर्वयज्ञमयः प्रभुः।
यज्ञो वै विष्णुरित्येव प्रत्यक्षं श्रूयते श्रुतिः॥
इज्यते यत् तमुद्दिश्य परमो धर्म उच्यते।
भगवन्तमनुद्दिश्य हूयते यत्र कुत्र वै॥
तत्र हिंसाफलं पापं भवेदत्र निगर्हितम्।
तस्मात् सर्वस्य यज्ञस्य भोक्तारं पुरुषं हरिम्॥

ध्यात्वैव जुहुयात्तस्मै हव्यं दीप्ते हुताशने।
मुखमग्निर्भगवतो विष्णोः सर्वगतस्य वै॥
तस्मिन्नेव यजन्नित्यमुत्तमं मुनिसत्तमाः!।
यजेद्विप्रमुखे भक्त्या जलमन्नं फलाधिकम्॥
प्रीतये वासुदेवस्य सर्वभूतनिवासिनः।
तमेव चार्चयेन्नित्यं नमस्कुर्यात्तमेवहि॥
ध्यात्वा जपेत्तमेवेशं तमेव ध्यापयेद्धृदि।
तन्नामैव प्रगातव्यं वाचा वक्तव्य मेव च॥
व्रतोपवासनियमान् तमुद्दिश्यैव कारयेत्।
तत्समर्पितभोगः स्यादन्नपानादिभक्षणैः॥
मतिः स्वार्थः सदारेषु नेतरत्र कदाचन।
न हिंस्यात्सर्वभूतानि यज्ञेषु विधिना विना॥
सोऽहं दासो भगवतो मम स्वामी जनार्दनः।
एवं वृत्तिर्भवेदस्मिन् स्वधर्म्मः परमो मतः॥
एष निष्कण्टकः पन्था तस्य विष्णोः परं पदम्।
अन्यन्तु कुपथं ज्ञेयं निरयप्राप्तिहेतुकम्॥
भगवन्त मनुद्दिश्य यः कर्म कुरुते नरः।
स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः॥
यो हि विष्णुं परित्यजत्र सर्वलोकेश्वरं हरिम्।
इतरानर्चते मोहात्स लोकायतिकः स्मृतः॥
उक्तं धर्मं परित्यज्य यो ह्यधर्मं च वर्त्तते।
पतितः स तु विज्ञेयः सर्वधर्मवहिष्कृतः॥
यः कर्म कुरुते विप्रो विना विष्ण्वर्चनं क्वचित्।
ब्राह्मण्याद्भ्रश्यते सद्य श्चण्डालत्वं स गच्छति॥

ब्राह्मणो वैष्णवो विप्रो गुरुरग्रश्च वेदवित् ।
पर्य्यायेण च विद्येत नामानि ह्यासुरस्य हि ॥
तस्मादवैष्णवत्वेन विप्रत्वाद्भ्रश्यते हि सः ।
अर्चयित्वापि गोविन्दमितरानर्चयेत् पृथक् ॥
अवैष्णवत्वं तस्यापि मिश्रभक्त्या भवेद्ध्रुवम् ।
भोक्तारं सर्वयज्ञानां सर्वलोकेश्वरं हरिम् ॥
ज्ञात्वा तत्प्रीतये सर्व्वान् जुहुयात्सततं हरिम् ।
दानं तपश्च यज्ञश्च त्रिविधं कर्म कीर्त्तितम् ॥
तत्सर्वं भगवत्प्रीत्यै कुर्वीत सुसमाहितः ।
तस्मात्तु वैष्णवा विप्राः पूजनीया यथा हरिः ॥
ये तु वैहैतुकं वाक्यमाश्रित्यैव स्ववाग्बलात् ।
वैष्णवं प्रतिषिध्यन्ति ते लोकायतिकाः स्मृताः ॥
यो यत्तु वैष्णवं लिङ्गं धृत्वा च तमसा वृतः ।
त्यजेच्चेद्वैष्णवं धर्मं सोऽपि पाषण्डतां व्रजेत् ॥
तस्मात्तु वैष्णवो भूत्वा वैदिकीं वृत्तिमाश्रितः ।
कुर्वीत भगवत्प्रीत्यै कुर्य्याद्यज्ञादिकर्म यत् ॥
तद्विशिष्टमिति प्रोक्तं सामान्यमितरं स्मृतम् ।
फलहीना भवेत्सा तु सामान्या वैदिकक्रिया ॥
तोयवर्जितवापीव निरर्था भवति ध्रुवम् ।
नैसर्गिकन्तु जीवानां दास्यं विष्णोः सनातनम् ॥
तद्विना वर्त्तते मोहादात्मचारः सनातनात् ।
तस्मात्तु भगवद्दास्यमात्मनां श्रुतिचोदितम् ॥
दास्यं विना कृतं यत्तु तदेव कलुषं भवेत् ।
विशिष्टं परमं धर्मं दास्यं भगवतो हरेः ॥

ऋषय ऊचुः। कथं दास्यं हि तद्वृत्तिः कथं नैसर्गिकं नृणाम्।
तत्सर्वं ब्रूहि तत्त्वेन लोकानुग्रहकाम्यया॥
ब्रह्मोवाच। सुदर्शनोर्द्ध्वपुण्ड्रादिधारणं दास्यमुच्यते।
तद्विधिर्वैदिकी या च तदाज्ञा चोदिता क्रिया॥
तत्राप्याराधनत्वेन कृता पापस्य नाशिनी।
निरूपणत्वाद्दास्यस्य धार्य्यं चक्रं महात्मनः॥
अङ्गत्वात् सर्वधर्माणां वैष्णवत्वाच्च धर्मतः।
कर्म कुर्य्याद्भगवतस्तस्मै राज्ञा मनुस्मरन्॥
विधिनैव प्रतप्तेन चक्रेणैवाङ्कयेद्भुजे।
तथैव बिभृयाद्भाले पुण्ड्रं शुभ्रतरं मृदा॥
बिभृयादुपवीतन्तु सव्यस्कन्धे विधानतः।
कण्ठे पद्माक्षमालाञ्च कौशेयं दक्षिणे करे॥
उभे चिह्ने विना विप्रो न भवेद्धि कथञ्चन।
न लभेत्कर्मणां सिद्धिं वैदिकानां विशेषतः॥
आश्रमाणां चतुर्णाञ्च स्त्रीणाञ्च श्रुतिचोदनात्।
अङ्कये चक्रशङ्खाभ्यां प्रतप्ताभ्यां विधानतः॥
एकैकमुपवीतन्तु यतीनां ब्रह्मचारिणाम्।
गृहिणाञ्च वनस्थाना मुपवीतद्वयं स्मृतम्॥
सोत्तरीयं त्रयं वापि बिभृयाच्छुभतन्तुना।
त्रयमूर्द्ध्वद्वयं तन्तु तन्तुत्रय मधोवृतम्॥
त्रिवृच्च ग्रन्थिनैकेन उपवीतमिहोच्यते।
अर्ककार्पासकौशेयक्षौमशोणमयानि च॥
तन्तूनि चोपवीतानां योज्यानि मुनिसत्तमाः॥
सर्वेषामप्यलाभे तु कुर्य्यात् कुशमयं द्विजः॥

ऐणेयमुत्तरीयं स्याद्वनस्थब्रह्मचारिणाम् ।
शुक्लकाषायवसने गृहस्थस्य यतेः क्रमात् ॥
उक्तालाभेषु सर्वेषाङ्कुशचीरं विशिष्यते ।
मौञ्जी वै मेखला दण्डं पालाशं ब्रह्मचारिणः ॥
त्रयस्तु वैणवा दण्डा यतेः काषायवाससी ।
कुशचीरं वल्कलं वा वनस्थस्य विधीयते ॥
कटीसूत्रञ्च कौपीनं मद्दच शुक्लवाससा ।
कुण्डले चाङ्गुलीयानि गृहस्थस्य विधीयते ॥
मुण्डिनौ सूक्ष्मशिखिनौ यत्यन्तेवासिनावुभौ ।
वानप्रस्थो यतिर्वा स्यात्सदा वै श्मश्रुरोमधृत् ॥
सुकेशो सुशिखो वा स्याद्गृहस्थः सौम्यवेषवान् ।
यतिश्च ब्रह्मचारी च उभौ भिक्षाशनौ स्मृतौ ॥
शाकमूलफलाशी स्याद्वनस्थः सततं द्विजः ।
कुसूलकुम्भधान्यो वा त्र्याहिको वा भवेद्गृही ॥
प्रतिगृह्येण सौम्येन जीवेद्यायावरेण वा ।
यस्त्वेकं दण्डमालम्ब्य धर्मं ब्राह्मं परित्यजेत् ॥
विकर्मस्थो भवेद्विप्रः स याति नरकं ध्रुवम् ।
शिखायज्ञोपवीतादि ब्रह्मकर्म यतिस्त्यजेत् ॥
सजीवं न च चण्डालो मृतश्वानोऽभिजायते ।
स्वरूपेणैव धर्मस्य त्यागो ह्यानिर्भवेद्ध्रुवम् ॥
कर्मणां फलसन्त्यागः सन्न्यासः स उदाहृतः ।
अनाश्रितः कर्मफलं कृत्यं कर्म समाचरेत् ॥
स सन्न्यासी च योगी च स मुनिः सात्त्विकः स्मृतः ।
तुष्यथ वासुदेवस्य धर्मं वै यः समाचरेत् ॥

स योगी परमैकान्तं हरेः प्रियतमो भवेत्।
मोहाद्दास्यं विना विष्णोः किञ्चित्कर्म्म समाचरेत्॥
न तस्य फलमाप्नोति तामसीं गतिमश्नुते।
हित्वा यज्ञोपवीतन्तु हित्वा चक्रस्य धारणम्॥
हित्वा शिखोर्ध्वपुण्ड्रे च विप्रत्वाद्भ्रश्यते ध्रुवम्।
पञ्चसंस्कारपूर्वेण मन्त्रमध्यापयेद्गुरुः॥
संस्काराः पञ्च कर्त्तव्याः पारमैकान्त्यसिद्धये।
प्रतिसम्वत्सरं कुर्य्यादुपाकर्म ह्यनुत्तमम्॥
सर्ववेदव्रतं कृत्वा तत्र सम्पूजयेद्धरिम्।
दद्याद्दत्तोपवीतानि विष्णवे परमात्मने॥
ब्राह्मणेभ्यश्च दत्त्वाथ बिभृयात्स्वयमेव च।
तदग्नौ पूज्य सन्तर्प्य चक्रञ्चैवाङ्कयेद्भुजे॥
एवं प्रात्याह्निकं धार्य्यमुपवीतं सुदर्शनम्।
पुण्ड्रास्तु प्रतिसन्ध्यन्तु नित्यमेव च धारयेत्॥
द्वारवत्युद्भवं गोपी चन्दनं वेङ्कटोद्भवम्।
सान्तरालं प्रकुर्वीत पुण्ड्रं हरिपदाकृति॥
श्राद्धकाले विशेषेण कर्त्ता भोक्ता च धारयेत्।
अर्थं पञ्चकृतत्वज्ञः पञ्चसंस्कारदीक्षितः॥
महाभागवतो विप्रः सततं पूजयेद्धरिम्।
नारायणः परं ब्रह्म विप्राणां दैवतं सदा॥
तस्य भुक्तावशेषन्तु पावनं मुनिसत्तमाः!।
हरिभुक्तोऽपि तं दद्यात्पितृणाञ्च दिवौकसाम्॥
तदेव जुहुयाद्वह्नौ भुञ्जीयात्तु तदेव हि।
हरेरनर्पितं यत्तु देवानामर्पितञ्च यत्॥

मद्यमांससमं प्रोक्तं तद्भुञ्जीयात्कदाचन ।
हरेः पादजलं प्राश्यं नित्यं नान्यद्दिवौकसाम् ॥
सुराणामितरेषां तु फलपुष्पजलादिकम् ।
निर्माल्यमशुभं प्रोक्तमस्पृश्यं हि कदाचन ॥
विधिर्ह्येष द्विजातीनां नेतरेषां कदाचन ।
शिवार्चनं त्रिपुण्ड्रञ्च शूद्राणां तु विधीयते ॥
तद्विधानामिदं ये च विप्राः शिवपरायणाः ।
ते वै देवलका ज्ञेयाः सर्वकर्मबहिष्कृताः ॥
वैखानसास्तु ये विप्राः हरिपूजनतत्पराः ।
न ते देवलका ज्ञेया हरिपादाब्जसंश्रयात् ॥
नापहृत्य हरिद्रव्यं ग्रामार्चनपरो भवेत् ।
भक्त्या संपूज्य देवेशं नासौ देवलकः स्मृतः ॥
भक्त्या योऽप्यर्चयेद्देवं ग्रामार्चं हरिमव्ययम् ।
प्रसादतीर्थस्वीकारान्नासौ देवलकः स्मृतः ॥
शङ्खचक्रोर्ध्वपुण्ड्रादिधारणं स्मरणं हरेः ।
तन्नामकीर्त्तनञ्चैव तत्पादाम्बुनिषेवणम् ॥
तत्पादवन्दनञ्चैव तं निवेदितभोजनम् ।
एकादश्युपवासश्च तुलस्यैवार्चनं हरेः ॥
तदीयानामर्चनञ्च भक्तिर्नवविधा स्मृता ।
एतैर्नवविधैर्युक्तो वैष्णवः प्रोच्यते बुधैः ॥
एतैर्गुणैर्विहीनस्तु न तु विप्रो न वैष्णवः ।
कर्मणा मनसा वाचा न स्मरेद्यो जनार्दनम् ॥
भक्तिः सा सात्त्विकी ज्ञेया भवेदव्यभिचारिणी ।
नान्यं देवं नमस्कुर्यान्नान्यं देवं प्रपूजयेत् ॥

नान्यप्रसादं भुञ्जीत नान्यदायतनं विशेत् ।
न त्रिपुण्ड्रं तथा कुर्य्यात्पट्टाकारं जगत्त्रयम् ॥
यतिर्यस्य गृहे भुङ्क्ते तस्य भुङ्क्ते हरिं स्वयम् ।
हरिर्यस्य गृहे भुङ्क्ते तस्य भुङ्क्ते जगत्त्रयम् ॥
महाभागवतो विप्रः सततं पूजयेद्धरिम् ।
पाञ्चकाल्यं विधानेन निमित्तेषु विशेषतः ॥
अप्स्वग्नौ हृदये सूर्य्ये स्थण्डिले प्रतिमासु च ।
षट्सु तेषु हरेः पूजा नित्यमेव विधीयते ॥
स्नानकाले तु संप्राप्ते नद्यां पुण्यजले शुभे ।
ध्यात्वा नारायणं देवं नागपर्य्यङ्कशायिनम् ॥
द्वादशार्णेन मनुना सोऽर्चयित्वाऽक्षतादिभिः ।
अष्टोत्तरशतं जप्त्वा ततः स्नानं समाचरेत् ॥
एतदप्यर्चनं प्रोक्तं ब्राह्मणस्य जगत्पतेः ।
होमकाले तु सततं परिस्तीर्यानलं शुभम् ॥
यज्ञरूपं महात्मानं चिन्तयेत् पुरुषोत्तमम् ।
साङ्गत्रयीमयं शुभ्रदिव्याङ्गोपाङ्गशोभितम् ॥
सर्वलक्षणसम्पन्नं शुद्धजाम्बूनदप्रभम् ।
युवानं पुण्डरीकाक्षं शङ्खचक्रधनुर्धरम् ॥
सर्वयज्ञमयं ध्यायेद्वामाङ्कश्रितपद्मया ।
सम्पूज्य चाक्षतैरेव पश्चाद्धोमं समाचरेत् ॥
प्राणाग्निहोत्रसमये सम्यगाचम्य वारिणा ।
कुशासने समासीनः प्राग्वा प्रत्यङ्मुखोऽपि वा ।
पतिष्ठासनमात्मानं प्राणायामं समाचरेत् ॥
मन्त्रेणोद्बुध्य हृदयपङ्कजं केशरान्वितम् ।

तस्मिन्वह्न्यर्कशीतांशुबिम्बान्यनु विचिन्तयेत् ॥
सर्वाक्षरमयं दिव्यरत्नपीठं तदुत्तरे।
तन्मध्येऽष्टदलं पद्मं ध्यायेत्कल्पतरोरधः॥
वीरासने समासीनं तस्मिन्नीशं विचिन्तयेत्।
स्निग्धदूर्वादलश्यामं सुन्दरं भूषणैर्युतम्॥
पीताम्बरं युवानं च चन्दनस्रग्विभूषितम्।
शरत्पद्मारुणं रक्तपद्माभाङ्घ्रिकरद्वयम्॥
स्निग्धवर्णं महाबाहुं विशालोरस्कमव्ययम्।
चक्रशङ्खगदाबाणपाणिं रघुवरं हरिम्॥
जानकीलक्ष्मणोपेतं मनसैवार्च्चयेद्विभुम्।
मन्त्रद्वयेनार्च्चयित्वा जप्त्वा चैव षडक्षरम्॥
पश्चाद् वै जुहुयात् पञ्च प्राणानभ्यर्च्च्य तं पुनः।
ध्यायन्वै मनसा विष्णुं सुखं भुञ्जीत वाग्यतः॥
एवं ह्यर्च्चनं विष्णोरुत्तमं मुनिसत्तमाः!।
अत्यन्ताभिमता विष्णो र्हृत्पूजा परमात्मनः॥
सन्ध्याकाले तु सम्प्राप्ते रविमण्डलमध्यगम्।
हिरण्यगर्भं पुरुषं हिरण्यवपुषं हरिम्॥
श्रीवत्सकौस्तुभोरस्कं वैजयन्तीविराजितम्।
शङ्खचक्रादिभिर्युक्तं भूषितैर्दोर्भिरायतैः॥
शुक्लाम्बरधरं विष्णुं मुक्ताहारैर्विभूषितम्।
ध्यात्वा समर्च्चयेद्देवं कुसुमैरक्षतैरपि॥
प्रणवेण च सावित्र्या पश्चात् सूक्तं निवेदयेत्।
ध्यायन्नेवं जपेद्विष्णुं गायत्रीं भक्तिसंयुतः॥
तथैवाभ्यर्च्च्य गोविन्दं नमस्कृत्वा विवर्जयेत्।

एवमभ्यर्च्चयेद्देवं त्रिसन्ध्यासु तथा हरिम् ॥
वैश्वदेवावसाने तु पुरस्ताद्वै विभावसोः ।
उपलिप्य स्थण्डिले तु जुहुयाद्भक्तिकर्म्म तत् ॥
ध्यात्वा सर्व्वगतं विष्णुं घनश्यामं सुलोचनम् ।
कौस्तुभोद्भासितोरस्कं तुलसीवनमालिनम् ॥
पीताम्बरधरं देवं रत्नकुण्डलशोभितम् ।
हरिचन्दनलिप्ताङ्गं पुण्डरीकायतेक्षणम् ॥
मौक्तिकान्वितनासाग्रं जगन्मोहनविग्रहम् ।
गोपीजनैः परिवृतं वेणुं गायन्तमच्युतम् ॥
ध्यात्वा कृष्णं जगन्नाथं पूजयित्वा यथाविधि ।
जुहुयाद्धरिचक्रं तद्दैवानुद्दिश्य सत्तमाः ! ॥
जप्त्वा कृष्णमनुं पश्चादभ्यर्च्च्य मनसा हरिम् ।
आचम्य प्रयतो भूत्वा नमस्कृत्य विसर्जयेत् ॥
स्थण्डिलेऽभ्यर्च्चनं विष्णोरेवं कुर्य्याद्विधानतः ।
त्रिसन्ध्यास्वर्च्चयेद्विष्णुं प्रतिमासु विशेषतः ॥
सुवर्णरजताद्यैर्वा शिलादूर्वादिनाऽपि वा ।
कृत्वा विम्बं हरेः सम्यक् सर्व्वावयवशोभितम् ॥
सर्व्वलक्षणसम्पन्नं सर्व्वायुधसमन्वितम् ।
ततोऽधिवासनं कुर्य्याच्चिरात्रं शुद्धवारिषु ॥
तत्रार्च्चयेद्विधानेन जपहोमादिकर्म्मभिः ।
स्नाप्य पञ्चामृतैर्गव्यैस्तदा मन्त्रजलैरपि ॥
यज्ञपीठ्यां समारोप्य पूजयेत्तत्र दीक्षितः ।
मङ्गलद्रव्यसंयुक्तैः पूर्णकुम्भैः समन्वितः ॥
शरावैर्द्रव्यसम्पूर्णैः पताकैस्तोरणादिभिः ।

कुम्भेषु वासुदेवादीन् सुरान् संपूजयेत् क्रमात्॥
वासुदेवो हयग्रीवस्तथा सङ्कर्षणो विभुः।
महावराहः प्रद्युम्नो नारसिंहस्तथैव च॥
अनिरुद्धो वामनश्च पूजनीया यथाक्रमात्।
तस्य पूर्णशरावेषु लोकेशानर्च्चयेत्ततः॥
मध्ये तु वारुणं कुम्भं पञ्चरत्नसमन्वितम्।
पूजयेद्गन्धपुष्पाद्यैर्ध्यात्वास्मिन् जलशायिनम्॥
ततः संपूजयेद्देवं धान्योपरि निधाय च॥
व्याघ्रचर्म्म समास्तीर्य तस्मिन् कौशेयवाससि।
निवेद्य पूजयेद् विम्बं मूलमन्त्रेण वैष्णवः॥
तोरणेषु चतुर्दिक्षु चण्डादीनर्च्चयेत् तदा।
कुमुदादि सुरान् दिक्षु तथा धर्मादिदेवताः॥
संपूज्य विधिना तस्मिन् पश्चाद्धोमं समाचरेत्।
आग्नेयं कल्पयेत् कुण्डं मेखलाद्युपशोभितम्॥
अश्वत्थाद् वा शमीगर्भादाहृत्याग्नौ विनिक्षिपेत्।
वैष्णवस्य गृहाद्वापि समानीयानलं द्विजः॥
गृह्योक्तविधिनैवात्र प्रतिष्ठाप्य हुताशनम्।
इध्माधानादि पर्य्यन्तं कृत्वा होमं समाचरेत्॥
पायसेन गवाज्येन तिलैर्व्रीहिभिरेव च।
चतुर्भिर्वैष्णवैः सूक्तैः पायसं जुहुयाद्धविः॥
हिरण्यगर्भसूक्तेन श्रीसूक्तेन तथैवच।
अहं रुद्रेभिरिति च गवाज्यं जुहुयात्ततः॥
त्वमग्ने द्युभिरिति च सूक्तेन प्रत्यृचन्तिलैः।
अस्य वामेति सूक्तेन प्रत्यृचं व्रीहिभिस्तथा॥

अग्निं तरोर्दीधितिभिः सूक्तेन प्रत्यृचं तथा।
समिद्भिः पिप्पलैरौद्रैर्होतव्यं मुनिसत्तमाः!॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा।
होतव्यमाज्यं पश्चात्तु तथा मन्त्रचतुष्टयम्॥
वैकुण्ठपार्षदं होमं पायसेन घृतेन वा।
समाप्य होमं हविषः शेषं तस्मै निवेदयेत्।
चतुर्मन्त्रांश्चतुर्वेदांश्चतुर्दिक्षु जपेत्ततः॥
तत्र जागरणं कुर्य्याद्गीतवादित्रनर्त्तकैः।
रजन्यां तु व्यतीयायां स्नात्वा नद्यां विधानतः॥
वैकुण्ठतर्पणं कुर्य्यादृत्विग्भिर्ब्राह्मणैः सह।
तर्पयित्वा पितॄन् देवान्वाग्यतो भवनं विशेत्॥
आचम्य पूर्ववत् पूजां कृत्वा होमं समाचरेत्।
जुहुयाद्ब्रह्मणः सुत्यै सूक्तैश्च घृतपायसम्॥
पौरुषेण तु सूक्तेन श्रीसूक्तेन तथैव च।
वैकुण्ठपार्षदं हुत्वा कर्मशेषं समापयेत्॥
नयनोन्मीलनं कुर्य्यात् सुमुहूर्त्तेण वैष्णवः।
महाभागवतः श्रेष्ठः सूक्ष्महेमशलाकया॥
इयेनैव प्रकुर्व्वीत नयनोन्मीलनं हरेः।
निवेश्य भद्रपीठे तु स्नापयेत् सुसमाहितः॥
सर्वैश्च वैष्णवैः सूक्तैरृत्विजः कलशोदकैः।
ततस्तन्मध्यमं कुम्भमादाय द्विजसत्तमः॥
स्नापयेन्मन्त्ररत्नेन शतवारं समाहितः।
सौवर्णेन च ताम्रेण शङ्खेन रजतेन वा॥
स्नाप्य पञ्चामृतैर्गव्यैरुद्वर्त्य शुभचन्दनम्।

मन्त्रेण स्नापयित्वाथ तुलसीमिश्रितैर्जलैः ॥
वासोभिर्भूषणैः सम्यगलङ्कृत्य च वैष्णवः ।
उपचारैः समभ्यर्च्य पश्चान्नीराजयेत्तदा ॥
अलङ्कृते शुभे गेहे पीठे संस्थापयेद्धरिम् ।
सूक्तेनोत्तानपादस्य दृढं स्थाप्य सुखासने ॥
अष्टोत्तरशतं वारं शुभमन्त्रचतुष्टयात् ।
ध्यात्वा पुष्पाञ्जलिं दद्यान्महाभागवतोत्तमः ॥
नत्वा गुरून् परं धाम्नि स्थितं देवं सनातनम् ।
ध्यात्वैव मन्त्ररत्नेन तस्मिन् विम्बे निवेशयेत् ॥
अर्चयित्वोपचारैस्तु मङ्गलानि निवेदयेत् ।
दर्पणं कपिलां कन्यां शङ्खं दूर्व्वाक्षतान् पयः ॥
सौवर्णमाज्यं लाजांश्च मधुसर्षपमञ्जनम् ।
एवं त्रयोदशे मासि मङ्गलानि निवेदयेत् ॥
तथैव दशमुद्राश्च मन्त्रेणैव समीक्षयेत् ।
तद्विम्वमूर्त्तिमन्त्रेण पश्चाद्दशशतानि तु ॥
पुष्पाणि दद्यान्नत्वा च जपेच्च सुसमाहितः ।
सतिलैस्तण्डुलैः शुभ्रै र्जुहुयाच्च द्विजोत्तमाः ! ॥
आशिषोवाचनं कृत्वा दीपैर्नीराजयेत्तदा ।
भोजयित्वा ततो विप्रान् दक्षिणाभिश्च तोषयेत् ॥
आचार्य्यमृत्विजश्चापि विशेषेण समर्चयेत् ।
तदग्निं संग्रहेन्नित्यं होमार्थं परमात्मनः ॥
चिरात्समुत्सवं तत्र कुर्य्याच्छक्त्या यतात्मवान् ।
वैष्णवैः पापमासुश्च तत्र पुष्पाञ्जलिं चरेत् ॥
आजीवन चरणा वापि होमं कुर्व्वीत वैष्णवः ।

शत्वहं भोजयेद्विप्रान् वैष्णवान् घृतपायसम् ॥
तन्मूर्त्तिप्रीतये भक्त्या दद्याद्वासांसि दक्षिणाः ।
कुर्य्यादवभृथेष्टिञ्च महाभागवतैः सह ॥
सहस्रनामभिर्विष्णोः सूक्तैर्विष्णुप्रकाशकैः ।
नद्यामवभृथं कृत्वा तर्पयेत्पितृदेवताः ॥
अस्य वामीति सूक्तेन पायसं मधुसंयुतम् ।
आज्येन मूलमन्त्रेण सहस्रं जुहुयात्तदा ॥
आशिषो वाचनं कृत्वा भोजयेद्विजसत्तमान् ।
एवं संस्थापयेद्देवमर्च्चयेद्विधिना तदा ॥
गृहार्च्चाया स्थापने तु लघुतन्त्रं समाचरेत् ।
अधिवासनमित्यादि मन्त्रमत्र विवर्जयेत् ॥
एकत्र पञ्चगव्येषु विनिक्षिप्य परेऽहनि ।
पञ्चामृतैः स्नापयित्वा पश्चादुद्वर्त्तनादिकम् ॥
आदाय कलशं शुद्धं पवित्रोदकपूरितम् ।
निक्षिप्य पञ्चरत्नानि सुवर्णतुलसीदलम् ॥
चन्दनाक्षतदूर्व्वाश्च तिलान् धात्रीश्च सर्षपम् ।
अभिमन्त्र्य कुशैः पश्चान्मन्त्ररत्नेन वैष्णवः ॥
शतवारं सहस्रं वा मन्त्रेणैवाभिषेचयेत् ।
सर्वैश्च वैष्णवैः सूक्तैर्गायत्र्या वैष्णवेनच ॥
नामभिः केशवाद्यैश्च सर्वैर्मन्त्रैश्च वैष्णवैः ।
स्नापय वस्त्रैर्भूषणैश्च शुभे धान्ये निवेशयेत् ॥
स्थण्डिलेऽग्निं प्रतिष्ठाप्य इध्माधानादिपूर्ववत् ।
होमं कुर्य्याद्गवाज्येन पायसान्नेन वैष्णवः ॥
कर्त्तुरौपासनाग्नौ तु होममत्र विशिष्यते ।

प्रत्यृचं वैष्णवैः सूक्तैर्जुहुयाद्घृतपायसम् ॥
अस्य वामेति सूक्तेन गवाज्यं जुहुयात्ततः।
मन्त्ररत्नेन जुहुयादष्टोत्तरसहस्रकम् ॥
तद्बिम्बमूर्त्तिमन्त्रेण तिलहोमं तथैव च।
अविज्ञातस्तु तन्मन्त्रं मूलमन्त्रेण वा यजेत् ॥
यजेच्छ्रीभूप्रकाशैश्च गायत्र्या विष्णुसंज्ञया।
वैकुण्ठपार्षदं होमं कृत्वा होमं समापयेत् ॥
नयनोन्मीलनं कृत्वा सौवर्णेन कुशेन वा।
निवेश्यावाहयेत्पीठे मन्त्ररत्नेन वैष्णवः ॥
मन्त्रेणैवार्चनं कृत्वा पश्चात् पुष्पाञ्जलिं यजेत्।
तस्मिन्बिम्बे तु तन्मूर्त्तिं ध्यात्वा नियतमानसः ॥
अष्टोत्तरसहस्रन्तु दद्यात् पुष्पाञ्जलिं ततः।
सर्वैश्च वैष्णवैः सूक्तैर्दद्यात् पुष्पाणि वैष्णवः ॥
ब्राह्मणान् भोजयेत्पश्चात्पायसान्नं घृतान्वितम्।
शक्त्या च दक्षिणां दत्त्वा विशेषेणार्चयेद्गुरुम् ॥
सहस्रनामभिः स्तुत्वा आशीर्भिरभिवादयेत्।
प्रदक्षिणनमस्कारान् कुर्व्वीतात्र पुनः पुनः ॥
प्रसीद मम नाथेति भक्त्या सम्प्रार्थयेद्विभुम्।
दीपैर्नीराजयेत्पश्चाच्छक्त्या तेन समाहितः ॥
हुतशेषं हविः प्राश्य जप्त्वा मन्त्रमनुत्तमम्।
ध्यायन् कमलपत्राक्षं भूमौ स्वप्यात् कुशोत्तरम् ॥
एवं गृहार्चां बिम्बस्य विष्णुं संस्थाप्य वैष्णवः।
अर्चयेद्विधिना नित्यं यावद्देहनिपातनम् ॥
सालग्रामशिलायान्तु पूजनं परमात्मनः।

कोटिकोटिगुणाधिकत्र भवेदत्र न संशयः ॥
न जपो नाधिवासश्च न च संस्थापनक्रिया।
सालग्रामार्च्चने विष्णुस्तस्मिन् सन्निहितस्तथा ॥
मूर्त्तीनान्तु हरे स्तस्य यस्यां प्रीतिरनुत्तमा।
तस्यामेव तु तां ध्यात्वा पूजयेत् तद्विधानतः ॥
मूर्त्यन्तरमविम्बे तु न यष्टव्यं तदेव तत्।
सालग्रामशिलायान्तु यष्टान्या इष्टमूर्त्तयः ॥
अर्चनं वन्दनं दानं प्रणामं दर्शनं नृणाम्।
सालग्रामशिलायान्तु सर्वं कोटिगुणं भवेत् ॥
न स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः।
यो वहेच्छिरसा नित्यं सालग्रामशिलाजलम् ॥
असत्यकथनं हिंसामभक्ष्याणाञ्च भक्षणम्।
सालग्रामजलं पीत्वा सर्वं दहति तत्क्षणात् ॥
द्विजानामेव नान्येषां सालग्रामशिलार्चनम्।
बालकृष्णवपुर्देवं पूजयेत्तद् द्विजः सदा ॥
पठेद्वापत्रचयेद्विष्णुं विशिष्टः शूद्रयोनिजः।
स्थण्डिले हृदये वापि पूजयेत्तद् द्विजः सदा ॥
वाराहं नारसिंहञ्च हयग्रीवञ्च वामनम्।
ब्राह्मणः पूजयेद्विष्णुं यज्ञमूर्त्तिञ्च केवलम् ॥
क्षत्रियः पूजयेद्रामं केशवं मधुसूदनम्।
नारायणं वासुदेवमनन्तञ्च जनार्द्दनम् ॥
प्रद्युम्न मनिरुद्धञ्च गोविन्दञ्चाच्युतं हरिम्।
सङ्कर्षणं तथा कृष्णं वैश्यः संपूजयेत्तदा ॥
बालं गोपालवेषं वा पूजयच्छूद्रयोनिजः।

सर्वे एव हि संपूज्या विप्रेण मुनिसत्तमाः ॥
सर्वेऽपि भगवन्मन्त्रा जप्तव्याः सर्वसिद्धिदाः।
तस्माद्द्विजोत्तमः पूज्यः सर्वेषां भूतिमिच्छताम् ॥
पञ्चसंस्कारसम्पन्नो मन्त्ररत्नार्थकोविदः।
सालग्रामशिलायां तु पूजयेत् पुरुषोत्तमम्।
पूजितस्तुलसीपत्रैर्ददाति सकलं हरिः ॥
यः श्राद्धं कुरुते विप्रः सालग्रामशिलाग्रतः।
पितॄणां तत्र तृप्तिः स्याद्गयाश्राद्धादनन्तरम् ॥
जपं हुतं तथा दानं वन्दनं च ततः क्रिया।
सालग्रामसमीपे तु सर्वं कोटिगुणं भवेत् ॥
ध्यात्वा कमलपत्राक्षं सालग्रामशिलोपरि।
पौरुषेण तु सूक्तेन पूजयेत् पुरुषोत्तमम् ॥
अनुष्टुभस्य सूक्तस्य त्रिष्टुवन्तास्य देवता।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा।
पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे तथा।
सप्तमीं वामकट्यां तु ह्यष्टमीं दक्षिणेऽपि च ॥
नवमीं नाभिदेशे तु दशमीं हृदि विन्यसेत्।
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके ॥
त्रयोदशीं दक्षिणे तु स्वास्यदेशे चतुर्दशीम्।
अक्ष्णोः पञ्चदशीं मूर्ध्नि षोडशीञ्चैव विन्यसेत् ॥
एवं न्यासविधिं कृत्वा पश्चाद्ध्यानं समाचरेत्।
सहस्रार्कप्रतीकाशङ्कन्दर्पायुतसन्निभम् ॥

युवानं पुण्डरीकाक्षं सर्वाभरणभूषितम्।
पीनवृत्तायतैर्दोर्भिश्चतुर्भिर्भूषणान्वितैः॥
चक्रं पद्मं गदां शङ्खं बिभ्राणं पीतवाससम्।
शुक्लपुष्पानुलेपञ्च रक्तहस्तपदाम्बुजम्॥
सुस्निग्धनीलकुटिलकुन्तलैरुपशोभितम्।
श्रिया भूम्या समाश्लिष्टपार्श्वं ध्यात्वा समर्चयेत्॥
यथात्मनि तथा देवे न्यासकर्म्म समाचरेत्।
आद्यया वाहनं विष्णोरासनं च द्वितीयया॥
तृतीयया च तत्पाद्यं चतुर्थ्यार्घ्यं निवेदयेत्।
पञ्चम्याचमनीयं तु दातव्यं च ततः क्रमात्।
षष्ठ्या स्नानन्तु सप्तम्या वस्त्रमप्युपवीतकम्।
अष्टम्या चैव गन्धन्तु नवम्याथ सुपुष्पकम्॥
दशम्या धूपकञ्चैवमेकादश्याच दीपकम्।
द्वादश्या च त्रयोदश्या चरुं दिव्यं निवेदयेत्॥
चतुर्दश्या नमस्कारं पञ्चदश्या प्रदक्षिणम्।
षोडश्या शयनं दत्त्वा शेषकर्म्म समाचरेत्॥
स्नानवस्त्रोपवीतेषु चरौ चाचमनं चरेत्।
हुत्वा षोडशभिर्मन्त्रैः षोडशाज्याहुतीः क्रमात्॥
तथैवाज्येन होतव्यं स्रुग्भिः पुष्पाञ्जलिं चरेत्।
तच्च सर्वं जपेत् सद्यः पौरुषं सूक्तमुत्तमम्॥
कृत्वा माध्याह्निकस्नान मूर्द्ध्वपुण्ड्रधरस्ततः।
नित्यां सन्ध्यामुपास्याथ रविमण्डलमध्यगम्॥
हरिं ध्यायन्न गदः स्यादेनसः शुचिरित्यृचा।
सावित्रीं च जपेत्तिष्ठन् प्राणानायामत्र पूर्वतः॥

सौरेण चानुवाकेन उपस्थानजपं तथा ।
आत्मानं च परीच्याथ दर्भान्तरपुटाञ्जलिम् ॥
दक्षिणाङ्के तु विन्यस्य जपयज्ञाप्तये बुधः ।
सव्याहृतिं सप्रणवां गायत्रीं तु जपेत्तदा ॥
शक्त्या च चतुरो वेदान् पुराणं वैष्णवं जपेत् ।
चरितं रघुनाथस्य गीतां भगवतो हरेः ॥
ध्यायन्वै पुण्डरीकाक्षं जप्त्वा चाप उपस्पृशेत् ।
पूर्ववत्तर्पयेद्देवं वैकुण्ठपार्षदं तथा ॥
देवानृषीन् पितॄंश्चैव तर्पयित्वा तिलोदकैः ।
निष्पीड्य वस्त्रमाचम्य गृहमाविश्य पूर्ववत् ॥
पूजयित्वाच्युतं भक्त्या पौरुषेण विधानतः ।
दैवं भूतं पैतृकं च मानुषञ्च विधानतः ॥
प्रीतये सर्वयज्ञस्य श्रीमद्विष्णोर्यजेत्ततः ।
वैकुण्ठं वैष्णवं होमं पूर्वमेव तु कुर्यात्तदा ॥
चतुर्विधेभ्यो भूतेभ्यो बलिं पश्चाद्विनिक्षिपेत् ।
द्वारि गोदोहमात्रन्तु तिष्ठेदतिथिवाञ्छया ॥
भोजयेच्चागतान् काले फलमूलोदनादिभिः ।
महाभागवतान् विप्रान् विशेषेणैव पूजयेत् ॥
मधुपर्कप्रदानेन पाद्यार्घ्याचमनादिभिः ।
गन्धैः पुष्पैश्च ताम्बूलैर्धूपैर्दीपैर्निवेदनैः ॥
ब्रह्मासने निवेश्यैव पूजयेच्छ्रद्धयान्वितः ।
सकृत्संपूजिते विप्रे महाभागवतोत्तमे ॥
षष्टिवर्षसहस्राणि हरिः संपूजितो भवेत् ।
मोहादनर्चयेद्यस्तु महाभागवतोत्तमम् ॥

कोटिजन्मार्जितात्पुण्याद्भ्रश्यते नात्र संशयः।
गृहे तस्य न चाश्नाति शतवर्षाणि केशवः॥
मुखं हि सर्वदेवानां महाभागवतोत्तमः।
तस्मिन् सम्पूजिते विप्रे पूजितं स्याज्जगत्त्रयम्॥
अर्थपञ्चकतत्त्वज्ञः सञ्चसंस्कारसंस्कृतम्।
नवभक्तिसमायुक्तो महाभागवतः स्मृतः॥
काले समागते तस्मिन् पूजिते मधुसूदनः।
क्षणादेव प्रसन्नः स्यादीप्सितानि प्रयच्छति॥
महाभागवतानाञ्च पिबेत्पादोदकं तु यः।
शिरसा वा श्रयेद्भक्त्या सर्वपापैः प्रमुच्यते॥
यस्मिन् कस्मिन् हि वसिते महाभागवतोत्तमे।
अपैत्रकरात्नमथवा तद्देशस्तीर्थसम्मितः॥
भोजयित्वा महाभागान् वैष्णवानतिथीनपि।
ततो बालसुहृद्वृद्धान् बान्धवांश्च समागतान्॥
भोजयित्वा यथा शक्त्या यथाकालं जितक्षुधः।
भिक्षां दद्यात् प्रयत्नेन यतीनां ब्रह्मचारिणाम्॥
शूद्रो वा प्रतिलोमो वा पथि श्रान्तः क्षुधातुरः।
भोजयेत्तं प्रयत्नेन गृहमभ्यागतो यदि॥
पाषण्डः पतितो वापि क्षुधार्त्तो गृहमागतः।
नैव दद्यात् स्वपक्वान्न माम मेव प्रदापयेत्॥
स्वशक्त्या तर्पयित्वैवमतिथीनागतान् गृहे।
सम्यङ्निवेदितं विष्णोः स्वयं भुञ्जीत वाग्यतः॥
प्रक्षाल्य पादौ हस्तौ च समग्रगाचमत्र वरिणा।
विष्णोरभिमुखं पीठे हेमदिग्धे कुशोत्तरे॥

प्राग्वा प्रत्यङ्मुखा वापि जान्वीरन्तःकरः शुचिः ।
उदङ्मुखो वा पैत्रे तु समासीताभिपूजितः ॥
वंशतालादिपत्रेषु कृतं वसनमश्म च ।
कपाल मिष्टकं वापि वर्णं तृणमयं तथा ॥
चर्मासनं शुष्ककाष्ठं खलं पर्य्यङ्कमेव च ।
निषिद्धदा तु पीठं च दान्तमस्थिमयञ्च तत् ॥
दग्धं परावितं तालमायसञ्च विवर्जयेत् ।
विभीतकन्तिन्दुकञ्च करञ्जं व्याधिघातकम् ॥
भल्लातकं कपित्थं च हिन्तालं शिग्रुमेव च ।
निषिद्धतरवो ह्येते सर्वकर्मसु गर्हिताः ॥
शुद्धदारुमये पीठे समासीत कुशोत्तरे ।
पीठत्वलाभे सौम्ये स्यात् कुवलं कुशविष्टरम् ॥
चतुरस्रं त्रिकोणं वा वर्त्तु लञ्चार्द्धचन्द्रकम् ।
वर्णानामानुपूर्व्येण मण्डलानि यथाक्रमात् ॥
स्वलङ्कृते मण्डलेऽस्मिन् विमलं भाजनं न्यसेत् ।
स्वर्णं रौप्यं च कांस्यं वा पर्णं वा शास्त्रचोदितम् ॥
चतुःषष्टिफलं कांस्यं तदर्थं पादमेव वा ।
गृहिणामेव भोज्यं स्यात् ततो हीनन्तु वर्जयेत् ॥
पलाशपद्मपत्रे तु गृही यत्नेन वर्जयेत् ।
यतीनाञ्च वनस्थानां पितृणाञ्च शुभप्रदम् ॥
वटाश्वत्थार्कपर्णानि कुम्भीतिन्दुकयोस्तथा ।
एरण्डतालविल्वेषु कोविदारकरञ्जके ॥
भल्लातकाश्वपर्णानां पर्णानि परिवर्जयेत् ।
मोचागर्भपलाशं च वर्जयन्तत्तुसर्वदा ॥

मधूकं कुटजं व्राह्मजम्बूप्लक्षमुदुम्बरम् ।
मातुलङ्गं पनसं च मोचाचर्म्मदलानि च ॥
पालाश्यवर्णं श्रीपर्णं शुभानीमानि भोजने ।
यथाकालोपपन्ने तु भोजने घृतसंस्कृते ॥
पत्रपात्रादिभिर्दत्तवस्तु वासुदेवार्पिते शुभे ।
गायत्र्या मूलमन्त्रेण संप्रोक्ष्य शुभवारिणा ॥
ऋतसत्याभ्यामिति च मन्त्राभ्यां परिषेचयेत् ।
अन्नरूपं विराजं सन्ध्यात्वा मन्त्रं जपेद्बुधः ॥
ध्यात्वा हृत्पङ्कजे विष्णुं सुधांशुसदृशद्युतिम् ।
शङ्खचक्रगदापद्मपाणिं वै दिव्यभूषणम् ॥
मनसैवार्चयित्वाथ मूलमन्त्रेण वैष्णवः ।
पादोदकं हरेः पुण्यं तुलसीदलमिश्रितम् ।
अमृतोपस्तरणमसीति मन्त्रेण प्राशयेत् ॥
उद्दिश्यैव हरिं प्राणान् जुहुयात् सघृतं हविः ॥
अन्नलाभे तु होतव्यं शाकमूलफलादिभिः ।
पञ्चप्राणाद्या हुतयो मन्त्रैस्तैर्जुहुयाद्धरेः ॥
श्रद्धायां प्राणेनिष्ठेति मन्त्रेण च यथाक्रमात् ।
तर्जनीमध्यमाङ्गुष्ठैः प्राणायेति यजेद्धविः ॥
मध्यमानामिकाङ्गुष्ठैरपानायेत्यनन्तरम् ।
कनिष्ठानामिकाङ्गुष्ठैर्व्यानायेत्याहुतिं ततः ॥
कनिष्ठतर्जन्यङ्गुष्ठैरुदानायेति वै यजेत् ।
समानायेति जुहुयात्सर्वैरङ्गुलिभिर्द्विजः ॥
अयमग्निर्वैश्वानरिरित्यात्मानमनन्तरम् ।
शतमष्टोत्तरं मन्त्रं मनसैव जपेत्ततः ॥

ध्यायन् नारायणं देवं भुञ्जीयात् तु यथासुखम्।
वक्त्रादपादयन् ग्रासं चिन्तयन्मधुसूदनम्॥
नासनारूढपादस्तु न वेष्टितशिरास्तथा।
न स्कन्दयन् न च हसन् वहिर्नाप्यवलोकयन्॥
नात्मीयान् प्रलपन् जल्पन् बहिर्जानुकरो न च।
न वादकोपितनरः पृथिव्यामपि वा न च॥
न प्रसारितपादश्च नोत्सङ्गकृतभाजनः।
नाश्नीयाद्भार्यया सार्धं न पुत्रैर्वापि विह्वलः॥
न शयानो नातिसङ्गी न विमुक्तशिरोरुहः।
अन्नं वृथा न विकिरन् निष्ठीवन् नातिकाङ्क्षया॥
नातिशब्देन भुञ्जीत न वस्त्रार्धोपवेष्टितः।
प्रगृह्य पात्रं हस्तेन भुञ्जीयात् पेटके यदि॥
चषके पुटके वापि पिबेत्तोयं द्विजोत्तमः।
तक्रं वाप्यथ वा क्षीरं पानकं वापि भोजने॥
वक्त्रेण सान्तर्धानेन दत्तमन्येन वा पिबेत्।
ग्रासशेषं नचाश्नीयात्पीतशेषं पिबेन्न तु॥
शाकमूलफलादीनि दन्तच्छिन्नं न खादयेत्।
उद्धृत्य वामहस्तेन तोयं वक्त्रेण यः पिबेत्॥
स सुरां वै पिबेद्दत्तां सद्यः पतति रौरवे।
शब्देनापोशनं पीत्वा शब्देन दधिपायसे॥
शब्देनान्नरसं क्षीरं पीत्वैव पतितो भवेत्।
प्रत्यक्षलवणं शुक्तं क्षीरं च लवणान्वितम्॥
दधि हस्तेन भक्षीतं सुरापानसमं स्मृतम्।
आरनालरसं तद्वत्तद्वैवानार्पितं हरेः॥

आसनेन तु पात्रेण नैव दद्याद्घृतादिकम् ।
नोच्छिष्टं घृतमादद्यात् पैतृके भोजने विना ॥
तथैव तु पुरोडाशं पृषदाज्यञ्च माक्षिकम् ।
पानीयं पायसं क्षीरं घृतं लवणमेव च ॥
हस्तदत्तं न गृह्णीयात्तुल्यं गोमांसभक्षणम् ।
अपूपं पायसं मांसं यावकं कृसरं मधु ॥
केवलं यो वृथाश्नाति तेन भुक्तं सुरासमम् ।
करञ्जं मूलकं शोग्रु लशुनं तिलपिष्टकम् ॥
तालास्थि श्वेतवृन्ताकं सुरापानसमं स्मृतम् ।
अन्यच्च फलमूलाद्यं भक्ष्यं पानादिकञ्च यत् ॥
स्रक्चन्दनादि ताम्बूलं यो भुङ्क्ते ह्यर्पितम् ।
कल्पकोटिसहस्राणि रेतोविण्मूत्रभाग् भवेत् ॥
तस्मात्सर्वं सुविमलं हरिभुक्तं यथोक्तवत् ।
स पवित्रेण यो भाङ्क्ते सर्वयज्ञफलं लभेत् ॥
ध्यायन् नारायणं देवं वाग्यतः प्रयतात्मवान् ।
भुक्त्वावनतिरत्वैव प्राशयेदम्बु निर्मलम् ॥
अमृतापिधानमसीतिमन्त्रेण कुशपाणिना ।
किञ्चिदन्नमुपादाय पीतशेषेण वारिणा ॥
पैतृकेन तु तीर्थेन भूमौ दद्यात्तदर्थिनाम् ।
रौरवे नरके घोरे वसतां क्षुत्पिपासया ॥
तेषामन्नं सोदकञ्च अक्षय्यमुपतिष्ठतु ।
इति दत्त्वोदकं तेषां तस्मिन्नेवासने स्थितः ॥
प्रक्षाल्य हस्तौ पादौ च वक्त्रं संशोध्य वारिभिः ।
द्विराचम्य विधानेन मन्त्रेण प्राशयेज्जलम् ॥

पीत्वा मन्त्रजलं पश्चादाचम्य हृदयाम्बुजे ।
राममिन्दीवरश्यामं चक्रशङ्खधनुर्धरम् ॥
युवानं पुण्डरीकाक्षं ध्यात्वा मन्त्रं जपेद्बुधः ।
समासीनः सुखासने वेदमध्यापयेत्ततः ।
सच्छिष्यान् यांस्तु शास्त्रं वा स्नेहाद्वा धर्म्मसंहिताम् ।
इतिहासपुराणं वा कथयेच्छृणुयाच्च वा ।
रक्षावस्तङ्गते सन्ध्यां वहिः कुर्व्वीत पूर्व्ववत् ॥
वहिः सन्ध्या शतगुणं गोष्ठे शतगुणं तथा ।
गङ्गाजले सहस्रं स्यादनन्तं विष्णुसन्निधौ ॥
उपास्य पश्चिमां सन्ध्यां जप्त्वा जपत्रं समाहितः ।
पूर्व्ववत् पूजयेद्विष्णुं गन्धपुष्पाक्षतादिभिः ॥
अष्टाक्षरविधानेन निवेश्यैवं समाहितः ।
सायमौपासनं हुत्वा वैष्णवं होममाचरेत् ॥
ध्यात्वा यज्ञमयं विष्णुं मन्त्रेणाष्टोत्तरं शतम् ।
तिलव्रीह्याज्यचरुभिस्तत्तैकेनापि वा यजेत् ॥
वैश्वदेवं भूतबलिं हुत्वा दत्त्वा च आचमेत् ।
शय्यायां विन्यसेद्देवं पर्य्यङ्के समलङ्कृते ॥
सविताने गन्धपुष्पधूपैरामोदिते शुभे ।
शाययित्वा च देवेशं देवीभ्यां सहितं हरिम् ॥
हिरण्यगर्भसूक्तेन नासदासीदनेन च ।
कृत्वा पुष्पाञ्जलिं पश्चादुपचारैः समर्चयेत् ॥
श्रिये जात इत्यृचैव ध्रुवसूक्तेन च द्विजः ।
दीपैर्नीराजनं कृत्वा पश्चादर्घ्यं निवेदयेत् ॥
सुवाससा यवनिकां विन्यस्याथ समाहितः ।

द्वादशार्णं महामन्त्रं जपेदष्टोत्तरं शतम् ॥
अस्त्रैश्च शङ्खचक्राद्यैर्दिक्षु रक्षां सुविन्यसेत् ।
स्तोत्रैः स्तुत्वा नमस्कृत्वा पुनः पुनरनन्तरम् ॥
वैष्णवैश्च सुहृद्भिश्च भुञ्जीयादर्पितं हरेः ।
आचम्याग्निमुपस्पृश्य समासीनस्तु वाग्यतः ॥
ध्यायन् हृदि शुभं मन्त्रं जपेदष्टोत्तरं शतम् ।
शेषाहिशायिनं देवं मनसैवार्चयेत्ततः ॥
शयीत शुभशय्यायां विमले शुभमण्डले ।
ऋतौ गच्छेद्धर्मपत्नीं विना पञ्चसु पर्वसु ॥
पुत्रार्थी चेत्तु युग्मासु स्त्रीकामी विषमासु च ।
न श्राद्धदिवसे चैव नोपवासदिने तथा ॥
नाशुचिर्मलिनो वापि न चैव मलिनां तथा ।
न क्रुद्धां न च क्रुद्धः सन् न रोगी नच रोगिणीम् ॥
न गच्छेत् क्रूरदिवसे मघामूलद्वयोरपि ।
ब्राह्मे मुहूर्ते उत्थाय आचामेत्प्रयतात्मवान् ॥
यती च ब्रह्मचारी च वनस्थो विधवा तथा ।
अजिने कम्बले वापि भूमौ स्वप्यात् कुशोत्तरे ॥
ध्यायन्तः पद्मनाभं तु शयीरन् विजितेन्द्रियाः ।
अर्पयेद्वार्चयेद्विष्णुं त्रिकालं श्रद्धयान्विताः ॥
आचरेयुः परं धर्मं यथावृत्त्यनुसारतः ।
प्रातः कृष्णं जगन्नाथं कीर्तयेत् पुण्यनामभिः ॥
शौचादिकन्तु यत्कर्म पूर्व्वोक्तं सर्वमाचरेत् ।
नैमित्तिकविशेषेण पूजयेत् पतिमव्ययम् ॥
तत्तत्काले तु तन्मूर्त्तेरर्चनं मुनिभिः स्मृतम् ।

प्रसुप्ते पद्मनाभेतु नित्यं मासचतुष्टयम् ॥
द्रोख्यान्दोलायामपि वा भक्त्या संपूजयेद्विभुम् ।
क्षीराब्धौ शेषपर्य्यङ्के शयानं रमया सह ॥
नीलजीमूतसङ्काशं सर्व्वालङ्कारसुन्दरम् ।
कौस्तुभोद्भासिततनुं वैजयन्त्या विराजितम् ॥
लक्ष्मीघनकुचस्पर्शशुभोरस्कं सुवर्चसम् ।
ध्यात्वैवं पद्मनाभन्तु द्वादशार्णेन नित्यशः ॥
पूजयेद्गन्धपुष्पाद्यै स्त्रिसन्ध्यास्वपि वैष्णवः ।
निवेद्य पायसान्नं तु दद्यात् पुष्पाञ्जलिं ततः ॥
सहस्रं शतवारं वा इयं मन्त्रं जपेत्सुधीः ।
द्वादशार्णमनुश्चैव जलाज्येन तिलैश्च वा ॥
केवलं चरुणा वापि जुहुयात्प्रतिवासरम् ।
अधःशायी ब्रह्मचारी सर्वभोगविवर्जितः ॥
वार्षिकांश्चतुरो मासान् एवमभ्यर्च्च्य केशवम् ।
बोधयित्वाथ कार्त्तिक्यां दद्यात् पुष्पाण्यनेकशः ॥
साज्यैस्तिलैः पायसेन मधुना च सहस्रशः ।
मूलमन्त्रेण जुहुयात् सूक्तेनावभृथं ततः ॥
सहस्रनामभिः कृत्वा दद्यादर्पणमेव च ।
गृहं गत्वाथ देवेशम्पूजयित्वा यथाविधि ॥
भोजयेद्वैष्णवान् विप्रान् दक्षिणाभिश्च तोषयेत् ।
शुक्लपक्षे नभोमासि द्वादश्यां वैष्णवः शुचिः ॥
पवित्ररोपणं कुर्य्यान्नाभिमात्रायतं न्यसेत् ।
तथा वक्षसि पर्य्यन्तं सहस्रन्तान्तवं स्मृतम् ॥
कुशग्रन्थिसहस्रन्तु पादान्तं विन्यसेत्ततः ।

सौवर्णीं राजतीं सूत्रां शतग्रन्थियुतां न्यसेत् ॥
मृणालतान्तवं पश्चात् पुष्पमालां ततः परम् ।
शतमौक्तिकहाराणि नानारत्नमयान्यपि ॥
उपोष्यैकादशीं तत्र रात्रौ जागरणान्वितः ।
अभ्यर्च्चयेज्जगन्नाथं गन्धपुष्पफलादिभिः ॥
नीत्वा रात्रिं नर्त्तकाद्यैः प्रभाते विमले नदीम् ।
गत्वा स्नात्वा च विधिना तर्पयित्वेशमर्च्चयेत् ॥
सर्वैश्च वैष्णवैः सूक्तैर्मध्वाज्यतिलपायसैः ।
हुत्वा दत्त्वा दशांशेन सहस्रं जुहुयात्ततः ॥
पश्चादारोपयेद्विष्णोः पवित्राणि शुभानि वै ।
पवस्व सोम इति च जपन् सूक्तं सुपावनम् ॥
निवेदयेत्पवित्राणि तथा विष्णोर्यथाक्रमात् ।
मन्दिरं कुशयोक्त्रेन वेष्टयन् परमात्मनः ॥
वितानपुष्पमालाद्यै रलङ्कृत्य च सर्व्वतः ।
सहस्रं द्वादशांशेन भक्त्या पुष्पाञ्जलिं न्यसेत् ॥
अथोपनिषदुक्तानि पञ्चसूक्तान्यनुक्रमात् ।
त्वेह यत्पीतमित्यादि जपन् पुष्पाञ्जलीनतः ॥
ब्राह्मणान् भोजयेत्पश्चात् स्वयं कुर्व्वीत पारणम् ।
शक्त्या वा चोत्सवं कुर्य्यात्त्रिरात्रं वैष्णवोत्तमः ॥
प्रत्यब्दमेवं कुर्व्वीत पवित्रारोपणं हरेः ।
क्रतुकोटिसहस्रस्य फलं प्राप्नोत्यसंशयः ॥
तत्र दुर्भिक्षरोगादिभयं नास्ति कदाचन ।
संप्राप्ते कार्त्तिके मासे सायाह्ने पूजयेद्धरिम् ॥
हृद्यैः पुष्पैश्च जातीभिः कोमलैस्तुलसीदलैः ।

अर्चयेद्विष्णुं गायत्र्यानुवाकैर्वैष्णवैरपि ॥
पावमान्यैश्च तन्मासं भक्त्या पुष्पाञ्जलिं न्यसेत् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥
अष्टाविंशति वा शक्त्या दद्याद्दीपान् सुपालिकान् ।
सुवासितेन तैलेन गवाज्येनाथवा हरेः ॥
अष्टोत्तरशतं नित्यं तिलहोमं समाचरेत् ।
मनुना वैष्णवेनापि गायत्र्या विष्णुसंज्ञया ॥
हुत्वा पुष्पाञ्जलिं दत्त्वा ताभ्यामेव तदा विभोः ।
हविष्यं मोदकं शुद्धं नक्तं भुञ्जीत वाग्यतः ॥
तैलं शुक्तं तथा मांसं निष्पावान्माषिकं तथा ।
चणकानपि माषांश्च वर्जयेत्कार्त्तिकेऽहनि ॥
भोजयेद्वैष्णवान् विप्रान् नित्यं दानादिशक्तयः ।
अन्ते च भोजयेद्विप्रान् दक्षिणाभिश्च तोषयेत् ॥
एवं संपूज्य देवेशं कार्त्तिके क्रतुकोटिभिः ।
पुण्यं प्राप्यानघो भूत्वा विष्णुलोके महीयते ॥
दशमीमिश्रितां त्यक्त्वा वेलायामरुणोदये ।
उपोष्यैकादशीं शुद्धां द्वादशीं वापि वैष्णवः ॥
स्नात्वामलक्या नद्यां तु विधानेन हरिं यजेत् ।
सुगन्धकुसुमैः शुभ्रैरुपचारैश्च सर्वशः ॥
रात्रौ जागरणं कुर्य्यात् पुराणं संहितां पठेत् ।
जागरेऽस्मिन्नशक्तश्चेद्दर्भानास्तीर्य वैष्णवः ॥
पुरतो वासुदेवस्य भूमौ स्वप्यात्समाहितः ।
ततः प्रभातसमये तुलसीमिश्रितैर्जलैः ॥
स्नात्वा सन्तर्प्य देवेशं तुल्यस्या मूलमन्त्रतः ।

द्वयेन वा विष्णुसूक्तैः कुर्य्यात् पुष्पाञ्जलींस्ततः ॥
तथैव जुहुयादाज्यं मन्त्रेणैव शतं ततः ।
पायसान्नं निवेद्येशे ब्राह्मणान् भोजयेत्ततः ॥
ध्यायन् कमलपत्राक्षं स्वयं भुञ्जीत वाग्यतः ।
अहःशेषं समानीय पुराणं वाचयन् बुधः ॥
सायाह्ने समनुप्राप्ते दोलायां पूजयेद्धरिम् ।
अभ्यर्च्य गन्धपुष्पाद्यैर्भक्ष्यैर्नानाविधैरपि ॥
ब्राह्मणस्तु सूक्तैश्च शनैर्दोलां प्रचालयेत् ।
इतिहासपुराणाभ्यां गीतवाद्यैः प्रबन्धकैः ॥
एवं संपूजयेद्देवं तस्यां निशि समाहितः ।
मध्याह्ने पूजयेद्विष्णुं वैष्णवेन समाहितः ॥
चम्पकैः शतपत्रैश्च करवीरैः सितैरपि ।
वैष्णवेनैव मन्त्रेण पूजयेत्कमलापतिम् ॥
नकरीन्द्रेति सूक्तेन दद्यात् पुष्पाञ्जलिं हरेः ।
मन्त्रेणाष्टोत्तरशतं दद्यात् पुष्पाणि भक्तितः ॥
तथैव होमं कुर्वीत तिलैर्व्रीहिभिरेव वा ।
सुदध्यन्नं फलयुतं नैवेद्यं विनिवेदयत् ॥
दीपैर्नीराजनं कृत्वा वैष्णवान् भोजयेत्ततः ।
मन्दवारे तु सायाह्ने तावत्सम्यगुपोषितः ॥
तिलैः स्नात्वा विधानेन सन्तर्प्य च सनातनम् ।
नृसिंहवपुषं देवं पूजयेत्तद्विधानतः ॥
मन्त्रराजेन गायत्र्या मूलमन्त्रेण वा यजेत् ।
अखण्डविल्वपत्रैश्च जातिकुन्दैश्च यूथिकैः ॥
छन्नः पञ्चोशना शान्त्याः त्वमग्ने ! द्युभिरोति च ।

दद्यात् पुष्पाञ्जलिं भक्त्या मन्त्रेणैव शतं यथा ॥
आभ्यामेवानुवाकाभ्यां प्रत्यृचं जुहुयाद् घृतम्।
मन्त्रेणाष्टोत्तरशतं विल्वपत्रैर्घृतान्वितैः ॥
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत्।
मधुशर्करसंयुक्तानपूपान् मोदकांस्तथा ॥
मण्डकान् विविधान् भक्ष्यान् सूपान्नं मधुमिश्रितम्
सुवासितं पानकञ्च नृसिंहाय समर्पयेत् ॥
नृत्यं गीतं तथा वाद्यं कुर्वीत पुरतो हरेः।
भोजयेच्च ततो विप्रान् नव सप्ताथ पञ्च वा ॥
हर्यर्पितहविष्यान्नं भुञ्जीयाद्वाग्यतः स्वयम्।
ध्यायेन्नृसिंहं मनसा भूमौ स्वपञ्जितेन्द्रियः ॥
एवं शनिदिने देवमभ्यर्च्य नरकेशरिम्।
सर्वान् कामानवाप्नोति सोऽश्वमेधायुतं लभेत् ॥
षष्टिवर्षसहस्रं स पूजां प्राप्नोति केशवः।
कुलकोटिं समुद्धृत्य वैकुण्ठपुरमाप्नुयात् ॥
प्रायश्चित्तमिदं गुह्यं पातकेषु महत्स्वपि।
अपुत्रो लभते पुत्र मधनो धनमाप्नुयात् ॥
पक्षे पक्षे पौर्णमास्यामुदितेऽस्मिन्दिवाकरे।
स्नात्वा संपूजयेद्विष्णुं वामनं देवमव्ययम् ॥
समासीनं महात्मानं तस्मिन् पूर्णेन्दुमण्डले।
सन्तर्पयेच्छुभजलैः कुसुमाक्षतमिश्रितैः ॥
तत्र मूलेन मन्त्रेण पूजयेत् परमेश्वरम्।
तुलसीकुन्दकुमुदैरथ पुष्पाञ्जलिं चरेत् ॥
त्वं सोम इति सूक्तेन मर्त्यं च कुसुमैर्यजेत।

पश्चाद्धोमं प्रकुर्वीत पायसान्नं सशर्करम् ॥
मन्त्रेणाष्टोत्तरशतं सूक्तेन प्रत्यृचं तथा ।
अग्निसोमानुवाकेन समिद्भिः पिप्पलैर्यजेत् ॥
सहस्रनामभिः स्तुत्वा नमस्कृत्वा जनार्दनम् ।
वैष्णवान् भोजयेत्पश्चात्पायसान्नेन शक्तितः ॥
स्वयं भुक्त्वा हविः शेषं शयीत नियतेन्द्रियः ।
एवं संपूज्य देवेशं पौर्णमास्यां जनार्दनम् ॥
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ।
मघायामपि पूर्वाह्णे स्नात्वा कृष्णं जलैर्द्विजः ॥
सन्तर्प्य मूलमन्त्रेण तिलमिश्रितवारिभिः ।
तर्पयित्वा पितॄन्देवानर्चयेदच्युतं ततः ॥
कृष्णैश्च तुलसीपत्रैः केतकैः कमलैरपि ।
शोणितैः करवीरैश्च जपाकुटजपाटलैः ॥
अस्य वामेति सूक्तेन दद्यात् पुष्पाञ्जलिं हरेः ।
मन्त्रेणाष्टोत्तरशतं कृष्णं श्रीतुलसीदलैः ॥
तथैव जुहुयादग्नौ तिलैः कृष्णैः सशर्करैः ।
आज्येन पौरुषं सूक्तं प्रत्यृचं जुहुयात् ततः ॥
नारायणानुवाकेन उपस्थाय जनार्दनम् ।
सुसंयावैः सौहृदैश्च शाल्यन्नं विनिवेदयेत् ॥
वैष्णवान् भोजयेत्पश्चात्स्वयं भुञ्जीत वाग्यतः ।
तस्यां रात्रौ जपेन्मन्त्रमयुतं हरिसन्निधौ ॥
वैष्णवैरनुवाकैश्च दत्त्वा पुष्पाञ्जलिं ततः ।
पुरतो वासुदेवस्य भूमौ स्वप्यात्कुशोत्तरे ॥
एवं संपूज्य देवेशं मघायां वैष्णवोत्तमः ।

उद्धृत्य वंशजान् सर्वान् वैष्णवं पदमाप्नुयात् ॥
व्यतीपाते तु संप्राप्ते हयग्रीवं जनार्दनम् ।
पुष्पैश्च करवीरैश्च पुण्डरीकैः समर्चयेत् ॥
योरयीत्यनुवाकेन प्रत्यृचं वै यजेद्बुधः ।
मन्त्रेण च शतं दत्त्वा पश्चाद्धोमं समाचरेत् ॥
यवैश्च तण्डुलैर्वापि तिलैः पुष्पैरथापि वा ।
मन्त्रेणाष्टोत्तरशतं जुहुयाद्वैष्णवोत्तमः ॥
अभूदेकाद्यष्टसूक्तैः प्रत्यृचं जुहुयाच्चरुम् ।
शेषं निवेद्य हरये संप्राश्याचमनं चरेत् ॥
सहस्रशीर्षसूक्तेन उपस्थाय जनार्दनम् ।
शाल्योदनं सूपयुतं विविधैश्च फलैरपि ॥
गवाज्येन युतं दत्त्वा दीपैर्नीराजयेत्ततः ॥
ब्राह्मणान् भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ।
हविष्यन्तु स्वयं भुक्त्वा भूमौ सप्याज्जितेन्द्रियः ॥
एवं संपूज्य देवेशं व्यतीपाते सनातनम् ।
दशवर्षसहस्रस्य पूजायाः फलमाप्नुयात् ॥
ग्रहणे रविसंक्रान्तौ वराहवपुषं हरिम् ।
कुमुदैरुज्वलैः पद्मैस्तुलसीभिः कुरन्दकैः ॥
अर्चयेद्भूधरं देवं तन्मन्त्रेणैव वैष्णवः ।
दूरादिहेति सूक्तेन दद्यात् पुष्पाञ्जलिं द्विजः ॥
मन्त्रेण च सहस्रं तु शतं वापि यजेत्तदा ।
तिलैश्च जुहुयात्तद्वत् सूक्तेन प्रत्यृचं घृतम् ॥
सूपान्नं कृसरान्नं च भक्ष्या पूर्वा घृतप्लुतान् ।
नैवेद्यं विनिवेद्याग्रे ब्राह्मणान् भोजयेत्ततः ॥

एवं संपूज्य देवेशं संक्रान्तौ ग्रहणे हरिम् ।
कल्पकोटिसहस्राणि विष्णुलोके महीयते ॥
वैशाखे पूजयेद्रामं काकुत्स्थं पुरुषोत्तमम् ।
सीतालक्ष्मणसंयुक्तं मध्याह्ने पूजयेद्विभुम् ॥
पुन्नागकेतकीपद्मैरुत्पलैः करवीरकैः ।
चाम्पेयवकलैः पजां षडर्णेनैव कारयेत् ॥
जातवेदाति सूक्तेन कुर्यात् पुष्पाञ्जलिं ततः ।
संक्षेपेण शतश्लोक्यां प्रतिश्लोक्या यजेत्तथा ॥
पुष्पाञ्जलिं सहस्रं तु मन्त्रेणैव यजेत्तमाम् ।
त्वमग्न इति सूक्तेन पायसं जुहुयादृचा ॥
पश्चान्मन्त्रेणाज्यहोमौ नैवेद्यं पायसं घृतम् ।
कदलीफलं शर्करां च पानकं च निवेदयेत् ॥
पञ्च सप्त त्रयो वापि पूजनीया द्विजोत्तमाः ! ।
सुहृद्यैरन्नपानाद्यैर्गोहिरण्यादिदक्षिणैः ॥
हविष्यान्नं स्वयं भुक्त्वा पठेद्रामायणं नरः ।
एवं संपजय विधिवद्राघवं जानकीयुतम् ॥
भुक्त्वा भोगान् मनोरम्यान् विष्णुलोके महीयते ।
लक्ष्मीनारायणं देवं भार्गवे वासरे निशि ॥
अखण्डविल्वपत्रैश्च तुलसीकोमलैर्दलैः ।
अर्चयेन्मन्त्ररत्नेन वामाङ्कस्थश्रिया सह ॥
चन्दनं कुङ्कुमोपेतङ्कस्तुर्यां च समर्पयेत् ।
श्रीसूक्तपुरुषसूक्ताभ्यां दद्यात् पुष्पाञ्जलिं ततः ॥
मन्त्रद्वयेन पुष्पाणां सहस्रं च निवेदयेत् ।
त्वमग्न इति सूक्तेन प्रत्यृचं कुसुमान् यजेत् ॥

अखण्डबिल्वपत्रैर्वा पद्मपत्रैर्घृतेन वा।
श्रीसूक्तपुरुषसूक्ताभ्यां प्रत्यृचं जुहुयात् ततः॥
अग्निं न वेति सूक्तेन तिलैर्व्रीहिभिरेव वा।
मन्त्ररत्नेन जुहुयात् सुगन्धकुसुमैः शतम्॥
मण्डकान् चीरसंयुक्तान् पायसान्नं सशर्करम्।
शाल्यन्नं घृतदाज्यं च भक्त्यास्मै विनिवेदयेत्॥
अभ्यर्च्य विप्रमिथुनान् वासोऽलङ्कारभूषणैः।
भोजयित्वा यथाशक्त्या पश्चाद्भुञ्जीत वाग्यतः॥
मन्वन्तरशतं विष्णुं दुग्धाब्धौ हेमपङ्कजैः।
संपूज्य यदवाप्नोति तत्फलं भृगुवासरे॥
एवं संपूज्यमानस्तु तस्मिन्नहनि वैष्णवैः।
लक्ष्म्या सह हरिः साचात् प्रत्यचं तत्चणाद्भवेत्॥
कृष्णाष्टम्यां चतुर्दश्यां सायंसन्ध्यासमागमे।
गोपालपुरुषं कृष्णमर्चयेच्छ्रद्धयान्वितः।
मल्लिकामालतीकुन्दयूथी कुटजकेतकैः॥
लोध्रनीपार्जुनैर्नागैः कर्णिकारैः कदम्बकैः।
कोविदारैः करवीरै र्बिल्वैरास्फोटकैरपि॥
दशाचरेण मन्त्रेण पूजयेत् पुरुषोत्तमम्।
ये त्रिंशतीति सूक्तेन दद्यात् पुष्पाञ्जलिं ततः॥
श्रीकृष्णं तुलसीपत्रैः प्रत्यृचं पूजयेद्विभुम्।
श्रीकृष्णाय नम इति सूक्तेनाष्टोत्तरं शतम्॥
पूजयित्वाथ होमन्तु तिलैः कृष्णैर्घृतान्वितैः।
प्रत्यृचं वैष्णवैः सूक्तै र्जुहुयात् पुरुषोत्तमम्॥
समिद्भिः पिप्पलैश्चापि मन्त्रेणाष्टोत्तरं शतम्।

नामभिः केशवाद्यैश्च चरुं पश्चाद् घृतप्लुतम्॥
वैष्णव्या चैव गायत्र्या पृषदाज्यं शतं तथा।
गुड़ोदकं सर्पिषान्नं भक्ष्याणि विविधानि च॥
क्षीरान्नं शर्करोपेतं नैवेद्यञ्च समर्पयेत्।
वैष्णवान् भोजयेत्पश्चात् स्वयं भुञ्जीत वाग्यतः॥
एवमभ्यर्च्य गोविन्दं कृष्णाष्टम्यां विधानतः।
सर्व्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात्॥
द्वयोरप्यनयोः श्रीशं कूर्मरूपं समर्च्चयेत्।
ससागरां महीं सर्व्वां लभते नात्र संशयः॥
अर्चयेन्मूलमन्त्रेण गन्धपुष्पाक्षतादिभिः।
अर्च्चयित्वा विधानेन हविष्यं व्यञ्जनैर्युतम्॥
सुदीर्घयन्त्रराजान् सूपघृतमिश्रान् निवेदयेत्।
अहं यवेति सूक्तेन कुर्य्यात्पुष्पाञ्जलिं ततः॥
सहस्रं मूलमन्त्रेण पूजयेत्तुलसीदलैः।
तिलमिश्रैश्च पृथुकैर्जुहुयाद्धव्यवाहने॥
प्रयद्व इति सूक्ताभ्यां नासदासीत्यनेन च।
मन्त्रेणाज्यं सहस्रन्तु जुहुयाद्वैष्णवोत्तमः॥
भोजयेद्वैष्णवान् भक्त्या विशेषेणार्च्चयेद्गुरुम्।
कौर्मं तु शतवर्षन्तु समभ्यर्च्य विधानतः॥
अत्राप्यर्च्चनमात्रेण तत्फलं समवाप्नुयात्।
मधुशुक्लप्रतिपदि केशवं पूजयेद्द्विजः॥
स्नात्वा मध्याह्नसमये करवीरैः सुगन्धिभिः।
अग्निमील इत्याद्येन प्रत्यृचं कुसुमैर्यजेत्॥
मन्त्ररत्नेन वाभ्यर्च्य चरुपायसहोमकृत्।

ईळे द्यावेति सूक्तेन यदिन्द्राग्नीत्यनेन च ॥
विष्णुसूक्तैश्च जुहुयाद्गायत्र्या विष्णुसंज्ञया।
अपूपान् कटकाकारान् शाल्यन्नं घृतसंयुतम् ॥
फलैश्च भक्ष्यभोज्यैश्च नैवेद्यं विनिवेदयेत्।
भोजयेद्ब्राह्मणान् शक्त्या दक्षिणाभिः प्रपूजयेत् ॥
साश्चं सम्वत्सरं तत्र सम्यक् संपूजयेद्धरिम्।
सर्व्वान् कामानवाप्नोति हयमेधायुतं लभेत् ॥
तस्मिन्नवम्यां शुक्ले तु नक्षत्रे दितिदैवते।
तत्र जातो जगन्नाथो राघवः पुरुषोत्तमः ॥
तस्मिन्नुपोष्य मध्याह्ने स्नात्वा सन्ध्यां विधानतः।
तर्पयित्वा पितॄन् देवानर्च्चयेद्राघवं हरिम् ॥
षडक्षरेण मन्त्रेण गन्धमाल्यानुलेपनैः।
अभ्यर्च्य जगतामीशं जपेन्मन्त्रं समाहितः।
शान्तिं शास्त्रं पुराणञ्च नाम्नां विष्णोः सहस्रकम् ॥
पावमानैर्विष्णुसूक्तैः कुर्य्यात् पुष्पाञ्जलिं ततः।
रामायणशतश्लोक्या दद्यात् पुष्पाणि वैष्णवः ॥
सशर्करं पायसान्नं कपिलाघृतसंयुतम्।
रम्भाफलं पानकञ्च नैवेद्यं विनिवेदयेत् ॥
पीतानि नागपर्णानि स्निग्धपूगीफलानि च।
कर्पूरेण च संयुक्तं ताम्बूलञ्च समर्पयेत् ॥
दीपान्नीराजयेद्भक्त्या नमस्कृत्य पुनः पुनः।
प्रीतये रघुनाथस्य कुर्य्याद्दानानि शक्तितः ॥
षडक्षरेण साहस्रं तिलैर्वा पायसेन वा।
कमलैर्बिल्वपत्रैर्वा घृतेन जहुयात्ततः ॥

अस्य वामेति सूक्तेन समिद्भिः पिप्पलस्य तु।
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत्॥
रात्रौ जागरणं कुर्य्यात्त्रिकालं समर्चयेत्।
प्रभाते विमले चापि ततो भरतजन्मनि॥
तृतीयेऽहनि मध्याह्ने सौमित्रेर्जन्मवासरे।
सानुजं जगतामीशमर्चयेत् पूर्ववद्द्विजः॥
पूजां पुष्पाञ्जलिं होमं जपं ब्राह्मणभोजनम्।
अविच्छिन्नं तथा कुर्य्यादग्निहोत्रं त्रिवासरम्॥
एवं त्रिरात्रं कुर्व्वीत राघवाणां विधानतः।
महोत्सवं जन्मभेषु प्रत्यब्दं चैत्रमासिके॥
चतुर्थेऽह्नि तथा नद्यां कुर्य्यादवभृतं द्विजः।
वैष्णवैरनुवाकैश्च रामनामभिरेव च॥
चरितं रघुनाथस्य जपन्नवभृतं चरेत्।
देवान् पितॄंश्च सन्तर्प्य गृहं गत्वार्च्चयेत्प्रभुम्॥
कुर्य्यादवभृथेष्टिञ्च चरुणा पायसेन वा।
अस्य वामेति सूक्तेन परोमात्रेत्यनेन च॥
प्रत्यृचं जुहुयात्पश्चान्मन्त्रेण शतसंख्यया।
हुत्वा समाप्य होमन्तु शेषं सम्प्राशयेच्चरुम्॥
आचम्य पूजयेद्देवं वैष्णवान् भोजयेत्ततः।
स्वयं भुञ्जीत तद्रात्रौ भूशायी समाहितः॥
एवं द्वादशभिः पूजयश्चैत्रे नावमिके तथा।
षष्टिवर्षसहस्राणि श्वेतद्वीपनिवासिनम्॥
संपूज्य यदवाप्नोति तदेवात्र समश्नुते।
यज्ञायुतशतं लब्ध्वा विष्णुलोके महीयते॥

तस्यैव पौर्णमास्याञ्च शीतांशो रुदये तथा।
स्नात्वा संपूजयेद्देवं माधवं रमया सह॥
शुद्धजाम्बूनदप्रख्यं कन्दर्पशतसन्निभम्।
लक्ष्म्या सह समासीनं विमले हेमपङ्कजे॥
चन्दनेन सुगन्धेन करवीराब्जपङ्कजैः।
कर्पूरकुङ्कुमोपेतचन्दनेन च पूजयेत्॥
तन्मन्त्रमन्त्ररत्नाभ्यां माधवं विधिना यजेत्।
मण्डकान् क्षीरसंयुक्तान् शाल्यन्नं घृतसंयुतम्॥
कृष्णरम्भाफलैर्जुष्टं नैवेद्यं विनिवेदयेत्।
अस जीवत्व इत्यादि षट्सूक्तैः कुसुमैर्यजेत्॥
मन्त्रेणाष्टोत्तरशतं कोमलैस्तुलसीदलैः॥
संपूज्य होमं कुर्व्वीत साज्येन चरुणा ततः।
विहीभोतोरित्यनेन सूक्तेन प्रत्यृचं द्विजः।
कमलैर्बिल्वपत्रैर्वा मन्त्रेणाष्टोत्तरं शतम्॥
हुत्वाथ पौरुषं सूक्तं श्रीसूक्तं जुहुयाद्द्विजः।
सहस्रनामभिः स्तुत्वा वैष्णवान् भोजयेत्ततः॥
हुतशेषं स्वयं भुक्त्वा भूमौ स्वप्याज्जितेन्द्रियः।
एवं संपूज्य देवेशं माधव्यां मधुसूदनः॥
सर्व्वान् कामानवाप्नोति हरिसायुज्यमाप्नुयात्।
वैशाख्यां पौर्णमास्यान्तु मध्याह्ने पुरुषोत्तमम्॥
अर्च्चयेद्रक्तकमलै रुत्पलैः पाटलैरपि।
ह्रीवेरकरवीरैश्च गायत्र्या विष्णुसंज्ञया॥
दध्यन्नं फलसंयुक्तं पायसञ्च निवेदयेत्।
प्रत्यृचं चेद्दिवं सूक्तैः प्रत्यृचं जुहुयात्ततः॥

सौराष्ट्रे द्रेति सूक्तेन दीपैर्नीराजयेत्ततः ।
शक्त्या विप्रान् भोजयित्वा पूजयेद्दैशिकं तथा ॥
तस्मिन् सम्पूजितो देवः प्रत्यक्षस्तत्क्षणाद्भवेत् ।
शयने भोजयेद्विष्णुं पूजयेच्छ्रद्धयान्वितः ॥
कुशप्रसूनदूर्व्वाग्रपुण्डरीककदम्बकैः ।
मूलमन्त्रेण श्रीविष्णुं गायत्र्या च समर्च्चयेत् ॥
सत्येनोत्तमसूक्तेन ऋग्भिः पुष्पाञ्जलिं यजेत् ।
मन्त्रेणाष्टोत्तरशतं तुलसीपल्लवैस्तथा ॥
पश्चाद्धोमं प्रकुर्व्वीत विष्णुसूक्तैः सुपायसम् ।
मन्त्ररत्नेन जुहुयादाज्यमष्टोत्तरं शतम् ॥
सशर्करं पायसान्नमपूपान्विनिवेदयेत् ।
विश्वजितेतिसूक्तेन कुर्य्यान्नीराजनं ततः ॥
भोजयेद्वैष्णवान् विप्रान् पूजयेच्च विशेषतः ।
सर्व्वान् कामानवाप्नोति हयमेधायुतं लभेत् ॥
प्राजापत्यर्क्षसंयुक्ता नभःकृष्णाष्टमी यदा ।
नभस्येव भवेत्सातु जयन्ती परिकीर्त्तिता ॥
तस्यां जातो जगन्नाथः केशवः कंसमर्द्दनः ।
तस्मिन्नुपोष्य विधिवत्सर्व्वपापैः प्रमुच्यते ॥
अष्टमी रोहिणीयोगो मुहूर्त्तं वा दिवानिशम् ।
मुख्यकाल इति ख्यातस्तत्र जातः स्वयं हरिः ।
मासद्वये यद्यलाभे योगे तस्मिन् दिवा निशि ॥
नवमी रोहिणीयोगः कर्त्तव्या वैष्णवैर्द्विजैः ।
रात्रियोगस्तु बलवान् तस्यां जातो जनार्द्दनः ॥
तिथेन्ते भवान्ते च पारणा यत्र चोच्यते ।

यामत्रयवियुक्तायां प्रातरेव हि पारणा ॥
पूर्वेद्युर्नियमं कुर्य्याद्दन्तधावनपूर्वकम् ।
प्रातः स्नात्वा विधानेन पूजयेत् कृष्णमव्ययम् ॥
षडक्षरेण मन्त्रेण बालकृष्णतनुं हरिम् ।
सुकृष्णतुलसीपत्रैरर्चयेच्छ्रद्धयान्वितः ॥
दुग्धं क्षीरं शर्कराञ्च नवनीतं निवेदयेत् ।
सहस्रमयुतं वापि जपेन्मन्त्रं षडक्षरम् ॥
शवाजयं जुहुयादग्नौ कृष्णमन्त्रेण पायसम् ।
सहस्रं शतवारं वा प्रत्यृचं विष्णुसूक्तकैः ॥
हुत्वा सुगन्धिपुष्पाणि तैरेव च समर्चयेत् ।
सहस्रनाम्नां गीतानां पठनं गुरुपूजनम् ॥
वैष्णवान् भोजयेच्छक्त्या हुतशेषं सकृत्स्वयम् ।
हुत्वा कुशोत्तरे स्वप्याद्भूमौ नियमवान् शुचिः ॥
परेऽह्न्युपोष्य विधिवत् स्नात्वा नद्यां विधानतः ।
तर्पयित्वा जगन्नाथं पितॄन्देवांश्च तर्पयेत् ॥
पूर्ववत् पूजयित्वेशं जपहोमादिकं चरेत् ॥
अवैष्णवं द्विजं तस्मिन् वाङ्मात्रेणापि वार्च्चयेत् ।
पुराणादिप्रपाठेन रात्रौ जागरणं चरेत् ॥
शीतांशावुदिते स्नात्वा शुक्लाम्बरधरः शुचिः ।
नवो नवो भवतीत्यृचार्घ्यं विनिवेदयेत् ॥
अर्चयेन्मातुरुत्सङ्गे स्थितं कृष्णं सनातनम् ।
तुलसीगन्धपुष्पैश्च कस्तूरीचन्द्रचन्दनैः ॥
षडक्षरेण मन्त्रेण भक्त्या सम्पूजयेद्धरिम् ।
वसुदेवं नन्दगोपं बलभद्रञ्च रोहिणीम् ॥

यशोदां च सुभद्रां च मायां दिक्षु प्रपूजयेत् ।
प्रह्लादादीन् वैष्णवांश्च तथा लोकेश्वरानपि ॥
धूपं दीपञ्च नैवेद्यं ताम्बूलञ्च समर्पयेत् ।
अनूनमिति सूक्तेन भक्त्या नीराजनं तथा ॥
अन्न इत्यादिसूक्तैश्च दद्यात् पुष्पाणि वैष्णवः ।
दशाक्षरेण मन्त्रेण पूजयेत् पुरुषोत्तमम् ॥
सहस्रनामभिः स्तुत्वा शय्यायां विनिवेशयेत् ।
गीतं नृत्यञ्च वाद्यञ्च यथा शक्त्या च कारयेत् ॥
ततः प्रभातसमये सन्ध्यामन्वास्य वैष्णवः ।
दशाक्षरेण मन्त्रेण तुलसीचन्दनादिभिः ॥
सम्पूजय वैष्णवैः सूक्तैः कुर्य्यात् पुष्पाञ्जलिं ततः ।
मन्त्रेण जुहुयादाजग्रं सहस्रं हव्यवाहने ॥
ममाग्न इति सूक्ताभ्यां जुहुयात्पायसं ततः ।
परोमात्रेति सूक्तेन चरुं तिलविमिश्रितम् ॥
सर्वैश्च भगवन्मन्त्रैरेकैकामाहुतिं यजेत् ।
नामभिः केशवाद्यैश्च तथा सङ्कर्षणादिभिः ॥
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत् ।
ततो मङ्गलवादित्रैर्यानैर्योक्तैश्च चामरैः ॥
लाजैर्हरिद्राचूर्णैश्च गन्धैः पुष्पैः सुगन्धिभिः ।
मुदा विकीरयन् सर्वे बालवृद्धाश्च मध्यमाः ॥
नार्य्यश्च रमणैः सार्द्धं सुवासिन्यश्च योषितः ।
आरोप्य शिविकायान्तु देवकीनन्दनं हरिम् ॥
अकर्दमां नदीं रम्यां तडागं वा मनोहरम् ।
गच्छेद् युगांहशैवालजलौकादिविवर्जितम् ॥

कुर्य्यादवभृतं तत्र पावमान्यैः पवित्रकैः।
विष्णुसूक्तैश्च सुस्नात्वा देवान् पितृंश्च तर्पयेत् ॥
विचित्राणि च भक्ष्याणि दद्यात्तत्र शुभान्वितः।
गृहं गत्वा तथैवेशं पूर्ववत्पूजयेद्द्विजः ॥
भोजयित्वा ततो विप्रान् दक्षिणाभिश्च तोषयेत्।
हिरण्यवस्त्राभरणैराचार्य्यं पूजयेत्तु सः ॥
स्वयञ्च पारणां कुर्य्यात् पुत्रपौत्रसमन्वितः।
सायाह्ने समनुप्राप्ते दोलायामर्च्चयेद्धरिम् ॥
चतुःस्तम्भां चतुर्धामवितानाद्यैरलङ्कृताम्।
धूपैर्दीपैश्चैव रम्यां दोलां सम्पूजयेद्द्विजः ॥
स्तम्भेषु वेदान् मन्त्रांश्च धामस्वभ्यर्च्च कच्छपम्।
पादेष्वाशागजान् पीठे सप्तच्छन्दांसि चास्तरे ॥
प्रणवञ्चातपत्रे तु शेषङ्केतौ खगेश्वरम्।
इतिहासपुराणानि सर्व्वतः परिपूजयेत् ॥
तस्यां निवेश्य दोलायां वासुदेवं श्रियः पतिम्।
उपचारैरर्च्चयित्वा शनैर्दोलाञ्च दोलयेत् ॥
वेदाद्यैर्ब्रह्मणः स्तोत्रैः सूक्तैरङ्गैर्द्विजोत्तमः।
सामगानैः प्रबन्धैश्च गायन् कृष्णं जगद्गुरुम् ॥
सुवासिन्यो दोलयित्वा वैष्णवान् पूजयेत्ततः।
एवं संपूज्य देवेशं पापैर्मुक्तो हरिं व्रजेत् ॥
दोलायां दर्शनं विष्णोर्महापातकनाशनम्।
कोटियागानुजं पुण्यं लभते नात्र संशयः ॥
शिवब्रह्मादयो देवा नारदाद्या महर्षयः।
दोलायां दर्शनार्थं वै प्रयान्त्यनुचरैः सह ॥

गन्धर्वाप्सरसः सर्वा विमानस्थाः सकिन्नराः।
गायन्ति सामगानैश्च दोलायामर्चितं हरिम्॥
गवाज्यसंयुतैर्दीपैर्भक्त्या नीराजनं चरेत्।
मरुत्व इन्द्र सूक्तेन मङ्गलाशीभिरेव च॥
ताम्बूलफलपुष्पाद्यैर्वैष्णवान् भोजयेत्ततः।
आशिषोवाचनं कृत्वा नमस्कृत्वा विसर्जयेत्॥
एवं संपूज्य देवेशं जयन्त्यां मधुसूदनम्।
सर्वान् लोकान् जपेत्त्वाशु याति विष्णोः परं पदम् =
मासि भाद्रपदे शुक्ले द्वादश्यां विष्णुदैवते।
अदित्यामुदभूद्विष्णुरुपेन्द्रो वामनोऽव्ययः॥
तस्यां स्नानोपवासाद्यमत्त्यर्थं परिकीर्त्तितम्।
श्रीकृष्णजन्मवत् सर्वं कुर्यात्तत्रापि वैष्णवः॥
सर्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात्॥
माघमासे तु सप्तम्या मुदिते चैव भास्करे।
स्नात्वा नद्यां विधानेन पूजयेत् पुरुषोत्तमम्॥
रक्तैश्च करवीरैश्च कुमुदेन्दीवरादिभिः।
मन्त्ररत्नेनार्चयित्वा पायसान्नं निवेदयेत्॥
यतश्च गोपा इत्यादि दशसूक्तान्यनुक्रमात्।
पुष्पाणि दद्याद्भक्त्या वै प्रत्यृचं वैष्णवोत्तमः॥
सहस्रं शतवारं वा मन्त्रेणापि यजेत्ततः।
पश्चाद्धोमं प्रकुर्वीत तिलैः कृष्णैः सशर्करैः॥
वैष्णवैरनुवाकैश्च मन्त्ररत्नेन मन्त्रवित्।
वैकुण्ठपार्षदं हुत्वा शेषकर्म समाचरेत्॥
नीराजनं ततो दद्यादयं गौरित्यनेन तु।

इति वा इति सूक्तेन उपस्थाय जनार्दनम् ॥
सहस्रनामभिः स्तुत्वा वैष्णवान् भोजयेत्ततः।
गुरुं सम्पूजयेद्भक्त्या भुञ्जीत तद्भविः स[illegible]त् ॥
अधःशायी ब्रह्मचारी जपेद्रात्रौ समाहितः।
एवं सम्पूजय देवेशं तस्मिन्नहनि वैष्णवः ॥
त्रिकोटिकुलमुद्धृत्य वैष्णवं पदमाप्नुयात्।
द्वादश्यामपि तस्यां वै यज्ञवराहमच्युतम् ॥
वैष्णव्या चैव गायत्र्या पूजयेत् प्रयतात्मवान्।
महिषाख्यं घृताक्तं वै धूपं दद्यात् प्रयत्नतः ॥
दद्यादष्टाङ्गदीपं च गवाज्येन च वैष्णवः।
सशर्कराज्यं सूपान्नं मोदकान् कृसरं तथा ॥
इक्षुदण्डानि रम्याणि फलानि च निवेदयेत्।
प्रतेमहीति सूक्तेन दद्यात् पुष्पाणि भक्तिमान् ॥
सर्वैश्च वैष्णवैः सूक्तैः चरुणा पायसेन वा।
मधुसूक्तेन होतव्यं गायत्र्या विष्णुसंज्ञया ॥
आज्येन वैष्णवैर्मन्त्रैः त्रिशतं त्रिभिरेव तु।
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत् ॥
भोजयेद् ब्राह्मणान् भक्त्या गुरुं चापि प्रपूजयेत्।
सर्वयज्ञेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥
तत्फलं लभते मर्त्यो विष्णुसायुज्यमाप्नुयात्।
कोदण्डस्थे दिनकरे तस्मिन्मासि निरन्तरम् ॥
अरुणोदयवेलायां प्रातः स्नानं समाचरेत्।
तर्पयित्वा विधानेन कृतकृत्यः समाहितः ॥
नारायणं जगन्नाथ मर्चयेद्विधिवद् द्विजः।

पौरुषेण विधानेन मूलमन्त्रेण वा यजेत् ॥
शतपत्रैश्च जातीभिस्तुलसीविल्वपुष्करैः ।
गन्धैर्धूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि ॥
पायसान्नं शर्करान्नं मुद्गान्नं सघृतं हविः ।
सुवासितञ्च दध्यन्नमपूपान् मधुमिश्रितान् ॥
मोदकान् पृथुकान् लाजान् शष्कुलीचणकानपि ।
विविधानि च भक्ष्याणि फलानि च निवेदयेत् ॥
वेदपारायणेनैव मासमेकं निरन्तरम् ।
ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ॥
ऋचामशीतिपादश्च पारायणं प्रकीर्त्तितम् ।
वेदपारायणेनैव प्रत्यृचं कुसुमान्यजेत् ॥
रात्रौ होमं प्रकुर्व्वीत तिलैर्व्रीहिभिरेव वा ।
सर्वेवेदेष्वशक्तस्तु होमकर्म्मणि वैष्णवः ॥
वैष्णवैरनुवाकैर्वा प्रत्यहं जुहुयाद्‌बुधः ।
यजुषापि तथा साम्ना शक्त्या पुष्पाञ्जलिं चरेत् ॥
अशक्तो यस्तु वेदेन प्रतिवासरमच्युतम् ।
मूलमन्त्रेण साहस्रं दद्यात् पुष्पाञ्जलिं द्विजः ॥
तेनैव जुहुयाद्भक्त्या सहस्रं वह्निमण्डले ।
अथवा रघुनाथस्य चारित्रेण महात्मनः ॥
प्रतिश्लोकेन पुष्पाणि दद्यान्मासं निरन्तरम् ।
अधःशायी ब्रह्मचारी सकृद्भोजी भवेद्‌द्विजः ॥
मासान्ते तु विशेषेण पूजयेद् वैष्णवान् द्विजान् ।
एवमभ्यर्च्य गोविन्दं धनुर्मासे निरन्तरम् ॥
दिने दिने वैष्णवेष्ट्या फलं प्राप्नोत्यसंशयः ।

यं यं कामयते चित्ते तन्तमाप्नोति पूरुषः ॥
महद्भिः पापकैर्मुक्तो विष्णुलोके महीयते।
तपोमासुप्रदिते भानौ मासमेकं निरन्तरम् ॥
स्नात्वा नद्यां तडागे वा तर्पयेत्पतिमच्युतम्।
अर्चयेन्माधवं नित्यं तन्मन्त्रेणैव तत्र वै ॥
मन्त्ररत्नेण वा नित्यं माधवीचूतचम्पकैः।
मण्डपानि विचित्राणि शर्कराज्ययुतानि च ॥
शाल्यन्नं दधिसंयुक्तं मोदकांश्च निवेदयेत्।
वैष्णवैः पावमानैश्च कुर्य्यात् पुष्पाञ्जलिं ततः ॥
तिलैश्च जुहुयादग्नौ मधुशर्करमिश्रितैः।
प्रत्यृचं पुरुषसूक्तेन श्रीसूक्तेनापि वैष्णवः ॥
सहस्रं मूलमन्त्रेण तन्मन्त्रेणापि वै द्विजः।
सहस्रं वा शतं वापि शक्त्या च जुहुयाद् बुधः ॥
यज्ञे यज्ञमिति ऋचा दीपान्नीराजयेत्ततः।
रात्रौ दोलार्चनं कुर्य्याद्वैष्णवैर्द्विजसत्तमैः ॥
मासान्ते भोजयेद्विप्रान् वासोऽलङ्कारभूषणैः।
एवं सम्पूजिते तस्मिन् प्रसन्नोऽभूज्जनार्दनः ॥
ददाति स्वपदं दिव्यं योगिगम्यं सनातनम्।
फाल्गुण्यां पौर्णमास्यां वे उदिते च निशाकरे ॥
उपोष्य विधिवद्भक्तिं पूजयेद्वैष्णवोत्तमः
तिलैश्च करवीरैश्च कर्णिकारैश्च पाटलैः ॥
कुन्दसहस्रकुसुमैर्यजेत् तं कमलापतिम्।
विष्णुसूक्तैः प्रत्यृचं च चरुणाज्येन मन्त्रतः ॥
ब्रह्मा देवानामनेन दीपान्नीराजयेत्ततः।

प्रसन्नो नित्यमनेन उपस्थाय सनातनम् ।
वैष्णवान् भोजयेच्छक्त्या भुञ्जीयाद्वाग्यतः स्वयम् ॥
एवं सम्पूज्य देवेशं तस्यां रात्रौ सनातनम् ।
षष्टिवर्षसहस्रस्य पूजामाप्नोत्यसंशयः ॥
एवं सम्पूजयेद्विष्णुं निमित्तेषु विशेषतः ।
यथाकालं यथावर्णं यथाशक्त्या यथाबलम् ॥
यथोक्तपुष्पालाभेतु तुलस्या वै समर्चयेत् ।
नैवेद्यस्याप्यलाभे तु हविष्यं वा निवेदयेत् ॥
सूक्तानि वैष्णवान्येव सूक्तालाभे यथा यजेत् ।
एकेन वा पौरुषेण सूक्तेन जुहुयात्तथा ॥
सर्वत्राजत्रं प्रशस्तं स्याद्धोमद्रव्यादलाभतः ।
मन्त्रालाभे मूलमन्त्रं सर्वतन्त्रेषु यो यजेत् ॥
उपस्थानन्तु सर्वत्र तद्विष्णोरिति वा ऋचा ।
नीराजनन्तु सर्वत्र श्रियै जातेत्यनेन वा ॥
तत्तत्कालोचितं सर्वं मनसा वापि पूजयेत् ।
तुलसीमिश्रितं तोयं भक्त्या वापि समर्पयेत् ॥
सर्वेष्वेषु निमित्तेषु महाभागवतोत्तमान् ।
संपूज्य परिपूर्णत्वमाप्नोत्यत्र न संशयः ॥

इति हारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे भगवन्नित्य-
नैमित्तिकविधिर्नाम पञ्चमोऽध्यायः ।

हारीत उवाच ।

महोत्सवविधिं कुर्याद्देवस्य परमात्मनः ॥
ग्रामार्चायाः प्रकुर्वीत यथोक्तविधिना नृप ! ।

यात्रोत्सवे कृते विष्णोः श्रुतिस्मृत्युक्तमार्गतः ॥
अनावृष्ट्यग्निदुर्भिक्षभयं नास्त्यत्र किञ्चन।
वारिजं वातजं वाग्निसर्पविद्युद्विषत्कृतम् ॥
महारोगग्रहैश्चैवं यद्भयं ग्रामवासिनाम्।
कृते महोत्सवे तत्र भयं नास्ति न संशयः ॥
तस्य दासा भविष्यन्ति नानाजनपदेश्वराः।
सार्वभौमो भवेद्राजा भक्त्या कृत्वा महोत्सवम् ॥
नवाह्निकं च सप्ताहं पञ्चाहं प्रत्यहं तथा।
सम्वत्सरे ऋतौ मासि पक्षे कुर्यात् क्रमेण तु ॥
तस्मिन्नादौ शुभदिने स्वस्तिवाचनपूर्वकम्।
अङ्कुरार्पणमादौ तु गरुत्मत्केतुमुच्छ्रयेत् ॥
याश्च षडित्योषधयः केतुको वेद इत्यपि।
अश्वत्थाख्यशमीगर्भंशुभामरणिमाहरेत् ॥
निर्मथीतेति सूक्तेन तथैवासीदमीति च।
आभ्यां च प्रत्यृचं तस्मिन्निध्माधानादि पूर्ववत् ॥
चर्वाज्यैरयमग्नीति उपस्थायार्चयेत्तथा।
तदग्निं संग्रहेत्तावदुत्सवः परिपूर्यते ॥
दीक्षितः स भवेत्तावदाचार्यो विजितेन्द्रियः।
वेदवेदाङ्गविच्छ्रौतस्मार्तकर्म्मविधानवत् ॥
महाभागवतो विप्रस्तान्त्रिकः सर्वकर्म्मसु।
लौकिके वा प्रकुर्वीत मथिताग्निं चेद्यदि ॥
आभ्यामेव च सूक्ताभ्यामग्नौ देवं यजेद्बुधः।
प्रातः स्मार्तविधानेन धौतवस्त्रोर्ध्वपुण्ड्रधृत् ॥
ऋत्विग्भिर्ब्राह्मणैर्दान्तैर्यागभूमिं विशेद्गुरुः।

देवालयस्य मध्ये तु वेदिं रम्यां प्रकल्पयेत्॥
अङ्कुरार्पणपात्रैश्च भद्रकुम्भैरलङ्कृताम्।
वितानकुसुमाद्युक्तां कृत्वा तत्र सुखासने॥
महोत्सवार्हं बिम्बं च निवेश्यास्मिन् प्रपूजयेत्।
श्रीभूनिलादिसंयुक्तं नित्यैः परिजनैर्वृतम्॥
मन्त्ररत्नविधानेन पूजयित्वा जगद्गुरुम्।
इमे विप्रस्येत्यादिभि स्त्रिभिः सूक्तैश्च पूजयेत्॥
सुरभीणि च पुष्पाणि प्रत्यृचं विनिवेदयेत्॥
चतुर्दिक्षु च चत्वारो ब्राह्मणा मन्त्रवित्तमाः।
वाराहं नारसिंहं च वामनं राघवं मनुम्॥
ईशान्यादिषु चत्वारो विष्णुमन्त्रान् विदिक्षु च।
वेद्या दक्षिणतः कुण्डं लक्षणाढ्यं च तत्र तु॥
हुताशनं प्रतिष्ठाप्य इध्माधानान्तिकं चरेत्।
सर्वैश्च वैष्णवैः सूक्तैश्चरुं तिलविमिश्रितम्।
प्रत्यृचं जुहुयादग्नौ मध्वाज्यगुडमिश्रितम्॥
आज्यं श्रीभूमिसूक्ताभ्यां त्वं सोम इति पायसम्।
पूर्वोक्तैर्वैष्णवैर्मन्त्रैस्तिलैर्व्रीहिभिरेव वा॥
प्रत्येकं जुहुयात्पश्चादष्टोत्तरशतं क्रमात्।
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत्॥
शुद्धान्नं फलयुतं पानकञ्च निवेदयेत्।
ताम्बूलञ्च समाप्याथ ऋत्विजश्चापि पूजयेत्॥
ततः स्यन्दनमानीय पताकाच्छत्रसंयुतम्।
श्वेतैः सलक्षणैरूह्यमानमश्वैः प्रकल्पितैः॥
वस्त्रपुष्पमणिस्वर्णभूषितं तत्र चित्रितम्।

तस्मिन् मृदुतरश्लक्ष्णपर्यङ्कं स्थापय देशिकः ॥
तस्मिन्निवेश्य देवेशं देवीभ्यां सहितं हरिम् ।
अर्च्चयेद् गन्धपुष्पाद्यैर्धूपदीपादिभिस्तथा ॥
रथचक्रेषु वेदांश्च धर्मादीनपि पूजयेत् ।
आधारशक्तिमाधारे ईषादण्डे पुराणकम् ॥
छन्दांसि कूवरे सप्त पर्यङ्के भुजगाधिपम् ।
हयेषु चतुरो मन्त्रान् योक्त्रेष्वङ्गानि षट् च वै ॥
ध्वजे पताकराजानं छत्रेऽनन्तं स्वराणि तु ।
तालवृन्ते चामरे च अक्षराणि च पूजयेत् ॥
अभ्यर्च्यैवं रथं दिव्यं पश्चात् संपूजयेद्धरिम् ।
दिक्पालावरणांश्चैवमर्च्चयेद्दिक्षु सर्वतः ॥
जीमूतस्येति सूक्तेन तत्र पुष्पाञ्जलिं चरेत् ।
मरुत्वानिन्द्रेति सूक्तेन कृत्वा नीराजनं ततः ॥
वनस्पतीति सूक्तेन वादयेत्पटहादिकम् ।
गीतैर्नृत्यैश्च वादित्रैः पुण्यस्तोत्रैर्मनोहरैः ॥
हयैर्गजैः स्यन्दनैश्च परितस्तर्पयेत्प्रभुम् ।
ऋत्विजः पुरतो वेदानङ्गानि च जपेत्तदा ॥
गायेत् सामानि भक्त्या वै पुरतः पार्श्वतो हरेः ।
कुङ्कुमैः कुसुमैर्लाजैर्विकिरन्वै समन्ततः ॥
स्वलङ्कृतेषु वीथिषु पर्यटन् सेवयेत्प्रभुम् ।
अट्टद्वारेषु मार्गेषु भक्ष्यैरिक्षुभिरेव च ॥
कुसुमैर्धूपदीपैश्च ताम्बूलैश्चापि सेवयेत् ।
एवं निषेव्य देवेशं पुनर्गेहं निवेशयेत् ॥
तमभि प्रगायतेति जपन् सूक्तं निवेशयेत् ।

असन्नाज मित्यनेन दीपान्नीराजयेत्ततः ॥
पीठे निवेश्य देवेशमुपचारान् समर्पयेत् ।
वयमुपेत्य ध्यायेम आशीषो वाचनं चरेत् ॥
अनेन विधिना कुर्य्यादुत्सवं प्रतिवासरम् ।
जपैर्होमै स्तथा दानैर्विप्राणां भोजनैरपि ॥
समाप्ते चोत्सवे विष्णोः कुर्य्यादवभृथं शुभम् ।
नदीं खातं तड़ागं वा देवेन सहितो व्रजेत् ॥
स्यन्दनादिषु यानेषु स्थिता नार्यः स्वलङ्कृताः ।
पुरुषाश्च हरिद्राश्च चूर्णादीन् विकिरन्मिथः ॥
कुर्यादवभृतं तत्र विशिष्टैर्ब्राह्मणैः सह ।
वासुदेवोत्सवे स्नानमश्वमेधफलं लभेत् ॥
स्नात्वा सन्तर्प्य देवादीन् प्रविश्य हरिमन्दिरम् ।
यजेतावभृथेष्टिञ्च अस्य वामेति सूक्ततः ॥
चरुमाज्यं तिलैर्वापि अनुवाकैश्च वैष्णवैः ।
एवं हुत्वावभृथेष्टिं वै वैष्णवान् भोजयेत्ततः ॥
गुरुञ्च ऋत्विजश्चैव पूजयेद्भक्तित स्ततः ।
पिबासोमेत्यध्यायेन कुर्य्यात् स्वस्त्ययनं हरेः ॥
इच्छन्ति त्वेत्य ध्यानेन प्रत्यृचञ्च द्वयेन च ।
अष्टोत्तरशतं जुहुयात्कुसुमैरेव वैष्णवः ॥
हिरण्यगर्भसूक्तेन तथैवाज्यं द्विजोत्तमः ।
पुनरेव तु होतव्यं हुत्वा वैकुण्ठपार्षदम् ॥
होमशेषं समाप्याथ वैष्णवान् भोजयेदपि ।
सर्वयज्ञसमाप्तौ तु पुष्पयागं समाचरेत् ॥
सर्वं सम्पूर्णतामेति परितुष्टो जनार्दनः ।

एवं महोत्सवं कुर्य्यात्प्रत्यब्दं परमात्मनः ॥
अथ नित्योत्सवे पूजा होमश्चात्र विधीयते ।
शिबिकायां निवेश्येशं पूजयित्वा विधानतः ॥
तत्र चामरवादित्रभृङ्गारैस्तालवृन्तकैः ।
दीपिकाभिरनेकाभिर्दूर्वाग्रकुसुमाचतैः ॥
फलमोदकहस्ताभिर्नारीभिः समलङ्कृतम् ।
देवस्यायतनं रम्यं त्रिः प्रदक्षिणमाचरेत् ॥
तत्तन्मन्त्रान् जपेद्दिक्षु सर्व्वासु द्विजपुङ्गवाः ।
बलिञ्च निक्षिपेत्तासु देवानुद्दिश्य पूर्व्ववत्ः ॥
प्राचीं विश्वजिते सूक्तं अग्ने तव अनन्तरम् ।
याम्ये परे इमां सन्तु मोषुणस्तु तदन्तरम् ॥
यच्चिद्धेति प्रतीच्यान्तु विहिहोत्येत्यनन्तरम् ।
स सोम इति सौम्यान्तु कद्रुद्रायेत्यनन्तरम् ॥
प्रजापतिं तथा चोर्द्ध्वमधश्च पृथिवीं क्षिपेत् ।
एवं दिक्षु बलिं दत्त्वा परिणीय जनार्द्दनम् ॥
स्तुतिभिः पुष्कलाभिश्च भवनं सम्प्रवेशयेत् ।
पीठे निवेश्य देवेशं पूजयित्वा विधानतः ॥
विहिसोतादिसूक्तेन दद्यात् पुष्पाणि शार्ङ्गिणे ।
नीराजनं ततो दद्यात् ध्रुवसूक्तेन वैष्णवः ॥
शाययित्वा च शय्यायां दद्यात् पुष्पाणि मन्त्रतः ।
इमं महेति सूक्ताभ्यां पूजयेत् विष्णुमव्ययम् ॥
सौदर्शनेन मन्त्रेण रक्षां कुर्य्यात्समन्ततः ॥
एवं नित्योत्सवं कुर्य्याद्रात्रौ चाहनि सर्वदा ।
गुरूणामन्त्यदिवसे भगवज्जन्मवासरे ॥

कार्त्तिक्यां श्रावणे वापि कुर्य्यादिष्टिञ्च वैष्णवीम् ।
उपोष्य पूर्वदिवसे दीक्षितः सुसमाहितः ॥
स्वस्तिवाचनपूर्वेण कारयेदङ्कुरार्पणम् ।
नद्यां स्नात्वा च ऋत्विग्भिश्चतुर्भिर्वेदपारगैः ॥
पौरुषेण विधानेन पूजयेत् पुरुषोत्तमम् ।
गन्धैर्नानाविधैः पुष्पैर्धूपैर्दीपैर्निवेदनैः ॥
फलैश्च भक्ष्यभोज्यैश्च ताम्बूलाद्यैः प्रपूजयेत् ।
अर्घ्याद्यैरुपचारैस्तु सूक्तान्ते पूजयेद्धरिम् ॥
अध्यायान्ते मण्डलान्ते नैवेद्यैर्विविधैरपि ।
पूजयित्वा हरिं भक्त्या वैष्णवान् भोजयेत्तथा ॥
आज्येन चरुणा वापि तिलैः पद्मैरथापि वा ।
समिद्भिर्बिल्वपत्रैर्वा होमं कुर्वीत वैष्णवः ॥
यज्ञरूपं हरिं ध्यायन् प्रत्यृचं वेदसंहिताम् ।
होमः समाप्यते यावत्तावद्वै दीक्षितो भवेत् ॥
जुहुयाद्वै गार्हपत्यौ सोऽग्निमभ्यर्च्य भूपते ! ।
अग्निरक्षणमप्युक्तं यावदिष्टिः समाप्यते ॥
विशिष्टान् वैष्णवान् विप्रान् भोजयेत्प्रतिवासरम् ।
ऋत्विजश्च पठेत्तावच्चतुर्मन्त्रान् समाहितः ॥
यजेदवभृथेष्टिं च पावमान्यैश्च वैष्णवैः ।
अन्ते संपूजयेद्विप्रान् वासोऽलङ्कारभूषणैः ॥
ऋत्विजश्च गुरुं चैव पूजयेच्च विशेषतः ।
एवमिष्टिन्तु यः कुर्याद्वैष्णवीं वैष्णवोत्तमः ॥
क्रतूनां दशकोटीनां फलं प्राप्नोत्यसंशयः ।
यस्मिन्देशे वैष्णवेष्ट्या पूजितो मधुसूदनः ॥

दुर्भिक्षरोगाग्निभयं तस्मिन् नास्ति न संशयः ।
अशक्तः सर्वदेवेन कर्त्तुमिष्टिं च वैष्णवीम् ॥
सर्वैश्च वैष्णवैः सूक्तैर्जुहुयात्प्रत्यृचं हविः ।
तैरेव पुष्पाञ्जलिं च कुर्यादिष्ट्याः प्रपूर्त्तये ॥
अथवा मूलमन्त्रं तु लक्षं जप्त्वा हुताशने ।
अयुतं जुहुयात्तद्वत्पुष्पाणि च सनातने ॥
इष्टिः संपूर्णतां याति सर्ववेदाः सदक्षिणाः ।
एवमिष्टिं प्रकुर्वीत प्रत्यब्दं वैष्णवोत्तमः ॥
तुष्ट्यर्थं वासुदेवस्य वंशस्योज्जीवनाय च ।
वृद्ध्यर्थमपि लोकस्य देवतानां हिताय च ॥
पिता वा यदि वा माता भ्राता वान्ये सुहृज्जनाः ।
यदि पञ्चत्वमापन्नाः कथं कुर्याद्द्विजोत्तमः ॥
कनिष्ठवर्जमेवात्र वपनं मुनिभिः स्मृतम ।
स्नात्वाचम्य विधानेन कारयेत् पूजनं हरेः ।
रङ्गवल्यादिभि स्तत्र कुर्य्यात् सर्वत्र मङ्गलम् ॥
रोदनं वर्जयित्वैव गोमयेन शुचि स्थलम् ।
विलिप्य मण्डले तत्र धान्यस्योपर्युलूखलम् ॥
कलशांस्तु चतुर्दिक्षु तण्डुलोपरि निक्षिपेत् ।
हिरण्यपञ्चगव्यानि पञ्चत्वक्पल्लवान् न्यसेत् ॥
वाससा तन्तुना वापि वेष्टयेत् त्रिः प्रदक्षिणम् ।
उलूखले वासुदेवं कलशेषु क्रमेण च ॥
प्रद्युम्न मनिरुद्धञ्च सङ्कर्षण मधोक्षजम् ।
सम्पूज्य गन्धपुष्पाद्यैर्भक्त्या भक्ष्यं निवेदयेत् ॥
अभ्यर्च्य मुसलं पुष्पैर्गायत्र्या प्रणवेन च ।

हरिद्रामवहन्यात्तु परीमात्रेति वै जपन् ॥
भगवन्मन्दिरे विष्णुं हरिद्रादैः प्रपूजयेत् ।
पितुः शरीरं विधिवत् स्नापयेत्कलशोदकैः ॥
तिलैश्च पञ्चगव्यैश्च गायत्र्या वैष्णवेन च ।
उद्वर्त्य सर्वकर्मणीति स्नापयेत्पितरं सुतः ॥
नारायणानुवाकेन चैवं स्नाप्य ततः पितुः ।
धौतवस्त्रञ्च सम्वेष्ट्य भूषणैर्भूषयेत्ततः ॥
गन्धमाल्यै रलङ्कृत्य शुचौ देशे कुशोत्तरे ।
तिलोपरि विधायैनं वस्त्रं हित्वान्यतः सुतम् ॥
धारयेदुत्तरीये द्वे यावत्कर्म समाप्यते ।
हुत्वैवोपासनं तस्य आर्द्र यज्ञीयकाष्ठकैः ॥
शिविकां कारयित्वाथ वस्त्रमूल्यादिभिः शुभाम् ।
तस्मिन्निवेश्य तं प्रेतं वाहकान्वरयेत्ततः ॥
स्ववर्णैर्वैष्णवानेव पूजयेत् स्वर्णदक्षिणैः ।
वहेयुस्तेऽपि भक्त्या तं पठन् विष्णुस्तवान् मुदा ॥
हरिद्रालाजपुष्पाणि विकिरन् वैष्णवा मुदा ।
वादित्रनृत्यगीताद्यैर्व्रजेयुः कीर्त्तयन् हरिम् ।
हुताग्निमग्रतः कृत्वा गच्छेयुस्तस्य बान्धवाः ॥
वाहकानामलाभे तु शकटे गोवृषान्विते ।
निवेश्य शिविकां रम्यां व्रजेयुर्नगराद्बहिः ॥
दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्वेषु यथासङ्ख्यं द्विजातयः ॥
प्राग्द्वारं सर्ववर्णानां न निषिद्धं कदाचन ।
गत्वा शुभतरं देशं रम्यं शुभजलान्वितम् ॥

यज्ञवृक्षसमाकीर्णं ममेध्यादिविवर्जितम् ।
खातयेत्तत्र कुण्डं तु निम्नं हस्तत्रयं तदा ।
द्वाभ्यान्त्रिभिर्वा विस्तारं चतुरायतमेव च ॥
ततः संमार्जनं कृत्वा गोमयान्वितवारिणा ।
सम्प्रोच्य यज्ञियैः काष्ठैः स्थितिं कुर्याद्यथाविधि ॥
आस्तीर्य दक्षिणाग्रमेवमेनाजिनमनुत्तमम् ।
तस्मिन्नास्तीर्य्य दर्भांस्तु विकीर्य च तिलांस्तथा ॥
तस्मिन्निवेश्य तं देवं घृताक्तं नववस्त्रकम् ।
ईषद्धौतं नवं श्वेतं सदाग्रयमवारितम् ॥
अहतं तद्विजानीया द्दैवे पित्र्ये च कर्म्मणि ।
परिषिच्य चिते पश्चादपोऽपरस्मानितीत्यृचा ॥
परिस्तीर्य्य शुभैर्दर्भैरपसव्येन सव्यतः ।
उरस्यग्निं निधायास्य पात्रासादानमाचरेत् ॥
प्रोक्षणं चमसाज्ये च चरुमिध्मस्रुवौ तथा ।
असाद्योक्तविधानेन ह्यध्माधानात् तमाचरेत् ॥
स्वगृह्योक्तविधानेन हुत्वा सर्वमशेषतः ।
पश्चादाज्ययुतं हव्यं जुहुयादुपवीतवान् ॥
सोमानमित्योदनेन प्रत्यृचं तत आजग्रतः ।
तं महेन्द्रेति सूक्तेन हुत्वा प्रत्यृचमेव च ॥
एष इत्यनुवाकाभ्यां पृषदाज्यं यजेत्ततः ।
सर्वैश्च वैष्णवै र्मन्त्रैः पृथगष्टोत्तरं शतम् ॥
तिलैश्च जुहुयात्पादमष्टाविंशतिमेव वा ।
एकैकामाहुतिं पश्चाद्वैकुण्ठपार्षदं यजेत् ॥
ब्रह्ममेध इति प्रोक्तं मुनिभिर्ब्रह्मतत्परैः ।

महाभागवतानां वै कर्तव्यमिदमुत्तमम् ॥
केशवार्पितसर्वाङ्गं शशिभं मङ्गलाह्वयम्।
न वृथा दापयेद्विद्वान् ब्रह्ममेधविधिं विना ॥
परमावगतेनापि कर्त्तव्यं हि द्विजन्मनः।
द्रव्यालाभेऽपि होतव्यं यज्ञियैश्च प्रसूनकैः ॥
शूद्रस्यापि विशिष्टस्य परमैकान्तिनस्तथा।
स्वाहाकारञ्च वेदञ्च हित्वा पुष्पैर्यजेच्छुभैः ॥
तूष्णीमद्भिः परीषिच्य परिस्तीर्य्य कुशैस्तिलैः।
नामभिः केशवाद्यैश्च तथा सङ्कर्षणादिभिः ॥
मत्स्यकूर्म्मादिभिश्चैव वेदार्थोक्तप्रबन्धकैः।
नमोऽन्तमेव जुहुयात् स्वाहाकारं विवर्जयेत् ॥
अमन्त्रकं प्रकुर्वीत शूद्रः सर्वमशेषतः।
दग्ध्वा शरीरं विधिवद्वैष्णवस्य महात्मनः ॥
यन्मरणं तदवभृतमिति मत्वा विचक्षणः।
स्नानार्थं पुण्यसलिलं व्रजेद्भागवतैः सह ॥
अनुलिप्य घृतं सर्वं गोमयं वा तिलैः सह।
दूर्वाग्रैरक्षतैर्लाजैः स्नानं कुर्व्वीत मङ्गलम् ॥
स्वगृह्योक्तविधानेन तस्य पुत्राः स्वगोत्रजाः।
पिण्डोदकप्रदानाद्यं सर्वमप्यौर्ध्वदैहिकम् ॥
निर्वर्त्त्य विधिना धर्मं सामान्येनावशेषतः।
विशिष्टं परमं धर्मं नारायणबलिं ततः ॥
प्रकुर्य्याद्वैष्णवैः सार्द्धं यथाशास्त्रमतन्द्रितः।
निमन्त्रयेत्त पूर्वेद्युर्ब्राह्मणान् वैष्णवान् शुभान् ॥
चतुर्विंशतिसंख्याकान् महाभागवतोत्तमः।

केशवादीन् समुद्दिश्य चतुर्विंशति वैष्णवान् ॥
रात्रौ निमन्त्र्य सम्पूज्य तैः सार्द्धं विजितेन्द्रियः ।
प्रातरुत्थाय तैर्गत्वा नदीं पुण्यजलान्विताम् ॥
धात्रीफलानुलिप्ताङ्गो निमज्य विमले जले ।
जपन् वै वैष्णवान् सूक्तान् स्नानं कुर्वीत वै द्विजः ॥
वैकुण्ठतर्पणं कुर्य्यात् कुसुमैः सतिलाक्षतैः ।
गृहं गत्वार्चयेद्देवं सर्वावरणसंयुतम् ॥
सुगन्धपुष्पैर्विविधैर्गन्धैर्धूपैश्च दीपकैः ।
नैवेद्यैर्भक्ष्यभोज्यैश्च फलैर्नीराजनैरपि ॥
अर्च्चयित्वा विधानेन मूलमन्त्रेण वैष्णवः ।
पुरतोऽग्निं प्रतिष्ठाप्य इध्माधानं समाचरेत् ॥
चरुं सशर्कराज्यन्तु जुहुयाद्वह्निमण्डले ।
प्रत्यृचं वैष्णवैः सूक्तैः केशवाद्यैश्च नामभिः ॥
हुत्वाथ वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम् ।
गवाज्येनैव जुहुयाच्चतुर्भिर्वैष्णवोत्तमः ॥
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत् ।
अग्नेरुत्तरभागेन गोमयेनानुलिप्य च ॥
आस्तीर्य्य दर्भान् प्रागग्रान् चतुर्विंशतिसंख्यया ।
उदक्प्रावणिकेनैव केशवादिक्रमेण तु ॥
अभ्यर्च्य गन्धपुष्पाद्यैस्तत्तन्मन्त्रैः पृथक् पृथक् ।
मध्वाज्यतिलमिश्रेण चरुणा पायसेन वा ॥
कुशेषु तेषु दद्यात्तु पिण्डान् तीर्थे विधानतः ।
स्वाहाकारेण मनसा केशवादीन् क्रमेण वै ॥
दत्त्वा पिण्डान् समभ्यर्च्य गन्धपुष्पाक्षतोदकैः ।

नित्यमभ्यर्च्य मुक्तेभ्यो वैष्णवेभ्यस्तथैवच ॥
दद्यात् पिण्डत्रयं चैव तेषां दक्षिणतः क्रमात्।
विष्णोर्नु केन सूक्तेन उपस्थानजपं तथा ॥
प्रदक्षिणं नमस्कारं कृत्वा भक्त्याथ वैष्णवः।
पिण्डांस्तु सलिले दत्त्वा स्नात्वा संपूज्य केशवम् ॥
ब्राह्मणान् भोजयेत्पश्चात्पादप्रक्षालनादिभिः।
अर्घ्याद्यैर्गन्धपुष्पाद्यैर्वासोऽलङ्कारभूषणैः ॥
केशवादीन् समुद्दिश्य नित्यान् मुक्तांश्च वैष्णवान्।
संपूज्य विधिवद्भक्त्या महाभागवतोत्तमान् ॥
पायसं सगुडं साज्यं शुद्धान्नं पानकैः फलैः।
सम्भोज्य विप्रानाचान्तान् प्रणिपत्य विसर्जयेत् ॥
हविष्यञ्च सकृद्भुक्त्वा भूमौ दद्यात् कुशोत्तरे।
अयं नारायणबलिर्मुनिभिः सम्प्रकीर्त्तितः ॥
स्वर्गस्थानां च सर्वेषां कर्त्तव्यो वैष्णवोत्तमैः।
अलाभे चैव विप्रेषु वैष्णवेष्वप्यशक्तितः ॥
सर्वं कृत्वा विधानेन जपहोमार्चनादिकम्।
केशवादीन् समुद्दिश्य नित्यान् मुक्तांश्च वैष्णवान् ॥
एकं वा भोजयेद्विप्रं महाभागवतोत्तमम्।
श्रुतिस्मृत्युदितं धर्मं विशिष्टाद्यः समाचरेत् ॥
वैष्णवं परमं धर्मं महाभागवतोत्तमम्।
तस्मिन् संपूजिते विप्रे सर्वं संपूजितं जगत् ॥
तस्माद्भागवतश्रेष्ठमेकं वापि सुपूजयेत्।
हरिश्च देवताश्चैव पितरश्च महर्षयः ॥
तस्मिन् संपूजिते विप्रे तुष्यन्त्येव न संशयः।

अर्चनं मन्त्रपठनं ध्यानं होमश्च वन्दनम् ॥
मन्त्रार्थचिन्तनं योगो वैष्णवानाञ्च पूजनम्।
प्रसादतीर्थसेवा च नवेज्याकर्म्म उच्यते।
पञ्चसंस्कारसम्पन्नो नवेज्याकर्म्मकारकः ॥
आकारत्नयसम्पन्नो महाभागवतोत्तमः।
आज्ञानामप्यलाभेतु एकं नारायणं बलिम् ॥
कुर्वीत परया भक्त्या वैकुण्ठपदमाप्नुयात्।
नित्यञ्च प्रतिमासञ्च पित्नोः श्राद्धं विधानतः ॥
सोदकुम्भं प्रदद्यात्तु यावद्दिव्यान्तिकं द्विजः।
प्रत्यब्दं पार्वणश्राद्धं मातापित्रोर्मृतेऽहनि ॥
अर्चयित्वाऽच्युतं भक्त्या पश्चात् कुर्य्याद्विधानतः।
वैष्णवानेव विप्रांस्तु सर्वकर्म्मसु योजयेत् ॥
सर्वत्नावैष्णवान् विप्रान् पतितानिव सन्त्यजेत्।
शङ्खचक्रविहीनाश्च देवतान्तरपूजकाः।
द्वादशीविमुखा विप्राः शैवाश्चावैष्णवाः स्मृताः ॥
अवैष्णवानां संसर्गात् पूजनाद्वन्दनादपि।
यजनाध्यापनात्सद्यो वैष्णवत्वाच्च्युतो भवेत् ॥
श्रुतिस्मृत्युदितं धर्मं नातिक्रम्याचरेत्सदा।
स्वशाखोक्तविधानेन वैकुण्ठार्चनपूर्व्वकम् ॥
कर्तृत्वफलसङ्गित्वे परित्यज्य समाचरेत्।
धर्मस्य कर्ता भोक्ता च परमात्मा सनातनः ॥
अधर्मं मनसा वाचा कर्मणाऽपि त्यजेत्सदा।
अकृत्यकरणाद्विप्रः कृत्यस्याकरणादपि ॥
अनिग्रहाच्चेन्द्रियाणां सद्यः पतनमृच्छति।

अनिशं मनसा यस्तु पापमेवाभिचिंतयेत् ॥
कल्पकोटिसहस्राणि निरयं वै स गच्छति ।
यस्तु वाचा वदेत्पाप मसत्यकथनादिकम् ॥
कल्पायुतसहस्राणि तिर्य्यग्योनिषु जायते ।
यस्त्वेवं कुरुते नित्यं चापल्यात्करणादिभिः ॥
युगकोटिसहस्राणि विष्ठायां जायते क्रिमिः ।
दान्तः शुचि स्तपस्वी च सत्यवाग्विजितेन्द्रियः ॥
स सात्विकः शमयुतः सुरयोनिषु जायते ।
यस्त्वर्थकामनिरतः सदा विषयचापलः ॥
स राजसो मनुष्येषु भूयो भूयोऽभिजायते ।
क्रोधी प्रमादवान् दम्भी नास्तिको विपरीतवाक् ॥
निद्रालु स्तामसो याति बहुशो मृगपक्षिताम् ।
महापापञ्चातिपापं पातकञ्चोपपातकम् ।
प्रासङ्गिकं नरः कृत्वा नरकान् याति दारुणान् ॥
तामिस्र मन्धतामिस्रं महारौरवरौरवौ ।
सङ्घातः कालसूत्रञ्च पूयशोणितकर्द्दमम् ॥
कुम्भीपाकं लोहशङ्कुस्तथा विण्मूत्रसागरः ।
तप्तायसास्त्रयो घोरा स्तप्तायसमयं गृहम् ॥
शय्या तप्तायसमयी पानकञ्चाग्निसन्निभम् ।
शूलमुद्गरसङ्घातं कालकङ्कोलदंशितम् ॥
सिंहव्याघ्रमहानागभीकरं सम्प्रतापनम् ।
क्रिमिराशिमहाज्वालं तथा विण्मूत्रभोजनम् ॥
असिपत्रवनं घोरं तप्ताङ्गारमयी नदी ।
सञ्जीवनं महाघोरमित्याद्या नरकाः स्मृताः ॥

महापातकजैर्घोरैरुपपातकजैरपि।
ब्रजतीमान् महाघोरान् दुर्वृत्तैरन्वितश्च यः॥
प्रायश्चित्तैरपैत्येनो यदकार्य्यकृतं महत्।
कामतस्तु कृतं यत्तु मरणात्सिद्धि मृच्छति॥
ब्रह्महत्या सुरापानं विप्रस्वर्णस्य हारणम्।
गुरुदाराभिगमनं तत्संयोगश्च पञ्चमः।
संलापात् स्पर्शनाद्वासादेकशय्यासनाशनात्॥
सौहार्द्दाद्वीक्षणाद्दानात्तेनैव समतां व्रजेत्।
गुर्वाक्षेपस्त्रयीनिन्दा सुहृदाश्वधएव च॥
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम्।
यागस्थं क्षत्रियं वैश्यं विशिष्टं शूद्रमेव च॥
शरणागतं स्वामिनं च पितरं भ्रातरं गुरुम्।
पुत्रं तपस्विनं शिष्यं भार्य्यां तेषां च सर्वतः॥
अन्तर्वत्नीं स्त्रियो गाश्च तथा त्रयीं रजस्वलाः।
देवताप्रतिमां साध्वीं बालांश्चैव तपस्विनीम्॥
घातयित्वा समाप्नोति ब्रह्महत्यां न संशयः।
जैह्म्यप्रमात्मस्तवं क्रूरं निषिद्धान्नानां च भक्षणम्॥
रजस्वलामुखास्वादः पञ्चयज्ञादिवर्जनम्।
अनृतं कूटसाक्षीच महायन्त्रप्रवर्त्तनम्॥
आकर्षणादि षट्कर्म्म लाक्षालवणविक्रयः।
पाषण्डकल्कक्रुहकवेदवाह्यविधिक्रिया॥
यक्षराक्षसभूतानामर्चनं वन्दनं तथा।
वक्त्रेणैवाम्बुपानञ्च सुरापस्त्रीनिषेवणम्॥
गवां निष्पीडनं क्षीरं ताम्रस्थं गव्यमेव च।

पात्रान्तरगतं यत्तु नारिकेलफलाम्बु च ॥
तालहिन्तालमाधूकफलानां रसमेव च ।
खरोष्ट्रमानुषीक्षीरं सुरापानसमानि वै ॥
मानकूट तुलाकूट निक्षेपहरणानि च ।
भूरत्ननारीहरणं रसान्नस्तेयमेव च ॥
गुडकार्पासलवणतिलकान् सामिषाम्बु च ।
काप्यवस्त्रे च हृत्वा च लोहानां हरणं तथा ॥
विषाग्निदाहनं चैव सुवर्णस्तेयसम्मितम् ।
सखी भार्या कुमारी च सगोत्रा शरणागता ॥
साध्वी प्रव्रजिता राज्ञी निक्षिप्ता च रजस्वला ।
वर्णोत्तमा तथा शिष्यभार्या भ्रातृपितृव्ययोः ॥
मातामही पितामही पितुर्मातुश्च सोदराः ।
अन्या मातृव्यदुहिता मातुलानी पितृष्वसा ॥
जननी भगिनी धात्री दुहिताचार्यभामिनी ।
स्नुषाचार्यसुता चैव तत्पत्नी सुमहातपाः ॥
मातुः सपत्नी सार्वभौमी दीक्षिता चैव भामिनी ।
कपिला महिषी धेनुर्देवताप्रतिमा तथा ॥
आसामन्यतमाङ्गच्छेद्गुरुतल्पग उच्यते ।
महापातकिनामत्र तत्संयोगिन एव च ॥
प्रायश्चित्तं नास्ति तेषां भृग्वग्निपतनं स्मृतम् ।
हीनवर्णाभिगमनं गर्भघ्नं भर्तृहिंसनम् ॥
विशेषपतनीयानि स्त्रीणां पुंसां च यानि तु ।
स्त्रीशूद्रविट्क्षत्त्रबधो गोबालहननं तथा ॥
फलपुष्पद्रुमाणां हि चौषधीनाञ्च हिंसनम् ।

वापीकूपतड़ागानां ध्वंसनं ग्रामघातनम् ॥
आभिचारादिकं कर्म्म शस्यध्वंसनमेव च।
उद्यानारामहननं प्रपाविध्वंसनं तथा ॥
मातापितृसुतत्यागो दारत्यागस्तथैव च।
स्वाध्यायाग्निगुरुत्यागस्तथा धर्म्मस्य विक्रयः ॥
कन्याया विक्रयश्चैव स्वाध्यायमखविक्रयः।
परस्त्रीगमनञ्चैव परद्रव्यापहारणम् ॥
तथा पुंसाभिगमनं पशूनां गमनं तथा।
वृषक्षुद्रपशूनाञ्च पुंस्त्वविध्वंसनं तथा ॥
कन्याया दूषणं चैव गवां योनिनिपीड़नम्।
मानुषानां पशूनाञ्च नासाद्यङ्गविभेदनम् ॥
ग्रामान्त्यजस्त्रीगमनं विज्ञेयमनुपातकम्।
नित्यनैमित्तिकश्राद्धवर्जनं पशुहिंसनम् ॥
मृगपक्षिमहासर्पयादसां हननक्रिया।
साधारणस्त्रीगमनं पत्न्यास्ये मैथुनं तथा ॥
पारवित्तं पारदार्यं निन्दितार्थोपजीवनम्।
तथैवानाश्रमे वासो देवद्रव्योपजीवनम् ॥
पयोदधितिलानाञ्च विक्रयं लवणक्रयम्।
शाकमूलफलस्तेयमतिवृद्ध्युपजीवनम् ॥
निमन्त्रितातिक्रमणं दुष्प्रतिग्रहमेव च।
ऋणानामप्रदानत्वं सन्ध्याकालातिवर्त्तनम् ॥
वृथैवाग्निपरित्यागः संग्रामेषु पलायिता।
दुर्भोजनं दुरालापं स्वधर्म्मस्य च कीर्त्तनम् ॥
परेषां दोषवचनं परदारनिरीक्षणम्।

नास्तिक्यं व्रतलोपश्च स्वाश्रमाचारवर्जनम् ॥
असच्छास्त्राभिगमनं व्यसनान्यात्मविक्रयः।
व्रात्यतात्मार्थवचनमेकैकमुपपातकम् ॥
इन्धनार्थं द्रुमच्छेदः क्रिमिकीटादिहिंसनम्।
भावदुष्टं कालदुष्टं क्रियादुष्टं च भक्षणम् ॥
मृच्चर्मतृणकाष्ठाम्बुस्तेयमत्यशनं तथा।
अनृतं विषयचापल्यं दिवास्वप्नमसत्कथा ॥
तच्छ्रावणं परान्नं च दिवामैथुनमेव च।
रजस्वला सूतिका च परस्त्रीमभिदर्शनम् ॥
उपवासदिने श्राद्धे दिवा पर्वणि मैथुनम्।
शूद्रप्रेष्यं हीनसख्य मुच्छिष्टस्पर्शनादिकम् ॥
स्त्रीभिर्हास्यं कामजल्पं मुक्तकेश्यादिवीक्षणम्।
इत्यादयो ये च दोषाः प्रकीर्णाः परिकीर्त्तिताः।
महापापं पातकञ्च अनुपातकमेव च ॥
उपपापं प्रकीर्णञ्च पञ्चधा तत्र कीर्त्तितम्।
महापातकतुल्यानि पापान्युक्तानि यानि तु ॥
तानि पातकसंज्ञानि तन्न्यून मनुपातकम्।
उपपापं ततो न्यूनं ततोहीनं प्रकीर्णकम् ॥
संसर्गस्तु तथा तेषां प्रसङ्गात्सम्प्रकीर्त्तितम्।
क्रमेण वक्ष्यते तेषां प्रायश्चित्तं विशुद्धये ॥
यो येन सम्वसेत्तेषां तस्यैव व्रतमाचरेत्।
संसर्गिणस्तु संसर्गस्तत्संसर्गस्तथैव च ॥
चतुर्थस्य न दोषस्तु पतत्येषु यथाक्रमम्।
प्रकीर्णकादिदोषाणां प्रासङ्गिक मविध्यते ॥

स्वल्पत्वात्पतनाभावात्तत्संसर्गान्न दुष्यति ।
स्नानाच्च शुद्धिर्दोषस्य संसर्गात्पतितं विना ॥
सावित्र्या चापि शुध्येत कर्त्तुरेव व्रतक्रिया ।
कृते पापे यस्य पुंसः पश्चात्तापोऽनुजायते ॥
प्रायश्चित्तन्तु तस्यैव कर्त्तव्यं नेतरस्य तु ।
जातानुतापस्य भवेत्प्रायश्चित्तं यथोदितम् ॥
नानुतापस्य पुंसस्तु प्रायश्चित्तं न विद्यते ।
नाश्वमेधफलेनापि नानुतापे विशुद्ध्यते ॥
तस्माज्जातानुतापस्य प्रायश्चित्तं विशुध्यते ।
चरेदकामतः कृत्वा पतनीयं महत् पुमान् ॥
न कामतश्चरेद्धर्मं भृग्वग्निपतनं विना ।
यः कामतो महापापं नरः कुर्य्यात्कथञ्चन ॥
न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनं विना ।
इत्युक्तं ब्रह्मणा पूर्वं मनुना च महर्षिभिः ॥
पातकेषु च सर्वत्र कामतो द्विगुणं व्रतम् ।
कामतः पतनीयेषु मरणाच्छुद्धिमृच्छति ॥
हयमेधायनः शुद्धिः सार्वभौमस्य भूपतेः ।
कामतस्त्वनुपापेषु लोके न व्यवहार्यता ॥
महत्सु चातिपापेषु प्रदीप्तं ज्वलनं विशेत् ।
प्रायश्चित्तैरपैत्येनो यदकामकृतं भवेत् ॥
कामतो व्यवहारस्तु वचनादिह जायते ।
इति योगीश्वरेणोक्त मुपपापेषु तत्र तत् ॥
तस्मादकामतः पापं प्रायश्चित्तेन शुध्यति ।
तेषां क्रमेण वक्ष्यामि प्रायश्चित्तं विशुद्धये ॥

शिरः कपालध्वजवान् भिक्षाशी कर्म्म वेदयन्।
ब्रह्महा द्वादशाब्दानि पुण्यतीर्थे समाविशेत्॥
प्रयागे सेतुबन्धादिपुण्यक्षेत्रेषु पापकृत्।
तत्र वर्षादि विज्ञाप्य स्वस्वकल्यमशेषतः॥
तत्रस्थैर्ब्राह्मणैरेवानुज्ञातो व्रतमाचरेत्।
चत्वारो ब्राह्मणाः शिष्टाः परिषदित्यभिधीयते॥
तैरुक्तमाचरेद्धर्ममेको वाध्यात्मवित्तमः।
जटी वल्कलवासाश्च वह्निरेव समाविशन्॥
स्नानं त्रिषवणं कुर्वन् क्षितिशायी जितेन्द्रियः।
एकभुक्तेन नक्तेन फलैरनशनेन च॥
समापयेत्कर्म्मफलं यथाकालं यथाबलम्।
राममिन्दीवरश्यामं पौलस्त्यद्रुमकल्मषम्॥
ध्यात्वा षडक्षरं मन्त्रं नित्यं तावदहर्निशम्।
एवं द्वादशवर्षाणि पुण्यतीर्थे समाचरन्॥
मुच्यते ब्रह्महत्याया स्तपसा वीतकल्मषः।
चरिते व्रतश्चायाते यवसङ्गेषु दापयेत्॥
तैस्तस्य च सुसंस्काराः कर्त्तव्या बान्धवैर्जनैः।
विप्रमुख्याय गां दत्त्वा ब्राह्मणान् भोजयेत्ततः॥
प्रारब्धव्रतमध्ये तु यदि पञ्चत्वमाप्नुयात्।
विशुद्धिस्तस्य विज्ञेया शुभाङ्गतिमवाप्नुयात्॥
असंस्कृतस्तु गोषु स्यात् पुनरेव व्रतं चरेत्।
अशक्तस्तु व्रते दद्याद्गोसहस्रं द्विजन्मनाम्॥
पात्रे धनं वा पर्य्याप्तं दत्त्वा शुद्धिमवाप्नुयात्।
ब्रह्महत्यासमेष्वेवं कामतो व्रतमाचरेत्॥

अकामतश्चरेद्व्रमं पापं मनसि चोच्यते।
आज्ञापयितानुमन्तानुग्राहकस्तथैव च॥
उपेक्षिता शक्तिमांश्चेत्यादीनं व्रतमाचरेत्।
कामतस्तु चरेत् पूर्णं तत्रापि द्विगुणं गुरौ॥
अन्तर्वत्न्यां तथा त्वय्यां तथैव व्रतमाचरेत्।
आचार्य्ये च वनस्थेन मातापित्रोर्गुरौ तथा॥
तपस्विनि ब्रह्मविदि द्विगुणं व्रतमाचरेत्।
यावत्स्वक्षत्रियं वैश्यं विशिष्टं शूद्रमेव च॥
कपिलां गर्भिणीञ्चाश्च हत्वा पूर्णव्रतं चरेत्।
अकामतस्तु तेष्वर्धं मुनिभिः सम्प्रकीर्तितम्॥
विधेः प्राथमिकादस्माद् द्वितीये द्विगुणं चरेत्।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः॥
चतुर्णामाश्रमाणाञ्च शौचवत् साधनं चरेत्।
प्रायश्चित्तं तदीमध्ये केचिदिच्छन्ति सूरयः॥
गोब्राह्मणपरित्राण मश्वमेधावभृथता।
इयं विशुद्धिरुदिता प्रहत्या कामतो द्विजान्॥
अग्निप्रपतनं केचिदिच्छन्ति मुनिसत्तमाः।
लोमभ्यः स्वाहेत्यादि मन्त्रैर्हुत्वा पृथक् पृथक्॥
अवाक्शिराः प्रविशराग्नौ दग्धः शुद्धो भवेन्नरः।
अकामतः सुरां पीत्वा मद्यं वापि द्विजोत्तमः॥
पूर्ववद्द्वादशाब्दानि चरेद्व्रतमचिह्नितम्।
जपित्वा दशसाहस्रं त्रिसन्ध्यासु निरन्तरम्॥
द्वादशाब्दं मनुं जप्त्वा रतः शुद्धो भवेन्नरः।
यानि कानि च पापाणि सुरापानसमानि तु॥

अकामतश्चरेदर्धं कामतः पूर्णमाचरेत् ।
सर्वत्र पतनीयेषु चरित्वा व्रतमुक्तवत् ॥
पुनः संस्कारमर्हन्ति त्रयस्ते द्विजातयः ।
अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव च ॥
मानुषीक्षीरपानेन पुनः संस्कारमर्हति ।
इत्युक्तं मनुना पूर्वमन्यैश्चापि महर्षिभिः ॥
करञ्जं लशुनं शिग्रु मूलकं ग्रामसूकरम् ।
छत्राकं कुक्कुटाण्डञ्च कालं पिण्याकं लशुनं तथा ॥
गृध्रमुष्ट्रं नृमांसं च खरं तत्तक्रमेव च ।
माहिषं माकरं मांसमृक्षं वानरमेव च ॥
निष्पीडितञ्च गोक्षीरमारनालं च मूषकम् ।
मार्जारं श्वेतवृन्ताकं कुम्भीनिम्बदलं तथा ॥
क्रव्यादञ्च तथा भेकं शृगालं व्याघ्रमेव च ।
एवमादिनिषिद्धांस्तु भक्षयित्वा तु कामतः ॥
चरेद्व्रतं तथा पूर्णं पादोनमस्यादकामतः ।
नारिकेलरसं पीत्वा वायुना ताडितं द्विजः ॥
दग्ध्वा तालपलाशम्बा करनिर्मथितं दधि ।
ताम्रपात्रगतं गव्यं क्षीरं च लवणान्वितम् ॥
कराग्रेणैव यद्दत्तं घृतं लवणमम्बु च ।
सूतकान्नञ्च शूद्रान्नं कदर्याद्यन्न मेव च ॥
श्वस्पृष्टं सूतिकादृष्ट मुदक्यादृष्टमेव च ।
पाषण्डभण्डचण्डालवृषलीपतिवीक्षितम् ॥
दत्त्वावशिष्टं यक्षाणां भूतानां रक्षसां तथा ।
उद्धृत्य वामहस्तेन वक्त्रेणैव पिबेदपः ॥

यच्चान्नमाद्यैकोद्दिष्टमुच्छिष्टमगुरोरपि ।
हरेरनर्पितं भुक्त्वा न भुक्त्वा देवतार्पितम् ॥
कामतस्तु चरेद्धर्मं चरेद्देदमकामतः ।
अकामतः सकृज्जग्ध्वा चरेच्चान्द्रायणव्रतम् ॥
म्लेच्छचण्डालपतितपाषण्डानामकामतः ।
उदक्यासह भुक्त्वा च चरेद्धर्मव्रतं द्विजः ॥
चण्डालकूपभाण्डस्थं मद्यभाण्डस्थमेव च ।
पीत्वा समाचरेत्पापं कामतोऽर्द्धं समाचरेत् ॥
मद्यगन्धं समाघ्राय कामतो व्रतमाचरेत् ।
अकामतस्तु निष्ठीव्य चरेदाचमनं द्विजः ॥
अभिमन्त्र्य जलं प्राश्य सावित्र्या च समन्वितम् ।
वृथा मांसाशने चैव भावदुष्टादिभक्षणे ॥
चरेत्सान्तपनं कृच्छ्रं चान्द्रायणमथापि वा ।
कामतस्तु चरेत्पादमभ्यासे पूर्णमाचरेत् ॥
कामतस्तु सुरां पीत्वा सन्तप्तं चाग्निसन्निभम् ॥
गोमूत्रमम्बु वा पीत्वा मरणाच्छुद्धिमृच्छति ॥
सुरायाः प्रतिषेधस्तु द्विजानामेव कीर्त्तितः ।
विशिष्टस्यापि शूद्रस्य केचिदिच्छन्ति सूरयः ॥
अनृतं मद्यमांसञ्च परस्त्रीस्वापहारणम् ।
विशिष्टस्यापि शूद्रस्य पातित्यं मनुरब्रवीत् ॥
सुरा वै मलमन्नादेः पापाद्वै मलमुच्यते ।
तस्माद्‌ ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥

चकाराद्विशिष्टस्य शूद्रस्यापि पूर्ववचनात् यत्तु राजन्य-वैश्ययोर्गवाज्यादिमद्यस्याप्रतिषेधः तन्न मतं स्यात् न च

निषिद्धादीनां सतां मतञ्च। विशिष्ट शूद्रस्यापि मद्यमांसनिषिद्धत्वात्। इज्याध्ययनादिश्रौतस्मार्त्तकर्माहस्य। क्षत्त्रविशिष्टस्यापि तद्वद्वैश्यस्य च प्रतिषेधात् न तु प्रायश्चित्ताल्पत्वप्रतिपादनपराणेव नत्वप्रतिषिद्धपराणि ब्राह्मणस्य मरणान्तिक मुपदिष्टं राजन्यवैश्यविशिष्टशूद्राणाम् पूर्णपादोनार्द्धोनव्रतचर्य्या उक्ता। सुरायास्तु सर्वेषां द्विजाणां मरणान्तिकमेव शूद्रस्य गोसहस्रदानं वा परिपूर्णव्रतं वा चरितव्यम् नतु मरणान्तिकम्॥

अग्निवर्णां सुरां पीत्वा सुरायास्तु द्विजातयः।
मरणाच्छुद्धिमृच्छन्ति शूद्रस्तु व्रतमाचरेत्॥
राजन्यवैश्यौ तु मद्यं पीत्वा चरेतां व्रतमेव च।
शूद्रस्त्वर्धञ्चरेत्तद्वद्ब्राह्मणो मरणाच्छुचिः॥
यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासमम्।
नात्तव्यमेव विप्रेण भुक्त्वा तु ज्वलनं विशेत्॥
मद्यं वापि सुरां वापि यः पिबेद्ब्राह्मणाधमः।
अग्निवर्णन्तु गोमूत्रं पिबेदञ्जलिपञ्चकम्॥
मरणाच्छुद्धिमाप्नोति जीवेद्यदि विशुध्यति।
मद्यस्य प्रतिषिध्यर्थं घृतं क्षीरमथाम्बु वा॥
प्राशयित्वाग्निवर्णन्तु तद्वत्तां शुद्धिमाप्नुयात्।
दत्त्वा सुवर्णं विप्राय गाञ्च दत्त्वा विशुध्यति॥
क्षत्त्रविट्शूद्रजातीनां सुवर्णेतु यथाक्रमम्।
पादोनमर्द्धं पादं वा चरेद्व्रतं यथोक्तवत्॥
समेष्वर्थं प्रकुर्व्वीत कामतः पूर्णमाचरेत्।
कामतः स्वर्णहारी तु राज्ञे मुसलमर्पयेत्॥

स्वकर्म्म ख्यापयंश्चैव हतो मुक्तोऽपि वा शुचिः।
राज्ञा यदि विमुक्तः स्यात् पूर्व्ववद्व्रतमाचरेत्॥
आत्मतुल्यसुवर्णं वा दद्याद्विप्रस्य तुष्टिकृत्।
तत्समव्यतिरिक्तेषु पादमेव चरेद्व्रतम्॥
चान्द्रायणं पराकं वा कुर्य्यादल्पेषु सर्व्वशः।
द्रव्यप्रत्यर्पणं कर्त्तुस्तन्मूल्यद्रव्यमेव वा॥
व्रतं समाचरेत् कृत्वा यथा परिषदीरितम्।
बलाच्चौर्य्येण वा स्नेहाद्व्यवहारादिनापि वा॥
समाहरति यद् द्रव्यं तत्सर्व्वं स्तेयमुच्यते।
देशं कालं वयः शक्तिं पापञ्चावेक्ष्य सर्व्वतः॥
प्रायश्चित्तं प्रदातव्यं धर्म्मविद्भिर्मनीषिभिः।
भगिनीं मातरं पुत्रीं स्नुषामाचार्य्ययोषितम्॥
अकामतः सकृद्गत्वा चरेत् पूर्णव्रतं नरः।
पश्चिमाभिमुखां गङ्गां कालिन्द्या सह सङ्गताम्॥
प्लाक्षप्रस्रवणं पुण्यं द्वारकां सेतुमेव वा।
चन्द्रपुष्करणीं वापि वेणीं सागरसङ्गमम्॥
गोदावर्य्याः शबर्य्यां वा गत्वा तत्राचरेद्व्रतम्।
पूर्व्ववद्द्वादशाब्दानि चरेद् व्रतमनुत्तमम्॥
कृष्णाय नम इत्येष मन्त्रः सर्व्वाघनाशनः।
इममेव जपन्मन्त्रं ध्यात्वा हृदि सनातनम्॥
त्रिसन्ध्यास्वयुतं भक्त्या नित्यं द्वादशवत्सरम्।
चान्द्रायणैः पराकैर्व्वा कृच्छ्रैर्व्वा शमयेत् समाः॥
जीर्णे चीर्णेऽथवा पुण्यकामी मण्डपपाटलैः।
निवसित्वा बहिर्ग्रामात् क्षितिशायी जितेन्द्रियः॥

मनः सन्तापकरणमुद्वहेच्छोकमन्ततः।
सदा कृष्णं हरिं ध्यायन् जपन्मन्त्रमनुत्तमम्॥
द्वादशाब्दाद्विमुच्येत पापादस्मात्तृषो बलात्।
भगिन्यादिषु योषित्सु यो गच्छेत्कामतो नरः॥
प्रतप्तासमतोयेन समाश्लिष्य हुताशने।
शयित्वा सुमहद्वह्नौ दग्धः शुद्धिमवाप्नुयात्॥
एतासु मतिदुष्टासु कामतो बहुशो व्रजेत्।
एवमग्निं विशेद्धीमान् पापं विज्ञाप्य पर्षदि॥
अकामतः सकृद्गत्वा चरेद्धर्मव्रतं नरः।
अभ्यासे तु चरेत् पूर्णं कामतः सकृदेव च॥
कामतोऽभ्यासविषये तत्रापि मरणान्तिकम्।
समिध्वर्थं प्रकुर्वीत सकृदेव ह्यकामतः॥
कामतस्तु चरेत् पूर्णमभ्यासे मरणान्तिकम्।
अकामतो वाभ्यासे तु पूर्णमेव व्रतं चरेत्॥
अन्यास्वपि च नारीषु सकृद्गत्वाप्यकामतः।
पादमेवाचरेद्विद्वानभ्यासे त्वर्धमाचरेत्॥
साधारणासु सर्वासु चरेच्चान्द्रायणव्रतम्।
कामतो द्विगुणं तासु अभ्यासे व्रतमाचरेत्।
स्वदारास्वास्यगमने पुंसि तिर्यक्षु कामतः॥
चान्द्रायणं पराकं वा प्राजापत्यमथापि वा।
उदक्यां सूतिकां गत्वा चरेत्सान्तपनं व्रतम्॥
चान्द्रायणं तथान्यासु कामतो द्विगुणं चरेत्।
अष्टम्याञ्च चतुर्दश्यां दिवा पर्वणि मैथुनम्॥
कृत्वा सचैलं स्नात्वा च वारुणीभिश्च मार्जयेत्।

चण्डालीं पुंश्चलीं म्लेच्छां पाषण्डीं पतितामपि ॥
रजकीम्बु रुधिव्याधां सर्वां ग्रामान्त्यजाः स्त्रियः ।
अकामतः सकृद्गत्वा चरेच्चान्द्रायणव्रतम् ॥
अभ्यासे तु व्रतं पूर्णन्ताभिश्च सह भोजने ।
कामतस्तु सकृद्गत्वा भुक्त्वा त्वर्थव्रतं चरेत् ॥
तत्र भूयश्चरेत् पूर्णमभ्यासे मरणान्तिकम् ।
यो येन सम्वसेद्देषान्तत्पापं सोऽपि तत्समः ॥
संलापस्पर्शनादेव शय्याशनासनादिभिः ।
तद्वदेवाचरेत् सर्वं व्रतं द्वादशवार्षिकम् ॥
अकामतश्चरेद्धर्मं षण्मासात्पादमाचरेत् ।
मासत्रये द्विवर्षं स्यान्मासमात्रे तु वत्सरम् ॥
कामतो द्विगुणं तत्र चरेदब्दादिकं व्रतम् ।
ऊर्द्धन्तु वत्सरात् पूर्णं द्विगुण्याद्यमतः क्रमात् ॥
कामतो वत्सरादूर्ध्वं द्विगुणव्रतमाचरेत् ।
ऊर्ध्वं द्विवर्षात्तस्यापि मरणान्तिकमुच्यते ॥
यजनाध्यापनाद्दानत्पानाच्च सह भोजनात् ।
सद्य एव पतत्यस्मिन् पतितेन सहाचरन् ॥
तत्राप्यकामतस्त्वर्थं कामतः पूर्णमाचरेत् ।
षण्मासे वत्सरेऽप्यत्र द्विगुणं त्रिगुणं स्मृतम् ॥
ऊर्ध्वंतु निष्कृतिर्न स्याद्भृग्वग्निपतनं विना ।
द्वितीयस्य तृतीयस्य नेष्यते मरणान्तिकम् ॥
अर्द्धं पादं समुद्दिष्टं कामतो द्विगुणं तथा ।
ब्रह्मकूर्चोपवासेन चतुर्थस्य विनिष्कृतिः ॥
पञ्चमस्य न दोषः स्यादिति धर्मविदो विदुः ।

अन्येषामपि संसर्गात्प्रायश्चित्तं प्रकल्पयेत् ॥
पतनीयेषु नारीणां मरणान्तिकमुच्यते।
अकामतश्चरेदर्द्धमेतद्व्रतं पृथु यथोदितम् ॥
व्यभिचारेतु सर्वत्र कामतो मरणाच्छुचिः।
अकामतश्चरेत् पूर्णं प्रातिलोम्यं गता सती ॥
अर्द्धमेवानुलोम्येषु तथैव भ्रूणहादिषु।
यतिश्च ब्रह्मचारी च गत्वा स्त्रियमकामतः ॥
गुरुतल्पगमुद्दिष्टं पूर्णमर्थं समाचरेत्।
कामतो ब्रह्मचारी तु पूर्णमेवाचरेद्व्रतम् ॥
यतिस्तु मरणाच्छुद्धिः शिश्नः स्यात् क्रन्तनेन वा।
तयोस्तु रेतःस्खलने कृच्छ्रं चान्द्रायणं चरेत् ॥
जप्त्वा सहस्रं गायत्र्या गृहस्थः शुद्धिमाप्नुयात्।
द्विसहस्रं वनस्थस्तु जपेद्रेतोनिपातने ॥
तत्रापि कामतस्तेषां द्विगुणत्रिगुणादिकम्।
परिव्राजनकामस्तु नयनोत्पाटनं तथा ॥
एवं समाचरेद्धीमान् प्रायश्चित्तमतन्द्रितः।
प्रायश्चित्तमकुर्व्वाणः पापेषु निरतः सदा ॥
कल्पायुतशतं गत्वा नरकं प्रतिपद्यते।
धृत्वा गोचर्ममात्रन्तु समामेकं निरन्तरम् ॥
पञ्चगव्यं पिवन् गोघ्नो गुरुगामी विशुध्यति।
गोमूत्रेणैव च स्नात्वा पीत्वा चाचम्य वारिभिः ॥
विष्णोः सहस्रनामानि जपेन्नित्यं समाहितः।
शयीत गोव्रजे रात्रौ गवां हितमनुस्मरन् ॥
दस्य्वाद्यादिभिर्ह्रीतां गां पङ्के निपतितां तथा ॥

स चरेदथवा प्राणान् तदर्थं वै परित्यजेत् ॥
तेनैव हि विशुद्धः स्यादसम्पूर्णव्रतोऽपि वा।
व्रतान्ते गोप्रदो भूत्वा ततः शुद्धिमवाप्नुयात् ॥
गोस्वामिने च गां दत्त्वा पश्चादेवं व्रतं चरेत्।
दद्यात् त्रिरात्रमुपोष्य वृषमेकञ्च गा दश ॥
योक्त्रे च गृहदाहाद्यैर्बन्धनैर्वा हता यदि।
मतिपूर्वेण गां हत्वा चरेत्त्रैवार्षिकं व्रतम् ॥
द्विवर्षं पूर्ववद्वापि चर्मणार्द्रेण वाससा।
कपिलां गर्भिणीं वापि वृषं हत्वा च कामतः ॥
व्रतं द्वादशवर्षाणि चरेद्ब्रह्मव्रतोदितम्।
आचार्य्यदेवविप्राणां हत्वा च द्विगुणं चरेत् ॥
होमधेनुं प्रसूताञ्च दाने च समलङ्कृताम्।
उपभुक्तां तृषेणापि ताञ्च द्वादशवार्षिकम् ॥
निष्पीड़नं वापि तेषु दोषेष्वल्पमतन्द्रितः।
शरणागतबालस्त्रीघातुकैः सम्वसेन्न तु ॥
चीर्णव्रतानपि चरन् कृतघ्नानपि सर्वदा।
अग्निदाङ्गरदां चण्डीं भर्त्तृघ्नीं लोकघातिनीम् ॥
हिंस्रयंस्तु विधानस्त्रीं हत्वा पापं न गच्छति।
गुरुं वा बालवृद्धान्वा श्रोत्रियं वा बहुश्रुतम् ॥
आततायिन मायान्तं हन्यादेवाविचारयन्।
नाततायिबधे दोषो हन्तुर्भवति कश्चन ॥
प्रख्यातदोषः कुर्व्वीत परित्यक्तं यथोदितम्।
अनभिख्यातदोषस्तु रहस्यव्रतमाचरेत् ॥
कण्ठमात्रजले स्थित्वा रामम्नत्रं समाहितः।

जपेद्वा दशसाहस्रं ब्रह्महा शुद्धिमाप्नुयात् ॥
सुरापः स्वर्णहारी तु जपेदष्टाक्षरं तथा ।
लक्षं जप्त्वा कृष्णमन्त्रं मुच्यते गुरुतल्पगात् ॥
उपोष्यान्तर्जले स्थित्वा वासुदेवमनुं शुभम् ।
जपेद्वा दशसाहस्रं गोघ्नः प्रयतमानसः ॥
असंख्यानि च पापानि अनुक्तान्यपि यानि च ।
चित्तस्थो भगवान् कृष्णः सर्वं हरति तत्क्षणात् ॥
एकादश्युपवासस्य फलं प्राप्नोति मानवः ।
आषाढ़ादिचतुर्मासि कृते भुक्त्वा जितेन्द्रियः ॥
दुग्धाब्धौ शेषपर्यङ्के शयानं कमलापतिम् ।
ध्यात्वा समर्चयेन्नित्यं महद्भिर्मुच्यते ह्यघैः ॥

इति रहस्यप्रायश्चित्तम् ॥

रजस्वलां सूतिकाञ्च चण्डालं पतितं तथा ॥
पाषण्डिनं विकर्मस्थं शैवं स्पृष्ट्वाऽप्यकामतः ।
गोमयेनानुलिप्ताङ्गः सवासा जलमाविशेत् ॥
गायत्र्याष्टशतं जप्त्वा घृतं प्राश्य विशुध्यति ।
स्पृष्ट्वा तु कामतः स्नात्वा चरेत्सान्तपनं व्रतम् ॥
श्वपचं पतितं स्पृष्ट्वा गोपालव्यजनाद्दृतम् ।
विड्वराहं शुनङ्काकं गर्दभं यूपमेव च ॥
मद्यं मांसं तथैवोष्ट्रं विण्मूत्रं दशमेव च ।
करकञ्जलफेनञ्च वृक्षनिर्यासमेव च ॥
करञ्जं लशुनञ्चानुगच्छति स्वस्य शुद्धये ।
सचैलमेकवाह्याप: सावित्रीं त्रिशतं जपेत् ॥

तत्स्पृष्टस्पृष्टिनौ स्पृष्ट्वा सवासा जलमाविशेत्॥
ऊर्ध्वमाचमनं प्रोक्तं धर्मविद्भिरकल्मषैः।
उच्छिष्टकेशभस्मास्थिकपालं मलमेव च॥
स्नानार्द्रं धरणीञ्चैव स्पृष्ट्वा स्नानं समाचरेत्।
प्रक्षाल्य पादौ संक्रम्य तथैवाचम्य वारिणा॥
मन्त्रसम्मार्जितजलं स्पृष्ट्वा ताञ्च विशुध्यति।
विशिष्टानाञ्च विप्राणां गुरूणां व्रतशालिनाम्॥
विनीततराणामुच्छिष्टं स्पृष्ट्वा स्नानं समाचरेत्।
शैवानां पतितानाञ्च वाह्यानान्त्यक्तकर्मणाम्॥
उच्छिष्टस्पर्शनं कृत्वा चरेच्चान्द्रायणं व्रतम्।
उच्छिष्टेन स्वयं चान्यमुच्छिष्टं यद्यकामतः॥
स्पृष्ट्वा सचैलं स्नात्वा च सावित्र्यष्टशतं जपेत्।
कामतश्चाचरेत् कृच्छ्रं ब्रह्मकूर्चं द्विजोत्तमः॥
राजानञ्च विशं शूद्रं चरेच्चान्द्रायणं द्विजः।
तौ च स्नात्वा चरेत् कृच्छ्रं गां वा दद्यात्पयस्विनीम्॥
उच्छिष्टिनं स्पृशन् शूद्रमुच्छिष्टं स्नानमेव वा।
सवासा जलमाप्लुत्य चरेत्सान्तपनव्रतम्॥
तत्रापि कामतः स्पृष्ट्वा पराकद्वयमाचरेत्।
पञ्चगव्यं पिवेच्छूद्रः स्नात्वा नद्यां विधानतः॥
चण्डालं पतितं मद्यं सूतिकाञ्च रजस्वलाम्।
उच्छिष्टेनतु संस्पृष्टौ पराकत्रयमाचरेत्॥
उच्छिष्टेन चिरं काल मुषित्वा स्नानमाचरेत्।
उच्छिष्टाशौचमरणे चरेदब्दं द्विजातयः॥
रजस्वला सूतिका वा पञ्चत्वं यदि चेद्गता।

पञ्चगव्यैः स्नापयित्वा पावमान्यैर्द्विजोत्तमाः ॥
प्रत्यृचं कदलैः स्नाप्य सपवित्रैर्जलैः शुभैः ।
शुभ्रवस्त्रेण सम्वेष्य दाहं कुर्य्याद्विधानतः ॥
चण्डालाद् ब्राह्मणात्सर्पात् क्रव्यादादुदकादिभिः ।
हतानामपि कुर्व्वीत पूर्ववद्द्विजपुङ्गवः ॥
तत्रापि कामतः कुर्यात् षडब्दं तस्य बान्धवः ।
विषाद्यैर्धनशस्त्राद्यैरात्मानं यदि घातयेत् ॥
गोशतं विप्रमुख्येभ्यो दद्यादेकं वृषं तथा ।
नारायणबलिं कृत्वा सर्वमप्यौर्ध्वदेहिकम् ॥
रजस्वला तु या नारी स्पृष्ट्वा चान्यां रजस्वलाम् ।
चण्डालं पतितं वापि शुनं गर्द्दभमेव च ॥
तावत्तिष्ठेन्निराहारा चरेत्सान्तपनं व्रतम् ।
स्पृष्ट्वाप्यकामतः स्नात्वा पञ्चगव्यैः शुभैर्जलैः ॥
चातुर्वर्ण्यस्य गेहेषु चण्डालः पतितोऽपि वा ।
अन्तर्वत्नी भवेत्सा चेत्कथं स्यात्तत्र निष्कृतिः ॥
तद्गृहन्तु परित्यज्य दग्ध्वा वान्यच संस्थितः ।
संसर्गोऽत्र प्रकारेण प्रायश्चित्तं समाचरेत् ॥
पृथक् पृथक् प्रकुर्वीरन् सर्वे गृहनिवासिनः ।
दाराः पुत्राश्च सुहृदः प्रायश्चित्तं यथोदितम् ॥
सभर्त्तृकाणां नारीणां वपनन्तु विसर्जयेत् ।
सर्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलित्रयम् ॥
केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् ।
प्रायश्चित्ते तु सम्पूर्णे कृत्वा सान्तपनं व्रतम् ॥
ब्रह्मकूर्चोपवासं वा विशुध्यन्ति तदेनसः ।

अर्वाक्सम्वत्सरार्धात्तु गृहदाहं न चोदितम्॥
यद्गृहे पातकोत्पत्ति स्तत्र यत्नेन दाहयेत्।
त्यजेद्दासं निकृष्टाच्च शुद्धिश्चैवात्मन स्ततः॥
सम्बन्धाच्चैव संसर्गात्तुल्यमेव नृणामघम्।
तस्मात्संसर्गसम्बन्धान् पतितेषु विवर्जयेत्॥
चण्डालपतितादीनां तोयं यस्तु पिबेन्नरः।
पराकं कामतः कुर्याद्ब्रह्मकूर्चमकामतः॥
अभ्यासे तु षडब्दं स्याच्चान्द्रायणमकामतः।
चण्डालानां तडागे वा नदीनां तीर्थएव वा॥
स्नात्वा पीत्वा जलं विप्रः प्राजापत्यमकामतः।
कामतस्तु पराकं वा चान्द्रायण मथापि वा॥
अभ्यासे तु व्रतं पूर्णं षडब्दं स्यादकामतः।
सर्वेषां प्रतिलोमानां पीत्वा सान्तपनं चरेत्॥
चान्द्रायणं पराकं वा त्र्यब्दं वापि यथाक्रमम्।
भोजने गमनेऽप्येवं प्रायश्चित्तं समाचरेत्॥
चाण्डालपतितादीनां गृहेष्वन्नमपि द्विजः।
भुक्त्वाब्दमाचरेत् कृच्छ्रं चान्द्रायणमकामतः॥
चण्डालवाटिकायान्तु सुप्त्वा भुक्त्वाप्यकामतः।
चरेत्सान्तपनं कृच्छ्रं चान्द्रायणमथापि वा॥
चण्डालवाटिकायान्तु मृतस्याब्दं विशोधनम्।
स्नपनं पञ्चगव्यैश्च पावमान्यैः शुभैर्जलैः॥
शूद्रान्नं सूतिकान्नं वा शुना स्पृष्टञ्च कामतः।
भुक्त्वा चान्द्रायणं कृच्छ्रं पराकं वा समाचरेत्॥
जलं पीत्वा तयोर्विप्रः पञ्चगव्यं पिबेद्द्व्यहम्।

चण्डालः पतितो वापि यस्मिन् गेहे समाचरेत्।
त्यक्त्वा मृण्मयभाण्डानि गोभिः संक्रामयेत् त्र्यहम्॥
मासादूर्ध्वं दशाहन्तु द्विमासं पञ्चमेव तु।
षण्मासात्तु तथा मासं गवां वृन्दं निवेशयेत्॥
ऊर्ध्वन्तु दहनं प्रोक्तं लाङ्गलेन च खातनम्।
ब्रह्मकूर्चं तथा कृच्छ्रं चान्द्रायणमथापि वा॥
अतिकृच्छ्रं पराकञ्च तप्तकृच्छ्रं वापि समाचरेत्।
षडब्दमूर्ध्वं षण्मासात्प्रायश्चित्तं समाचरेत्॥
वत्सरादूर्ध्वसम्पूर्णं व्रतमेवाचरेद् बुधः।
अमेध्यशवचण्डालमद्यमांसादिदूषितात्॥
कूपादुद्धृत्य कलशैः सहस्रं रेचयेज्जलम्।
निक्षिप्य पञ्चगव्यानि वारुणैरपि मन्त्रयेत्॥
तड़ागस्यापि शुध्यर्थं गोभिः संक्रामयेज्जलम्।
धान्यन्तु चालनाच्छुद्धिर्बाहुल्यं प्रोक्षणादपि॥
रसानान्तु परित्याग श्चाण्डालादिप्रदूषणात्।
प्रासादद्देवहर्म्याणां चण्डालपतितादिषु॥
अतः प्रविष्टे त्तु तदा शुद्धिः स्यात्तेन कर्मणा।
गोभिः संक्रमणं कृत्वा गोमूत्रेणैव लेपयेत्॥
पुण्याहं वाचयित्वाथ तत्तोयैर्दर्भसंयुतैः।
सम्प्रोक्ष्य सर्वतः पश्चाद्देवं समभिषेचयेत्॥
पञ्चामृतैः पञ्चगव्यैः स्नापयित्वाथ वैष्णवः।
प्रत्यृचं पावमानैश्च वैष्णवै श्चाभिषेचयेत्॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा।
चतुर्भि र्वैष्णवैर्मन्त्रैः स्नाप्य पुष्पाञ्जलिं तथा॥

श्रीसूक्तेन तदा दिव्यं दद्यान्नीराजनं ततः।
अवैष्णवस्पर्शनेऽपि एवं कुर्वीत वैष्णवः।
भिन्ने बिम्बे तथा दग्धे परित्यक्ते च तं गृहे॥
वैदेहीं वैष्णवीमिष्ट्वा पुनः स्थापनमाचरेत्।
चौराद्यपहृते नष्टे वासुदेवीं यजेच्चरुम्॥
स्थानान्तरगते बिम्बे पुनः स्थापनमाचरेत्।
तोयादिवासनं वेद्यामधिरोहणमेव च॥
नयनोन्मीलनं दीक्षां वर्जयित्वान्यमाचरेत।
पञ्चगव्यैः स्नापयित्वा पञ्चत्वक्पल्लवाञ्चितैः॥
मङ्गलद्रव्यसंयुक्तैरद्भिः समभिषेचयेत्।
सूक्तैश्च ब्रह्मणः सुक्तैरविर्गैर्वैष्णवीस्तथा॥
चतुर्भिर्वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम्।
वैष्णव्या चैव गायत्र्या शङ्खेन स्नापयेद्बुधः॥
ध्रुवसूक्तमृचं स्मृत्वा जपन् संस्थापयेद्धरिम्।
ततस्तन्मूर्त्तिमन्त्रेण मूलमन्त्रेण वा द्विजः॥
दद्यात् पुष्पसहस्राणि देवतां स मनुं स्मरन्।
पश्चात् सावरणं विष्णोरर्चयित्वा विधानतः॥
इन्द्रसोमं सोमपतेरिति सूक्तमनुत्तमम्।
जपन् भक्त्याथ देवेसु दद्यान्नीराजनं द्विजः॥
प्रदक्षिणं नमस्कारं कृत्वा विप्रांश्च भोजयेत्।
अवैष्णवेन विप्रेण शूद्रेणैवार्चिते हरौ॥
सहस्रमभिषेकं च पुष्पाञ्जलिसहस्रकम्।
महाभागवतो विप्रः कुर्यान्मन्त्रद्वयेन च॥
देवतोत्तरसम्पर्कं विना स्नाहरणं हरौ।

अवैष्णवानां मन्त्राणां पक्वान्नस्य निवेदने ॥
कृत्वा नारायणीमिष्टिं पुनः संस्कारमाचरेत्।
देशान्तरगते बिम्बे चिरकालमनर्चिते ॥
अधिवासादिकं सर्वं पूर्ववद्वैष्णवोत्तमः।
विष्णोरुत्सवमध्ये तु विद्युत्स्तनितसम्भवे ॥
रथे बिम्बे ध्वजे भग्ने बिम्बे च पतिते भुवि।
ग्रामदाहेऽश्मवर्षे च गुरौ ऋत्विजि वै मृते ॥
नालङ्कृतेषु विधिषु परिणीते जनार्दने।
अवैदिकक्रियापेते जपहोमादिवर्जिते ॥
कुर्वीत महतीं शान्तिं वैष्णवीं वैष्णवोत्तमः।
अग्निनाशे तु तन्मध्ये पुनरादानमाचरेत ॥
कुर्वीत वैनतेयेष्टिं वैष्वक्सेनामथापि वा।
श्वशूकरादिसम्पर्कें पवित्रेष्टिं समाचरेत् ॥
वैष्णवेष्टिं प्रकुर्वीत पाषण्डादिप्रदूषिते।
अर्थास्य संप्लवे विष्णोर्यत्र यत्र च सङ्करम् ॥
तत्र तत्र यजेदिष्टिं पावमानीं द्विजोत्तमः।
स्नापचारे स्तथान्यैर्वा मुच्यते सर्वकिल्बिषैः ॥
अवैष्णवेन विप्रेण स्थापिते मधुसूदने।
तद्राष्ट्रं वा भूपतिर्वा विनाशमुपयास्यति ॥
कुर्वीत वासुदेवेष्टिं सर्वं पापं प्रशामयेत्।
महाभागवतेनैव पुनः संस्कारमाचरेत् ॥
सकेशववैनतेयादि नित्यानाञ्च दिवौकसाम्।
मुक्तानामपि पूजार्थं बिम्बानि स्थापयेद्यदि ॥
स निवेश्यैकरातन्तु गव्यैः स्नापयाथ देशिकः।

सर्वैर्वैष्णवसूक्तैश्च तन्नाम्नायतश्च सहस्रकम्॥
शङ्खेनैवाभिषिच्याथ भगवत्पुरतो न्यसेत्।
स्थण्डिलेऽग्निं प्रतिष्ठाप्य यजेच्च पुरतो हरेः॥
अस्य वामेति सूक्तेन पायसं मधुमिश्रितम्।
अष्टोत्तरशतं पश्चादाज्यं मन्त्रचतुष्टयात्॥
सुवर्णताम्रसूक्ताभ्यां पृषदाज्यं यजेत्ततः।
तिलैर्व्याहृतिभिर्हुत्वा पश्चादष्टोत्तरं शतम्॥
वैकुण्ठं पार्षदश्चैव होमशेषं समापयेत्।
अहमस्मीतिसूक्तेन पीठे संस्थापयेद्बुधः॥
प्रणवादिचतुर्थ्यन्तनामभिस्तत्प्रकाशकैः।
आवाह्य पूजयित्वाथ दद्यात्पुष्पाञ्जलिं ततः॥
द्वादशार्णेन मनुना सहस्रमथवा शतम्।
सोमरुद्रेति सूक्तेन दीपैर्नीराजयेत्ततः॥
भोजयित्वा ततो विप्रान् गुरुं सम्यक् प्रपूजयेत्।
मत्स्यकूर्मादिमूर्त्तीनामेवं संस्थापनं चरेत्॥
तत्तत्प्रकाशकैर्मन्त्रैर्जपहोमादिकं चरेत्।
सहस्रनामभिर्दद्यात्पुष्पाणि सुरभीणि च॥
वापीकूपतड़ागानां तरूणां स्थापने तथा।
वारुणीभिश्च सौम्यैश्च जपहोमादिकं चरेत्॥
तरूणां स्थापने गोपकृष्णं मातरमेव च।
ताभ्यामेव तु मन्त्राभ्यां सहस्रं जुहुयाद् घृतम्॥
चक्रतयाङ्कितं स्तम्भं मध्ये संस्थापयेद्बुधः।
अवैष्णवान्वये जातः कृत्वेष्टिं वैष्णवीं द्विजः॥
वैष्णवैः पञ्चसंस्कारैः संस्कृतो वैष्णवो भवेत्।

देवतान्तरशेषस्य भोजने स्पर्शने तथा ॥
अनर्चिते पद्मनाभे तस्यानर्पितभोजने ।
अवैष्णवानां विप्राणां पूजने वन्दने तथा ॥
याजनेऽध्यापने दाने श्राद्धे चैषाञ्च भोजने ।
अनर्चिते भागवते हरिवासरभोजने ॥
प्रायश्चित्तं प्रकुर्व्वीत वेथ्यूहो मिष्टिमुत्तमाम् ।
पश्चाद्भागवतानाञ्च पिबेत् पादजलं शुभम् ॥
एतत्समस्तपापानां प्रायश्चित्तं मनीषिभिः ।
निर्णीतं भगवद्भक्तपादामृतनिषेवणम् ॥
अङ्गीकृतो महाभागैर्महाभागवतैर्द्विजैः ।
सर्व्वोपचारैर्मुच्येत परां कृतिञ्च विन्दति ॥
प्रायश्चित्ते तथा चौर्य्ये महाभागवताद्द्विजात् ।
वैष्णवैः पञ्चसंस्कारैः संस्कृतो हरिमर्चयेत् ॥
॥ इति हारीतस्मृतौ महापापादिप्रायश्चित्तप्रकरणं
नाम षष्ठोऽध्यायः ॥

॥ अम्बरीष उवाच ॥
भगवन् ! भवता प्रोक्ता विष्णोराराधनक्रिया ।
प्रायश्चित्तमकृत्यानामसतां दण्डमेव च ॥
अधुना श्रोतुमिच्छामि शाश्वतीं वृत्तिमुत्तमाम् ।
इष्टीनाञ्च विधानानि विशेषांश्चोत्सवान् हरेः ॥
हारीत उवाच ॥ शृणु राजन् ! प्रवक्ष्यामि सर्वं निरवशेषतः ।
इष्टीनाञ्च विधानञ्च हरेरुत्सवकर्म्मणाम् ॥
नारायणी वासुदेवी गारुड़ी वैष्णवी तथा ।

वैय्यूही वैभवी पाद्मी पवित्री पावमानिका॥
सौदर्शिनी च सैनैशी आनन्ती च शुभाह्वया।
महाभागवतीत्येताः सर्वपापहराः शुभाः॥
प्रायश्चित्तार्थमपि वा भोगार्थं वा समाचरेत्।
पूर्वं विखनसे विष्णुः प्रोक्तवान् विखनसा भृगोः॥
प्रोक्तं ममेरितं तेन भृगुणा दिव्यमुत्तमम्।
गुह्यं तत्सर्ववेदेषु निश्चितं ते ब्रवीम्यहम्॥
अग्निर्वै देवाना मव मे विष्णुरीश्वरः।
तदन्तरेण वै सर्व्वा देवता इतिह श्रुतिः॥
निवसन्ति पुरोडाशमग्नौ वैष्णवमव्ययम्।
देवाश्च ऋषयः सर्वे योगिनः सनकादयः॥
अग्नौ यद्धूयते हव्यं विष्णवे परमात्मने।
तदग्नौ वैष्णवं प्रोक्तं सर्वदेवोपजीवनम्॥
एतदेवहि कुर्वन्ति सदा नित्या अपीश्वराः।
विमुक्ता अपि भोगार्थमेतमेव मुमुक्षवः॥
एतदेव परं प्रीतिः सश्रियः परमात्मनः।
एतद्विना न तुष्येत भगवान् पुरुषोत्तमः॥
यज्ञार्थमेव संसृष्टमात्मवर्गं चतुर्विधम्।
यज्ञार्थात्कर्म्मणोऽन्यत्तु तदेषां कर्म्मबन्धनम्॥
वह्निजिह्वा भगवतो वेदा अङ्गाः सदाध्वरे।
अस्थीनि समिधः प्रोक्ता रोमा दर्भाः प्रकीर्त्तिताः॥
स्वाहाकारः शिरः प्रोक्तं प्राणाएव हवींषि च।
सर्ववेदक्रिया भोगा मन्त्राः पत्रः प्रकीर्त्तिताः॥
एवं यज्ञवपुर्विष्णुर्विदित्वैनं हुताशने।

जुहुयाद्वै पुरोडाशं अज्ञात्वैनम्मतेद्दय ॥
यज्ञोयज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ।
यज्ञभृद्यज्ञकृद्यज्ञयज्ञभुग्यज्ञसाधनः ॥
यज्ञात्मत्वद्यज्ञगुह्यमन्नमन्नाद एव च ।
तस्मादेनं विदित्वैव यज्ञं यज्ञेन पूजयेत् ॥
कोऽयं लोकोऽस्त्ययज्ञस्य कथं स्यात्परतः शुचिः ।
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथा परे ॥
स्वाध्यायज्ञानयज्ञाश्च सदा कुर्वन्ति योगिनः ॥
हरेर्भोगतया कुर्यान्न साधनतया क्वचित् ।
साधनं भगवान् विष्णुः साध्याः स्युर्वैदिकाः क्रियाः ॥
शेषभूतस्य जीवस्य तद्दास्यैकफलाः क्रियाः ।
श्रुतिस्मृत्युदितं कर्म्म तद्दास्यं परिकीर्त्तितम् ॥
नैसर्गिकं तथा कुर्यात्तद्दास्यैकं निकीर्त्तितम् ।
वैदिकेनैव मार्गेण पूजयेत्परमेश्वरम् ॥
अन्यथा नरकं याति कल्पकोटिशतत्रयम् ।
तस्माच्छ्रुत्युक्तमार्गेण यजेद्विष्णुं हि वैष्णवः ॥
अर्चायामर्चयेत्पुष्पैरग्नौ च जुहुयाद्धविः ।
ध्यायेत्तु मनसा वाचा जपेन्मन्त्रान् सुवैदिकान् ॥
एवं विदित्वा सत्कर्म्म भोगार्थं परमात्मनः ।
कुर्व्वीत परमैकान्ती पत्युः पत्नी यथा प्रिया ॥
इदं प्रसङ्गेनोक्तं स्याद्विधानं तद्ब्रवीमि ते ।
पूर्वपक्षदशम्यान्तु स्नात्वा संपूज्य केशवम् ॥
स्वस्तिवाचनपूर्वेण कुर्य्यादत्वाङ्कुरार्पणम् ।
हरिं नारायणेष्यर्थमिति सङ्कल्प्य पूजयेत् ॥

विष्णुप्रकाशके राज्यं भूसूक्ताभ्यां शतं ततः ।
मन्त्रेण चैव वैकुण्ठं पार्षदं हुत्वा समापयेत् ॥
अयुतं तु जपेन्मन्त्रं होमश्चाष्टोत्तरं शतम् ।
शेषं निवेद्य देवाय भुञ्जीयात् स्वयमेव च ॥
ततो मौनी जपेन्मन्त्रं शयीत पुरतो हरेः ।
प्रभाते च नदीं गत्वा स्नात्वा सन्तर्प्य देवताः ॥
सन्ध्यामन्वास्य चागत्य स्वगेहे समलङ्कृते ।
वेद्यां संपूज्य देवेशं मन्त्ररत्नविधानतः ॥
सप्तावरणसंयुक्तं महिषीभिः समन्वितम् ।
अभ्यर्च्य गन्धपुष्पाद्यैर्धूपदीपनिवेदनैः ॥
अर्चयित्वा विधानेन कुण्डं दक्षिणभागतः ।
विस्तरायामनिम्नैश्च हस्तमात्रन्त्रिमेखलम् ॥
तत्र वह्निं प्रतिष्ठाप्य इध्माधानान्तमाचरेत् ।
ओङ्कारः स्यात्परं ब्रह्म सर्वमन्त्रेषु नायकः ॥
त्र्यक्षरं तत्त्रयाणाञ्च वेदानां वीजमुच्यते ।
अजायन्त ऋचः पूर्वमकाराद्विष्णुवाचकात् ॥
श्रीवाचकादुकारात्तु यजूंषि तदनन्तरम् ।
अजायन्त तयोः सङ्गात्सामान्यन्यान्यनेकशः ॥
तयोर्दासो मकारेण प्रोच्यते सर्वदेहिनः ।
कारणं सर्व्ववर्णानामकारः प्रोच्यते बुधैः ॥
अकारो वै च सर्वा वाक् सैषा स्पर्शोष्मभिः सदा ।
वह्नौ सा व्यज्यमानापि नानारूपा इति श्रुतिः ॥
अकार एव लुप्यन्ति सर्वमन्त्राक्षराणि हि ।
अकारो वासुदेवः स्यात्तस्मिन् सर्वं प्रतिष्ठितम् ॥

मन्त्रोहि वीजं सर्व्वत्र क्रिया तच्छक्तिरुच्यते।
मन्त्रतन्त्रसमायुक्तो यज्ञ इत्यभिधीयते॥
मन्त्रः पुमान् क्रिया स्त्रोच तद्युक्तं मिथुनं स्मृतम्।
तस्माद्यजूंषि तन्त्राणि ऋचो मन्त्राणि चाध्वरे॥
मन्त्रक्रियाजुष्टमेव मिथुनं यज्ञ उच्यते।
मन्त्रतन्त्रांशमिति ऋग्यजूषी यज्ञकर्म्मणि॥
उद्गातं तु भवेत्साम तस्मात्तद्दैवतं त्रयम्।
ऋग्भिरेव तमुद्दिश्य पुरोडाशं यजेद्बुधः॥
ताभिरेव तु पुष्पाणि दद्यात्कर्म्मसु शार्ङ्गिणे।
इन्द्राग्निवरुणादीनि नामान्युक्तानि तत्र तु।
ज्ञेयानि विष्णो स्तान्यत्र नान्येषां स्युः कथञ्चन॥
अकारे रूढइत्यग्निमिन्द्रत्वं वद ईश्वरे।
आत्मनां प्रसवे सूर्यः सौम्यत्वात्सामइत्यतः॥
वायुः स्याज्जीवतः प्राणाद्वरुणः सर्वजीवनः।
मित्रः स्यात्सर्वमित्रत्वादात्मकत्वाद्बृहस्पतिः॥
रोगनाशो भवेद्रुद्रो यमः स्यात्तु नियामकः।
हिरण्यत्वमिति प्रोक्तं नेति प्रापयत्वमुच्यते॥
नित्यसत्वाद्धिरण्यः स्यात्तद्गर्भत्वाद्धिरण्मयः।
हिरण्यगर्भ इत्युक्तः सत्वगर्भो जनार्द्दनः॥
हिरण्मयः क्ष भूतेभ्यो दद्दशे इति वे स्तुतिः।
सर्व्वान् स त्राति सविता पिता च पितृतत्पिता॥
स्वर्भूर्भुव इति प्रोक्तो वेदवेद्येति चोच्यते।
यस्य च्छन्दांसि चाङ्गानि स सुपर्ण इहोच्यते॥
अत्राङ्गं वर्णमित्युक्तं च्छन्दोमयमुदाहृतम्।

गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥
त्रिष्टुप् च जगती चैव छन्दांस्येतान्यनुक्रमात् ।
एतानि यस्य चाङ्गानि स सुपर्ण इहोच्यते ॥
यस्माज्जातास्त्रयो वेदा जातवेदाः स उच्यते ।
पवमानः पावयित्वा शिवः स्यात्सर्वदा शुभात् ॥
सुजनैः सेव्यते यस्तु अतो वै शम्भुरित्यजः ।
सर्व्वाण्यस्यैव नामानि वैदिकानि विवेचनात् ॥
पुन्नामानि यानि विष्णोः स्त्री सामानि श्रियस्तथा ।
परस्य वैदिकाः शब्दाः समाख्येतरेष्वपि ॥
व्यवक्रियन्ते सततं लोकवेदानुसारतः ।
न तु नारायणादीनि नामान्यन्यस्य कर्हिचित् ॥
एतन्नाम्नां गतिर्विष्णुरेक एव प्रचक्षते ।
शब्दब्रह्मत्रयी सर्वं वैष्णवं तदिहोच्यते ॥
देवतान्तरशङ्का तु न कर्त्तव्या हि वैदिके ।
वषट्कृतं यद्वेदेन तदत्यन्तप्रियं हरेः ॥
स्वाहास्वधाभ्यां नमसा हुतं तद्वैष्णवं स्मृतम् ।
समिदाज्यैर्या आहुतीर्यै वेदेनैव जुहोति ।
यो मनसा स्वर इत्यृचा प्रोक्तः सदाध्वरे ॥
वेदेनैव हरिं तस्माद्यजेत द्विजसत्तमः ।
प्रसङ्गादेव युक्तं स्याद्विधानं तद्ब्रवीमि ते ॥
ऋग्वेदसंहितायान्तु मण्डलानि दश क्रमात् ।
एकैकमिष्ट्या होतव्यं चरुणा पायसेन वा ॥
घृतेन वा तिलैर्वापि बिल्वपत्रैरथापि वा ।
अग्निमीळ इति पूर्वं मण्डलं प्रत्यृचं यजेत् ॥

पुष्पाणि च तथा दद्यात् सुगन्धीनि जनार्दने ।
विष्णुसूक्तैर्हविर्हुत्वा चतुर्मन्त्रैः शतं यजेत् ॥
वैष्णवान् भोजयेन्नित्यमग्निञ्चापि सुसंग्रहेत् ।
उपोषितो दीक्षितश्च यावदिष्टिः समाप्यते ॥
अन्ते चावभृतेष्टिञ्च पुष्पयागञ्च पूर्ववत् ।
आचार्यं ब्राह्मणांश्चापि दक्षिणाभिः प्रपूजयेत् ॥
इमान्नारायणेष्टिञ्च सकृद्वापि यजेत्तु यः ।
अनधीतवेदश्चेष्टिमयुतं मूलमन्त्रतः ॥
होमं पुष्पाञ्जलिं वापि तथैवायुतमाचरेत् ।
पूजयित्वा ततो विप्रान्निष्ठाः सम्यक्फलो भवेत् ॥
अवाक्यपौरुषं सूक्तमष्टोत्तरशतं चरुम् ।
हुत्वा चतुर्भिर्मन्त्रैश्च लभेदिष्टिं न संशयः ॥

॥ अथ वासुदेवेष्टिरुच्यते ॥

एकादश्यां कृष्णपक्षे समुपोष्य जनार्दनम् ।
समर्च्चयेद्विधानेन रात्रौ जागरणान्वितः ॥
द्वादश्यां प्रातरुत्थाय स्नायान्नद्यां तिलैः सह ।
द्वादशार्णेन मनुना सिञ्चेदष्टोत्तरं शतम् ॥
अभिमन्त्र्य जलं पश्चात्तुलसीमिश्रितं पिबेत् ।
सर्वकर्म्मस्वभिहित एतदेवाघमर्षणः ॥
तत्तत्कर्म्मणि तन्मन्त्रं यो जपेदघमर्षणे ।
स्नात्वा सन्तर्प्य देवर्षीन् कृतकृत्यः समाहितः ॥
गृहं गत्वार्चयेद्देवं वासुदेवं सनातनम् ।
द्वादशार्णविधानेन कस्तूरीचन्दनादिभिः ॥

जातिकेतककुन्दाद्यैः सुकृष्णतुलसीदलैः ।
सुधाब्धौ शेषपर्य्यङ्के समासीनं श्रिया सह ॥
इन्दीवरदलश्यामं चक्रशङ्खगदाधरम् ।
सर्व्वाभरणसम्पन्नं सदायौवनमच्युतम् ॥
अनन्तं विहगाधीशं शौनकाद्यैरुपासितम् ।
त्रिदशेन्द्रैर्विमानस्थैर्ब्रह्मरुद्रादिभि स्तथा ॥
स्तूयमानं हरिं ध्यात्वा अर्चयेत्प्रयतात्मवान् ।
सर्वमावरणं पश्चादर्चयेत् कुसुमादिभिः ॥
प्रथमं महिषीसङ्घं लक्ष्मीभूम्यौ सनीलया ।
अनन्तरञ्च गरुडधर्मसेनादिभि स्तथा ॥
ऐश्वर्य्यज्ञानवैराग्याः पूजनीया यथाक्रमम् ।
सनन्दनश्च सनकः सनत्कुमारः सनातनः ॥
औडुश्च सोमकपिलः पञ्चमो नारद स्तथा ।
भृगुर्विघनसोऽत्रिश्च मरीचिः कश्यपोऽङ्गिराः ॥
पुलहः स्वायम्भुवो दाल्भ्यो वशिष्ठाद्यास्ततः क्रमात् ।
वशिष्ठो वामदेवश्च हारीतश्च पराशरः ॥
व्यासः शुकश्च प्रह्लादः शौनको जनकस्तथा ।
मार्कण्डेयो ध्रुवश्चैव पुण्डरीकश्च मारुतः ॥
रुक्माङ्गदः शिवो ब्रह्मा पूजनीया यथाक्रमम् ।
तथा लोकेश्वराः पूज्याः शङ्खचक्रादिहेतयः ॥
वेदाश्च साङ्गाः स्मृतयः पुराणं धर्म्मसंहिताः ।
राशयो ग्रहनक्षत्राः पूजनीया समं ततः ॥
एवं सम्पूज्य देवेश मग्न्याधानादिपूर्वकम् ।
द्वितीयं मण्डलमृचा जुहुयात्सघृतं चरुम् ॥

ध्यात्वा वह्नौ वासुदेवं दद्यात् पुष्पाणि तत्र तु ।
वैष्णवांश्च यजेत्तत्रावभृथं पुष्पयागकम् ॥
ब्राह्मणान् भोजयेदन्ते गुरुञ्चापि प्रपूजयेत् ।
इमाञ्च वासुदेवेष्टिं यः कुर्य्याद्वैष्णवोत्तमः ॥
कुलकोटिं समुद्धृत्य स गच्छेत्परमं पदम् ।
अथवा वासुदेवस्य मन्त्रेणैव द्विजोत्तमः ॥
जुहुयादयुतं वह्नौ वैष्णवैः प्रत्यृचं तथा ।
पुष्पाणि दत्त्वा देवेशे सम्यगिष्ट्वा लभेत् फलम् ॥
अथ वक्ष्यामि राजर्षे ! वैष्णवेष्ट्या विधिं ततः ।
श्रवणर्क्षे तु पूर्व्वाह्णे पूर्व्ववच्च समारभेत् ॥
उपोष्य पूर्वदिवसे पूजयेज्जागरे हरिम् ।
प्रभाते पूर्ववत् स्नात्वा तर्पयेज्जगतां पतिम् ॥
षड़क्षरविधानेन परव्योम्नि स्थितं हरिम् ।
वह्न्यर्कहेमविम्बाद्यैर्योगपीठसुसंस्थितम् ॥
चतुर्भुजं सुन्दराङ्गं सर्व्वाभरणभूषितम् ।
चक्रशङ्खगदाशार्ङ्गान् बिभ्राणं दोर्भिरायतैः ॥
वामाङ्कस्थश्रिया सार्द्धं गन्धपुष्पाक्षतादिभिः ।
नैवेद्यैश्च फलैर्भक्ष्यैर्दिव्यैर्भोज्यैः सुपानकैः ॥
अर्चयेद्देवदेवेशं सर्व्वाभरणसंयुतम् ।
श्रीर्लक्ष्मीः कमला पद्मा सीता सत्या च रुक्मिणी ॥
सावित्री परितः पूज्या ततस्तुते बलादयः ।
अनन्तताक्ष्यं दे वेशसत्यधर्मदमाः शमः ॥
बुद्धिश्च पूजनीयास्ते दिक्षु सर्वास्त्वनुक्रमात् ।
ततो लोकेश्वराः पूज्या स्ततश्चक्रादिहेतयः ॥

महाभागवताः पूजया होमकर्म्म समाचरेत्।
चतुर्भिर्वैष्णवैः सूक्तैः प्रत्यृचं जुहुयाच्चरुम्॥
व्यापका मन्त्ररत्नञ्च चतुर्मन्त्रा उदाहृताः।
तैरप्यष्टोत्तरशतं पृथक् पृथगतो यजेत्॥
तृतीयमण्डलं पश्चाज्जुहुयात्प्रत्यृचं ततः।
तथा पुष्पैश्च सम्पूजय कुर्य्यादवभृथं ततः॥
समाप्य पुष्पयोगेन वैष्णवान् भोजयेत्ततः।
एवं कर्त्तुमशक्तश्चेद्वैष्णवीं वैष्णवोत्तमः॥
वैष्णव्या चैव गायत्र्या पुष्पाञ्जल्ययुतं चरेत्।
त्रिसहस्रं चरुं हुत्वा वैष्णवेष्ट्याः फलं लभेत॥
इमां तु वैष्णवीमिष्टिं यः कुर्य्याद्वैष्णवोत्तमः।
त्रिकोटिकुलमुद्धृत्य याति विष्णोः परं पदम्॥
प्रायश्चित्तमिदं कुर्य्याद्व्रतभङ्गेषु वैष्णवः।
शान्त्यर्थं देवकार्येषु पापेषु च महत्स्वपि॥

अथ वैराग्री इष्टिरुच्यते॥

शुक्लपक्षे तु द्वादश्यां सङ्क्रान्तौ ग्रहणेऽपि वा।
उपोष्य विधिवद्विष्णुं पूजयित्वा विधानतः॥
अभ्यर्चयेद्गन्धपुष्पैः केशवादीन् पृथक् पृथक्।
सङ्कर्षणादीनपि च पूजयेत्प्रयतात्मवान्॥
तत्तन्मूर्त्तिं पृथक् ध्यात्वा पृथगेव समर्चयेत्।
केशवस्तु सुवर्णाभः श्यामो नारायणोऽव्ययः॥
माधवः स्यादुत्पलाभो गोविन्दः शशिसन्निभः।
गौरवर्णस्तथा विष्णुः शोणो मधुजिदव्ययः॥

त्रिविक्रमोऽग्निसङ्काशो वामनः स्फटिकप्रभः।
श्रीधरस्तु हरिद्राभो हृषीकेशोंऽश्मान् यथा॥
पद्मनाभो घनश्यामो हैमो दामोदरः प्रभुः।
सङ्कर्षणस्तु मुक्ताभो वासुदेवो घनद्युतिः॥
प्रद्युम्नो रक्तवर्णः स्यादनिरुद्धो यथोत्पलम्।
अधोक्षजः शाद्वलाभो रक्ताङ्गः पुरुषोत्तमः॥
नृसिंहो मणिवर्णः स्यादच्युतोऽर्कसमप्रभः।
जनार्दनः कुन्दवर्ण उपेन्द्रो विद्रुमद्युतिः॥
हरिर्वै सूर्य्यसङ्काशः कृष्णोभिन्नाञ्जनद्युतिः।
आयुधानि ब्रुवे चैषां दक्षिणाधः करादितः॥
पद्मं शङ्खं गदाचक्रं गदां दधाति केशवः।
शङ्खं पद्मं गदाचक्रं धत्ते नारायणोऽव्ययः॥
माधवस्तु गदां चक्रं शङ्खं पद्मं बिभर्ति च।
चक्रं गदां तथा पद्मं शङ्खं गोविन्द एव च॥
गदां पद्मं गदाशङ्खं चक्रं विष्णुर्बिभर्त्ति हि।
चक्रं शङ्खं तथा पद्मं गदां च मधुसूदनः॥
पद्मं गदां तथा चक्रं शङ्खं चैव त्रिविक्रमः।
शङ्खं चक्रं गदापद्मं वामनो बिभृयात्तथा॥
पद्मं चक्रं गदाशङ्खं श्रीधरः श्रीपतिर्दधत्।
गदां चक्रं हृषीकेशः पद्मं शङ्खं बिभर्त्ति हि॥
पद्मनाभस्तथा शङ्खं पद्मं चक्रं गदां धरेत्।
पद्मं शङ्खं गदां चक्रं धत्ते दामोदरस्तथा॥
सङ्कर्षणो गदा शङ्खं पद्मं चक्रं दधाति हि।
वासुदेवो गदां शङ्खं चक्रं पद्मं बिभर्त्ति हि॥

चक्रं शङ्खं गदां पद्मं प्रद्युम्नो विभृयात्तथा।
अनिरुद्धस्तथा चक्रं गदां शङ्खं च पङ्कजम् ॥
चक्रं पद्मं तथा शङ्खं गदां च पुरुषोत्तमः।
पद्मं गदां तथा शङ्खं चक्रं चाधोक्षजो हरिः ॥
चक्रं पद्मं गदां शङ्खं नरसिंहो विभर्ति हि।
अच्युतश्च गदां पद्मं चक्रं शङ्खं विभर्ति हि ॥
जनार्दन स्तथा पद्मं शङ्खं चक्रं गदां धरेत्।
उपेन्द्रस्तु तथा शङ्खं गदां चक्रं च पङ्कजम् ॥
हरिस्तु शङ्खं चक्रं च पद्मं चैव गदां धरेत्।
शङ्खं गदां पङ्कजं च चक्रं कृष्णो विभर्ति हि ॥
एवं चतुर्विंशतिन्तु मूर्त्तीं ध्यात्वा समर्चयेत्।
तत्तद्विम्बेषु वा राजन्! सालग्रामशिलासु वा ॥
गन्धैः पुष्पैश्च ताम्बूलैर्धूपैर्दीपैर्निवेदनैः।
फलैश्च भक्ष्यभोज्यैश्च पानीयैः शर्कराम्वितैः ॥
नामभिस्तैश्चतुर्थ्यन्तैर्मूलमन्त्रेण वा यजेत्।
देवानावरणीयांश्च पूजयेत्प्रहितः क्रमात् ॥
सं हुत्वाहुतिसूक्तेन कुर्यान्नीराजनं शुभम्।
पुरतोऽग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधानतः।
मण्डलेन चतुर्थ्या प्रत्यृचं जुहुयाच्चरुम् ॥
पुष्पैः सम्पूजयेद्भक्त्या कुर्यादवभृथं नरः।
इमां वैयूहिकीमिष्टिं सम्यक् प्राहुर्महर्षयः ॥
प्रायश्चित्त मिदं प्रोक्तं पातकेषु महत्स्वपि।
अनघ्स्वपि च विम्बानां शान्त्यर्थं वासमाचरेत् ॥
प्रायश्चित्तं विशिष्टं स्याद्देयं प्रत्यृचकर्म्मसु।

अनधीतः कथं कुर्याद्वैयूहीं वैष्णवीं द्विजः ॥
प्रत्येकं शतमष्टौ च मन्त्रैस्तेषां यजेद्बुधः ।
सर्वत्रावभृथेष्टिञ्च पुष्पयागञ्च वैष्णवः ॥
द्वयेन मूलमन्त्रेण कुर्व्वीत सुसमाहितः ।
वैष्णवान् भोजयेद्भक्त्या कर्मान्ते सत्वसिद्धये ॥
चतुर्विंशतिसंख्यान्वै महाभागवतान् द्विजान् ।
एकं वा भोजयेद्विप्रं महाभागवतोत्तमम् ।
सर्वं सम्पूर्णतामेति तस्मिन् संपूजिते द्विजे ॥
यः करोति शुभामिष्टिं वैय्यूहीं वैष्णवोत्तमः ।
~~अनन्तस्याच्युतानाञ्च विशिष्टोऽव्ययमो~~ भवेत् ॥
वैभवीमथ वक्ष्यामि सर्वपापप्रणाशिनीम् ।
पावनीं सर्वलोकानां सर्वकामप्रदां शुभाम् ॥
भगवज्जन्मदिवसे वारे सूर्य्यसुतस्य वा ।
स्वजन्मर्क्षेऽपि वा कुर्याद्वैभवीं मङ्गलाह्वयाम् ॥
पूर्वेऽह्न्यभ्युदयं कुर्यादङ्कुरार्पणपूर्वकम् ।
उपोष्य पूजयेद्विष्णुमग्न्याधानं समाचरेत् ॥
स्नात्वा परेऽह्नि विधिना सन्तर्प्य पितृदेवताः ।
विशिष्टैर्ब्राह्मणैः सार्द्धमर्चयित्वा जनार्दनम् ॥
मत्स्यं कूर्मं च वाराहं नारसिंहञ्च वामनम् ।
श्रीरामं बलभद्रञ्च कृष्णं कल्किनमव्ययम् ॥
हयग्रीवं जगद्योनिं पूजयेद्वैष्णवोत्तमः
नार्चयेद्भार्गवं बुद्धं सर्वत्रापि च कर्म्मसु ॥
कुशग्रन्थीषु बिम्बेषु सालग्रामशिलासु वा ।
अर्च्चयेद्गन्धपुष्पाद्यैः प्रागुदक्प्रवणेन च ॥

पृथक् पृथक् च नैवेद्यं विविधं वै समर्पयेत् ।
मोदकान् पृथुकान् शक्तूनपूपान् पायसांस्तथा ॥
हविष्यमन्नमुद्गान्नं मण्डकान् मधुसंयुतान् ।
दध्यन्नञ्च गुडान्नञ्च भक्त्या तेभ्यो निवेदयेत् ॥
कर्पूरसंयुतं दिव्यं ताम्बूलञ्च निवेदयेत् ।
इमा विश्वेतिसूक्तेन दद्यान्नीराजनं तथा ॥
सहस्रनामभिः स्तुत्वा भक्त्या च प्रणमेद्बुधः ।
इध्माधानादिपर्य्यन्तं कृत्वा होमं समाचरेत् ॥
सर्वैस्तु वैष्णवैः सूक्तैर्हुत्वा पूर्व्वं शुभं हविः ।
पञ्चमं मण्डलं पश्चात्प्रत्यृचं जुहुयाद्द्विजः ॥
इमास्तु वैभवीमिष्टिं कुर्याद्विष्णुपरायणः ।
अकृत्वा वैभवीमन्त्रं योऽध्यापयति देशिकः ॥
रौरवं नरकं याति यावदाभूतसंप्लवम् ।
होमं विना स शूद्राणां कुर्यात् सर्वमशेषतः ॥
मन्त्रैर्वा जुहुयादाज्यं तत्तन्मूर्त्तिप्रकाशकैः ।
पूजयित्वा द्विजवरान् पश्चान्मन्त्रं प्रदापयेत् ॥
अशक्तो यस्तु वेदेन कर्तुमिष्टिं द्विजोत्तमः ।
तत्तन्मूर्तिमयैर्मन्त्रैः पृथगष्टोत्तरं शतम् ॥
हुत्वा चरुं घृतयुतं सम्यगिष्ट्याः फलं लभेत् ।
वैष्णवत्वाच्च्युतस्यापि कारयेदिष्टिमुत्तमाम् ॥
उद्दिश्य वैष्णवान् स्वस्वपितॄनपि च वैष्णवः ।
यः कुर्य्याद्वैष्णवीमिष्टिं भक्त्या परमया युतः ॥
वैष्णवत्वं कुलं सर्वं लभेत स न संशयः ।
अतऊर्ध्वं प्रवक्ष्यामि आनन्तीमघनाशनीम् ॥

पौर्णमास्यां प्रकुर्व्वीत पूर्व्वोक्तविधिना नृप ! ।
आदानं पूर्ववत्कृत्वा अङ्कुरार्पणपूर्वकम् ॥
उपोष्याभ्यर्चयेद्देवमनन्तं पुरुषोत्तमम् ।
सहस्रशीर्षं विश्वेशं सहस्रकरलोचनम् ॥
सहस्रचरणं श्रीशं सदैवाश्रितवत्सलम् ।
पौरुषेण विधानेन पूजयेत् पुरुषोत्तमम् ॥
गन्धपुष्पैश्च धूपैश्च दीपैश्चापि निवेदनैः ।
पूजयित्वा जगन्नाथं पश्चादावरणं यजेत् ॥
पार्श्वयोश्च श्रियं भूमिं नीलाञ्च शुभलोचनाम् ।
हिरण्यवर्णा हरिणी जातवेदा हिरण्मयी ॥
चन्द्रा सूर्य्या च दुर्धर्षा गन्धद्वारा महेश्वरी ।
नित्यपुष्पा सहस्राक्षी महालक्ष्मीः सनातनी ॥
पूजनीया समस्ताश्च गन्धपुष्पाक्षतादिभिः ।
सङ्कर्षणस्तथानन्तः शेषो भूधर एव च ॥
लक्ष्मणो नागराजश्च बलभद्रो हलायुधः ।
तच्छक्तयः पूजनीयाः प्रागादिषु यथाक्रमम् ॥
रेवती वारुणी कान्तिरैश्वर्य्या च इला तथा ।
भद्रा सुमङ्गला गौरी शक्तयः परिकीर्त्तिताः ॥
अस्मान् लोकेश्वरान् पूज्य पश्चाद्धोमं समाचरेत् ।
पश्चात्तु मण्डलं षष्ठं प्रत्यृचं जुहुयाच्चरुम् ॥
पुष्पाणि च तथा दत्त्वा कुर्य्यादवभृथादिकम् ।
अशक्तश्चेन्नृसूक्तेन शतमष्टोत्तरं चरुम् ॥
इष्टेर्वेष्याः फलं समग्रमाप्नोत्येव न संशयः ।
आनन्तीयामिमामिष्टिं वैकुण्ठपदमाप्नुयात् ॥

न दास्यमीशस्य भवेद्दास्यं नृणामसत् ।
तत्र कुर्यादिमामिष्टिं दास्यैकफलसिद्धये ॥
अधुना वैनतेयेष्टिं वक्ष्यामि नृपसत्तम ! ।
पञ्चम्यां भानुवारे वा कस्मिंश्चिच्छुभवासरे ॥
उपोष्य पूर्ववत्सर्वं कुर्य्यादभ्युदयादिकम् ।
स्नात्वार्चयित्वा देवेशं गन्धपुष्पाक्षतादिभिः ॥
लक्ष्म्या सह समासीनं वैकुण्ठभवने शुभे ।
सर्वमन्त्रमये दिव्ये वाङ्मये परमासने ॥
मन्त्रस्वरै रक्षरैश्च साङ्गैर्वेदैः समन्विते ।
तारेण सह सावित्र्या संस्तीर्णे शुभवर्चसि ॥
ईश्वर्या च समासीनं सहस्रार्कसमद्युतिम् ।
चतुर्भुजमुदाराङ्गं कन्दर्पशतसन्निभम् ।
युवानं पद्मपत्राक्षं चक्रशङ्खगदाब्जिनम् ॥
वैष्णव्या चैव गायत्र्या पूजयेद्धरिमव्ययम् ।
श्रियं देवीं नित्यपुष्टां सुभगाञ्च सुलक्षणाम् ॥
ऐरावतीं वेदवतीं सुकेशीञ्च सुमङ्गलाम ।
अर्चयेत्परितो देवीः सुरूपा नित्ययौवनाः ॥
ततः समर्चयेत्तार्क्ष्यं गरुड़ं विनतासुतम् ।
सुपर्णञ्च चतुर्दिक्षु विदिक्षु शक्तयस्तथा ॥
श्रुतिस्मृतीतिहासाश्च पुराणानीति शक्तयः ।
अस्त्रादीनीश्वरान् पश्चादर्चयेत् कुसुमाक्षतैः ॥
धूपं दीपञ्च नैवेद्यं ताम्बूलञ्च समर्पयेत् ।
अर्यं हि तेच अर्यीति दद्यान्नीराजनं शुभम् ॥
प्रदक्षिणं नमस्कारं कृत्वा होमं समाचरेत् ।

वशिष्ठेन च संदृष्टं सप्तमं मण्डलं धुनेत् ॥
पुष्पाणि च ततो दत्त्वा कुर्य्यादवभृथादिकम् ।
रथयानादिभङ्गे च वाहनध्वंसने तथा ॥
अवैदिकक्रियाजुष्टे कुर्यादिष्टिमिमां शुभाम् ।
अरिष्टे चोपपातेषु शान्त्यर्थमपि वा यजेत् ॥
इष्ट्यानया पूजितेशे रोगसर्पाग्निभिः शमेत् ।
वैनतेयसमो भूत्वा भवेदनुचरो हरेः ॥
वैष्वक्सेनीं ततो वक्ष्ये सर्वपापप्रणाशिनीम् ।
उपोष्यैकादशीं शुद्धां पूर्व्ववत् पूजयेद्धरिम् ॥
तद्विष्णोरितिमन्त्राभ्यामुपचारैः समर्चयेत् ।
विष्वक्सेनञ्च सेनेशं सेनान् पञ्च चमूपतिम् ॥
अर्चयित्वा चतुर्दिक्षु शक्तयश्च विदिक्षु च ।
त्रयीं सूत्रवतीं सौम्यां सावित्रीं चार्चयेद्द्विजः ॥
अस्त्रान् दीपांश्च सम्पूज्य होमं पश्चात् समाचरेत् ।
कृत्वेध्मानादिपर्यन्तमष्टमं मण्डलं यजेत् ॥
पायसेनाथ पुष्पाणि दद्यात् प्रयतमानसः ।
अन्ते चावभृथेष्टिञ्च प्रसूनयजनं तथा ॥
ब्राह्मणान् भोजयेच्छक्त्या दक्षिणाभिश्च तोषयेत् ।
अशक्तो यस्तु वेदेन कर्त्तुमिष्टिञ्च वैष्णवः ॥
तद्विष्णोरिति मन्त्राभ्यां सहस्रं जुहुयाच्चरुम् ।
कृत्वा पुष्पाञ्जलिञ्चापि सम्यगिष्टिं लभेन्नरः ॥
वैष्वक्सेनी मिमां हुत्वा विष्वक्सेनसमो भवेत् ।
प्रभूतधनधान्याढ्यमैश्वर्यं चैव विन्दति ॥
यक्षराक्षसभूतानां तामसानां दिवौकसाम् ।

अभ्यर्चने तद्दोषस्य विशुद्ध्यर्थमिदं यजेत् ॥
सौदर्शनीं प्रवक्ष्यामि सर्वपापप्रणाशिनीम्।
व्यतीपाते वैधृतौ वा समुपोष्यार्चयेद्धरिम् ॥
अखण्डबिल्वपत्रैर्वा कोमलैः तुलसीदलैः।
अर्चयित्वा हृषीकेशं गन्धपुष्पाक्षतादिभिः ॥
पश्चात्समर्चनीयाः स्युः श्रीभूनीलादिमातरः।
सुदर्शनं सहस्रारं पवित्रं ब्रह्मणः पतिम् ॥
सहस्राक्षं शतोद्दामं लोकद्वारं हिरण्मयम्।
अभ्यर्चयेत् क्रमाद्दिक्षु तथा शक्तीः समर्चयेत् ॥
अनिष्टध्वंसिनी माया लज्जा पुष्टिः सरस्वती।
प्रकृतीर्जगदाधारा कामधुक् काष्ठशक्तिका ॥
तथा ताश्चैव लोकेशाः पूज्या दिक्षु यथाक्रमात्।
अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ॥
ऋग्वेदोक्तस्य सूक्तेन ततो नीराजनं हरेः।
नवमं मण्डलं पश्चाद्धोतव्यं चरुणा नृप ! ॥
आज्येन वा तिलैर्वापि बिल्वैर्वापि सरोरुहैः।
हुत्वा पुष्पाञ्जलिं दत्त्वा कुर्यादवभृथादिकम् ॥
ब्राह्मणान् भोजयेत्पश्चाद् गुरुञ्चापि समर्चयेत्।
उद्वाह्य वैष्णवीं कन्यां याचित्वा वैष्णवीं तथा ॥
हुत्वा वा वैश्वदेवेनैव तथैवादित्यभुजरपि।
अन्यलिङ्गधृतो चापि कुर्यादिष्टिमिमां द्विजः ॥
सौदर्शनेन मन्त्रेण सहस्रं जुहुयाच्चरुम्।
पुष्पाणि दत्त्वा साहस्रं सम्यगिष्ट्याः फलं लभेत् ॥
अथ भागवतीमिष्टिं प्रवक्ष्यामि नृपोत्तम !।

उपोष्यैकादशीं शुद्धां द्वादश्यां पूर्ववद्धरिम्॥
अर्चयित्वा विधानेन गन्धपुष्पाक्षतादिभिः।
पौरुषेण तु सूक्तेन श्रीमदष्टाक्षरेण वा॥
अर्चयेज्जगतामीशं सर्व्वावरणसंयुतम्।
ततो भागवतान् सर्व्वान् अर्चयेत्परितो द्विजः॥
पुष्पैर्व्वा तुलसीपत्रैः सलिलै रक्षतैरपि।
प्रह्लादं नारदञ्चैव पुण्डरीकं विभीषणम्॥
रुक्माङ्गदं तत्सुतञ्च हनूमन्तं शिवं भृगुम्।
वशिष्ठं वामदेवञ्च व्यासं शौनकमेव च॥
मार्कण्डेयं चाम्बरीषं दत्तात्रेयं पराशरम्।
रुक्मदाल्भ्यौ कश्यपञ्च हारीतञ्चात्रिमेव च॥
भरद्वाजं बलिं भीष्मं उद्धवाक्रूरपुष्करान्।
गुहं सूतञ्च वाल्मीकं स्वायम्भुवमनुं ध्रुवम्॥
वेणञ्च रोमशञ्चैव मातङ्गं शम्बरीं तथा।
सनन्दनञ्च सनकं विघनञ्च सनातनम्॥
वोटुं पञ्चशिखञ्चैव गजेन्द्रञ्च जटायुषम्।
सुशीलं त्रिजटां गौरीं शुभां सन्ध्यावलिं तथा॥
अनसूयां द्रौपदीञ्च यशोदां देवकीं तथा।
सुभद्राञ्चैव गोपीश्च शुभा नन्दव्रजे स्थिताः॥
नन्दनं वसुदेवञ्च दिलीपं दशरथं तथा।
कौशल्याञ्चैव जनककन्यामपि च वैष्णवान्॥
अर्चयेद्गन्धपुष्पाद्यैर्धूपैर्दीपनिवेद्यनैः।
ताम्बूलैर्भक्ष्यभोज्यैश्च दीपैर्नीराजनैरपि॥
अहं भुवेति सूक्तेन दद्यान्नीराजनं हरेः।

पश्चाद्धोमं प्रकुर्व्वीत अग्न्याधानादिपूर्व्ववत् ॥
दशमं मण्डलं सर्वं प्रत्यृचं जुहुयाद्धविः।
तिलमिश्रेण साज्येन चरुणा गोघृतेन वा ॥
सर्वैश्च वैष्णवैः सूक्तैश्चतुर्भिश्चाष्टोत्तरं शतम्।
नामभिश्च चतुर्थ्यन्तैस्तान् सर्व्वान् वैष्णवान् यजेत् ॥
पुष्पैरिष्ट्वा चावभृथं प्रसूनेष्टिञ्च कारयेत्।
होमं कर्त्तुमशक्तश्चेद्वेदेन नृपनन्दन ! ॥
चतुर्भिर्वैष्णवैर्मन्त्रैः साहस्रं वा पृथक् पृथक्।
इमां भागवतीमिष्टिं यः कुर्याद्वैष्णवोत्तमः ॥
अनन्तगरुड़ादीनामयमन्यतमो भवेत्।
पावमानैर्यदा ऋग्भिरिज्यते मधुसूदनः ॥
तत्पावमानी मुनिभिः प्रोच्यते मधुसूदनः।
यदा तु द्वादशी शुक्ला भृगुवासरसंयुता ॥
तस्यामेव प्रकुर्व्वीत पाद्मीमिष्टिं द्विजोत्तमः।
महाप्रीतिकरं विष्णोः सद्योमुक्तिप्रदायकम् ॥
तस्यां कृतायामिष्ट्यां तु लक्ष्मीभर्त्ता जनार्दनः।
प्रत्यक्षो हि भवेत्तत्र सर्वकामफलप्रदः ॥
श्रीधरं पूजयेत्तत्र तन्मन्त्रेणैव वैष्णवः।
सुवर्णमण्डपे दिव्ये नानारत्नप्रदीपिते ॥
उदयादित्यसङ्काशे हिरण्ये पङ्कजे शुभे।
लक्ष्म्या सह समासीनं कोटिशीतांशुसन्निभम् ॥
चक्रशङ्खगदापद्मपाणिनं श्रीधरं विभुम्।
पीताम्बरधरं विष्णुं वनमालाविराजितम् ॥
अर्चयेज्जगतामीशं सर्व्वाभरणभूषितम्।

पद्मां पद्मालयां लक्ष्मीं कमलां पद्मसम्भवाम् ॥
पद्ममाल्यां पद्महस्तां पद्मनाभीं सनातनीम् ।
प्रागादिषु तथा दिक्षु पूजयेत् कुसुमादिभिः ॥
ब्रह्मादीनीश्वरान् पूज्य नमस्कुर्व्वीत भक्तितः ।
ततो नीराजनं दत्त्वा श्रीसूक्तेन तु वैष्णवः ॥
पुरतो जुहुयादग्नौ पायसं घृतमिश्रितम् ।
तन्मन्त्रेणैव साहस्रं सूक्ताभ्यां सकृदेव हि ॥
हुत्वा मन्त्रेण साहस्रं दद्यात् पुष्पाणि शार्ङ्गिणे ।
वैष्णवं विप्रमिथुनं पूजयेद्भोजयेत्तथा ॥
इमां पाद्मीं शुभामिष्टिं यः कुर्य्याद्वैष्णवोत्तमः ।
प्रभूतधनधान्याढ्यो महाश्रियमवाप्नुयात् ॥
सर्वान् कामानवाप्नोति विष्णुलोकं स गच्छति ।
लक्ष्म्यायुक्तो जगन्नाथः प्रत्यक्षः समभूद्धरिः ॥
ददाति सकलान् कामानिह लोके परत्र च ।
पुष्पैः पवित्रदैवत्यैरिज्यते यत्र केशवः ॥
तां पवित्रेष्टिमित्याहुः सर्वपापप्रणाशिनीम् ।
यत्ते पवित्रमित्यादि ऋग्भिर्यत्र यजेद्द्विजः ॥
प्रायश्चित्तार्थं सहसा शान्त्यर्थं वा समाचरेत् ।
एवं विधानमिष्टीनां सम्यगुक्तं महर्षिभिः ॥
वैदिकेनैव विधिना यथाशक्त्या समाचरेत् ।
अवैदिकक्रियाजुष्टं प्रयत्नेन विवर्जयेत् ॥
क्षीराब्धौ शेषपर्य्यङ्के बुध्यमाने सनातने ।
व्रतोत्सवं प्रकुर्व्वीत पञ्चरात्रं निरन्तरम् ॥
नद्याश्च पुष्करिण्या वा तीरे रम्यतले शुचौ ।

मण्डपं तत्र कुर्वीत चतुर्भिस्तोरणैर्युतम् ॥
वितानपुष्पमालादि पताकाध्वजशोभितम्।
अङ्कुरार्पणपूर्वेण यज्ञवेदिञ्च कल्पयेत् ॥
ऋत्विग्भिः सार्द्धमाचार्यो दीक्षितो मङ्गलस्वनैः।
रथमारोप्य देवेशं छत्रचामरसंयुतम् ॥
पठन्वै शाकुनान् मन्त्रान् यज्ञशालां प्रवेशयेत्।
स्वस्तिवाचनपूर्वेण कुर्यात्कौतुकबन्धनम् ॥
पूर्णकुम्भान् शस्ययुतान् पालिकाः परितः क्षिपेत्।
अभ्यर्च्य गन्धपुष्पाद्यैः पश्चादावरणं यजेत् ॥
वासुदेवमनन्तञ्च सत्यं यज्ञं तथाच्युतम्।
महेन्द्रं श्रीपतिं विश्वं पूर्णकुम्भेषु पूजयेत् ॥
पालिकाः सद्दिगीशांश्च दीपिकास्त्वथ हेतयः।
तोरणेषु च चण्डाद्याः पूजनीया यथाक्रमम् ॥
वेद्याश्च दक्षिणे भागे कुण्डं कुर्यात्सलक्षणम्।
निक्षिप्याग्निं विधानेन इध्माधानान्तमाचरेत् ॥
आचार्यौपासनाग्नौ वा लौकिके वा नृपोत्तम !।
आधानं पूर्ववत् कृत्वा पश्चात्कर्म्म समाचरेत् ॥
प्रातः स्नात्वा विधानेन पूजयित्वा सनातनम्।
प्रत्यृचं पावमानीभिर्जुहुयात्पायसं शुभम् ॥
वैष्णवैरनुवाकैश्च मन्त्रैः शक्त्या पृथक् पृथक्।
चतुर्भिर्व्यापकैश्चान्यैः प्रत्येकं जुहुयाद् घृतम् ॥
वैकुण्ठं पार्षदं हुत्वा होमशेषं समाचरेत्।
ताभिरेव च पुष्पाणि दद्याच्च जगताम्पतेः ॥
उद्बोधयित्वा शयने देवदेवं जनार्दनम्।

पश्चात् सर्वमिदं कुर्यादुत्सवार्थं द्विजोत्तमः॥
अथ नावं सुविस्तीर्णां कृत्वा तस्मिन् जले शुभे।
पुष्पमण्डपचिह्नादि समास्तीर्णसमन्विताम्॥
सुतोरणवितानाढ्यां पताकाध्वजशोभिताम्।
तस्मिन् कनकपर्यङ्के निवेश्य कमलापतिम्॥
अर्चयित्वा विधानेन लक्ष्म्या सार्द्धं सनातनम्।
पुष्पाञ्जलिशतं तत्र मन्त्ररत्नेन कारयेत्॥
श्रीपौरुषाभ्यां सूक्ताभ्यां दद्यात्पुष्पाञ्जलिं ततः।
परितः शक्तयः पूज्यास्तथावरणदेवताः॥
दीपैर्नीराजनं कृत्वा बलिं दद्यात् समन्ततः।
नौभिः समन्ताद्बहुभिर्गीतवादित्रसंयुतम्॥
दीपिकाभिरनेकाभिः स्तोत्रैरपि मनोरमैः।
प्लावयन्तो जगन्नाथं तत्र तत्र जलाशये॥
फलैर्भक्ष्यैश्च ताम्बूलैः कलशैर्दधिमिश्रितैः।
कुङ्कुमैः कुसुमैर्लाजैर्विकिरन्तः परस्परम्॥
गानैर्वेदैः पुराणैश्च सेवेत निशि केशवम्।
ऋत्विजो वारुणान् सूक्तान् जपेयुस्तत्र भक्तितः।
जपेच्च भगवन्मन्त्रान् शान्तिपाठञ्चरेत्तथा।
एवं संसेव्य बहुधा रात्रावस्मिन् जलाशये॥
प्रदेवत्रेति सूक्तेन यज्ञशालां प्रवेशयेत्।
तत्र नीराजनं दत्त्वा कुर्य्यादर्घ्यादिपूजनम्॥
घृतव्रतेति सूक्तेन तत्र नीराजनं द्विजः॥
स्नात्वा पूर्ववदभ्यर्च्य हुत्वा पुष्पाञ्जलिं तथा।
आशिषोवाचनं कृत्वा भोजयेद्ब्राह्मणान् शुभान्॥

स्नापयित्वाथ देवेशं भुञ्जीयाद्वाग्यतः स्वयम्।
एवं प्रतिदिनं कुर्यादुत्सवं पञ्चवासरम्॥
अन्ते चावभृथेष्टिं च पुष्पयागञ्च कारयेत्।
आचार्यं ऋत्विजो विप्रान् पूजयेद्दक्षिणादिभिः॥
एवं क्षीराब्धियजनं प्रत्यब्दं कारयेन्नृप!।
स्वसस्यगर्भवृद्ध्यर्थं भोगाय कमलापतेः॥
वृद्ध्यर्थमपि राष्ट्रस्य शत्रूणां नाशनाय च।
सर्व्वधर्म्मविवृद्ध्यर्थं क्षीराब्धियजनं चरेत्।
तत्र दुर्भिक्षरोगाग्निपापबाधा न सन्ति हि॥
गावः पूर्णदुघा नित्यं बहुलस्य फलाधरा।
पुष्पिताः फलिता वृक्षा नार्यो भर्तृपरायणाः॥
आयुष्मन्तश्च शिशवो जायन्ते भक्तिरच्युते।
यः करोति विधानेन यजनं जलशायिनः॥
क्रतुकोटिफलं तत्र प्राप्नोत्येव न संशयः।
यस्त्विदं शृणुयान्नित्यं क्षीराब्धियजनं हरेः॥
सर्व्वान् कामानवाप्नोति विष्णुलोकञ्च विन्दति।
पुष्पिते तु रसाले तु तत्राप्युत्सवमात्मनः॥
त्रिवासरं प्रकुर्वीत दोलानाम महोत्सवम्।
उपोषितः संयतात्मा दीक्षितो माधवं हरिम्॥
छत्रचामरवादित्रैः पताकैः शिविकां शुभाम्।
आरोप्यालङ्कृतं विष्णुं स्वयञ्च समलङ्कृतः॥
हरिद्रां विकिरन्तो वै गायन्तः परमेश्वरम्।
गच्छेयुरारामं प्रातर्नरनारीजनः सह॥
तत्राम्रवृक्षच्छायायां नवेद्यम्पूजयेद्धरिम्।

चूतपुष्पैः सुगन्धीभिर्माधवीभिश्च यूथिकैः ॥
मरीचिमिश्रं दध्यन्नं मोदकञ्च समर्पयेत् ।
शष्कुल्यादीनि भक्ष्याणि पानकञ्च निवेदयेत् ॥
सकर्पूरञ्च ताम्बूलं पूगीफलसमन्वितम् ।
सर्वमावरणं पूजत्र होमं पश्चात्समाचरेत् ॥
कृत्वेध्मानादिपर्यन्तं विष्णुसूक्तैश्चरुं यजेत् ।
माधवेनैव मनुना शर्करासंयुतान् तिलान् ॥
सहस्रं जुहुयादग्नौ भक्त्या वैष्णवसत्तमः ।
वैकुण्ठं पार्षदं हुत्वा होमशेषं समापयेत् ॥
प्रत्यृचं पावमानीभिर्दद्यात् पुष्पाञ्जलिं हरेः ।
अथ दोलां शुभाकारां बद्ध्वास्मिन् समलङ्कृताम् ।
वज्रवैदूर्यमाणिक्यमुक्ताविद्रुमभूषिताम् ।
तस्यां निवेश्य देवेशं लक्ष्म्या सार्द्धं प्रपूजयेत् ॥
गन्धैः पुष्पैर्धूपदीपैः फलैर्भक्ष्यैर्निवेदनैः ।
कुसुमाक्षतदूर्वाग्रतिलसर्पिर्मधूदकम् ॥
सर्षपाणि च निक्षिप्य अष्टाङ्गार्घ्यं निवेदयेत् ।
पादेषु चतुरो वेदान् मन्त्राख्योक्तेषु चान्तरे ॥
नागराजञ्च दोलायाः पीठे सर्वस्वरैरपि ।
व्यजनैर्वैनतेयञ्च सावित्रीं चामरे तथा ॥
द्विनिशामर्चयेद्दिक्षु ऊर्ध्वं ब्रह्मबृहस्पतिः ।
अधस्ताच्चण्डिकां रुद्रं क्षेत्रपालविनायकौ ॥
विताने चन्द्रसूर्य्यौ च नक्षत्राणि ग्रहास्तथा ।
वेदाश्च सेतिहासाश्च पुराणं देवता गणाः ॥
भूधराः सागराः सर्वे पूजनीयाः समन्ततः ।

एवं सम्पूज्य दोलायां लक्ष्म्या सह जनार्दनम् ॥
दोलयेच्च ततो दोलां चतुर्वेदैश्चतुर्दिनम् ।
सूक्तैश्च ब्रह्मणोऽपत्यैः सामगानैः प्रबन्धकैः ॥
नामभिः कीर्तयन् देवमेव मन्दं प्रदोलयेत् ।
स्त्रियं स्वलङ्कृताः सर्वा गायन्त्यो विभुमच्युतम् ॥
चरितं रघुनाथस्य कृष्णस्य चरितं तथा ।
दोलयेयुर्मुदा भक्त्या दोलायां परमेश्वरम् ॥
दोलाया दर्शनं विष्णोर्महापातकनाशनम् ।
भक्तिप्रसादनं नृणां जन्ममृत्युनिकृन्तनम् ॥
देवाः सर्वे विमानस्था दोलायामर्चितं हरिम् ।
दर्शयन्ति ततः पुण्यं दोलानामोत्सवं हरेः ॥
भक्त्या नीराजनं दद्यात् श्रीसूक्तेनैव वैष्णवः ।
ब्राह्मणान् भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥
एवं त्रिवासरं कुर्य्यादुत्सवं वैष्णवोत्तमः ।
प्रद्युम्नमेवं कुर्व्वीत तत्तत्काले तु वैष्णवः ॥
श्रौतेनैव च मार्गेण जपहोमपुरःसरम् ।
उत्सवं वासुदेवस्य यथाशक्त्या समाचरेत् ॥
यत्र यत्रोत्सवं विष्णोः कर्त्तुमिच्छति वैष्णवः ।
होमं कुर्य्यात्तत्र मन्त्रैस्तथा विष्णुप्रकाशकैः ॥
अतो देवेतिसूक्तेन तथा विष्णोर्नुकेन च ।
परोमात्रेति सूक्ताभ्यां पौरुषेण च वैष्णवः ॥
नारायणानुवाकेन श्रीसूक्तेनापि वैष्णवः ।
प्रत्यृचं जुहुयादग्नौ चरुणा पायसेन वा ॥
चतुर्भि वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम् ।

आज्यहोमं प्रकुर्व्वीत गायत्र्या विष्णुसंज्ञया ॥
वैकुण्ठपार्षदं हुत्वा शेषं पूर्व्ववदाचरेत् ।
अनादिष्टेषु सर्व्वेषु कुर्य्यादेवं विधानतः ॥
ब्राह्मणान् भोजयेद्विप्रान् सर्व्वं सम्पूर्णतां व्रजेत् ।
अथ वा मन्त्ररत्नेन सहस्रं प्रतिवासरम् ॥
हुत्वा पुष्पाणि दत्त्वा च शेषं पूर्व्ववदाचरेत् ।
होमं विना न कर्त्तव्य मुत्सवं परमात्मनः ॥
जपहोमविहीनन्तु न गृह्णाति जनार्द्दनः ।
तस्माच्छीतं प्रवक्ष्यामि विष्णोराराधनं नृप ! ॥
अश्वयुक्कृष्णपक्षे तु सम्यगभ्युदिते रवौ ।
आदर्शात् सप्तरात्रन्तु पूजयेत्प्रभुमव्ययम् ॥
स्नात्वा नद्यां विधानेन कृतकृत्यः समाहितः ।
गृहीत्वा जलकुम्भन्तु वारुणान् प्रवरान् व्रजेत् ॥
पञ्चत्वक्पल्लवान् पुष्पाण्यभिमन्त्र्य विनिक्षिपेत् ।
सौरभेयीं तथा मुद्रां दर्शयित्वा च पूजयेत् ॥
त्रिवारं वैष्णवैर्मन्त्रैः शङ्खेनैवाभिषेचयेत् ।
पूजयित्वा विधानेन गन्धपुष्पाक्षतादिभिः ॥
अपूपान् पायसं शक्तून् कृसरञ्च निवेदयेत् ।
मन्त्रैरष्टोत्तरशतं दत्त्वा पुष्पाणि चक्रिणः ॥
पश्चाद्धोमं प्रकुर्व्वीत साज्येन चरुणा ततः ।
कस्य वा नैतिसूक्तेन वैष्णवैरपि वैष्णवः ॥
हुत्वा तु मन्त्ररत्नेन घृतमष्टोत्तरं शतम् ।
वैकुण्ठं पार्षदं हुत्वा वैष्णवान् भोजयेत्ततः ॥
सकृद्भोजनसंयुक्तः क्षितिशायी भवेन्निशि ।

सायाह्नेऽपि समभ्यर्च्य जातिपुष्पैः सुगन्धिभिः॥
बहुभिर्दीपदण्डैश्च सेवेरन् पुरवासिनः।
एवं महोत्सवं कृत्वा धनधान्ययुतो भवेत्॥
तत्तत्कालोचितं विष्णोरुत्सवं परमात्मनः।
द्रव्यहीनोऽपि कुर्व्वीत पत्रपुष्पैः फलादिभिः॥
समिद्भिर्विल्वपत्रैर्वा होमं कुर्व्वीत वैष्णवः।
सन्तर्पयेच्च विप्रांस्तु कोमलैस्तुलसीदलैः॥
भक्त्या वै देवदेवेशः परितुष्टो भवेद्‌ध्रुवम्।
आस्तिक्यः श्रद्दधानश्च वियुक्तमदमत्सरः॥
पूजयित्वा जगन्नाथं यावज्जीवमतन्द्रितः।
इह भुक्त्वा मनोरम्यान् भोगान् सर्व्वान् यथेप्सितान्॥
सुखेन देहमुत्सृजत्र जीर्णत्वच मिवोरगः।
स्थूलसूक्ष्मात्मिकाञ्चेमां विहाय प्रकृतिन्द्रुतम्॥
सारूप्यमीश्वरस्याशु गत्वा तु स्वजनैः सह।
दिव्यं विमानमारुह्य वैकुण्ठं नाम भास्करम्॥
दिव्याप्सरोगणैर्युक्तो दिव्यभूषणभूषितः।
स्तूयमानः सुरगणैर्गीयमानश्च किन्नरैः॥
ब्रह्मलोकमतिक्रम्य गत्वा ब्रह्माण्डमण्डपम्।
विष्णुचक्रेण वै भित्वा सर्व्वानावरणान् घनान्॥
अतीत्य वीरजामाशु सर्ववेदस्रवां नदीम्।
अभ्युद्गच्छद्भिरव्यग्रैः पूज्यमानः सुरोत्तमैः॥
सम्प्राप्य परमं धाम योगिगम्यं सनातनम्।
यद्‌गत्वा न निवर्तन्ते तद्धाम परमं हरेः॥
तद्विष्णोः परमं धाम सदा पश्यन्ति योगिनः।

शीतांशुकोटिसङ्काशैः सर्वैश्च भवनैर्युतम् ॥
आरूढयौवनैर्दिव्यैः पुंभिः स्त्रीभिश्च सङ्कुलम् ।
सर्वलक्षणसम्पन्नैर्दिव्यभूषणभूषितैः ॥
अक्षरं परमं व्योम यस्मिन्देवा अधिष्ठिताः ।
इरावती धेनुमती व्यक्तभास्सूयवासिनी ॥
यत्र गावो भूरिशृङ्गाः सायोध्या देवपूजिता ।
अनन्तव्यूहलोकैश्च तया तुल्यशुभावहैः ॥
सर्ववेदमयं तत्र मण्डपं सुमनोहरम् ।
सहस्रस्थूणसदसि ध्रुवे रम्योत्तरे शुभे ॥
तस्मिन् मनोरमे पीठे धर्माद्यैः सूरिभिर्वृते ।
सहासीनं कमलया दृष्ट्वा देवं सनातनम् ॥
स्तुतिभिः पुष्कलाभिश्च प्रणम्य च पुनः पुनः ।
प्रहर्षपुलको भूत्वा तेन चालिङ्गितः क्रमात् ॥
पूजितः सकलैर्भोगैः श्रिया चापि प्रपूजितः ।
अनन्तविहगेशाद्यैरर्चितः सर्वदैवतैः ॥
तेषामन्यतमो भूत्वा मोदते तत्र देववत् ।
एषु केषु च लोकेषु तिष्ठते कमलापतिः ॥
तेषु तेष्वपि देवस्य नित्यदासो भवेत्सदा ।
दासवत्पुत्रवत्तस्य मित्रवद्बन्धुवत् सदा ॥
अश्नुते सकलान् कामान् सह तेन विपश्चिता ।
इमान् लोकान् कामभोगः कामरूप्यनुसञ्चरन् ॥
सर्वदा दूरविध्वस्तदुःखावेशलवांशकः ।
गुणानुभवजप्रीत्या कुर्याद्दानमशेषतः ॥
इममेव परं मोक्षं विदुः परमयोगिनः ।

काङ्क्षन्ति परमं दासा मुक्तमेकं महर्षयः ॥
हरेर्दास्यैकपरमां भक्तिमालम्ब्य मानवः ।
इहैव मुक्तो राजर्षे ! सर्वकर्म्मनिबन्धनैः ॥
इति हारीतस्मृतौ विशिष्टपरमधर्म्मशास्त्रे नानाविधोत्सवविधानं नाम सप्तमोऽध्यायः ॥

हारीत उवाच ।

अथ वक्ष्यामि राजेन्द्र ! विष्णुपूजाविधिं परम् ॥
श्रौतं महर्षिभिः प्रोक्तं वशिष्ठाद्यैः पुरातनैः ।
वैखानसैश्च भृग्वाद्यैः सनकाद्यैश्च योगिभिः ॥
वैष्णवैर्वैदिकैः पूर्वैर्यद्यदाचरितं पुरा ।
तत्ते वक्ष्यामि राजेन्द्र ! महाप्रियतमं हरेः ॥
ब्राह्मे मुहूर्त्ते उत्थाय सम्यगाचम्य वारिणा ।
ध्यात्वा हृत्पङ्कजे विष्णुं पूजयेन्मनसैव तु ॥
तं प्रत्नेवेति सूक्तेन बोधयेत्कमलापतिम् ।
वनस्पतेति सूक्तेन तूर्यघोषं निनादयेत् ॥
कुर्यात्प्रदक्षिणं विष्णोरतोदेवेत्यनेन तु ।
तद्विष्णोरिति मन्त्राभ्यान्त्रिः प्रणम्याचरेत्ततः ॥
कृतशौचस्तथाचान्तो दन्तधावनपूर्वकम् ।
स्नानं कुर्याद्विधानेन धात्रीश्रीतुलसीयुतम् ॥
नारायणानुवाकेन कृत्वा तत्राघमर्षणम् ।
कृतकृत्यः शुचिर्भूत्वा तर्पयित्वा च पूर्ववत् ॥
धृतोर्ध्वपुण्ड्रदेहश्च पवित्रकर एव च ।
प्रविश्य मन्दिरं विष्णोः संमार्जन्या विशोधयेत् ॥

वास्तोष्पतेति वै सूक्तं जपन् संमार्जयेद्गृहम्।
आगाव इति सूक्तेन गोमयेनानुलेपयेत्।
आनोभद्रेति सूक्तेन रङ्गवल्लिञ्च निक्षिपेत्॥
ततः कलशमादाय जपन्वै शाकुनीरृचः।
गत्वा जलाशयं रम्यं निर्म्मलं शुचि पाण्डुरम्॥
इमं मे गङ्गेति ऋचा जलं भक्त्याभिमन्त्रयेत्।
आपो अस्मानिति ऋचा कलशं चालयेद्द्विजः॥
समुद्रजेष्ठमन्त्रेण गृह्णीयात्प्रयतो जलम्।
उतस्मेनं वस्तुभिरिति वस्त्रेणाच्छाद्य वैष्णवः॥
प्रसन्नाजेति सूक्तं वै जपन् सम्प्रविशेद्गृहम्।
धान्योपरि तथा कुम्भं न्यसेद्दक्षिणतो हरेः॥
इमं मे वरुणेत्यृचा मङ्गलद्रव्यसंयुतम्।
आञ्जन्ति मित्रत्वेति सूक्तेन कुर्य्यात्पुष्पस्य सञ्चयम्॥
अर्व्वाचि सुभगे द्वाभ्यां गन्धांश्च पेषयेत्तथा।
वाग्यतः प्रयतोभूत्वा श्रीसूक्तेनैव वैष्णवः।
विश्वानिन इति ऋचा दीपं दद्यात्सुदीपितम्॥
तत्तत्पात्रेषु सलिलं दत्त्वा गन्धांस्तु निक्षिपेत्।
शन्नोदेव्या च सलिलं गायत्र्या च कुशांस्तथा॥
आयनेति च पुष्पाणि यवोऽसीति ऋचाऽक्षतान्।
गन्धद्वारेति वै गन्धान् ओषध्या तिलसर्षपान्॥
काण्डात्काण्डेति दूर्वाग्रान् सहिरण्येति रत्नकम्।
हिरण्यरूपेति ऋचा हिरण्यं निक्षिपेत्तथा॥
एवं द्रव्याणि निक्षिप्य तुलस्या च समर्पयेत्।
सवितुश्चेत्यादि ऋचा दद्यादर्घ्योदकं हरेः॥

श्रियेति पादेति ऋचा दद्यात् पादजलं तथा।
भद्रन्ते हस्तेत्यनेन हस्तप्रक्षालनं चरेत्॥
वयः सुपर्णेति ऋचा मुखसम्मार्जनं तथा।
आपो अस्मानिति ऋचा वक्त्रगण्डूषमेव च॥
हिरण्यदन्तेत्यनेन दन्तकाष्ठं निवेदयेत्।
बृहस्पते प्रथमेति जिह्वालेखनमेव च॥
आपयित्वा उभेषजैरिति गण्डूषमाचरेत्।
आपोहिष्ठा इत्यनेन कुर्य्यादाचमनीयकम्॥
मूर्धमेव इत्यनेन तैलाभ्यङ्गं समाचरेत्।
मूर्धानन्दीव इत्यनेन गन्धान् केशेषु लेपयेत्॥
तद्वियस्तस्थौ केशवन्ते केशान् वै चालयेत्पुनः।
श्रिये पृश्नेति ऋचा तद्वर्चोद्वर्त्तनादिकम्॥
आपोयज्ञः प्रथममिति सूक्तेनाभ्यङ्गसूचनम्।
क्वत्वादः स्नापयेत्सूक्तैर्वैष्णवैर्गन्धवारिणा॥
ततः पञ्चामृतैर्गव्यैः स्नापयेत्तत्प्रकाशकैः।
आपप्रायस्वेत्यृचा क्षीरं दधिक्राव्णेति वै दधि॥
घृतमामिक्षेति घृतं मधुवातेति वै मधु।
तन्त्वेवयं यथा गोभिरित्यृचेक्षुरसं शुभम्॥
एभिः पञ्चामृतैः स्नाप्य चन्दनञ्च निवेदयेत्।
श्रीसूक्तपुरुषसूक्ताभ्यां पुनः संस्थापयेद्धरिम्॥
वनस्पतेति सूक्तेन कुर्य्याद्धूपं समन्वितम्।
श्रिये जात इति ऋचा दद्यान्नीराजनं ततः॥
युवा सुवासेति ऋचावस्त्रेणाङ्गं प्रमार्जयेत्।
प्रसेनानेति मन्त्रेण वस्त्रं सम्वेष्टयेत्ततः॥

युवं वस्त्राणीति ऋचा उत्तरीयं तथैव च।
सर्वत्राचमनं दद्याच्छन्नो देवीत्यृचा च तु॥
उपवीतं ततो दद्याद् ब्राह्मणानिति वै ऋचा।
ऋतस्यतन्तु विततं दद्यात्कुशपवित्रकम्॥
पश्चादाचमनं दद्याद्भूषणैर्भूषयेद्धरिम्।
विश्वजित्सूक्तेन दद्याद्भूषणानि शुभानि वै॥
हिरण्यकेशेति ऋचा केशान् संशोषयेत्तथा।
सुपुष्पैः कवरीं दद्याद्धिहिंसोतेत्यनेन वै॥
कुपायमिन्द्र ते रथ इत्यृचा तिलकं शुभम्।
गन्धञ्च लेपयेद्गात्रे गन्धद्वारेति वै ऋचा॥
त्रातारमिन्द्र इत्यृचा पुष्पमालां समर्पयेत्।
चक्षुषः पितेति ऋचा चक्षुषो रञ्जनं शुभम्॥
सहस्रशीर्षेति ऋचा किरीटं शिरसि क्षिपेत्।
ऋक्सामाभ्यामिति श्रोत्रे कुण्डले मा करेऽर्पयेत्॥
दम्नूनसो अपस इति केयूरादिविभूषणम्।
आश्लेते यस्येति ऋचा हाराणि विमलानि च॥
हस्ताभ्यां दशशाखाभ्या मित्यृचा चाङ्गुलीयकम्।
अस्य त्रिपूर्णमनुना सूर्य्याके विन्यसेच्छुभे॥
इद्रन्त्वदुत्तर इति कटिसूत्रं सुरोचिषम्।
स्वादिष्टाविशस्यातिरित्यायुधानि समर्पयेत्॥
द्यौर्नय इन्द्रेति दद्याच्छत्रं सुविमलं तथा।
सोमः पवतेतित्यृचा चामरं हैममुत्तमम्॥
सोमापूषणेत्यृचा तालवृन्तौ सुवर्चसौ।
रूपं रूपमिति ऋचा दद्यादादर्शनं शुभम्॥

इन्द्रमेव धीषणेति ऋचा आसने विनिवेशयेत्।
इहैवास्तमिति ऋचा दद्याच्च कुशविष्टरम्॥
अप्स्वन्तरिति ऋचा पाद्यं दद्याच्च भक्तितः।
गौरीमिमाय सूक्तेन अर्घ्यं हस्ते निवेदयेत्॥
न तमं होनदुरितमित्याचमनं समर्पयेत्।
पिवासोममित्यनेन मधुपर्कञ्च प्राशयेत्॥
अप्स्वग्ने सधिष्टवेति पुनराचमनं चरेत्।
अर्चन्तस्त्वाह वाहेत्यक्षतैरर्चयेच्छुभैः॥
तण्डुलाः सहरिद्रास्तु अक्षता इति कीर्तिताः।
विष्णोर्नुकमिति सूक्तेन धूपं दद्याद्घृतान्वितम्॥
भावामितेति सूक्तेन दीपान्नीराजयेच्छुभान्।
इन्द्र ते पात्रमिति भाजनं विन्यसेच्छुभम्॥
तस्मा अरङ्गाममेति पात्रप्रक्षालनं चरेत्।
अस्मिन् पदे परमेतच्छिवांसमिति गवाज्ये नाभिपूरयेत्।
पितुनुस्तोषमिति सूक्तेन दद्यादान्नादिकं हविः॥
तदस्यानिकमिति ऋचा सहिरण्यं घृतं तथा।
तस्मिन् रायवतय इति दद्यादापोशनं घृतम्॥
ततः प्राणाद्याहुतयो होतव्याः परमात्मनि।
अग्ने विवस्वदुषस इति पञ्चभिश्च यथाक्रमम्॥
समुद्रा ऊर्मीति सूक्तेन घृतधाराः समाचरेत्।
परोमात्रेति सूक्तेन भोजयेत्सश्रियं हरिम्॥
तुभ्यं हिन्वान इत्यनेन वयः सर्वं निवेदयेत्।
इन्द्र पीबेत्यनेन दद्यादापोशनं पुनः॥
प्रत आश्विनि पवमानेत्यृचा हस्तप्रक्षालनं चरेत्।

सरस्वतीं देवयन्त इति विस्रभिगच्छ्रुषमेव च ॥
वृष्टिं दिवीशः तद्वारेति द्वाभ्यां दद्यादाचमनं ततः ।
शिशुं जिह्वाग्निमिति ऋचा मुखहस्तौ च मार्जयेत् ॥
दक्षिणावतामिति ऋचा दद्यात्ताम्बूलमुत्तमम् ।
स्वादुः पवस्वेति ऋचा दद्यादाचमनं पुनः ।
अयं गौरिति सूक्ताभ्यां दद्यात् पुष्पाञ्जलिं ततः ॥
दीपन्नीराजयेत्पश्चाद्घृतसूक्तेन वैष्णवः ।
यतइन्द्रेत्यादि षड्भिर्दिक्षु रक्षां प्रदापयेत् ॥
यज्ञो देवानामितिसूक्तेन उपस्थानजपं चरेत् ।
तद्विष्णोरिति द्वाभ्यां प्रणमेच्चैव भक्तितः ॥
गौरिमिमायेति ऋचा दद्यादाचमनन्ततः ।
सहस्रनामभिः स्तुत्वा पश्चाद्धोमं समाचरेत् ॥
प्रातरौपासनं हुत्वा तस्मिन्नग्नौ जनार्दनम् ।
ध्यात्वा संपूज्य जुहुयाद्वैष्णवैः प्रत्यृचं हविः ॥
श्रीभूसूक्ताभ्यामपि च हुत्वा घृतयुतं हविः ।
याभिः सोमो मोदतेत्यनेन मात्रभ्यां जुहुयाद्धविः ॥
किंस्विद्वनमित्यानन्तं जुहुयाद्धविः ।
सुपर्णं विप्रा इति ऋचा सुपर्णायमहात्मने ॥
चमूषु च्छ्येन इति च सेनेशायापि ह्रयताम् ।
पवित्रन्त इति द्वाभ्याञ्चक्रायामिततेजसे ॥
स्वादुषं स इति ऋचा हेतिभ्यो जुहुयाद्धविः ।
इन्द्रश्रेष्ठानितीन्द्राय अग्निमूर्धेति पावकम् ॥
यमाय सोमेति यमन्नैर्ऋतं व्योषुणेत्यृचा ।
यच्छिन्दितेति वरुणं वायवामेति मारुतम् ।

द्रविणोदाद्ददातु ना द्रविणाद्याश्रमेव च ॥
त्र्यम्बकऋचा रुद्रं आनः प्रजां प्रजापतिम् ।
यज्ञेनेत्यृचा साध्येभ्यो मरुतो यद्ववेति च ॥
ये नः सपत्नेति ऋचा वसुं रुद्रेभ्यएव च ।
विश्वेदेवाः स चतस्रभिर्ये देवा स ऋचा तथा ॥
सर्वेभ्यश्चैव देवेभ्यो जुहुयादन्नमुत्तमम् ।
नासत्याभ्यामिति ऋचा अश्विच्छन्दोभ्यएव च ॥
सोमपूषेति ऋचा सूर्य्याचन्द्रमसोस्तथा ।
संसमिद्युद्‌सूक्तेन वैष्णवेभ्यस्तथा पुनः ॥
ततः स्विष्टकृतं हुत्वा भूतेभ्यश्च बलिं क्षिपेत् ।
नमो महद्भ्य ऋचा बलिं भुवि विनिक्षिपेत् ॥
आचम्य वारिणा पश्चान्मन्त्रयागं समाचरेत् ।
एतच्छ्रौतं नृपश्रेष्ठ! मुनिभिः सम्प्रकीर्त्तितम् ॥
सम्यगुक्तं मया तेऽद्य निश्चितंमतमुत्तमम् ।
एतत्प्रियतमं विष्णोः श्रियोनाथस्य सर्वदा ॥
श्रौतेनैव हरिं देवमर्चयन्ति मनीषिणः ।
श्रौतस्मार्त्तागमैर्विष्णो स्त्रिविधं पूजनं स्मृतम् ॥
एतच्छ्रौतं ततः स्मार्त्तं पौरुषेण च यत् स्मृतम् ।
मन्त्रैरष्टाक्षराद्यैस्तु तद्दिव्यागममुच्यते ॥
श्रौतमेव विशिष्टं स्यात्तेषां नृपवरोत्तम! ।
श्रौतमेव तथा विप्राः प्रकुर्वन्ति जनार्दने ॥
यजन्ति केचित्त्रितयन्त्रिसन्ध्यासु च देशिकाः ।
यजन्ति केचित्त्रितयन्त्रयो वर्णा द्विजोत्तमाः ॥
शुश्रूषा च तथा नामकीर्तनं शूद्रजन्मनः ।

अपि वा परमैकान्ति बालकृष्णवपुर्हरिम्॥
स्त्रीणामप्यर्चनीयः स्यात्स्ववर्णस्यानुरूपतः।
मन्त्ररत्नेन वै पूज्यो हित्वा श्रौतं विधानतः॥
एवमभ्यर्चनं विष्णोर्मुनिभिः सम्प्रकीर्त्तितम्।
श्रौतस्मार्त्तागमोक्ताश्च नित्यनैमित्तिकाः क्रियाः॥
प्रायश्चित्तमकृत्यानां दण्डमप्याततायिनाम्।
अधुना सम्प्रवक्ष्यामि वृत्तिमैकान्तिलक्षणाम्॥
नारीणामपि कर्तव्या मह्यन्यहनि शाश्वतीम्।
उत्थाय पश्चिमे यामे भर्त्तुः पूर्वमतन्द्रिताः॥
कृत्वा शौचं विधानेन दन्तधावनमाचरेत्।
कृत्वाथ मङ्गलस्नानं धृत्वा शुक्लाम्बरं तथा॥
आचम्य धारयेदूर्ध्वपुण्ड्रं शुभ्रं मृदैव तु।
चन्दनेनापि कस्तूर्य्या कुङ्कुमेनापि वा सती॥
जप्त्वा मन्त्रं गुरुं पश्चादभिनन्द्य च वैष्णवान्।
नमस्कृत्वा जगन्नाथं जप्त्वा च शरणागतिम्॥
आत्मानं समलङ्कृत्य चिन्तयेन्मधुसूदनम्।
गृहभाण्डादिकं सर्वं वाग्यता नियतेन्द्रियाः॥
संशोधयेत्प्रतिदिनं यत्नार्थं परमात्मनः।
मार्जयित्वा गृहं पश्चाद् गोमयेनानुलिप्य च॥
रङ्गवल्यादिभिः पश्चादलङ्कृत्य समन्ततः।
चतुर्विधानां भाण्डानां चालनन्तु समाचरेत्॥
पाचकानि बहिष्ठानि जलस्यानयनानि च।
स्थापनानि जलार्थं वा चतुर्विधमुदाहृतम्॥
पृथक् पृथगुदस्थानि तेषु तेष्वपि विन्यसेत्।

नान्योन्यं सङ्करं कुर्य्याद्भाण्डानां सर्वकर्म्मसु ॥
तानि तानि स्पृशेत्पाणिं प्रक्षाल्यैव पुनः पुनः ।
सम्यक् प्रक्षाल्य भाण्डानि दाहयेद्यज्ञीयैस्तृणैः ॥
पुनः प्रक्षाल्य सन्तप्ता पश्चात्पचनमाचरेत् ।
रसभाण्डानि सर्व्वाणि क्षालयेदुष्णवारिणा ॥
चतुर्भिः पञ्चभिर्धौत्वा स्रुक्स्रुवौ क्षालयेत्तदा ।
वह्निं निष्क्रामयीत पाचकानि गृहान्तिकात् ॥
ताभिरेव न दद्यात्तु भुञ्जतां हि कथञ्चन ।
दत्त्वा पात्रान्तरे दद्यात्कांस्ये वा मृण्मयेऽपि वा ॥
पुटे पर्णमये वापि दद्यादन्नतु वैष्णवे ।
स्रुवं दारुमयं कांस्यं कुर्व्वीतायोमयं नतु ॥
न दद्यादारनालस्य घटं तस्मिन् महावने ।
आरनालस्य यत् कुम्भन्त्यजेन्मध्यघटं यथा ॥
आरनालङ्क्षारशाकं करञ्जं तिलपिष्टकम् ।
लशुनं मूलकं शिग्रुं छत्रां कोशातकीफलम् ।
अलावुञ्चाम्लशाकञ्च करनिर्मथितं दधि ॥
विम्वं विड्जञ्च निर्यासं पीलुं श्लेष्मातकं फलम् ।
आरग्वधञ्च निर्गुण्डीं कालिङ्गनालिकां तथा ॥
नालिकेर्य्याख्यशाकञ्च श्वेतवृन्ताकमेव च ।
उष्ट्राविमानुषीक्षीरमवत्सानिर्दशाहगोः ॥
एतान्यकामतः स्पृष्ट्वा सवासा जलमाविशेत् ।
मत्या जग्ध्वा व्रतं कुर्य्यान्मुजं जग्ध्वा पतेदधः ॥
केशानां रञ्जनार्थं वा न स्पृशेदारनालकम् ।
चन्दनं घनसारं वा मकरन्दमथापि वा ॥

माषमुद्गादिचूर्णं वा तक्रं जाम्बीरमेव वा ।
तिन्तिड़ञ्च कलायं वा केशरञ्जनमाचरेत् ॥
ऊर्ध्वं मासात्त्यजेत्सर्वं मृद्भाण्डं वैष्णवोत्तमः ।
न त्यजेल्लोहभाण्डानि तापयेच्च हुताशने ॥
दारूणां सन्त्यजेद्वापि तक्षणं वा समाचरेत् ।
अश्मनामश्मभिर्धात्वा गोवालैर्घर्षयेत्तथा ॥
सूतके मृतके वापि शुनादिस्पर्शने तथा ।
स्पर्शने वाप्यभक्ष्याणां सद्य एव परित्यजेत् ।
एवं संशोध्य भाण्डानि यज्ञार्थं वाचयेद्द्विजः ॥
सम्प्रोक्ष्याद्भिः शुचौ देशे धान्यं संशोधयेद्भुवि ।
अवहन्याच्छुभतरं गायन्ति मधुसूदनम् ॥
संशोध्य तण्डुलान् पश्चादद्भिः संक्षालयेत्त्रिभिः ।
अथ त्रिवारं वस्त्रेण शोधयित्वा घटान्तरे ॥
कुशेनैव पवित्रेण तण्डुलान् निर्वपेच्छुभान् ।
अन्तर्धाय कुशं तत्र मन्त्ररत्नमनुस्मरन् ॥
पाचयेत्सपवित्रेण वाग्यतो नियतेन्द्रियः ।
उपविश्य शुभे कुण्डे वह्निं प्रज्वालयेत्ततः ॥
अवैष्णवस्य शूद्रस्य पतितस्य तथैव च ।
पाषण्डस्याप्यशुद्धस्य गृहेष्वग्निं विवर्जयेत् ॥
सम्प्रोक्ष्य मन्त्ररत्नेन वह्निं कुशजलैस्त्रिभिः ।
यज्ञीयैर्विमलैः काष्ठैर्व्यजनेन प्रदीपयेत् ॥
सान्तर्धानमुखेनापि धमयन्वा प्रदीपयेत् ।
पालाशैर्खादिरैर्बिल्वैर्गोशकृत्पिटकैरपि ॥
अन्यैर्वा यज्ञीयैः काष्ठैस्तृणैर्वा यज्ञीयैः शुभैः ।
वर्जयेन्मद्यदिग्धानि तथा वैभितकीनि च ॥

आरग्वधानि शैग्रूणि तथा नैगुण्डिकानि च।
नैपानि च कपित्थानि कार्पासैरण्डकानि च॥
अमेध्यानि सकीटानि दौर्गन्ध्यानि तथैव च।
असद्दाहानि चैत्यानि काकखट्वासनानि च॥
देवालयानि यौप्यानि तथोपकरणानि च।
महिषोष्ट्रखरादीनां करीषपीठकानि च॥
अन्यानां पाकशेषाणि वर्जयेद्यज्ञकर्म्मणि।
प्रदीप्याग्निं ततो नाद्यं पच्यान्नियतमानसः॥
चिन्तयन् परमात्मानं जपन्मन्त्रद्वयं तथा।
शुद्धं हृद्यं तथा रुच्यं पश्चाद्रम्यतरं शुभम्॥
निषिद्धानि च शाकानि फलमूलानि वर्जयेत्।
अतिरूक्षञ्चातिदुष्टमतिरक्तञ्च वर्जयेत्॥
भावदुष्टं क्रियादुष्टं कालदुष्टं तथैव च।
संसर्गदुष्टमपि च वर्जयेद्यज्ञकर्म्मणि॥
रूपतो गन्धतो वापि यच्चाभक्ष्यैः समम्भवेत्।
भावदुष्टञ्च यत्प्रोक्तं मुनिभिर्धर्म्मपारगैः॥
आरनालञ्च मद्यञ्च करनिर्म्मथितं दधि।
हस्तदत्तञ्च लवणं चीरं घृतपयांसि च॥
हस्तेनोद्धृत्य यत्तोयं पीतं वक्त्रेण वै कदा।
शब्देन पीतं भुक्तञ्च गव्यं ताम्रेण संयुतम्॥
चीरञ्च लवणोन्मिश्रं क्रियादुष्टमिहोच्यते।
एकादश्यां तु यच्चान्नं यच्चान्नं राहुदर्शने।
सूतके मृतके चान्नं शुष्कं पर्युषितं तथा॥
अनिर्दशाहगोचीरं षष्ठ्यां तैलं तथापि च।

नदीष्वसमुद्रगासु सिंहकर्कटयोर्जलम् ॥
निःशेषजलवापगादौ यत्प्रविष्टं नवोदकम्।
नातीतपञ्चरात्रं तत्कालदुष्टमिहोच्यते ॥
शैवपाषण्ड पतितैर्विकर्मस्थैर्निरीश्वरैः।
अवैष्णवैर्द्विजैः शूद्रैर्हरिवासरभोक्तृभिः ॥
श्वकाकशूकरोष्ट्राद्यैरुदक्यासूतिकादिभिः।
पुंश्चलीभिश्च नारीभिर्वृषलीपतिभिस्तथा ॥
दृष्टं स्पृष्टं च दत्तं च भुक्तशेषं तथैव च।
अभक्ष्याणां च संयुक्तं संसर्गदुष्टमुच्यते ॥
विम्बं शिग्रु च कालिङ्गं तिलपिष्टञ्च मूलकम्।
कोशातकीमलावुञ्च तथा कट्फलमेव च ॥
नालिका नालिकेत्यादिजातिदुष्टमिहोच्यते।
एवं सर्वाण्यभक्ष्याणि तत्सङ्गान्यपि संत्यजेत् ॥
तथैवाभक्ष्यभोक्तृणां हरिवासरभोजिनाम्।
लोकायतिकविप्राणां देवतान्तरसेविनाम् ॥
अवैष्णवानामपि च संसर्गं दूरतस्त्यजेत् ॥
पक्वान्नाद्यं यथा पक्वं वाग्यतो नियतेन्द्रियः।
सम्मार्जयेच्छुभतरं वारिणा वाससैव च ॥
करकैरपिधायाथ चक्रेणैवाङ्कयेत्ततः।
गन्धेन वा हरिद्रेण जलेनापरथ वा लिखेत् ॥
सुदर्शनं पाञ्चजन्यं भाण्डानां यत्नयोगिनाम्।
कुशोत्तरे शुचौ देशे विन्यस्य कुशवारिणा ॥
संप्रोक्ष्य मन्त्ररत्नेन वस्त्रेणाच्छादयेत्ततः।
चालयित्वाथ देवस्य भाजनानि शुभैर्जलैः ॥

अभिपूर्य ततो दद्याद्भोजयेच्च विशेषतः।
भोजयेदागतान् काले सखिसम्बन्धिबान्धवान्॥
बालान् वृद्धान् भोजयित्वा भर्त्तारं भोजयेत्ततः।
स्वयं हृष्टा ततोऽश्नीयाद्भर्त्तुर्भुक्तावशेषितम्॥
पैशाचिकानां यक्षाणां शक्तानां लिङ्गधारिणाम्।
द्वादशीविमुखानां च सल्लापादिविवर्जयेत्॥
शैवबौद्धस्कान्दशाक्तस्थानानि न विशेत् क्वचित्।
वर्जयेत्तत्समीपस्थं जलपुष्पफलादि च॥
न निरीक्षेत देवानामुत्सवानि कदाचन।
स्तुतिं वापरन्यदेवानां न कुर्याच्छृणुयान्न च॥
कामप्रसङ्गसल्लापान् परिहासादि वर्जयेत्।
अन्यचिह्नाङ्कितं वस्त्रं भूषणासनभाजनम्॥
वृक्षं पशुं कूपगृहान् भाण्डं चैव विवर्जयेत्।
अन्यालये हरिं दृष्ट्वा देवतान्तरसंसदि॥
नार्चयेन्नप्रमाणि च तीर्थसेवां विवर्जयेत्।
अवैष्णवस्य हस्तात्तु दिव्यदेशादुपागतम्॥
हरेः प्रसादतीर्थाद्यं यत्नेन परिवर्जयेत्।
आकारत्रयसम्पन्नो नवेज्याकर्म्मणि स्थितः॥
विष्णोरनन्यशेषत्वं तथैवानन्यसाधनम्।
तथैवानन्यभोग्यत्वमाकारत्रयमुच्यते॥
अर्चनं मन्त्रपठनं ध्यानं होमस्य वन्दनम्।
स्तुतिर्योगं समाधिश्च तथा मन्त्रार्थचिन्तनम्॥
एवं नवविधा प्रोक्ता चेज्या वैष्णवसत्तमैः।
प्रापरस्य ब्रह्मणोरूपं प्राप्यश्च प्रत्यगात्मनः॥

प्राप्युपायं फलञ्चैव तथा प्राप्तिविरोधि च।
ज्ञातव्यमेतदर्थस्य पञ्चकं मन्त्रवित्तमैः॥
जगतः कारणत्वं च तथा स्वामित्वमेव च।
श्रीशत्वं सगुरुत्वञ्च ब्रह्मणो रूपमुच्यते॥
देहेन्द्रियादिभ्योऽन्यत्वं नित्यत्वादिगुणौघता।
श्रीहरेर्दास्यधर्म्मत्वं स्वरूपं प्रत्यगात्मनः॥
उपायाध्यवसायेन त्यक्त्वा कर्म्मौघमात्मनः।
हरेः कृपावलम्बित्वं प्राप्युपायमिहोच्यते॥
सर्वैश्वर्यफलं त्यक्त्वा शब्दादिविषयानपि।
दास्यैकसुखसङ्गित्वं विष्णोः फलमिहोच्यते॥
तज्जनस्यापराधित्वं शब्दादिष्वनुरक्तता।
कृत्यस्य च परित्यागः अकृत्यकरणं तथा॥
द्वादशीविमुखत्वं च विरोधि स्यात् फलस्यहि।
अर्थपञ्चकमेतद्धि-ज्ञातव्यं स्यान्मुमुक्षुभिः॥
विहितं सकलं कर्म्म विष्णोराराधनं परम्।
निबोध तन्नृपश्रेष्ठ! भोगार्थं परमात्मनः॥
वृत्त्याख्यस्य तरोरस्य सुदृढं मूलमुच्यते।
त्यागेन चैव धर्म्मस्य निषिद्धाचरणेन च॥
आज्ञातिक्रमणाच्छिन्नः पतत्येव न संशयः।
ज्योतिष्टोमादयः सर्वे यज्ञो वेदेषु कीर्तिताः॥
पुण्यव्रताः पुराणोक्ता दाना नैमित्तिकादिषु।
विष्णोर्भोगतया सर्वाः कर्त्तव्या वैष्णवोत्तमैः॥
यस्तूपायतया कृत्यं नित्यनैमित्तिकादिकम्।
सतृकृत्यं कुरुते विष्णोर्वैष्णवः स उदीरितः॥

विष्णो रञ्जतया यस्तु सत्कृत्यं कुरुते बुधः।
स एकान्तीति मुनिभिः प्रोच्यते वैष्णवोत्तमः॥
यस्तु भोगतया विष्णोः सत्कृत्यं कुरुते सदा।
स भवेत्परमैकान्तिमहाभागवतोत्तमः॥
वर्जनीयमकृत्यन्तु सर्वेषां करणैस्त्रिभिः।
अकामतस्तु यत्प्राप्तं प्रायश्चित्ताद्विनश्यति॥
अकृत्यं वैष्णवैः पापबुध्या शास्त्रविरोधितः।
एकान्ति परमैकान्ति रुच्यभावाच्च सन्त्यजेत्॥
श्रुतिस्मृत्युदितं धर्मं यस्त्यजेद्वैष्णवाधमः।
स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः॥
अकृत्यकरणाद्वापि कृत्यस्याकरणादपि।
द्वादशीत्रिमुखत्वेन पतत्येव न संशयः॥
तस्मात्सर्वप्रयत्नेन सत्कृत्यं सर्वदा चरेत्।
आज्ञातिक्रमणाद्विष्णो मुक्तोऽपि विनिबध्यते॥
समस्तयज्ञभोक्तारं ज्ञात्वा विष्णुं सनातनम्।
दैवं पैत्रं तथा यज्ञं कुर्यान्नतु परित्यजेत्॥
त्रिदण्डमवलम्बन्ते यतयो ये महाधियः।
तेषामपि हि कर्तव्यं सत्कृत्यमितरेषु किम्॥
ब्रह्म ब्रह्मा ब्राह्मणश्च त्रितयं ब्राह्ममुच्यते।
तस्माद्ब्राह्मणविधिना परं ब्रह्माणमर्चयेत्॥
समस्तयज्ञभोक्तारमज्ञात्वा विष्णुमव्ययम्।
वेदोदितं यः कुरुते स लोकायतिकः स्मृतः॥
यस्तु वेदोदितं धर्मन्त्यक्त्वा विष्णुं समर्चयेत्।
स पाषण्डत्वमापन्नो नरकं प्रतिपद्यते॥

वेदाः प्राणा भगवतो वासुदेवस्य सर्वदा ।
तदुक्तकर्म्माकुर्व्वाणः प्राणहर्त्ता भवेद्धरेः ॥
विष्णोराराधनाद्वेदं विना यस्त्वन्यकर्म्मणि ।
प्रयुञ्जीत विमूढ़ात्मा वेदहन्ता न संशयः ॥
वत्सं माता लेढ़ि यथा तथा लेढ़ि स मातरम् ।
श्रुतं विष्णोः प्रियं ज्ञात्वा विष्णुं वेदेन वै यजेत् ॥
तस्माद्वेदस्य विष्णोश्च संयोगो यस्तु दृश्यते ।
स एव परमो धर्म्मो वैष्णवानां यथा नृप ! ॥
कश्चित् पुरा नृपश्रेष्ठ ! काश्यपो ब्राह्मणोत्तमः ।
शाण्डिल्य इति विख्यातः सर्वशास्त्रविशारदः ॥
स तु धर्म्मप्रसङ्गेन विष्णोराराधनं प्रति ।
अवैदिकेन विधिना कृतवान् धर्म्मसंहिताम् ॥
अवलम्ब्य मतं तस्य केचिदत्र महर्षयः ।
अवैदिकेन मार्गेण पूजयन्ति स्म केशवम् ॥
अशास्त्रविहितं धर्मं सर्वे कुर्वन्ति मानवाः ।
स्वाहास्वधावषट्कारवर्जितं स्यान्महीतलम् ॥
ततः क्रुद्धो जगन्नाथः शङ्खचक्रगदाधरः ।
इदमाह मुनिश्रेष्ठं शाण्डिल्यममितौजसम् ॥
दुर्बुद्धे ! मामकं धर्मं परमं वैदिकं महत् ।
अवैदिकक्रिया जुष्टं प्रागल्भ्यात् कृतवानसि ॥
यस्मादवैदिकं धर्मं प्रवर्त्तयसि मां द्विज ! ।
तस्मादवैदिकं लोकं निरयं गच्छ दारुणम् ॥
तद्वाक्यादेव देवस्य शाण्डिल्योऽभूद्दयाकुलः ।
स्तुवन् प्राह जगन्नाथं प्रणिपत्य पुनः पुनः ॥

त्राहि त्राहीहि लोकेश ! मां विभो ! सापराधिनम्।
ततः स कृपया विष्णुर्भगवान् भूतभावनः॥
दिव्यवर्षशतं विप्र ! भुक्ता नरकयातनाम्।
उत्पत्स्यसे भृगोर्वंशे जमदग्निरितीरितः॥
तत्राराध्य पुनर्मां तु वैदिकेनैव धर्म्मतः।
गच्छ तस्मिन् मुनिश्रेष्ठ ! मम लोकं सुनिर्म्मलम्॥
इत्युक्ता भगवान्विष्णुस्तत्रैवान्तरधीयत।
शाण्डिल्यो निरयं प्राप्य पुनरुत्पद्य भूतले॥
वेदोक्तविधिना विष्णुमर्चयित्वा सनातनम्।
विशुद्धभावात् सम्प्राप्य तद्धाम परमं हरेः॥
तस्मादवैदिकं धर्म्मं दूरतः परिवर्जयेत्।
वैदिकेनैव विधिना भक्त्या सम्पूजयेद्धरिम्॥
श्रौतेन विधिना चक्रं धृत्वा वै बाहुमूलयोः।
धृतोर्ध्वपुण्ड्रः शुद्धात्मा विधिनैवार्चयेद्धरिम्॥
कर्म्मणा मनसा वाचा न प्रमाद्येत् सनातनात्।
न प्रमाद्येत्परं धर्म्मात् श्रुतिस्मृत्युक्तगौरवात्॥
सुशीलन्तु परं धर्मं नारीणां नृपसत्तम !।
शीलभङ्गेन नारीणां यमलोकः सुदारुणः॥
मृते जीवति वा पत्यौ या नान्यमुपगच्छति।
सैव कीर्तिमवाप्नोति मोदते रमया सह॥
पतिं या नातिचरति मनोवाक्कायकर्म्मभिः।
सा भर्तृलोकमाप्नोति यथैवारुन्धती तथा॥
आर्त्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता॥

या स्त्री मृतं परिष्वज्य दग्धा वै हव्यवाहने।
सा भर्तृलोकमाप्नोति हरिणा कमला यथा॥
ब्रह्मघ्नं वा सुरापं वा कृतघ्नं वापि मानवम्।
यमादाय मृता नारी तं भर्त्तारं पुनाति हि॥
साध्वीनामिह नारीणामग्निप्रपतनादृते।
नान्यो धर्मोऽस्ति विज्ञेयो मृते भर्तरि कुत्रचित्॥
वैष्णवं पतिमादाय या दग्धा हव्यवाहने।
सा वैष्णवपदं याति यत्र गच्छन्ति योगिनः॥
मृते भर्तरि या नारी भवेद्यदि रजस्वला।
चिताग्नि संग्रहे तावत् स्नात्वा तस्मिन् प्रवेशयेत्॥
गर्भिणी नानुगन्तव्या मृतं भर्त्तारमव्यया।
ब्रह्मचर्यव्रतं कुर्याद्यावज्जीवमतन्द्रिता॥
केशरञ्जनताम्बूलगन्धपुष्पादिसेवनम्।
भूषितं रङ्गवस्त्रञ्च कांस्यपात्रे च भोजनम्॥
द्विवार भोजनञ्चाक्ष्णोरञ्जनं वर्जयेत्सदा।
स्नात्वा शुक्लाम्बरधरा जितक्रोधा जितेन्द्रिया॥
न कल्क कुहका साध्वी तन्द्रालस्य विवर्जिता।
सुनिर्म्मला शुभाचारा नित्यं सम्पूजयेद्धरिम्॥
क्षितिशायी भवेद्रात्रौ शुचौ देशे कुशोत्तरे।
ध्यानयोगपरा नित्यं सतां सङ्गे व्यवस्थिता॥
तपश्चरणसंयुक्ता यावज्जीवं समाचरेत्।
तावत्तिष्ठेन्निराहारा भवेद्यदि रजस्वला॥
सभर्तृका सती वापि पाणिपुरान्नभोजनम्।
एकवारं समश्नीयाद्रजसा च परिप्लुता॥

एवं सुनियताहारा सम्यग्व्रतपरायणा ।
भर्त्रा सह समाप्नोति वैकुण्ठपदमव्ययम् ॥
दग्धव्या साग्निहोत्रेण भर्त्तुः पूर्वं मृता तु या ।
स्वांशमग्निं समादाय भर्त्ता पूर्ववदाचरेत् ॥
कृत्वा कुशमयीं पत्नीं यावज्जीवमतन्द्रितः ।
जुहुयादग्निहोत्रं तु पञ्चयज्ञादिकं तथा ॥
अथ च प्रव्रजेद्विद्वान् कन्यां वापि समुद्वहेत् ।
प्रव्रज्यामपि कुर्व्वीत कर्म्म वेदोदितं महत् ॥
आत्मन्यग्निं समारोप्य जुहुयादात्मवान् सदा ।
मनसा वा प्रकुर्व्वीत नित्यनैमित्तिकक्रियाः ॥
गृहस्थो वा वनस्थो वा यतिर्वापि भवेद्द्विजः ।
अनाश्रमी न तिष्ठेत यावज्जीवं द्विजोत्तमः ॥
वर्णाश्रमेषु सर्व्वेषां पूजनीयो जनार्दनः ।
न व्यापकेन मन्त्रेण सदैव च महीपते ॥
व्यापकानां च सर्व्वेषां ज्यायानष्टाक्षरो मनुः ।
अष्टाक्षरस्य जप्ता तु साक्षान्नारायणः स्वयम् ॥
न्यासं च समुद्दिश्य सर्पिश्छन्दोऽधि दैवतम् ।
न दीक्षा विधि न ध्यानं सार्थं मन्त्रमुदाहृतम् ॥
स्नात्वा शुद्धः प्रसन्नात्मा कृतकृत्यो जनार्दनम् ।
मनसाप्यर्चयित्वा वा जपेन्मन्त्रं सदा बुधः ॥
दानप्रतिग्रहौ यागं स्वाध्यायं पितृतर्पणम् ।
पितृक्रियाष्टाक्षरस्य जप्ता कुर्यादतन्द्रितः ॥
धृतोर्ध्व पुण्ड्रदेहश्च चक्राङ्कितभुजस्तथा ।
अष्टाक्षरं जपन्नित्यं पुनाति भुवनत्रयम् ॥

जपेद्योगतया मन्त्रं सततं वैष्णवोत्तमः।
न साधनतया जप्यं कर्तव्यं विष्णुतत्परैः॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरन्तु वा।
त्रिसन्ध्यासु जपेन्मन्त्रं तदर्थं मनु चिन्तयन्॥
उपोष्य पूर्वदिवसे नद्यां स्नात्वा विधानतः।
आचार्यं संश्रयेत् पूर्वं महाभागवतं द्विजः॥
आचार्यो विष्णुमभ्यर्च्य पवित्रं चापि पूजयेत्।
पुरतो वासुदेवस्य इध्माधानान्तमाचरेत्॥
प्रजपेत् अस्य सूक्तेन पवित्रन्तेवतेत्यृचा।
पवमानस्य आद्येन ऋग्भिश्चतसृभिः क्रमात्॥
आज्यं हुत्वा ततश्चक्रं तदग्नौ प्रतपेद्गुरुः।
चरणं पवित्रमिति यजुषा तच्चक्रमाङ्कयेद्भुजम्॥
वामां सम्प्रतपेत्पश्चात्शङ्ख जन्येन देशिकः॥
अग्निर्मन्वेति यजुषा तद्धोमाग्नौ प्रतपत्रवै।
ततस्तु पार्थिवे ऋग्भिर्हुत्वा पुण्ड्राणि धारयेत्॥
अतो देवेति सूक्तेन विष्णोर्नुकमणेन च।
पूजयेद्द्वादशभिर्वै केशवादीननुक्रमात्॥
कुशग्रन्थिषु संपूज्य जुहुयात्ताभिरेव तु।
हुत्वाथ चरुणा सम्यक् मृदा शुभ्रेण देशिकः॥
ललाटादिषु चाङ्गेषु ऋग्भिस्ताभिः क्रमेण वै।
नामभिः केशवाद्यैश्च सच्छिद्राण्येव धारयेत्॥
श्रिये जात इति ऋचा कुङ्कुमङ्गेषु धारयेत्।
परोमात्रेति सूक्तेन उपस्थाय जनार्दनम्॥
होमशेषं समाप्याथ मूल्यं दापनमाचरेत्।

एवं पुण्ड्रक्रियां कृत्वा नाम दद्यात्ततः परम् ॥
प्रदः प्रानामितिसूक्तेन नाममूर्त्तिं समर्चयेत् ।
गवाज्यं प्रत्यृचं हुत्वा नाम दद्याच्च वैष्णवः ॥
अभिप्रियाणीति सूक्तेन उपस्थाय जनार्दनम् ।
प्रदक्षिण नमस्कारौ कृत्वा शेषं समाचरेत् ॥
मन्त्रदीक्षा विधानन्तु श्रौतं मुनिभिरीरितम् ।
नैवाहिता भवेद्दीक्षा न पृथक्तेन वक्ष्यते ॥
अदीक्षितो भवेद्यस्तु मन्त्रं वैष्णवमुत्तमम् ।
अर्चनं वापि कुरुते न संसिद्धिमवाप्नुयात् ॥
नादीक्षितः प्रकुर्वीत विष्णोराराधनक्रियाम् ।
श्रौतं वा यदि वा स्मार्त्तं दिव्यागममथापि वा ॥
तस्मादुक्तप्रकारेण दीक्षितो हरिमर्चयेत् ।
पूर्वह्न्युपोष्य गुरुणा नद्यां स्नात्वा कृतक्रियः ॥
आचार्यः पूजयेद्विष्णुं गन्धपुष्पाक्षतादिभिः ।
ईशान्यादि चतुर्दिक्षु संस्थाप्य कलशान् शुभान् ॥
तेषु रत्नानि निक्षिप्य चतुर्मूर्त्तीन् समर्चयेत् ।
वाराहं नारसिंहञ्च वामनं कृष्णमेव च ॥
तद्विष्णोरिति च द्वाभ्यां वाराहं पूजयेत्ततः ।
प्रतद्विष्णु इति ऋचा नारसिंहमनामयम् ॥
न ते विष्णो रित्यनेन वामनं पूजयेत्तथा ।
वषट्तेविष्णव इति कृष्णं संपूजयेत् द्विजः ॥
संपूज्यावरणं सर्वं गन्धपुष्पैर्विधानतः ।
प्रतिष्ठाप्य ततो वह्निमिध्माधानान्तमाचरेत् ।
चतुर्भिर्वैष्णवैः सूक्तैः पायसं मधुमिश्रितम् ॥

हुत्वाज्यं जुहुयात्पश्चाच्छ्रीसूक्तेन समाहितः ।
अग्निमीड इत्यनुवाकेन सावित्र्या वैष्णवेन च ॥
सर्वैश्च वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम् ।
हुत्वा वेदसमाप्तिञ्च जुहुयाद्देशिकोत्तमः ॥
ततो भद्रासने शिष्यमुपविश्याभिषेचयेत् ।
चतुर्भिर्वैष्णवैर्मन्त्रैः सूक्तैस्तत्कलशोदकैः ॥
ऋत्विग्भिर्ब्राह्मणैः शिष्यमभिषिच्याथ देशिकः ।
कौपीनं कटिसूत्रञ्च तथा वस्त्रञ्च धारयेत् ॥
ऊर्ध्वपुण्ड्राणि पश्चाच्च तुलसीमालिकेऽपि च ।
कुशोत्तरे समासीनमाचान्तं विनयान्वितम् ॥
अध्यापयेद्वैष्णवानि सूक्तानि विमलानि च ।
व्यापकान् वैष्णवान् मन्त्रानन्यांश्चापि विधानतः ॥
तदर्थन्यासमुद्रादि सर्षिश्छन्दोऽधिदैवतम् ।
तस्मिन्निवेश्य सद्वृत्तौ शासयेच्छासनाच्छ्रुतेः ॥
शासितो गुरुणा शिष्यः सद्वृत्तौ सत्पथे स्थितः ।
अर्चयेत्परमैकान्त्य सिद्धये हरिमव्ययम् ॥
आचार्य्यात्समनु प्राप्तं विग्रहं सुमनोहरम् ।
लब्ध्वाथ विधिना विष्णोः पूजयेत्तदनुज्ञया ॥
पूर्वेऽह्नि पूर्ववत्पूज्यःश्रौतैनैवोपचारकैः ।
ताभिरेव च हुत्वाथ ऋग्भिराज्यं तथाक्रमात् ॥
शय्यासूक्तान्तमाज्येन हुत्वाग्निं वैष्णवत्तमः ।
अध्यापयित्वा तान् मन्त्रान् वैदिकान् वैदिकोत्तमः ॥
पूजाविधानं विविधं तस्मै होमान्तमाविशेत् ।
स्नान तर्पण होमार्चा जप्याद्या विविधाः क्रियाः ॥

वैशिष्येण गुरोर्ज्ञात्वा शक्त्या सर्वं समाचरेत् ।
परमापद्गतो वापि न भुञ्जीत हरेर्दिने ॥
न तिर्यग्धारयेत्पुण्ड्रं नान्यं देवं प्रपूजयेत् ।
वैष्णवः पुरुषो यस्तु शिव ब्रह्मादिदैवतान् ॥
प्रणमितार्चयेद्वापि विष्ठायां जायते क्रिमिः ।
रजस्तमोऽभिभूतानां देवतानां निरीक्षणात् ॥
पूजनाद्वन्दनाद्वापि वैष्णवो यात्यधोगतिम् ।
शुद्धसत्वमयो विष्णुः पूजनीयो जगत्पतिः ॥
अनर्चनीया रुद्राद्याः विष्णोरावरणं विना ।
यस्तु स्वात्मेश्वरं विष्णुमतीत्यान्यं यजेत हि ॥
स्वात्मेश्वराय हरये च्यवते नात्रसंशयः ।
यज्ञाध्ययनकाले तु नमस्यानि वषट्कृता ॥
तानि वै यज्ञयान्यत्र यज्ञो वै विष्णुरव्ययः ।
तस्यैवावरणं प्रोक्तं यज्ञाद्ययनकर्म्मसु ॥
स्तुवन्ति वेदास्तस्यात्र गुणरूपविभूतयः ।
तस्मादावरणं हित्वा ये यजन्ति परान् सुरान् ॥
ते यान्ति निरयं घोरं कल्पकोटिशतानि वै ।
रुद्रः काली गणेशश्च कूष्माण्डा भैरवादयः ॥
मद्यमांसाशिनश्चान्ये तामसाः परिकीर्त्तिताः ।
शुद्धानामपि देवानां या स्वतन्त्रार्चनक्रिया ॥
सा दुर्गतिं नयत्येव वैष्णवं वित्तकल्मषम् ।
अर्चयित्वा जगन्नाथं वैष्णवः पुरुषोत्तमम् ॥
तदावरणरूपेण यजेद्देवान् समन्ततः ।
अन्यथा नरकं याति यावदाभूतसंप्लवम् ॥

वासुदेवं जगन्नाथमर्चयित्वैव मानवः ।
प्राप्नोति महदैश्वर्यं ब्रह्मेन्द्रत्वादिकं क्षणात् ॥
मनसापि जलेनापि जगन्नाथं जनार्दनम् ।
सम्प्राप्नोत्यमलां सिद्धिं जगत्सर्वं समर्च्चितम् ॥
हृषीकेशं त्रयीनाथं लक्ष्मीशं सर्वदं हरिम् ।
तं विना पुण्डरीकाक्षं कोऽर्चयेदितरान् सुरान् ॥
नारायणं परित्यज्य योऽन्यं देवमुपासते ।
स्व पतिं नृपतिं हित्वा यथा स्त्री पुरुषाधमम् ॥
विष्णोर्निवेदितं हव्यं देवेभ्यो जुहुयात् तथा ।
पितृभ्यश्चैव तद्दद्यात्सर्वमानन्त्यमश्नुते ॥
निर्माल्यमितरेषां तु यदन्नाद्यन्दिवौकसाम् ।
उपभुज्य नरो याति ब्रह्महत्यां न संशयः ॥
नैवेद्य भोजनं विष्णो स्तत्पादाम्बु निषेवणम् ।
तुलसी खादनं नृणां पापिनामपिमुक्तिदम् ॥
एकादश्युपवासश्च शङ्खचक्रादिधारणम् ।
तुलस्या पूजनं विष्णो स्त्रितयं वैष्णवं स्मृतम् ॥
अवैष्णवः श्लाघ्यो विप्रो बहुशास्त्रश्रुतोऽपि वा ।
सजीवन्नेव चण्डालो मृतः श्वासोऽभिजायते ॥
क्रतुसाहस्रिणं वापि लोके विप्रमवैष्णवम् ।
चण्डालमिव नेक्षेत वर्जयेत्सर्वकर्म्मसु ॥
भगवद्भक्तिदीप्ताग्नि दग्धदुर्जातिकल्मषः ।
चण्डालोऽपि बुधैः श्लाघ्यो नतु पूज्यो ह्य वैष्णवः ॥
शङ्खचक्रोर्ध्वपुण्ड्रादिरहितं ब्राह्मणाधमम् ।
पूजयिष्यति यः श्राद्धे सर्वकर्मास्य निष्फलम् ॥

तिर्यक्पुण्ड्रधरं विप्रं यः श्राद्धे भोजयिष्यति।
पितरस्तस्य यान्त्येव कालसूत्रं सुदारुणम्॥
ऊर्ध्वपुण्ड्रधरं विप्रं चक्राङ्कितभुजं तथा।
पूजयिष्यति यः श्राद्धे गयाश्राद्धायुतं लभेत्॥
शङ्खचक्रोर्ध्वपुण्ड्राद्यैरन्वितं वैष्णवं द्विजम्।
भक्त्या सम्पूजयेद्यस्तु दैवे पित्र्ये च कर्म्मणि॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
यास्यन्ति पितरस्तस्य विष्णुलोकं सुनिर्मलम्॥
ऊर्ध्वपुण्ड्रधरं विप्रं तप्तचक्राङ्कितांसकम्।
श्राद्धे सम्पूजयेद्यस्तु गयाश्राद्धायुतं लभेत्॥
तप्तचक्रेण विधिना बाहुमूलेन लाञ्छितः।
पुनाति सकलं लोकं नारायण इवाघभित्॥
अविद्यो वा सविद्यो वा शङ्खचक्रोर्ध्वपुण्ड्रधृत्।
ब्राह्मणः सर्वलोकेषु पूज्यमानो हरिर्यथा॥
दुराशी वा दुराचारी शङ्खचक्रोर्ध्वपुण्ड्रधृत्।
नृणां हन्ति समस्ताघं तमः सूर्योदये यथा॥
चक्राङ्कितस्य विप्रस्य पादप्रक्षालितं जलम्।
पुनाति सकलं लोकं यथा त्रिपथगानदी॥
तिस्रः कोटार्द्धकोटी च तीर्थानि भुवनत्रये।
चक्राङ्कितस्य विप्रस्य पादे तिष्ठन्त्यसंशयः॥
चक्राङ्कितस्य विप्रस्य पादप्रक्षालितं जलम्।
पीत्वा पातकसाहस्रैर्मुच्यते नात्र संशयः॥
श्राद्धे दाने व्रते यज्ञे विवाहे चोपनायने।
चक्राङ्कितं विप्रमेव पूजयेदितरांस्तु॥

विष्णुचक्राङ्कितो विप्रो भुञ्जानोऽपि यतस्ततः।
न लिप्यते न पापेन तमसेव प्रभाकरः॥
चक्राङ्कित भुजो विप्रः पङ्क्ति मध्ये तु भुञ्जते।
पुनाति सकलां पङ्क्तिं गङ्गे वेतरवाहिनीम्॥
चक्राङ्कित भुजं विप्रं यो भूम्यामभिवादयेत्।
ललाटे पांशु संख्यानि विष्णुलोके महीयते॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा वैष्णवः पुमान्।
अर्चयित्वेतरान् देवान् निरयं यान्त्य संशयम्॥
विष्णो रावरणं हित्वा पूजयित्वेतरान् सुरान्।
वैष्णवः पुरुषो याति कालसूत्रमधोमुखः॥
महापापी महापापैरन्वितो यदि वैष्णवः।
मन्वादि धर्म्मशास्त्रोक्तं प्रायश्चित्तं समाचरेत्॥
प्रायश्चित्त विशेषं तु पश्चात् कुर्व्वीत वैष्णवः।
वैयासिकीं वैष्णवीं च पवित्रीश्च समाचरेत्॥
वैष्णवानान्तु विप्राणां पश्चात्पादजलं पिबेत्।
हृत्तौ न परिपूर्णोऽथ कर्म्मस्वधिकृतो भवेत्॥
मन्त्ररत्नार्थं विच्छान्तो नतेज्यो कर्म्मसंयुतः।
द्वादशी नियतो विप्रः स एव पुरुषोत्तमः॥
किमत्र बहुनोक्तेन सारं वक्ष्यामि ते नृप!।
एकादश्युपवासश्च शङ्खचक्रादिधारणम्॥
तदीयानां पूजनञ्च वैष्णवं त्रितयं स्मृतम्।
पुण्याद्विष्णु दिनादन्यन्नोपोष्यं वैष्णवैः सदा॥
तथा भागवतादन्यो नार्चनीयो हि कुत्रचित्।
भगवन्तमनुद्दिश्य न दद्या न यजेत् क्वचित्॥

नावैष्णवान्न भुञ्जीत दद्यान्ना वैष्णवाय च।
नार्चयेदितरान् देवान्न तिर्य्यग्धारयेत्तथा॥
एकादशान्न भुञ्जीत वसेन्ना वैष्णवैः सह।
अष्टाक्षरस्य जप्तारं शङ्खचक्रधरं द्विजः॥
अवमत्य विमूढात्मा सद्यश्चण्डालतां व्रजेत्।
वैष्णवं ब्राह्मणं गाञ्च तुलसी द्वादशीं तथा॥
अनर्चयित्वा मूढात्मा निरयं दुर्गतिं व्रजेत्।
विष्णोः प्रधानतनवो विप्रा गावश्च वैष्णवाः॥
भक्त्या संपूज्य तानेव याति विष्णोः परम्पदम्।
एकादश्युपवासश्च द्वादश्यां विप्र पूजनम्॥
नित्यमामलक स्नानं पापिनामपि मुक्तिदम्।
पक्षे पक्षे हरि दिने चक्राङ्कित भुजे नृप!॥
संपूज्यमाने विप्रेन्द्रे हरिस्तेषां प्रसीदति।
अभावे वैष्णवे विप्रे संप्राप्ते हरि वासरे॥
तद्वत्सम्पूजयेद् गावं तुलसीं वापि वैष्णवः।
अग्निहोत्रन्तु जुहुयात्सायं प्रातर्द्विजोत्तमः॥
पञ्चयज्ञांश्च कुर्व्वीत वैष्णवान् विष्णुमर्चयेत्।
तदर्पितं वै भुञ्जीत पिवेत्तत्पादवारि वै॥
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।
पूजयेद्वैष्णवं विप्रं द्वादश्यामपि वैष्णवः॥
विष्णोः प्रसाद तुलसीं तीर्थं वापि द्विजोत्तमः।
उपवासदिने वापि प्राशयेदविचारयन्॥
उपवासदिने यस्तु तीर्थं वा तुलसीदलम्॥
न प्राशयेद्विमूढात्मा रौरवं नरकं व्रजेत्।

हर्य्यर्पितन्तु यच्चान्नं तीर्थं वा पितृकर्म्मणि ॥
दद्यात् पितृणां यद्गच्च्यं गयाश्राद्धायुतं लभेत्।
हरेर्निवेदितं भक्त्या यो दद्याच्छ्राद्धकर्म्मणि ॥
पितरस्तस्य यान्त्येव तद्विष्णोः परमं पदम्।
तीर्थं वा तुलसीपत्रं यो दद्यात्पितृदैवतम् ॥
आकल्पकोटि पितरः परितृप्ता नसंशयः।
यः श्राद्धकाले मूढात्मा पितृणाञ्च दिवौकसाम् ॥
न ददाति हरेर्मुक्तं तस्य वै नारकी गतिः।
हर्य्यर्पितन्तु यच्चान्नं यच्च पादोदकं हरेः ॥
तुलसीं वा पितृणाञ्च दत्त्वा श्राद्धायुतं लभेत्।
सर्व्वं यज्ञमयं विष्णुं मत्वा देवं जनार्दनम्।
आमन्त्र्य वैष्णवान् विप्रान् कुर्य्याच्छ्राद्धमतन्द्रितः ॥
प्रत्यब्दं पार्व्वणश्राद्धं कुर्य्यात्पित्रोर्मृतेऽहनि।
अन्यथा वैष्णवो याति ब्रह्महत्यां न संशयः ॥
अमायां कृष्णपक्षे च पित्रे वाभ्युदये तथा।
कुर्य्यात् श्राद्धं विधानेन विष्णोराज्ञा मनुस्मरन् ॥
न कुर्य्यात् यो विधानेन पितृयज्ञं नराधमः ॥
आज्ञातिक्रमणाद्विष्णोः पतत्येव न संशयः।
शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः ॥
अन्वितान् ब्राह्मणानेव पूजयेत्सर्व्वकर्म्मसु।
अश्राद्धिनोऽप्ययज्ञस्य कर्मत्यागिन एव च ॥
वेदस्याप्यनधीतस्य संसर्गं दूरतस्त्यजेत्।
पित्रोः श्राद्धं प्रकुर्व्वीत नैकादश्यां द्विजोत्तमः ॥
द्वादश्यान्तत्प्रकुर्व्वीत नोपवास दिने क्वचित्।

विष्णोर्जन्मदिने वापि गुरूणाञ्च मृतेऽहनि ॥
वैष्णवेष्टिं प्रकुर्व्वीत वैदिकं वैष्णवोत्तमः ।
अगम्यागमनं हिंसा मभक्ष्याणाञ्च भक्षणम् ॥
असत्य कथनं स्तेयं मनसापि विवर्जयेत् ।
तप्तचक्राङ्कनं विष्णोरेकादश्यामुपोषणम् ॥
धृतोर्ध्वं पुण्ड्रदेहत्वं तन्मन्त्राणां परिग्रहः ।
नित्यमामलकस्नानं देवतान्तरवर्जनम् ।
ध्यानं मन्त्रं जपो होमस्तुलस्याः पूजनं हरेः ॥
प्रसादस्तीर्थसेवा च तदीयानाञ्च पूजनम् ।
उपायान्तरसन्त्यागस्तथा मन्त्रार्थ चिन्तनम् ॥
श्रवणं कीर्त्तनं सेवा सत्कृत्यकरणं तथा ।
असत्कृत्य परित्यागो विषयान्तरवर्जनम् ॥
दानं दम स्तपः शौचं आर्जवं चान्तिरेव च ।
आनृशंस्यं सतांसङ्गः पारमैकान्त्यहेतवः ॥
वैष्णवः परमैकान्ती नेतरो वैष्णवः स्मृतः ।
नावैष्णवो व्रजेन्मुक्तिं बहुशास्त्र श्रुतोऽपि वा ॥
वैष्णवो वर्णवाह्योऽपि याति विष्णोः परं पदम् ।
एतत्ते कथितं राजन् ! पारमैकान्त्यसिद्धिदम् ॥
वैशिष्ट्यं वैष्णवं धर्मशास्त्रं वेदोपवृंहितम् ।
विष्वक्सेनाय धात्रे च सम्प्रोक्तं परमात्मना ॥
विष्वक्सेनाय सम्प्रोक्तमेतद्विखनसे पुरा ।
भृगोः प्रोक्तं विखनसा भृगुणा च महर्षिणा ॥
भृगुणा च मनोः प्रोक्तं मनुना च समेरितम् ।
मनुस्तु धर्मशास्त्रन्तु सामान्येनोक्तवान् स्वयम् ॥

तदेव हि मया राजन् ! वैशिष्ठेण तवेरितम् ।
विशिष्टं परमं धर्मशास्त्रं वैष्णवमुत्तमम् ॥
य इदं शृणुयाद्भक्त्या कथयेद्वा समाहितः ।
पारमैकान्त्य संसिद्धिं प्राप्नोत्येव न संशयः ॥
सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम् ।
यस्त्विदं शृणुयाद्भक्त्या नित्यं विष्णोश्च सन्निधौ ॥
अश्वमेधसहस्रस्य फलं प्राप्नोत्यसंशयः ।
हारीतमेतच्छास्त्रन्तु परमां धर्म्मसंहिताम् ॥
आलोक्य पूजयन् विष्णुं पारमैकान्त्यमश्नुते ।
एतच्छ्रुत्वाम्बरीषस्तु हारीतोक्तिं नृपोत्तमः ॥
ववन्दे परया भक्त्या तमृषिं वैष्णवोत्तमः ।
त्वमेव परमोधर्म्मस्त्वमेव परमं तपः ॥
त्वदङ्घ्रि युगलं प्राप्य सर्वसिद्धिमवाप्नुयाम् ।
महामुनिमिति स्तुत्वा राजर्षिः स महातपाः ॥
प्राप्तवान् परमैकान्त्यं तत्प्रसादात्सुसिद्धिदम् ।
वैशिष्ठ्यं पारमैकान्त्यं एतच्छास्त्रं समाव्यय ॥
भारद्वाजादयः सर्वे नृपाश्च जनकादयः ।
योगिनः सनकाद्याश्च नारदाद्याः सुरर्षयः ॥
वसिष्ठाद्या वैष्णवाश्च विष्वक् सेनादयः सुराः ।
एतच्छास्त्रानुसारेण पूजयामासुरच्युतम् ॥
परमं वैदिकं शास्त्रमेतद्वैष्णवमुत्तमम् ।
ज्ञात्वैव परमैकान्ती पूजयेद्विष्णुमीश्वरम् ॥

इति हारीतस्मृतौ विशिष्टधर्म्मशास्त्रे हत्यधिको नाम
अष्टमोऽध्यायः ॥

श्रीश्री गणेशाय नमः ॥

योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः ॥ १ ॥
मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन् ।
यस्मिन् देशे मृगः कृष्ण स्तस्मिन् धर्म्मान्निबोधत ॥ २॥
पुराणन्यायमीमांसा धर्म्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्द्दश ॥ ३ ॥
मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः ।
यमापस्तम्बसम्वर्त्ताः कात्यायन बृहस्पती ॥ ४ ॥
पराशरव्यासशङ्खलिखिता दक्षगोतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्र प्रयोजकाः ॥ ५ ॥
देशकाल उपायेन द्रव्यं श्रद्धा समन्वितम् ।
पात्रे प्रदीयते यत्तत् सकलं धर्म्मलक्षणम ॥ ६ ॥
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्म्ममूलमिदं स्मृतम ॥ ७ ॥
इज्याचारदमा हिंसादानं स्वाध्यायकर्म्म च ।
अयन्तु परमो धर्म्मोयद्‌योगेनात्मदर्शनम् ॥ ८ ॥
चत्वारो वेदधर्म्मज्ञाः पर्षत्त्रै विद्यमेव वा ।
सा ब्रूते यं स धर्म्मः स्यादेको वाध्यात्मवित्तमः ॥ ९ ॥
ब्रह्म क्षत्रियविट् शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ।
निषेकादि श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ॥१०।

गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥ ११ ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम् ॥१२॥
एवमेनः शमं याति वीजगर्भसमुद्भवम्।
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ॥१३॥
गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।
राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥ १४ ॥
उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम्।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥ १५ ॥
दिवा सन्ध्यासु कर्णस्थ ब्रह्मसूत्र उदङ्मुखः।
कुर्य्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥ १६ ॥
गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्ज्जलैः।
गन्धलेपक्षयकरं कुर्य्याच्छौचमतन्द्रितः ॥ १७ ॥
अन्तर्जानुः शुचौ देश उपविष्ट उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥१८॥
कनिष्ठादेशिन्यङ्गुष्ठमूल्यान्यग्रं करस्य च।
प्रजापति पितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ १९ ॥
त्रिःप्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्।
अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनवुद्वुदैः ॥ २० ॥
हृत्कण्ठतालुगाभिस्तु यथा संख्यं द्विजातयः।
शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥ २१ ॥
स्नानमब्दैवतैर्मन्त्रैर्मार्ज्जनं प्राणसंयमः।
सूर्य्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ॥ २२ ॥

गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम्।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः॥ २३॥
प्राणानायम्य सम्प्रोक्ष्य तृचेनाब्दैवतेन तु।
जपन्नासीत सावित्रीं प्रत्यगातारकोदयात्॥ २४॥
सन्ध्यां प्राक्प्रातरेवेह तिष्ठेदासूर्य्यदर्शनात्॥
अग्निकार्य्यं ततः कुर्य्यात् सन्ध्ययोरुभयोरपि॥ २५॥
ततोऽभिवादयेद्वृद्धानसावहमितिब्रुवन्।
गुरुञ्चैवाप्युपासीत स्वाध्यायार्थं समाहितः॥२६॥
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत्।
हितं चास्याचरेन्नित्यं मनोवाक्कायकर्म्मभिः॥२७॥
कृतज्ञाद्रोहिमेधाविशुचिकल्याणसूचकाः।
अध्याप्या धर्म्मतः साधुशक्ताप्तज्ञानवित्तदाः॥२८॥
दण्डाजिनोपवीतानि मेखलाञ्चैव धारयेत्।
ब्राह्मणेषु चरेद्भैक्षमनिन्द्येष्वात्मवृत्तये॥ २९॥
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता।
ब्राह्मणक्षत्रियविशां भैक्षचर्य्या यथाक्रमम्॥ ३०॥
कृताग्निकार्य्योभुञ्जीत वाग्यतोगुर्व्वनुज्ञया।
आपोशानक्रिया पूर्व्वं सत्कृत्यान्नमकुत्सयन्॥ ३१॥
ब्रह्मचर्य्ये स्थितोनैकमन्नमद्यादनापदि।
ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीड़यन्॥ ३२॥
मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्।
भास्करालोकनाश्लीलपरिवादांश्च वर्जयेत्॥ ३३॥
स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति।
उपनीय ददद्वेदमाचार्य्यः स उदाहृतः॥ ३४॥

एकदेशमुपाध्यायऋत्विग्यज्ञकृदुच्यते ।
एते मान्या यथापूर्व्वमेभ्योमाता गरीयसी ॥ ३५ ॥
प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि पञ्च वा ।
ग्रहणान्तिकमित्येके केशान्तश्चैव षोड़शे ॥ ३६ ॥
आ षोड़शाब्दाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ।
ब्रह्मक्षत्रविशां कालऔपनायनिकः परः ॥ ३७ ॥
अत ऊर्द्धं पतन्त्येते सर्व्वधर्म्म वहिष्कृताः ।
सावित्री पतिता व्रात्याव्रात्यस्तोमादृते क्रतोः ॥ ३८॥
मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥ ३९ ॥
यज्ञानां तपसाञ्चैव शुभानां चैव कर्म्मणाम् ।
वेदएव द्विजातीनां निःश्रेयसकरः परः ॥ ४० ॥
मधुना पयसा चैव स देवां स्तर्पयेद्द्विजः ।
पितृंश्च मधुसर्पिर्भ्यामृचोऽधीते तु योऽन्वहम् ॥ ४१ ॥
यजूंषि शक्तितोऽधीते योऽन्वहं स घृतामृतैः ।
प्रीणाति देवानाज्येन मधुना च पितृंस्तथा ॥ ४२ ॥
स तु सोमघृतैर्देवां स्तर्पयेद्योऽन्वहं पठेत् ।
सामानि तृप्तिं कुर्य्याच्च पितॄणां मधुसर्पिषा ॥ ४३॥
मेदसा तर्पयेद्देवानथर्व्वाङ्गिरसः पठन् ।
पितृंश्च मधुसर्पिर्भ्यामन्वहं शक्तितोद्विजः ॥ ४४ ॥
वाकोवाक्यं पुराणञ्च नाराशंसीश्च गाथिकाः ।
इतिहासां स्तथा विद्यां योऽधीते शक्तितोऽन्वहम् ।४५।
मांसक्षीरौदनमधुतर्पणं स दिवौकसाम् ।
करोति तृप्तिञ्च तथा पितॄणां मधुसर्पिषा ॥ ४६ ॥

ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः ।
यं यं क्रतुमधीयेत तस्य तस्याप्नुयात् फलम् ॥ ४७ ॥
त्रिर्वित्तपूर्णं पृथिवीदानस्य फलमश्नुते ।
तपसश्च परस्येह नित्यं स्वाध्यायवान् द्विजः ॥ ४८ ॥
नैष्ठिको ब्रह्मचारी तु वसेदाचार्य्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥ ४९ ॥
अनेन विधिना देहं साधयन् विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति नचेह जायते पुनः ॥ ५० ॥
गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया ।
वेदं व्रतानि वापारं नीत्वाप्युभयमेव वा ॥ ५१ ॥
अविप्लुत ब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवयसीम् ॥ ५२ ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा ॥ ५३ ॥
दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात् ।
स्फीतादपि न सञ्चारिरोगदोष समन्वितात् ॥ ५४ ॥
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियोवरः ।
यत्नात् परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ॥ ५५ ॥
यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥ ५६ ॥
तिस्रोवर्णानुपूर्व्वेण द्वे तथैका यथाक्रमम् ।
ब्राह्मण क्षत्त्रिय विशां भार्य्याः स्वा शूद्रजन्मनः ॥ ५७ ॥
ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥ ५८ ॥

यज्ञस्थायर्त्विजे दैवश्चादायार्षस्तु गोद्वयम् ।
चतुर्द्दश प्रथमजः पुनात्युत्तरजश्च षट् ॥ ५८ ॥
इत्युक्ता चरतां धर्म्मं सह या दीयतेऽर्थिने ।
स कायः पावयेत्तज्जः षट्षड्वंश्यान् सहात्मना ॥६०॥
आसुरोद्रविणादानाद्गान्धर्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात् ॥६१॥
पाणिर्ग्राह्यः सवर्णासु गृह्णीयात् क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदनेत्वग्रजन्मनः ॥ ६२ ॥
पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥ ६३ ॥
अप्रयच्छन् समाप्नोति भ्रूणहत्या ऋतावृतौ ।
गम्यन्त्वभावे दातॄणां कन्या कुर्य्यात् स्वयम्वरम् ॥ ६४॥
सकृत् प्रदीयते कन्या हरं स्तां चौरदण्डभाक् ।
दत्तामपि हरेत् पूर्व्वाच्छ्रेयांश्चेद्वर आव्रजेत् ॥ ६५ ॥
अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् ।
अदुष्टाञ्च त्यजन् कन्यां दूषयंश्च मृषाशतम् ॥ ६६ ॥
अक्षता वा क्षता चैव पुनर्भूः संस्कृता पुनः ।
स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ॥६७॥
अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥६८॥
आगर्भ सम्भवाद्गच्छेत् पतितस्त्वन्यथा भवेत् ।
अनेन विधिना जातः क्षेत्रजः स भवेत् सुतः ॥ ६९ ॥
हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥ ७० ॥

सोमः शौचं ददौ तासां गन्धर्वाश्च शुभां गिरम् ।
पावकः सर्वमेध्यत्वं मेध्यावै योषितोह्यतः ॥ ७१ ॥
व्यभिचाराहतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्तृवधादौ च तथा महति पातके ॥ ७२ ॥
सुरापी व्याधिता धूर्त्ता वन्ध्यार्थघ्न्यप्रियम्वदा ।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ ७३ ॥
अधिविन्ना तु भर्त्तव्या महदेनोऽन्यथा भवेत् ।
यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते ॥ ७४ ॥
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ।
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह ॥ ७५ ॥
आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ॥ ७६ ॥
स्त्रीभिर्भर्तृवचः कार्य्यमेषधर्म्मः परः स्त्रियाः ।
आशुद्धेः संप्रतीक्ष्योहि महापातकदूषितः ॥ ७७ ॥
लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः ।
यस्मात्तस्मात् स्त्रियः सेव्या भर्त्तव्याश्च सुरक्षिताः ॥ ७८ ॥
षोड़शर्त्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् ।
ब्रह्मचार्य्येव पर्व्वाण्याद्याश्चतस्रस्तु वर्जयेत् ॥ ७९ ॥
एवं गच्छन् स्त्रियं क्षामां मघां मूलञ्च वर्जयेत् ।
शस्तइन्दौ सकृत् पुत्रं लक्षण्यं जनयेत् पुमान् ॥ ८० ॥
यथा कामी भवेद्वापि स्त्रीणां वरमनुस्मरन् ।
स्वदारनिरतश्चैव स्त्रियोरक्ष्या यतः स्मृताः ॥ ८१ ॥
भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्याभूषणाच्छादनाशनैः ॥ ८२ ॥

संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी।
कुर्य्याच्छ्वशुरयोः पादवन्दनं भर्त्तृतत्परा॥ ८३॥
क्रीड़ां शरीरसंस्कारं समाजोत्सवदर्शनम्।
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्त्तृका॥ ८४॥
रक्षेत् कन्यां पिता विन्नां पतिः पुत्त्रास्तु वार्द्धके।
अभावे ज्ञातयस्तेषां स्वातन्त्र्यं न क्वचित् स्त्रियाः॥८५
पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः।
हीना न स्याद्विना भर्त्त्रा गर्हणीयान्यथा भवेत्॥८६॥
पतिप्रियहिते युक्ता स्वाचारा संजतेन्द्रिया।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुपमं सुखम्॥ ८७॥
सत्यामन्यां सवर्णायां धर्म्मकार्य्यं न कारयेत्।
सवर्णासु विधौ धर्म्मे ज्येष्ठया न विनेतराः॥ ८८॥
दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः।
आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन्॥ ८९॥
सवर्णेभ्यः सवर्णासु जायन्ते वै सजातयः।
अनिन्द्येषु विवाहेषु पुत्त्राः सन्तानवर्द्धनाः॥ ९०॥
विप्रान्मूर्द्धाभिषिक्तोहि क्षत्रियायां विशः स्त्रियाम्।
अम्बष्ठः शूद्र्यां निषादोजातः पारशवोऽपिवा॥ ९१॥
वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ।
वैश्यात्तु करणः शूद्र्यां विन्नास्वेषविधिः स्मृतः॥९२॥
ब्राह्मण्यां क्षत्रियात् सूतोवैश्याद्वैदेहकस्तथा।
शूद्राज्जातस्तु चाण्डालः सर्वधर्म्मवहिष्कृतः॥ ९३॥
क्षत्रिया मागधं वैश्याच्छूद्रात् क्षत्तारमेव तु।
शूद्रादायोगवं वैश्या जनयामास वै सुतम्॥ ९४॥

माहिष्येण करण्यान्तु रथकारः प्रजायते।
असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः॥ ९५॥
जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपिवा।
व्यत्यये कर्म्मणां साम्यं पूर्ववच्चोत्तराधरम्॥ ९६॥
कर्म्म स्मार्त्तं विवाहाग्नौ कुर्व्वीत प्रत्यहं गृही।
दायकालहृतेनापि श्रौतं वैतानिकाग्निषु॥ ९७॥
शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः।
प्रातःसन्ध्यामुपासीत दन्तधावनपूर्व्वकम्॥ ९८॥
हुत्वाग्नीन् सूर्य्यदैवत्यान् जपेन्मन्त्रान् समाहितः।
वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च॥ ९९॥
उपेयादीश्वरञ्चैव योगक्षेमार्थसिद्धये।
स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्च्चयेत्तथा॥ १००॥
वेदाथर्व्वपुराणानि सेतिहासानि शक्तितः।
जपयज्ञप्रसिद्ध्यर्थं विद्याञ्चाध्यात्मिकीं जपेत्॥ १०१॥
वलिकर्म्मस्वधाहोमस्वाध्यायातिथिसत्क्रिया।
भूतपितृमरब्रह्ममनुष्याणां महामखाः॥ १०२॥
देवेभ्यश्च हुतादन्नाच्छेषाद्भूत वलिं हरेत्।
अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निःक्षिपेत्॥१०३॥
अन्नं पितृमनुष्येभ्योदेयमप्यन्वहं जलम्।
स्वाध्यायमन्वहं कुर्य्यात् न पचेदन्नमात्मने॥ १०४॥
बालं सुवासिनी वृद्ध गर्भिण्या तुरकन्यकाः।
सम्भोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम्॥१०५॥
आपोशानेनो परिष्टादधस्तादश्नता तथा।
अनग्नममृतञ्चैव कार्य्यमन्नं द्विजन्मना॥ १०६॥

अतिथित्वेन वर्णेभ्यो देयं शक्त्यानुपूर्वशः।
अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः ॥१०७॥
सत्कृत्य भिक्षवे भिक्षा दातव्या स व्रताय च।
भोजयेच्चागतान् काले सखिसम्बन्धिबान्धवान् ॥१०८॥
महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्।
सत्क्रियाऽऽसनं स्वादु भोजनं सूनृतं वचः ॥ १०९॥
प्रतिसम्वत्सरं त्वर्घ्याः स्नातकाचार्य्यपार्थिवाः।
प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः ॥ ११० ॥
अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः।
मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः ॥ १११ ॥
परपाकरुचिर्न स्यादनिन्द्या मन्त्रणादृते।
वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् ॥ ११२॥
अतिथिं श्रोत्रियं तृप्तमासीमान्त मनुव्रजेत्।
अहःशेषं सहासीत शिष्टैरिष्टैश्च बन्धुभिः ॥ ११३ ॥
उपास्य पश्चिमां सन्ध्यां हुत्वाग्नीं स्तानुपास्य च।
भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत् ॥११४॥
ब्राह्मे मुहूर्त्ते उत्थाय चिन्तयेदात्मनोहितम्।
धर्म्मार्थकामान् स्वे काले यथाशक्ति न हापयेत्॥ ११५॥
विद्याकर्म्मवयोबन्धुवित्तैर्मान्या यथाक्रमम्।
एतैः प्रभूतैः शूद्रोऽपि वार्द्धके मानमर्हति ॥ ११६ ॥
वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम्।
पन्थादेयोनृपस्तेषां मान्यः स्नातश्च भूपतेः ॥११७ ॥
इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च।
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा ॥ ११८ ॥

प्रधानं क्षत्रिये कर्म्म प्रजानां परिपालनम् ।
कुसीदकृषिवाणिज्यं पाशुपाल्यं विशः स्मृतम् ॥११९॥
शूद्रस्य द्विजशुश्रूषा तयाऽजीवन् वणिग्भवेत् ।
शिल्पैर्व्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥१२०॥
भार्य्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः ।
नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत् ॥१२१॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दया दमः क्षान्तिः सर्वेषां धर्म्मसाधनम् ॥११२॥
वयोबुद्ध्यर्थवाग्वेशश्रुताभिजनकर्म्मणाम् ।
आचरेत् सदृशीं वृत्तिमजिह्मामशठान्तथा ॥ ११३ ॥
त्रैवार्षिकाधिकान्नो यः स तु सोमं पिबेद्द्विजः ।
प्राक् सौमिकीः क्रियाः कुर्य्याद्यस्यान्नं वार्षिकं भवेत् ११४
प्रतिसम्वत्सरं सोमः पशुः प्रत्ययनन्तथा ।
कर्त्तव्याग्रयणेष्टिश्च चातुर्म्मास्यानि चैव हि ॥ १२५ ॥
एषामसम्भवे कुर्य्यादिष्टिं वैश्वानरीं द्विजः ।
हीनकल्पं न कुर्व्वीत सति द्रव्येऽफल प्रदम् ॥१२६॥
चाण्डालो जायते यज्ञकारणाच्छूद्रभिक्षितात् ॥
यज्ञार्थं लब्धमददद्भासः काकोऽपिवा भवेत् ॥१२७ ॥
कुशूल कुम्भीधान्यो वा त्र्यहिकोऽश्वस्तनोपि वा ।
जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः ॥ १२८ ॥
न स्वाध्याय विरोध्यर्थमीहेत न यतस्ततः ।
न विरुद्ध प्रसङ्गेन सन्तोषी च सदा भवेत् ॥१२९॥
राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा ।
दम्भिहैतुक पाषण्डवकवृत्तींश्च वर्जयेत् ॥ १३० ॥

शुक्लाम्बरधरो नीच केशश्मश्रु नखः शुचिः ।
न भार्य्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः ॥ १३१ ॥
न संशयं प्रपद्येत नाकस्माद प्रियं वदेत् ।
नाहितं नानृतं चैव न स्तेनः स्यान्नवार्द्धुषिः ॥१३२॥
दाचायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुः ।
कुर्य्यात्प्रदक्षिणं देवमृद्गो विप्रवनस्पतीन् ॥ १३३ ॥
नतु मेहेन्नदीच्छायावर्त्म गोष्ठाम्बुभस्मसु ।
न प्रत्यर्काग्निगोसोमसन्ध्याम्बुस्त्री द्विजन्मनः ॥१३४॥
नेचेतार्कं न नग्नां स्त्रीं नच संसृष्टमैथुनाम् ।
नच मूत्रपुरीषं वा नाशुचीराहुतारकाः ॥ १३५ ॥
अयं मे वज्र इत्येवं सर्वमन्त्रमुदीरयन् ।
वर्षत्यप्रावृतो गच्छेत् स्वप्यात् प्रत्यक् शिरा नच ॥१३६
ष्ठीवनासृक्‌शकृन्मूत्ररेतांस्यप्सु न निःक्षिपेत् ।
पादौ प्रतापयेन्नाग्नौ नचैनमभिलङ्घयेत् ॥ १३७ ॥
जलं पिबेन्नाञ्जलिना शयानं न प्रबोधयेत् ।
नाचैः क्रीडेन्न धर्म्मघ्नैर्व्याधितैर्व्वा न संविशेत् ॥ १३८॥
विरुद्धं वर्जयेत् कर्म्म प्रेतधूमं नदीतरम् ।
केशभस्म तुषाङ्गार कपालेषु च संस्थितिम् ॥ १३९ ॥
नाचक्षीत धयन्तीं गां नाद्वारेण विशेत् क्वचित् ।
न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनः ॥१४०॥
प्रतिग्रहे सूनिचक्रिध्वजिवेश्या नराधिपाः ।
दुष्टा दशगुणं पूर्व्वात् पूर्व्वादेते यथोत्तरम् ॥ १४१ ॥
अध्यायानामुपाकर्म्म श्रावण्यां श्रवणेन वा ।
हस्ते नौषधि भावे वा पञ्चम्यां श्रावणस्य तु ॥१४२ ॥

पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते च्छन्दसां कुर्य्यात्तदुत्सर्गं विधिं वहिः ॥१४३॥
त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ।
उपाकर्म्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते ॥ १४४ ॥
सन्ध्यागर्जितनिर्घात भूकम्पोल्कानिपातने ।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥ १४५ ॥
पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥ १४६ ॥
पशुमण्डूक नकुलमार्जारश्वाहि मूषिकैः ।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥ १४७ ॥
श्वक्रोष्टु गर्द्दभोलूकसामवाणार्त्तनिस्वने ।
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥ १४८ ॥
देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे ।
भुक्त्वार्द्रपाणिरम्भोऽन्तरर्द्धरात्रेऽतिमारुते ॥ १४९ ॥
पांशुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु ।
धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥ १५० ॥
खरोष्ट्रयानहस्त्यश्वनौ वृक्षे रिणरोहणे ।
सप्तत्रिंशदनध्यायानेतां स्तात्कालिकान् विदुः ॥१५१॥
देवर्त्विक्स्नातकाचार्य्यराज्ञां छायां परस्त्रियाः ।
नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्त्तनादि च ॥ १५२ ॥
विप्राहि क्षत्रियात्मानोनावज्ञेयाः कदाचन ।
आमृत्योः श्रियमाकाङ्क्षेन्न कञ्चिन्मर्म्मणि स्पृशेत् ॥१५३
दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् ।
श्रुतिस्मृत्युदितं सम्यक् नित्यमाचारमाचरेत् ॥१५४॥

गोब्राह्मणानलान्नानि नोच्छिष्टानि पदा स्पृशेत्।
न निन्दाताड़ने कुर्य्यात्सुतं शिष्यञ्च ताड़येत् ॥१५५॥
कर्म्मणा मनसा वाचा यत्नाद्धर्म्मं समाचरेत्।
अस्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्नतु ॥ १५६ ॥
मातृपितृतिथिभ्रातृजामिसम्बन्धिमातुलैः।
वृद्धबालातुराचार्य्यवैद्यसंश्रितबान्धवैः ॥ १५७ ॥
ऋत्विक्पुरोहितापत्यभार्य्यादाससनाभिभिः।
विवादं वर्जयित्वा तु सर्व्वाल्लोँकान् जयेद्गृही ॥१५८॥
पञ्चपिण्डाननुद्धृत्य न स्नायात् परवारिषु।
स्नायान्नदीदेवखातगर्त्तप्रस्रवणेषु च॥ १५९ ॥
परशय्यासनोद्यानगृहयानानि वर्जयेत्।
अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि ॥ १६० ॥
कदर्य्यबद्धचौराणां क्लीवरङ्गावतारिणाम्।
वैणाभिशस्तवार्द्धूषिगणिकागणदीक्षिणाम् ॥ १६१ ॥
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम्।
क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम् ॥१६२॥
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्।
शस्त्रविक्रयिकर्म्मारतुन्नवायश्वजीविनाम् ॥ १६३ ॥
नृशंसराजरजककृतघ्नवधजीविनाम्।
चैलधावसुराजीविसहोपपतिवेश्मनाम् ॥ १६४ ॥
पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम्।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥ १६५ ॥
अनर्चितम् वृथामांसं केशकीटसमन्वितम्।
शुक्तं पर्य्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ॥ १६६ ॥

उदक्यास्पृष्टसंघुष्टं पर्य्यायान्नञ्च वर्जयेत् ।
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टञ्च कामतः ॥१६७॥
शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः ।
भोज्यान्नानापितश्चैव यश्चात्मानं निवेदयेत् ॥ १६८ ॥
अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरस विक्रियाः ॥ १६९ ॥
सन्धिन्यनिर्दशाऽवत्सगोः पयः परिवर्जयेत् ।
औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥ १७० ॥
देवतार्थं हविः शिग्रुं लोहितान् व्रश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकाणि च ॥ १७१ ॥
क्रव्याद पक्षिदात्यूह शुकप्रतुददटिट्टिभान् ।
सारसैकशफान् हंसान् सर्वांश्च ग्रामवासिनः ॥१७२ ॥
कोयष्टिप्लवचक्राह्वबलाकावकविष्किरान् ।
वृथाकृषरसंयावपायसापूपशष्कुलीः ॥ १७३ ॥
कलविङ्कं सकाकोलं कुररं रज्जुदालकम् ।
जालपादान् खञ्जरीटानज्ञातांश्च मृगद्विजान् ॥१७४॥
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ।
मत्स्यांश्च कामतोजग्ध्वा सोपवासस्त्र्यहंवसेत् ॥१७५॥
पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम् ।
लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणं चरेत् ॥ १७६ ॥
भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः ।
शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥ १७७ ॥
तथा पाठीनराजीवसशल्काश्च द्विजातिभिः ।
अतः शृणुत मांसस्य विधिं भक्षणवर्ज्जने ॥ १७८ ॥

प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ।
देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक् ॥ १७९ ॥
वसेत् स नरके घोरे दिनानि पशुरोमभिः ।
सम्मितानि दुराचारो योहन्त्यविधिना पशून् ॥ १८० ॥
सर्व्वान् कामानवाप्नोति वाजिमेधफलं तथा ।
गृहेऽपि निवसन् विप्रो मुनिर्मांसस्य वर्जनात् ॥ १८१ ॥
सौवर्णराजताब्जानामूर्द्ध्वपात्रग्रहाश्मनाम् ।
शाकरज्जुमूलफलवासोविदलचर्म्मणाम् ॥ १८२ ॥
पात्राणांचमसानाञ्च वारिणा शुद्धिरिष्यते ।
चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा ॥ १८३ ॥
स्फ्यशूर्पाजिनधान्यानां मुषलोदूखलानसाम् ।
प्रोक्षणं संहतानाञ्च बहूनां चैव वाससाम् ॥ १८४ ॥
तक्षणं दारुशृङ्गास्थ्नां गोवालैः फलसम्भुवाम् ।
मार्ज्जनं यज्ञपात्राणां पाणिना यज्ञकर्म्मणि ॥ १८५ ॥
सोषैरुदक गोमूत्रैः शुद्धत्याविककौशिकम् ।
सश्रीफलैरंशुपट्टं सारिष्टैः कुतपन्तथा ॥ १८६ ॥
सगौरसर्षपैः क्षौमं पुनःपाकान्महीमयम् ।
कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखस्तथा ॥ १८७ ॥
भूशुद्धिर्मार्जनाद्दाहात् कालाद्गोक्रमणात्तथा ।
सेकादुल्लेखनाल्लेपात्गृहं मार्जनलेपनात् ॥ १८८ ॥
गोघ्रातेऽन्ने तथा कीटमक्षिकाकेशदूषिते ।
सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये ॥ १८९ ॥
त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः ।
भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावोद्रवस्य च ॥ १९० ॥

अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धापकर्षणात्।
वाक्‌शस्तमम्बुनिर्णिक्तमज्ञातञ्च सदा शुचि॥१९१॥
शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम्।
तथा मांसं श्वचाण्डालक्रव्यादादिनिपातितम्॥१९२॥
रश्मिरग्नीरजश्छाया गौरश्वोवसुधानिलः।
विप्रुषोमक्षिका स्पर्शे वत्सः प्रस्रवणे शुचिः॥१९३॥
अजाश्वं मुखतो मेध्यं न गौर्न्न नरजामलाः।
पन्थानश्च विशुद्ध्यन्ति सोमसूर्य्यांशुमारुतैः॥१९४॥
मुखजा विप्रुषोमेध्यास्तथाचमनविन्दवः।
श्मश्रु चास्यगतं दन्तसक्तं मुक्त्वा ततः शुचिः॥१९५॥
स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वे रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासोविपरिधाय च॥१९६॥
रथ्याकर्द्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च॥१९७॥
तपस्तप्त्वाऽसृजद्‌ब्रह्मा ब्राह्मणान् वेदगुप्तये।
तृप्त्यर्थं पितृदेवानां धर्म्मसंरक्षणाय च॥१९८॥
सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः।
तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः॥१९९॥
न विद्यया केवलया तपसा वापि पात्रता।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम्॥२००॥
गोभूतिलहिरण्यादि पात्रे दातव्यमर्च्चितम्।
नापात्रे विदुषा किञ्चिदात्मनः श्रेय इच्छता॥२०१॥
विद्यातपोभ्यां हीनेन नतु ग्राह्यः प्रतिग्रहः।
गृह्णन् प्रदातारमधोनयत्यात्मानमेव च॥२०२॥

दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतञ्च शक्तितः ॥ २०३ ॥
हेमशृङ्गा शफैरौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या चीरिणी गौः सदक्षिणा॥२०४॥
दातास्याः स्वर्गमाप्नोति वत्सरान्लोमसम्मितान् ।
कपिला चेत्तारयति भूयश्चा सप्तमं कुलम् ॥ २०५ ॥
स वत्सारोम तुल्यानि युगानुभयतोमुखीम् ।
दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत् ॥२०६॥
यावद्वत्सस्य पादौ द्वौ मुखं योनौ च दृश्यते ।
तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥ २०७ ॥
यथा कथञ्चिद्दत्त्वा गां धेनुं वाऽधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥ २०८ ॥
श्रान्तसम्वाहनं रोगि परिचर्य्या सुरार्च्चनम् ।
पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत् ॥२०९ ॥
भूदीपाश्वान्न वस्त्राम्भस्तिलसर्पिः प्रतिश्रयान् ।
नैवेशिकं स्वर्णधुर्य्यं दत्त्वा स्वर्गे महीयते ॥ २१० ॥
गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।
यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥२११॥
सर्वदानमयं ब्रह्म प्रदानेभ्योऽधिकं यतः ।
तद्ददत् समवाप्नोति ब्रह्मलोकमविच्युतम् ॥ २१२ ॥
प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥२१३॥
कुशाः शाकं पयो मत्स्यागन्धाः पुष्पं दधि क्षितिः ।
मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥२१४॥

अयाचिता हृतं ग्राह्यमपि दुष्कृतकर्म्मणः ।
अन्यत्र कुलटाषण्ढपतितेभ्य स्तथा द्विषः ॥ २१५ ॥
देवातिथ्यर्च्चनकृते गुरुभृत्यादिवृत्तये ।
सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च ॥ २१६ ॥
अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत् सूर्य्यसंक्रमः ॥ २१७ ॥
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्य्ययोः ।
श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः ॥२१८॥
अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा ।
वेदार्थविज्ज्येष्ठसामा त्रिमधु स्त्रिसुपर्णकः ॥ २१९ ॥
ऋत्विक् स्वस्रीयजामातृयाज्यश्वशुरमातुलाः ।
त्रिणाचिकेत दौहित्र शिष्यसम्बन्धिबान्धवाः ॥ २२० ॥
कर्म्मनिष्ठा स्तपोनिष्ठाः पञ्चाग्निब्रह्मचारिणः ।
पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदः ॥ २२१ ॥
रोगी हीनातिरिक्ताङ्गः काणः पौनर्भव स्तथा ।
अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः ॥ २२२ ॥
भृतकाध्यापकः क्लीवः कन्यादूष्यभिशस्तकः ।
मित्रध्रुक् पिशुनः सोमविक्रयी च विनिन्दकः ॥२२३॥
मातापितृ गुरुत्यागी कुण्डाशी वृषलात्मजः ।
परपूर्व्वापतिः स्तेनः कर्म्मदुष्टाश्च निन्दिताः ॥ २२४ ॥
निमन्त्रयीत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः ।
तैश्चापि संयतैर्भाव्यं मनोवाक्कायकर्म्मभिः ॥ २२५ ॥
अपराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान् ।
पवित्रपाणिराचान्तानासनेषूपवेशयेत् ॥ २२६ ॥

युग्मान् दैवे यथाशक्ति पित्र्येऽयुग्मांस्तथैव च।
परिश्रिते शुचौ देशे दक्षिणाप्लवने तथा॥ २२७॥
द्वौ दैवे प्राक् त्रयः पित्र्य उदगेकैकमेव वा।
मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्॥ २२८॥
पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि।
आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा॥ २२९॥
यवैरन्ववकीर्याथ भाजने सपवित्रके।
शन्नो देव्या पयः क्षिप्त्वा यवोऽसीति यवां स्तथा॥२३०॥
या दिव्या इति मन्त्रेण हस्ते त्वर्घ्यं विनिःक्षिपेत्।
दत्त्वोदकं गन्धमाल्यं धूपं वासः सदीपकम्॥ २३१॥
तथाच्छादनदानञ्च करशौचार्थमम्बु च।
अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणम्॥
द्विगुणांस्तु कुशान् दत्त्वा ह्युशन्तस्त्वेत्यृचा पितॄन् २३२
आवाह्य तदनुज्ञातो जपेदायान्तु नस्ततः।
यवार्थास्तु तिलैः कार्य्याः कुर्य्यादर्घ्यादिपूर्ववत्॥२३३॥
दत्त्वार्घ्यंसंस्रवां स्तेषां पात्रे कृत्वा विधानतः।
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥२३४॥
अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतम्।
कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत्॥ २३५॥
हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः।
यथा लाभोपपन्नेषु रौप्येषु तु विशेषतः॥ २३६॥
दत्त्वान्नं पृथिवी पात्रमिति पात्राभिमन्त्रणम्।
कृत्वेदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत्॥ २३७॥
सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचम्।

जप्त्वा यथा सुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः ॥ २३८ ॥
अन्नमिष्टं हविष्यञ्च दद्यादक्रोधनोऽत्वरः ।
आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वंजपन्तथा ॥ २३९ ॥
अन्नमादाय तृप्ताः स्थ शेषं चैवानुमन्य च ।
तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत् सकृत् ॥ २४० ॥
सर्वमन्नमुपादाय सतिलं दक्षिणामुखः ।
उच्छिष्टसन्निधौ पिण्डान् प्रदद्यात् पितृयज्ञवत् ॥ २४१ ॥
मातामहानामप्येवं दद्यादाचमनं ततः ।
स्वस्ति वाच्यं ततः कुर्य्यादक्षय्योदकमेव च ॥ २४२ ॥
दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ।
वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यताम् ॥ २४३ ॥
ब्रूयुरस्तु स्वधेत्येवं भूमौ सिञ्चेत्ततोजलम् ।
विश्वेदेवाश्च प्रीयन्तां विप्रैश्चोक्त इदं जपेत् ॥ २४४ ॥
दातारो नोऽभिवर्द्धन्तां वेदः सन्ततिरेव च ।
श्रद्धा च नो माव्यगमद्बहु देयञ्च नोऽस्त्विति ॥ २४५ ॥
अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि ।
याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥ २४६ ॥
इत्युक्त्वा तु प्रिया वाचः प्रणिपत्य विसर्जयेत् ।
वाजे वाजे इति प्रीतः पितृपूर्वं विसर्जनम् ॥ २४७ ॥
यस्मिंस्ते संस्रवाः पूर्वमर्घ्यपात्रे निवेशिताः ।
पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेत् ॥२४८॥
प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम् ।
ब्रह्मचारी भवेत्तान्तु रजनीं ब्राह्मणैः सह ॥२४९॥
एवं प्रदक्षिणं कृत्वा वृद्धौ नान्दीमुखान् पितॄन् ।

यजेत दधिकर्कन्धूमिश्रान् पिण्डान् यवैः क्रिया॥२५०॥
एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम्।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत्॥ २५१॥
उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने।
अभिरम्यतामिति वदेद्ब्रूयुस्तेऽभिरताः स्म ह॥२४२॥
गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्॥ २५३॥
ये समानाइति द्वाभ्यां शेषं पूर्ववदाचरेत्।
एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि॥ २५४॥
अर्व्वाक् सपिण्डीकरणं यस्य सम्वत्सराद्भवेत्।
तस्याप्यन्नं सोदकुम्भं दद्यात् सम्वत्सरं द्विजे॥२५५॥
मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम्।
प्रतिसम्वत्सरञ्चैव आद्यमेकादशेऽहनि॥ २५६॥
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा।
प्रक्षिपेत् सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत्॥२५७
हविष्यान्नेन वै मासं पायसेन तु वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः॥२५८॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्।
मासवृद्ध्या हि तृप्यन्ति दत्तैरिह पितामहाः॥२५९
खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च।
लोहामिषं महाशाकं मांसं वार्द्धीणसस्य च॥२६०॥
यद्ददाति गयास्थश्च सर्वमानन्त्यमुच्यते।
तथा वर्षात्रयोदश्यां मघासु च न संशयः॥ २६१॥
कन्यां कन्यावेदिनश्च पशून् मुख्यान् सुतानपि।

द्यूतं कृषिञ्च वाणिज्यं द्विशफैकशफांस्तथा ॥ २६२ ॥
ब्रह्मवर्च्चस्विनः पुत्रान् स्वर्णरूप्ये सकुप्यके ।
ज्ञातिश्रैष्ठ्यं सर्व्वकामानाप्नोति श्राद्धदः सदा ॥२६३॥
प्रतिपत्प्रभृतिष्वेतान् वर्जयित्वा चतुर्द्दशीम् ।
शस्त्रेण तु हताये वै तेभ्यस्तत्र प्रदीयते ॥ २६४ ॥
स्वर्गं ह्यपत्यमोजश्च शौर्य्यं क्षेत्रं बलं तथा ।
पुत्रान् श्रैष्ठ्यञ्च सौभाग्यं समृद्धिं मुख्यतां शुभम्२६५
प्रवृत्तचक्रताञ्चैव वाणिज्यं प्रभुतां तथा ।
अरोगित्वं यशो वीतशोकतां परमां गतिम् ॥ २६६॥
धनं विद्यां भिषक्सिद्धिं कुप्यं गा अप्यजाविकम् ।
अश्वानायुश्च विधिवद् यः श्राद्धं सम्प्रयच्छति ॥२६७॥
कृत्तिकादिभरण्यन्तं स कामानाप्नुयादिमान् ।
आस्तिकः श्रद्दधानश्च व्यपेतमदमत्सरः ॥ २६८ ॥
वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ।
प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ॥२६९॥
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्ति तथा राज्यं प्रीता नॄणां पितामहाः ॥२७०॥
विनायकः कर्म्मविघ्नसिद्ध्यर्थं विनियोजितः ।
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ २७१ ॥
तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत ।
स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति ॥ २७२ ॥
काषायवाससश्चैव क्रव्यादांश्चाधिरोहति ।
अन्त्यजैर्गर्द्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ॥ २७३ ॥
व्रजन्तञ्च तथात्मानं मन्यतेऽनुगतं परैः ।

विमना विफलारम्भः संसीदत्यनिमित्ततः ॥ २७४ ॥
तेनोपसृष्टो लभते न राज्यं राजनन्दनः ।
कुमारी नच भर्त्तारमपत्यं नच गर्भिणी ॥ २७५ ॥
आचार्य्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा ।
वणिग्लाभं नचाप्नोति कृषिञ्चैव कृषीवलः ॥ २२६ ॥
स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्वकम् ।
गौरसर्षपकल्केन साज्येनोत्सादितस्य च ॥ २७७ ॥
सर्व्वौषधैः सर्व्वगन्धैः प्रलिप्तशिरसस्तथा ।
भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः ॥ २७८ ॥
अश्वस्थानाद्गजस्थानाद्वल्मीकात् सङ्गमाद्ध्रदात् ।
मृत्तिकां रोचनां गन्धान् गुग्गुलुञ्चापसु निःक्षिपेत् ॥ २७९ ॥
या आहृता एकवर्णैश्चतुर्भिः कलशैर्ह्रदात् ।
चर्म्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं तथा ॥ २८० ॥
सहस्राक्षं शतं धारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥ २८१ ॥
भगन्ते वरुणो राजा भगं सूर्य्यो बृहस्पतिः ।
भगमन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ २८२ ॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि ।
ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा ॥ २८३ ॥
स्नातस्य सार्षपं तैलं स्रुवेणौडुम्बरेण च ।
जुहुयान्मूर्द्धनि कुशान् सव्येन परिगृह्य च ॥ २८४ ॥
मितश्च संमितश्चैव तथा शालकटङ्कटौ ।
कुष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः ॥ २८५ ॥
नामभिर्बलिमन्त्रैश्च नमस्कार समन्वितैः ।

दद्याच्चतुष्पथे सूर्पे कुशानास्तीर्य्य सर्व्वतः ॥ २८६ ॥
कृताकृतांस्तण्डुलांश्च पललौदनमेव च ।
मत्स्यान् पक्कांस्तथैवामान् मांसमेतावदेव तु ॥२८७॥
पुष्पं चित्रं सुगन्धञ्च सुराञ्च त्रिविधामपि ।
मूलकं पूरिकापूपांस्तथैवैरण्डिकाः स्रजः ॥ २८८ ॥
दध्यन्नं पायसञ्चैव गुड़पिष्टं समोदकम् ।
एतान् सर्व्वानुपाहृत्य भूमौ कृत्वा ततः शिरः ॥२८९॥
विनायकस्य जननीमुपतिष्ठेत्ततोऽम्बिकाम् ।
दूर्व्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमञ्जलिम् ॥ २९० ॥
रूपं देहि यशोदेहि भाग्यं भगवति ! देहि मे ।
पुत्रान् देहि धनं देहि सर्व्वान् कामांश्च देहि मे ॥२९१॥
ततः शुक्लाम्बरधरः शुक्लगन्धानुलेपनः ।
ब्राह्मणान् भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि ॥ २९२ ॥
एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्म्मणां फलमाप्नोति श्रियञ्चाप्नोत्यनुत्तमाम् ॥ २९३ ॥
आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा ।
महागणपतेश्चैव कुर्व्वन् सिद्धिमवाप्नुयात् ॥ २९४ ॥
श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन्नरीन् ॥ २९५॥
सूर्य्यः सोमो महीपुत्रः सोमपुत्रो वृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ॥२९६ ॥
ताम्रकात् स्फटिकाद्रक्तचन्दनात् स्वर्णकादुभौ ।
रजतादयसः सीसात् कांस्यात् कार्य्यग्रहाः क्रमात् ॥ २९७॥
स्ववर्णैर्व्वा पटे लेख्या गन्धैर्मण्डलकेऽथवा ।

यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ २९८ ॥
गन्धाश्च बलयश्चैव धूपोदेयश्च गुग्गुलुः ।
कर्त्तव्या मन्त्रवन्तश्च चरवः प्रतिदैवतम् ॥ २९९ ॥
आकृष्टेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत् ।
उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्त्तिताः ॥ ३०० ॥
वृहस्पते अतिअदर्य्यस्तथैवान्नात् परिस्रुतः ।
शन्नो देवीस्तथा काण्डात् केतुं कृण्वन्निमाः क्रमात् ॥ ३०१ ॥
अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः ।
उडुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात् ॥ ३०२ ॥
एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा ।
होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युता ॥ ३०३ ॥
गुड़ौदनं पायसञ्च हविष्यं क्षीरषाष्टिकम् ।
दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ॥ ३०४ ॥
दद्याद् ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः ।
शक्तितो वा यथा लाभं सत्कृत्य विधिपूर्व्वकम् ॥ ३०५ ॥
धेनुः शङ्ख स्तथानड्वान् हेम वासोहयस्तथा ।
कृष्णा गौरायसं छाग एता वै दक्षिणाः क्रमात् ॥ ३०६ ॥
यश्च यस्य यदा दुःस्थः स तं यत्नेन पूजयेत् ।
ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ ॥ ३०७ ॥
ग्रहाधीना नरेन्द्राणा मुच्छ्रायाः पतनानि च ।
भावाभावौ च जगतस्तस्मात् पूज्यतमाः स्मृताः ॥ ३०८ ॥
महोत्साहः स्थूललक्ष्यः कृतज्ञो वृद्धसेवकः ।
विनीतः सत्वसम्पन्नः कुलीनः सत्यवाक् शुचिः ॥ ३०९
अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा ।

धार्म्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥३१० ॥
स्वरन्ध्रगोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च।
विनीतस्त्वथ वार्त्तायां त्रय्याञ्चैव नराधिपः ॥३११ ॥
स मन्त्रिणः प्रकुर्व्वीत प्राज्ञान् मौलान् स्थिरान् शुचीन्।
तैः सार्द्धं चिन्तयेद्राज्यं विप्रेणाथ ततः स्वयम् ॥३१२॥
पुरोहितञ्च कुर्व्वीत दैवज्ञमुदितोदितम्।
दण्डनीत्याञ्च कुशलमथर्व्वाङ्गिरसे तथा ॥ ३१३ ॥
श्रौतस्मार्त्तक्रियाहेतोर्वृणुयाहत्विजस्तथा।
यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान् ॥ ३१४ ॥
भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च।
अक्षयोऽयं निधीराज्ञां यद्विप्रेषूपपादितम् ॥ ३१५ ॥
अस्कन्नमव्ययञ्चैव प्रायश्चित्तैरदूषितम्।
अग्नेः सकाशाद्विप्रास्ये पूतं श्रेष्ठमिहोच्यते ॥ ३१६ ॥
धर्म्मेणालब्धमीहेत लब्धं यत्नेन पालयेत्।
पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निःक्षिपेत् ॥३१७॥
दद्याद्भूमिं निबन्धं वा कृत्वा लेख्यञ्च कारयेत्।
आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः ॥ ३१८ ॥
पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम्।
अभिलेख्यात्मनो वंश्यानात्मानञ्च महीपतिः ॥ ३१९ ॥
प्रतिग्रहपरीमाणं दानाच्छेदोपवर्णनम्।
स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरम् ॥३२०॥
रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत्।
तत्र दुर्गाणि कुर्व्वीत जनकोषात्मगुप्तये ॥ ३२१ ॥
तत्र तत्र च निष्णातानध्यक्षान् कुशलान् शुचीन्।

प्रकुर्य्याद्दायकर्म्मान्तव्ययकर्म्मसु चोद्य तान्॥ ३२२॥
नातः परतरो धर्म्मो नृपाणां यदुपार्जितम्।
विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं तथा॥ ३२३॥
य आहवेषु वध्यन्ते भूम्यर्थमपराङ्मुखाः।
अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा॥ ३२४॥
पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्त्तिनाम्।
राजा सुकृतमादत्ते हतानां विपलायिनाम्॥३२५॥
तवाहं वादिनं क्लीवं निर्हेतिं परसङ्गतम्।
न हन्याद्विनिवृत्तञ्च युद्धप्रेक्षणकादिकम्॥ ३२६॥
कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयम्।
व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुञ्जीत कामतः॥३२७॥
हिरण्यं व्यापृतानीतं भाण्डागारेषु निःक्षिपेत्।
पश्येच्चारांस्ततो दूतान् प्रेरयेन्मन्त्रिसंयुतः॥ ३२८॥
ततः स्वैरविहारी स्यान्मन्त्रिभिर्वा समागतः।
बलानां दर्शनं कृत्वा सेनान्या सह चिन्तयेत्॥३२९॥
सन्ध्यामुपास्य शृणुयाच्चाराणां गूढ़भाषितम्।
गीतनृत्यैश्च भुञ्जीत पठेत् स्वाध्यायमेव च॥ ३३०॥
संविशेत्तूर्य्यघोषेण प्रतिबुध्येत्तथैव च।
शास्त्राणि चिन्तयेद्बुद्ध्या सर्वकर्त्तव्यतास्तथा॥ ३३१॥
प्रेषयेच्च ततश्चारान् स्वेषु चान्येषु सादरम्।
ऋत्विक्पुरोहिताचार्य्यैराशीर्भिरभिनन्दितः॥३३२॥
दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां काञ्चनं महीम्।
नैवेशिकानि च तथा श्रोत्रियाणां गृहाणि च॥३३३॥
ब्राह्मणेषु क्षमी स्निग्धेष्वजिम्भः क्रोधनोऽरिषु।

स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥२३४ ॥
पुण्यात् षड्भागमादत्ते न्यायेन परिपालयन् ।
सर्वदानाधिकं यस्मात् प्रजानां परिपालनम् ॥२३५॥
चाटुतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥ २३६ ॥
अरक्ष्यमाणाः कुर्वन्ति यत् किञ्चित् किल्बिषं प्रजाः ।
तस्माच्च नृपतेरर्द्धं यस्माद् गृह्णात्यसौ करान् ॥ २३७ ॥
ये राष्ट्राधिकृता स्तेषां चारैर्ज्ञात्वा विचेष्टितम् ।
साधून् सम्मानयेद्राजा विपरीतांस्तु घातयेत् ॥ २३८॥
उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत् ।
सम्मानदानसत्कारैः श्रोत्रियान् वासयेत् सदा॥२३९
अन्यायेन नृपो राष्ट्रात् स्वकोषं योऽभिवर्द्धयेत् ।
सोऽचिराद्विगतश्रीको नाशमेति सबान्धवः ॥ २४० ॥
प्रजापीड़नसन्तापसमुद्भूतो हुताशनः ।
राज्ञः कुलं श्रियं प्राणान् नादग्ध्वा विनिवर्त्तते॥२४१॥
यएव धर्म्मो नृपतेः स्वराष्ट्रपरिपालने ।
तमेव कृत्स्नमाप्नोति परराष्ट्रं वशं नयन् ॥ २४२ ॥
यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः ।
तथैव परिपाल्योऽसौ यदा वशमुपागतः ॥ २४३ ॥
मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम् ।
कुर्य्याद्यथास्य न विदुः कर्म्मणामाफलोदयात॥२४४॥
अरिर्मित्रमुदासीनोऽनन्तरस्तत् परः परः ।
क्रमशो मण्डलं चिन्त्यं सामादिभिरनुक्रमैः ॥ २४५ ॥
उपायाः साम दानञ्च भेदो दण्डस्तथैव ।

सम्यक् प्रयुक्ताः सिद्धेयुर्दण्डस्त्ववगतिका गतिः ॥३४६॥
सन्धिञ्च विग्रहं यानमासनं संश्रयं तथा ।
द्वैधीभावं गुणानेतान् यथावत् परिकल्पयेत् ॥३४७॥
यदा शस्यगुणोपेतं परराष्ट्रं तदा व्रजेत् ।
परश्च हीनआत्मा च हृष्टवाहनपूरुषः ॥ ३४८ ॥
दैवे पुरुषकारे च कर्म्मसिद्धिर्व्यवस्थिता ।
तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ॥ ३४९ ॥
केचिद्दैवात् स्वभावाच्च कालात् पुरुषकारतः ।
संयोगे केचिदिच्छन्ति फलं कुशलबुद्धयः ॥ ३५० ॥
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥ ३५१ ॥
हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतोयतेत तत् प्राप्तौ रक्षेत् सत्यं समाहितः ॥३५२॥
स्वाम्यमात्यो जनोदुर्गं कोषो दण्डस्तथैवच ।
मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ॥ ३५३ ॥
तदवाप्य नृपोदण्डं दुर्वृत्तेषु निपातयेत् ।
धर्मोहि दण्डरूपेण ब्रह्मणा निर्मितः पुरा ॥ ३५४ ॥
स नेतुं न्यायतोऽशक्यो लुब्धेनाकृतबुद्धिना ।
सत्यसन्धेन शुचिना सुसहायेन धीमता ॥ ३५५ ॥
यथाशास्त्रं प्रयुक्तः सन् सदेवासुरमानुषम् ।
जगदानन्दयेत् सर्वमन्यथा तु प्रकोपयेत् ॥ ३५६ ॥
अधर्म्मदण्डनं स्वर्गकीर्त्तिलोकविनाशनम् ।
सम्यक् च दण्डनं राज्ञः स्वर्गकीर्त्तिजयावहम् ॥३५७
अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपिवा

नादण्ड्यो नाम राज्ञोऽस्ति धर्म्माद्विचलितः स्वकात्॥२५८
योदण्ड्यान् दण्डयेद्राजा सम्यग्बध्यांश्च घातयेत् ।
इष्टं स्यात् क्रतुभिस्तेन सहस्रशतदक्षिणैः ॥ २५९ ॥
इति संचिन्त्य नृपतिः क्रतुतुल्यफलं पृथक् ।
व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम्॥२६०
कुलानि जातीः श्रेणीश्च गणान् जानपदांस्तथा ।
स्वधर्म्मचलितान्राजा विनीय स्थापयेत् पथि ॥ २६१॥
जालसूर्य्यमरीचिस्थं त्रसरेणूरजः स्मृतम् ।
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ॥ २६२ ॥
गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः ।
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोड़श ॥ २६३ ॥
पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तितम् ।
द्वे कृष्णले रूप्यमाषोधरणं षोड़शैव ते ॥ २६४ ॥
शतमानस्तु दशभिर्धरणैः पलमेवच ।
निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः ॥२६५॥
साशीतिः पणसाहस्रो दण्ड उत्तमसाहसः ।
तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः ॥ २६६ ॥
धिग्दण्डस्त्वथ वाग्दण्डोधनदण्डोबधस्तथा ।
योज्या व्यस्ताः समस्ता वा अपराधवशादिमे ॥२६७ ॥
ज्ञात्वापराधं देशञ्च कालं बलमथापिवा ।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु पातयेत् ॥२६८ ॥
इति याज्ञवल्कीये धर्म्मशास्त्रे आचारोनाम प्रथमोऽध्यायः ॥
अथ द्वितीयोऽध्यायः व्यवहारान् नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह ।
धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥ १ ॥

श्रुताध्ययनसम्पन्ना धर्म्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्य्या रिपौ मित्रे च ये समाः ॥२॥
अपश्यता कार्य्यवशाद्व्यवहाराल् नृपेण तु।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्म्मवित् ॥ ३ ॥
रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः।
सभ्याः पृथक् पृथक् दण्ड्या विवादाद्द्विगुणं दमम् ॥४॥
स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ ५ ॥
प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना।
समामासतदर्द्धाहर्नामजात्यादिचिह्नितम् ॥ ६ ॥
श्रुतार्थस्योत्तरं लेख्यं पूर्व्वावेदकसन्निधौ।
ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम् ॥ ७ ॥
तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा।
चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः ॥ ८ ॥
अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्।
अभियुक्तञ्च नान्येन नोक्तं विप्रकृतं नयेत् ॥ ९ ॥
कुर्य्यात् प्रत्यभियोगञ्च कलहे साहसेषु च।
उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये ॥ १० ॥
निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम्।
मिथ्याभियोगी द्विगुणमभियोगाद्धनं हरेत् ॥ ११ ॥
साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियाम्।
विवादयेत् सद्यएव कालोऽन्यत्रेच्छया स्मृतः ॥१२ ॥
देशाद्देशान्तरं याति सृक्कणी परिलेढ़ि च।
ललाटं स्विद्यति यस्य मुखं वैवर्ण्यमेति च ॥ १३ ॥

परिशुष्यत्स्खलद्वाक्योविरुद्धं बहु भाषते ।
वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भूजत्यपि ॥ १४ ॥
स्वभावाद्विकृतिं गच्छन् मनोवाक्कायकर्म्मभिः ।
अभियोगे च साक्ष्ये वा दुष्टः स परिकीर्त्तितः ॥१५ ॥
सन्दिग्धार्थं स्वतन्त्रो यः साधयेद्‌ यश्च निष्पतेत् ।
नचाहूतो वदेत् किञ्चिद्धीनो दण्ड्यश्च स स्मृतः ॥१६॥
साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥ १७ ॥
सपणश्चेद्विवादः स्यात्तत्र हीनन्तु दापयेत् ।
दण्डञ्च सपणं राज्ञे धनिने धनमेव च ॥ १८ ॥
छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥ १९ ॥
निह्नुते लिखितं नैकमेकदेशविभावितः ।
दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ॥ २० ॥
स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥ २१ ॥
प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ २२ ॥
सर्व्वेष्वथ विवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा ॥ २३ ॥
पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥ २४ ॥
आधिसीमोपनिःक्षेपजड़बालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥ २५ ॥

आध्यादीनां विहर्त्तारं धनिने दापयेद्धनम् ।
दण्डञ्च तत्समं राज्ञे शक्त्यपेक्षमथापि वा ॥ २६ ॥
आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।
आगमोऽपि बलं नैव भुक्तिस्तोकापि यत्र नो ॥ २७ ॥
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥ २८ ॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत् ।
न तत्र कारणं भुक्तिरागमेन विनाकृता ॥ २९ ॥
आगमेन विशुद्धेन भोगो याति प्रमाणताम् ।
अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥ ३० ॥
नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च ।
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ॥ ३१ ॥
बलोपधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत् ।
स्त्रीनक्तमन्तरागारवहिःशत्रुकृतांस्तथा ॥ ३२ ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादि योजितः ।
असम्बद्धकृतश्चैव व्यवहारो न सिद्ध्यति ॥ ३३ ॥
प्रणष्टाधिगतं देयं नृपेण धनिने धनम् ।
विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति ॥ ३४ ॥
राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्द्धं द्विजः पुनः ।
विद्वानशेषमादद्यात् स सर्वस्य प्रभुर्यतः ॥ ३५ ॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् ।
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥ ३६ ॥
देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु ।
अददद्धि समाप्नोति किल्विषं यस्य तस्य तत् ॥ ३७ ॥

अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके।
वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा॥ ३८॥
कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्।
दद्युर्व्वा स्वकृतां वृद्धिं सर्व्वे सर्व्वासु जातिषु॥ ३९॥
सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा।
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणाः स्मृताः॥४०॥
प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत्।
साध्यमानो नृपं गच्छन् दण्ड्यो दाप्यश्च तद्धनम्॥४१॥
गृहीता तु क्रमाद्दाप्यो धनिनामधमर्णिकः॥४१॥
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम्॥ ४२॥
राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतम्।
पञ्चकञ्च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णकः॥ ४३॥
हीनजातिं परिक्षीणं ऋणार्थं कर्म्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥ ४४॥
दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम्।
मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परम्॥ ४५॥
अविभक्तैः कुटुम्बार्थे यदृणञ्च कृतं भवेत्।
दद्युस्तदृकथिनः प्रेते प्रोषिते वा कुटुम्बिनि॥ ४६॥
न योषित् पतिपुत्राभ्यां न पुत्रेण कृतं पिता।
दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा॥ ४७॥
सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम्।
वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम्॥ ४८॥
गोपशौण्डिकशैलूषरजकव्याधयोषिताम्।
ऋणं दद्यात् पतिस्तेषां यस्माद्वृत्तिस्तदाश्रया॥४९॥

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत् कृतम्।
स्वयं कृतं वा यदृणं नान्यत् स्त्री दातुमर्हति॥५०॥
पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽथवा।
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम्॥५१॥
ऋक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च।
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य ऋक्थिनः॥ ५२॥
भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम्॥ ५३॥
दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि॥५४॥
दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा।
न तत् पुत्रा ऋणं दद्युर्दद्युर्दानाय ये स्थिताः॥५५॥
बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम्।
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि॥ ५६॥
प्रतिभूर्दापितो यत्तु प्रकाशं धनिनो धनम्।
द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत्॥ ५७॥
सन्ततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च।
वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा॥ ५८॥
आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते।
काले कालकृतं नश्येत् फलभोग्यो न नश्यति॥५९॥
गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते।
नष्टो देयो विनष्टश्च दैवराजकृतादृते॥ ६०॥
आधेः स्वीकरणात् सिद्धी रक्ष्यमाणोऽप्यसारताम्।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥ ६१॥

चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम् ।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ ६२ ॥
उपस्थितस्य मोक्तव्य आधिस्तेनोऽन्यथा भवेत् ।
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात् ॥ ६३ ॥
तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः ।
विना धारणकाद्वापि विक्रीणीत ससाक्षिकम् ॥६४॥
यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥ ६५ ॥
इति ऋणादानप्रकरणम् ॥

वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्पितम् ।
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥ ६६ ॥
न दाप्योऽपहृतं तत्तु राजदैविकतस्करैः ।
भ्रेषश्चेन्मार्गितेऽदत्ते दाप्यो दण्डञ्च तत्समम् ॥ ६७॥
आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तञ्चापि सोदयम् ।
याचितान्वाहितन्याসनिःक्षेपादिष्वयं विधिः ॥६८ ॥
इति निःक्षेपादिप्रकरणम् ॥

तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ।
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ ६९ ॥
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियारताः ।
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥ ७० ॥
श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः ।
असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः ॥ ७१ ॥

स्त्रीवृद्धबालकितवमत्तोन्मत्ताभिशस्तकाः ।
रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः ॥ ७२ ॥
पतिताप्तार्थसम्बन्धिसहायरिपुतस्कराः ।
साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः ॥ ७३ ॥
उभयानुमतः साक्षी भवत्येकोऽपि धर्म्मवित् ।
सर्व्वः साक्षी संग्रहणे चौर्य्यपारुष्यसाहसे ॥ ७४ ॥
साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ।
ये च पापकृतां लोका महापातकिनान्तथा ॥ ७५ ॥
अग्निदानाञ्च ये लोका ये च स्त्रीबालघातिनाम् ।
स तान् सर्व्वान् समाप्नोति यः साक्ष्यमनृतं वदेत्॥ ७६
सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम् ।
तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ॥ ७७ ॥
अब्रुवन् हि नरः साक्ष्यमृणं स दशबन्धकम् ।
राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशकेऽहनि॥ ७८॥
न ददाति च यः साक्ष्यं जानन्नपि नराधमः ।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥ ७९ ॥
द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः ॥ ८० ॥
यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवं तस्य पराजयः ॥ ८१ ॥
उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः ।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ॥ ८२॥
पृथक् पृथग्दण्डनीयाः कूटकृत् साक्षिणस्तथा ।
विवादाद्द्विगुणं द्रव्यं विवास्यो ब्राह्मणः स्मृतः ॥ ८३॥

यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः ।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणन्तु विवासयेत् ॥ ८४ ॥
वर्णिनान्तु वधो यत्र तत्र साक्ष्यनृतं वदेत् ।
तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ॥ ८५ ॥

इति साक्षिप्रकरणम् ॥

यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम् ।
लेख्यन्तु साक्षिमत् कार्य्यं तस्मिन् धनिकपूर्वकम् ॥ ८६
समामासतदर्द्धाहर्नामजातिस्वगोत्रकैः ।
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ॥ ८७ ॥
समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् ।
मतं मेऽमुकपुत्रस्य यदत्रोपरिलेखितम् ॥ ८८ ॥
साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् ।
अत्राहममुकः साक्षी लिखेयुरिति ते समाः ॥ ८९ ॥
उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना ।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् ॥ ९०
विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितन्तु यत् ।
तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृताद्दृते ॥ ९१ ॥
ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु ।
आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ९२ ॥
देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा ।
भिन्ने दग्धेऽथवाच्छिन्ने लेख्यमन्यत्तु कारयेत् ॥ ९३ ॥
सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः ।
युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः ॥ ९४ ॥

लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वा धनं ऋणी ।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम् ॥ ९५ ॥
दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् ।
साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम् ॥ ९६ ॥

इति लेख्यप्रकरणम् ॥

तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥ ९७ ॥
रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ।
विनापि शीर्षकात् कुर्य्यान्नृपद्रोहेऽथ पातके ॥ ९८ ॥
सचेलं स्नातमाहूय सूर्य्योदय उपोषितम् ।
कारयेत् सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ ९९ ॥
तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य च ॥ १०० ॥
नासहस्राद्धरेत् फालं न विषं न तुलां तथा ।
नृपार्थेष्वभियोगे च वहेयुः शुचयः सदा ॥ १०१ ॥
तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वावतारितः ॥ १०२ ॥
त्वं तुले ! सत्यधामासि पुरा देवैर्विनिर्मिता ।
तत्सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥ १०३ ॥
यद्यस्मि पापकृन्मात ! स्ततो मां त्वमधोनय ।
शुद्धश्चेद्गमयोर्द्धं मां तुलामित्यभिमन्त्रयेत् ॥ १०४ ॥
करौ विमृदितव्रीहेर्लक्षयित्वा ततोन्यसेत् ।
सप्ताश्वत्थस्य पत्राणि तावत् सूत्रेण वेष्टयेत् ॥ १०५ ॥

त्वमग्ने ! सर्वभूतानामन्तश्चरसि पावक ! ।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम ॥१०६॥
तस्येत्युक्तवतो लौहं पञ्चाशत्पलिकं समम् ।
अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि ॥ १०७ ॥
स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत् ।
षोडशाङ्गुलकं ज्ञेयं मण्डलं तावदन्तरम् ॥ १०८ ॥
मुक्ताग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात् ।
अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेत् ॥ १०९ ॥
सत्येन माभिरक्ष त्वं वरुणेत्यभिशाप्यकम् ।
नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेत् ॥ ११०॥
समकालमिषुं मुक्तमानीयान्यो जवी नरः ।
गते तस्मिन्निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयात् ॥ १११ ॥
त्वं विष ! ब्रह्मणः पुत्र ! सत्यधर्मे व्यवस्थितः ।
त्रायस्वास्मादभीशापात् सत्येन भव मेऽमृतम् ॥ ११२॥
एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ।
यस्य वेगैर्विना जीर्येत्तस्य शुद्धिं विनिर्दिशेत् ॥११३॥
देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संश्राव्य पाययेत्तस्माज्जलन्तु प्रसृतित्रयम् ॥ ११४ ॥
अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स शुद्धः स्यान्नसंशयः ॥ ११५ ॥

इति दिव्यप्रकरणम् ।

विभागञ्चेत् पिता कुर्य्यात् स्वेच्छया विभजेत्सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः ॥ ११६॥

कुर्य्यात् समानंशान् पत्न्यः कार्य्याः समांशिकाः।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥११७॥
शक्तस्यानीहमानस्य किञ्चिद्दत्त्वा पृथक् क्रिया।
न्यूनाधिकविभक्तानां धर्म्म्यः पितृकृतः स्मृतः ॥११८॥
विभजेरन् सुताः पित्रोरूर्द्ध्वं रिक्थमृणं समम्।
मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥ ११९ ॥
पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम्।
मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेत् ॥ १२० ॥
क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ १२१ ॥
यत्किञ्चित् पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति।
भागो यवीयसां तत्र यदि विद्यानुपालिनः ॥ १२२ ॥
सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः।
अनेकपितृकाणान्तु पितृतो भागकल्पना ॥ १२३ ॥
भूर्य्या पितामहोपात्ता निबन्धो द्रव्यमेव वा।
तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः ॥१२४
विभक्तेषु सुतो जातः सवर्णायां विभागभाक्।
दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात् ॥१२५
पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्।
पितुरूर्द्ध्वं विभजतां माताऽप्यंशं समं हरेत् ॥ १२६ ॥
असंस्कृतास्तु संस्कार्य्या भ्रातरः पूर्वसंस्कृतैः।
भगिन्यश्च निजादंशाद्दत्त्वांशन्तु तुरीयकम् ॥ १२७ ॥
चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥१२८॥

अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते ।
ततपुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥ १२९ ॥
अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसावृक्थी पिण्डदाता च धर्म्मतः ॥ १३० ॥
औरसोधर्म्मपत्नीजस्तत्समः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ २३१ ॥
गृहे प्रच्छन्नउत्पन्नो गूढजस्तु सुतोमतः ।
कानीनः कन्यकाजातो मातामहसुतोमतः ॥१३२॥
अक्षतायां क्षतायां वा जातः पौनर्भवस्तथा ।
दद्यान्माता पिता वा यं स पुत्रो दत्तकोभवेत्॥१३३॥
क्रीतस्तु ताभ्यां विक्रीतः कृत्रिमस्तु स्वयं कृतः ।
दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढ़जः ॥१३४ ॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत् सुतः ।
पिण्डदोंऽशहरश्चैषां पूर्व्वाभावे परः परः ॥ १३५ ॥
सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ।
जातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत ॥१३६॥
मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिनम्
अभ्रातृको हरेत् सर्वं दुहितॄणां सुतादृते ॥ १३७ ॥
पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत् सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः॥१३८॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥ १३९ ॥
वानप्रस्थयतिब्रह्मचारिणामृक्थभागिनः ।
क्रमेणाचार्य्यसच्छिष्यधर्म्मभ्रात्रेकतीर्थिनः ॥ १४० ॥

संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।
दद्याच्चोपहरेदंशं जातस्य च मृतस्य च ॥ १४१ ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत् ।
असंसृष्ट्यपि चादद्यात् संसृष्टो नान्यमातृजः ॥ १४२ ॥
क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जड़ः ।
अन्धोऽचिकित्स्यरोगाद्या भर्त्तव्याः स्युर्निरंशकाः ॥१४३
औरसाः क्षेत्रजास्तेषां निर्द्दोषा भागहारिणः ।
सुतास्चैषां प्रभर्त्तव्या यावद्वै भर्तृसात्कृताः ॥ १४४ ॥
अपुत्रा योषितस्चैषां भर्त्तव्याः साधुवृत्तयः ।
निर्व्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥१४५॥
पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् ।
आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम् ॥ १४६ ॥
बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव वा ।
अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः ॥ १४७ ॥
अप्रजः स्त्रीधनं भर्त्तुर्ब्राह्म्यादिषु चतुर्ष्वपि ।
दुहितॄणां प्रसूता चेत् शेषेषु पितृगामि तत् ॥१४८॥
दत्त्वा कन्यां हरन् दण्ड्योऽव्ययं दद्याच्च सोदयम् ।
मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम् ॥ १४९ ॥
दुर्भिक्षे धर्म्मकार्य्ये च व्याधौ सम्प्रतिरोधके ।
गृहीतं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति ॥१५०॥
अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितम् ॥१५१॥
विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः ।

विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥ १५२ ॥

इति रिक्थभागप्रकरणम् ॥

सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः ।
गोपाः सीमाकृषाणा ये सर्वे च वनगोचराः ॥ १५३ ॥
नयेयुरेते सीमानं स्थूलाङ्गारतुषद्रुमैः ।
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम् ॥ १५४ ॥
सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा ।
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥ १५५ ॥
अनृते च पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ।
अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता ॥१५६॥
आरामायतनग्रामनिपानोद्यानवेश्मसु ।
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु ॥ १५७ ॥
मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा ।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः ॥ १५८ ॥
न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः ।
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः ॥ १५९ ॥
स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत् ।
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः ॥ १६० ॥
फालाहतमपि क्षेत्रं यो न कुर्य्यान्न कारयेत् ।
स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् ॥ १६१ ॥

इति सीमाविवादप्रकरणम् ॥

माषानष्टौ तु महिषी सस्यघातस्य कारिणी ।
दण्डनीया तदर्द्धन्तु गौस्तदर्द्धमजाविकम् ॥ १६२ ॥

भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः।
सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्॥ १६३॥
यावच्छस्यं विनश्येत्तु तावत् स्यात् क्षेत्रिणः फलम्।
गोपस्ताड्यस्तु गोमी तु पूर्व्वोक्तं दण्डमर्हति॥ १६४॥
पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते।
अकामतः कामचारे चौरवद्दण्डमर्हति॥ १६५॥
महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः।
पालो येषान्तु ते मोच्या दैवराजपरिप्लुताः॥ १६६॥
यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा।
प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः॥ १६७॥
पालदोषविनाशे च पाले दण्डो विधीयते।
अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च॥ १६८॥
ग्राम्येच्छया गोप्रचारो भूमिराजवशेन वा।
द्विजस्तृणैधःपुष्पाणि सर्वतः स्ववदाहरेत्॥ १६९॥
धनुःशतं परीणाहो ग्रामक्षेत्रान्तरं भवेत्।
द्वे शते कर्वटस्य स्यान्नगरस्य चतुःशतम्॥ १७०॥

इति स्वामिपालविवादप्रकरणम्॥

स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते।
हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः॥ १७१॥
नष्टापहृतमासाद्य हर्त्तारं ग्राहयेन्नरम्।
देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्॥ १७२॥
विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम्।
क्रेता मूल्यमवाप्नोति तस्माद् यस्तस्य विक्रयी॥ १७३॥

आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।
पञ्चबन्धो दमस्तत्र राज्ञे तेनाविभाविते ॥ १७४ ॥
हृतं प्रणष्टं यो द्रव्यं परहस्तादवाप्नुयात् ।
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान् ॥१७५॥
शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ।
अर्वाक् सम्वत्सरात् स्वामी हरेत परतो नृपः ॥१७६
पणानेकशफे दद्याच्चतुरः पञ्च मानुषे ।
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके ॥ १७७ ॥

इत्यस्वामिविक्रयप्रकरणम् ॥

स्वं कुटुम्बाविरोधेन देयं दारसुतादृते ।
नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥१७८॥
प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः ।
देयं प्रतिश्रुतञ्चैव दत्त्वा नापहरेत् पुनः ॥ १७९ ॥

इति दत्ताप्रदानिकं नामप्रकरणम् ॥

दशैकपञ्चसप्ताहमासत्र्यहार्धमासिकम् ।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥ १८० ॥
अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते ।
अष्टौ त्रपुणि सीसे च ताम्रे पञ्चदशायसि ॥ १८१ ॥
शते दश पला वृद्धिरौर्णे कार्पाससौत्रिके ।
मध्ये पञ्चपला सूत्रे सूक्ष्मे तु त्रिपला मता ॥ १८२ ॥
कार्म्मिके रोमबद्धे च त्रिंशद्भागक्षयो मतः ।
न क्षयो न च वृद्धिः स्यात् कौषेये वल्कलेषु च ॥१८३

देशं कालञ्च भोगञ्च ज्ञात्वा नष्टे बलाबलम् ।
द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयम् ॥ १८४ ॥

इति क्रीतानुशयप्रकरणम् ।

बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते ।
स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि ॥ १८५ ॥
प्रव्रज्यावसितो राज्ञो दासश्चामरणान्तिकः ।
वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः ॥ १८६ ॥
कृतशिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे ।
अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः ॥ १८७ ॥
राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु ।
त्रैविद्यं वृत्तिमद् ब्रूयात् स्वधर्म्मः पाल्यतामिति ॥१८८॥
निजधर्म्माविरोधेन यस्तु सामयिको भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्म्मो राजकृतश्च यः ॥२७९ ॥
गणद्रव्यं हरेद्यस्तु सम्बिदं लङ्घयेच्च यः ।
सर्व्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥ १९० ॥
कर्त्तव्यं वचनं सर्वैः समूहहितवादिनाम् ।
यस्तत्र विपरीतः स्यात् स दाप्यः प्रथमं दमम् ॥१९१॥
समूहकार्य्य आयातान् कृतकार्य्यान् विसर्ज्जयेत् ।
स दानमानसत्कारैः पूजयित्वा महीपतिः ॥ १९२ ॥
समूहकार्य्यप्रहितो यल्लभेत तदर्पयेत् ।
एकादशगुणं दाप्यो यद्यसौ नार्पयेत् स्वयम् ॥१९३॥
धर्म्मज्ञाः शुचयोऽलुब्धा भवेयुः कार्य्यचिन्तकाः ।
कर्त्तव्यं वचनं तेषां समूहहितवादिनाम् ॥१९४ ॥

श्रेणिनैगमपाषण्डिगणानामप्ययं विधिः ।
भेदञ्चैषां नृपो रक्षेत् पूर्ववृत्तिञ्च पालयेत् ॥ १९५ ॥

इति सम्विद्व्यतिक्रमप्रकरणम् ॥

गृहीतवेतनः कर्म्म त्यजन् द्विगुणमावहेत् ।
अगृहीते समं दाप्यो भृत्यैरक्ष्य उपस्करः ॥ १९६ ॥
दाप्यस्तु दशमं भागं वाणिज्यपशुशस्यतः ।
अनिश्चित्य भृतिं यस्तु कारयेत् स महीक्षिता॥१९७॥
देशं कालञ्च योऽतीयात् लाभं कुर्य्याच्च योऽन्यथा ।
तत्र स्यात् स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके॥१९८
यो यावत् कुरुते कर्म्म तावत्तस्य तु वेतनम् ।
उभयोरप्यसाध्यञ्चेत् साध्ये कुर्य्याद्यथाश्रुतम्१९९
अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः ।
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥ २०० ॥
प्रक्रान्ते सप्तमं भागं चतुर्थं पथि संत्यजन् ।
भृतिमर्द्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च ॥ २०१ ॥

इति वेतनादानप्रकरणम् ।

ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयाद्धूर्त्तकितवादितराद्दशकं शतम् ॥ २०२ ॥
स सम्यक् पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितमुद्ग्राहयेज्जेत्रे दद्यात् सत्यं वचः क्षमी ॥२०३॥
प्राप्ते नृपतिना भागे प्रसिद्धे धूर्त्तमण्डले ।
जितं ससभिके स्थाने दापयेदन्यथा नतु ॥ २०४ ॥

द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि।
राज्ञा सचिह्नं निर्व्वास्याः कूटाक्षोपधिदेविनः॥२०५॥
द्यूतमेकमुखं कार्य्यं तस्करज्ञानकारणात्।
एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये॥ २०६॥

इति द्यूतसमाह्वयाख्यं प्रकरणम्।

सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम्।
क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश॥ २०७॥
अभिगन्तास्मि भगिनीं मातरं वा तवेति च।
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम्॥ २०८॥
अर्द्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च।
दण्डप्रणयनं कार्य्यं वर्णजात्युत्तराधरैः॥ २०९॥
प्रातिलोम्यापवादेषु द्विगुणास्त्रिगुणा दमाः।
वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः॥ २१०॥
बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः।
शत्यस्तदर्द्धिकः पादनासाकर्णकरादिषु॥ २११॥
अशक्तस्तु वदन्नेवं दण्डनीयः पणान् दश।
तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु॥ २१२॥
पतनीये कृते क्षेपे दण्डो मध्यमसाहसः।
उपपातकयुक्ते तु दाप्यः प्रथमसाहसम्॥ २१३॥
त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः।
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः॥ २१४॥

इति वाक्पारुष्यप्रकरणम्॥

असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च ।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतोभयात् ॥ २१५ ॥
भस्मपङ्करजःस्पर्शे दण्डो दशपणः स्मृतः ।
अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः ॥ २१६ ॥
समेष्वेवं परस्त्रीषु द्विगुणास्तूत्तमेषु च ।
हीनेष्वर्द्धदमो मोहमदादिभिरदण्डनम् ॥ ११७ ॥
विप्रपीड़ाकरं छेद्यमङ्गमब्राह्मणस्य तु ।
उद्गूर्णे प्रथमो दण्डः संस्पर्शे तु तदर्द्धिकः ॥२१८ ॥
उद्गूर्णे हस्तपादे च दशविंशतिकौ दमौ ।
परस्परन्तु सर्वेषां शस्त्रे मध्यमसाहसम् ॥ २१९ ॥
पादकेशांशुककरोल्लुञ्छनेषु पणान् दश ।
पीड़ाकर्षांशुकावेष्टपादाध्यासे शतं दमः ॥ २२० ॥
शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः ।
द्वात्रिंशतं पणान् दाप्यो द्विगुणं दर्शनेऽसृजः ॥२२१॥
करपाददतोभङ्गे च्छेदने कर्णनासयोः ।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥ २२२ ॥
चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने ।
कन्धराबाहुसक्थ्नाञ्च भङ्गे मध्यमसाहसः ॥ २२३ ॥
एकं घ्नतां बहूनाञ्च यथोक्ताद्द्विगुणो दमः ।
कलहापहृतं देयं दण्डश्च द्विगुणः स्मृतः ॥ २२४ ॥
दुःखमुत्पादयेद्यस्तु स समुत्थानजव्ययम् ।
दाप्यो दण्डञ्च यो यस्मिन् कलहे समुदाहृतः ॥२२५॥
अभिघाते तथाच्छेदे भेदे कुड्यावपातने ।
पणान् दाप्यः पञ्च दश विंशतिन्तद्द्वयं तथा ॥२२६॥

दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्राणहरस्तथा ।
षोड़शाद्यः पणान् दाप्यो द्वितीयो मध्यमं दमम्॥२२७॥
दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा ।
दण्डः क्षुद्रपशूनाञ्च द्विपणप्रभृतिक्रमात् ॥ २२८ ॥
लिङ्गस्य च्छेदने मृत्यौ मध्यमो मूल्यमेव च ।
महापशूनामेतेषु स्थानेषु द्विगुणो दमः ॥२२९ ॥
प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे ।
उपजीव्यद्रुमाणाञ्च विंशतेर्द्विगुणो दमः ॥ २३० ॥
चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये ।
जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते ॥ २३१ ॥
गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम् ।
पूर्वस्मृतादर्द्धदण्डः स्थानेषूक्तेषु कर्त्तने ॥ २३२ ॥

इति दण्डपारुष्यप्रकरणम् ॥

सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम् ।
तन्मूल्याद्द्विगुणो दण्डो निह्नवे तु चतुर्गुणः ॥ २३३॥
यः साहसं कारयति स दाप्यो द्विगुणं दमम् ।
यश्चैवमुक्त्वाहं दाता कारयेत् स चतुर्गुणम् ॥२३४॥
अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्य्याप्रहारदः ।
सन्दिष्टस्याप्रदाता च समुद्रगृहभेदकृत् ॥ २३५ ॥
सामन्तकुलिकादीनामपकारस्य कारकः ।
पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः ॥ २३६ ॥
स्वच्छन्दं विधवागामी विक्रुष्टेऽनाभिधावकः ।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन्॥२३७॥

शूद्रः प्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः ।
अयुक्तं शपथं कुर्व्वन्नयोग्योऽयोग्यकर्म्मकृत् ॥ २३८ ॥
वृषक्षुद्रपशूनाञ्च पुंस्त्वस्य प्रतिघातकृत् ।
साधारणस्यापलापी दासीगर्भविनाशकृत् ॥ २३९ ॥
पितृपुत्रस्वसृभ्रातृदम्पत्याचार्य्यशिष्यकाः ।
एषामपतितान्योऽन्यत्यागी च शतदण्डभाक् ॥ २४० ॥
इति साहसप्रकरणम् ॥

वसानस्त्रीन् पणान् दण्ड्यो नेजकस्तु पारांशुकम् ।
विक्रयावक्रयाधानयाचितेषु पणान् दश ॥ २४१ ॥
पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः ।
अन्तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः ॥ २४२ ॥
तुलाशासनमानानां कूटकृन्नाणकस्य च ।
एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम् ॥२४३ ॥
अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम् ।
स नाणकपरीक्षी तु दाप्य उत्तमसाहसम् ॥ २४४ ॥
भिषङ्मिथ्याचरन् दाप्यस्तिर्य्यक्षु प्रथमं दमम् ।
मानुषे मध्यमं राजमानुषेषूत्तमं दमम् ॥ २४५ ॥
अबन्ध्यं यश्च बध्नाति बन्ध्यं यश्च प्रमुञ्चति ।
अप्राप्तव्यवहारञ्च स दाप्यो दण्डमुत्तमम् ॥ २४६ ॥
मानेन तुलया वापि योऽंशमष्टमकं हरेत् ।
दण्डं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम्॥२४७
भेषजस्नेहलवणगन्धधान्यगुड़ादिषु ।
पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोड़श ॥२४८॥

चर्मचर्ममणिसूत्रायःकाष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ॥२४९॥
समुद्गपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥ २५० ॥
भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥ २५१ ॥
सम्भूय कुर्वतामर्घं सबाधं कारुशिल्पिनाम् ।
अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तमः ॥ २५२ ॥
सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः ॥ २५३ ॥
राजनि स्थाप्यते योऽर्घं प्रत्यहं तेन विक्रयः ।
क्रयो वा निःस्रवस्तस्माद्वणिजां लाभकृत् स्मृतः ॥२५४॥
स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम् ।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ॥ २५५ ॥
पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहकृत् कार्य्यः क्रेतुर्विक्रेतुरेव च ॥ २५६ ॥
गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते॥२५७॥
विक्रीतमपि विक्रेयं पूर्वं क्रेतर्य्यगृह्णति ।
हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥२५८॥
राजदैवोपघातेन पण्ये दोषमुपागते ।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥ २५९॥
अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि ।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत् ॥२६०॥

स्वयं हि हिन्न वणिजा पण्यानामविजानता ।
क्रीत्वा नानुशयः कार्य्यः कुर्व्वन् षड्भागदण्डभाक् २६१

इति विक्रयासम्प्रदानप्रकरणम् ॥

समवायेन वणिजां लाभार्थं कर्म्म कुर्वताम् ।
लाभालाभौ यथाद्रव्यं यथावा सम्बिदा कृतौ ॥२६२॥
प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम् ।
स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक् ॥ २६३ ॥
अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत् ।
व्यासिद्धं राजयोग्यञ्च विक्रीतं राजगामि तत् २६४॥
मिथ्या वदन् परीमाणं शुल्कस्थानादपासरन् ।
दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी ॥ २६५ ॥
तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् दश ।
ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे ॥ २६६ ॥
देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः ।
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः ॥ २६७ ॥
जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत् ।
अनेन विधिराख्यात ऋत्विक्कर्षककर्म्मिणाम् ॥२६८॥

इति सम्भूयसमुत्थानम् ॥

ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा ।
पूर्वकर्म्मापराधी च तथा चाशुद्धवासकः ॥ २६९ ॥
अन्येऽपि शङ्कया ग्राह्या जातिनामादिनिह्नवैः ।
द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः ॥ २७० ॥

अविज्ञातहतस्याशु कलहं सुतबान्धवाः।
प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक्॥ २८३॥
स्त्रीद्रव्यवृत्तिकामो वा केन वायं गतः सह।
मृत्युदेशसमासन्नं पृच्छेद्वापि जनं शनैः॥ २८४॥
क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः।
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना॥२८५॥
इति स्तेयप्रकरणम्॥
पुमान् संग्रहणे ग्राह्यः केशाकेशि परस्त्रियाः।
सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा॥ २८६॥
नीवीस्तनप्रावरणसक्थिकेशाभिमर्शनम्।
अदेशकालसम्भाषं सहैकस्थानमेव च॥ २८७॥
स्त्रीनिषेधे शतं दद्याद्द्विशतन्तु दमं पुमान्।
प्रतिषेधे द्वयोर्दण्डो यथा संग्रहणे तथा॥२८८॥
स्वजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः।
प्रातिलोम्ये बधः पुंसः स्त्रीणां नासादिकर्त्तनम्॥ २८९॥
अलङ्कृतां हरन् कन्यामुत्तमस्त्वन्यथाधमम्।
दण्डं दद्यात् सवर्णासु प्रातिलोम्ये बधः स्मृतः॥२९०
सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः।
दूषणे तु करच्छेद उत्तमायां बधस्तथा॥ २९१॥
शतं स्त्रीदूषणे दद्याद् द्वे तु मिथ्याभिशंसने।
पशून् गच्छन् शतं दाप्यो हीनां स्त्रीं गाञ्च मध्यमम्॥२९२
अवरुद्धासु दासीषु भुजिष्यासु तथैव च।
गम्यास्वपि पुमान् दाप्यः पञ्चाशत् पणिकं दमम्॥२९३॥
प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः।

बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक्॥ २९४॥
गृहीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत्।
अगृहीते समं दाप्यः पुमानप्येवमेव च॥ २९५॥
अयोनौ गच्छतो योषां पुरुषं वापि मोहतः।
चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे॥ २९६॥
अन्त्याभिगमने त्वङ्क्य कुबन्धेन प्रवासयेत्।
शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्य्यागमे बधः॥ २९७॥
इति स्त्रीसंग्रहप्रकरणम्॥

ऊनं वाप्यधिकं वापि लिखेद् यो राजशासनम्।
पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः॥ २९८॥
अभक्ष्येण द्विजं दूष्यन् दण्ड्य उत्तमसाहसम्।
क्षत्रियं मध्यमं वैश्यं प्रथमं शूद्रमर्द्धकम्॥ २९९॥
कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी।
त्र्यङ्गहीनस्तु कर्त्तव्यो दाप्यश्चोत्तमसाहसम्॥ ३००॥
चतुष्पादकृतो दोषो नापैहीति प्रजल्पतः।
काष्ठलोष्ट्रेषु पाषाणबाहुयुग्यकृतस्तथा॥ ३०१॥
च्छिन्ननस्येन यानेन तथा भग्नयुगादिना।
पश्चाच्चैवापसरता हिंसने स्वाम्यदोषभाक् ३०२॥
शक्तो ह्यमोचयन् स्वामी दंष्ट्रिणां शृङ्गिणां तथा।
प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं ततः॥ ३०३॥
जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम्।
उपजीव्यधनं मुञ्चंस्तदेवाष्टगुणीकृतम्॥ ३०४॥
राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशककारिणम्।

तन्मन्त्रस्य च भेत्तारं जिह्वां छित्त्वा प्रवासयेत्॥२०५॥
मृताङ्गलग्नविक्रेतुर्गुरोस्ताड़यितुस्तथा ।
राजयानासनारोढुर्दण्ड उत्तमसाहसः ॥ २०६ ॥
द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा ।
विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः ॥ २०७ ॥
दुर्द्दृष्टांस्तु पुनर्द्दृष्ट्वा व्यवहारान्नृपेण तु ।
सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम्॥२०८॥
यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः ।
तमायान्तं पुनर्जित्वा दापयेद्द्विगुणं दमम् ॥२०९॥
राज्ञाऽन्यायेन यो दण्डो गृहीतो वरुणाय तम् ।
निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ॥२१०॥
॥ इति श्रीयाज्ञवल्क्यीये धर्म्मशास्त्रे द्वितीयोऽध्यायः ॥

ऊनद्विवर्षं निखनेन्न कुर्य्यादुदकं ततः ।
आ श्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः ॥ १ ॥
यमसूक्तं यमीं गाथां जपद्भिर्लौकिकाग्निना ।
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ॥ २ ॥
सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः ।
अपनः शोशुचदघमनेन पितृदिङ्मुखाः ॥ ३ ॥
एवं मातामहाचार्य्यप्रेतानामुदकक्रिया ।
कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजाम् ॥ ४ ॥
सकृत्प्रसिञ्चन्त्युदकं नामगोत्रेण वाग्यताः ।
न ब्रह्मचारिणः कुर्य्युरुदकं पतितास्तथा ॥ ५ ॥
पाषण्ड्यनाश्रिता स्तेना भर्त्तृघ्नः कामगादिकाः ।

सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ॥ ६ ॥
कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान् ।
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥ ७ ॥
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
यः करोति स संमूढ़ो जलवुद्‌बुदसन्निभे ॥ ८ ॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः ।
कर्म्मभिः स्वशरीरोत्थैस्तत्र का परिवेदना ॥ ९ ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥ १० ॥
श्लेषास्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यन्तु क्रियाः कार्य्याः स्वशक्तितः ॥११॥
इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः ।
विदश्य निम्बपत्राणि नियताद्वारि वेश्मनः ॥ १२ ॥
आचम्याग्न्यादिसलिलं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य दत्त्वाश्मनि पदं शनैः ॥ १३ ॥
प्रवेशनादिकं कर्म्म प्रेतसंस्पर्शिनामपि ।
इच्छतां तत्‌क्षणाच्छूद्धिं परेषां स्नानसंयमात् ॥ १४ ॥
आचार्य्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती ।
सकटान्नं नचाश्नीयान्नच तैः सह संवसेत् ॥ १५ ॥
क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् पृथक् ।
पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ॥ १६ ॥
जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये ।
वैतानोपासनाः कार्य्याः क्रियाश्च श्रुतिदर्शनात् ॥१७
त्रिरात्रं दशरात्रं वा शावमाशौचमुच्यते ।

जनद्विवर्षमुभयोः सूतकं मातुरेव हि ॥ १८ ॥
पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनाद् ध्रुवम् ।
तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् ॥ १९ ॥
अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति ।
गर्भस्रावे मासतुल्यानिशाः शुद्धेस्तु कारणम् ॥ २० ॥
हतानां नृपगोविप्रैरन्वक्षञ्चात्मघातिनाम् ।
प्रोषिते कालशेषः स्यात् पूर्णे दत्त्वोदकं शुचिः ॥ २१ ॥
क्षत्त्रस्य द्वादशाहानि विशः पञ्चदशैव तु ।
त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः ॥ २२ ॥
आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता ।
त्रिरात्रमाव्रता देशाद्दशरात्रमतः परम् ॥ २३ ॥
अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् ।
गुर्व्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च ॥ २४ ॥
अनौरसेषु पुत्रेषु भार्य्यास्वन्यगतासु च ।
निवासराजनि प्रेते तदहः शुद्धिकारणम् ॥ २५ ॥
ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित् ।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः ॥२६
महीपतीनां नाशौचं हतानां विद्युता तथा ।
गोब्राह्मणार्थे संग्रामे यस्य चेच्छति भूमिपः ॥ २७ ॥
ऋत्विजां दीक्षितानाञ्च यज्ञियं कर्म कुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥ २८ ॥
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यः शौचं विधीयते ॥ २९ ॥
उदक्याशौचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत् ।

अब्लिङ्गानि जपेच्चैव सावित्रीं मनसा सकृत् ॥२० ॥
कालोऽग्निः कर्म्म मृद्वायुर्मनो ज्ञानं तपो जलम्।
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥ २१ ॥
अकार्य्यकारिणां दानं वेगो नद्यास्तु शुद्धिकृत्।
शोध्यस्य मृच्च तोयञ्च संन्यासी वै द्विजन्मनाम् ॥२२ ॥
तपोवेदविदां क्षान्तिर्विदुषां वर्ष्मणो जलम्।
जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते ॥ २३ ॥
भूतात्मनस्तपो विद्ये बुद्धेर्ज्ञानं विशोधनम्।
क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ॥ २४ ॥

इत्यशौचप्रकरणम् ॥

क्षात्रेण कर्म्मणा जीवेद्विशां वाप्यापदि द्विजः।
निस्तीर्य्य तामथात्मानं पावयित्वा न्यसेत् पथि ॥२५॥
फलोपलक्षौमसोममनुष्यापूपवीरुधः।
तिलौदनरसक्षारान् दधि क्षीरं घृतं जलम् ॥ २६ ॥
शस्त्रासवमधूच्छिष्टमधुलाक्षाश्च वर्हिषः।
मृच्चर्म्मपुष्पकुतपकेशतक्रविषक्षितीः ॥ २७ ॥
कौशेयनीललवणमांसैकशफसीसकान्।
शाकार्द्रौषधिपिण्याकपशुगन्धांस्तथैव च ॥ २८ ॥
वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन।
धर्म्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः ॥ २९॥
लाक्षालवणमांसानि पतनीयानि विक्रये।
पयोदधि च मद्यञ्च हीनवर्णकराणि च ॥ ४० ॥
आपद्गतः सम्प्रगृह्णन् भुञ्जानो वा यतस्ततः।

न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः॥ ४१॥
कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः।
सेवाऽनूपं नृपो भैक्षमापत्तौ जीवनानि तु॥ ४२॥
बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्।
प्रतिगृह्य तदाख्येयमभियुक्तेन धर्म्मतः॥ ४३॥
तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं तपः।
ज्ञात्वा राजा कुटुम्बञ्च धर्म्म्यां वृत्तिं प्रकल्पयेत्॥४४

इत्यापद्धर्म्मप्रकरणम्॥

सुतविन्यस्तपत्नीकस्तया वानुगतो वनम्।
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत्॥४५॥
अफालकृष्टेनाग्नींश्च पितृदेवातिथींस्तथा।
भृत्यांस्तु तर्पयेत् श्मश्रुजटालोमभृदात्मवान्॥ ४६॥
अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा।
अर्थस्य सञ्चयं कुर्य्यात् कृतमाश्वयुजे त्यजेत्॥ ४७॥
दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात्।
स्वाध्यायवान् दानशीलः सर्वसत्वहिते रतः॥ ४८॥
दन्तोलूखलिकः कालपक्वाशी वाऽश्मकुट्टकः।
श्रौतं स्मार्त्तं फलस्नेहैः कर्म्म कुर्य्यात् क्रियास्तथा॥ ४९॥
चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्व्वा वर्त्तयेत्सदा।
पक्षे गते वाप्यश्नीयान्मासे वाऽहनि वा गते॥ ५०॥
स्वप्याद्भूमौ शुचीरात्रौ दिवा संप्रपदैर्नयेत्।
स्थानासनविहारैर्व्वा योगाभ्यासेन वा तथा॥ ५१॥
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः।

आर्द्रवासास्तु हेमन्ते शक्त्या वापि तपश्चरेत् ॥५२॥
यः कण्टकैर्वितुदति चन्दनैर्यश्च लिम्पति ।
अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य च ॥ ५३ ॥
अग्नीन् वाप्यात्मसात् कृत्वा वृक्षावासो मिताशनः ।
वानप्रस्थगृहेष्वेव यात्रार्थं भैक्षमाचरेत् ॥ ५४ ॥
ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जीत वाग्यतः ।
वायुभक्षः प्रागुदीचीं गच्छेदावर्ष्मसंक्षयात् ॥ ५५ ॥
इति वानप्रस्थप्रकरणम् ॥

वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥५६॥
अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्य्यात्तु नान्यथा ॥५७॥
सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ।
एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥५८॥
अप्रमत्तश्चरेद्भैक्षं सायाह्ने नाभिलक्षितः ।
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ॥ ५९ ॥
यति पात्राणि मृद्वेणुदार्वलावुमयानि च ।
सलिलैः शुद्धिरेतेषां गोवालैश्चावघर्षणात् ॥ ६० ॥
सन्निरुध्येन्द्रियग्रामं रागद्वेषौ विहाय च ।
भयं हृत्वा च भूतानाममृती भवति द्विजः ॥ ६१ ॥
कर्त्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः ।
ज्ञानोत्पत्तिनिमित्तत्वात् स्वातन्त्र्यकरणाय च ॥६२॥
अवेक्ष्यागर्भवासाश्च कर्म्मजा गतयस्तथा ।

आधयो व्याधयः क्लेशा जरारूपविपर्य्ययाः ॥ ६३ ॥
भवो जातिसहस्रेषु प्रियाप्रियविपर्य्ययः ।
ध्यानयोगेन सम्पश्येत् सूक्ष्म आत्मात्मनि स्थितः ॥६४॥
नाश्रमः कारणं धर्म्मे क्रियमाणो भवेद्धि सः ।
अतो यदात्मनोऽपथ्यं परस्य न तदाचरेत् ॥ ६५ ॥
सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः ।
संयतेन्द्रियता विद्या धर्म्मः सर्व उदाहृतः ॥ ६६ ॥

इति यतिप्रकरणम् ॥

निःसरन्ति यथा लोहपिण्डात्तप्तात् स्फुलिङ्गकाः ।
सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति हि ॥ ६७ ॥
तत्रात्मा हि स्वयं किञ्चित् कर्म्म किञ्चित् स्वभावतः ।
करोति किञ्चिदभ्यासाद्धर्म्माधर्म्मोभयात्मकम् ॥६८॥
निमित्तमक्षरः कर्त्ता बोद्धा ब्रह्म गुणी वशी ।
अजः शरीरग्रहणात् स जात इति कीर्त्यते ॥ ६९ ॥
सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीम् ।
सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपि ॥ ७० ॥
आहुत्याप्यायते सूर्य्यस्तस्माद्वृष्टिरथौषधिः ।
तदन्नं रसरूपेण शुक्रत्वमुपगच्छति ॥ ७१ ॥
स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते ।
पञ्चधातु स्वयं षष्ठ आदत्ते युगपत् प्रभुः ॥ ७२ ॥
इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाहंकार एव च ॥ ७३ ॥
प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ ।

तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः ॥ ७४ ॥
प्रथमे मासि संक्लेदभूतो धातुविमूर्च्छितः।
मास्यर्वुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतः ॥ ७५ ॥
आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकम्।
वायोस्तु स्पर्शनं चेष्टां व्यूहनं रौक्ष्यमेव च ॥ ७६ ॥
पित्तात्तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशिताम्।
रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्द्दवम् ॥ ७७ ॥
भूमेर्गन्धं तथा घ्राणं गौरवं मूर्त्तिमेव च।
आत्मा गृह्णात्यजः सर्वं तृतीये स्पन्दते ततः ॥ ७८ ॥
दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं वापि तस्मात् कार्य्यं प्रियं स्त्रियाः॥७९
स्थैर्य्यं चतुर्थे त्वङ्गानां पञ्चमे शोणितोद्भवः।
षष्ठे बलस्य वर्णस्य नखरोम्णाञ्च सम्भवः ॥ ८० ॥
मनश्चैतन्ययुक्तोऽसौ नाड़ीस्नायुशिरायुतः।
सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि ॥ ८१ ॥
पुनर्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति।
अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते ॥ ८२ ॥
नवमे दशमे वापि प्रबलैः सूतिमारुतैः।
निःसार्य्यते वाण इव यन्त्रच्छिद्रेण सज्वरः ॥ ८३ ॥
तस्य दोढा शरीराणि षट्त्वचो धारयन्ति च।
षड़ङ्गानि तथास्थ्नाञ्च सह षष्ट्या शतत्रयम् ॥ ८४ ॥
स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः।
पाणिपादशलाकाश्च तासां स्थानचतुष्टयम् ॥ ८५ ॥
षष्ट्यङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम्।

चत्वार्य्यरत्निकास्थीनि जङ्घयोस्तावदेव तु ॥ ८६ ॥
द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे ।
अक्षतालूषके श्रोणीफलके च विनिर्द्दिशेत् ॥ ८७ ॥
भगास्थिकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ।
ग्रीवा पञ्चदशास्थिः स्याज्जत्र्वेकैकं तथा हनुः ॥८८॥
तन्मूले द्वे ललाटाक्षिगण्डे नासा घनास्थिका ।
पार्श्वकास्थालकैः सार्द्धमर्वुदैश्च द्विसप्ततिः ॥ ८९ ॥
द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा ।
उरः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ॥ ९० ॥
गन्धरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः ।
नासिका लोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च॥९१
हस्तौ पायुरुपस्थश्च वाक्पादौ चेति पञ्च वै ।
कर्म्मेन्द्रियाणि जानीयान्मनश्चैवोभयात्मकम् ॥ ९२ ॥
नाभिरोजोगुदं शुक्रं शोणितं शङ्खौ तथा ।
मूर्द्धांसकण्ठहृदयं प्राणस्यायतनानि तु ॥ ९३ ॥
वपावसावहननं नाभिः क्लोमयकृत् प्लिहा ।
क्षुद्रान्त्रं वक्कौ वस्तिः पुरीषाधानमेव च ॥ ९४ ॥
आमाशयोऽथ हृदयं स्थूलान्त्रं गुदमेव च ।
उदरञ्च गुदौ कौष्ठ्यौ विस्तारोऽयमुदाहृतः ॥ ९५ ॥
कनीनिके चाक्षिकूटे शष्कुली कर्णपत्रकौ ।
कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे ॥९६ ॥
वङ्क्षणौ वृषणौ वृक्कौ श्लेष्मसङ्घातजौ स्तनौ ।
उपजिह्वा स्फिचौ बाहू जङ्घोरुषु च पिण्डिका ॥९७
तालूदरं वस्ति शीर्षं चिवुके गलशुण्डिके ।

अवटश्चैवमेतानि स्थानान्यत्र शरीरके ॥ ९८ ॥
अक्षिकर्णचतुष्कञ्च पदहस्तहृदयानि च।
नवच्छिद्राणि तान्येव प्राणस्यायतनानि तु ॥ ९९ ॥
शिराः शतानि सप्तैव नवस्नायुशतानि च।
धमनीनां शते द्वे च पेशी पञ्चशतानि च १०० ॥
एकोनत्रिंशल्लक्षाणि तथा नवशतानि च।
षट्पञ्चाशच्च जानीत शिरा धमनिसंज्ञिताः ॥ १०१ ॥
त्रयोलक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणाम्।
सप्तोत्तरं मर्म्मशतं द्वे च सन्धिशते तथा ॥ १०२ ॥
रोम्णां कोटाश्च पञ्चाशच्चतस्रः कोट्य एव च।
सप्तषष्टिस्तथा लक्षाः सार्द्धाः स्वेदायनैः सह ॥१०३॥
वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः।
यद्यप्येकोऽनुवेदैषां भावानाञ्चैव संस्थितिम् ॥१०४॥
रसस्य नव विज्ञेया जलस्याञ्जलयो दश।
सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्त्तिताः ॥ १०५ ॥
षट्श्लेष्मा पञ्च पित्तञ्च चत्वारो मूत्रमेव च।
वसात्रयो द्वौ तु मेदोमज्जैकोऽर्द्धन्तु मस्तके ॥ १०६ ॥
श्लेष्मौजसस्तावदेव रेतसस्तावदेव तु।
इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ ॥१०७ ॥
द्वासप्ततिसहस्राणि हृदयादभिनिःसृता।
हिताहितानामनाड्यस्तासां मध्ये शशिप्रभम् ॥ १०८॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः।
स ज्ञेयस्तं विदित्वेह पुनरायतने न तु ॥ १०९ ॥
ज्ञेयं चारण्यकमहं यदादित्यादवाप्तवान्।

योगशास्त्रञ्च मत्प्रोक्तं ज्ञेयं योगमभीप्सता ॥ ११० ॥
अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः ॥१११
यथाविधानेन पठन् सामगायमविच्युतम्।
सावधानस्तदभ्यासात् परं ब्रह्माधिगच्छति ॥ ११२ ॥
अपरान्तकमुल्लोप्यं मद्रकं प्रकरीन्तथा।
औवेणकं सरोविन्दुमुत्तरं गीतकानि च ॥ ११३ ॥
ऋग्गाथापाणिकादक्षविहिताब्रह्मगीतिकाः।
ज्ञेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम् ॥ ११४ ॥
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः।
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥ ११५ ॥
गीतज्ञो यदिगीतेन नाप्नोति परमं पदम्।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥ ११६ ॥
अनादिरात्मा कथितस्तस्यादिस्तु शरीरकम्।
आत्मनश्च जगत् सर्वं जगतश्चात्मसम्भवः ॥ ११७ ॥
प्रकथमेतद्विमुह्यामः सदेवासुरमानवम्।
जगदुद्भूतमात्मा च कथं तस्मिन् वदस्व नः ॥ ११८ ॥
उमोहजालमपास्येह पुरुषो दृश्यते हि यः।
सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकः ॥ ११९ ॥
स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः।
विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति ॥ १२० ॥
यो द्रव्यदेवतात्यागसम्भूतो रस उत्तमः।
देवान् सन्तर्प्य स रसो यजमानं फलेन च ॥ १२१ ॥
संयोज्य वायुना सोमं नीयते रश्मिभिस्ततः।

ऋग्यजुःसामविहितं सौरं धामोपनीयते ॥ १२२ ॥
स्वमण्डलादसौ सूर्य्यः सृजत्यमृतमुत्तमम्।
यज्जन्म सर्वभूतानामशनानशनात्मनाम् ॥ १२३ ॥
तस्मादन्नात् पुनर्यज्ञः पुनरन्नं पुनः क्रतुः।
एवमेतदनाद्यन्तं चक्रं सम्परिवर्त्तते ॥ १२४ ॥
अनादिरात्मा सम्भूतिर्विद्यते नान्तरात्मनः।
समवायी तु पुरुषो मोहेच्छाद्वेषकर्म्मजः ॥ १२५ ॥
सहस्रात्मा मया यो व आदिदेव उदाहृतः।
मुखबाहूरुपज्जाः स्युस्तस्य वर्णा यथाक्रमम् ॥ १२६॥
पृथिवी पादतस्तस्य शिरसो द्यौरजायत।
नस्तः प्राणादिशः श्रोत्रात् स्पर्शाद्वायुर्मुखाच्छिखी ॥ १२७॥
मनसश्चन्द्रमा जातश्चक्षुषश्च दिवाकरः।
जघनादन्तरीक्षञ्च जगच्च सचराचरम् ॥ १२८ ॥
यद्येव स कथं ब्रह्मन् पापयोनिषु जायते।
ईश्वरः स कथं भावैरनिष्टैः संप्रयुज्यते ॥ १२९ ॥
करणैरन्वितस्यापि पूर्वज्ञानं कथञ्चन।
वेत्ति सर्वगतां कस्मात् सर्वगोऽपि न वेदनाम् ॥ १३०॥
अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्म्मजैः।
दोषैः प्रयाति जीवोऽयं भवं योनिशतेषु च ॥१३१ ॥
अनन्ताश्च यथाभावाः शरीरेषु शरीरिणाम्।
रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ॥ १३२ ॥
विपाकः कर्म्मणां प्रेत्य केषाञ्चिदिह जायते।
इह चामुत्र वैकेषां भावस्तत्र प्रयोजनम् ॥ १३३ ॥
परद्रव्याण्यभिध्यायं स्तथा निष्टानि चिन्तयन्।

वितथाभिनिवेशी च जायन्तेऽन्यासु योनिषु ॥१३४॥
पुरुषोऽनृतवादी च पिशुनः पुरुषस्तथा।
अनिबद्धप्रलापी च मृगपक्षिषु जायते॥ १३५ ॥
अदत्तादाननिरतः परदारोपसेवकः।
हिंसकश्चाविधानेन स्थावरेष्वभिजायते॥ १३६ ॥
आत्मज्ञः शौचवान् दान्तस्तपस्वी विजितेन्द्रियः।
धर्म्मकृद्वेदविद्यावित् सात्त्विको देवयोनिषु॥ १३७ ॥
असत्काररतोऽधीरआरम्भी विषयी च यः।
स राजगोमनुष्येषु मृतोजन्माधिगच्छति॥ १३८॥
निद्रालुः क्रूरकृल्लुब्धानास्तिकोयाचकस्तथा।
प्रमादवान् भिन्नवृत्तोभवेत्तिर्य्यक्षु तामसः॥ १३९ ॥
रजसा तमसा चैवं समाविष्टोभ्रमन्निह।
भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते॥ १४० ॥
मलिनोहि यथादर्शोरूपालोकस्य न क्षमः।
तथाऽविपक्वकरण आत्मा ज्ञानस्य न क्षमः॥ १४१ ॥
कट्वेर्व्वारौ यथाऽपक्वे मधुरः सन् रसोऽपि न॥
प्राप्यते ह्यात्मनि तथा नापक्वकरणे ज्ञता॥ ४२ ॥
सर्व्वाश्रयां निजे देहे देही विन्दति वेदनाम्।
योगी मुक्तश्च सर्व्वासां यो नचाप्नोति वेदनाम् ॥१४३॥
आकाशमेकं हि यथा घटादिषु पृथग्भवेत्।
तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान्॥ १४४॥
ब्रह्मखानिलतेजांसि जलं भूश्चेति धातवः।
इमे लोका एष चात्मा तस्माच्च स चराचरम्॥ १४५॥
मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटम्।

करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥ १४६ ॥
हेममात्रमुपादाय रूपं वा हेमकारकः ।
निजलालासमायोगात् कोशं वा कोशकारकः ॥ १४७॥
कारणान्येवमादाय तासु तास्विह योनिषु ।
सृजत्यात्मानमात्मा च सम्भूय करणानि च ॥ १४८ ॥
महाभूतानि सत्यानि यथात्मापि तथैव हि ।
कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति ॥ १४९ ॥
वाचं वा को विजानाति पुनः संश्रुत्य संश्रुताम् ।
अतीतार्थस्मृतिः कस्य को वा स्वप्नस्य कारकः ॥१५० ॥
जातिरूपवयोवृत्तविद्यादिभिरहङ्कृतः ।
शब्दादिविषयोद्योगं कर्म्मणा मनसा गिरा ॥१५१ ॥
स सन्दिग्धमतिः कर्म्मफलमस्ति न वेति वा ।
विप्लुतः सिद्धमात्मानमसिद्धोऽपि हि मन्यते ॥ १५२ ॥
मम दाराः सुतामात्या अहमेषामिति स्थितिः ।
हिताहितेषु भावेषु विपरीतमतिः सदा ॥ १५३ ॥
ज्ञेयज्ञे प्रकृतौ चैव विकारे वाऽविशेषवान् ।
अनाशकानलापातजलप्रपतनोद्यमी ॥ १५४ ॥
एवं वृत्तोऽविनीतात्मा वितथाभिनिवेशवान् ।
कर्म्मणा द्वेषमोहाभ्यामिच्छया चैव बध्यते ॥ १५५ ॥
आचार्य्योपासनं वेदशास्त्रार्थेषु विवेकिता ।
तत्कर्म्मणामनुष्ठानं सङ्गः सद्भिर्गिरः शुभाः ॥ १५६ ॥
स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम् ।
त्यागः परिग्रहाणाञ्च जीर्णकाषायधारणम् ॥ १५७ ॥
विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् ।

शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनम् ॥ १५८ ॥
नीरजस्तमता सत्त्वशुद्धिर्निःस्पृहता शमः ।
एतैरुपायैः संशुद्धः सत्त्वयुक्तोऽमृतीभवेत् ॥ १५९ ॥
तत्त्वस्मृतेरुपस्थानात् सत्त्वयोगात परिक्षयात् ।
कर्म्मणां सन्निकर्षाच्च सतां योगः प्रवर्त्तते ॥ २६० ॥
शरीरसंक्षये यस्य मनः सत्त्वस्थमीश्वरे ।
अविप्लुतमतिः सम्यक् स जातिस्मरतामियात् ॥ १६१ ॥
यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम् ।
नानारूपाणि कुर्व्वाणस्तथात्मा कर्म्मजास्तनूः ॥ २६२ ॥
कालकर्म्मात्मबीजानां दोषैर्म्मातुस्तथैव च ।
गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मतः ॥ १६३ ॥
अहङ्कारेण मनसा गत्या कर्म्मफलेन च ।
शरीरेण च नात्मायं मुक्तपूर्व्वः कथञ्चन ॥ १६४ ॥
वर्त्त्याधारस्नेहयोगाद् यथा दीपस्य संस्थितिः ।
विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः ॥ १६५ ॥
अनन्ता रश्मयस्तस्य दीपवद् यः स्थितो हृदि ।
सितासिताः कद्रुनीलाः कपिलाः पीतलोहिताः॥१६६॥
ऊर्द्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्य्यमण्डलम् ।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥ १६७ ॥
यदस्यान्यद्रश्मिशतमूर्द्ध्वमेव व्यवस्थितम् ।
तेन देवशरीराणि सधामानि प्रपद्यते ॥ २६८ ॥
येऽनेकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः ।
इह कर्म्मोपभोगाय तैः संसरति सोऽवशः ॥ १६९ ॥
वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च ।

आर्त्या गत्या तथागत्या सत्येन ह्यनृतेन च ॥ १७० ॥
श्रेयसा सुखदुःखाभ्यां कर्म्मभिश्च शुभाशुभैः।
निमित्तशकुनज्ञानग्रहसंयोगजैः फलैः ॥ १७१ ॥
तारानक्षत्रसञ्चारैर्जागरैः स्वप्नजैरपि।
आकाशपवनज्योतिर्जलभूतिमिरैस्तथा ॥ १७२ ॥
मन्वन्तरैर्युगप्राप्त्या मन्त्रौषधिफलैरपि।
वित्तात्मानं विद्यमानं कारणं जगतस्तथा ॥ १७३ ॥
अहङ्कारः स्मृतिर्म्मेधा द्वेषो बुद्धिः सुखं धृतिः।
इन्द्रियान्तरसञ्चार इच्छा धारणजीविते ॥ १७४ ॥
स्वर्गः स्वप्नश्च भावानां प्रेरणं मनसो गतिः।
निमेषश्चेतना यत्न आदानं पाञ्चभौतिकम् ॥१७५ ॥
यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः।
तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः ॥१७६ ॥
बुद्धीन्द्रियाणि सार्थानि मनः कर्मेन्द्रियाणि च।
अहङ्कारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥ १७७ ॥
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते।
ईश्वरः सर्व्वभूतस्थः सन्नसन् सदसच्च यः ॥ १७८ ॥
बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहङ्कारसम्भवः।
तन्मात्रादीन्यहङ्कारादेकोत्तरगुणानि च ॥ १७९ ॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणाः।
यो यस्मान्निःसृतश्चैषां स तस्मिन्नेव लीयते ॥ १८० ॥
यथात्मानं सृजत्यात्मा तथा वः कथितो मया।
विपाकात्त्रिप्रकाराणां कर्म्मणामीश्वरोऽपि सन् ॥१८१॥
सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्त्तिताः।

रजस्तमोभ्यामाविष्टश्चक्रवद् भ्राम्यते हि सः ॥१८२॥
अनादिरादिमांश्चैव स एव पुरुषः परः ।
लिङ्गेन्द्रियग्राह्यरूपः सविकार उदाहृतः ॥ १८३ ॥
पितृयानोऽजवीथ्याश्च यदगस्त्यस्य चान्तरम् ।
तेनाग्निहोत्रिणो यान्ति स्वर्गकामा दिवं प्रति ॥१८४॥
ये च दानपराः सम्यगष्टाभिश्च गुणैर्युताः ।
तेऽपि तेनैव मार्गेण सत्यव्रतपरायणाः ॥ १८५ ॥
तत्राष्टाशीतिसाहस्रा मुनयो गृहमेधिनः ।
पुनरावर्त्तिनो वीजभूता धर्म्मप्रवर्त्तकाः ॥ १८६ ॥
सप्तर्षिनागवीथ्यन्तर्देवलोकसमाश्रिताः ।
तावन्त एव मुनयः सर्व्वारम्भविवर्जिताः ॥ १८७ ॥
तपसा ब्रह्मचर्य्येण सङ्गत्यागेन मेधया ।
तत्रैव तावत्तिष्ठन्ति यावदाहूतसंप्लवम् ॥ १८८ ॥
यतो वेदाः पुराणञ्च विद्योपनिषदस्तथा ।
श्लोकाः सूत्राणि भाष्याणि यच्च किञ्चन वाङ्मयम् ॥१८९॥
वेदानुवचनं यज्ञो ब्रह्मचर्य्यं तपो दमः ।
श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ॥ १९० ॥
स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु ।
द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः ॥ १९१॥
य एनमेवं विन्दन्ति ये चारण्यकमाश्रिताः ।
उपासते द्विजाः सत्यं श्रद्धया परया युताः ॥ १९२ ॥
क्रमात्ते सम्भवन्त्यर्च्चिरहः शुक्लं तथोत्तरम् ।
अयनं देवलोकञ्च सवितारं सवैद्युतम् ॥ १९३ ॥
ततस्तान् पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् ।

करोति पुनरावृत्तिस्तेषामिह न विद्यते ॥ १९४ ॥
यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः ।
धूमं निशां कृष्णपक्षं दक्षिणायनमेव च ॥ १९५ ॥
पितृलोकं चन्द्रमसं वायुं वृष्टिं जलं महीम् ।
क्रमात्ते सम्भवन्तीह पुनरेव व्रजन्ति च ॥ १९६ ॥
एतद् यो न विजानाति मार्गद्वितयमात्मवान् ।
दन्दशूकः पतङ्गो वा भवेत् कीटोऽथवा कृमिः॥१९७॥
ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करम् ।
उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा ॥१९८॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् ।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ॥ १९९ ॥
सन्निरुध्येन्द्रियग्रामं नातीनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत् ॥ २०० ॥
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः ।
धारयेत्तत्र चात्मानं धारणां धारयन् बुधः ॥ २०१ ॥
अन्तर्द्धानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रज्ञता तथा ।
निजं शरीरमुत्सृज्य परकायप्रवेशनम् ॥ २०२ ॥
अर्थानां छन्दतः सृष्टिर्योगसिद्धेस्तु लक्षणम् ।
सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते ॥ २०३ ॥
अथवाप्यभ्यसन् वेदं न्यस्तकामो वने वसन् ।
अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् ॥ २०४ ॥
न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि हि मुच्यते ॥२०५॥

इत्यध्यात्मप्रकरणम् ॥

महापातकजान् घोरान्नरकान् प्राप्य गर्हितान्।
कर्म्मक्षयात् प्रजायन्ते महापातकिनस्त्विह ॥ २०६ ॥
मृगश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छति।
खरपुक्कशवेणानां सुरापो नात्रसंशयः ॥ २०७ ॥
कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात्।
तृणगुल्मलतात्वञ्च क्रमशो गुरुतल्पगः ॥ २०८ ॥
ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः।
हेमहारी तु कुनखी दुश्चर्म्मा गुरुतल्पगः ॥ २०९ ॥
यो येन संवसत्येषां स तल्लिङ्गोऽभिजायते।
अन्नहर्त्तामयावी स्यान्मूकोवागपहारकः ॥ २१० ॥
धान्यमिश्रोऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः।
तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचकः ॥ २११ ॥
परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च।
अरण्ये निर्ज्जने घोरे भवति ब्रह्मराक्षसः ॥ २१२ ॥
हीनजातौ प्रजायेत पररत्नापहारकः।
पत्रशाकं शिखी हृत्वा गन्धांश्छुच्छुन्दरिः शुभान् ॥ २१३ ॥
मूषिको धान्यहारी स्याद्यानमुष्ट्रं फलं कपिः।
जलं प्लवः पयः काको गृहकारी ह्युपस्करम् ॥ २१४ ॥
मधु दंशः फलं गृध्रो गां गोधाग्निं वकस्तथा।
श्वित्री वस्त्रं श्वा रसन्तु चीरी लवणहारकः ॥२१५॥
प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्म्मणि।
द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः ॥ २१६ ॥
यथाकर्म्मफलं प्राप्य तिर्य्यक्त्वं कालपर्य्ययात्।
जायन्ते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः ॥ २१७ ॥

ततो निष्कल्मषीभूताः कुले महति योगिनः ।
जायन्ते विद्ययोपेता धनधान्यसमन्विताः ॥ २१८ ॥
विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥ २१९ ॥
तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये ।
एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति ॥ २२० ॥
प्रायश्चित्तमकुर्व्वाणाः पापेषु निरता नराः ।
अपश्चात्तापिनः कष्टान्नरकान् यान्ति दारुणान् ॥२२१
तामिस्रं लोहशङ्कुञ्च महानिरयशाल्मली ।
रौरवं कुड्मलं पूतिमृत्तिकं कालसूत्रकम् ॥ २२२ ॥
संघातं लोहितोदञ्च सविषं सम्प्रतापनम् ।
महानरककाकोलं संजीवनमहापथम् ॥ २२३ ॥
अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च ।
असिपत्रवनञ्चैव तापनञ्चैकविंशकम् ॥ २२४ ॥
महापातकजैर्घोरैरुपपातकजैस्तथा ।
अन्विता यान्त्यचरितप्रायश्चित्ता नराधमाः ॥ २२५ ॥
प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्य्यस्तु वचनादिह जायते ॥ २२६ ॥
ब्रह्महा मद्यपः स्तेनो गुरुतल्पग एव च ।
एते महापातकिनो यश्च तैः सह संवसेत् ॥ २२७॥
गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः ।
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ॥ २२८ ॥
निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् ।
रजस्वलामुखास्वादः सुरापानसमानि तु ॥ २२९ ॥

अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ।
निःक्षेपस्य च सर्व्वं हि सुवर्णस्तेयसम्मितम् ॥ २३० ॥

सखिभार्य्याकुमारीषु स्वयोनिष्वन्त्यजासु च ।
सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ॥ २३१ ॥

पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि ।
मातुः सपत्नीं भगिनीमाचार्य्यतनयां तथा ॥ २३२ ॥

आचार्य्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ।
छित्त्वा लिङ्गं बधस्तस्य सकामायाः स्त्रिया अपि २३३॥

गोबधो व्रात्यता स्तेयमृणानाञ्चानपक्रिया ।
अनाहिताग्निताऽपण्यविक्रयः परिवेदनम् ॥ २३४ ॥

भृताद्ध्ययनादानं भृतकाध्यापनं तथा ।
पारदार्य्यं पारिवित्त्यं वार्द्धुर्य्यं लवणक्रिया ॥ २३५ ॥

स्त्रीशूद्रविट्क्षत्रबधो निन्दितार्थोपजीवनम् ।
नास्तिक्यं व्रतलोपश्च सुतानाञ्चैव विक्रयः ॥ २३६ ॥

धान्यकुप्यपशुस्तेयमयाज्यानाञ्च याजनम् ।
पितृमातृगुरुत्यागस्तड़ागारामविक्रयः ॥ २३७ ॥

कन्यासंदूषणञ्चैव परिवेदकयाजनम् ।
कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम् ॥ २३८ ॥

आत्मार्थे च क्रियारम्भो मद्यपस्त्रीनिषेवणम् ।
स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च ॥२३९ ॥

इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम् ।
हिंसायन्त्रविधानञ्च व्यसनान्यात्मविक्रयः ॥ २४० ॥

असच्छास्त्राधिगमनमाकरेष्वधिकारिता ।
भार्य्याया विक्रयश्चैषामेकैकमुपपातकम् ॥२४१ ॥

शिरःकपाली ध्वजवान् भिक्षाशी कर्म्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्॥२४२॥
ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य वा ।
तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् ॥ २४३ ॥
दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा ।
दृष्ट्वा पथि निरातङ्कं कृत्वा वा ब्रह्महा शुचिः ॥२४४॥
आनीय विप्रसर्वस्वं हृतं घातित एव वा ।
तन्निमित्तं क्षतः शस्त्रैर्जीवन्नपि विशुद्ध्यति ॥ २४५ ॥
लोमभ्यः स्वाहेत्येवं हि लोमप्रभृति वै तनुम् ।
मज्जानां जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम् ॥ २४६ ॥
संग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात् ।
मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुद्ध्यति ॥ २४७॥
अरण्ये नियतो जप्त्वा त्रिर्वै वेदस्य संहिताम् ।
मुच्यते वा मितांशीत्वा प्रतिस्रोतः सरस्वतीम् ॥ २४८ ॥
पात्रे धनं वा पर्य्याप्तं दत्त्वा शुद्धिमवाप्नुयात् ।
आदातुश्च विशुद्ध्यर्थमिष्टिर्वैश्वानरी स्मृता ॥ २४९ ॥
यागस्थक्षत्रविड्घाती चरेद्ब्रह्महणो व्रतम् ।
गर्भहा च यथावर्णं तथात्रेयीनिसूदकः ॥ २५० ॥
चरेद्व्रतमहत्वापि घातार्थञ्चेत् समागतः ।
द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत् ॥ २५१ ॥
सुराम्बुघृतगोमूत्रपयसामग्निसन्निभम् ।
सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति ॥ २५२ ॥
बालवासा जटी वापि ब्रह्महत्याव्रतञ्चरेत् ।
पिण्याकं वा कणां वापि भक्षयेत्त्रिसमानिशि ॥२५३॥

अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव वा ।
पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ २५४ ॥
पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् ।
इहैव तु शुनी गृध्री शूकरी चाभिजायते ॥ २५५ ॥
ब्राह्मणःस्वर्णहारी तु राज्ञे मूषलमर्पयेत् ।
स्वकर्म्म ख्यापयंस्तेन हतो मुक्तोऽपि वा शुचिः ॥२५६॥
अनिवेद्य नृपे शुद्ध्येत् सुरापव्रतमाचरन् ।
आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृत् ॥ २५७॥
तप्तेऽयःशयने सार्द्धमायस्या योषिता स्वपेत् ।
गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यांश्चोत्सृजेत्तनुम् ॥२५८॥
प्राजापत्यं चरेत् कृच्छ्रं समा वा गुरुतल्पगः ।
चान्द्रायणं वा त्रीन्मासानभ्यस्यन् वेदसंहिताम्॥२५९
एभिस्तु संवसेद्द यो वै वत्सरं सोऽपि तत्समः ।
कन्यां समुद्वहेदेषां सोपवासामकिञ्चनाम् ॥ २६० ॥
चान्द्रायणं चरेत् सर्व्वानवकृष्टान्निहन्य तु ।
शूद्रोऽधिकारहीनोऽपि कालेनानेन शुध्यति ॥ २६१ ॥
मिथ्याभिशंसिनो दोषो द्विगुणोऽनृतवादिनः ।
मिथ्याभिशस्तपापञ्च समादत्ते मृषावदन् ॥ २६२ ॥
पञ्चगव्यं पिबेद्द गोघ्नो मासमासीत संयतः ।
गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुद्ध्यति ॥ २६३ ॥
कृच्छ्रं चैवातिकृच्छ्रञ्च चरेद्वापि समाहितः ।
दद्यात्त्रिरात्रं वोपोष्य वृषभैकादशास्तु गाः ॥ २६४ ॥
उपपातकशुद्धिः स्यादेवञ्चान्द्रायणेन वा ।
पयसा वापि मासेन पराकेणाथवा पुनः ॥ २६५ ॥

ऋषभैकसहस्रा गा दद्यात् क्षत्रवधे पुमान्।
ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत् ॥ २६६ ॥
वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं गवाम्।
षण्मासान् शूद्रहा ह्येतद्दद्याद्धेनूर्दशापि वा ॥ २६७ ॥
दुर्वृत्तां ब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु।
दृतिं धनुर्वस्तमविं क्रमाद्दद्याद्विशुद्धये ॥ २६८ ॥
अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतञ्चरेत्।
अस्थिमतां सहस्रञ्च तथानस्थिमतामनः ॥ २६९ ॥
मार्ज्जारगोधानकुलमण्डूकश्वपतत्रिणः।
हत्वा त्र्यहं पिवेत् क्षीरं कृच्छ्रं वा पादिकं चरेत् ॥२७०
गजे नीलवृषाः पञ्च शुके वत्सो द्विहायनः।
खराजमेषेषु वृषो देयः क्रौञ्चे त्रिहायणः ॥ २७१ ॥
हंसश्येनकपिक्रव्याज्जलस्थलशिखण्डिनः।
भासञ्च हत्वा दद्याद्गामक्रव्यादस्तु वत्सिकाम् ॥ २७२
उरगेष्वायसो दण्डः पण्डके त्रपुसीसकम्।
कोले घृतघटो देय उष्ट्रे गुञ्जा हयेऽंशुकम् ॥ २७३ ॥
तित्तिरौ तु तिलद्रोणं गजादीनामशक्नुवन्।
दानं दातुञ्चरेत् कृच्छ्रमेकैकस्य विशुद्धये ॥ २७४ ॥
फलपुष्पान्नरसजसत्वघाते घृताशनम्।
किञ्चित्सास्थिवधे देयं प्राणायामस्त्वनस्थिके ॥ २७५॥
वृक्षगुल्मलतावीरुच्छेदने जप्यमृक्शतम्।
स्यादोषधिवृथाच्छेदे क्षीराशी गोनुगो दिनम् ॥ २७६
पुंश्चलीवानरखरैर्दष्टश्वोष्ट्रादिवायसैः।
प्राणायामं जले कृत्वा घृतं प्राश्य विशुद्ध्यति ॥२७७

यन्मेऽद्यरेत इत्याभ्यां स्कन्नं रेतोऽनुमन्त्रयेत् ।
स्तनान्तरं भ्रुवोर्मध्यं तेनानामिकया स्पृशेत् ॥२७८
मयि तेज इति च्छायां स्वां दृष्ट्वाम्बुगतां जपेत् ।
सावित्रीमशुचौ दृष्टे च,पल्ये चानृतेऽपि च ॥ २७९
अवकीर्णी भवेद् गत्वा ब्रह्मचारी तु योषितम् ।
गर्द्दभं पशुमालभ्य नैर्ऋत्यं स विशुद्ध्यति ॥ २८० ॥
भैक्षाग्निकार्य्ये त्यक्त्वा तु सप्तरात्रमनातुरः ।
कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयम् ॥ २८१ ॥
उपस्थानं ततः कुर्य्यात् समासिञ्चत्वनेन तु ।
मधुमांसाशने कार्य्यः कृच्छ्रः शेषव्रतानि च ॥ २८२ ॥
प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुद्ध्यति ।
कृच्छ्रत्रयं गुरुः कुर्य्यान्म्रियेत प्रहितो यदि ॥ १८३॥
क्रियमाणोपकारे तु मृते विप्रे न पातकम् ।
विपाके गोवृषाणाञ्च भेषजाग्निक्रियासु च ॥ २८४ ॥
महापापोपपापाभ्यां योऽभिशंसेन्मृषापरम् ।
अब्भक्षो मासमासीत सजापो नियतेन्द्रियः ॥२८५ ॥
अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा ।
निर्वपेच्च पुरोडाशं वायव्यं पशुमेव वा ॥ २८६ ॥
अनियुक्तो भ्रातृजायां गच्छंश्चान्द्रायणञ्चरेत् ।
त्रिरात्रान्ते घृतं प्राश्य गत्वोदक्यां विशुद्ध्यति ॥२८७
त्रीन् कृच्छ्रानाचरेद् व्रात्ययाजकोऽभिचरन्नपि ।
वेदप्लावी यवाश्यब्दं त्यक्त्वा च शरणागतम् ॥ २८८ ॥
गोष्ठे वसन् ब्रह्मचारी मासमेकं पयोव्रतः ।
गायत्रीजप्यनिरतो मुच्यतेऽसत्प्रतिग्रहात् ॥ २८९ ॥

प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः ।
नग्नः स्नात्वा च भुक्त्वा च गत्वा चैवं दिवा स्त्रियम् २९०॥
गुरुं त्वं कृत्य हुंकृत्य विप्रं निर्जित्य वादतः ।
बद्ध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनम् ॥ २९१॥
विप्रदण्डोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने ।
कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते २९२
देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ।
प्रायश्चित्तं प्रकल्प्यं स्याद् यत्र चोक्ता न निष्कृतिः ॥२९३ ॥
दासीकुम्भं बहिर्ग्रामान्निनयेयुः स्वबान्धवाः ।
पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तम् ॥२९४॥
चरितव्रत आयाते निनयेरन्नवं घटम् ।
जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः ॥ २९५॥
पतितानामेष एव विधिः स्त्रीणां प्रकीर्त्तितः ।
वासो गृहान्तिके देयमन्नं वासः सरक्षणम् ॥२९६ ॥
नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् ।
विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम् ॥ २९७ ॥
शरणागतबालस्त्रीहिंसकान् संवसेन्नतु ।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् ॥ २९८ ॥
घटेऽपवर्जिते ज्ञाति मध्यस्थोयवसं गवाम् ।
प्रदद्यात् प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया२९९
विख्यातदोषः कुर्व्वीत पर्षदोऽनुमतं व्रतम् ।
अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् ॥ ३०० ॥
त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणम् ।
अन्तर्जले विशुद्ध्येत गां दत्त्वा च पयस्विनीम् ॥३०१॥

लोमभ्यः स्वाहेत्यथवा दिवसं मारुताशनः ।
जले स्थित्वाभिजुहुयाच्चत्वारिंशद्‌घृताहुतीः ॥ ३०२ ॥
त्रिरात्रोपोषितो भूत्वा कुष्माण्डीभिर्घृतं शुचिः ।
सुरापः स्वर्णहारी तु रुद्रजापी जले स्थितः ॥ ३०३
सहस्रशीर्षाजापी तु मुच्यते गुरुतल्पगः ।
गौर्देया कर्म्मणोऽस्यान्ते पृथगेभिः पयस्विनी ॥ ३०४ ॥
प्राणायामशतं कार्य्यं सर्वपापापनुत्तये ।
उपपातकजातानामनादिष्टस्य चैव हि ॥ ३०५ ॥
ओङ्काराभिष्टुतं सोमसलिलं पावनं पिवेत् ।
कृत्वा तु रेतोविण्मूत्रप्राशनञ्च द्विजोत्तमः ॥ ३०६ ॥
निशायां वा दिवा वापि यदज्ञानकृतं भवेत् ।
त्रैकाल्यसन्ध्याकरणात्तत् सर्वं विप्रणश्यति ॥ ३०७ ॥
शुक्रियारण्यकजपो गायत्राश्च विशेषतः ।
सर्वपापहरा ह्येते रुद्रैकादशिनी तथा ॥ ३०८ ॥
यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या वाचनन्तथा ॥३०९ ॥
वेदाभ्यासरतं चान्तं महायज्ञक्रियारतम् ।
न स्पृशन्तीह पापानि महापातकजान्यपि ॥ ३१० ॥
वायुभक्षो दिवा तिष्ठन्रात्रिं नीत्वाप्सु सूर्य्यदृक् ॥
जप्त्वा सहस्रं गायत्र्याः शुद्धेद्‌ब्रह्मवधादृते ॥ ३११ ॥
ब्रह्मचर्य्यं दया क्षान्तिर्दानं सत्यमकल्कता ।
अहिंसास्तेयमाधुर्य्यदमाश्चेति यमाः स्मृताः ॥ ३१२ ॥
स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः ।
नियमागुरुशुश्रूषाशौचाक्रोधाप्रमादताः ॥ ३१३ ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्रं सान्तपनं चरन् ॥३१४॥
पृथक् सान्तपनद्रव्यैः षड्हः सोपवासकः ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः ॥ ३१५ ॥
पर्णोदुम्बरराजीवविल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः ॥ ३१६ ॥
तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिवेत् ।
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः ॥ ३१७ ॥
एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः ॥ ३१८ ॥
यथाकथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते ।
अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजनः ॥३१९॥
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम् ।
द्वादशाहोपवासेन पराकः परिकीर्त्तितः ॥ ३२० ॥
पिण्याकाचामतक्राम्बुशक्तूनां प्रतिवासरम् ।
एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते ॥ ३२० ॥
एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् ।
तुलापुरुष इत्येष ज्ञेयः पाञ्चदशाहिकः ॥ ३२२ ॥
तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिखण्डसम्मितान् ।
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरन् ॥३२३॥
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपभुञ्जीत चान्द्रायणमथापरम् ॥ ३२४ ॥
कुर्य्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभिमन्त्रयेत् ३२५

अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन तु ।
धर्म्मार्थं यश्चरेदेतच्चन्द्रस्यैति स लोकताम् ॥ ३२६ ॥
कृच्छ्रकृद्धर्म्मकामस्तु महतीं श्रियमाप्नुयात् ।
यथा गुरुक्रतुफलं प्राप्नोति च समाहितः ॥ ३२७ ॥
श्रुत्वेमानृषयो धर्म्मान् याज्ञवल्क्येन भाषितान् ।
इदमूचुर्म्महात्मानं योगीन्द्रममितौजसम् ॥ ३२८ ॥
य इदं धारयिष्यन्ति धर्म्मशास्त्रमतन्द्रिताः ।
इह लोके यशः प्राप्य ते यास्यन्ति त्रिपिष्टपम् ॥ ३२९ ॥
विद्यार्थी प्राप्नुयाद्विद्यां धनकामो धनन्तथा ।
आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियम् ॥ ३३० ॥
श्लोकत्रयमपि ह्यस्माद् यः श्राद्धे श्रावयिष्यति ।
पितॄणां तस्य तृप्तिः स्यादक्षया नात्र संशयः ॥ ३३१ ॥
ब्राह्मणः पात्रतां याति क्षत्रियो विजयी भवेत् ।
वैश्योऽपि धान्यधनवानस्य शास्त्रस्य धारणात् ॥ ३३२ ॥
य इदं श्रावयेद्विप्रान् द्विजान् पर्व्वसु पर्व्वसु ।
अश्वमेधफलं तस्य तद्भवाननुमन्यताम् ॥ ३३ ॥
श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितम् ।
एवमस्त्विति होवाच नमस्कृत्य स्वयम्भुवे ॥ ३३४ ॥
इति याज्ञवल्कीये धर्म्मशास्त्रे तृतीयोऽध्यायः ॥

॥ समाप्ता चेयं याज्ञवल्क्यसंहिता ॥

अतः परं प्रवक्ष्यामि जातिवृत्तिविधानकम्।
अनुलोमविधानञ्च प्रतिलोमविधिं तथा॥ १॥
सान्तरालकसंयुक्तं सर्व्वं संक्षिप्य चोच्यते।
नृपाद् ब्राह्मणकन्यायां विवाहेषु समन्वयात्॥ २॥
जातः सूतोऽत्र निर्द्दिष्टः प्रतिलोमविधिर्द्विजः।
वेदानर्हस्तथा चैषां धर्म्माणामनुबोधकः॥ ३॥
सूताद्विप्र प्रसूतायां सूतो वेणुक उच्यते।
नृपायामेव तस्यैव जातो यश्चर्म्मकारकः॥ ४॥
ब्राह्मण्यां क्षत्रियाच्चौर्य्याद्रथकारः प्रजायते।
वृत्तञ्च शूद्रवत्तस्य द्विजत्वं प्रतिषिध्यते॥ ५॥
यानानां ये च वोढारस्तेषाञ्च परिचारकाः।
शूद्रवृत्त्या तु जीवन्ति न चात्त्रं धर्म्ममाचरेत्॥ ६॥
ब्राह्मण्यां वैश्यसंसर्गाज्जातोमागध उच्यते।
वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः॥ ७॥
प्रशंसावृत्तिको जीवेद्वैश्यप्रेष्यकरस्तथा।
ब्राह्मण्यां शूद्रसंसर्गाज्जातश्चाण्डाल उच्यते॥ ८॥
सीसमाभरणं तस्य कार्ष्णायसमथापि वा।
वध्रीं कण्ठे समाबध्य झल्लरीं कक्षतोऽपि वा॥ ९॥
मल्लापकर्षणं ग्रामे पूर्व्वाह्णे परिशुद्धिकम्।
नापराह्णे प्रविष्टोऽपि वहिर्ग्रामाच्च नैर्ऋते॥ १०॥
पिण्डीभूता भवन्त्यत्र नोचेद् बध्या विशेषतः।
चाण्डालाद्वैश्यकन्यायां जातः श्वपच उच्यते॥ ११॥
श्वमांसभक्षणं तेषां श्वान एव च तद्बलम्।
नृपायां वैश्यसंसर्गादायोगव इति स्मृतः॥ १२॥

तन्तुवाया भवन्त्येव वसुकांस्योपजीविनः ।
शीलिकाः केचिदत्रैव जीवनं वस्त्रनिर्म्मिते ॥ १३ ॥
आयोगवेन विप्रायां जातास्ताम्रोपजीविनः ।
तस्यैव नृपकन्यायां जातः सूनिक उच्यते ॥ १४ ॥
सूनिकस्य नृपायान्तु जाता उद्बन्धकाः स्मृताः ।
निर्णेजयेयुर्वस्त्राणि अस्पृश्याश्च भवन्त्यतः ॥ १५ ॥
नृपायां वैश्यतश्चौर्य्यात् पुलिन्दः परिकीर्त्तितः ।
पशुवृत्तिर्भवेत्तस्य हन्युस्तान् दुष्टसत्वकान् ॥ १६ ॥
नृपायां शूद्रसंसर्गाज्जातः पुक्कश उच्यते ।
सुरावृत्तिं समारुह्य मधुविक्रयकर्म्मणा ॥ १७ ॥
कृतकानां सुराणाञ्च विक्रेता याचको भवेत् ।
पुक्कशाद्वैश्यकन्यायां जातो रजक उच्यते ॥ १८ ॥
नृपायां शूद्रतश्चौर्य्याज्जातोरञ्जक उच्यते ।
वैश्यायां रञ्जकाज्जातो नर्त्तको गायको भवेत् ॥१९॥
वैश्यायां शूद्रसंसर्गाज्जातो वैदेहिकः स्मृतः ।
अजानां पालनं कुर्य्यान्महिषीणां गवामपि ॥२०॥
दधिक्षीराज्यतक्राणां विक्रयाज्जीवनं भवेत् ।
वैदेहिकात्तु विप्रायां जाताश्चर्म्मोपजीविनः ॥ २१ ॥
नृपायामेव तस्यैव सूचिकः पाचकः स्मृतः ।
वैश्यायां शूद्रतश्चौर्य्याज्जातश्चक्री च उच्यते ॥ २२ ॥
तैलपिष्टकजीवी तु लवणं भावयन् पुनः ।
विधिना ब्राह्मणः प्राप्य नृपायान्तु समन्त्रकम् ॥ २३॥
जातः सुवर्ण इत्युक्तः सानुलोमद्विजः स्मृतः ।
अथ वर्णक्रियां कुर्व्वन्नित्यनैमित्तिकीं क्रियाम् ॥ २४॥

अश्वं रथं हस्तिनं वा वाहयेद्वा नृपाज्ञया।
सैनापत्यञ्च भैषज्यं कुर्य्याज्जीवेत्तु वृत्तिषु॥ २५॥
नृपायां विप्रतश्चौर्य्यात् संजातो यो भिषक् स्मृतः।
अभिषिक्तनृपस्याज्ञां परिपाल्येत्तु वैद्यकम्॥ २६॥
आयुर्वेदमथाष्टाङ्गं तन्त्रोक्तं धर्म्ममाचरेत्।
ज्योतिषं गणितं वापि कायिकीं वृत्तिमाचरेत्॥२७॥
नृपायां विधिना विप्राज्जातो नृप इति स्मृतः।
नृपायां नृपसंसर्गात् प्रमादाद् गूढ़जातकः॥ २८॥
सोऽपि क्षत्रिय एव स्यादभिषेके च वर्ज्जितः।
अभिषेकं विना प्राप्य गोज इत्यभिधायकः॥ २९॥
सर्वन्तु राजवृत्तस्य शस्यते पदवन्दनम्।
पुनर्भूकरणे राज्ञां नृपकालीन एव च॥ ३०॥
वैश्यायां विधिना विप्राज्जातो ह्यम्बष्ठ उच्यते।
कृष्याजीवो भवेत्तस्य तथैवाग्नेयवृत्तिकः॥ ३१॥
ध्वजिनी जीविका वापि अम्बष्ठाः शस्त्रजीविनः।
वैश्यायां विप्रतश्चौर्य्यात् कुम्भकारः स उच्यते॥ ३२॥
कुलालवृत्त्या जीवेत नापिता वा भवन्त्यतः।
सूतके प्रेतके वापि दीक्षाकालेऽथ वापनम्॥ ३३॥
नाभेरूर्द्ध्वन्तु वपनं तस्मान्नापित उच्यते।
कायस्थ इति जीवेत्तु विचरेच्च इतस्ततः॥ ३४॥
काकाल्लौल्यं यमात् क्रौर्य्यं स्थपतेरथ कृन्तनम्।
आद्याक्षराणि संगृह्य कायस्थ इति कीर्त्तितः॥३५॥
शूद्रायां विधिना विप्राज्जातः पारशवो मतः।
भद्रकादीन् समाश्रित्य जीवेयुः पूजकाः स्मृताः॥३६॥

शिवाद्यागमविद्याद्यैस्तथामण्डलवृत्तिभिः ।
तस्यां वै चौरसो वृत्तो निषादो जात उच्यते ॥ ३७ ॥
वने दुष्टमृगान् हत्वा जीवनं मांसविक्रयम् ।
नृपाज्जातोऽथ वैश्यायां गृह्यायां विधिना सुतः ॥३८॥
वैश्यवृत्त्या तु जीवेत चात्त्रधर्म्मं न चाचरेत् ।
तस्यां तस्यैव चौरेण मणिकारः प्रजायते ॥ ३९ ॥
मणीनां राजतां कुर्य्यान्मुक्तानां वेधनक्रियाम् ।
प्रवालानाञ्च सूत्रित्वं शाखानां बलयक्रियाम् ॥ ४० ॥
शूद्रस्य विप्रसंसर्गाज्जात उग्र इति स्मृतः ।
नृपस्य दण्डधारः स्याद्दण्डं दण्ड्येषु सञ्चरेत् ॥ ४१ ॥
तस्यैव चावसंवृत्या जातः शुण्डिक उच्यते ।
जातदुष्टान् समारोप्य शुण्डाकर्म्मणि योजयेत् ॥४२॥
शूद्रायां वैश्यसंसर्गाद्विधिना सूचकः स्मृतः ।
सूचकाद्विप्रकन्यायां जातस्तत्त्तक उच्यते ॥ ४३ ॥
शिल्पकर्म्माणि चान्यानि प्रासादलक्षणं तथा ।
नृपायामेव तस्यैव जातो यो मत्स्यबन्धकः ॥ ४४ ॥
शूद्रायां वैश्यतश्चौर्य्यात् कटकार इति स्मृतः ।
वशिष्ठशापात्त्रेतायां केचित् पारशवास्तथा ॥ ४५ ॥
वैखानसेन केचित्तु केचिद्भागवतेन च ।
वेदशास्त्रावलम्बास्ते भविष्यन्ति कलौ युगे ॥ ४६ ॥
कटकारास्ततः पश्चान्नारायणगणाः स्मृताः ।
शाखा वैखानसेनोक्ता तन्त्रमार्गविधिक्रियाः ॥ ४७ ॥
निषेकाद्याः श्मशानान्ताः क्रियाः पूजाङ्गसूचिकाः ।
पञ्चरात्रेण वा प्राप्तं प्रोक्तं धर्म्मं समाचरेत् ॥ ४८ ॥

शूद्रादेव तु शूद्रायां जातः शूद्र इति स्मृतः ॥
द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः ॥ ४६ ॥
सच्छूद्रं तं विजानीयादसच्छूद्रस्ततोऽन्यथा ।
चौर्य्यात् काकतचो ज्ञेयश्चाश्वानां तृणवाहकः ॥५० ॥
एतत् संक्षेपतः प्रोक्तं जातिवृत्तिविभागशः ।
जात्यन्तराणि दृश्यन्ते संकल्पादित एव तु ॥ ५१ ॥

॥ इत्यौशनसं धर्म्मशास्त्रं समाप्तम् ॥

औशनसस्मृतिः ।

शौनकाद्याश्च मुनय औशनं भार्गवं मुनिम् ।
नत्वा पप्रच्छुरखिलं धर्म्मशास्त्रविनिर्णयम् ॥
ऋषीणां शृण्वतां पूर्वमुशना धर्म्मतत्त्ववित् ।
धर्मार्थकाममोक्षाणां कारणं पापनाशनम् ॥
सुसमाधिहृदो यूयं शृणुध्वङ्गदतो मम ।
भार्गवं पितरं नत्वा उशनं धर्म्ममब्रवीत् ॥
कृतोपनयनो वेदानधीयीत द्विजोत्तमः ।
गर्भाष्टमे व्यष्टमे वा स्वसूत्रोक्त विधानतः ॥
दण्डे च मेखलासूत्रे कृष्णाजिनधरो मुनिः ।
भिक्षाहारी गुरुहिते वीक्षमाणो गुरोर्मुखम् ॥
कार्पासमुपवीतात् सन्निर्मितं ब्रह्मणा पुरा ।
ब्राह्मणानान्त्रिवृत् सूत्रं कौशिवादास्त्रमेव वा ॥
सदोपवीती चैव स्यात् सदा बद्धशिखो द्विजः ।
अन्यथा यत्कृतं कर्मात्तद्भवत्या यथाक्रमम् ॥
वसेदविकृतं वासः कार्पासं वा कशायकम् ।
तदेव परिधानीयं शुक्लमत्स्यद्रुमुत्तमम् ॥

उत्तरीयं समाख्यातं वासःकृष्णाजिनं शुभम्।
अभावे भव्यमजिनं रौरवं वा विधीयते॥
उपवीतं वामबाहुं सव्यं बाहुं समन्वितम्।
उपवीतं भवेन्नित्यन्निवीतं कण्ठलम्बनम्॥
सव्यबाहुं समुद्धृत्य दक्षिणेन धृता द्विजाः।
प्राचीनावीतमित्युक्तं पित्र्ये कर्म्मणि धारयेत्॥
अग्न्यगारे गवाङ्गोष्ठे होमे जप्ये तथैव च।
स्वाध्यायभोजने नित्यं ब्राह्मणानाञ्च सन्निधौ॥
उपासने गुरूणाञ्च सन्ध्ययोरुभयोरपि।
उपवीती भवेन्नित्यं विधिरेषः सनातनः॥
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला।
मुञ्जाभावे कुशानाहुर्ग्रन्थिनैकेन वा त्रिभिः॥
धारयेद्वैल्वपालाशौ दण्डौ केशान्तगौ द्विजः।
यज्ञार्हवृक्षजं वाथ सौम्यं द्वणमेव च॥
सायं प्रातर्द्विजः सन्ध्यामुपासीत समाहितः।
कामाल्लोभाद्भयान्मोहात् कदा न पतितो भवेत्॥
अग्निकार्यं ततः कुर्य्यात्सायं प्रातः प्रसन्नधीः।
स्नात्वा सन्तर्पयेद्देवा नृषीन् पितृगणांस्तथा॥
देवाभ्यर्चान्ततः कुर्यात् पुष्पैः पत्रेण चाम्बुभिः।
अभिवादनशीलः स्यान्नित्यं वृद्धेष्टधर्म्मतः॥
असावहम्भो नामेति सम्यक् प्रणतिपूर्वकम्।
आयुरारोग्यवान् वित्तं द्रव्याद्यपरिवर्जितः॥
आयुष्मान् भव सौम्येति वाच्यो विप्राभिवादने।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरस्ततः॥

यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥
सव्येन पाणिना कार्यं उपसंग्रहणं गुरोः।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणम्॥
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं तत्पूर्वमभिवादयेत्॥
नोदकं धारयेद् भैक्षं पुष्पाणि समिधस्तथा।
एवं विधानि चान्यानि न देवाद्येषु किञ्चन॥
ब्राह्मणं कुशलं पृच्छेत् क्षत्रियञ्चाप्यनामयम्॥
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च।
उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः॥
मातुलश्वशुरस्त्रातृमातामहपितामहौ।
वर्णज्येष्ठः पितृव्यश्च पुंसो ते पितरः स्मृताः॥
माता मातामही गुर्वी पितृमातृस्वसादयः।
श्वश्रु पितामही ज्येष्ठा ज्ञातव्या गुरवः स्त्रियः॥
इत्युक्ता गुरवः सर्वे मातृतः पितृतस्तथा।
अनुवर्तनमेतेषां मनोवाक्कायकर्मभिः॥
गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः।
न तैः रूपविशेत्सार्द्धं विवादेनात्मकारणात्॥
जीवितार्थमपि द्वेषं गुरुभिर्नैव भाषणम्।
उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः॥
गुणानामपि सर्वेषां पूज्याः पञ्च विशेषतः।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता॥
यो हि वासयति दिवा येन सद्योपदिश्यते।

ज्येष्ठो भ्राता च भर्त्ता च पञ्च ते गुरवस्तथा॥
आत्मनः सर्वयत्नेन प्राणत्यागेन वा पुनः।
पूजनीयाः प्रयत्नेन पञ्चैते भूतिमिच्छता॥
यावत् पिता च माताच द्वावेतौ निर्विकारणम्।
तावत् सर्वं परित्यज्य पुत्रः स्यात्तत्परायणः।
पिता माता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि॥
स पुत्रः सकलं कर्म्म प्राप्नुयात्तेन कर्म्मणा।
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः॥
तयोः प्रत्युपकारोऽपि न हि कश्चन विद्यते।
तयोर्नित्यं प्रियं कुर्य्यात्कर्म्मणा मनसा गिरा।
न ताभ्या मननुज्ञातो धर्म्ममेकं समाचरेत्॥
वर्जयित्वा मुक्तिफलं नित्यनैमित्तिकं तथा।
धर्म्मसारः समुद्दिष्टः प्रेत्यानन्दफलप्रदः॥
सम्यगाचारवक्तारं विसृष्टस्तदनुज्ञया।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चापद्यते दिवि॥
यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते।
तेन दोषेण संप्रेत्य निरयं सम्प्रयच्छति॥
पुंसाश्चात्मनि वेषेण पूज्यो भर्त्ता च सम्मतः।
यानि दातरि लोकेऽस्मिन्नुपकारोऽपि गौरवम्॥
ये नरा भर्तृपिण्डार्थं स्वान् प्राणान् सन्त्यजन्ति हि।
तेषामेव परान् लोकानुवाच भगवान् भृगुः॥
मातुलांश्च पितृव्यांश्च श्वशुरान् ऋत्विजान् गुरून्।
असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः॥
आचार्य्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्।

भोःशब्दपूर्व्वकं चैनमभिभाषेत धर्म्मवित् ॥
अभिवाद्याश्च पूर्व्वन्तु शिरसावघ्रमेव च ।
ब्राह्मणक्षत्रियाद्यैश्च श्रीकामैः सादरं सदा ॥
नाभिवाद्यास्तु विप्राणां क्षत्रियाद्याः कथञ्चन ।
ज्ञानकर्म्मगुणोपेता यद्यप्येते बहुश्रुताः ॥
ब्राह्मणः सर्व्ववर्णानां स्वस्ति कुर्य्यादिति स्थितिः ।
सवर्णेऽप्यसवर्णानां कार्य्यमेवाभिवादनम् ॥
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्व्वस्याभ्यागतो गुरुः ॥
विद्या कर्म्म वयो बन्धुर्वित्तं भवति यस्य वै ।
मान्यस्थानानि पञ्चाहुः पूर्वं पूर्वं गुरूणि च ॥
पञ्चानां त्रिषु वर्णेषु भवेत्तु गुणवान् हि यः ।
यत्र स्यात्सोऽत्र मानार्हः शूद्रोऽपि स भवेद् यदि ॥
पिण्डादिभ्यो ब्राह्मणेभ्यः स्त्रियै राज्ञेऽस्य चक्षुषे ।
वृद्धाय भावहीनाय रोगिणे दुर्व्वलाय च ॥
भिक्षामाहृत्य शिष्टानां गृहेभ्यः प्रयतोऽन्वहम् ।
निवेद्य गुरवेऽश्नीयाद्वाग्यतस्तदनुज्ञया ॥
भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥
मातरं वा स्वसारं वा मातुर्वा भगिनीं तथा ।
भिक्षेत भिक्षां प्रथमं या तु नैनं विमानयेत् ।
सजातीयगृहेष्वेवं सर्व्ववर्णिकमेव वा ।
भैक्षस्याचरणं प्रोक्तं पतितादिषु वर्जितम् ॥
वेदयज्ञादिहीनानां प्रशस्तानां स्वकर्म्मसु ।

ब्रह्मचारी चरेद्भैक्ष्यं गृहस्थः प्रयतोऽन्वहम् ॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अभावेऽप्यथ गेहानां पूर्वं पूर्वं विवर्जयेत् ॥
सर्वं वापि चरेद् ग्रामं पूर्वोक्तानामसम्भवे ।
नियम्य प्रयतो वाचं दिशश्चानवलोकयन् ॥
समाहृत्य तु तद्भैक्ष्यं यावदर्थमिहाज्ञया ।
भुञ्जीत प्रयतो नित्यं वाग्यतो नान्यमानसः ॥
भैक्षेण वर्त्तयेन्नित्यं कामनाशीर्भवेद् व्रती ।
भैक्षेण व्रत्तिनो वृत्तिरुपवाससमं स्मृता ॥
पूजयेदशनं नित्यमद्यादन्नमकुत्सयन् ।
दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वतः ॥
अनारोग्यमनायुष्यमस्वर्ग्यं कुत्सभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥
प्राङ्मुखोऽन्नानि भुञ्जीत दक्षिणामुख एव वा ।
नाद्यादुदङ्मुखो नित्यं विधिपूर्व्वं सनातने ॥
प्रक्षाल्य पाणिपादौ च भुञ्जानो द्विरुपस्पृशेत् ।
शुचौ देशे समासीनो भुङ्क्त्वान्ते द्विरुपस्पृशेत् ॥
मण्डलं पूर्वतः कृत्वा तत्र स्थाप्याथ भोजयेत् ।
स्वप्राणाहुतिपर्य्यन्तं मौनमेव विधीयते ॥

इत्यौशनसस्मृतौ प्रथमोऽध्यायः ॥

भुक्त्वा पीत्वा च स्नात्वा च तथा रथ्योपसर्पणे ।
ओष्ठावलोमकौ स्पृष्ट्वा वासो विपरिधाय च ॥
रेतोमूत्रपुरीषाणामुत्सर्गेणान्नभाषणे ।

तथा चाध्ययनारम्भे कासश्वासागमे तथा ॥
चत्वरं वा श्मशानं वा समागम्य द्विजोत्तमः ।
सन्ध्ययोरुभयोस्तद्वदाचान्तोऽप्याचमेत् पुनः ॥
चण्डालम्लेच्छसम्भाषे स्त्रीशूद्रोच्छिष्टभाषणे ।
उच्छिष्टं पुरुषं स्पृष्ट्वा भोज्यं वापि तथाविधम् ॥
अश्रुपाते तथाचामेत् अहितस्य तथैव च ।
भोजयेत् सन्ध्ययोः स्नात्वा पीत्वा मूत्रपुरीषयोः ॥
आचान्तोऽप्याचमेत् स्पृष्ट्वा सकृत् सकृदथान्यतः ।
अग्नेर्गवामयालम्भे स्पृष्ट्वा प्रयत एव वा ॥
नृणामथात्मनः स्पर्शे नीवीं विपरिधाय च ।
उपस्पृशेज्जलं शुद्धं तृणं वा भूमिमेव वा ॥
केशानां चात्मनः स्पर्शे वाससां चालितस्य च ।
अनुष्णाभिरफेनाभिरदुष्टाभिश्च सर्वशः ॥
शौचे च सुखमासीनः प्राङ्मुखो वाप्युदङ्मुखः ।
शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा ॥
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् ।
सोपानत्को जलस्थो वा नोष्णीषी वाचमेद् बुधः ॥
न चैव वर्षधाराभिर्न तिष्ठन्न धृतोदकैः ।
नैकहस्तार्पितजलैर्विना शूद्रेण वा पुनः ॥
न पादुकासनस्थो वा वहिर्जानुरथापि वा ।
न जल्पन्न हसन् प्रेक्षमाणश्च प्रह्व एव वा ।
नावीक्षमाणाद्भिर्न्नोष्णाद्भिन्नफेनादथापि वा ॥
शूद्राशुचिकरैर्मुक्तैर्नक्षाराभिस्तथैव च ।
न चैवाङ्गुलिभिः शब्दमकुर्वन्नान्यमानसः ॥

न वर्णरसदुष्टाभिर्नचैव प्रदरोदकैः ।
न प्राणिजनिताभिर्वा न बह्निः कलमेव वा ॥
हृद्गाभिः पूयते विप्रः कण्ठाभिः क्षत्रियः शुचिः ।
प्राशिताभिस्तथा वैश्यैः शूद्रैः संस्पर्शनं ततः ॥
अङ्गुष्ठमूलान्तरतो रेखायां ब्राह्म उच्यते ।
अन्तराङ्गुष्ठदेशिन्यो पितॄणां तीर्थमुत्तमम् ॥
कनिष्ठो मूलतः पश्चात्प्राजापत्यं प्रचक्षते ।
अङ्गुल्यग्रे स्मृतं दैवं तथैवार्षं प्रकीर्तितम् ।
मूले स्याद्दैवमार्षं स्यादाग्नेयं मध्यतः स्मृतम् ॥
तदेव सौमिकं तीर्थमेतत् ज्ञात्वा न मुह्यति ।
ब्राह्मेणैव तु तीर्थेन द्विजो नित्यमुपस्पृशेत् ।
कायेन वा दैवतेन नतु पित्र्येण वा द्विजाः ! ॥
त्रिः प्राश्नीयादपः पूर्वं ब्राह्मणः प्रयतः स्मृतः ।
संवृत्ताङ्गुष्ठमूलेन मुखं वै समुपस्पृशेत् ॥
अङ्गुष्ठानामिकाभ्यां तु स्पृशेन्नेत्रद्वयं ततः ।
तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटं ततः ॥
कनिष्ठाङ्गुष्ठयोगेन श्रवणे समुपस्पृशेत् ।
सर्व्वासामथ योगेन हृदयन्तु तलेन वा ॥
संस्पृशेद्वै शिरस्तद्वदङ्गुष्ठेनाथवा द्वयम् ।
त्रिः प्राश्नीयादेवमेव प्रीतास्तेनास्य देवताः ॥
ब्रह्मविष्णुमहेशाश्च सम्भवन्त्यनुशुश्रुमः ।
गङ्गा च यमुना चैव प्रीयते परिमार्जनात् ॥
प्रसंस्पर्शाल्लोचनयोः प्रीयेते शशिभास्करौ ।
नासत्यौ चैव प्रीयेते स्पृष्टं नासापुटद्वयम् ॥

कर्णयोः स्पृष्टयो स्तद्वत्प्रीयते चानलानिलौ ।
संस्पृष्टे हृदये चास्याः प्रीयन्ते सर्वदेवताः ॥
मूर्ध्नि संस्पर्शनादेव प्रीतस्तु पुरुषो भवेत् ।
नोच्छिष्टं कुर्वते मुख्यं विप्रयोगं नयन्ति याः ॥
अन्तवदन्तसलिलजिह्वास्पर्शे शुचिर्भवेत् ।
स्पृशन्ति विन्दवः पादौ य आचामयतः परम् ॥
भूमिगैस्ते समाज्ञेयाः न तैरप्रयतो भवेत् ।
मधुपर्के च सोमे च ताम्बूलस्य च भक्षणे ॥
फलमूलेक्षुदण्डे च न दोष उशना ब्रवीत् ।
प्रचरंश्चान्नपानेषु यदुच्छिष्टो भवेद् द्विजः ॥
भूमौ निक्षिप्य तद् द्रव्यमाचम्य प्रोक्षयेत्तु यत् ।
तैजसं वै समादाय भवेदुच्छेषणात्ततः ॥
अनिधाय च तद्द्रव्यमाचान्तः शुचितामियात् ।
वस्त्रादीनां विकल्पत्वात् स्पृष्ट्वा च देवमेव हि ॥
आरण्यानुदके रात्रौ चोरौ वाप्याकुले पथि ।
कृत्वा मूत्रपुरीषं वा द्रव्यहस्ते न दुष्यति ॥
निधाय दक्षिणे कर्णे ब्रह्मसूत्र मुदङ्मुखः ।
अथ कुर्य्यात् शकृन्मूत्रे रात्रौ चेद्दक्षिणामुखः ॥
अन्तर्धाय महीं काष्ठैः पर्णैर्लोष्टतृणेन वा ।
प्रतिश्चीनशिराः कुर्य्यात् कृच्छ्रमूत्रविसर्जने ॥
छायाकूपनदीगोष्ठे चैत्याभःपथि भस्मसु ।
अग्नौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ॥
न गोमये न कृष्टे वा न गोष्ठे नैव शाद्वले ।
न तिष्ठन् वा न निर्व्वासा न च पर्वतमस्तके ॥

न जीर्णदेवायतने न वल्मीके कदाचन ।
न च सत्त्वेषु गर्तेषु न च गच्छन् समाचरेत् ॥
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न बिले चापि न तीर्थे च चतुष्पथे ॥
नोद्यानोपसमीपे वा नोषरेण पराशुचौ ।
न चोपानत्कपादो च च्छत्री वर्णान्तरीतके ॥
न चैवाभिमुखः स्त्रीणां गुरु ब्राह्मणयोर्गवाम् ।
न देवदेवालययो र्नापामपि कदाचन ॥
नदीज्योतींषि वीक्षित्वा तद्वाह्याभिमुखोऽपि वा ।
प्रत्यादित्यं प्रत्यनिलं प्रतिसोमं तथैव च ॥
आहृत्य मृत्तिकां कुर्य्यात् लेपगन्धापकर्षणम् ।
कुर्य्यादतन्द्रितः शौचं विशुद्धैरुद्धृतोदकैः ॥
नाहरेन्मृत्तिकां विप्रः पांशुलां नच कर्दमात् ।
न मार्गान्नोषराद्देशाच्छौचविष्टेऽपरस्य च ॥
न देवायतनात् कूपाद् ग्रामान्न तु कदाचन ।
उपस्पृशेत्ततो नित्यं पूर्वोक्तेन विधानतः ॥
तारव्याहृतिगायत्र्या वर्णनामेरणैः क्रमात् ।
तन्मन्त्रितं पिवेद्यस्तु मन्त्राचमनमीरितम् ॥
गायत्र्या चमनेनाथ श्रुत्याचमनमीरितम् ।

इत्यौशनसस्मृतौ द्वितीयोऽध्यायः ॥

एवं दण्डादिभिर्युक्तः शौचाचारसमन्वितः ।
आहूत्याध्ययनं कुर्य्याद्वीक्षमाणो गुरोर्मुखम् ॥
नित्यमुद्यतपाणिश्च सन्ध्याचारसमन्वितः ।

आस्यतामिति चोक्तश्च नासीताभिमुखं गुरोः ॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत्।
आसीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः।
न च शय्यासनं चास्य सर्वदा गुरुसन्निधौ ॥
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्।
नोदाहरेदस्य नाम परोक्षमपि केवलम् ॥
न चैवास्यानुकुर्व्वीत गतिभाषणचेष्टितम् ॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं परितोऽन्यतः ॥
दूरस्थो नार्चयेदेवान्न क्रुद्धो नान्तिके स्त्रियः।
न चैवास्योत्तरं ब्रूयान्न तेनासीत सन्निधौ ॥
उदकुम्भं कुशान् पुष्पं समिधोऽप्याहरेत्सदा।
मार्जनं लेपनं नित्यमङ्गानां वै समाचरेत् ॥
नास्य निर्माल्यशयनं पादुकोपानहावपि।
आक्रामेदासनं तस्य च्छायामपि कदाचन ॥
ये दन्तकाष्ठादीन् लब्ध्वा न चास्मै विनिवेदयेत्।
अनापृच्छ्य न गन्तव्यन्नत्वप्रियहिते रतः ॥
न पादौ स्थापयेदस्य सन्निधाने कदाचन।
जृम्भितं हसितं चैव चपकं प्रावरणं तथा ॥
वर्जयेत् सन्निधौ नित्यं नखस्फोटनमेव च।
यथाकालमधीयीत यावन्न विमना गुरुः।
आसनादौ गुरोः कूर्चे फलके वा समाहितः ॥
आसने शयने पाने नच तिष्ठेत्कथञ्चन।
धावन्तमनुधावेत गच्छन्तमनुगच्छति ॥

गजोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
नासीत गुरुणा सार्द्धं शिलाफलतलेषु च ॥
जितेन्द्रियः स्यात् सततं वश्यात्माक्रोधनः शुचिः ।
प्रयुञ्जीत सदा वाचं मधुरां हितभाषिणीम् ॥
गन्धमाल्यां रसं कन्यां सूक्ष्मप्राणिविहिंसनम् ।
अभ्यङ्गञ्चाञ्जनोपानच्छत्रधारणमेव च ॥
कामं क्रोधं भयं निद्रां गीतवादित्रनर्त्तनम् ।
द्यूतं जनपरीवादं स्त्रीप्रेक्षालापनं तथा ॥
परोपतापपैशुन्यं प्रयत्नेन विवर्जयेत् ।
उदकुम्भं सुमनसो गोशकृन्मृत्तिकां कुशान् ॥
आहरेद्यावदन्यानि भैक्षञ्चाहरहश्चरेत् ।
तथैव लवणं सर्वं भक्ष्यं पर्युषितं नयेत् ॥
अनन्यदर्शी सततं भवेद्गीतादिनिःस्पृहः ।
नादर्शञ्चैव वीक्षेत न चरेद्दन्तधावनम् ॥
एकान्तमशुचिः स्त्रीभिः शूद्राद्यैरभिभाषणम् ।
गुरूच्छिष्टं भेषजार्थं न प्रयुञ्जीत कामतः ॥
मलापकर्षणं स्नानन्नाचरेद् वै कदाचन ।
नचातिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव नित्यवृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु वा धर्मं हितं चोपदिशन् स्वयम् ॥
श्रेयः सुगुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपत्नीषु पुत्रेषु गुरोश्चैव स्वबन्धुषु ॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्मसु ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥

उत्सादनं वै गात्राणां स्नानं चोच्छिष्टभोजने ।
न कुर्याद् गुरुपुत्रस्य पादयोः शौचमेव च ॥
गुरुवत्प्रतिपूज्याश्च सवर्णा गुरुयोषितः ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रशोधनम् ॥
गुरुपत्नी च युवती नाभिवाद्येह पादयोः ।
कुर्व्वीत वन्दनं भूम्यामसावहमिति ब्रुवन् ॥
विप्रस्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सदा धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चापि पितृष्वसा ।
संपूज्या गुरुपत्नी च समास्ता गुरुभार्य्यया ॥
भ्रातृभार्य्योपसंग्राह्या ज्ञातिसम्बन्धयोषितः ।
पितुर्भगिन्या मातुश्च जायायाञ्च स्वसर्य्यपि ॥
मातृवद् वृत्तिमातिष्ठेन्माता तेभ्यो गरीयसी ।
एवमाचारसम्पन्नमात्मवन्तं सदाहितम् ॥
वेदं धर्मं पुराणञ्च तथा तत्त्वानि नित्यशः ।
सम्वत्सरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशेत् ॥
हरते दुष्कृतं तस्य शिष्यस्य वत्सरे गुरुः ।
आचार्य्यपुत्रशुश्रूषु र्ज्ञानदो धार्मिकः शुचिः ॥
शक्तो गुर्व्वीर्थ्यमेधावी नाध्याप्यो दशधर्म्मतः ।
कृतघ्नश्च तथा द्रोही मेधावी शुभकृन्नरः ॥
प्राप्य विप्रोऽप्यविधिवत् षड़ध्यात्मा द्विजोत्तमैः ।
एतेषु ब्राह्मणो दानमन्यत्र न यथोदितम् ॥

आचम्य संयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्ष्यमाणो गुरोर्मुखम् ॥
अधीष्व भो ! रिति ब्रूयात् विरामोऽस्त्विति वाचयेत् ।
प्राक् कूलेषु समासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूर्वं तथाचोङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्‌द्विजः ॥
कुर्य्यादध्ययनं नित्यं ब्रह्माञ्जलिकृतस्थितिः ।
सर्वेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीते विधिवन्नित्यं ब्राह्मण्याच्यवतेऽन्यथा ।
योऽधीयीत ऋचो नित्यं क्षीराहुत्या स देवताः ॥
प्रीणाति तर्पयन्त्येनं कामैस्तृप्ताः सदैव हि ।
यजूंषि योऽधीते सततं दध्ना प्रीणाति देवता ॥
सामान्यधीते प्रीणाति घृताहुतिभिरन्वहम् ।
अथर्वाङ्गिरसो नित्यमध्यात् प्रीणाति देवता ॥
धर्माङ्गानि पुराणानि मीमांसैस्तृप्यते सुरान् ।
अपां समीपे नियतो नैत्यकं विधिमाश्रितः ॥
गायत्रीमप्यधीयीत गत्वारण्यं समाहितः ।
सहस्रपरमां देवीं शतमध्यात् दशापराम् ॥
गायत्रीं वै जपेन्नित्यं जपयज्ञः प्रकीर्तितः ।
गायत्रीं चैव वेदांश्च तुलया तुलयन् प्रभुः ॥
एकतश्चतुरो वेदान् गायत्रीं च तथैकतः ।
ओङ्कारमादितः कृत्वा व्याहृतीस्तदनन्तरम् ॥
ततोऽधीयीत एकाग्रं श्रिया परमयान्वितः ।
अध्यापयेत्तु एकाग्रं गायत्री परया तु या ॥

पुराकल्पे समुत्पन्ना भूर्भुवः स्वर्गनामतः ।
महाव्याहृतयस्तिस्रः सर्वाशुभनिबर्हणाः ॥
प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः ।
सत्वं रजस्तमस्तिस्रः कामा व्याहृतयस्त्रयः ॥
ओङ्कारस्तत्परं ब्रह्म गायत्री स्यात्तदक्षरम् ।
एवं मन्त्रो महायोगसाचात्सार उदाहृतः ॥
योऽधीतेऽहन्यमाने तां गायत्रीं वेदमातरम् ।
विज्ञायार्थं ब्रह्मचारी स याति परमाङ्गतिम् ॥
न गायत्र्याः परं जप्यमेतद्विज्ञानमुच्यते ।
श्रवणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ! ॥
आषाढ्यां प्रौष्ठपद्यां वा वेदोपक्रमणं स्मृतम् ।
उत्सृज्य ग्रामनगरं मासान्विप्रोऽर्धपञ्चमान् ॥
अधीयीत शुचौ देशे ब्रह्मचारी समाहितः ।
पुष्ये तु छन्दसां कुर्याद्वहिरुत्सर्जनं द्विजाः ! ॥
माघे वा मासि संप्राप्ते पूर्वाह्णे प्रथमेऽहनि ।
छन्दांस्यूर्ध्वमधीयीत शुक्लपक्षे तु वै द्विजाः ! ॥
वेदाङ्गानि पुराणं वा कृष्णपक्षे तु मानवः ।
इमन्नित्यमनध्यायानधीयानो विसर्जयेत् ॥
अध्यापनञ्च कुर्व्वाणो अध्येष्यन्नपि यत्नतः ।
कर्णश्रुवे दिवा रात्रौ दिवावासं समूहने ॥
विद्युत्स्तनितवर्षासु महोल्कानाञ्च पातने ।
आकस्मिक मनध्यायमेतेष्वेव प्रजापतिः ॥
एता न स्युदिता नाद्यान्यद्प्राग्दुष्कृतादिषु ।
तदा विन्द्यादनर्थाय मन्यते जाग्रदर्शने ॥

निर्घाते वाथ चलने ज्योतिषां चोपसर्पणे ।
एतानकालिकान् विन्द्यादनर्थायागतावपि ॥
प्रागदुष्कृतेष्वग्निषु च विद्युत्स्तनितनिस्वने ।
सद्यो हि स्यादनध्यायमनृतं मुनिरब्रवीत् ॥
निध्याय एवं स्याद् ग्रामेऽरण्येषु नगरेषु च ।
कर्मनैपुण्यगामानां पूतिगन्धे च नित्यशः ॥
अन्त्यानां सङ्गते ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो निन्द्यमाने समवाये जनस्य च ॥
उदये मध्यरात्रौ च विण्मूत्रे च विसर्जयेत् ।
उच्छिष्टश्राद्धभुक् चैव मनसा न विचिन्तयेत् ॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
तदाह कीर्त्तयेद् ब्रह्म राज्ञो राहोश्च सूतके ॥
धावकोऽनुलिप्तस्य स्नेहो गाधस्य तिष्ठति ।
विप्रस्याविदुषो देहे तावद् ब्रह्म न कीर्त्तयेत् ॥
शयानः प्रौढपादश्च कृत्वा वै तावसक्थिकाम् ।
नाधीयीतामिषञ्जग्ध्वा सूतकान्नाद्यमेव च ॥
नीहारैर्बाणशब्दैश्च सन्ध्ययोरुभयोरपि ।
अमावास्यां चतुर्दश्यां पौर्णमास्यष्टमीषु च ॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् ।
अष्टकासु च कुर्व्वीत मतिमान् तासु रात्रिषु ॥
मार्गशीर्षे तथा पौषे माघे मासे तथैव च ।
तिस्रोऽष्टकाः समाख्याता कृष्णे पक्षे च सूरिभिः ॥
श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥

समानविद्येऽनुसृते तथा सब्रह्मचारिणि ।
आचार्ये संस्थिते वापि त्रिरात्रं क्षपणं स्मृतम् ॥
छिद्रेष्वेतेषु विप्राणां अनध्यायाः प्रकीर्त्तिताः ।
हिंसन्ति राक्षसास्ते च तस्मादेतान् विसर्जयेत् ॥
नैत्यके नास्त्यनध्यायः सन्ध्योपासन एव च ।
उपाकर्म्माणि कर्मान्ते होममन्त्रेषु चैव हि ॥
एकामृचमथैकं वा यजुः सामाथवा पुनः ।
अष्टकायाः स्वधीयीत मारुते चापि वापदि ॥
अनध्यायो विनाग्नि च नेतिहासपुराणयोः ।
निधर्म्मशास्त्रेष्वन्येषु पर्वस्वेतान् विसर्जयेत् ॥
एष धर्म्मः समासेन कीर्त्तितो ब्रह्मचारिणः ।
ब्रह्मणाभिहितः पूर्वमृषीणां भावितात्मनाम् ॥
योऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजः ।
स वै मूढो न सम्भाष्यो वेदवाह्यो द्विजातिभिः ॥
न वेदपाठमात्रेण सन्तुष्टो वै द्विजोत्तमः ।
पाठमात्रावसानस्तु पङ्के गौरिव सीदति ॥
योऽधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रकल्पः स पात्रं न प्रपद्यते ॥
यदि वा त्वात्यन्तिकं वासं कर्त्तुमिच्छति वै गुरौ ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥
गत्वा वनं वा विधिवज्जुहुयाज्जातवेदसम् ।
अधीयीत सदा नित्यं ब्रह्मविद्यां समाहितः ॥
सावित्रीं शतरुद्रीयं वेदानां च विशेषतः ।
अभ्यसेत्सततं वेदं भस्मस्नानपरायणः ॥

वेदं वेदौ तथा वेदाः वेदान्वै चतुरो द्विज ! ।
अधीत्य विधिगम्यार्थं ततः स्नायाद् द्विजोत्तमः ॥
वेदोदितं स्वकं कर्म्म नित्यं कुर्यादतन्द्रितः ।
अकुर्वाणः पतत्याशु निरयानतिभीषणान् ॥
अभ्यसेत्प्रयतो वेदं महायज्ञान्न हापयेत् ।
कुर्याद् गृह्याणि कर्माणि सन्ध्योपासनमेव च ॥
नित्यं स्वाध्यायशीलः स्यान्नित्यं यज्ञोपवीतकः ।
सत्यवादी जितक्रोधी ब्रह्मभूयाय कल्पते ॥
सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः ।
अनसूयो मृदुर्दान्तो गृहस्थः प्रत्यवर्त्तते ॥
उदानाय ततः कुर्यात्समानायेति पञ्चमम् ।
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः ॥
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम् ।
ध्यात्वा तन्मानसे देवमात्मानं वै प्रजापतिम् ॥
अमृतापिधानमसीत्युपरिष्टादपः पिबेत् ।
आचान्तः पुनराचामेदयं गौरिति भाषयेत् ॥
अधीत्य विधिवद्वेदानर्थं चैवोपलभ्य च ।
धर्म्मकार्यनिवृत्तिश्चेदेतद्विज्ञानमुच्यते ॥
यः स्वयं नियतो भूत्वा धर्म्मपाठं पठेद्द्विजः ।
अध्यापयेच्छ्रावयेद् वा ब्रह्मलोके महीयते ॥
प्रातःकृत्यं समाप्याथ वैश्वदेवपुरःसरम् ।
मध्याह्ने भोजयेद्विप्रान् सम्यक् भूतात्मभावनः ॥
प्राङ्मुखो तानि भुञ्जीत सूर्याभिमुख एव वा ।
आसीनस्त्वासने शुद्धे भूमौ पादौ निधापयेत् ॥

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः।
पश्चात् स भोजनं कुर्यात् भूमौ वा तन्निधापयेत्॥
उपवासेन तत्तुल्यमित्येवमुशना ब्रवीत्।
उपलिप्य शुचौ देशे पादौ प्रक्षाल्य वै करौ॥
आचान्तोऽक्रोधनो नक्तं पश्चात्तु भोजनं चरेत्।
इह व्याहृतिभिस्त्वन्नं परिधायोदकेन तु॥
परिषेचनमन्त्रेण परिषिच्य ततः परम्।
चित्रगुप्तबलिं दत्त्वा तदन्नं परिषिच्य च॥
अमृतोपस्तरणमसीत्यापोशनक्रियां चरेत्।
स्वाहाप्रणवसंयुक्तं प्राणायेत्याहुतिं ततः॥
अपानायाहुतिं हुत्वा व्यानाय तदनन्तरम्।
उदानाय ततः कुर्य्यात्समानायेति पञ्चमम्॥
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः।
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम्।
ध्यात्वा तन्मानसे देवमात्मानं वै प्रजापतिम्॥
अमृतापिधानमसीत्युपरिष्टादपः पिबेत्।
आचान्तः पुनराचामेदयं गौरिति मन्त्रतः॥
त्रिपदां वा त्रिरावृत्य सर्वपापप्रणाशनीम्।
प्राणानां ग्रन्थिरसीत्यालभेद्धृदयं ततः॥
आचम्याङ्गुष्ठमानीय पादाङ्गुष्ठेन दक्षिणम्।
निःस्रावयेद्धस्तजलमूर्द्ध्वहस्तः समाहितः॥
हुत्वानुमन्त्रणं कुर्य्यात् स्वधायामिति मन्त्रतः।
अथाक्षरेण स्वमात्मानं यो जपेद् ब्रह्मणेति च॥

सर्वेषामेव यागानामात्मयागः परः स्मृतः ।
अथ श्राद्धममावास्याप्राप्तं कार्य्यं द्विजोत्तमैः ॥
पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
अपराह्णे द्विजातीनां प्रशस्तेनामिषेण तु ॥
प्रतिपत्प्रभृतिह्यन्यास्तिथयः कृष्णपक्षके ।
चतुर्दशीं वर्जयित्वा पञ्चमीं ह्युत्तरोत्तराम् ॥
अमावस्याष्टकास्तिस्रः पौर्णमास्यादिषु त्रिषु ।
तिस्रश्चाप्यष्टकाः पुण्या मासि पञ्चदशी तथा ॥
त्रयोदशी मघा कृष्णावर्षासु तु विशेषतः ।
नैमित्तिकं तु कर्त्तव्यं दिवसे चन्द्रसूर्य्ययोः ॥
बालकानां च मरणे नारकी स्यात्ततोऽन्यथा ।
काम्यानि चैव श्राद्धानि शस्यन्ते ग्रहणादिषु ॥
अयने विषुवे चैव व्यतीपाते त्वनन्तकम् ।
संक्रान्त्यामक्षयं श्राद्धं तथा जन्मदिनेष्वपि ॥
नक्षत्रतिथिवारेषु कार्य्यं काम्यं विशेषतः ।
स्वर्गं तु लभते कृत्वा कृत्तिकासु द्विजोत्तमाः ! ॥
द्रव्यब्राह्मणसम्पत्तौ न कालं नियमं ततः ।
कर्मारम्भेषु सर्वेषु कुर्यादभ्युदयं ततः ॥
पुत्रजन्मादिषु श्राद्धं पार्वणं पार्वणं स्मृतम् ।
अहन्यहनि नित्यं स्यात् काम्ये नैमित्तिकं पुनः ॥
सन्निकृष्टमतिक्रम्य श्रोत्रियं यः प्रयच्छति ।
स तेन कर्म्मणा पापी दहत्यासप्तमं कुलम् ॥
यदि स्यादधिको विप्रः शीलविद्यादिभिः स्वयम् ।
तस्मै यत्नेन दातव्यमतिक्रम्यापि सन्निधिम् ॥

अपूपञ्च हिरण्यं च गामश्वं पृथिवीं तिलान्।
अविद्वान् प्रतिगृह्णानो भस्मीभवति काष्ठवत्॥
मासमारोहणं कुर्यात् भर्तृश्चित्यां पतिव्रता।
तन्मृताहनि संप्राप्ते पृथक् पिण्डे नियोजयेत्॥
धर्म्मपिण्डोदकं श्राद्धं पार्वणं नग्नसंज्ञकम्।
अस्थिसञ्चयनं कर्म्म दशाहभवनं तथा॥
ऊर्ध्वं दशाहमुत्कर्षं शेषस्य यदि वा भवेत्।
पिण्डोदकं नवश्राद्धं पुनः कार्यं यथाविधि॥
यद्यस्थिसञ्चयं कर्म्म दशाहमूर्ध्वभाक् भवेत्।
नष्टे वापहृतेऽस्थीनि दाहयेद्यदि वा पुनः॥
कुर्यादहरहः श्राद्धं प्रमीतपितृको द्विजः।
साग्निकोऽनग्निको वापि तीर्थे वेषविशेषतः॥
उत्तानं वा विवर्त्तं वा पितृपात्रं यदा भवेत्।
अभोज्यं तद्भवेदन्नं क्रुद्धैः पितृगणैश्च तैः॥
अन्नहीनं क्रियाहीनं मन्त्रहीनं तु यद्भवेत्।
सर्वमच्छिद्रमित्युक्त्वा ततो यत्नेन भोजयेत्॥
एकोद्दिष्टन्तु विज्ञेयं वृद्धिश्राद्धं तु पार्वणम्।
एतत्पञ्चविधं श्राद्धं भृगुपुत्रेण सूचितम्॥
यात्रायां षष्ठमाख्यातं तत्प्रयत्नेन पावनम्।
शुद्धयेत् सप्तमं श्राद्धं ब्रह्मणा परिकीर्तितम्॥
दैविकं चाष्टमं श्राद्धं यत् कृत्वा मुच्यते भयात्।
सन्ध्यारात्रौ न कर्तव्यमहोरात्रमदर्शनात्॥
देशानान्तु विशेषेण भवेत् पुण्यमनन्तकम्।
गयायामक्षयं श्राद्धं प्रयागे मरणादिषु॥

गायन्ति गाथां ते सर्वे कीर्त्तयन्ति मनीषिणः ॥
एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः ।
तेषां तु समवेतानां यद्येकोऽपि गयां व्रजेत् ॥
गयां प्राप्यानुषङ्गेण यदि श्राद्धं समाचरेत् ।
तारिताः पितरस्तेन स याति परमाङ्गतिम् ॥
वाराहपर्वते चैव गयां चैव विशेषतः ।
एवमादिष्वतीतेषु तुष्यन्ति पितरस्तदा ॥
व्रीहिभिश्च यवैर्माषैरद्भिर्मूलफलेन वा ।
श्यामाकैश्च तु वै शाकैर्नीवारैश्च प्रियङ्गुभिः ॥
गोधूमैश्च तिलैर्मुद्गैर्माषैः प्रीणयते पितॄन् ।
मृष्टान् फलरसानिक्षून् मृदुकान् सस्यदाड़िमान्
विदार्य्यांश्च करण्डांश्च श्राद्धकाले प्रदापयेत् ।
लाजां मधुयुतां दद्याद् दध्नाच्छर्करया सह ॥
दद्यात् श्राद्धे प्रयत्नेन शृङ्गां गजमुकैर्वकान् ।
द्वौ मासौ मत्स्यमांसेन त्रिमासान् हारिणेन च ॥
औरभ्रेणाथ चतुरः शाके नेह च पञ्च तु ।
षण्मासांश्छागमांसेन रौरवेण च वै नतु ॥
दशमासांस्तु तृप्यन्ति वराहमहिषाविकैः ।
शशकूर्मयोर्मांसैर्मासानेकादशैव तु ॥
सम्वत्सरन्तु गव्येन पयसा पायसेन च ।
सदैव सस्यमांसेन तृप्तिर्द्वादशवार्षिकी ॥
कालशाकं महाशाकं खगलोहामिषं मधु ॥
अनन्तान्येव च कल्पन्ते मूलान्यन्यानि सर्वशः ॥
क्रीत्वा लब्ध्वा स्वयं वाथ मृतानाहृत्य वै द्विजः ।

दद्याच्छ्राद्धे प्रयत्नेन दत्तस्याक्षयमुच्यते ॥
पिप्पलीक्रमुकं चैव तथा चैव मसूरकम्।
कुष्माण्डालाबुवार्त्ताकान् मल्लणं सारसं तथा ॥
कूटञ्च भद्रमूलञ्च तण्डुलीयकमेव च।
राजमाषांस्तथा चीरं माहिषञ्च विवर्ज्जयेत् ॥
कोद्रवान् कोविदारांश्च स्थलपाक्यामरीस्तथा।
वर्ज्जयेत्सर्वयत्नेन श्राद्धकाले द्विजोत्तमः ॥

इत्यौशनसस्मृतौ तृतीयोऽध्यायः ॥

स्नात्वा यथोक्तं सन्तर्प्य पितृदेवान् ऋषींस्तथा।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यात् सौम्यमनाः शुचिः ॥
पूर्वमेव निरीक्षेत ब्राह्मणान्वेदपारगान्।
तीर्थं तद्धव्यकव्यानां प्रदाने चातिथिः स्मृतः ॥
ये सोमपाननिरता धर्म्मज्ञा सत्यवादिनः।
व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः ॥
पञ्चाग्निरप्यधीयानो यजुर्वेदविदोऽपि च।
बह्वृचस्तु सुवर्णाश्च त्रिमधुर्वाथ वा भवेत् ॥
त्रीणाचिकेत च्छन्दो वै ज्येष्ठसामगणोऽपि वा।
अथर्वशिरसोऽध्येत रुद्राध्यायी विशेषतः ॥
अग्निहोत्रपरो विद्वान् पापविच्च षडङ्गवित्।
गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः ॥
अहिंसोपरता नित्यं अप्रतिग्राहिणस्तथा।
सत्रिणो दाननिरता ब्राह्मणाः पङ्क्तिपावनाः ॥
असमानप्रवरगा असगोत्रा स्तथैव च ॥

असम्बन्धश्च विज्ञेयो ब्राह्मणः पङ्क्तिपावनः॥
भोजयेद्योगिनं पूर्वं तत्त्वज्ञानरतं परम्।
अलाभे नैष्ठिकं दान्तमुपकुर्वाणकं तु वा॥
तदलाभे गृहस्थस्तु मुमुक्षुः सङ्गवर्जितः।
सर्वालाभे साधकं वा गृहस्थं माविभोजयेत्॥
प्रकृतेर्गुणतत्त्वज्ञो योऽश्नातीह यतिर्भवे।
फलं वेदविदां तस्य सहस्रादतिरिच्यते॥
तस्माद्यत्नेन योगीन्द्रमीश्वरज्ञानतत्परम्।
भोजयेद्धव्यकव्येषु अलाभादिह च द्विजान्॥
एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः।
अनुकल्पः स्वयं ज्ञेयः सदा सद्भिरनुष्ठितः॥
मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम्।
दौहित्रं विदुधं सर्वमन्त्रिकल्पांश्च भोजयेत्॥
न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः।
पैशाचदक्षिणाहीनैर्व्वामुत्र फलमश्नुते॥
कामं श्राद्धेऽर्च्चयेन्मित्रं नाभिरूपमतित्वरम्।
द्विषतां हि हविर्भुक्तं भवति प्रेत्य निष्फलम्॥
तथानुचेद्वविर्दत्त्वा न दाता लभते फलम्।
यावतो ग्रसते पिण्डान् हव्यकव्येषु मन्त्रवित्॥
ततोऽहि ग्रसते प्रेत्य दीप्तान् स्थूलानयोमुखान्।
अथ विद्यानुकूले हि युक्ताश्च स हताऽथवा॥
यत्रैते भुञ्जते हव्यं तद्भवेदासुरं द्विजाः!।
यश्च वेदश्च वेदीच विच्छेद्येत त्रिपूरुषम्॥
स वै दुर्ब्राह्मणो ज्ञेयः श्राद्धादौ न कदाचन।

शूद्रप्रेष्योऽव्रती राज्ञो वृषलो ग्रामयाजकः॥
बधबन्धोपजीवी च षडेते ब्रह्मबन्धवः।
दत्त्वा तु वेदानत्यर्थं पतितान्मनुरब्रवीत्॥
वेदविक्रयिणस्त्वेते श्राद्धादिषु विगर्हिताः।
श्रुतिविक्रयिणो यत्र परपूर्व्वाः समुद्रगाः॥
असमानान् याजयन्ति पतितास्ते प्रकीर्त्तिताः।
असंस्तुताध्यापका ये भृतकान् पाठयन्ति ये॥
अधीयीत तथा वेदान् भृतकास्ते प्रकीर्त्तिताः।
वृद्धश्रावकनिर्गूढाः पञ्चरात्रविदो जनाः॥
कापालिकाः पाशुपताः पाषण्डाश्चैव तद्विधाः।
यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः॥
न तस्या तद्भवेत् श्राद्धं प्रेत्यापि हि फलप्रदाः।
अनाश्रमी यो द्विजः स्यादाश्रमी स्यान्निरर्थकः॥
मिथ्याश्रमी च विप्रेन्द्रा विज्ञेयाः पङ्क्तिदूषकाः।
दुश्चर्मा कुनखी कुष्ठी श्वित्री च श्यावदन्तकः॥
क्रूरो वीजनकश्चैव स्तेनः क्लीवोऽथ नास्तिकः।
मद्यपी वृषली सक्तो वीरहा दीधिषूपतिः॥
आगारदाही कुण्डाशी सोमविक्रयिणो द्विजाः।
परिवेत्ता तथा हिंस्रः परिवेत्तिर्निराकृतिः॥
पौनर्भवः कुसीदी च तथा नक्षत्रदर्शकः।
गीतवादित्रशीलश्च व्याधितः काण एव च॥
हीनाङ्गश्चातिरिक्ताङ्गो ह्यवकीर्णी तथैव च।
कन्यादूषी कुण्डगोलौ अभिशस्तोऽथ देवलः॥
मित्रध्रुक् पिशुनश्चैव नित्यं नार्य्या निकृन्तनः।

मातापितृगुरुत्यागी दारत्यागी तथैव च ॥
अनपत्यः कूटसाक्षी याचको रङ्गजीवकः।
समुद्रयायी कृतहा रथ्यासमयभेदकः ॥
वेदनिन्दारतश्चैव देवनिन्दारत स्तथा।
द्विजनिन्दारतश्चैव ते वर्ज्याः श्राद्धकर्म्मसु ॥
कृतघ्नः पिशुनः क्रूरो नास्तिको वेदनिन्दकः।
मित्रघ्नः पारदार्य्यश्च मिथ्यापण्डितदूषकः ॥
बहुनात्र किमुक्तेन विहितान्येव कुर्वते।
निन्दितान्याचरन्तेते वर्ज्याः श्राद्ध प्रयत्नतः ॥

॥ इत्यौशनसस्मृतौ चतुर्थोऽध्यायः ॥

गोमूत्रेनोदकैः पूर्वं शोधयित्वा समाहितः।
सन्निपात्य द्विजान् सर्वान् साधुभिः सन्निमन्त्रयेत् ॥
श्वो भविष्यति मे श्राद्धं पूर्वेद्युरभिवक्ष्यति ॥
असम्भवे परेद्युर्वा यथोक्तैर्लक्षणैर्युतम्।
तस्य ते पितरः श्रुत्वा श्राद्धकाल उपस्थिते ॥
अन्योन्यमनसा ध्यात्वा सम्पतन्ति मनोजवाः।
ब्राह्मणास्ते समायान्ति पितरो ह्यन्तरिक्षगाः ॥
वायुभूताश्च तिष्ठन्ति भुक्त्वा यान्ति पराङ्गतिम्।
आमन्त्रिताश्च ये विप्राः श्राद्धकाल उपस्थिते ॥
वसेरन्नियताः सर्वे ब्रह्मचर्य्यपरायणाः।
अक्रोधनोऽत्वरो यत्र सत्यवादी समाहितः ॥
भरमैथुनमध्वानं श्राद्धभुग्वर्जयेज्जपम्।
आमन्त्रितो ब्राह्मणो वै योऽन्यस्मै कुरुते क्षणम् ॥
आमन्त्रयित्वा यो मोहादन्यं वा मन्त्रयेत् द्विजः।

स तस्मादधिकः पापी विष्ठाकोटौ हि जायते ॥
श्राद्धे निमन्त्रितो विप्रो मैथुनं योऽधिगच्छति ।
ब्रह्महत्यामवाप्नोति तिर्यक् योनिषु जायते ॥
निमन्त्रितश्च यो विप्रो ह्यध्वानं याति दुर्मतिः ।
भवन्ति पितरस्तस्य तन्मासं पांशुभोजनम् ॥
निमन्त्रितश्च यः श्राद्धे प्रकुर्यात्कलहं द्विजः ।
भवन्ति तस्य तन्मासं पितरो मलभोजनाः ॥
तस्मान्निमन्त्रितः श्राद्धे नियतात्मा भवेद्द्विजः ।
अक्रोधनः शौचपरः कर्त्ता चैव जितेन्द्रियः ॥
शोभते दक्षिणां गत्वा दिशं दर्भान् समाहितः ।
समूलानाहरेद्वारि दक्षिणाग्रान् सुनिर्मलान् ॥
दक्षिणाप्रवणं स्निग्धं विभक्तशुभलक्षणम् ।
शुचि देशं विविक्तञ्च गोमयेनोपलेपयेत् ॥
नदीतीरेषु तीर्थेषु स्वभूमौ गिरिसानुषु ।
विविक्तेषु च तुष्यन्ति दत्तेन पितरस्तथा ॥
परस्य भूमिभागे तु पितॄणां वै न निर्वपेत् ।
स्वामित्वात् स विहन्येत मोहाद्यत्क्रियते नरैः ॥
अटव्यः पर्वताः पुण्यास्तीर्थान्यायतनानि च ।
सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रहः ॥
तिलांश्चावकिरेत्तत्र सर्वतो बन्धयेद्द्विजः ।
असुरोपहतं सर्वं तिलैः शुध्यत्यजेन वा ॥
ततोऽन्नं बहुसंस्कारं नैकव्यञ्जनमव्ययम् ।
चोष्यं पेयं समृद्धं च यथाशक्त्युपकल्पयेत् ॥
ततो निवृत्ते मध्याह्ने लुप्तलोमनखान् द्विजान् ।

अभिगम्य यथामार्गं प्रयच्छेद्दन्तधावनम् ॥
तैलमभ्यञ्जनं स्नानं स्नानीयं च पृथग्विधम् ।
पात्रैरौदुम्बरैर्दद्याद्वैश्वदेवं तु पूर्वकम् ॥
तत्र स्नात्वा निवृत्तेभ्यः प्रत्युत्थानकृताञ्जलिः ।
पाद्यमाचमनीयं च संप्रयच्छेद्यथाक्रमम् ॥
ये चात्र विश्वे देरन् विप्राः पूर्वं निमन्त्रिताः ।
प्राङ्मुखान्यासनान्येषां सदर्भोपहितानि च ॥
दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः ।
तेषूपवेशयेदेतान् ब्राह्मणान् देवकल्पकान् ॥
अस्यन्त्यमिति संकल्प्य त्वासिरंस्थे पृथक् पृथक् ।
द्वौ दैवे प्राङ्मुखौ पित्र्ये त्रय श्चोदङ्मुखास्तथा ॥
एकैकं वा भवेत्तत्र एवं मातामहेष्वपि ।
सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदम् ।
पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् ॥
अथवा भोजयेदेकं ब्राह्मणं वेदपारगम् ।
श्रुतिशीलादिसम्पन्नमलक्षणविवर्जितम् ॥
प्रशस्तपात्रे चान्नन्तु सर्वस्मात् प्रयतात्मनः ।
देवतायतने चास्मै निलोकात् सम्प्रवर्त्तते ॥
प्राश्येदग्नौ तदन्नन्तु दद्याच्च ब्रह्मचारिणे ।
भिक्षुको ब्रह्मचारीव भोजनार्थमुपस्थितः ॥
उपविष्टेषु यच्छ्राद्धे काममन्नमपि भोजयेत् ।
अतिथिं यत्र नाश्नाति न तच्छ्राद्धं प्रकाशते ॥
तस्मात् प्रयत्नात्तीर्थेषु पूजया अतिथयो द्विजैः ।
अतीर्य रमते श्राद्धे भुञ्जते ये द्विजातयः ॥

काकयोनिं व्रजन्त्येते दत्त्वा चैव न संशयः ।
हीनाङ्गः पतितः कुष्ठी वणिक्पुक्कसनासिकः ॥
कुक्कुटः शूकरश्वानो वर्ज्याः श्राद्धेषु दूरतः ।
बीभत्समशुचिं म्लेच्छं न स्पृशेच्च रजस्वलाम् ॥
नीलकाषायवसनं पाषण्डांश्च विवर्जयेत् ।
यत् तत्र क्रियते कर्म्म पैतृकं ब्राह्मणान् प्रति ॥
तत्सर्वमेव कर्त्तव्यं वैश्वदेवस्य पूजनम् ।
यथोपविष्टान् सर्वांस्तानलङ्कुर्य्याद्विभूषणैः ॥
या दिव्या इति मन्त्रेण हस्तेत्वर्घ्यं विनिक्षिपेत् ।
प्रदद्याद् गन्धमाल्यानि धूपादीनि च शक्तितः ॥
अपसव्यं ततः कृत्वा पितॄणां दक्षिणामुखः ।
आवाहनं ततः कुर्य्यादुशन्तस्त्वेत्यृचा बुधः ॥
आवाह्य तदनुज्ञातो जपेदायान्तु न स्ततः ।
शन्नो देवुदकं पात्रे तिलोऽसीति तिलांस्तथा ॥
क्षिप्त्वा चार्घ्यं तथा पूर्वं दत्त्वा हस्तेषु वै पुनः ।
संस्रावांश्च ततः सर्व्वान् पात्रीकुर्य्यात् समाहितः ॥
पितृभिःसमभेतेन ह्यर्घ्यं पात्रं निधाय च ।
अग्नौ करिष्य इत्यादाय पृच्छेदन्नं घृतप्लुतम् ॥
कुरुष्वेति ह्यनुज्ञातो जुहुयादुपवीतवत् ।
यज्ञोपवीतिना होमः कर्त्तव्यं कुशपाणिना ॥
प्राचीनावीतकः पित्र्यं वैश्वदेवं तु होमयेत् ।
दक्षिणं पातयेज्जानु देवान् परिचरंस्तदा ॥
सोमाय वै पितृमते स्वधा नम इति ब्रुवन् ।

अग्नये कव्यवाहनाय स्वधेति जुहुयात्ततः ॥
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ।
महादेवान्तिके वाथ गोष्ठे वा सुसमाहितः ॥
ततस्तैरभ्यनुज्ञातो कृत्वा देवप्रदक्षिणाम् ।
गोमयेनोपलिप्योर्व्वीं कुर्य्यात् स्वस्यच दैवतम् ॥
मण्डलं चतुरस्रं वा दक्षिणं चोन्नतं शुभम् ।
त्रिरुल्लिखेत्तस्य मध्यं दर्भेणैकेन चैव हि ॥
ततः संस्तीर्य्य तत् स्थाने दर्भान् वै दक्षिणाग्रकान् ।
त्रीन् पिण्डान्निर्वपेत्तत्र हविःशेषान् समाहितः ॥
दाप्य पिण्डां स्तत स्तत्र निम्रजरालेपभागिनाम् ।
तेष्वदर्भेष्वथाचम्य त्रिराचम्य शनैरसून् ॥
उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः ।
अवजिघ्यावहन्यात्तान् पिण्डान् यथा समाहितः ॥
अथ पिण्डावशिष्टान्नं विधिना भोजयेद् द्विजम् ।
षडप्यत्र नमस्कुर्य्यात् पितृन् देवांश्च धर्म्मवित् ॥
श्राद्धभोजनकाले तु दीपो यदि विनश्यति ।
पुनरन्नं न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ॥
माषानपूपान्विविधान्दद्यात् सरसपायसम् ।
सूपशाकफलानिष्टान् पयो दधि घृतं मधु ॥
अन्नञ्चैव यथाकामं विविधम्भक्ष्यपेयकम् ।
यद्यदिष्टं द्विजेन्द्राणां तत्तत् सर्वं निवेदयेत् ॥
धान्यास्तिलाश्च विविधाः शर्करा विविधा स्तथा ।
उष्णमन्नं द्विजातिभ्यो दातव्य श्रेय इच्छता ॥
अन्यत्र फलमूलेभ्यः पानकेभ्य स्तथैव च ।

नाश्रूणि पातयेज्जातु न कुप्यान्नानृतं वदेत् ॥
न पादेन स्पृशेदन्नं न चैनमवधूनयेत् ।
क्रोधेनैव च यद्दत्तं यद् दत्त्वं त्वरया पुनः ॥
यातुधाना विलुम्पन्ति यच्च पापोपपादितम् ।
स्विन्नगात्रो न तिष्ठेत सन्निधौ तु द्विजन्मनाम् ॥
न च पश्येत काकादीन् पक्षिणस्तु न वारयेत् ।
तद्रूपाः पितरस्तत्र समायान्ति बुभुत्सवः ॥
न दद्यात्तत्र हस्तेन प्रत्यक्षलवणं तथा ।
नचायसेन पात्रेण न चैवाश्रद्धया पुनः ॥
काञ्चनेन तु पात्रेण तथा त्वौदुम्बरेण च ।
उत्तमाधिपतां याति खड्गेन तु विशेषतः ॥
पात्रे तु मृण्मये यो वै श्राद्धे भोजयते पितॄन् ।
स याति नरकं घोरं भोक्ता चैव पुरोधसः ॥
न पङ्क्त्या विषमं दद्यान् न याचेत न वादयेत् ।
याचितादपि चात्मानं नरकं याति भीषणम् ॥
भुञ्जीत वाग्यतोऽस्पृष्टं न ब्रूयात् प्रकृतान् गुणान् ।
तावद्धि पितरोऽश्नन्ति यावन्नोक्ता हविर्गुणाः ॥
नाग्रासनोपविष्टस्तु भुञ्जीत प्रथमं द्विजः ।
बहूनां पश्यतां सोऽज्ञः पङ्क्त्या हरति किल्बिषम् ॥
न किञ्चिद्वर्जयेत् श्राद्धे नियुक्तस्तु द्विजोत्तमः ।
न मांसं प्रतिषेधेत न चान्यस्यान्नमीक्षयेत् ॥
यो नाश्नाति द्विजोमांसं नियुक्तः पितृकर्म्मणि ।
स प्रेत्य पशुतां याति सन्ततामेकविंशतिम् ॥
स्वाध्यायं श्रावयेदेषां धर्म्मशास्त्राणि चैव हि ।

इतिहासपुराणानि श्राद्धकल्पान् सुशोभनान् ॥
ततोऽन्यमुत्सृजेद् भुक्तेष्वग्रतो विकिरेद् भुवि।
पृष्ट्वा स्वदितमित्येव तृप्तानाचामयेत्ततः ॥
आचान्ताननुजानीयादभितो रम्यतामिति।
स्वधाः स्मेति च तं ब्रूयुर्ब्राह्मणा स्तदनन्तरम् ॥
ततो भुक्तवतां तेषामन्नशेषन्तु वेदयेत्।
यथा ब्रूयात्तथा कुर्य्यादनुज्ञातस्तु तैर्द्विजैः ॥
पित्रोः स्वदितमित्येवं वाच्यं गोष्ठेषु सूनृतम्।
सम्पन्नमित्याभ्युदये दैवेनोच्यत इत्यपि ॥
विसृज्य ब्राह्मणांस्तान् वै दैवपूर्वन्तु वाग्यतः।
दक्षिणां दिशमाकाङ्क्षन् याचतेऽद्धो वरान् पितृन् ॥
दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च।
श्रद्धा च नो मा व्यगमद् बहु देयञ्च नोऽस्त्विति ॥
पिण्डांस्तु भोज्यं विप्रेभ्यो दद्यादग्नौ जलेऽपि वा।
प्रक्षिपेत्तत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत् ॥
मध्यमं तं ततः पिण्डं दद्यात्पत्न्यै सुतार्थकः।
प्रक्षाल्यहस्तावाचम्य ज्ञातिशेषेण भोजयेत् ॥
ज्ञातिष्वपि च तुष्टेषु स्वान् भृत्यान् भोजयेत्ततः।
पश्चात् स्वयं च पत्नीभिः शेषमन्नं समाचरेत् ॥
नोद्वीत तदुच्छिष्टं यावन्नास्तं गतोरविः।
ब्रह्मचर्यां चरेतान्तु दम्पती रजनीं तु ताम् ॥
दत्त्वा श्राद्धं ततो भुक्त्वा सेवते यस्तु मैथुनम्।
महारौरवमासाद्य कीटयोनिं व्रजेत् पुनः ॥
शुचिरक्रोधनः शान्तः सत्यवादी समाहितः।

स्वाध्यायञ्च तथा ध्यानं कर्त्ता भोक्ता विसर्जयेत् ॥
श्राद्धं दत्त्वा परं श्राद्धं भुञ्जते ये द्विजातयः।
महापातकिना तुल्या यान्ति ते नरकान् बहून् ॥
एष वोऽभिहितः सम्यक् श्राद्धकल्पः सनातनः।
आमं निवर्त्तयन्नित्यमुदासीनो न तत्त्वतः ॥
अनग्निरध्वगो वापि तथैव व्यसनान्वितः।
आमश्राद्धं द्विजः कुर्य्याद् वृषलस्तु सदैव हि ॥
आमश्राद्धं द्विजः कुर्य्याद्विधिज्ञः श्रद्धयान्वितः।
तेनाग्नौ करणं कुर्य्यात् पिण्डांस्तैरेव निर्वपेत् ॥
यो हि तद् विधिना कुर्य्याच्छ्राद्धं संयतमानसः।
व्यपेतकल्मषो नित्यं यात्यसौ वैष्णवं पदम् ॥
तस्मात् सर्वैः प्रयत्नेन श्राद्धं कुर्य्याद् द्विजोत्तमः।
आराधितो भवेदीशस्तेन सम्यक् सनातनः ॥
अपि मूलफलैर्वापि प्रकुर्य्यान्निर्धनो द्विजः।
तिलोदकैस्तर्पयित्वा पितॄन् स्नात्वा द्विजोत्तमः ॥
न जीवत्पितृको दद्याद्धोमान्तं वा विधीयते।
तेषां चापि समादद्यात्तेषां चैके प्रचक्षते ॥
पिता पितामहश्चैव तथैव प्रपितामहः।
यो यस्य म्रियते तस्मै देयं नान्यस्य ते न तु ॥
भोजयेद्वापि जीवन्तं यथाकामं तु भक्तिनः।
न जीवन्तमतिक्रम्य ददाति श्रयते श्रुतिः ॥
द्वामुष्यायणको दद्याद्वीजहेतु स्तथाहि सः।
रिक्तया भार्य्यया दद्यान्नियोगोत्पादितो यदि ॥
अनियुक्तः सुतो यस्तु शुक्रतो जायते त्विह।

प्रदद्याद्वीजिने पिण्डं चैनिणे तु तदन्यथा ॥
द्वौ पिण्डौ निर्वपेत्ताभ्यां चैत्रिणे वीजिने यथा ।
कीर्त्तयेदथ वैकस्मिन् वीजिनं चैत्रिणे ततः ॥
मृतेऽहनि तु कर्त्तव्यमेकोद्दिष्टविधानतः ।
आशौचत्वनिरीक्षणः काम्यं कामयते पुनः ॥
पूर्व्वाह्णे चैव कर्त्तव्यं श्राद्धमभ्युदयार्थिना ।
दैवं तत् सर्वमेवं स्यान्न वै कार्य्या बर्हिः क्रिया ॥
दर्भाश्च परितः स्थाप्या स्तदा स भोजयेद् द्विजान् ।
नान्दीमुखाश्च पितरः प्रीयन्तामिति वाचयेत् ।
मातृश्राद्धं तु पूर्वं स्यात् पितॄणां तदनन्तरम् ॥
ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम् ।
दैवपूर्वं प्रदद्याद् वै न कुर्यादप्रदक्षिणम् ॥
प्राङ्मुखो निर्वपेत् पिण्डानुपवीती समाहितः ।
स्थण्डिलेषु विचित्रेषु प्रतिमासु द्विजातिषु ॥
पुष्पैर्धूपैश्च नैवेद्यैर्भूषणैरपि पूज्य च ।
पूजयित्वा मातृगणं कुर्याच्छ्राद्धत्रयं बुधः ॥
अकृत्वा मातृयागञ्च यःश्राद्धं परिवेषयेत् ।
तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः ॥

इत्यौशनसस्मृतौ पञ्चमोऽध्यायः ॥

दशाहं प्राहुराशौचं सपिण्डेषु विपश्चितः ।
मृतेऽथवाथ जातेषु ब्राह्मणानां द्विजोत्तमाः ! ॥
नित्यानि चैव कर्माणि काम्यानि च विशेषतः ।
न कुर्याद्विहितं किञ्चित् स्वाध्यायं मनसापि च ॥

शुचिरक्रोधनस्त्वन्यान् कालेऽग्नौ भोजयेद्द्विजान् ।
शुष्कान्नेन फलैर्वापि पितरं जुहुयात्तथा ॥
न स्पृशेयुरिमानन्ये न भूतेभ्यः समाचरेत् ।
सूतके तु सपिण्डानां संस्पर्शो नैव दुष्यति ।
सूतके सूतकाच्चैव वर्जयित्वा नृणां पुनः ॥
अधीयानस्तथा यज्वा वेदविद्याऽपि यो भवेत् ।
चतुर्थे पञ्चमे वाह्नि संस्पर्शः कथितो बुधैः ॥
स्पृश्यास्तु सर्वमेवैते स्नानात्तु दशमाहनि ॥
दशाहं निर्गुणं प्रोक्तमाशौचन्दासनिर्गुणे ।
एवं द्वित्रिगुणैर्युक्तं चतुस्त्र्येकदिने शुचि ॥
दशाद्यात्तु परं सम्यगधीयीत जुहोति च ।
चतुर्थे तस्य संस्पर्शो मनुराह प्रजापतिः ॥
क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
ये एषां मरणस्याहुर्मरणान्तमशौचकम् ॥
त्रिरात्रं दशरात्रं वा ब्राह्मणानामशौचकम् ।
प्राक्संस्काराच्चिरात्रं स्याद्दशरात्रमतःपरम् ॥
जन्मद्विवर्षगे प्रेते मातापित्रोस्तदिष्यते ।
त्रिरात्रेण शुचिस्त्वन्यो यदिह्यात्यन्तनिर्गुणः ॥
अदन्तजातमरणे मातापित्रोस्तदिष्यते ।
जातदन्ते त्रिरात्रं स्याद्दन्तः स्यात् यत्र विनिर्णयः ॥
आदन्तजन्मनः सद्य आचौलादेकरात्रकम् ।
त्रिरात्रमुपनयनाद्दशरात्रमुदाहृतम् ॥
जातमात्रस्य वा तस्य यदि स्यान्मरणं पितुः ।
मातुश्च सूतकाति स्यात् पिताऽस्य स्पृश्य एव हि ॥

सद्यः शौचं सपिण्डानां कर्त्तव्यं सोदरस्य तु।
ऊर्ध्वं दशाहादेकाहं सोदरो यदि निर्गुणः॥
अथोर्द्ध्वं दन्तजन्म स्यात् सपिण्डानामशौचकम्।
एकरात्रं निर्गुणानाञ्चौलादूर्द्ध्वं त्रिरात्रकम्॥
आदन्तजातमरणं सम्भवेद्यदि सत्तमाः!।
एकरात्रं सपिण्डानां यदि चात्यन्तनिर्गुणः॥
व्रतादेशात् सपिण्डानां गर्भस्रावाच्च पाततः।
गर्भच्युतावहोरात्रं सपिण्डेऽत्यन्तनिर्गुणे॥
यथेष्टाचरणाद्‌ज्ञातौ त्रिरात्रादिति निर्णयः।
सूतके यदि सूतिश्च मरणे वा गतिर्भवेत्॥
शेषेणैव भवेच्छुद्धिरहः शेषे द्विरात्रकम्।
मरणोत्पत्तियोगे तु मरणेन समाप्यते॥
अर्द्धवृत्तिजनाशौचमूर्ध्वमन्येन शुद्ध्यति।
देशान्तरगतः श्रुत्वा सूतकं शाव एव वा॥
तावदप्रयतोऽन्ये वा यावच्छेषः समाप्यते।
अतीते सूतके प्रोक्तं सपिण्डानां त्रिरात्रकम्॥
तथैव मरणे स्नानमूर्ध्वं संवत्सराद्‌व्रती।
वेदांश्च यस्त्वधीयानो न भवेत् वृत्तिकर्षितः॥
सद्यः शौचं भवेत्तस्य सर्वावस्थासु सर्वदा।
स्त्रीणामसंस्कृतानान्तु प्रदानात् परतः पितुः॥
सपिण्डानां त्रिरात्रं स्यात् संस्कारो भर्तुरेव च।
अहस्त्वदत्तकन्यानामशौचं मरणे स्मृतम्॥
द्विवर्षे जन्ममरणे सद्यः शौचमुदाहृतम्।
आदन्तात् सोदरः सद्य आचौलादेकरात्रकम्॥

आव्रतानां त्रिरात्रं स्याद्दशमन्तु ततः परम् ।
मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ॥
एकोदराणां विज्ञेयं सूतके चैतदेव हि ।
पक्षिणी योनिसम्बन्धे बान्धवेषु तथैव च ।
एकरात्रं समुद्दिष्टं गुरौ सब्रह्मचारिणि ।
प्रेते राजनि सद्यस्तु यस्य स्याद्विषये स्थितः ॥
गृहे मृतासु दत्तासु कन्यकासु त्र्यहं पितुः ।
परपूर्वासु भार्यासु पुत्रेषु कुलजेषु च ॥
त्रिरात्रं स्यात्तथाचार्ये भार्यासु प्रत्यगासु च ।
आचार्यपुत्रपत्न्योश्च अहोरात्रमुदाहृतम् ॥
एकरात्रमुपाध्याये तथैव श्रोत्रियेषु च ।
एकरात्रं सपिण्डेषु स्वगृहे संस्थितेषु च ॥
त्रिरात्रं श्वश्रुमरणे श्वशुरे च तथैव च ।
सद्यः शौचं समुद्दिष्टं सगोत्रे संस्थिते सति ॥
शुद्ध्येत् द्विजो दशाहेन द्वादशाहेन भूपतिः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
क्षत्रविट्शूद्रदायादा ये स्युर्विप्रस्य सेवकाः ।
तेषामशेषं विप्रस्य दशाहात् शुद्धिरिष्यते ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु ।
षड्रात्रं वा त्रिरात्रं वाऽप्येकरात्रक्रमेण हि ॥
वैश्यक्षत्रियविप्राणां शूद्रे चाशौचमेव तु ।
अर्द्धमासोऽथ षड्रात्रं त्रिरात्रं द्विजपुङ्गवाः ! ॥
शूद्रक्षत्रियविप्राणां शूद्रे च्वशौचमिष्यते ।
षड्रात्रं द्वादशाहञ्च विप्राणां वैश्यशूद्रयोः ॥

अशौचं क्षत्रिये प्रोक्तं क्रमेण द्विजपुङ्गवा. ।।
शूद्रविट्क्षत्रियाणान्तु ब्राह्मणे संस्थिते यदि ॥
दशरात्रेण शुद्धिः स्यादित्याह कमलोद्भवः ।
असपिण्डं द्विजप्रेतं विप्रो निःसृत्य बन्धुवत् ॥
अशित्वा च सहोषित्वा दशरात्रेण शुद्ध्यति ।
यदि निर्दहति क्षिप्रं प्रलोभात् क्रान्तमानसः ॥
दशाहेन द्विजः शुद्ध्येत् द्वादशाहेन भूमिपः ।
अर्द्धमासेन वैश्यस्तु शूद्रो मासेन शुध्यति ॥
षड्रात्रेणाथवा सप्तत्रिरात्रेणाथवा पुनः ।
अनाथञ्चैव निर्बन्धुं ब्राह्मणं धनवर्जितम् ॥
स्नात्वा सम्प्राश्य तु घृतं शुध्यन्ति ब्राह्मणादयः ।
अपरश्चेत्परं वर्णमपरश्चापरो यदि ॥
एकाहात् क्षत्रिये शुद्धिर्वैश्ये तु स्यात् द्व्यहे सति ।
शूद्रेषु च त्र्यहं प्रोक्तं प्राणायामशतं पुनः ॥
अनस्थिसञ्चिते शूद्रे रौति चेद् ब्राह्मणः स्वकैः ।
त्रिरात्रं स्यात्तथाऽशौचमेकाहं क्षत्रवैश्ययोः ॥
अन्यथा चैव स ज्योतिर्ब्राह्मणे स्नानमेव च ।
अनस्थिसञ्चिते विप्रे ब्राह्मणो रौति चेत्तदा ॥
स्नानेनैव भवेच्छुद्धिः सचैलेन न संशयः ।
यस्तैः सहान्नं कुर्य्याच्च यानादीनि तु चैव हि ॥
ब्राह्मणे वापरे वापि दशाहेन विशुध्यति ।
य स्तेषामन्नमश्नाति स तु देवोऽपि कामतः ॥
तदाशौचनिवृत्तेषु स्नानं कृत्वा विशुध्यति ।
यावत्तदन्नमश्नाति दुर्भिक्षाभिहतो नरः ।

तावेन्त्यद्दान्यशुद्धिः स्यात् प्रायश्चित्तं ततश्चरेत् ॥
दाहाद्यशौचं कर्त्तव्यं द्विजानामग्निहोत्रिणाम् ।
सपिण्डानां तु मरणे मरणादितरेषु च ॥
सपिण्डता च पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु जन्मनाम्नो रवेदने ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
लेपभाजस्तु यश्चात्मा सापिण्ड्यं सप्तपौरुषम् ॥
ऊर्द्धनाच्चैव सापिण्ड्यमाह देवः प्रजापतिः ।
ये चैकजाता बहवो भिन्नयोनय एव च ॥
भिन्नवर्णास्तु सापिण्ड्यं भवेत्तेषां त्रिपूरुषम् ।
कारवः शिल्पिनो वैद्यदासीदासास्तथैव च ॥
राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः ।
दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ ॥
सत्रिणो व्रतिनस्तावत् सद्यः शौचमुदाहृतम् ।
राजा चैवाभिषिक्तश्च प्राणसत्रिण एव च ॥
यज्ञे विवाहकाले च देवयागे तथैव च ।
सद्यः शौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥
विषादुपहतानाञ्च विद्युता पार्थिवैर्द्विजैः ।
सद्यः शौचं समाख्यातं सर्पादिमरणेऽपि च ॥
अग्निमेरुप्रपतने विषोद्धान्यपराशने ।
गोब्राह्मणान्ते सन्न्यस्ते सद्यः शौचं विधीयते ॥
नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
नाशौचं विद्यते सद्भिः पतिते च तथा मृते ॥

इति षष्ठोऽध्यायः ।

पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।

न चाश्रुपातः पिण्डं च कार्यं श्राद्धादिकं क्वचित्॥
व्यापादयेत्तथात्मानं स्वयं योऽग्निविषादिभिः।
सहितं तस्य नाशौचं नचस्यादुदकादिकम्॥
अथ कश्चित्प्रमादेन म्रियतेऽग्निविषादिभिः।
तस्याशौचं विधातव्यं कार्य्यञ्चैवोदकादिकम्॥
जाते कुमारे तदह आमं कुर्य्यात् प्रतिग्रहम्।
हिरण्यधान्यगोवासस्तिलान्नगुलसर्पिषः॥
फलानीक्षुञ्च शाकञ्च लवणं काष्ठमेव च।
तोयं दधि घृतं तैलमौषधं क्षीरमेव च॥
आशौचिनो गृहात् ग्राह्यं शुष्कान्नञ्चैव नित्यशः।
आहिताग्निर्यथान्यायं दातव्यं त्रिभिरग्निभिः॥
अनाहिताग्निर्गृह्येण लौकिकेनेतरैर्द्विजैः।
देहाभावात् पलाशेन कृत्वा प्रतिकृतिं पुनः॥
दाहः कार्य्यो यथान्यायं सपिण्डैः श्रद्धयान्वितैः।
सकृत्प्रसिञ्चे दुदकं नाम गोत्रेण वाग्यतः॥
दशाहं बान्धवैः सार्द्धं सर्वे चैवार्द्रवाससः।
पिण्डं प्रतिदिनं दद्युः सायं प्रातर्यथाविधि॥
प्रेताय च गृहद्वारि चतुरो भोजयेद् द्विजान्।
द्वितीयेऽहनि कर्त्तव्यं क्षुरकर्म्म सबान्धवैः॥
सर्वैरस्थां सञ्चयनं ज्ञातिरेव भवेत्तथा।
त्रिपूर्वं भोजयेद्विप्रानयुग्मान् श्रद्धया शुचीन्॥
पञ्चमे नवमे चैव तथैवैकादशेऽहनि।
अयुग्मान् भोजयेद्विप्रान् नवश्राद्धं तु तद्विदुः॥
एकादशेऽह्नि कुर्व्वीत प्रेतमुद्दिश्य भावतः।

द्वादशे वाथ कर्त्तव्य मग्निदैस्त्वथवाऽहनि ॥
एकं पवित्र मेकं वा पिण्डमात्रं तथैव च ।
एवं मृतेऽह्नि कर्त्तव्यं प्रतिमासन्तु वत्सरम् ॥
सपिण्डीकरणं प्रोक्तं पूर्णे सम्वत्सरे पुनः ।
कुर्य्यात् चत्वारि पात्राणि प्रेतादीनां द्विजोत्तमाः ! ॥
प्रेतार्थं पितृपात्रेषु पात्रमासेचयेत्ततः ।
ये समाना इति द्वाभ्यां पिण्डानप्येवमेव हि ॥
सपिण्डीकरणश्राद्धं दैवपूर्वं विधीयते ।
पितॄनावाहयेत्तत्र पुनः प्रेतञ्च निर्द्दिशेत् ॥
ये सपिण्डीकृताः प्रेता न तेषां स्यात् पृथक्क्रिया ।
यस्तु कुर्य्यात् पृथक् पिण्डं पितृहा त्वभिजायते ॥
मृते पितरि वै पुत्रः पिण्डशब्दं समाविशेत् ।
दद्याच्चान्नं सोदकुम्भं प्रत्यहं प्रेतधर्म्मतः ॥
पार्व्वणेन विधानेन साम्वत्सरिकमिष्यते ।
प्रतिसम्वत्सरं कार्य्यं विधिरेष सनातनः ॥
मातापित्रोः सुतैः कार्य्यं पिण्डदानादि किञ्चन ।
पत्नीकुर्य्यात् सुताभावे पत्न्यभावे तु सोदरः ॥
एष वः कथितः सम्यक् गृहस्थानां यथाविधि ।
स्त्रीणाञ्च भर्तृशुश्रूषा धर्मो नान्य इहेष्यते ॥
यः स्वधर्म्मपरो नित्यमीश्वरार्पितमानसः ।
प्राप्नोति परमं स्थानं यदुक्तं वेदसम्मितम् ॥

इत्यौशनसस्मृतौ सप्तमोऽध्यायः ।

अथ प्रायश्चित्तम् ॥

ब्रह्महा मद्यपः स्तेनो गुरुतल्पग एव च ।
महापातकिनस्त्वेते यः स तैः सह सम्वसेत् ॥
सम्वत्सरेण पतति संसर्गं कुरुते तु यः ।
यो हि शय्यासने नित्यं वसन्वै पतितो भवेत् ॥
याजनं योनिसम्बन्धं तथैवाध्ययनं द्विजः ।
कृत्वा सद्यः पतेत् ज्ञानात् सहभोजनमेव च ॥
अविज्ञायापि यो मोहात् कुर्य्यादध्ययनं द्विजः ।
सम्वत्सरेण पतति सहाध्ययनमेव च ॥
ब्रह्महा वा दशाब्दानि कुटीकृत्वा वने वसेत् ।
भैक्ष्यं चात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥
ब्रह्मणावसथान् सर्वान् देवागाराणि वर्जयेत् ।
विनिन्द्य च स्वमात्मानं ब्राह्मणाश्च स्वयं स्मरेत् ॥
असङ्कराणि योग्यानि सप्तागाराणि संविशेत् ।
विधूमे शनकैर्नित्यं व्याहारे भुक्तवर्जिते ॥
कुर्य्यादनशनं वाद्यं भृगोः पतनमेवं च ।
ज्वलन्तं वा विशेदग्निं जलं वा प्रविशेत् स्वयम् ॥
ब्राह्मणार्थे गवार्थे वा सम्यक् प्राणान् परित्यजेत् ।
दीर्घमामयिनं विप्रं कृत्वा नामयिनं तथा ॥
दत्त्वा चान्नं स विदुषे ब्रह्महत्यां व्यपोहति ।
अश्वमेधावभृतके स्नात्वा यः शुध्यति द्विजः ॥
सर्वस्वं वा वेदविदे ब्राह्मणाय प्रदापयेत् ।

ब्रह्महा मुच्यते पापैर्दृष्ट्वा वा सेतुदर्शनम् ॥
सुरापस्तु सुरां तप्तामग्निवर्णां पिवेत्तदा।
निर्दग्धकायः स तदा मुच्यते च द्विजोत्तमः ॥
गोमूत्रमग्निवर्णं वा गोशकृद्रवमेव वा।
पयो घृतं जलं वाथ मुच्यते पातकात्ततः ॥
जलार्द्रवासाः प्रयतो ध्यात्वा नारायणं हरिम्।
ब्रह्महत्याव्रतं चाथ चरेत्तत्पापशान्तये ॥
स्वर्णस्तेयी सकृद्विप्रो राजानमधिगम्य तु।
स्वकर्म ख्यापयन् ब्रूयान्मां भवाननुशास्त्विति ॥
गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम्।
स वै पापात्ततः स्तेनो ब्राह्मणस्तपसाथ वा ॥
करेणादाय मुसलं लगुडं वाथ घातिनम्।
सन्निव्योभयतस्तीक्ष्णमायसं दण्डमेव च ॥
राजा न स्तेन मंहींत मुक्तकेशेन धावता।
आचक्षाणश्च तत्पापमेवं कर्माणि शाधि माम् ॥
शासनाद्वापि मोक्षाद्वा ततः स्तेयाद्विमुच्यते।
अशासित्वा च तं राजा स्तेयस्याप्नोति किल्बिषम् ॥
तपसा द्रुतमन्यस्य सुवर्णस्तेयजं फलम्।
चीरवासा द्विजोऽरण्ये सञ्चरेद् ब्रह्मणो व्रतम् ॥
स्नात्वाश्वमेधावभृते पूतः स्यादथ वा द्विजः।
प्रदद्याच्चाथ विप्रेभ्यः स्वात्मतुल्यं हिरण्यकम् ॥
चरेद्वा वत्सरं कृत्स्नं ब्रह्मचर्यपरायणः।
ब्राह्मणः स्वर्णहारी च तत्पापस्यापनुत्तये ॥
गुरुभार्य्यां समारुह्य ब्राह्मणः काममोहितः।

उपगूहेत् स्त्रियं तप्तां कान्तां कालायसीकृताम् ॥
स्वयं वा शिश्नवृषणे उत्कृत्याद्यथवाञ्जलौ ।
आतिष्ठेद्दक्षिणामाशा मा निपातमजिह्मतः ॥
गुर्वर्थं बहवः शुद्ध्यै चरेद् वा ब्रह्मणो व्रतम् ।
शाखां कर्कटकोपेतां परिष्वज्याथ वत्सरे ॥
अधःशयीत निरतो मुच्यते गुरुतल्पगः ।
कृच्छ्राव्दञ्चरेद्विप्रश्चीरवासाः समाहितः ॥
अश्वमेधावभृतके स्नात्वा मुच्येद् द्विजोत्तमः ।
कालेऽष्टके वा भुञ्जानो ब्रह्मचारी सदाव्रतः ॥
स्थानासनाभ्यां विचरेद्धनोऽप्युपयन्नतः ।
अधःशायी त्रिभिर्वर्षैस्ततः शुध्येत पातकात् ॥
चान्द्रायणानि वा कुर्य्यात् पञ्च चत्वारि वा पुनः ।
पतितैः सम्प्रयुक्तानामथ गच्छति निष्कृतिम् ।
पतितेन तु संस्पर्शं लोभेन कुरुते द्विजः ॥
सकृत् पापापनोदार्थं तस्यैव व्रतमाचरेत् ।
तप्तकृच्छ्रं चरेद्वाथ सम्वत्सरमतन्द्रितः ॥
षाण्मासिकेऽथ संसर्गे प्रायश्चित्तार्थमाचरेत् ।
एभिः पूतैरथो हन्ति महापातकिनो मलम् ॥
पुण्यतीर्थाभिगमनात् पृथिव्यामथ निष्कृतिः ।
ब्रह्महत्यां सुरापानं स्तेयं गुर्वङ्गनागमम् ॥
कृत्वा चैवं महापापं ब्राह्मणः काममोहितः ।
कुर्य्यादनशनं विप्रः पुण्यतीर्थे समाहितः ॥
जले वा प्रविशेदग्नौ ध्यात्वा देवं कपर्दिनम् ।

न ह्यन्या दुष्कृतिर्दृष्टा मुनिभिः कर्म्मवेदिभिः॥
॥ इत्यौशनसस्मृतौ अष्टमोऽध्यायः॥

गत्वा दुहितरं विप्रं स्वसारं सा स्नुषामपि।
प्रविशेज् ज्वलनं दीप्तं मतिपूर्वमिति स्थितिः॥
मातृस्वसां मातुलानीं तथैव च पितृष्वसाम्।
भागिनेयीं समारुह्य कुर्य्यात् कृच्छ्रादिपूर्वकम्॥
चान्द्रायणानि चत्वारि पञ्च वा सुसमाहितः।
पैतृष्वस्त्रेयीं गत्वा तु स्वस्त्रियां मातुरेव च॥
मातुलस्य सुतां वापि गत्वा चान्द्रायणं चरेत्।
भार्य्या सखीं समारुह्य गत्वा श्यालीं तथैव च॥
अहोरात्रोषितो भूत्वा तप्तकृच्छ्रं समाचरेत्।
उदक्यागमने विप्रस्त्रिरात्रेण विशुध्यति॥
चण्डालीमैथुनमासाद्य चरेच्चान्द्रायणव्रतम्।
पराकेणाथवा शुद्धिरित्याह भगवानजः।
मण्डूकं नकुलं काकं विड्वराहञ्च मूषिकम्॥
श्वानं हत्वा द्विजः कुर्य्यात् षोडशाख्यमहाव्रतम्।
पयः पिबेत्त्रिरात्रन्तु श्वानं हत्वा त्वतन्द्रितः॥
मार्जारं चाथ नकुलं योजनं वाऽध्वनो व्रजेत्।
कृच्छ्रं द्वादशमात्रन्तु कुर्य्यादश्ववधे द्विजः॥
अथ कृष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः।
बलाकं रङ्कवं चैव मूषिकं कृतलम्बकम्॥
वराहन्तु तिलद्रोणं तिलाढञ्चैव तित्तिरिम्।
शुकं द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम्॥

हत्वा हंसं बलाकञ्च बकटिट्टिभमेव च ।
वानरञ्चैव भासञ्च स्वयं वा ब्राह्मणाय गाम् ॥
क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीम् ।
अक्रव्यादं वत्सतरमुष्ट्रं हत्वा तु कृष्णलम् ॥
जीविते चैव तृष्णाय दद्यादस्थिमतां बधे ।
अस्थाञ्चैव हि हिंसायां प्राणायामेन शुद्ध्यति ॥
फलदानन्तु विप्राणां चेदनादाह्निकं शतम् ।
गुल्मवल्लीलतानाञ्च वीरुधां फलमेव च ॥
पुष्पागमानाञ्च तथा घृतप्राशो विशोधनम् ।
चान्द्रायणं पराकञ्च कुर्य्यात् हत्वा प्रमादतः ॥
मतिपूर्वं बधे चास्याः प्रायश्चित्तं न विद्यते ।
मनुष्याणाञ्च हरणं स्त्रीणां कृत्वा ग्रहस्य च ॥
वापीकूपजलानाञ्च शुध्येच्चान्द्रायणेन तु ।
द्रव्याणामल्पसाराणां स्तेयं कृत्वाऽन्यवेश्मनः ॥
चरेत् सान्तपनं कृच्छ्रं चरित्वात्मविशुद्धये ।
धान्यादिधनचौर्यं च पञ्चगव्यविशोधनम् ॥
तृणकाष्ठद्रुमाणाञ्च पुष्पाणाञ्च बलस्य च ।
चेलचर्मामिषाणाञ्च त्रिरात्रं स्यादभोजनम् ॥
मणिप्रवालरत्नानां सुवर्णरजतस्य च ।
अयः कांस्योपलानाञ्च द्वादशाहमभोजनम् ॥
एतदेव व्रतं कुर्याद् द्विशफैकशफस्य च ।
पक्षिणामौषधीनाञ्च हरेच्चापि त्र्यहं पयः ॥
न मांसानां हतानान्तु देवे चान्द्रायणं चरेत् ।
उपोष्य द्वादशाहं तु कुष्माण्डैर्जुहुयाद् घृतम् ॥

नकुलोलूकमार्जारं जग्ध्वा सान्तपनं चरेत् ।
श्वानं जग्ध्वाथ कृच्छ्रेण शुभर्न्नेण च शुध्यति ॥
प्रकुर्य्याच्चैव संस्कारं पूर्व्वेणैव विधानतः ।
शललञ्च बलाकञ्च हंसं कारण्डवं तथा ॥
चक्रवाकञ्च जग्ध्वा च द्वादशाहमभोजनम् ।
कपोतं टिट्टिभं भासं शुकं सारसमेव च ॥
जलौकं जालपातञ्च जग्ध्वा ह्येतद्व्रतञ्चरेत् ।
शिशुमारं तथा माषं मत्स्यं मांसं तथैव च ॥
जग्ध्वा चैव वराहञ्च एतदेव व्रतञ्चरेत् ।
कोकिलं चैव मत्स्यादं मण्डूकं भुजगं तथा ॥
गोमूत्रयावकाहारैर्मासेनैकेन शुध्यति ।
जलेचरांश्च जलजान्यातुधानविषाश्रितान् ॥
रक्तपादांस्तथा जग्ध्वा सप्ताहं चैतदाचरेत् ।
मृतमांसं वृथा चैवमात्मार्थं वा यथाकृतम् ॥
भुक्त्वा मासञ्चरेदेतत्तत्पापस्यापनुत्तये ।
कपोतं कुञ्जरं शिशुं कुक्कुटं रजकां तथा ॥
प्राजापत्यं चरेज्जग्ध्वा तथा कुम्भीरमेव च ।
पलाण्डुं लशुनञ्चैव भुक्त्वा चान्द्रायणं चरेत् ॥
वार्ताकुं तण्डुलीयं च प्राजापत्येन शुद्ध्यति ।
अश्मातकं तथोपितं तप्तकृच्छ्रेण शुद्ध्यति ॥
प्राजापत्येन शुद्धिः स्यात्कुम्भ्यां शशभक्षणे ।
अलावुं गृञ्जनं चैव भुक्त्वाऽप्येतद् व्रतं चरेत् ॥
उदुम्बरञ्च कामेन तप्तकृच्छ्रेण शुद्ध्यति ।
वृथा कृसरसं यावं पायसाऽपूपशष्कुलीन् ॥

भुक्त्वा चैवं व्रतं तत्र त्रिरात्रेण विशुद्ध्यति ।
पीत्वा क्षीराख्यपेयानि ब्रह्मचारी विशेषतः ॥
गोमूत्रयावकाहारी मासार्द्धेन विशुद्ध्यति ।
अनिर्दशाया गोः क्षीरं माहिषं वाजमेव च ॥
गर्भिण्या वा विवत्सायाः पीत्वा दुग्धमिदं चरेत् ।
एतेषाञ्च विकाराणि पीत्वा मोहेन वा पुनः ॥
गोमूत्रयावकाहारी सप्तरात्रेण शुद्ध्यति ।
भुक्त्वा चैव नवश्राद्धं सूतके मृतकेऽथवा ॥
चान्द्रायणेन शुध्येत ब्राह्मणस्तु समाहितः ।
यस्य यज्जूयते नित्यं न यस्याग्रं न दीयते ॥
चान्द्रायणं चरेत् सम्यक् तस्यान्नप्राशने द्विजः ।
अभोज्यानान्तु सर्वेषां भुक्त्वा चान्नमुपस्कृतम् ॥
अन्त्यसप्रात्ययिनोऽन्नञ्च तप्तकृच्छ्रमुदाहृतम् ।
चाण्डालान्नं द्विजो भुक्त्वा सम्यक् चान्द्रायणं चरेत् ॥
अज्ञानात् प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥
क्रव्यादानां पक्षिणाञ्च प्राशय मूत्रपुरीषकम् ।
महासान्तपनं कुर्य्यात्तेषां मोहाद् द्विजातयः ॥
भासमण्डूककुक्कुर वायसे कृच्छ्रमाचरेत् ।
प्राजापत्येन शुध्येत ब्राह्मणः क्लिष्टभोजनात् ॥
क्षत्रिय स्तप्तकृच्छ्रं स्याद् वैश्य श्चैव तिलकृच्छ्रकम् ।
सुराभाण्डोदकं वापि पीत्वा चान्द्रायणं चरेत् ॥
शुनोच्छिष्टं द्विजो भुक्त्वा त्रिरात्रेण विशुद्ध्यति ।
गोमूत्र यावकाहारः पीतशेषञ्च वा पयः ॥

आपो मूत्रपुरीषाद्यै रुपेताः प्राशयेद्यदि ।
तदा सान्तपनं कुर्य्याद् व्रतं कायविशोधनम् ॥
चाण्डालकूपभाण्डेषु यदज्ञानात् पिवेज्जलम् ।
चरेत् सान्तपनं कृच्छ्रं ब्राह्मणः पापशोधनम् ॥
चाण्डालेन च संस्पृष्टं पीत्वा वारि द्विजोत्तमः ।
त्रिरात्रेण विशुध्येत पञ्चगव्येन शुद्ध्यति ॥
महापातकसंसर्गे भुक्त्वा स्नात्वा द्विजोत्तमः ।
बुद्धिपूर्वन्तु मूढात्मा तप्तकृच्छ्रं समाचरेत् ॥
अन्यजातिविवाहे च स महापातकी भवेत् ।
तस्य पातकिसंसर्गात्पातकित्वमवाप्नुयात् ॥
चतुर्विंशतिकृच्छ्रं स्याद् विवाहे त्वन्यकन्यया ।
संसर्गस्य तदर्द्धं स्यात् प्रायश्चित्तं स्मृतेन हि ॥
दृष्ट्वा महापातकिनं चाण्डालं वा रजस्वलाम् ।
प्रमादाद्भोजनं कृत्वा त्रिरात्रेण विशुद्ध्यति ॥
स्नानार्द्रो यदि भुञ्जीत अहोरात्रेण शुद्ध्यति ।
बुद्धिपूर्वं तु कृच्छ्रेण भगवानाह पद्मजः ॥
शुष्कं पर्युषितादीनि गन्धादिप्रतिदूषितम् ।
भुक्त्वोपवासं कुर्व्वीत चरेद्विप्रः पुनः पुनः ॥
अज्ञानाद् भुक्तिशुद्ध्यर्थ मज्ञानस्य विशेषतः ।
भृत्यानां यजनं कृत्वा परेषामन्यकर्मणि ॥
अभिचारमनर्हं च त्रिभिः कृच्छ्रैर्विशुद्ध्यति ।
ब्राह्मणाभिहतानाञ्च कृत्वा दाहादिकं द्विजः ॥
गोमूत्रयावकाहारः प्राजापत्येन शुध्यति ।
तैलाभ्यक्तः प्रभाते च कुर्य्यान्मूत्रपुरीषके ॥

अहोरात्रेण शुध्येत श्मश्रुकर्मणि मैथुने ।
एकाहेति विवाहाग्निं परिभाव्य द्विजोत्तमः ॥
त्रिरात्रेण विशुद्धेत त्रिरात्रात् षडहं पुनः।
दशाहे द्वादशाहे वा परिहास्य प्रमादतः ॥
कृच्छ्रचान्द्रायणं कुर्य्यात्तत्पापस्यापनुत्तये ।
पतितद्रव्यमादाय तदुत्सर्गेण शुद्ध्यति ॥
चरेच्च विधिना कृच्छ्र मित्याह भगवान् प्रभुः ।
अनाशकनिवृत्ता तु प्रव्रज्योपासिता तथा ॥
आचरेत् त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च ।
पुनश्च जातकर्म्मादिसंस्कारैः संस्कृता द्विजाः ॥
शुद्धो य स्तद् व्रतं सम्यक्चरेयुर्धर्म्मदर्शिनः ॥
अनुपासितसिद्धस्तु तं व्यापकवशेन च ।
अजस्रं संयतमना रात्रौ चेद्रात्रिमेव हि ॥
अकृत्वा समिधाधानं शुचिः स्नात्वा समाहितः ।
गायत्र्यष्टसहस्रस्य जपं कृत्वा विशुद्ध्यति ॥
उपासीत न चेत्सन्ध्यां गृहस्थोऽपि प्रमादतः।
स्नात्वा विशुध्यते नद्याः परिश्रान्तः सुसंयमात् ॥
वैदिकानि च नित्यानि कर्म्माणि च विलोप्य तु ।
स्नातकव्रतलौल्यन्तु कृत्वा चोपवसेद्दिनम् ॥
सम्बत्सरच्चरेत् कृच्छ्रं मनुच्छन्दे द्विजोत्तमः ।
चान्द्रायणं चरेद् हत्या गोप्रदानेन शुद्ध्यति ॥
नास्तिक्याद्यदि कुर्वीत प्राजापत्यं चरेद्द्विजः।
देवद्रोहं गुरुद्रोहं तप्तकृच्छ्रेण शुद्ध्यति ॥
उष्ट्रयानं समारुह्य खरयानञ्च कामतः ।

त्रिरात्रेण विशुध्येत नग्नो न प्रविशेज्जलम्॥
षष्ठान्नकालमासं वा संहिताजपमेव वा।
होमाच्च शाकलान्नित्यमपत्यानां विशोधनम्॥
नीलं रक्तं वसित्वा तु ब्राह्मणो वस्त्रमेव हि।
अहोरात्रोषितः स्नातः पञ्चगव्येन शुध्यति॥
वेदधर्म्मपुराणाञ्च चण्डालस्य च भाषणम्।
चान्द्रायणेन शुद्धिः स्यान्न ह्यन्या तस्य निष्कृतिः॥
उद्बन्धनादिनि हतं संस्पृश्य ब्राह्मणः क्वचित्।
चान्द्रायणेन शुद्धः स्यात् प्राजापत्येन वा पुनः॥
उच्छिष्टो यदि नाचान्तश्चण्डालादीन् स्पृशेद्द्विजः।
उच्छिष्ट एव कुर्व्वीत प्राजापत्यं विशुद्धये॥
चण्डालसूतकशवांस्तथा नारीं रजस्वलाम्।
स्पृष्ट्वा स्नायाद्विशुद्ध्यर्थं तत् स्पृष्टान् पतितांस्तथा॥
चण्डालसूतकशवैः संस्पृष्टं स्पर्शयेद् यदि।
प्रमादात् स्नात आचम्य जपं कृत्वा विशुध्यति॥
अस्पृष्टस्पर्शनं कृत्वा स्नात्वा शुद्धेद्द्विजोत्तमः।
आचमेत विशुद्ध्यर्थं प्राह देवः पितामहः॥
विस्नानस्य तु विप्रस्य कदाचित् स्रवते गुदम्।
कृत्वा शौचं ततः स्नात्वा उपोष्य जुहुयाद्घृतम्॥
चण्डालन्तु शवं स्पृष्ट्वा कृच्छ्रं कुर्य्यात् द्विजोत्तमः।
दृष्ट्वा नभस्थं नक्षत्र मह्वोरात्रेण शुध्यति॥
सुरां स्पृष्ट्वा द्विजः कुर्य्यात् प्राणायमत्रयं शुचिः।
पलाण्डुं लशुनं चैव घृतं प्राश्य विशुध्यति॥
ब्राह्मणस्तु शुना दष्टस्त्र्यहं सायं पयः पिबेत्।

नाभेरूर्द्धस्य दष्टस्य तदेव त्रिगुणं भवेत् ॥
स्यादेतत्त्रिगुणं बाह्वोर्मूर्ध्नि स्यात्तु चतुर्गुणम्।
स्नात्वा जपेत्तु गायत्रीं श्वभिर्दष्टो द्विजोत्तमः ॥
पञ्चयज्ञानकृत्वा तु यो भुङ्क्ते प्रत्यहं गृही।
अनातुरस्य निधनं कृच्छ्रार्द्धेन विशुध्यति ॥
आहिताग्नेरुपस्थानं यः कुर्य्यान्न तु पर्वणि।
ऋतौ गच्छेत् न भार्य्यायां सोऽपि कृच्छ्रार्द्धमाचरेत् ॥
विना द्विरप्सु वा कुर्य्याच्छरीरं सन्निवेवतु।
सचेलो जलमाप्लुत्य गामालभ्य विशुध्यति ॥
गायत्र्यष्टसहस्रन्तु त्र्यहं चोपवसेद् गृही।
अनुगच्छेच्च यः शूद्रं प्रेतभूतं द्विजोत्तमः ॥
गायत्र्यष्टसहस्रन्तु जपं कुर्य्यान्नदीषु च।
अकृत्वा शपथं विप्रो विप्रस्य विधिसंयुते ॥
मृषेव यावकान्नेन कुर्य्याच्चान्द्रायणं व्रतम्।
पंक्तौ विषमदानञ्च कृत्वा कृच्छ्रेण शुध्यति ॥
छायां श्वपाकस्यारुह्य स्नात्वा सम्प्राशयेद्घृतम्।
ईक्षेदादित्यमशुचिं दृष्ट्वाग्नीन्द्रजमेव च ॥
मानुष्यास्थि च संस्पृष्ट्वा स्नानमेव विशुध्यति।
कृत्वाप्यध्ययनं विप्रश्चरेद्भिक्षानुवत्सरम् ॥
कृतघ्नो ब्राह्मणगृहे पञ्चसम्वत्सरं व्रती।
हुङ्कारं ब्राह्मणस्योक्त्वा त्वङ्कारन्तु गरीयसः ॥
स्नात्वाचम्य ततः शेषं प्रणिपत्य प्रसादयेत्।
ताड़यित्वा तृणेनैव कण्ठं बद्ध्वा च वाससा ॥
विवादे परिनिर्जित्य प्रणिपत्य प्रसादयेत्।

अवगृह्य चरेत् कृच्छ्रमतिकृच्छ्रनिपातने ॥
कृच्छ्रातिकृच्छ्रः कुर्व्वीत विप्रस्योत्पाद्य शोणितम्।
गुरोराक्रोशने चैव कृच्छ्रं कुर्य्याद्विशोधनम् ॥
एकरात्रं द्विरात्रं वा तत्पापस्यापनुत्तये।
देवर्षीणामभिमुखं ष्ठीवताक्रोशनाकृते ॥
उलूकादि जन्तुर्जित्वा दातव्यञ्च हिरण्यकम्।
देवोद्यानेन यः कुर्य्यान्मूत्रोच्चारं शकृद्द्विजः ॥
छिन्द्याच्छिन्नन्तु शुद्ध्यर्थं चरेच्चान्द्रायणं व्रतम्।
देवतायतने मूत्रं कृत्वा देहाद्द्विजोत्तमः ॥
शिश्नस्योत्कृत्तनं कृत्वा चान्द्रायणमथाचरेत्।
देवतानामृषीणाञ्च वेदानाञ्चैव कुत्सनम् ॥
कृत्वा सम्यक् प्रकुर्व्वीत प्राजापत्यं द्विजोत्तमः।
तैस्तु सम्भाषणं कृत्वा स्नात्वा देवान् समर्च्चयेत् ॥
स्त्री यदा बालभावेन महापापं करोति हि।
प्रायश्चित्तं व्रतस्यास्य पिता तद्व्रतचारिणीम् ॥
उद्वहेदभिरूपान्तमन्यथा पतितस्तु सः।
अपि राजन्यकवये वार्षिकब्राह्मणोव्रतम् ॥
तस्यान्ते वृषभैकेन सहस्रं गोदानमाचरेत्।

सर्पं हत्वा माषमात्रं दद्यात् सुवर्णरजतताम्रत्रपुसीसकांस्यासनामद्भिरेवमृत्स्नायुक्ताभिस्तेजसाञ्चोच्छिष्टानां भस्मनादिः। प्रक्षालनं कनकरजतमणिशङ्खशुक्त्युपलानां वस्त्रविदलरज्जुचर्म्मणाञ्चाद्भिः शौचमिति।

अपि चण्डालश्वपच स्पृष्टे वा विण्मूत्र एव च।
त्रिरात्रेण विशुद्धिः स्यादभुक्तोच्छिष्टः सदाचरेत् ॥

पिता पितामहो यस्या अग्रजो वाथ कस्यचित् ।
तपोऽग्निहोत्रमन्त्रेषु न दोषः परिवेदने ॥
अमावास्यायां यो ब्राह्मणं समुद्दिश्य पितामहम् ।
ब्राह्मणीं स्त्रीं समभ्यर्च्य मुच्यते सर्वपातकैः ॥
अमावास्यां तिथिं प्राप्य यममाराधयेद्भवम् ।
ब्राह्मणान् भोजयित्वा तु सर्वपापैः प्रमुच्यते ॥
कृष्णाष्टम्यां महादेवं तथा कृष्णचतुर्दशीम् ।
संपूज्य ब्राह्मणमुखैः सर्वपापैः प्रमुच्यते ॥
त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनम् ।
दृष्ट्वेव प्रथमे यामे मुच्यते सर्वपातकैः ॥
सर्वत्र दानग्रहणे मुच्यते सोमयागतः ।
शान्त्या च दक्षिणां गृह्णन् हिरण्यप्रतिमामपि ॥
अयुतेनैव गायत्र्या मुच्यते सर्वपातकैः ।

समाप्ता औशनसस्मृतिः ॥

अथ आङ्गिरसस्मृतिः ।

गृहाश्रमेषु धर्मेषु वर्णानामनुपूर्वशः ।
प्रायश्चित्त विधिं दृष्ट्वा अङ्गिरामुनिरब्रवीत् ॥ १ ॥
अन्त्यानामपि सिद्धान्नं भक्षयित्वा द्विजातयः ।
चान्द्रं कृच्छ्रं तदर्द्धन्तु ब्रह्मक्षत्त्र विशां विदुः ॥ २ ॥
रजकश्चर्मकारश्च नटोवरुड़ एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ॥ ३ ॥
अन्त्यजानां गृहे तोयं भाण्डे पर्य्युषितञ्च यत् ।
प्रायश्चित्तं यदा पीतं तदेव हि समाचरेत् ॥ ४ ॥
चाण्डालकूपभाण्डेषु त्वज्ञानात् पिबते यदि ।

प्रायश्चित्तं कथं तेषां वर्णे वर्णे विधीयते ॥ ५ ॥
चरेत् सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः।
तदर्द्धन्तु चरेद्वैश्यः पादं शूद्रेषु दापयेत् ॥ ६ ॥
अज्ञानात् पिवते तोयं ब्राह्मणस्त्वन्त्यजातिषु।
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ॥ ७ ॥
विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन।
आचान्त एव शुध्येत अङ्गिरामुनिरब्रवीत् ॥ ८ ॥
क्षत्रियेण यदा स्पृष्ट उच्छिष्टेन कदाचन।
स्नानं जप्यन्तु कुर्व्वीत दिनस्यार्द्धेन शुध्यति ॥ ९ ॥
वैश्येन तु यदा स्पृष्टः शुना शूद्रेण वा द्विजः।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥ १० ॥
अनुच्छिष्टेन संस्पृष्टो स्नानं येन विधीयते।
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ॥ ११ ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि नीलीवस्त्रस्य वै विधिम्।
स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति ॥ १२ ॥
पालने विक्रये चैव तद्वृत्तेरुपजीवने।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्व्यपोहति ॥ १३ ॥
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम्।
वृथा तस्य महायज्ञा नीलीवस्त्रस्य धारणात् ॥ १४ ॥
नीलीरक्तं यदा वस्त्रमज्ञानेन तु धारयेत्।
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ॥ १५ ॥
नीलीदारु यदा भिन्द्याद्ब्राह्मणं वै प्रमादतः।
शोणितं दृश्यते यत्र द्विजश्चान्द्रायणञ्चरेत् ॥ १६ ॥
नीलीवृत्तेण पक्वान्तु अन्नमश्नाति चेद्द्विजः।

आहार वमन कृत्वा पञ्चगव्येन शुध्यति ॥ १७ ॥
भक्षन् प्रमादतोनीलीं द्विजातिस्त्व समाहितः ।
त्रिषु वर्णेषु सामान्यं चान्द्रायणमिति स्थितम् ॥१८॥
नीलीरक्तेन वस्त्रेण यदन्नमुपनीयते ।
नोपतिष्ठति दातारं भोक्ता भुङ्क्ते तु किल्विषम् १६
नीलीरक्तेन वस्त्रेण यत्पाके श्रपितं भवेत् ।
तेन भुक्तेन विप्राणां दिनमेकमभोजनम् ॥ २० ॥
मृते भर्त्तरि या नारी नीलीवस्त्रं प्रधारयेत् ।
भर्त्ता तु नरकं याति सा नारी तदनन्तरम् ॥२१ ॥
नील्या चोपहते क्षेत्रे शस्यं यत्तु प्ररोहति ।
अभोज्यं तद्द्विजातीनां भुक्ता चान्द्रायणं चरेत् ॥२२ ॥
देवद्रोण्यां वृषोत्सर्गे यज्ञे दाने तथैव च ।
अत्र स्नानं न कर्त्तव्यं दूषिता च वसुन्धरा ॥२३ ॥
वापिता यत्र नीली स्यात्तावद्भूम्यशुचिर्भवेत् ।
यावद्द्वादशवर्षाणि अतऊर्द्धं शुचिर्भवेत् ॥ २४ ॥
भोजने चैव पाने च तथा चौषधभेषजैः ॥
एवं म्रियन्ते या गावः पादमेकं समाचरेत् ॥ २५ ॥
घण्टाभरणदोषेण यत्र गौर्विनिपीड्यते ।
चरेदर्द्धं व्रतं तेषां भूषणार्थं हि तत् कृतम् ॥ २६ ॥
दमने दामने रोधे अवघाते च वैकृते ।
गवा प्रभवता घातैः पादोनं व्रतमाचरेत् ॥ २७ ॥
अङ्गुष्ठपर्वमात्रस्तु बाहुमात्रः प्रमाणतः ।
सपल्लवश्च साग्रश्च दण्डइत्यभिधीयते ॥ ॥ २८ ॥
दण्डादुक्तादृयदान्येन पुरुषाः प्रहरन्ति गाम् ।

द्विगुणं गोव्रतं तेषां प्रायश्चित्तं विशोधनम् ॥ २९ ॥
शृङ्गभङ्गे त्वस्थिभङ्गे चर्म्मनिर्म्मोचने तथा।
दशरात्रं चरेत् कृच्छ्रं यावत् स्वस्थोभवेत्तदा ॥ ३० ॥
गोमूत्रेण तु संमिश्रं यावकञ्चोपजायते।
एतदेव हितं कृच्छ्रमिदमाङ्गिरसं मतम् ॥ ३१ ॥
असमर्थस्य बालस्य पिता वा यदि वा गुरुः।
यमुद्दिश्य चरेद्धर्म्मं पापं तस्य न विद्यते ॥ ३२ ॥
अशीतिर्यस्य वर्षाणि बालोवाप्यूनषोडशः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च ॥ ३३ ॥
मूर्च्छिते पतिते चापि गवि यष्टिप्रहारिते।
गायत्र्यष्टसहस्रन्तु प्रायश्चित्तं विशोधनम् ॥ ३४॥
स्नात्वा रजस्वला चैव चतुर्थेऽह्नि विशुध्यति।
कुर्य्याद्रजसि निवृत्तेऽनिवृत्ते न कथञ्चन ॥ ३५॥
रोगेण यद्रजः स्त्रीणामत्यर्थं हि प्रवर्त्तते।
अशुच्यस्ता न तेन स्युस्तासां वैकारिकं हि तत् ३६॥
साध्वाचारा न तावत् स्याद्रजो यावत् प्रवर्त्तते।
वृत्ते रजसि गम्या स्त्री गृहकर्म्मणि चेन्द्रिये ॥ ३७ ॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥ ३८ ॥
रजस्वला यदा स्पृष्टा शुना शूद्रेण चैव हि।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥ ३९ ॥
द्वावेतावशुची स्यातां दम्पती शयनङ्गतौ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ४० ॥
गण्डूषं पादशौचञ्च न कुर्य्यात् कांस्यभाजने।

भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति ॥ ४१ ॥
रजसा शुध्यते नारी नदी वेगेन शुध्यति ।
भूमौ निःक्षिप्य षण्मासमत्यन्तोपहतं शुचि ॥ ४२ ॥
गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि तु
भस्मना दशभिः शुद्ध्येत् काकेनोपहते तथा ॥ ४३ ॥
शौचं सौवर्णरूप्याणां वायुनार्केन्दुरश्मिभिः ॥ ४४ ॥
रेतःस्पृष्टं शवस्पृष्टमाविकञ्च न दुष्यति ।
अद्भिर्मृदा च तन्मात्रं प्रक्षाल्य च विशुध्यति ॥ ४५ ॥
शुष्कमन्नमविप्रस्य भुक्त्वा सप्ताहमृच्छति ।
अन्नं व्यञ्जनसंयुक्तमर्द्धमासेन जीर्य्यति ॥ ४६ ॥
पयोदधि च मासेन षण्मासेन घृतं तथा ।
तैलं संवत्सरेणैव कोष्ठे जीर्य्यति वा नवा ॥ ४७ ॥
यो भुङ्क्ते हि च शूद्रान्नं मासमेकं निरन्तरम् ।
इह जन्मनि शूद्रत्वं मृतः श्वा चाभिजायते ॥ ४८ ॥
शूद्रान्नं शूद्रसम्पर्कः शूद्रेण च सहासनम् ।
शूद्राज्ज्ञानागमः कश्चिज्ज्वलन्तमपि पातयेत् ॥ ४९ ॥
अप्रणामे तु शूद्रेऽपि स्वस्ति यो वदति द्विजः ।
शूद्रोऽपि नरकं याति ब्राह्मणोऽपि तथैव च ॥ ५० ॥
दशाहाच्छुध्यते विप्रो द्वादशाहेन भूमिपः ।
पाक्षिकं वैश्यएवाह शूद्रोमासेन शुध्यति ॥ ५१ ॥
अग्निहोत्री च यो विप्रः शूद्रान्नं चैव भोजयेत् ।
पञ्च तस्य प्रणश्यन्ति आत्मा वेदास्त्रयोऽग्नयः ॥ ५२ ॥
शूद्रान्नेन तु भुक्तेन यो द्विजो जनयेत् सुतान् ।
यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्त्तते ॥ ५३ ॥

शूद्रेण स्पृष्टमुच्छिष्टं प्रमादादथ पाणिना।
तद्द्विजेभ्यो न दातव्यमापस्तम्बोऽब्रवीन्मुनिः॥५४॥
ब्राह्मणस्य सदा भुङ्क्ते क्षत्रियस्य च पर्वसु।
वैश्येष्वापत्सु भुञ्जीत न शूद्रेऽपि कदाचन॥ ५५॥
ब्राह्मणान्ने दरिद्रत्वं क्षत्रियान्ने पशुस्तथा।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्ने नरकं ध्रुवम्॥ ५६॥
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्।
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं ध्रुवम्॥ ५७॥
दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम् ५८
सूतकेषु यदा विप्रो ब्रह्मचारी जितेन्द्रियः।
पिबेत् पानीयमज्ञानाद्भुङ्क्ते भक्तमथापिवा॥५९॥
उत्तार्य्याचम्य उदकमवतीर्य्य उपस्पृशेत्।
एवं हि समुदाचारो वरुणेनाभिमन्त्रितः॥ ६०॥
अग्न्यगारे गवां गोष्ठे देवब्राह्मणसन्निधौ।
आहारे जपकाले च पादुकानां विसर्ज्जनम्॥ ६१॥
पादुकासनमारूढ़ोगेहात् पञ्चगृहं व्रजेत्।
छेदयेत्तस्य पादौ तु धार्म्मिकः पृथिवीपतिः॥६२॥
अग्निहोत्री तपस्वी च श्रोत्रियो वेदपारगः।
एते वै पादुकैर्य्यान्ति शेषान्दण्डेन ताड़येत्॥ ६३॥
जन्मप्रभृतिसंस्कारे चूड़ान्ते भोजनं नवम्।
असपिण्डेन भोक्तव्यं चूड़स्यान्ते विशेषतः॥ ६४॥
याचकान्नं नवश्राद्धमपि सूतकभोजनम्।
नारीप्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत्॥ ६५॥

अन्यदत्ता तु या कन्या पुनरन्यस्य दीयते ।
तस्याश्चान्नं न भोक्तव्यं पुनर्भूःसा प्रगीयते ॥ ६६ ॥
पूर्व्वश्च स्नावितोयश्च गर्भोयश्चाप्यसंस्कृतः ।
द्वितीये गर्भसंस्कारस्तेन शुद्धिर्विधीयते ॥ ६७ ॥
राजाद्यैर्द्द शभिर्मासैर्यावत्तिष्ठति गुर्विणी ।
तावद्रक्षा विधातव्या पुनरन्योविधीयते ॥ ६८॥
भर्त्तृशासनमुल्लङ्घ्य या च स्त्री विप्रवर्त्तते ।
तस्याश्चैव न भोक्तव्यं विज्ञेया कामचारिणी ॥६९॥
अनपत्या तु या नारी नाश्नीयात्तद्गृहेऽपि वै ।
अथ भुङ्क्ते तु यो मोहात् पूयसं नरकं व्रजेत् ॥७०॥
स्त्रियाधनन्तु ये मोहादुपजीवन्ति बान्धवाः ।
स्त्रिया यानानि वासांसि ते पापा यान्त्यधोगतिम् ॥७१॥
राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्च्चसम् ।
सूतकेषु च यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम् ॥७२॥
इत्यङ्गिरसा महर्षिणा प्रणीतं धर्म्मशास्त्रं समाप्तम् ॥

यमस्मृतिः ॥

—००—

अथातो ह्यस्य धर्म्मस्य प्रायश्चित्ताभिधायकम् ।
चतूर्णामपि वर्णानां धर्म्मशास्त्रं प्रवर्त्तते ॥ १॥
जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानशनच्युताः ।
विषप्रपतनप्रायशस्त्रघातच्युताश्च ये ॥ २ ॥
सर्वे ते प्रत्यवसिताः सर्वलोकवहिष्कृताः ।
चान्द्रायणेन शुद्ध्यन्ति तप्तकृच्छ्रद्वयेन वा ॥ ३ ॥
उभयावसिताः पापा येऽप्याश्रयशरणाच्च्युताः ।

कृच्छ्रद्वयेन शुद्ध्यन्ति दत्त्वा धेनुं तथा वृषम् ॥ ४ ॥
गोब्राह्मणाहनं दग्ध्वा मृतमुद्बन्धनेन च ।
पाशंतस्यैव च्छित्त्वा तु तप्तकृच्छ्रं समाचरेत् ॥ ५ ॥
कृमिभिर्व्रणसंभूतैर्मक्षिकाश्चोपघातितः ।
कृच्छ्रार्द्धं संप्रकुर्व्वीत शक्त्या दद्यात्तु दक्षिणाम् ॥६॥
ब्राह्मणस्य मलद्वारे पूयशोणितसम्भवे ।
कृमिभुक्तव्रणे मौञ्जीहोमेन स विशुद्ध्यति ॥७ ॥
यः क्षत्रियस्तथा वैश्यः शूद्रश्चाप्यनुलोमजः ।
ज्ञात्वा भुङ्क्ते विशेषेण चरेच्चान्द्रायणं व्रतम् ॥ ८ ॥
कुक्कुटाण्डप्रमाणान्तु ग्रासञ्च परिकल्पयेत् ।
अन्यथाहारदोषेण न स तत्र विशुध्यति ॥ ९ ॥
एकैकं वर्द्धयेच्छुक्लेकृष्णपक्षे च ह्रासयेत् ॥
अमावास्यां न भुञ्जीत एष चान्द्रायणोविधिः ॥ १० ॥
सुरान्यमद्यपानेनं गोमांसभक्षणे कृते ।
तप्तकृच्छ्रैर्द्विप्रस्तत्पापस्तु प्रणश्यति ॥ ११ ॥
प्रायश्चित्ते ह्युपक्रान्ते कर्त्ता यदि विपद्यते ।
पूतस्तद्दहरेवापि इहलोके परत्र च ॥ १२ ॥
यावदेकः पृथकद्रव्यः प्रायश्चित्ते न शुध्यति ।
अपरास्ते न च स्पृश्यास्तेऽपि सर्व्वविगर्हिताः ॥१३॥
अभोज्याश्चाप्रतिग्राह्याश्चसंपाठ्या विवाहिनः ।
पूयन्तेऽनुव्रते चीर्णे सर्वे ते ऋटकथभागिनः ॥ १३ ॥
ऊनैकादशवर्षस्य पञ्चवर्षात् परस्य च ।
प्रायश्चित्तं चरेद्भ्राता पिता वान्योऽपि बान्धवः ॥१५॥
अतोबालतरस्यापि नापराधो न पातकम् ।

राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते ॥१६॥
अशीतिर्यस्य वर्षाणि बालोवाप्यूनषोड़शः ।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियोरोगिण एव च ॥ १७ ॥
अस्तंगतो यदा सूर्य्यश्चाण्डालरजकस्त्रियः ।
संस्पृष्टास्तु तदा केचित् प्रायश्चित्तं कथं भवेत् ॥१८॥
जातरूपं सुवर्णञ्च दिवानीतं च यज्जलम् ।
तेन स्नात्वा च पीत्वा च सर्व्वे ते शुचयः स्मृताः ॥१९॥
दासनापितगोपालकुलमित्रार्द्धसीरिणः ।
एते शूद्रेषु भोज्यान्ना यश्चात्मनं निवेदयेत् ॥ २० ॥
अन्नं शूद्रस्य भोज्यं वा ये भुञ्जन्त्यबुधा नराः ।
प्रायश्चित्तं तथा प्राप्तं चरेच्चान्द्रायणं व्रतम् ॥२१॥
प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिता पिबति शोणितम् ॥२२॥
माता चैव पिता चैव ज्येष्ठोभ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥२३॥
यस्तां विवाहयेत् कन्यां ब्राह्मणो मदमोहितः ।
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः ॥२४ ॥
बन्ध्या तु वृषली ज्ञेया वृषली तु मृतप्रजाः ।
शूद्री तु वृषली ज्ञेया कुमारी तु रजस्वला ॥ २५ ॥
यत् करोत्येकरात्रेण वृषलीसेवनाद्द्विजः ।
तद्भैक्षभुग् जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ २६ ॥
स्ववृषं या परित्यज्यान्यवृषेण वृहस्पतिः ।
वृषली सा तु विज्ञेया न शूद्री वृषली भवेत् ॥२७ ॥
वृषलीफेनपीतस्य निःश्वासोपहतस्य च ।

तस्याश्चैव प्रसूतस्य निष्कृतिर्नैव विद्यते ॥ २८ ॥
श्वित्रकुष्ठी तथा चैव कुनखी श्यावदन्तकः ।
रोगी हीनातिरिक्ताङ्गः पिशुनोमत्सरस्तथा ॥ २९ ॥
दुर्भगोहि तथा षण्डः पाषण्डी वेदनिन्दकः ।
हैतुकः शूद्रयाजी च अयाज्यानाञ्च याजकः ॥ ३० ॥
नित्यं प्रतिग्रहे लुब्धोयाचकोविषयात्मकः ।
श्यावदन्तोऽथ वैद्यश्च असदालापकस्तथा ॥ ३१ ॥
एते श्राद्धे च दाने च वर्ज्जनीयाः प्रयत्नतः ॥ ३२ ॥
ततोद्देवलकश्चैव भृतकोवेदविक्रयी ।
एते वर्ज्याः प्रयत्नेन एतद्भास्वतिरब्रवीत् ॥ ३३ ॥
एतान्नियोजयेद्यस्तु हव्ये कव्ये च कर्म्मणि ।
निराशाः पितरस्तस्य यान्ति देवामहर्षिभिः ॥ ३४ ॥
अग्रे माहिषिकं दृष्ट्वा मध्ये तु वृषलीपतिम् ।
अन्ते वार्द्धुषिकं दृष्ट्वा निराशाः पितरोगताः ॥ ३५ ॥
महिषीत्युच्यते भार्य्या या चैव व्यभिचारिणी ।
तान् दोषान् क्षमते यस्तु सवै माहिषिकःस्मृतः ॥ ३६ ॥
समार्घन्तु समुद्धृत्य महार्घं यः प्रयच्छति ।
स वै वार्द्धुषिकोनाम ब्रह्मवादिषु गर्हितः ॥ ३७ ॥
यावदुष्णं भवत्यन्नं यावद्भुञ्जन्ति वाग्यताः
अश्नन्ति पितरस्तावद्यावन्नोक्ता हविर्गुणाः ॥ ३८ ॥
हविर्गुणा न वक्तव्याः पितरोयत्न तर्पिताः ।
पितृभिः स्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ॥ ३९ ॥
यावतो ग्रसते ग्रासान् हव्यकव्येषु मन्त्रवित् ।
तावतोग्रसते पिण्डान् शरीरे ब्रह्मणः पिता ॥ ४० ॥

उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥ ४१ ॥
अनुच्छिष्टेन संस्पृष्टे स्नानमात्रं विधीयते ।
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ॥ ४२ ॥
यावद्विप्रा न पूज्यन्ते सम्भोजनहिरण्यकैः ।
तावच्चीर्णव्रतस्यापि तत्पापं न प्रणश्यति ॥ ४३ ॥
यद्वेष्टितं काकबलाकचिह्नैरमेध्यलिप्तं तु भवेच्छरीरम् ।
गात्रे मुखे च प्रविशेच्च सम्यक् स्नानेन लेपोपहतस्य शुद्धिः
ऊर्द्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
ऊर्द्ध्वं स्नानमधःशौचं तन्मात्रेणैव शुद्ध्यति ॥ ४५ ॥
अभक्ष्याणामपेयानामलेह्यानाञ्च भक्षणे ।
रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ॥ ४६ ॥
पद्मोडुम्बरविल्वाश्च कुशाश्वत्थपलाशकाः ।
एतेषामुदकं पीत्वा षड्रात्रेणैव शुद्ध्यति ॥ ४७ ॥
यः प्रत्यवसितोविप्रः प्रव्रज्याग्निनिरापदि ।
अनाहिताग्निर्वर्त्तेत गृहित्वञ्च चिकीर्षति ॥ ४८ ॥
आचरेत्त्रीणि कृच्छ्राणि चरेच्चान्द्रायणानि च ।
जातकर्म्मादिभिः प्रोक्तैः पुनः संस्कारमर्हति ॥४९ ॥
तूलिका उपधानानि पुष्पं रक्ताम्बराणि च ।
शोषयित्वा प्रतापेन प्रोक्षयित्वा शुचिर्भवेत् ॥ ५० ॥
देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थाञ्च ज्ञात्वा धर्म्मं समाचरेत् ॥ ५१ ॥
रथ्याकर्द्दमतोयानि नावायस तृणानि च ।
मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि च ॥ ५२ ॥

आतुरे स्नानसम्प्राप्ते दशकृत्वोह्यनातुरः।
स्नात्वा स्नात्वा स्पृशेत्तन्तु ततः शुध्येत आतुरः ५३॥
रजकश्चर्म्मकारश्च नटोवरुड़ एव च।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥ ५४ ॥
एषां गत्वा तु योषां वै तप्तकृच्छ्रं समाचरेत् ॥ ५५॥
स्त्रीणां रजस्वलानान्तु स्पृष्टास्पृष्टि यदा भवेत्।
प्रायश्चित्तं कथं तासां वर्णे वर्णे विधीयते ॥ ५६ ॥
स्पृष्टा रजस्वलां यान्तु सगोत्राञ्च सभर्त्तृकाम्।
कामादकामतो वापि स्नात्वा कालेन शुध्यति ॥५७॥
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा।
कृच्छ्रेण शुध्यते पूर्व्वा शूद्रा पादेन शुध्यति ॥ ५८ ॥
स्पृष्टा रजस्वलान्योन्यं क्षत्रिया शूद्रजा तथा।
पादहीनं चरेत् पूर्व्वा पादार्द्धन्तु तथोत्तरा ॥ ५९॥
स्पृष्टा रजस्वलान्योन्यं वैश्यजा शूद्रजा तथा।
कृच्छ्रपादं चरेत् पूर्व्वा तदर्द्धन्तु तथोत्तरा॥ ६० ॥
स्पृष्टा रजस्वला चैव श्वाजजम्बूकरासभैः।
तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति ॥६१॥
स्पृष्टा रजस्वला कैश्चिच्चाण्डालैररजस्वला।
प्राजापत्येन कृच्छ्रेण प्राणायामशतेन च॥ ६२ ॥
विप्रः स्पृष्टोनिशायाञ्च उदक्या पतितेन च।
दिवानीतेन तोयेन स्नापयेच्चाग्निसन्निधौ ॥ ६३ ॥
दिवार्करश्मिसंस्पृष्टं रात्रौ नक्षत्ररश्मिभिः।
सन्ध्योभयोश्च सन्ध्यायाः पवित्रं सर्व्वदा जलम् ॥६४॥
अपः करनखस्पृष्टाः पिबेदाचमने द्विजः।

सुरां पिबति सुव्यक्तं यमस्य वचनं यथा ॥ ६५ ॥
खातवाप्योस्तथा कूपे पाषाणैः शस्त्रघातनैः ।
यष्ट्या तु घातने चैव मृत्पिण्डे गोकुलेन च ॥ ६६ ॥
रोधने बन्धने चैव स्थापिते पुष्कले तथा ।
काष्ठे वनस्पतौ रोधसङ्कटे रज्जुवस्त्रयोः ॥ ६७ ॥
एतत्ते कथितं सर्वं प्रमादस्थानमुत्तमम् ।
यत्र यत्र मृता गावः प्रायश्चित्तं समाचरेत् ॥ ६८ ॥
दारुणा घातने कृच्छं पाषाणैर्द्विगुणं भवेत् ।
अर्द्धकृच्छ्रन्तु खाते स्यात् पादकृच्छ्रन्तु पादपे ॥६९ ॥
शस्त्रघाते त्रिकृच्छ्राणि यष्टिघाते द्वयं चरेत् ॥ ७० ॥
कृच्छ्रेण वस्त्रघातेऽपि गोघ्नस्येति विशुद्ध्यति ।
योवर्त्तयति गोमध्ये नदीकान्तारमन्तिके ॥ ७१ ॥
रोमाणि प्रथमे पादे द्वितीये श्मश्रु वापयेत् ।
तृतीये तु शिखा धार्य्या चतुर्थे सशिखं वपेत् ॥७२॥
न स्त्रीणां वपनं कुर्य्यात् नच सा गामनुव्रजेत् ।
नच रात्रौ वसेद्गोष्ठे न कुर्य्याद् वैदिकीं श्रुतिम् ॥ ७३ ॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
एवमेव तु नारीणां शिरसो वपनं स्मृतम् ॥ ७४ ॥
मृतकेन तु जातेन उभयोः सूतकं भवेत् ।
पातकेन तु लिप्तेन नास्य सूतकिता भवेत् ॥ ७५ ॥
चत्वारि खलु कर्म्माणि सन्ध्याकाले विवर्जयेत् ।
आहारं मैथुनं निद्रां स्वाध्यायञ्च चतुर्थकम् ॥७६॥
आहाराज्जायते व्याधिः क्रूरगर्भश्च मैथुने ।
निद्रा श्रियो निवर्त्तन्ते स्वाध्याये मरणं ध्रुवम् ७७

अज्ञानात्तु द्विजश्रेष्ठ ! वर्णानां हितकाम्यया ।
मया प्रोक्तमिदं शास्त्रं सावधानोऽवधारय ॥ ७८ ॥

इति यमप्रोक्तं धर्म्मशास्त्रं समाप्तम् ।

आपस्तम्बं प्रवक्ष्यामि प्रायश्चित्तविनिर्णयम् ।
दूषितानां हितार्थाय वर्णानामनुपूर्वशः ॥ १ ॥
परेषां परिवादेषु निवृत्तमृषिसत्तमम् ।
विविक्तदेश आसीनमात्मविद्यापरायणम् ॥ २ ॥
अनन्यमनसं शान्तं सत्त्वस्थं योगवित्तमम् ।
आपस्तम्बमृषिं सर्वे समेत्य मुनयोऽब्रुवन् ॥ ३ ॥
भगवन् ! मानवाः सर्वे असन्मार्गे स्थिता यदा ।
चरेयुर्द्धर्म्मकार्य्याणां तेषां ब्रूहि विनिष्कृतिम् ॥ ४ ॥
यतोऽवश्यं गृहस्थेन गवादिपरिपालनम् ।
कृषिकर्म्मादि चापत्सु द्विजामन्त्रणमेव च ॥ ५ ॥
देयञ्चानाथकेऽवश्यं विप्रादीनाञ्च भेषजम् ।
बालानां स्तन्यपानादिकार्य्यञ्च परिपालनम् ॥ ६ ॥
एवं कृते कथञ्चित् स्यात् प्रमादो यद्यकामतः ।
गवादीनां ततोऽस्माकं भगवन् ! ब्रूहि निष्कृतिम् ॥ ७ ॥
एवमुक्तः क्षणं ध्यात्वा प्रणिपातादधोमुखः ।
दृष्ट्वा ऋषीनुवाचेदमापस्तम्बः सुनिश्चितम् ॥ ८ ॥
बालानां स्तनपानादिकार्य्ये दोषो न विद्यते ।
विपत्तावपि विप्राणामामन्त्रणचिकित्सने ॥ ९ ॥
गवादीनां प्रवक्ष्यामि प्रायश्चित्तं रुजादिषु ।
केचिदाहुर्न दोषोऽत्र देहधारणभेषजे ॥ १० ॥
औषधं लवणञ्चैव स्नेहपुष्ट्यन्नभोजनम् ।

प्राणिनां प्राणवृत्त्यर्थः प्रायश्चित्तं न विद्यते ॥ ११ ॥

अतिरिक्तं न दातव्यं काले स्वल्पन्तु दापयेत् ।

अतिरिक्ते विपन्नानां कृच्छ्रमेव बिधीयते ॥ १२ ॥

त्र्यहं निरशनात् पादः पादश्चायाचितं त्र्यहम् ।

पादः सायं त्र्यहं पादः प्रतार्भोज्यं तथा त्र्यहम् ॥१३

प्रातः सायं दिनार्द्धञ्च पादोनं सायवर्ज्जितम् ॥१४॥

प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत् ।

अयाचितन्तु राजन्ये त्रिरात्रं ब्राह्मणस्य च ॥ ११५ ॥

पादमेकं चरेद्रोधे द्वौ पादौ बन्धने चरेत् ।

योजने पादहीनञ्च चरेत् सर्वं निपातने ॥ १६ ॥

घण्टाभरणदोषेण गौस्तु यत्र विपद्यते ।

चरेदर्द्धव्रतं तत्र भूषणार्थं कृतं हि तत् ॥ १७ ॥

दमने वा निरोधे वा संघाते चैव योजने ।

स्तम्भशृङ्खलपाशैश्च मृते पादोनमाचरेत् ॥ १८ ॥

पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात् ।

निपातयन्ति ये गास्तु तेषां सर्वं विधीयते ॥ १९ ॥

प्राजापत्यं चरेद्विप्रः पादोनं क्षत्रियश्चरेत् ।

कृच्छ्रार्द्धन्तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ॥ २०॥

द्वौ मासौ दापयेद्वत्सं द्वौ मासौ द्वौ स्तनौ स्तनौ दुहेत् ।

द्वौ मासावेकवेलायां शेषकाले यथारुचि ॥ २१ ॥

दमतामर्द्धमासेन गौस्तु यत्र विपद्यते ।

सशिखं वपनं कृत्वा प्राजापत्यं समाचरेत् ॥ २२ ॥

हलमष्टगवं धर्म्मं षड्गवं जीवितार्थिनाम् ।

चतुर्गवं नृशंसानां द्विगवञ्च जिघांसिनाम् ॥ २३ ॥

अतिवाहातिदोहाभ्यां नासिकाभेदने तथा।
नदीपर्वतसंरोधे मृते पादोनमाचरेत्॥ २४॥
न नारिकेलबालाभ्यां न मुञ्जेन न चर्म्मणा।
एभिर्गास्तु न बध्नीयाद्बद्ध्वा परवशोभवेत्॥ २५॥
कुशैः काशैश्च बध्नीयाद्वृषभं दक्षिणामुखम्।
पादलग्नाग्निदोषेषु प्रायश्चित्तं न विद्यते॥ २६॥
वप्रापन्नानां वह्ननात्तु रोधने बन्धनेऽपि च।
भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतञ्चरेत्॥ २७॥
शृङ्गभङ्गेऽस्थिभङ्गे च लाङ्गूलस्य च कर्त्तने।
सप्तरात्रं पिबेद्दुग्धं यावतस्वस्था पुनर्भवेत्॥ २८॥
गोमूत्रेण तु संमिश्रं यावकं भक्षयेद्द्विजः।
एतद्विमिश्रितं चैवमुक्तञ्चोशनसा स्वयम्॥ २९॥
देवद्रोण्यां विहारेषु कूपेष्वायतनेषु च।
एषु गोषु विपन्नेसु प्रायश्चित्तं न विद्यते॥ ३०॥
एका पादात्तु बहुभिर्देवाद्व्यापादिता क्वचित्।
पादं पादन्तु हत्यायाश्चरेयुस्ते पृथक् पृथक्॥२२॥
यन्त्रणे गोश्चिकित्सार्थे मूढगर्भविमोचने।
यत्ने कृते विपत्तिश्चेत् प्रायश्चित्तं न विद्यते॥२२॥
सरोम प्रथमे पादे द्वितीये श्मश्रुकर्त्तनम्।
तृतीये तु शिखा धार्य्या सशिखन्तु निपातने॥२३॥
सर्व्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलिद्वयम्।
एवमेव तु नारीणां शिरसो मुण्डनं स्मृतम्॥ ३४॥
इत्यापस्तम्बीये धर्म्मशास्त्रे प्रथमोऽध्यायः॥
कारुहस्तगतं पुण्यं यच्च ग्रामाद्विनिःसृतम्।

स्त्रीबालवृद्धाचरितं प्रत्यक्षादृष्टमेव च ॥ १ ॥
प्रपास्वरण्येषु जलेऽथ सीरे द्रोण्यां जलं यच्च विनिःसृतं भवेत् ।
श्वपाकचाण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः ॥ २ ॥
न दुष्येत् सन्तताधारा वातोद्धूताश्च रेणवः ।
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन ॥ ३ ॥
आत्मशय्या च वस्त्रञ्च जायापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि परेषामशुचीनि तु ॥ ४ ॥
अन्त्यैस्तु खानिताः कूपास्तड़ागानि तथैव च ।
एषु स्नात्वा च पीत्वा पञ्चगव्येन शुध्यति ॥ ५ ॥
उच्छिष्टमशुचित्वञ्च यच्च विष्ठानुलेपनम् ।
सर्वं शुद्धति तोयेन तत्तोयं केन शुध्यति ॥ ६ ॥
सूर्य्यरश्मिनिपातेन मारुतस्पर्शनेन च ।
गवां मूत्रपुरीषेण तत्तोयं तेन शुध्यति ॥ ७ ॥
अस्थिचर्म्मादियुक्तन्तु खराश्वोष्ट्रोपदूषितम् ।
उद्धरेदुदकं सर्व्वं शोधनं परिमार्जनम् ॥ ८ ॥
कूपो मूत्रपुरीषेण ष्ठीवनेनापि दूषितः ।
श्वशृगालखरोष्ट्रैश्च क्रव्यादैश्च जुगुप्सितः ॥ ९ ॥
उद्धृत्यैव च तत्तोयं सप्त पिण्डान् समुद्धरेत् ।
पञ्चगव्यं मृदा पूतं कूपे तच्छोधनं स्मृतम् ॥ १० ॥
वापीकूपतड़ागानां दूषितानाञ्च शोधनम् ।
कुम्भानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत् ॥ ११ ॥
यस्तु कूपात् पिबेत्तोयं ब्राह्मणः शवदूषितात् ।
कथं तत्र विशुद्धिः स्यादिति मे संशयोभवेत् ॥१२ ॥
अक्लिन्ने नाप्यभिन्ने न शवेन परिदूषिते ।

पीत्वा कूपे त्वहोरात्रं पञ्चगव्येन शुध्यति ॥ १३ ॥
छिन्ने भिन्ने शवे चैव तत्रस्थं यदि तत् पिवेत् ।
शुद्धिश्चान्द्रायणं तस्य तप्तकृच्छ्रमथापि वा ॥ १४ ॥
इत्यापस्तम्बीये धर्म्मशास्त्रे द्वितीयोऽध्यायः ॥
अन्त्यजातिमविज्ञातो निवसेद्यस्य वेश्मनि ।
सम्यग् ज्ञात्वा तु कालेन द्विजाः कुर्वन्त्यनुग्रहम् ॥१॥
चान्द्रायणं पराकोवा द्विजातीनां विशोधनम् ।
प्राजापत्यन्तु शूद्रस्य शेषं तदनुसारतः ॥ २ ॥
यैर्भुक्तं तत्र पक्वान्नं कृच्छ्रं तेषां प्रदापयेत् ।
तेषामपि च यैर्भुक्तं कृच्छ्रपादं प्रदापयेत् ॥ ३ ॥
कूपैकपानैर्दुष्टानां स्पर्शने शवदूषिणाम् ।
तेषामेकोपवासेन पञ्चगव्येन शोधनम् ॥ ४ ॥
बालोवृद्धस्तथा रोगी गर्भिणी वापि पीड़िता ।
तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयम् ॥ ५ ॥
अशीतिर्यस्य वर्षाणि बालोवाप्यूनषोड़शः ।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियोव्याधितएव च ॥ ६ ॥
न्यूनैकादशवर्षस्य पञ्चवर्षाधिकस्य च ।
चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं विशोधनम् ॥ ७ ॥
अथवा क्रियमाणेषु येषामार्त्तिः प्रदृश्यते ।
शेषसम्पादनाच्छुद्धिर्विपत्तिर्न भवेद्यथा ॥ ८ ॥
क्षुधा व्याधितकायानां प्राणोयेषां विपद्यते ।
ये न रक्षन्ति भक्तेन तेषां तत्किल्विषं भवेत् ॥९॥
पूर्णेऽपि कालनियमे न शुद्धिर्ब्राह्मणैर्विना ।
अपूर्णेष्वपि कालेषु शोधयन्ति द्विजोत्तमाः ॥ १० ॥

समाप्तमिति नो वाच्यं त्रिषु वर्णेषु कर्हिचित् ।
विप्रसम्पादनं कार्य्यमुत्पन्ने प्राणसंशये ॥ ११ ॥
सम्पादयन्ति यद्विप्राः स्नानतीर्थं फलञ्च तत् ।
सम्यक् कर्त्तुरपायं स्याद्व्रती च फलमाप्नुयात् ॥१२॥
इत्यापस्तम्बीये धर्म्मशास्त्रे तृतीयोऽध्यायः ।

चाण्डालकूपभाण्डेषु योऽज्ञानात् पिवते जलम् ।
प्रायश्चित्तं कथं तस्य वर्णे वर्णे विधीयते ॥ १ ॥
चरेत् सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः ।
तदर्द्धन्तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ॥ २ ॥
भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा ।
प्रमादात् स्पर्शनं गच्छेत्तत्र कुर्य्याद्विशोधनम् ।
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत् ।
जपंस्त्रिरात्रमश्नूलं पञ्चगव्येन शुध्यति ॥ ४ ॥
चाण्डालेन यदा स्पृष्टो विण्मूत्रे च कृते द्विजः ।
प्रायश्चित्तं त्रिरात्रं स्यात्भुक्तोच्छिष्टः षडाचरेत् ॥ ५ ॥
पानमैथुनसम्पर्कें तथा मूत्रपुरीषयोः ।
सम्पर्कं यदि गच्छेत्तु उदक्या चान्त्यजैस्तथा ॥ ६ ॥
एतैरेव यदा स्पृष्टः प्रायश्चित्तं कथं भवेत् ।
भोजने च त्रिरात्रं स्यात् पाने तु त्र्यहमेव च ॥७॥
मैथुने पादकृच्छ्रं स्यात्तथा मूत्रपुरीषयोः ।
दिनमेकं तथा मूत्रे पुरीषे तु दिनत्रयम् ॥ ८ ॥
एकाहं तत्र निर्द्दिष्टं दन्तधावनभक्षणे ॥ ९ ॥
वृक्षारूढ़े तु चाण्डाले द्विजस्तत्रैव तिष्ठति ।

फलानि भक्षयेत्तस्य कथं शुद्धिं विनिर्द्दिशेत् ॥ १० ॥
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेत्।
एकरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥११॥
येन केनचिदुच्छिष्टो अमेध्यं स्पृशते द्विजः।
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ॥ १२ ॥
इत्यापस्तम्बीये धर्म्मशास्त्रे चतुर्थोऽध्यायः ॥
चाण्डालेन यदा स्पृष्टो द्विजवर्णः कदाचन।
अनभ्युक्ष्य पिवेत्तोयं प्रायश्चित्तं कथं भवेत् ॥ १ ॥
ब्राह्मणस्तु त्रिरात्रेण पञ्चगव्येन शुध्यति।
क्षत्रियस्तु द्विरात्रेण प्रञ्चगव्येन शुध्यति ॥ २ ॥
चतुर्थस्य तु वर्णस्य प्रायश्चित्तं न वै भवेत्।
व्रतं नास्ति तपो नास्ति होमोनैव च विद्यते ॥३॥
पञ्चगव्यं न दातव्यं तस्य मन्त्रविवर्जनात्।
ख्यापयित्वा द्विजानान्तु शूद्रोदानेन शुध्यति ॥ ४ ॥
ब्राह्मणस्य यदोच्छिष्टमश्नात्यज्ञानतोद्विजः।
अहोरात्रन्तु गायत्र्या जपं कृत्वा विशुध्यति ॥ ५ ॥
उच्छिष्टं वैश्यजातीनां भुङ्क्ते ज्ञानादृद्विजो यदि।
शङ्खपुष्पोपयः पीत्वा त्रिरात्रेणैव शुध्यति ॥ ६ ॥
ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन।
न तत्र दोषं मन्यन्ते नित्यमेव मनीषिणः ॥ ७ ॥
उच्छिष्टमितरस्त्रीणामश्नीयात् पिवतेऽपिवा।
प्राजापत्येन शुद्धिः स्याद्भगवानङ्गिरा ब्रवीत् ॥ ८ ॥
अन्त्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः।
चान्द्रायणं तदर्द्धार्द्धं ब्रह्मक्षत्रविशां विधिः ॥ ९ ॥

विण्मूत्रभक्षणे विप्रस्तप्तकृच्छ्रं समाचरेत् ।
श्वकाकोच्छिष्टभोगे च प्राजापत्यविधिः स्मृतः ॥ १० ॥
उच्छिष्टः स्पृशते विप्रो यदि कश्चिदकामतः ।
शुनः कुक्कुटशूद्रांश्च मद्यभाण्डं तथैव च ॥ ११ ॥
पक्षिणाधिष्ठितं यच्च यदमेध्यं कदाचन ।
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ॥ १२ ॥
वैश्येन च यदा स्पृष्ट उच्छिष्टेन कदाचन ।
स्नानं जपश्च त्रैकाल्यं दिनस्यान्ते विशुध्यति ॥ १३ ॥
विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन ।
स्नात्वाचम्य विशुद्धः स्यादापस्तम्बोऽब्रवीन्मुनिः॥१४
इत्यापस्तम्बीये धर्म्मशास्त्रे पञ्चमोऽध्यायः ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि नीलीवस्त्रस्य यो विधिः ।
स्त्रीणां क्रीड़ार्थसम्भोगे शयनीये न दुष्यति ॥ १ ॥
पालने विक्रये चैव तद्वृत्तेरुपजीवने ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥ २ ॥
स्नानं दानं तपोहोमः स्वाध्यायः पितृतर्पणम् ।
पञ्चयज्ञा वृथा तस्य नीलीवस्त्रस्य धारणात् ॥ ३ ॥
नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ ४॥
रोमकूपैर्यदा गच्छेद्रसो नील्यास्तु कर्हिचित् ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥ ५ ॥
नीलीदारु यदा भिन्द्याद्ब्राह्मणस्य शरीरकम् ।
शोणितं दृश्यते तत्र द्विजश्चान्द्रायणं चरेत् ॥ ६ ॥
नीलीमध्ये यदा गच्छेत् प्रमादाद् ब्राह्मणः क्वचित् ।

अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ॥ ७ ॥
नीलीरक्तेन वस्त्रेण यदन्नमुपनीयते ।
अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् ॥८॥
भक्षयेद् यस्य नीलीन्तु प्रमादाद् ब्राह्मणः क्वचित् ।
चान्द्रायणेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥९॥
यावत्यां वापिता नीली तावती चाशुचिर्मही ।
प्रमाणं द्वादशाब्दानि अत ऊर्द्ध्वं शुचिर्भवेत् ॥ १०॥

इत्यापस्तम्बीये धर्म्मशास्त्रे षष्ठोऽध्यायः ॥

स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते ।
वृत्ते रजसि गम्या स्त्री नानिवृत्ते कथञ्चन ॥ १॥
रोगिण्या यद्रजः स्त्रीणामत्यर्थं हि प्रवर्त्तते ।
अशुद्धास्तु न तेनेह तासां वैकारिकं हि तत् ॥२॥
साध्वाचारा न सा तावद्रजो यावत् प्रवर्त्तते ।
वृत्ते रजसि साध्वी स्याद्गृहकर्म्मणि चेन्द्रिये ॥ ३ ॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥४॥
अन्त्यजातिश्वपाकेन संस्पृष्टा वै रजस्वला ।
अहानि तान्यतिक्रम्य प्रायश्चित्तं प्रकल्पयेत् ॥ ५ ॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्यं विशोधनम् ।
निशां प्राप्य तु तां योनिं प्रजाकारञ्च कारयेत् ॥६॥
रजस्वलां त्यजेत स्पृष्टां शुना च श्वपचेन च ॥
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ ७॥
प्रथमेऽहनि षड्रात्रं द्वितीये तु त्र्यहन्तथा ।
तृतीये चोपवासस्तु चतुर्थे वह्निदर्शनात् ॥८॥

विवाहे वितते यज्ञे संस्कारे च कृते तथा ।
रजस्वला भवेत् कन्या संस्कारस्तु कथं भवेत् ॥९॥
स्नापयित्वा तदा कन्यामन्यैर्वस्त्रैरलङ्कृताम् ।
पुनः प्रत्याहुतिं हुत्वा शेषं कर्म समाचरेत् ॥१०॥
रजस्वला तु संस्पृष्टा श्वकुक्कुटवायसैः ।
सा त्रिरात्रोपवासेन पञ्चगव्येन शुध्यति ॥ ११ ॥
उच्छिष्टेन तु संस्पृष्टा कदाचित् स्त्री रजस्वला ।
कृच्छ्रेण शुद्ध्यते विप्रस्तथा दानेन शुद्ध्यति ॥ १२ ॥
एकशाखासमारूढ़ा चाण्डाली वा रजस्वला ।
ब्राह्मणेन समं तत्र सवासाः स्नानमाचरेत् ॥ १३ ॥
रजस्वलायाः संसर्गः कथञ्चिज्जायते शुना ।
रजोदिनात्तु यच्छेषस्तदुपोष्य विशुध्यति ॥ १४ ॥
अशक्ता चोपवासे तु स्नानं पश्चात् समाचरेत् ।
तत्रापशक्ता चैकेन पञ्चगव्यं पिबेत्ततः ॥१५॥
उच्छिष्टस्तु यदा विप्रः स्पृशेन्मद्यं रजस्वलाम् ।
मद्यं स्पृष्ट्वा चरेत् कृच्छ्रं तदर्द्धन्तु रजस्वलाम् ॥१६॥
उदक्यां सूतिकां विप्र उच्छिष्टः स्पृशते यदि ।
कृच्छ्रार्द्धन्तु चरेद्विप्रः प्रायश्चित्तं विशोधनम् ॥ १७॥
चाण्डालैः श्वपचैर्वापि आत्रेयी स्पृशते यदि ।
शेषाहात् फालकृष्टेन पञ्चगव्येन शुद्ध्यति ॥ १८ ॥
उदक्या ब्राह्मणी शूद्रामुदक्यां स्पृशते यदि ।
अहोरात्रोषिता भूत्वा पञ्चगव्येन शुध्यति ॥१९॥
एवञ्च क्षत्रियां वैश्यां ब्राह्मणी चेद्रजस्वलाम् ।
सचेलश्रवनं कृत्वा दिनस्यान्ते घृतं पिबेत् ॥२०॥

स्ववर्णेषु तु नारीणां सद्यः स्नानं विधीयते ।
एवमेव विशुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥ २१ ॥
इत्यापस्तम्बीये धर्म्मशास्त्रे सप्तमोऽध्यायः ॥

भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते ।
सुराविण्मूत्रसंस्पृष्टं शुध्यते तापलेखनैः ॥ १ ॥
गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि तु ।
दशभिः क्षारैः शुध्यन्ति श्वकाकोपहतानि च ॥२॥
शौचं सुवर्णनारीणां वायुसूर्य्येन्दुरश्मिभिः ॥ ३ ॥
रेतस्पृष्टं शवस्पृष्टमाविकन्तु प्रदुष्यति ।
अद्भिर्मृदा च तन्मात्रं प्रक्षाल्य च विशुध्यति ॥ ४ ॥
शूद्रमन्नमविप्रस्य पञ्चरात्रेण जीर्य्यति ।
अन्नं व्यञ्जनसंयुक्तमर्द्धमासेन जीर्य्यति ॥ ५ ॥
पयस्तु दधि मासेन षण्मासेन घृतं तथा ।
सम्वत्सरेण तैलन्तु कोष्ठे जीर्य्यति वा नवा ॥ ६ ॥
भुञ्जते ये तु शूद्रान्नं मासमेकं निरन्तरम् ।
इह जन्मनि शूद्रत्वं जायन्ते ते मृताः शुनि ॥ ७ ॥
शूद्रान्नं शूद्रसम्पर्कः शूद्रेणैव सहासनम् ।
शूद्रात् ज्ञानागमः कश्चिज्ज्वलन्तमपि पातयेत् ॥ ८ ॥
आहिताग्निस्तु योविप्रः शूद्रान्नान्न निवर्त्तते ।
तथा तस्य प्रणश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः ॥ ९ ॥
शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति ।
यस्यान्नं तस्य ते पुत्रा ह्यन्नाच्छुक्रस्य सम्भवः ॥ १० ॥
शूद्रान्ने नोदरस्थेन यः कश्चिन्म्रियते द्विजः ।

स भवेच्छूकरो ग्राम्यो मृतः श्वा वाथ जायते ॥ ११ ॥
ब्राह्मणस्य सदा भुङ्क्ते क्षत्रियस्य तु पर्वणि ।
वैश्यस्य यज्ञदीक्षायां शूद्रस्य न कदाचन ॥ १२ ॥
अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतम् ।
वैश्यस्याप्यन्नमेवान्नं शूद्रस्य रुधिरं स्मृतम् ॥ १३ ॥
वैश्वदेवेन होमेन देवताभ्यर्चनैर्जपैः ।
अमृतं तेन विप्रान्नमृगयजुःसामसंस्कृतम् ॥ १४ ॥
व्यवहारानुरूपेण धर्मेण छलवर्जितम् ।
क्षत्रियस्य पयस्तेन भुतानां यच्च पालनम् ॥ १५ ॥
स्वकर्मणा च वृषभैरनुसृत्याद्यशक्तितः ।
खलयज्ञातिथित्वेन वैश्यान्नन्तेन संस्कृतम् ॥ १७ ॥
अज्ञानतिमिरान्धस्य मद्यपानरतस्य च ।
रुधिरं तेन शूद्रान्नं विधिमन्त्रविवर्जितम् ॥ २७ ॥
आममांसं मधु घृतं धानाः क्षीरं तथैव च ।
गुडं तक्रं समंग्राह्यं निवृत्तेनापि शूद्रतः ॥ १८ ॥
शाकं मांसं मृणालानि तुम्बुरुः शक्तवस्तिलाः ।
रसाः फलानि पिण्याकं प्रतिग्राह्या हि सर्वतः ॥१९॥
आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि ।
मनस्तापेन शुध्येत द्रुपदां वा शतं जपेत् ॥ २० ॥
द्रव्यपाणिश्च शूद्रेण स्पृष्टोच्छिष्टेन कर्हिचित् ।
तद्द्विजेन न भोक्तव्यमापस्तम्बोऽब्रवीन्मुनिः ॥२१॥
इत्यापस्तम्बीये धर्मशास्त्रे ऽष्टमोऽध्यायः ॥

भुञ्जानस्य तु विप्रस्य कदाचित् स्रवते गुदम् ।
उच्छिष्टस्याशुचेस्तस्य प्रायश्चित्तं कथं भवेत् ॥ १ ॥
पूर्व्वं शौचन्तु निर्व्वर्त्य ततः पश्चादुपस्पृशेत् ।
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ॥ २ ॥
अशित्वा सर्वमेवान्नमकृत्वा शौचमात्मनः ।
मोहाद्भुक्त्वा त्रिरात्रन्तु यवान् पीत्वा विशुध्यति ॥३॥
प्रसृतं यवशस्येन पलमेकन्तु सर्पिषा ।
पलानि पञ्च गोमूत्रं नातिरिक्तवदाशयेत् ॥ ४ ॥
अलेह्यानामपेयानामभक्ष्याणाञ्च भक्षणे ।
रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ॥ ५ ॥
पद्मोदुम्बरविल्वाश्च कुशाश्वत्थपलाशकाः ।
एतेषामुदकं पीत्वा षड्रात्रेण विशुद्ध्यति ॥ ६ ॥
ये प्रत्यवसिता विप्राः प्रव्रज्याग्निजलादिषु ।
अनाशकनिवृत्ताश्च गृहस्थत्वं चिकीर्षतः ॥ ७ ॥
चरेयुस्त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि वा ।
जातकर्म्मादिभिः सर्वैः पुनः संस्कारभागिनः ।
तेषां सान्तपनं कृच्छ्रं चान्द्रायणमथापि वा ॥ ८ ॥
यद्येष्टितं काकवलाकचिह्नैरमेध्यलिप्तञ्च भवेच्छरीरम् ।
श्रोत्रे मुखे च प्रविशेच्च सम्यक् स्नानेन लेपोपहतस्य शुद्धिः॥९॥
ऊर्द्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
ऊर्द्ध्वं स्नानमधः शौचं मार्जनेनैव शुद्ध्यति ॥ १० ॥
उपानहावमेध्यं वा यस्य संस्पृशते मुखम् ।
मृत्तिकाशोधनं स्नानं पञ्चगव्यं विशोधनम् ॥११॥
दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु ।

षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु ॥ १२ ॥
उपनीतं यदा त्वन्नं भोक्ता च समुपस्थितः ।
अपीतवत् समुत्सृष्टं न दद्यान्नैव होमयेत् ॥१३॥
अन्ने भोजनसम्पन्ने मक्षिकाकेशदूषिते ।
अनन्तरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत् ॥१४॥
शुष्कमांसमयं चान्नं शूद्रान्नं वाप्यकामतः ।
भुक्त्वा कृच्छ्रं चरेद्विप्रो ज्ञानात् कृच्छ्रत्रयं चरेत् ॥ १५ ॥
अभुक्ते मुच्यते यश्च भुञ्जन् यश्चापि मुच्यते ।
भोक्ता च भोजकश्चैव पङ्क्त्या गच्छति दुष्कृतम् ॥ १६ ॥
यच्च भुङ्क्ते तु भुक्तं वा दुष्टं वापि विशेषतः ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ १७ ॥
उदके चोदकस्थस्तु स्थलस्थश्च स्थले शुचिः ।
पादौ स्थाप्योभयत्रैव आचम्योभयतः शुचिः ॥१८ ॥
उत्तीर्य्याचम्य उदकादवतीर्य्य उपस्पृशेत् ।
एवन्तु श्रेयसा युक्तो वरुणेनाभिपूज्यते ॥ १९ ॥
अग्न्यगारे गवां गोष्ठे ब्राह्मणानाञ्च सन्निधौ ।
स्वाध्याये भोजने चैव पादुकानां विसर्जनम् ॥२०॥
जन्मप्रभृतिसंस्कारे श्मशानान्ते च भोजनम् ।
असपिण्डैर्न कर्त्तव्यं चूडाकार्य्ये विशेषतः ॥ २१ ॥
याजकान्नं नवश्राद्धं सग्रहे चैव भोजनम् ।
स्त्रीणां प्रथमगर्भे च भुक्त्वा चान्द्रायणं चरेत् ॥ २२ ॥
ब्रह्मौदने च श्राद्धे च सीमन्तोन्नयने तथा ।
अन्नश्राद्धे मृतश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥ २३ ॥
अप्रजाता तु नारी स्यान्नाश्नीयादेव तद्गृहे ।

अथ भुञ्जीत मोहाद् यः पूयसं नरकं व्रजेत् ॥२४॥

अल्पेनापि हि शुल्केन पिता कन्यां ददाति यः।
रौरवे बहुवर्षाणि पुरीषं मूत्रमश्नुते ॥ २५ ॥

स्त्रीधनानि च ये मोहादुपजीवन्ति बान्धवाः।
स्वर्णं यानानि वस्त्राणि ते पापा यान्त्यधोगतिम् ॥ २६ ॥

राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्।
असंस्कृतन्तु योभुङ्क्ते स भुङ्क्ते पृथिवीमलम् ॥२७॥

मृतके सूतके चैव गृहीते शशिभास्करे।
हस्तिच्छायान्तु यो भुङ्क्ते पापः स पुरुषो भवेत् ॥ २८ ॥

पुनर्भूः पुनरेता च रेतोधा कामचारिणी।
आसां प्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत् ॥ २९ ॥

मातृघ्नश्च पितृघ्नश्च ब्रह्मघ्नो गुरुतल्पगः।
विशेषाद्भक्तमेतेषां भुक्त्वा चान्द्रायणं चरेत् ॥ ३० ॥

रजकव्याधशैलूषवेणुचर्म्मोपजीविनाम्।
भुक्त्वैषां ब्राह्मणश्चान्नं शुद्धिं चान्द्रायणेन तु ॥ ३१ ॥

उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेन वा द्विजः।
उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ॥ ३२ ॥

ब्राह्मणस्य सदाकालं शूद्रे प्रेषणकारिणः।
भूमावन्नं प्रदातव्यं यथैव श्वा तथैव सः ॥ ३३ ॥

अनूदकेष्वरण्येषु चौरव्याघ्राकुले पथि।
कृत्वा मूत्रं पुरीषञ्च द्रव्यहस्तः कथं शुचिः ॥ ३४ ॥

भूमावन्नं प्रतिष्ठाप्य कृत्वा शौचं यथार्हतः।
उत्सङ्गे गृह्य पक्वान्नमुपस्पृश्य ततः शुचिः ॥ ३५ ॥

मूत्रोच्चारं द्विजः कृत्वा अकृत्वा शौचमात्मनः।

मोहाद्भुक्त्वा त्रिरात्रन्तु गवयं पीत्वा विशुध्यति ॥३७॥
उदक्यां यदि गच्छेत्तु ब्राह्मणो मदमोहितः ।
चान्द्रायणेन शुध्येत ब्राह्मणानाञ्च भोजनैः ॥ ३७ ॥
भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा ।
प्रमादाद् यदि संस्पृष्टो ब्राह्मणो ज्ञानदुर्बलः ॥३८॥
स्नात्वा त्रिषवनं नित्यं ब्रह्मचारी धराशयः ।
स त्रिरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥३९॥
चण्डालेन तु संस्पृष्टो यस्त्वापः पिबति द्विजः ।
अहोरात्रोषितो भूत्वा त्रिषवनेन शुध्यति ॥ ४० ॥
सायं प्रातस्त्वहोरात्रं पादं कृच्छ्रस्य तं विदुः ।
सायं प्रातस्तथैवैकं दिनद्वयमयाचितम् ॥ ४१ ॥
दिनद्वयञ्च नाश्नीयात् कृच्छ्रार्द्धं तद्विधीयते ।
प्रायश्चित्तं लघु ह्येतन्न्यायेषु तु यथार्हतः ॥ ४२ ॥
कृष्णाजिनतिलग्राही हस्त्यश्वानाञ्च विक्रयी ।
प्रेतनिर्यातकश्चैव न भूयः पुरुषोभवेत् ॥ ४३ ॥
इत्यापस्तम्बीये धर्मशास्त्रे नवमोऽध्यायः ॥

आचान्तोऽप्यशुचिस्तावद् यावन्नोद्ध्रियते जलम् ।
उद्धृतेऽप्यशुचिस्तावद् यावद्भूमिर्न लिप्यते ॥ १ ॥
भूमावपि च लिप्तायां तावत् स्यादशुचिः पुमान् ।
आसनादुत्थितस्तस्माद् यावन्नाक्रमते महीम् ॥ २ ॥
न यमं यमसित्याहुरात्मा वै यम उच्यते ।
आत्मा संयमितो येन तं यमः किं करिष्यति ॥३॥
न तथासिस्तथा तीक्ष्णः सर्पो वा दुरधिष्ठितः ।

यथा क्रोधोहि जन्तूनां शरीरस्थो विनाशकः ॥४॥

क्षमा गुणोहि जन्तूनामिहामुत्रसुखप्रदः।
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः॥ ५ ॥

न शक्तिशास्त्राभिरतस्य मोक्षो नचैव रम्यावसथप्रियस्य।
न भोजनाच्छादनतत्परस्य एकान्तशीलस्य दृढव्रतस्य ॥ ६॥
मोक्षो भवेत् प्रीतिनिवर्त्तकस्य अध्यात्मयोगैकरतस्य सम्यक्।
मोक्षो भवेन्नित्यमहिंसकस्य स्वाध्याययोगागतमानसस्य ॥७॥

क्रोधयुक्तो यद् यजते यज्जुहोति यदर्चति।
सर्वं हरति तत्तस्य आमकुम्भइवोदकम् ॥ ८ ॥

अपमानात्तपोवृद्धिः सम्मानात्तपसः क्षयः।
अर्च्चितः पूजतो विप्रो दुग्धा गौरिव सीदति ॥९ ॥

आपप्रायते यथा धेनुस्तृणैरमृतसम्भवैः।
एवं जपैश्च होमैश्च पुण्यैरापप्रायते द्विजः॥ १० ॥

मातृवत् परदारांश्च परद्रव्याणि लोष्ट्रवत्।
आत्मवत् सर्वभूतानि यः पश्यति स पश्यति ॥११ ॥

रजकव्याधशैलूषवेणुचर्मोपजीविनाम्।
यो भुङ्क्ते भक्तमेतेषां प्राजापत्यं विशोधनम् ॥ १२ ॥

अगम्यागमनं कृत्वा अभक्ष्यस्य च भक्षणम्।
शुद्धिं चान्द्रायणं कृत्वा अथर्वोक्तं तथैवच ॥ १३ ॥

अग्निहोत्रं त्यजेद् यस्तु स नरोवीरहा भवेत्।
तस्य शुद्धिर्विधातव्या नान्या चान्द्रायणादृते ॥ १४ ॥

विवाहोत्सवयज्ञेषु अन्तरामृतसूतके।
सद्यः शुद्धिं विजानीयात् पूर्वं सङ्कल्पितं चरेत् ॥१५॥

देवद्रोण्यां विवाहेषु यज्ञेषु प्रततेषु च।
कल्पितं सिद्धमन्वाद्यं नाशौचं मृतसूतके॥ १६॥
इत्यापस्तम्बीये धर्म्मशास्त्रे दशमोऽध्यायः॥

समाप्तश्चायं ग्रन्थः।

अथ सम्वर्त्तस्मृतिः॥

—००—

सम्वर्त्तमेकमासीनमात्मविद्यापरायणम्।
ऋषयस्तु समागम्य पप्रच्छुर्धर्म्मकाङ्क्षिणः॥ १॥
भगवन्! श्रोतुमिच्छामः श्रेयस्कर्म्म द्विजोत्तम।!
यथावद्धर्म्ममाचक्ष्व शुभाशुभविवेचनम्॥ २॥
वामदेवादयः सर्वे तमपृच्छन् महौजसम्।
तानब्रवीन्मुनीन् सर्व्वान् प्रीतात्मा श्रूयतामिति॥३॥
स्वभावाद् यत्र विचरेत् कृष्णसारः सदा मृगः।
धर्म्मप्रदेशः स विज्ञेयो द्विजानां धर्म्मसाधनम्॥ ४॥
उपनीतः सदा विप्रो गुरोस्तु हितमाचरेत्।
स्रग्गन्धमधुमांसानि ब्रह्मचारी विवर्जयेत्॥ ५॥
सन्ध्यां प्रातः सनक्षत्रामुपासीत यथाविधि।
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्करे॥ ६॥
तिष्ठन् पूर्वां जपं कुर्य्याद्ब्रह्मचारी समाहितः।
आसीनः पश्चिमां सन्ध्यां जपं कुर्य्यादतन्द्रितः॥७॥

अग्निकार्य्यं ततः कुर्य्यान्मेधावी तदनन्तरम् ।
ततोऽधीयीत वेदन्तु वीक्षमाणो गुरोर्मुखम् ॥ ८ ॥
प्रणवं प्राक् प्रयुञ्जीत व्याहृतिस्तदनन्तरम् ।
गायत्रीञ्चानुपूर्व्वेण ततोवेदं समारभेत् ॥ ९ ॥
हस्तौ सुसंयतौ कार्य्यौ जानुभ्यामुपरिस्थितौ ।
गुरोरनुमतं कुर्य्यात् पठन्नान्यमतिर्भवेत् ॥ १० ॥
सायं प्रातस्तु भिक्षेत ब्रह्मचारी सदा व्रती ।
निवेद्य गुरवेऽश्नीयात् प्राङ्मुखो वाग्यतः शुचिः ११
सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।
नान्तरा भोजनं कुर्य्यादग्निहोत्रसमो विधिः ॥१२ ॥
आचम्यैव तु भुञ्जीत भुक्त्वा चोपस्पृशेद्द्विजः ।
अनाचान्तस्तु योऽश्नीयात् प्रायश्चित्तीयते तु सः ॥१३॥
अनाचान्तः पिवेद्यस्तु योऽपिवा भक्षयेद्द्विजः ।
गायत्र्यष्टसहस्रन्तु जपं कृत्वा विशुध्यति ॥ १४ ॥
अकृत्वा पादशौचन्तु तिष्ठन् मुक्तशिखोऽपिवा ।
विना यज्ञोपवीतेन आचान्तोऽथ शुचिर्द्विजः ॥ १५ ॥
आचामेद् ब्राह्मतीर्थेन सोपवीती ह्युदङ्मुखः ।
उपवीती द्विजोनित्यं प्राङ्मुखो वाग्यतः शुचिः १६॥
जले जलस्थ आचामेत् स्थलाचान्तोवहिः शुचिः ।
वहिरन्तस्थ आचान्त एवं शुद्धिमवाप्नुयात् ॥ १७ ॥
आमणिबन्धनाद्धस्तौ पादावद्भिर्विशोधयेत ॥ १८ ॥
अशब्दाभिरनुष्णाभिः स्ववर्णरसगन्धिभिः ।
हृद्गताभिरफेनाभिस्त्रिश्चतुर्वाद्भिराचमेत् ।
परिमृज्य द्विरास्यन्तु द्वादशाङ्गानि च स्पृशेत् ॥ १९

स्नात्वा पीत्वा तथा भुक्त्वा स्पृष्ट्वा चैव द्विजोत्तमाः ! ।
अनेन विधिना विप्रआचान्तः शुचितामियात् ॥२० ॥
शूद्रः शुद्ध्यति हस्तेन वैश्यो दन्तेषु वारिभिः ।
कण्ठागतैः क्षत्त्रियस्तु आचान्तः शुचिता मियात् २१॥
आसनारूढ़पादस्य कृतावशक्थिकस्तथा ।
आरूढ़पादुको वापि न शुद्ध्यति कदाचन ॥ २२ ॥
उपासीत न चेत् सन्ध्यामग्निकार्य्यं नवा कृतम् ।
गायत्र्यष्टसहस्रन्तु जपेत् स्नात्वा समाहितः ॥२३ ॥
सूतकान्नं नवश्राद्धं मासिकान्नं तथैव च ।
ब्रह्मचारी तु योऽश्नीयात्त्रिरात्रेणैव शुध्यति ॥ २४ ॥
ब्रह्मचारी तु यो गच्छेत् स्त्रियं कामप्रपीड़ितः ।
प्राजापत्यं चरेत् कृच्छ्रमथवैकं सुमन्त्रितः ॥ २५ ॥
ब्रह्मचारी तु योऽश्नीयान्मधुमांसं कथञ्चन ।
प्राजापत्यन्तु कृत्वासौ मौञ्जीहोमेन शुध्यति ॥ २६ ॥
निर्वपेच्च पुरोडाशं ब्रह्मचारी च पर्वणि ।
मन्त्रैः शाकलहोमान्तैरग्नावाज्यञ्च होमयेत् ॥ २७ ॥
ब्रह्मचारी तु यः स्कन्देत् कामतः शुक्रमात्मनः ।
अवकीर्णी व्रतं कुर्य्यात् स्नात्वा शुद्ध्येदकामतः ॥२७॥
भिक्षाटनमतः कृत्वा स्वस्थो ह्येकात्मनः श्रुतिः ।
अस्नात्वा चैव यो भुङ्क्ते गायत्र्यष्टशतं जपेत् ॥२८॥
शूद्रहस्तेन योऽश्नीयात् पानीयं वा पिवेत् क्वचित् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥३० ॥
शुष्कपर्य्युषितोच्छिष्टं भुक्तान्नं केशदूषितम् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ ३१ ॥

शूद्राणां भाजने भुक्ता भुक्ता वा भिन्नभाजने ।
अहोरात्रोषितो भूत्वा पञ्चव्येन शुध्यति ॥ ३२ ॥
दिवा स्वपिति यः स्वस्थो ब्रह्मचारी कथञ्चन ।
स्नात्वा सूर्य्यं समभ्यर्च्च गायत्र्यष्टशतं जपेत् ॥ ३२ ॥
एष धर्म्मः समाख्यातः प्रथमाश्रमवासिनाम् ।
एवं संवर्त्तमानस्तु प्राप्नोति परमां गतिम् ॥ ३४ ॥
अथ द्विजोऽभ्यनुज्ञातः सवर्णां स्त्रियमुद्वहेत् ।
कुले महति सम्भूतां लक्षणैश्च समन्विताम् ।
ब्राह्मेणैव विवाहेन शीलरूपगुणान्विताम् ॥ ३५ ॥
पञ्चयज्ञविधानञ्च कुर्य्यादहरहर्द्विजः ।
न हापयेत् क्वचिद्‌द्विप्रः श्रेयस्कामः कदाचन ॥ ३६ ॥
हानिं तस्य तु कुर्व्वीत सदा मरणजन्मनोः ॥ ३७ ॥
विप्रो दशाहमासीत दानाध्ययनवर्जितः ।
क्षत्रियो द्वादशाहेन वैश्यः पञ्चदशैव तु ।
शूद्रः शुध्यति मासेन सम्वर्त्तवचनं यथा ॥ ३८ ॥
प्रेतस्य तु जलं देयं स्नात्वा च गोत्रजैर्वहिः ।
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ॥ ३९ ॥
चतुर्थे सञ्चयं कुर्य्यात् सर्वैस्तु गोत्रजैः सह ।
ततः सञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते ॥ ४० ॥
चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षत्रियस्य च ।
अष्टमे दशमे चैव स्पर्शः स्याद्वैश्यशूद्रयोः ॥ ४१ ॥
जातस्यापि विधिर्द्दृष्ट एष एव मनीषिभिः ।
दशरात्रेण शुध्यन्ति वैश्यदैवविवर्ज्जिताः ॥ ४२ ॥
पुत्रे जाते पितुः स्नानं सचेलन्तु विधीयते ।

माता शुध्येद्दशाहेन स्नातस्य स्पर्शनं पितुः ॥ ४३ ॥
होमस्तत्र तु कर्त्तव्यः शुष्कान्नेन फलेन च ।
पञ्चयज्ञविधानन्तु न कार्य्यं मृत्युजन्मनोः ॥ ४४ ॥
दशाहात्तु परं सम्यग् विप्रोऽधीयीत धर्म्मवित् ।
दानञ्च विधिना देयमशुभान्तकरं शुभम् ॥ ४५ ॥
यद्यदिष्टतमं लोके यच्चापि दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥ ४६ ॥
नानाविधानि द्रव्याणि धान्यानि सुवर्णानि च ।
समुद्रजानि रत्नानि नरो विगतकल्मषः ।
दत्त्वा विप्राय महते प्राप्नोति महतीं श्रियम् ॥ ४७॥
गन्धमाभरणं माल्यं यः प्रयच्छति धर्म्मवित् ।
स सुगन्धः सदा हृष्टो यत्र तत्रोपजायते ॥ ४८ ॥
श्रोत्रियाय कुलीनाय त्वर्थिने च विशेषतः ।
यद्दानं दीयते भक्त्या तज्ज्ञेयन्तु महत् फलम् ॥ ४९ ॥
आहूय शीलसम्पन्नं श्रुतेनाभिजनेन च ।
शुचिर्विप्रं महाप्राज्ञो हव्यकव्येषु पूजयेत् ॥ ५० ॥
नानाविधानि द्रव्याणि रसवन्तीप्सितानि च ।
श्रेयस्कामेन देयानि स्वर्गमक्षयमिच्छता ॥ ५१ ॥
वस्त्रदाता सुवेशः स्याद्रौप्यदो रूपमेव हि ।
हिरण्यदो महच्चायुर्लभेत्तेजश्च मानवः ॥ ५२ ॥
भूताभयप्रदानेन सर्वकामानवाप्नुयात् ।
दीर्घमायुश्च लभते सुखी चैव तथा भवेत् ॥ ५३ ॥
धान्योदकप्रदायी च सर्पिर्दः सुखमश्नुते ।
अलङ्कृत्य त्वलङ्कारं दत्त्वा प्राप्नोति तत्फलम् ॥५४॥

फलमूलानि विप्राय शाकानि विविधानि च ।
सुरभीणि च पुष्पाणि दत्त्वा प्राज्ञश्च जायते ॥ ५५ ॥
ताम्बूलं चैव यो दद्याद्ब्राह्मणेभ्योऽविचक्षणः ।
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ॥ ५६ ॥
पादुकोपानहौ च्छत्रं शयनान्यासनानि च ।
विविधानि च यानानि दत्त्वा दिव्यगतिर्भवेत् ॥५७॥
दद्याच्च शिशिरे त्वग्निं बहुकाष्ठं प्रयत्नतः ।
कायाग्निदीप्तिं प्राज्ञत्वं रूपसौभाग्यमाप्नुयात् ॥५८
औषधं स्नेहमाहारं रोगिणां रोगशान्तये ।
दत्त्वा स्याद्रोगरहितः सुखी दीर्घायुरेव च ॥ ५९ ॥
इन्धनानि च योदद्याद्विप्रेभ्यः शिशिरागमे ।
नित्यं जयति संग्रामे श्रिया युक्तस्तु दीप्यते ॥ ६० ॥
अलङ्कृत्य तु यः कन्यां वराय सदृशाय वै ।
ब्राह्मेयेण विवाहेन दद्यात्तान्तु सुपूजिताम् ॥६१ ॥
स कन्यायाः प्रदानेन श्रेयो विन्दति पुष्कलम् ।
साधुवादं लभेत् सद्भिः कीर्त्तिं प्राप्नोति पुष्कलाम् ॥ ६२ ॥
ज्योतिष्टोमादिसत्राणां शतं शतगुणीकृतम् ।
प्राप्नोति पुरुषो दत्त्वा होममन्त्रैस्तु संस्कृताम् ॥ ६३॥
अलङ्कृत्य पिता कन्यां भूषणाच्छादनासनैः ।
दत्त्वा स्वर्गमवाप्नोति पूजितस्तु सुरादिषु ॥ ६४॥
रोमदर्शनसंप्राप्ते सोमो भुङ्क्तेऽथ कन्यकाम् ।
रजोदृष्ट्वा तु गन्धर्वः कुचौ दृष्ट्वा तु पावकः ॥ ६५ ॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत् कन्या अतऊर्द्धं रजस्वला ॥ ६६ ॥

माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥६७॥
तस्माद्विवाहयेत् कन्यां यावन्नर्त्तुमती भवेत् ।
विवाहोऽष्टमवर्षायाः कन्यायास्तु प्रशस्यते ॥ ६८ ॥
तैलमास्तरणं प्राज्ञः पादाभ्यङ्गं ददाति यः ।
प्रहृष्टमानसो लोके सुखी चैव सदा भवेत् ॥ ६९ ॥
अनडुाहौ च यो दद्यात् कीलसीरेण संयुतौ ।
अलङ्कृत्य यथाशक्त्या धुर्व्वहौ शुभलक्षणौ ॥ ७० ॥
सर्व्वपापविशुद्धात्मा सर्वकामसमन्वितः ।
वर्षाणि वसति स्वर्गे रोमसंख्याप्रमाणतः ॥ ७१ ॥
धेनुञ्च यो द्विजे दद्यादलङ्कृत्य पयस्विनीम् ।
कांस्यवस्त्रादिभिर्युक्तां स्वर्गलोके महीयते ॥ ७२ ॥
भूमिं शस्यवतीं श्रेष्ठां ब्राह्मणे वेदपारगे ।
गां दत्त्वार्द्धप्रसूताञ्च स्वर्गलोके महीयते ॥ ७३ ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्य्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गाञ्च महीञ्च दद्यात् ॥७४॥
यावन्ति शस्यमूलानि आरोप्याणि च सर्वशः ।
नरस्तावन्ति वर्षाणि स्वर्गलोके महीयते ॥७५॥
सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥ ७६ ॥
यो ददाति स्वर्णरौप्यैर्हेमशृङ्गीमरोगिणीम् ।
सवत्सां वाससा नीतां सुशीलाङ्गीं पयस्विनीम् ॥७७॥
तस्यां यावन्ति रोमाणि सवत्सायां दिवं गतः ।
तावद्वर्षसहस्राणि स नरो ब्रह्मणोऽन्तिके ॥ ७८ ॥

यो ददाति वलीवर्द्दं युक्तेन विधिना शुभम्।
अवश्यं गोप्रदानेन फलाद्दशगुणं फलम्॥ ७९॥
जलदस्तृप्तिमतुलां विन्दत्य सर्व्ववस्तुषु।
अन्नदः सुखमाप्नोति सुतृप्तः सर्व्ववस्तुषु॥ ८०॥
सर्व्वेषामेव दानानामन्नदानं परं स्मृतम्।
सर्व्वेषामेव जन्तूनां यतस्तज्जीवितं फलम्॥ ८१॥
यस्मादन्नात् प्रजाः सर्व्वाः कल्पे कल्पेऽसृजत् प्रभुः।
तस्मादन्नात् परं दानं न भूतो न भविष्यति॥ ८२॥
अन्नदानात् परं दानं विद्यते न हि किञ्चन।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः॥८३॥
मृत्तिकां गोशकृद्दर्भानुपवीतं यथोत्तरम्।
दत्त्वा गुणाग्रविप्राय कुले महति जायते॥ ८४॥
मुखवासञ्च यो दद्याद्दन्तधावनमेव च।
शुचिगन्धसमायुक्तो वाक्पटुः स सदा भवेत्॥८५॥
पादशौचन्तु योदद्यात्तथाच गुदलिङ्गयोः।
यः प्रयच्छति विप्राय शुद्धबुद्धिः सदा भवेत्॥ ८६॥
औषधं पथ्यमाहारं स्नेहाभ्यङ्गं प्रतिश्रयम्।
यः प्रयच्छति रोगिभ्यः सर्व्वव्याधिविवर्जितः॥ ८७॥
गुड़मिक्षुरसञ्चैव लवणं व्यञ्जनानि च।
सुरभीणि च पानानि दत्त्वात्यन्तसुखी भवेत्॥८८॥
दानैश्च विविधैः सम्यक् पुण्यमेतदुदाहृतम्।
विद्यादानेन पुण्येन ब्रह्मलोके महीयते॥ ८९॥
अन्योन्यान्नप्रदा विप्रा अन्योन्यप्रतिपूजकाः।
अन्योन्यं प्रतिगृह्णन्ति तारयन्ति तरन्ति च॥ ९०॥

दानान्येतानि देयानि ह्यन्यानि च विशेषतः ।
दीनान्धकृपणादिभ्यः श्रेयस्कामेन धीमता ॥ ९१॥
ब्रह्मचारियतिभ्यश्च वपनं यस्तु कारयेत् ।
नखकर्म्मादिकञ्चैव चक्षुष्मान् जायते नरः ॥ ९२ ॥
देवागारे द्विजातीनां दीपं दद्याच्चतुष्पथे ।
मेधाविज्ञानसम्पन्नश्चक्षुष्मान् जायते नरः ॥ ९३ ॥
नित्ये नैमित्तिके काम्ये तिलान् दत्त्वा तु शक्तितः ।
प्रजावान् पशुमांश्चैव धनवान् जायते नरः ॥९४॥
यो दद्यात्यर्थितोविप्रे यत्तत् संप्रतिपादिते ।
तृणकाष्ठादिकञ्चैव गोप्रदानसमं भवेत् ॥ ९५ ॥
कृत्वा गार्ह्याणि कर्म्माणि स्वभार्य्यापोषणे नरः ।
ऋतुकालाभिगामी स्यात् प्राप्नोति परमां गतिम् ॥ ९६
उषित्वैवं गृहे विप्रोद्वितीयादाश्रमात् परम् ।
वलीपलितसंयुक्तस्तृतीयन्तु समाश्रयेत् ॥ ९७ ॥
गच्छेदेवं वनं प्राज्ञः स्वभार्य्यां सहचारिणीम् ।
गृहीत्वा चाग्निहोत्रञ्च होमं तत्र न हापयेत् ॥ ९८॥
कुर्य्याच्चैव पुरोडाशं वन्यैर्मेध्यैर्यथाविधि ।
भिक्षाञ्च भिक्षवे दद्याच्छाकमूलफलानि च ॥ ९९॥
कुर्य्यादध्ययनं नित्यमग्निहोत्रपरायणः ।
इष्टिं पार्व्वायणीयाञ्च प्रकुर्य्यात् प्रतिपर्व्वसु ॥१००॥
उषित्वैवं वने सम्यग्विधिज्ञः सर्व्ववस्तुषु ।
चतुर्थमाश्रमं गच्छेद् नष्टहोमोजितेन्द्रियः ॥ १०१ ॥
अग्निमात्मनि संस्थाप्य द्विजः प्रव्रजितोभवेत् ।
वेदाभ्यासरतो नित्यमात्मविद्यापरायणः ॥१०२॥

अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा।
अद्भिः प्रक्षाल्य तत्सर्व्वं भुञ्जीत च समाहितः ॥१०३॥
अरण्ये निर्ज्जने विप्रः पुनरासीत भुक्तवान्।
एकाकी चिन्तयेन्नित्यं मनोवाक्कायसंयतः ॥१०४॥
मृत्युञ्च नाभिनन्देत जीवितं वा कथञ्चन।
कालमेव प्रतीक्षेत यावदायुः समाप्यते ॥ १०५ ॥
संसेव्य चाश्रमान् जितक्रोधो जितेन्द्रियः।
ब्रह्मलोकमवाप्नोति वेदशास्त्रार्थविद्द्विजः ॥१०६॥
आश्रमेषु च सर्व्वेषु ह्युक्तः प्रासङ्गिकोविधिः।
अथाभिवक्ष्ये पापानां प्रायश्चित्तं यथाविधि ॥१०७॥
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः।
महापातकिनस्त्वेते तत्संयोगी च पञ्चमः ॥१०८॥
ब्राह्मघ्नस्तु वनं गच्छेत् कल्कवासाजटी ध्वजी।
वनयान्येव फलान्यश्नन् सर्व्वकामविवर्जितः ॥१०९॥
भिक्षार्थी च चरेद्ग्रामं वन्यैर्यदि न जीवति।
चातुर्वर्ण्यं चरेद्भैक्षं खट्वाङ्गी संयतः पुमान् ॥११०॥
भैक्षञ्चैव समादाय वनं गच्छेत्ततः पुनः।
वनवासी सपापश्च सदाकालमतन्द्रितः ॥१११॥
ख्यापयन्नेव तत्पापं ब्रह्मघ्नः पापकृन्नरः।
अनेन तु विधानेन द्वादशाब्दव्रतञ्चरेत् ॥ ११२ ॥
संनियम्येन्द्रियग्रामं सर्वभूतहिते रतः।
ब्रह्महत्यापनोदाय ततोमुच्येत किल्विषात् ॥ ११३ ॥
अतः परं सुरापस्य प्रवक्ष्यामि विनिष्कृतिम्।
श्रोतुमिच्छत भो विप्रा! वेदशास्त्रानुरूपिकाम् ॥ ११४॥

गौड़ी पैष्टी तथा माध्वी विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्व्वा न पातव्या द्विजैः सदा॥ ११५॥
सुरापस्तु सुरां तप्तां पिवेत्तत्पापमोचकः।
गोमूत्रमग्निवर्णञ्च गोमयं वा तथाविधम्॥ ११६॥
घृतञ्चैव सुतप्तञ्च चीरं वापि तथाविधम्।
वत्सरं वा कणानश्नन् सर्वकामविवर्जितः॥ ११७॥
चान्द्रायणानि वा त्रीणि सुरापो व्रतमाचरेत्।
मुच्यते तेन पापेन प्रायश्चित्ते कृते सति॥ ११८॥
एवं शुद्धिः सुरापस्य भवेदिति न संशयः।
मद्यभाण्डोदकं पीत्वा पुनः संस्कारमर्हति॥ ११९॥
स्तेयं कृत्वा सुवर्णस्य राज्ञे शंसेत मानवः।
ततोमुषलमादाय स्तेनं हन्यात्ततोनृपः॥ १२०॥
यदि जीवति स स्तेनस्ततस्तेयात् प्रमुच्यते।
अरण्ये चीरवासा वा चरेद्ब्रह्महणोव्रतम्॥ १२१
समालिङ्गेत् स्त्रियं वापि दीप्तां कृत्वायसा कृताम्।
एवं शुद्धिः कृता स्तेये सम्बर्त्तवचनं यथा॥ १२२॥
गुरुतल्पे शयानस्तु तल्पे स्वप्यादयोमये।
चान्द्रायणानि वा कुर्य्याच्चत्वारि त्रीणि वा द्विजः।
ततोविमुच्यते पापात् प्रायश्चित्ते कृते सति॥ १२३॥
एभिः सम्पर्कमायाति यः कश्चित् पापमोहितः।
षण्मासादधिकं वापि पूर्वोक्तव्रतमाचरेत्॥ १२४॥
महापातकिसंयोगी ब्रह्महत्यादिभिर्नरः।
तत्पापस्य विशुद्धयर्थं तस्य तस्य व्रतञ्चरेत्॥ १२५॥
क्षत्रियस्य वधं कृत्वा त्रिभिः कृच्छ्रैर्विशुध्यति।

कुर्य्याच्चैवानुरूपेण त्रीणि कृच्छ्राणि संयतः ॥ १२६ ॥
वैश्यहत्यान्तु संप्राप्तः कथञ्चित् काममोहितः ।
कृच्छ्रातिकृच्छ्रं कुर्व्वीत स नरो वैश्यघातकः ॥ १२७
कुर्य्याच्छूद्रबधं प्राप्तस्तप्तकृच्छ्रं यथाविधि ॥ १२८ ॥
गोघ्नस्यातः प्रवक्ष्यामि निष्कृतिं तत्त्वतः पुमान् ।
गोघ्नः कुर्व्वीत संस्थानं गोष्ठे गोरूपसंस्थिते ॥१२९॥
तत्रैव क्षितिशायी स्यान्मासार्द्धं संयतेन्द्रियः ।
सक्तुयावकपिण्याकपयोदधि सकृन्नरः ॥ १३० ॥
एतानि क्रमतोऽश्नीयाद्द्विजस्तु पापमोचकः ।
शुद्धव्रते सार्द्धमासेन नखलोमविवर्जितः ॥ १३१ ॥
स्नानं त्रिषवणं चास्य गवामनुगमस्तथा ।
एतत् समाहितः कुर्य्यान्नरोविगतमत्सरः ॥ १३२ ॥
सावित्रीञ्च जपेन्नित्यं पवित्राणि च शक्तितः ।
ततश्चीर्णव्रतः कुर्य्याद्विप्राणां भोजनं परम् ॥ १३३ ॥
भुक्तवत्सु च विप्रेषु गाञ्च दद्यात् सदक्षिणाम् ॥१३४
व्यापादितेषु बहुषु बन्धने रोधनेऽपिवा ।
द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विशुद्धये ॥ १३५ ॥
एका चेद्बहुभिः कैश्चिद्दैवाद्व्यापादिता क्वचित् ।
पादं पादन्तु हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥१३६॥
यन्त्रणे गोचिकित्सार्थे मूढ़गर्भविमोचने ।
यति तत्र विपत्तिः स्यान्न स पापेन लिप्यते ॥ १३७ ॥
निगाबन्धनिरूप्येषु सर्पव्याघ्रहतेषु च ।
अग्निविद्युन्निपातेन प्रायश्चित्तं न विद्यते ॥ १३८ ॥
प्रायश्चित्तस्य पादन्तु रोधेषु व्रतमाचरेत् ।

द्वौ पादौ बन्धने चैव पादोनं कुट्टने तथा ॥ १३९ ॥
पाषाणैर्लगुडैर्दण्डैस्तथा शस्त्रादिभिर्नरः ।
निपातने चरेत् सर्वं प्रायश्चित्तं विशुद्धये ॥ १४० ॥
गजञ्च तुरगं हत्वा महिषोष्ट्रकपिंस्तथा ।
एषु कुर्व्वीत सर्वेषु सप्तरात्रमभोजनम् ॥ १४१ ॥
व्याघ्रं श्वानं तथा सिंहञ्च शूकरमेव च ।
एतान् हत्वा द्विजः कृच्छ्रं ब्राह्मणानाञ्च भोजनम् ॥ १४२ ॥
सर्व्वासामेव जातीनां मृगाणां वनचारिणाम् ।
त्रिरात्रोपोषितस्तिष्ठेज्जपन् वै जातवेदसम् ॥ १४३ ॥
हंसं काकं बलाकञ्च पारावतमथापि वा ।
सारसञ्चासभासञ्च हत्वा त्रिदिवसं क्षिपेत् ॥ १४४ ॥
चक्रवाकं तथा क्रौञ्चं सारिकाशुकतित्तिरिम् ।
श्येनगृध्रावुलूकञ्च कपोतकमथापि वा ॥ १४५ ॥
टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा ।
एवं पक्षिषु सर्व्वेषु दिनमेकमभोजनम् ॥१४६ ॥
मण्डूकञ्चैव हत्वा च सर्पमार्ज्जारमूषिकम् ।
त्रिरात्रोपोषितस्तिष्ठेत् कुर्य्याद्ब्राह्मणभोजनम् ॥ १४७ ॥
अनस्थीन् ब्राह्मणो हत्वा प्राणायामेन शुध्यति ।
अस्थिमतो वधे विप्रः किञ्चिद्दद्याद्द्विचक्षणः ॥ १४८ ॥
चाण्डालीं यो द्विजो गच्छेत् कथञ्चित् काममोहितः ।
त्रिभिः कृच्छ्रैर्विशुध्येत प्राजापत्यानुपूर्व्वकैः ॥ १४९ ॥
पुक्कसीगमनं कृत्वा कामतोऽकामतोऽपि वा ।
कृच्छ्रं चान्द्रायणं तस्य पावनं परमं स्मृतम ॥१५०॥
नटीं शैलूषिकीञ्चैव रजकीं वेणुजीविनीम् ।

गत्वा चान्द्रायणं कुर्य्यात्तथा चर्म्मोपजीविनीम् ॥१५१

क्षत्रियामथ वैश्यां वा गच्छेद्यः काममोहितः ।
तस्य सान्तपनं कृच्छ्रं भवेत् पापापनोदकम् ॥ १५२ ॥

शूद्रीं तु ब्राह्मणोगत्वा मासं मासार्द्धमेव वा ।
गोमूत्रयावकाहारो मासार्द्धेन विशुद्ध्यति ॥ १५३ ॥

विप्रस्तु ब्राह्मणीं गत्वा प्राजापत्यं समाचरेत् ।
क्षत्रियां क्षत्रियोगत्वा तदेव व्रतमाचरेत् ॥ १५४ ॥

नटीगोगमनं कृत्वा कुर्य्याचान्द्रायणं व्रतम् ॥ १५५॥

गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च ।
तस्या दुहितरञ्चैव चरेचान्द्रायणं व्रतम् ॥ १५६ ॥

मातुलानीं सनाभिञ्च मातुलस्यात्मजां स्नुषाम् ।
एता गत्वा स्त्रियो मोहात् पराकेण विशुध्यति ॥ १५७ ॥

पितृव्यदारगमने भ्रातृभार्य्यागमे तथा ।
गुरुतल्पव्रतं कुर्य्यात्तस्यान्या निष्कृतिर्न च ॥ १५८ ॥

पितृदाराः समारुह्य मातृवर्ज्जं नराधमः ।
भगिनीं मातुलसुतां स्वसारं चान्यमातृजाम् ।
एतास्तिस्रः स्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत् ॥ १५९

मातरं याऽधिगच्छेच्च सुतां वा पुरुषाधमः ।
भगिनीञ्च निजां गत्वा निष्कृतिर्नो विधीयते ॥१६०॥

कुमारीगमने चैव व्रतमेतत् समादिशेत् ।
पशुवेश्याभिगमने प्राजापत्यं विधीयते ॥ १६१ ॥

सखिभार्य्यां कुमारीञ्च स्वश्रूं वा भ्रातृलिकां तथा ।
नियमस्थां व्रतस्थाञ्च योऽभिगच्छेत् स्त्रियं द्विजः ।
स कुर्य्यात् प्राकृतं कृच्छ्रं धेनुं दद्यात् पयस्विनीम् ॥ १६२॥

रजस्वलाञ्च योगच्छेद्गर्भिणीं पतितान्तथा ।
तस्य पापविशुद्ध्यर्थमतिकृच्छ्रं विधीयते ॥ १६३ ॥
वेश्याञ्च ब्राह्मणोगत्वा कृच्छ्रमेकं समाचरेत् ।
एवं शुद्धिः समाख्याता सम्वर्त्तस्य वचोयथा ॥ १६४
ब्राह्मणोब्राह्मणीं गत्वा कृच्छ्रेणैकेण शुध्यति ॥ १६५ ॥
कथञ्चिद्ब्राह्मणीं गत्वा क्षत्रियोवैश्यएव च ।
गोमूत्रयावकाहारी मासेनैकेन शुध्यति ॥ १६६ ॥
ब्राह्मणो शूद्रसम्पर्कं कथञ्चित् समुपागते ।
कृच्छ्रं चान्द्रायणं कुर्य्यात् पावनं परमं स्मृतम् १६७
चाण्डालं पुक्कशञ्चैव श्वपाकं पतितं तथा ।
एतान् श्रेष्ठस्त्रियो गत्वा कुर्य्याच्चान्द्रायणत्रयम् ॥१६८॥
अतःपरञ्च दुष्टानां निष्कृतिं श्रोतुमर्हथ ।
सन्नरस्य दुर्म्मतिः कश्चिदपत्यार्थं स्त्रियं व्रजेत् ।
स कुर्य्यात् कृच्छ्रमश्रान्तः षण्मासन्तदनन्तरम ॥ १६९ ॥
विषाग्निशस्त्रामशवलास्त्रिषामेवं विनिर्द्दिशेत् ।
स्त्रीणाञ्च तथाचरणे गर्ह्याभिगमनेषु च ।
पतनेषु तथैतेषु प्रायश्चित्तविधिः स्मृतः ॥ १७० ॥
नृणां विप्रतिपत्तौ च पावनः प्रेतराड़िह ॥ १७१ ॥
गोभिर्विप्रहते चैव तथा चेवात्मघातिनि ।
नाम्बुप्रपातनं कार्य्यं सद्भिः श्रेयोऽनुकाङ्क्षिभिः ॥ १७२ ॥
एषामन्यतमं प्रेतं यो वहेत्तद्दहेतवे ।
तथोदकक्रियां कृत्वा चरेच्चान्द्रायणव्रतम् ॥ १७३ ॥
तच्छवं केवलं स्पृष्ट्वा वस्त्रं वा केवलं यदि ।
पूर्वः कृच्छ्रापहारी स्यादेकाहक्षपणं तथा ॥ १७४ ॥

महापातकिनाञ्चैव तथा चैवात्मघातिनाम्।
उदकं पिण्डदानञ्च श्राद्धं चैव तु यत् कृतम्।
नोपतिष्ठति तत् सर्वं राक्षसैर्विप्रलुप्यते ॥ १७५ ॥
चाण्डालैस्तु हता ये च जलदंष्ट्रिसरीसृपैः।
श्राद्धमेषां न कर्त्तव्यं ब्रह्मदण्डहताश्च ये ॥ १७६ ॥
कृत्वा मूत्रं पुरीषं वा भुक्तोच्छिष्टस्तथा द्विजः।
श्वादि स्पृष्टो जपेद्देव्याः सहस्रं स्नानपूर्वकम् ॥ १७७ ॥
चाण्डालं पतितं स्पृष्ट्वा शवमन्त्यजमेव च।
उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत् ॥१७८
अस्पृश्यं संस्पृशेद्यस्तु स्नानं तेन विधीयते।
ऊर्द्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा ॥ १७९ ॥
चाण्डालाद्यैस्तु संस्पृष्ट उच्छिष्टश्च द्विजोत्तमः।
गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति ॥ १८० ॥
शुना पुष्पवती स्पृष्टा पुष्पवत्यान्यया तथा।
शेषाण्यहान्युपवसेत् स्नाता शुध्येद्घृताशनात् ॥१८१॥
चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम्।
गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति ॥ १८२ ॥
अन्त्यजैः स्वीकृते तीर्थे तड़ागेषु नदीषु च।
शुध्यते पञ्चगव्येन पीत्वा तोयमकामतः ॥ १८३ ॥
सुराघटप्रपातोयं पीत्वाकाशजलं तथा।
अहोरात्रोषितोभूत्वा पञ्चगव्यं पिबेद्द्विजः ॥ १८४ ॥
कूपे विण्मूत्रसंस्पृष्टे प्राश्य चापो द्विजातयः।
त्रिरात्रेणैव शुध्यन्ति कुम्भे सान्तपनं स्मृतम् ॥ १८५॥
वापीकूपतड़ागानां दूषितानां विशोधनम्।

अपां घटशतोद्धारः पञ्चगव्यञ्च निक्षिपेत् ॥ १८६ ॥
आविकं कशफोष्ट्रीणां क्षीरं प्राश्य द्विजोत्तमः।
तस्य शुद्धिविधानाय त्रिरात्रं यावकं पिबेत् ॥१८७॥
कौचीरमौजिकं पीत्वा सन्धिन्याश्चैव गोः पयः।
तस्य शुद्धिस्त्रिरात्रेण विड्भक्ष्याणाञ्च भक्षणे ॥ १८८॥
विण्मूत्रभक्षणे चैव प्राजापत्यं समाचरेत्।
श्वकाकोच्छिष्टगोच्छिष्टभक्षणे तु त्र्यहं द्विजः ॥१८९
विड़ालमूषकोच्छिष्टे पञ्चगव्यं पिबेद्द्विजः।
शूद्रोच्छिष्टं तथा भुक्त्वा त्रिरात्रेणैव शुध्यति ॥ १९०
पलाण्डुलशुनं जग्ध्वा तथैव ग्रामकुक्कुटम्।
छत्राकं विड्वराहञ्च चरेच्चान्द्रायणं द्विजः ॥ १९१ ॥
मानवः श्वखरोष्ट्राणां कपेर्गोमायुकङ्कयोः।
प्राश्य मूत्रं पुरीषं वा चरेच्चान्द्रायणव्रतम् ॥ १९२॥
अन्नं पर्युषितं भुक्त्वा केशकीटैरुपद्रुतम्।
पतितैः प्रेक्षितं वापि पञ्चगव्यं पिबेद्द्विजः ॥१९३॥
अन्त्यजाभाजने भुक्त्वा ह्युदक्याभाजनेऽपि वा।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥ १९४ ॥
गोमांसं मानुषञ्चैव शुनोहस्तात् समाहितम्।
अभक्ष्यमेतत् सर्वन्तु भुक्त्वा चान्द्रायणं चरेत् ॥ १९५ ॥
चाण्डालस्य करे विप्रः श्वपाके पुक्कसेऽपि वा।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥ १९६ ॥
पतितेन सुसम्पर्कं मासं मासार्द्धमेव वा।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥ १९७ ॥
यत्र यत्र च सङ्कीर्णमात्मानं मन्यते द्विजः।

तत्र कार्य्यस्तिलैर्होमो गायत्र्यावर्त्तनं तथा ॥ १९८॥
एष एव मया प्रोक्तः प्रायश्चित्तविधिः शुभः।
अनादिष्टेषु पापेषु प्रायश्चित्तं तथोच्यते ॥ १९९ ॥
दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजोत्तमः।
पातकेभ्यः प्रमुच्येत वेदाभ्यासान्न संशयः ॥ ॥ २०० ॥
सुवर्णदानं गोदानं भूमिदानं तथैव च।
नाशयन्त्याशु पापानि ह्यन्यजन्मकृतान्यपि ॥ २०१ ॥
तिलधेनुञ्च यो दद्यात् संयताय द्विजन्मने।
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥ २०२ ॥
माघमासे तु संप्राप्ते पौर्णमास्यामुपोषितः।
ब्राह्मणेभ्यस्तिलान् दत्त्वा सर्वपापैः प्रमुच्यते ॥ २०३ ॥
उपवासी नरो भूत्वा पौर्णमास्याञ्च कार्त्तिके।
हिरण्यं वस्त्रमन्नं वा दत्त्वा मुच्येत दुष्कृतैः ॥२०४ ॥
अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥ २०५ ॥
अत्र स्नानं जपो होमो ब्राह्मणानाञ्च भोजनम्।
उपवासस्तथा दानमेकैकं पावयेन्नरम् ॥ २०६ ॥
स्नातः शुचिर्धौतवासाः शुद्धात्मा विजितेन्द्रियः।
सात्त्विकं भावमाश्रित्य दानं दद्याद्विचक्षणः ॥२०७ ॥
सप्तव्याहृतिभिर्होमो द्विजैः कार्य्यो हितात्मभिः।
उपपातकसिद्ध्यर्थं सहस्रपरिसंख्यया ॥ २०८ ॥
महापातकसंयुक्तो लक्षहोमं सदा द्विजः।
मुच्यते सर्वपापेभ्यो गायत्र्याश्चैव जापनात् ॥२०९ ॥
अभ्यसेच्च महापुण्यां गायत्रीं वेदमातरम्।

गत्वारण्ये नदीतीरे सर्वपापविशुद्धये ॥ २१० ॥
स्नात्वा च विधिवत्तत्र प्राणानायम्य वाग्यतः।
प्राणायामैस्त्रिभिः पूतो गायत्रीन्तु जपेद्द्विजः ॥२११॥
अक्लिन्नवासाः स्थलगः शुचौ देशे समाहितः।
पवित्रपाणिराचान्तो गायत्र्या जपमारभेत् ॥२१२ ॥
ऐहिकामुष्मिकं लोके पापं सर्व्वं विशेषतः।
पञ्चरात्रेण गायत्रीं जपमानो व्यपोहति ॥ २१३ ॥
गायत्र्यास्तु परं नास्ति शोधनं पापकर्म्मणाम् ॥२१४॥
महाव्याहृतिसंयुक्तां प्राणायामेन संयुताम्।
गायत्रीं प्रजपन् विप्रः सर्वपापैः प्रमुच्यते ॥ २१५ ॥
ब्रह्मचारी मिताहारः सर्व्वभूतहिते रतः।
गायत्र्या लक्षजप्येन सर्वपापैः प्रमुच्यते ॥ २१६ ॥
अयाज्ययाजनं कृत्वा भुक्त्वा चान्नं विगर्हितम्।
गायत्र्यष्टसहस्रन्तु जप्यं कृत्वा विमुच्यते ॥ २१७ ॥
अहन्यहनि योऽधीते गायत्रीं वै द्विजोत्तमः।
मासेन मुच्यते पापादुरगः कञ्चुकाद् यथा ॥ २१८ ॥
गायत्रीं यः सदा विप्रो जपते नियतः शुचिः।
स याति परमं स्थानं वायुभूतः खमूर्त्तिमान् ॥२१९॥
प्रणवेन तु संयुक्ता व्याहृतीः सप्त नित्यशः।
गायत्रीं शिरसा सार्द्धं मनसा त्रिः पठेद्द्विजः ॥२२०॥
निगृह्य चात्मनः प्राणान् प्राणायामो विधीयते।
प्राणायामत्रयं कुर्य्यान्नित्यमेव समाहितः ॥ २२१ ॥
मानसं वाचिकं पापं कायेनैव तु यत् कृतम्।
तत् सर्व्वं नश्यते तूर्णं प्राणायामत्रये कृते ॥२२२ ॥

ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा ।
सामानि सरहस्यानि सर्व्वपापैः प्रमुच्यते ॥ २२३ ॥
पावमानीं तथा कौत्सं पौरुषं सूक्तमेव च ।
जप्त्वा पापैः प्रमुच्येत पित्र्यञ्च मधुच्छन्दसाम् ॥२२४ ॥
मण्डलं ब्राह्मणं रुद्रसूक्तोक्तार्श्च बृहत्कथाः ।
वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते ॥ २२५ ॥
चान्द्रायणन्तु सर्वेषां पापानां पावनं परम् ।
कृत्वा शुद्धिमवाप्नोति परमं स्थानमेव च ॥ २२६ ॥
धर्म्मशास्त्रमिदं पुण्यं संवर्त्तन तु भाषितम् ।
अधीत्य ब्राह्मणो गच्छेद्ब्रह्मणः सद्म शाश्वतम् ॥२२७॥
इति श्रीसम्बर्त्तेनोक्तं धर्म्मशास्त्रं समाप्तम् ॥

श्रीसामवेदाय नमः ।

अथातो गोभिलोक्तानामन्येषां चैव कर्म्मणाम् ।
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् ॥ १ ॥
त्रिवृदूर्द्ध्ववृतं कार्य्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥ २ ॥
पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।
तद्धार्य्यमुपवीतं स्यान्नातीलम्बं नचोच्छ्रितम् ॥ ३ ॥
सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत् करोति न तत् कृतम् ॥४॥
त्रिःप्राश्यापो द्विरुन्मृज्य मुखमेतान्युपस्पृशेत् ।
आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोंऽसकान् ॥५॥
संहताभिस्त्र्यङ्गुलिभिरास्यमेवमुपस्पृशेत् ।

अङ्गुष्ठेन प्रदेशिन्या घ्राणं चैवमुपस्पृशेत् ।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुः श्रोत्रं पुनःपुनः ॥ ६ ॥
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं तु तलेन वै ।
सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् ॥७॥
यत्रोपदिश्यते कर्म्म कर्त्तुरङ्गं नतूच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ॥ ८ ॥
यत्र दिङ्नियमो न स्याज्जपहोमादिकर्म्मसु ।
तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्रीसौम्यापराजिताः ॥९॥
तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता ॥ १०॥
गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ ११ ॥
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्द्दश ॥ १२ ॥
कर्म्मादिषु तु सर्व्वेषु मातरः सगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥ १३ ॥
प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु ।
अपिवाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः ॥ १४ ॥
कुड्यलग्नां वसोर्द्धारां सप्तधारां घृतेन तु ।
कारयेत् पञ्चधारां वा नातिनीचां नचोच्छ्रिताम् ॥१५॥
आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनुभक्त्या श्राद्धमुपक्रमेत् ॥ १६ ॥
अनिष्ट्वा तु पितॄन् श्राद्धे न कुर्य्यात् कर्म्म वैदिकम् ।
तत्रापि मातरः पूर्व्वं पूजनीयाः प्रयत्नतः ॥ १७ ॥

वशिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः ।
अतः परं प्रवक्ष्यामि विशेष इह यो भवेत् ॥ १८ ॥ १ खण्डः॥
प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा ।
उपवेश्य कुशान् दद्यादृजुनैव हि पाणिना ॥ १ ॥
हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः ।
समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः ॥ २ ॥
हरिता वै सपिञ्जलाः शुष्काः स्निग्धाः समाहिताः ।
रत्निमात्राः प्रमाणेन पितृतार्थेन संस्तृताः ॥ ३ ॥
पिण्डार्थं ये स्तृता दर्भास्तर्पणार्थं तथैव च ।
धृतैः कृते च विण्मूत्रे त्यागस्तेषां विधीयते ॥ ४ ॥
दक्षिणं पातयेज्जानु देवान् परिचरन् सदा ।
पातयेदितरज्जानु पितॄन् परिचरन्नपि ॥ ५ ॥
निपातो नहि सव्यस्य जानुनो विद्यते क्वचित् ।
सदा परिचरेद्भक्त्या पितॄनप्यत्र देववत् ॥ ६ ॥
पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान् ।
गोत्रनामभिरामन्त्र्य पितॄनर्घं प्रदापयेत् ॥ ७ ॥
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते ।
पात्राणां पूरणादीनि दैवेनैव हि कारयेत् ॥ ८ ॥
ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्रपवित्रकान् ।
कृत्वार्घ्यं संप्रदातव्यं नैकैकस्यात्र दीयते ॥ ९ ॥
अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ १४ ॥
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम् ।
आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु ॥ १५ ॥

एतत्प्रमाणामेवैके कौशीमेवार्द्रसंजरीम् ।
शुष्कां वा शीर्णकुसुमां पिप्पलीं परिचक्षते ॥ १२ ॥
पित्रमन्त्रानु द्रवण आत्मालम्भेऽधमेक्षणे ।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥ १३ ॥
मार्ज्जारमषकस्पर्शे आक्रुष्टे क्रोधसम्भवे ।
निमित्तेष्वेषु सर्व्वत्र कर्म्म कुर्व्वन्नपः स्पृशेत् ॥ १४ ॥ २खण्डः॥

अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्म्मकारिणाम् ।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया ॥ १ ॥
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयञ्च यः ।
कर्त्तुमिच्छति दुर्म्मेधा मोघं तत्तस्य चेष्टितम् ॥ २ ॥
यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत् ॥ २ ॥
प्रवृत्तमन्यथा कुर्य्याद्यदि मोहात् कथञ्चन ।
यतस्तदन्यथाभूतं तत एव समापयेत् ॥ ४ ॥
समाप्ते यदि जानीयान्मयैतदयथाकृतम् ।
तावदेव पुनः कुर्य्यान्नावृत्तिः सर्व्वकर्म्मणः ॥ ५ ॥
प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायाञ्च नावृत्तिर्नैव तत्क्रिया ॥ ६ ॥
मधुमध्वितियस्तत्र त्रिर्जपोऽशितुमिच्छताम् ।
गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्जितः ॥ ७ ॥
न चाश्नत्सु जपेदत्र कदाचित् पितृसंहिताम् ।
अन्य एव जपः कार्य्यः सोमसामादिकः शुभः ॥ ८ ॥
यस्तत्र प्रकरोऽन्नस्य तिलवद्यववत्तथा ।
उच्छिष्टसन्निधौ सोऽत्र तृप्तेषु विपरीतकः ॥ ९ ॥

सम्पन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते ।
सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् ॥ १० ॥
प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्व्ववत् ।
अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति पात्रतः ॥ ११ ॥
द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः ।
मातामहप्रभृतींस्त्रीनेतेषामेव वामतः ॥ १२ ॥
सर्व्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च ।
संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्ततः ॥ १३ ॥
अवनेजनवत् पिण्डान् दत्त्वा विल्वप्रमाणकान् ।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् ॥ १४ ॥ ३ खण्डः ॥

उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरः ।
भवेदधश्चाधराणामधरश्चाद्यकर्म्मणि ॥ १ ॥
तस्माच्छ्राद्धेषु सर्व्वेषु वृद्धिमत्स्वितरेषु च ।
मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्व्वपेत् ॥ २ ॥
गन्धादीन्निःक्षिपेत्तूष्णीं तत आचामयेद्द्विजान् ।
अन्यत्राप्येष एव स्याद्यवादिरहितो विधिः ॥ ३ ॥
दक्षिणाप्लवने देशे दक्षिणाभिमुखस्य च ।
दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः ॥ ४ ॥
अथाग्रभूमिमासिञ्चेत् सुसंप्रोक्षितमस्त्विति ।
शिवा आपः सन्त्विति च युग्मानेवोदकेन च ॥ ५ ॥
सौमनस्यमस्त्विति च पुष्पदानमनन्तरम् ।
अक्षतञ्चारिष्टं चास्त्वित्यक्षतान् प्रतिपादयेत् ॥ ६ ॥
अक्षय्योदकदानं तु अर्घ्यदानवदिष्यते ।
षष्ठ्यैव नित्यं तत् कुर्य्यान्न चतुर्थ्या कदाचन ॥ ७ ॥

अर्घ्येऽक्षय्योदके चैव पिण्डदानेऽवनेजने ।
तन्त्रस्य तु निवृत्तिः स्यात् स्वधावाचन एव च ॥ ८ ॥
प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः ।
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत् ॥९॥
युग्मानेव स्वस्ति वाच्यमङ्गुष्ठाग्रग्रहं सदा ।
कृत्वा धुर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः ॥ १० ॥
एषः श्राद्धविधिः कृत्स्न उक्तः संक्षेपतो मया ।
ये विन्दन्ति न मुह्यन्ति श्राद्धकर्म्मसु ते क्वचित् ॥ ११॥
इदं शास्त्रञ्च गुह्यञ्च परिसंख्यानमेव च ।
वशिष्ठोक्तञ्च यो वेद स श्राद्धं वेद नेतरः ॥१२॥ ४खण्डः ॥
असकृत्वानि कर्म्माणि क्रियेरन् कर्म्मकारिभिः ।
प्रतिप्रयोगं नैताः स्युर्मातरः श्राद्धमेव च ॥ १ ॥
आधाने होमयोश्चैव वैश्वदेवे तथैव च ।
वलिकर्म्मणि दर्शे च पौर्णमासे तथैव च ॥ २ ॥
नवयज्ञे च यज्ञज्ञावदन्त्येवं मनीषिणः ।
एकमेव भवेच्छ्राद्धमेतेषु न पृथक् पृथक् ॥ ३ ॥
नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते ।
न सोष्यन्तीजातकर्म्म प्रोषितागतकर्म्मसु ॥ ४ ॥
विवाहादिः कर्म्मगणो य उक्तो गर्भाधानं शुश्रुम यस्य चान्ते ।
विवाहादावेकमेवात्र कुर्य्याच्छ्राद्धं नादौ कर्म्मणः कर्म्मणः स्यात् ।५
प्रदोषे श्राद्धमेकं स्याद्गोनिष्क्रामप्रवेशयोः ।
न श्राद्धं युज्यते कर्त्तुं प्रथमे पुष्टिकर्म्मणि ॥ ६ ॥
हलाभियोगादिषु तु षट्सु कुर्य्यात् पृथक् पृथक् ।
प्रतिप्रयोगमप्येवानादावेकन्तु कारयेत् ॥ ७ ॥

वृहत्पत्त्रक्षुद्रपशुस्वस्त्यर्थं परिविन्यतोः।
सूर्य्येन्द्वोः कर्म्मणी ये तु तयोः श्राद्धं न विद्यते ॥८॥
न दशाद्यन्यिके चैव विषवद्दष्टकर्म्मणि।
कृमिदष्टचिकित्सायां नैव शेषेषु विद्यते ॥ ९ ॥
गणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत्।
सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु ॥ १० ॥
यत्र यत्र भवेच्छ्राद्धं तत्र तत्र च मातरः।
प्रासङ्गिकमिदं प्रोक्तमतः प्रकृतमुच्यते ॥ ११ ॥ ५ खण्डः ॥
आधानकाला ये प्रोक्तास्तथा यश्चाग्नियोनयः।
तदाश्रयोऽग्निमादध्यादग्निमानग्रजो यदि ॥१॥
दाराधिगमनाधाने यः कुर्य्यादग्रजाग्रिमः।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ॥ २ ॥
परिवित्तिपरिवेत्तारौ नरकं गच्छतो ध्रुवम्।
अपिचीर्णप्रायश्चित्तौ पादोनफलभागिनौ ॥ ३ ॥
देशान्तरस्थक्लीवैकवृषणानसहोदरान्।
वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः ॥ ४ ॥
जड़मूकान्धवधिरकुब्जवामनकुण्ठकान्।
अतिवृद्धानभार्य्यांश्च कृषिसक्तान्नृपस्य च ॥ ५ ॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ॥ ६ ॥
धनवार्द्धुषिकं राजसेवकं कर्म्मकस्तथा।
प्रोषितञ्च प्रतीक्षेत वर्षत्रयमपि त्वरन् ॥ ७ ॥
प्रोषितं यद्यशृण्वानमब्दादूर्द्ध्वं समाचरेत्।
आगते तु पुनस्तस्मिन् पादं तच्छुद्धये चरेत् ॥ ८ ॥

लक्षणि प्रागगतायास्तु प्रमाणं द्वादशाङ्गुलम्।
तन्मूलसक्ता योदीची तस्या एतन्नवोत्तरम्॥९॥
उदग्गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः।
सप्तसप्ताङ्गुलांस्त्यक्त्वा कुशेनैव समुल्लिखेत्॥१०॥
मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि।
मानकृद्यजमानः स्याद्विदुषामेव निश्चयः॥११॥
पुत्त्रमेवाद्धीताग्निं स हि सर्व्वैः प्रशस्यते।
अनर्द्धुकत्वं यत्तस्य कार्य्यैस्तन्नीयते शमम्॥१२॥
यस्य दत्ता भवेत् कन्या वाचा सत्येन केनचित्।
सोऽन्त्यां समिधमाधास्यन्नाद्धीतैव नान्यथा॥१३॥
अनूढैव तु सा कन्या पञ्चत्वं यदि गच्छति।
न तथा व्रतलोपोऽस्य तेनैवान्यां समुद्वहेत्॥१४॥
अथ चेन्न लभेतान्यां याचमानोऽपि कन्यकाम्।
तमग्निमात्मसात् कृत्वा क्षिप्रं स्यादुत्तराश्रमी॥१५॥ ६ खण्डः॥

अश्वत्थो यः शमीगर्भः प्रशस्तोर्व्वीसमुद्भवः।
तस्य या प्राङ्मुखी शाखा वोदीची वोर्द्ध्वगापि वा॥१॥
अरणिस्तन्मयी प्रोक्ता तन्मय्येवोत्तरारणिः।
सारवद्दारवञ्चलमोविली च प्रशस्यते॥२॥
संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते।
अलाभे त्वशमीगर्भादुद्धरेदविलम्बितः॥३॥
चतुर्विंशतिरङ्गुष्ठदैर्घ्यं षडपि पार्थिवम्।
चत्वार उच्छ्रये मानमरण्योः परिकीर्त्तितम्॥४॥
अष्टाङ्गुलः प्रमन्थः स्याच्चत्रं स्याद्द्वादशाङ्गुलम्।
ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम्॥५॥

अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्रोपदिश्यते ।
तत्र तत्र वृहत्पर्वग्रन्थिभिर्मिनुयात् सदा ॥ ६ ॥
गोवालैः शणसंमिश्रैस्त्रिवृत्तममलात्मकम् ।
व्यामप्रमाणं नेत्रं स्यात प्रमथ्यस्तेन पावकः ॥ ७ ॥
मूर्द्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी ।
अङ्गुष्ठमात्राण्येतानि द्व्यङ्गुष्ठं वक्ष उच्यते ॥ ८ ॥
अङ्गुष्ठमात्रं हृदयं त्र्यङ्गुष्ठमुदरं स्मृतम् ।
एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकम् ॥ ९ ॥
ऊरू जङ्घे च पादौ च चतुस्त्र्येकैर्यथाक्रमम् ।
अरण्यवयवा ह्येते याज्ञिकैः परिकीर्त्तिताः ॥ १० ॥
यत्तद्गुह्यमिति प्रोक्तं देवयोनिस्तु सोच्यते ।
अस्यां यो जायते वह्निः स कल्याणकृदुच्यते ॥ ११ ॥
अन्येषु ये तु मन्थन्ति ते रोगभयमाप्नुयुः ।
प्रथमे मन्थने त्वेष नियमो नोत्तरेषु च ॥ १२ ॥
उत्तरारणिनिष्पन्नः प्रमन्थः सर्वदा भवेत् ।
योनिसङ्करदोषेण युज्यते ह्यन्यमन्थकृत् ॥ १३ ॥
आर्द्रा सशुषिरा चैव घूर्णाङ्गी पाटिता तथा ।
न हिता यजमानानामरणिश्चोत्तरारणिः ॥ १४ ॥ ७ खण्डः ॥

परिधायाहतं वासः प्रावृत्य च यथाविधि ।
विभृयात् प्राङ्मुखो यन्त्रमावृता वक्ष्यमाणया ॥ १ ॥
चत्रवुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः ।
कृत्वोत्तराग्रामरणिं तद्वुध्नमुपरिन्यसेत् ॥ २ ॥
चत्राधेः कीलकाग्रस्था मोविलीमुदगग्रकाम् ।
विष्टभ्याधारयेद्यन्त्रं निष्कम्पं प्रयतः शुचिः ॥ ३ ॥

निरुद्दे ध्याथ नेतेण चतं पत्नरो हतांशकाः ।
पूर्वं मन्यन्त्यरण्यान्याः प्राच्यग्नेः स्याद्यथा च्युतिः ॥४॥
नैकयापि विना कार्य्यमाधानं भार्य्यया द्विजैः ।
अकृतं तद्विजानीयात् सर्व्वान्वाचारभन्ति यत् ॥५॥
वर्णज्यैष्ठेप्रन वह्वीभिः सवर्णाभिश्च जन्मतः ।
कार्य्यमग्निच्युतेराभिः साध्वीभिर्मथनं पुनः ॥ ६ ॥
नात्र शूद्रीं प्रयुञ्जीत न द्रोहद्वेषकारिणीम् ।
नचैवाव्रतस्थां नान्यपुंसा च सह सङ्गताम् ॥ ७ ॥
ततः शक्ततरा पश्चादासामन्यतरापिवा ।
उपेतानां वान्यतमा मन्थेदग्निं निकामतः ॥ ८ ॥
जातस्य लक्षणं कृत्वा तं प्रणीय समिध्य च ।
आधाय समिधं चैव ब्रह्माणं चोपवेशयेत् ॥ ९ ॥
ततः पूर्णाहुतिं हुत्वा सर्वमन्त्रसमन्विताम् ।
गां दद्याद्यज्ञवास्त्वन्ते ब्रह्मणे वाससी तथा ॥१०॥
होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः ।
पाणिरेवेतरस्मिंस्तु स्रुचैवात्र तु हूयते ॥ ११ ॥
खादिरो वाथ पालाशो द्विवितस्तिः स्रुवः स्मृतः ।
स्रुग्बाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः ॥ १२ ॥
स्रुवाग्रे घ्राणवत् खातं द्व्यङ्गुष्ठपरिमण्डलस्थलम् ।
जुह्वाः शराववत् खातं सनिर्व्वाहं षड़ङ्गुलं कुर्य्यात् ॥ १३ ॥
तेषां प्राक्शः कुशैः कार्य्यः संप्रमार्गोजुहूषता ।
प्रतापनञ्च लिप्तानां प्रक्षाल्योष्णेन वारिणा ॥ १४ ॥
प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः ।
तत्तथासादयेद्द्रव्यं यद्यथा विनियुज्यते ॥ १५ ॥

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥ १६ ॥
नाङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित् ।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥ १७॥
प्रादेशान्नाधिका नो न तथा स्याद्विशाखिका ।
न सपर्णा न निर्व्वीर्य्या होमेषु च विजानता ॥ १८ ॥
प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितम् ।
एवंविधाः स्युरेवेह समिधः सर्वकर्म्मसु ॥ १९ ॥
समिधोऽष्टादशेध्मस्य प्रवदन्ति मनीषिणः ।
दर्शे च पौर्णमासे च क्रियास्वन्यासु विंशतिः ॥ २० ॥
समिदादिषु होमेषु मन्त्रदैवतवर्जिता ।
पुरस्ताच्चोपरिष्टाच्च होन्धनार्थं समिद्भवेत् ॥ २१ ॥
इध्मोऽप्येधार्थमाचार्य्यैर्हविराहुतिषु स्मृतः ।
यत्र चास्य निवृत्तिः स्यात्तत् स्पष्टीकरवाण्यहम् ॥२२॥
अङ्गहोमसमित्तन्त्रसोष्यन्त्याख्येषु कर्म्मसु ।
येषां चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च ॥ २३ ॥
अक्षभङ्गादिविपदि जलहोमादिकर्म्मणि ।
सोमाहुतिषु सर्व्वासु नैतेष्विध्म विधीयते ॥ २४ ॥ ८ खण्डः ॥

सूर्य्येऽस्तशैलमप्राप्ते षट्त्रिंशद्भिः सदाङ्गुलैः ।
प्रादुष्करणमग्नीनां प्रातर्भासाञ्च दर्शनात् ॥ १ ॥
हस्तादूर्द्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति ।
तावद्धोमविधिः पुण्यो नात्येत्युदितहोमिनाम् ॥ २॥
यावत् सम्यग् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।
न च लौहित्यमापैति तावत् सायञ्च हूयते ॥३ ॥

रजोनीहारधूमाभ्रवृक्षाग्रान्तरिते रवौ ।
सन्ध्यामुद्दिश्य जुहुयाद्धुतमस्य न लुप्यते ॥ ४ ॥
न कुर्य्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम् ।
वरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्जयेत् ॥ ५ ॥
पर्य्युक्षणञ्च सर्वत्र कर्त्तव्यमदितेन्विति ।
अन्ते च वामदेव्यस्य गानं कुर्य्यादृचस्त्रिधा ॥ ६ ॥
अहोमकेष्वपि भवेद् यथोक्तं चन्द्रदर्शनम् ।
वामदेव्यं गणेष्वन्ते वल्यन्ते वैश्वदेविके ॥ ७ ॥
यान्यधस्तरणान्तानि न तेषु स्तरणं भवेत् ।
एककार्य्यार्थसाध्यत्वात् परिधीनपि वर्जयेत् ॥ ८ ॥
वर्हिः पर्य्युक्षणं चैव वामदेव्यजपस्तथा ।
कृत्वाहुतिषु सर्वासु त्रिकमेतन्न विद्यते ॥ ९ ॥
हविष्येषु यवामुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादिसर्व्वालाभेऽपि वर्जयेत् ॥ १० ॥
पाण्याहुतिर्द्वादशपर्वपूरिका कंसादिना चेत् स्रुवमात्रपावका ।
देवेन तीर्थेन च हूयते हविः स्वङ्गारिणि स्वर्चिषि तच्च पावके॥११
योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः ।
मन्दाग्निरामयावी च दरिद्रश्च स जायते ॥ १२ ॥
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन ।
आरोग्यमिच्छतायुश्च श्रियमात्यन्तिकीम्परम् ॥१३॥
होतव्ये च हुते चैव पाणिसूर्पस्फ्यदारुभिः ।
न कुर्य्यादग्निधमनं कुर्य्याद्वा व्यजनादिना ॥ १४ ॥
मुखेनैके धमन्त्यग्निं मुखाद्ध्येषोऽध्यजायत ।
नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत् ॥१५॥ ८खण्डः ॥

यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः।
दन्तान् प्रक्षाल्य नद्यादौ गृहे चेत्तदमन्त्रवत् ॥ १ ॥
नारदाद्युक्तवार्क्षं यदष्टाङ्गुलमपाटितम्।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥ २ ॥
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः।
परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ॥ ३ ॥
आयुर्बलं यशोवर्च्चः प्रजाः पशून् वसूनि च।
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नोधेहि वनस्पते ॥ ४ ॥
यव्यद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्व्वीत वर्जयित्वा समुद्रगाः ॥ ५ ॥
धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते।
न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥ ६ ॥
उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्य्यग्रहे चैव रजोदोषो न विद्यते ॥ ७ ॥
वेदाश्छन्दांसि सर्व्वाणि ब्रह्माद्याश्च दिवौकसः।
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः ॥ ८ ॥
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः।
यियासूननुगच्छन्ति सन्तुष्टाः स्वशरीरिणः ॥ ९ ॥
समागमस्तु यत्रैषां तत्र हत्यादयोमलाः।
नूनं सर्व्वे क्षयं यान्ति किमुतैकं नदीरजः ॥ १० ॥
ऋषीणां सिच्यमानानामन्तरालं समाश्रितः।
संपिबेद् यः शरीरेण पर्षन्मुक्ताजलच्छटाः ॥ ११ ॥
विद्यादीन् ब्राह्मणः कामान् वरादीन् कन्यका ध्रुवम्।
आमुष्मिकाण्यपि सुखान्याप्नुयात् स न संशयः ॥१२॥

अशुचरशुचिना दत्तमाममन्त्रजलादिना ।
अनिर्गतदशाहास्तु प्रेता रक्षांसि भुञ्जते ॥ १३ ॥
स्वर्धुन्यम्भःसमानि स्युः सर्वाण्यम्भांसि भूतले ।
कूपस्थान्यपि सोमार्कग्रहणे नात्र संशयः ॥ १४ ॥ १०खण्डः ॥
इति कर्म्मप्रदीपपरिशिष्टे कात्यायनविरचिते प्रथमः प्रपाठकः॥
अत ऊर्द्ध्वं प्रवक्ष्यामि सन्ध्योपासनकं विधिम् ।
अनर्हः कर्म्मणां विप्रः सन्ध्याहीनो यतः स्मृतः ॥ १ ॥
सव्ये पाणौ कुशान् कृत्वा कुर्य्यादाचमनक्रियाम् ।
ह्रस्वाः प्रचरणीयाः स्युः कुशा दीर्घास्तु वर्हिषः॥ २
दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्म्मणि ।
सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः ॥ ३ ॥
रक्षयेद्वारिणात्मानं परिक्षिप्य समन्ततः ।
शिरसो मार्ज्जनं कुर्य्यात् कुशैः सोदकविन्दुभिः ॥४॥
प्रणवो भूर्भुवःस्वश्च सावित्री च तृतीयका ।
अब्दैवत्यं तृचश्चैव चतुर्थमिति मार्ज्जनम् ॥५ ॥
भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः ।
महर्ज्जनस्तपः सत्यं गायत्री च शिरस्तथा ॥ ६ ॥
आपज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरतिशिरः ।
प्रतीप्रतीकं प्रणवमुच्चारयेदन्ते च शिरसः ॥ ७ ॥
एता एतां सहानेन तथैभिर्द्दशभिः सह ।
त्रिर्ज्जपेदायतप्राणः प्रणायामः स उच्यते ॥ ८ ॥
करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च ।
जपेदनायतासुर्व्वा त्रिः सकृद्वाघमर्षणम् ॥ ९ ॥
उत्थायार्कं प्रतिप्रोहेत्त्रिकेणाञ्जलिनाम्भसः ।

उच्चित्रमृग्द्वयेनाथ चोपतिष्ठेदनन्तरम् ॥ १० ॥
सन्ध्याद्वयेऽप्युपस्थानमेतदाहुर्मनीषिणः ।
मध्ये त्वह्न उपर्य्यस्य विभ्राड़ादीच्छया जपेत् ॥११॥
तद्संसक्तपार्ष्णिर्वा एकपादर्द्धपादपि ।
कुर्य्यात् कृताञ्जलिर्व्वापि ऊर्द्ध्वबाहुरथापि वा ॥१२॥
यत्र स्यात् कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनीषिणः ।
भूयस्त्वं ब्रुवते तत्र कृच्छ्राच्छ्रेयो ह्यवाप्यते ॥ १३ ॥
तिष्ठेदुदयनात् पूर्व्वां मध्यमामपि शक्तितः ।
आसीतोडुद्गमाच्चान्त्यां सन्ध्यां पूर्व्वात्रिकं जपन् ॥१४॥
एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र तिष्ठति ।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ॥ १५ ॥
सन्ध्यालोपाच्च चकितः स्नानशीलश्च यः सदा ।
तं दोषा नोपसर्पन्ति गरुत्मन्तमिवोरगाः ॥ १६ ॥
वेदमादित आरभ्य शक्तितोऽहरहर्ज्जपेत् ।
उपतिष्ठेत्ततो रुद्रसर्व्वाद्वा वैदिकाज्जपात ॥ १७ ॥११ खण्डः ॥
अथाद्भिस्तर्पयेद्देवान् सतिलाभिः पितॄनपि ।
नमोऽन्ते तर्पयामीति आदावोमिति च ब्रुवन् ॥ १ ॥

ब्रह्माणं विष्णुं रुद्रं प्रजापतिं वेदान् देवांश्छन्दांस्यृषीन् पुराणानाचार्य्यान् गन्धर्व्वानितराचार्य्यान् संवत्सरं सावयवं देवीरप्सरसो देवानुगान्नागान् सागरान् पर्व्वतान् सरितो दिव्यान् मनुष्यानितरान् मनुष्यान् यक्षान् रक्षांसि सुपर्णान् पिशाचान् पृथिवीमोषधीः पशून् वनस्पतीन् भूतग्रामं चतुर्व्विधमित्युपवीत्यथ प्राचीनावीती यमं यमपुरुषान् कव्यवाड़नलं सोमं यममर्य्यमणमग्निष्वात्तान् सोमपीथान्

बर्हिषदोऽथ स्वान् पितॄन् सकृत् सकृन्मातामहांश्चेति प्रतिपुरुषमभ्यस्येज्ज्येष्ठभ्रातृश्वशुरपितृव्यमातुलांश्च पितृवंश्य-मातृवंश्यौ ये चान्ये मत्त उदकमर्हन्ति तांस्तर्पयामीत्यय-मवसानाञ्जलिरथ श्लोकाः ॥ २ ॥

छायां यथेच्छेच्छरदातपार्त्तः परः पिपासुः क्षुधितोऽन्नमन्नम् ।
बालो जनित्रीं जननी च बालं योषित् पुमांसं पुरुषश्च योषाम् ॥३॥

तथा सर्व्वाणि भूतानि स्थावराणि चराणि च ।
विप्रादुदकमिच्छन्ति सर्व्वाभ्युदयकाङ्क्षि सः ॥ ४ ॥

तस्मात् सदैव कर्त्तव्यमकुर्वन्महतैनसा ।
युज्यते ब्राह्मणः कुर्व्वन्विश्वमेतद्बिभर्त्ति हि ॥५॥

अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्म्मणः ।
प्रातर्न्न तनुयात् स्नानं होमलोपो हि गर्हितः ॥६॥ १२खण्डः॥

पञ्चानामथ सत्राणां महतामुच्यते विधिः ।
यैरिष्ट्वा सततं विप्रः प्राप्नुयात् सद्म शाश्वतम् ॥ १ ॥

देवभूतपितृब्रह्ममनुष्याणामनुक्रमात् ।
महासत्राणि जानीयात्त एवेह महामखाः ॥ २ ॥

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥३॥

श्राद्धं वा पितृयज्ञः स्यात् पित्र्यो बलिरथापि वा ।
यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स वोच्यते ॥ ४ ॥

स चार्व्वाक् तर्पणात् कार्य्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने वा नान्यत्रेतो निमित्तकात् ॥ ५ ॥

अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये ।
अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा ॥६॥

अप्युद्धृत्य यथाशक्त्या किञ्चिदन्नं यथाविधि।
पितृभ्योऽथ मनुष्येभ्यो दद्यादहरहर्द्विजे ॥७॥
पितृभ्य इदमित्युक्त्वा स्वधाकारमुदीरयेत्।
हन्तकारं मनुष्येभ्यस्तदर्द्धं निनयेदपः ॥ ८ ॥
मुनिभिर्द्विरसनमुक्तं विप्राणां मर्त्त्यवासिनां नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रथमयामान्तः ॥ ९ ॥
सायं प्रातर्वैश्वदेवः कर्त्तव्यो बलिकर्म्म च।
अनश्नतापि सततमन्यथा किल्बिषी भवेत् ॥ १० ॥
अमुष्मै नम इत्येवं बलिदानं विधीयते।
बलिदानप्रदानार्थं नमस्कारः कृतो यतः ॥ ११ ॥
स्वाहाकारवषट्कारनमस्कारा दिवौकसाम्।
स्वधाकारः पितॄणाञ्च हन्तकारो नृणां कृतः ॥ १२ ॥
स्वधाकारेण निनयेत् पित्र्यं बलिमतः सदा।
तदप्येके नमस्कारं कुर्वते नेति गौतमः ॥ १३ ॥
नावरांश्चाग्निर्वलयो भवन्ति महामार्जारश्रवणप्रमाणात्।
एकत्र चेद्बिलाष्टा भवन्तीतरेतरसंसक्ताश्च ॥ १४ ॥१२ खण्डः ॥
अथ तद्विन्यासोवृद्धिपिण्डानिवोत्तरांश्चतुरोबलीन्निदध्यात् पृथिव्यै वायवे विश्वेभ्यो देवेभ्यः प्रजापतय इति सव्यत एतेषामेवोत्तमश्च ओषधिवनस्पतिभ्य आकाशाय कामायेत्येतेषामपि सव्यत इन्द्राय वासुकये ब्रह्मण इत्येतेषामपि रक्षोजनेभ्य इति सर्व्वेषां दक्षिणतः पितृभ्य इति चतुर्दश नित्या आग्रस्य प्रभृतयः काम्याः सर्व्वेषामुभयतोऽद्भिः परिषेकः पिण्डवच्च पश्चिमा प्रतिपत्तिः ॥ १ ॥
न स्यातां काम्यसामान्ये जुहोति बलिकर्म्मणी।

पूर्व्वं नित्यविशेषोक्तं जुहोति बलिकर्म्मणोः ॥ २ ॥
कामन्ते भवेयातां न तु मध्ये कदाचन ।
नैकस्मिन् कर्म्मणि तते कर्मान्यत्तायते यतः ॥ ३ ॥
अग्न्यादिर्गौतमाद्युक्तो होमः शाकल एव च ।
अनाहिताग्नेरप्येष युज्यते बलिभिः सह ॥ ४ ॥
स्पृष्ट्वापो वीक्षमाणोऽग्निं कृताञ्जलिपुटस्ततः ।
वामदेव्यजपात् पूर्व्वं प्रार्थयेद्द्रविणोदयम् ॥ ५ ॥
आरोग्यमायुरैश्वर्य्यं धीर्धृतिः शं बलं यशः ।
ओजो वर्चः पशून् वीर्य्यं ब्रह्म ब्रह्मण्यमेव च ॥ ६ ॥
सौभाग्यं कर्म्मसिद्धिञ्च कुलज्यैष्ठ्यं सुकर्त्तृताम् ।
सर्व्वमेतत् सर्वसाक्षिन् द्रविणोदरिरीहिणः ॥ ७ ॥
न ब्रह्मयज्ञादधिकोऽस्ति यज्ञो न तत्प्रदानात् परमस्ति दानम् ।
सर्व्वे तदन्ताः क्रतवः सदानानान्तो दृष्टः कैश्चिदस्य द्विकस्य ॥ ८ ॥
ऋचः पठन् मधुपयःकुल्याभिस्तर्पयेत् सुरान् ।
घृतामृतौघकुल्याभिर्यजूंष्यपि पठन् सदा ॥ ९ ॥
सामान्यपि पठन् सोमघृतकुल्याभिरन्वहम् ।
मेदःकुल्याभिरपिच आथर्व्वाङ्गिरसः पठन् ॥ १० ॥
मांसक्षीरौदनमधुकुल्याभिस्तर्पयेत् पठन् ।
वाकोवाक्यं पुराणानि इतिहासानि चान्वहम् ॥ ११ ॥
ऋगादीनामन्यतममेतेषां शक्तितोऽन्वहम् ।
पठन् मध्वाज्यकुल्याभिः पितॄनपि च तर्पयेत ॥ १२ ॥
ते तृप्तास्तर्पयन्त्येनं जीवन्तं प्रेतमेव च ।
कामचारी च भवति सर्वेषु सुरसद्मसु ॥ १३ ॥
गुर्व्वप्येनो न तं स्पृशेत् पंक्तिञ्चैव पुनाति सः ।

थैं यं क्रतुञ्च पठति फलभाक्तस्य तस्य च ।
वसुपूर्णां वसुमती विद्यानफलमाप्नुयात् ।
ब्रह्मयज्ञादपि ब्रह्म दानमेवातिरिच्यते ॥१५॥१४खण्डः ॥
ब्रह्मणो दक्षिणा देया यत्र या परिकीर्त्तिता ।
कर्म्मान्तेऽनुच्यमानापि पूर्णपात्रादिका भवेत् ॥ १ ॥
यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन विद्यते ।
नावरार्द्ध्यमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥ २ ॥
विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत् ।
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत् ॥ ३ ॥
कुलर्त्विजमधीयानं सन्निकृष्टं तथा गुरुम् ।
नातिक्रामेत् सदा दित्सन् य इच्छेदात्मनो हितम् ॥४॥
अहमस्मै ददामीति एवमाभाष्य दीयते ।
नैताव पृष्ट्वा ददतः पात्रेऽपि फलमस्ति हि ॥ ५ ॥
दूरस्थाभ्यामपि द्वाभ्यां प्रदाय मनसा वरम् ।
इतरेभ्यस्ततो देयादेष दानविधिः परः ॥ ६ ॥
सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् ।
यद्ददाति तमुल्लङ्घ्य ततस्तेयेन युज्यते ॥ ७ ॥
यस्य त्वेक गृहे मूर्खो दूरस्थश्च गुणान्वितः ।
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ॥ ८ ॥
ब्राह्मणाभिक्रमो नास्ति विप्रे वेदविवर्ज्जिते ।
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ९ ॥
आज्यस्थाली च कर्त्तव्या तैजसद्रव्यसम्भवा ।
महीमयी वा कर्त्तव्या सर्वास्वाज्याहुतीषु च ॥ १० ॥
आजयस्थाल्याः प्रमाणं तु यथाकामन्तु कारयेत् ।

सुदृढामव्रणां भद्रामाजप्रस्थालीं प्रचक्षते ॥ ११ ॥
तिर्य्यगूर्द्धं समिन्मात्रा दृढा नातिबृहन्मुखी।
मृन्मय्यौडुम्बरी वापि चरुस्थाली प्रशस्यते ॥ १२ ॥
स्वशाखोक्तः प्रसुखिन्नो ह्यदग्धोऽकठिनः शुभः।
नचातिशिखिलः पाच्यो न चरुश्चारसस्तथा ॥ १३ ॥
इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्।
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् ॥ १४ ॥
एषैव दर्व्वी यस्तत्र विशेषस्तमहं ब्रुवे।
दर्व्वी द्व्यङ्गुलपृथ्वग्रा तुरीयो नन्तमेक्षणम् ॥ १५ ॥
मुषलोलूखले वार्क्षे स्वायते सुदृढे तथा।
इच्छाप्रमाणे भवतः शूर्पं वैनवमेव च ॥ १६ ॥
दक्षिणं वामतो वाह्यमात्माभिमुखमेव च।
करं करस्य कुर्वीत करणे न्यच्चकर्म्मणः ॥ १७ ॥
कृत्वाग्न्यभिमुखौ पाणी स्वस्थानस्थौ सुसंयतौ।
प्रदक्षिणं तथासीनः कुर्य्यात् परिसमूहनम् ॥ १८ ॥
बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः।
त्रयो भवन्ति शीर्णाग्रा एकेषान्तु चतुर्दिशम् ॥ १९ ॥
प्रागग्रावभितः पश्चादुदग्रमथवापरम्।
न्यसेत् परिधिमन्यञ्चेदुदगग्रः स पूर्वतः ॥ २० ॥
यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥२१॥ १५ खण्डः॥
पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते।
वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः ॥ १ ॥
यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत्।

अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते॥ २ ॥
यदुक्तं यदहस्त्वेव दर्शनं नैति चन्द्रमाः ।
अनयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि ॥ ३ ॥
यच्चोक्तं दृश्यमानेऽपि तच्चतुर्दश्यपेक्षया ।
अमावास्यां प्रतीक्षेत तदन्ते वापि निर्वपेत् ॥ ४ ॥
अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमांशे च पुनः किल भवेदणुः ॥ ५ ॥
आग्रहायण्यमावास्या तथा ज्येष्ठस्य या भवेत् ।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः ॥ ६ ॥
अतेन्दुराद्ये प्रहरेऽवतिष्ठते चतुर्थभागो न कलावशिष्टः ।
तदन्त एव क्षयमेति कृत्स्नमेवं ज्योतिश्चक्रविदो वदन्ति ॥७॥
यस्मिन्नब्दे द्वादशैकश्च यव्य-
स्तस्मिंस्तृतीयया परिदृश्योनैपजयते ।
एवं चारं चन्द्रमसो विदित्वा
क्षीणेतस्मिन्नपराह्णे च दद्यात् ॥ ८ ॥
सम्मिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित् ।
खर्वितां तां विदुः केचिद्गताध्वामिति चापरे ॥९॥
वर्द्धमानाममावास्यां लक्षयेच्चेदपरेऽहनि ।
यामांस्त्रीनधिकान् वापि पितृयज्ञस्ततो भवेत् ॥१०॥
पक्षादावेव कुर्वीत सदा पक्षादिकं चरुम् ।
पूर्वाह्ण एव कुर्वन्ति विद्धेऽप्यन्ये मनीषिणः ॥ ११ ॥
स्वपितुः पितृकृत्येषु ह्यधिकारो न विद्यते ।
न जीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतिः ॥ १२ ॥
पितामहे म्रियति च पितुः प्रेतस्य निर्वपेत् ।

पितुस्तस्य च वृत्तस्य जीवेच्चेत् प्रपितामहः ॥ १३ ॥
पितुः पितुः पितुश्चैव तस्यापि पितुरेव च ।
कुर्य्यात् पिण्डत्रयं यस्य संस्थितः प्रपितामहः ॥ १४ ॥
जीवन्तमति दद्याद्वा प्रेतायान्नोदके द्विजः ।
पितुः पितृभ्यो वा दद्यात् स्वपितेत्यपरा श्रुतिः ॥१५॥
पितामहः पितुः पश्चात् पञ्चत्वं यदि गच्छति ।
पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोड़शम् ॥ १६ ॥
नैतत् पौत्रेण कर्त्तव्यं पुत्रवांश्चेत् पितामहः ।
पितुः सपिण्डनं कृत्वा कुर्य्यान्मासानुमासिकम् ॥१७॥
असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्य्यादिति कात्यायनोऽब्रवीत् ॥१८॥
पापिष्ठमति शुद्धेन शुद्धं पापीकृतापि वा ।
पितामहेन पितरं संस्कुर्य्यादिति निश्चयः ॥ १९ ॥
ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते ।
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ ॥२० ॥
मातुः सपिण्डीकरणं पितामह्या सहोदितम् ।
यथोक्तेनैव कल्पेन पुत्रिकाया न चेत् सुतः ॥ २१ ॥
न योषिद्भ्यः पृथग् दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ॥ २२ ॥
मातुः प्रथमतः पिण्डं निर्व्वपेत् पुत्रिकासुतः ।
द्वितीयन्तु पितुस्तस्यास्तृतीयन्तु पितुः पितुः ॥२३॥ १६ खण्डः ॥
पुरतो यात्मनः कुर्य्युः सा पूर्व्वा परिकीर्त्यते ।
मध्यमा दक्षिणेनास्यास्तद्दक्षिणत उत्तमा ॥ १ ॥
वायूग्निदिङ्मुखान्तास्ताः कार्य्याः सार्द्धाङ्गुलान्तराः ।

तीक्ष्णान्ता यवमध्याश्च मध्यं नाव इवोत्किरेत् ॥२॥
शङ्कुश्च खादिरः कार्य्यो रजतेन विभूषितः ।
शङ्कुश्चैवोपवेशश्च द्वादशाङ्गुल इष्यते ॥ ३ ॥
अन्याशार्थैः कुशैः कार्य्यं कर्षूणां स्तरणं घनैः ।
दक्षिणान्तं तदग्रैस्तु पितृयज्ञे परिस्तरेत् ॥ ४ ॥
स्थगरं सुरभि ज्ञेयं चन्दनादि विलेपनम् ।
सौवीराञ्जनमित्युक्तं पिञ्जलीनां यदञ्जनम् ॥ ५ ॥
स्रस्तरे सर्व्वमासाद्य यथावदुपयुज्यते ।
देवपूर्वं ततः श्राद्धमत्वरः शुचिरारभेत् ॥ ६ ॥
आसनाद्यर्घपर्य्यन्तं वशिष्ठेन यथेरितम् ।
कृत्वा कर्म्माद्य पात्रेषु उक्तं दद्यात्तिलोदकम् ॥ ७ ॥
तूष्णीं पृथगपो दत्त्वा मन्त्रेण तु तिलोदकम् ।
गन्धोदकञ्च दातव्यं सन्निकर्षक्रमेण तु ॥ ८ ॥
आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम् ।
पितरस्तस्य नाश्नन्ति दश वर्षाणि पञ्च च ॥ ९ ॥
कुलालचक्रनिष्पन्नमासुरं मृण्मयं स्मृतम् ।
तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत् ॥ १० ॥
गन्धान् ब्राह्मणसात् कृत्वा पुष्पाण्यृतुभवानि च ।
धूपञ्चैवानुपूर्व्वेण ह्यग्नौ कुर्य्यादनन्तरम् ॥ ११ ॥
अग्नौ करणहोमश्च कर्त्तव्य उपवीतिना ।
प्राङ्मुखेनैव देवेभ्यो जुहोतीति श्रुतिश्रुतिः ॥ १२ ॥
अपसव्येन वा कार्य्यो दक्षिणाभिमुखेन च ।
निरूप्य हविरन्यस्मा अन्यस्मै न हि हूयते ॥ १३ ॥
स्वाहा कुर्य्यान्नचात्रान्ते नचैव जुहुयाद्धविः ।

स्वाहाकारेण हुत्वाग्नौ पश्चान्मन्त्रं समापयेत ॥ १४॥
पित्रे च यः पंक्तिमूर्द्धन्यस्तस्य पाणावनग्निमान् ।
हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निःक्षिपेत् ॥१५॥
नोर्कुर्य्याद्धोममन्त्राणां पृथगादिषु कुत्रचित् ।
अन्येषाञ्चाविक्कृष्टानां कालेनाचमनादिना ॥१६॥
सव्येन पाणिनेत्येवं यदत्र समुदीरितम् ।
परिग्रहणमात्रन्तत् सव्यस्यादिशति व्रतम् ॥ १७ ॥
पिञ्जल्याद्यभिसंस्पृश्य दक्षिणेनेतरात् करात् ।
अन्वारभ्य च सव्येन कुर्य्यादुल्लेखनादिकम् ॥१८॥
यावदर्थमुपादाय हविषोऽर्भकमर्भकम् ।
चरुणा सह सन्नीय पिण्डान् दातुमुपक्रमेत् ॥१९॥
पितुरुत्तरकर्ष्वंशे मध्यमे मध्यमस्य तु ।
दक्षिणे तत्पितुश्चैव पिण्डान् पर्वणि निर्वपेत् ॥२०॥
वाममावर्त्तनं केचिदुदगन्तं प्रचक्षते ।
सर्व्वं गौतमशाण्डिल्यौ शाण्डिल्यायन एव च ॥२१॥
आहृत्य प्राणमायम्य पितॄन् ध्यायन् यथार्थतः ।
जपंस्तेनैव चाहृत्य ततः प्राणं प्रमोचयेत् ॥ २२॥
शाकञ्च फाल्गुनाष्टम्यां स्वयं पत्न्यपि वा पचेत् ।
यस्तु शाकादिको होमः कार्य्योऽपूपाष्टकाहुतः ॥२३॥
अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ ।
वार्कखण्डिश्च सर्व्वासु कौत्सो मेनेऽष्टकासु च ॥२४॥
स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यनुकल्पितम् ।
श्रपयेत्तं सवत्सायास्तरुण्यागोः पयस्यनु ॥२५॥ १७ खण्डः ॥
सायमादि प्रातरन्तमेकं कर्म्म प्रचक्षते ।

दर्शान्तं पौर्णमासाद्यमेकमेव मनीषिणः ॥ १ ॥
ऊर्द्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासोऽपि वाग्रिमः ।
य आयाति स होतव्यः स एवादिरिति श्रुतिः ॥२॥
ऊर्द्ध्वं पूर्णाहुतेः कुर्य्यात् सायं होमादनन्तरम् ।
वैश्वदेवन्तु पाकान्ते वलिकर्म्मसमन्वितम् ॥३॥
ब्राह्मणान् भोजयेत् पश्चादभिरूपान् स्वशक्तितः ।
यजमानस्ततोऽश्नीयादिति कात्यायनोऽब्रवीत् ॥४॥
वैवाहिकेऽग्नौ कुर्व्वीत सायंप्रातस्त्वतन्द्रितः ।
चतुर्थीकर्म कृत्वैतदेतच्छाटग्रायनेर्मतम् ॥५॥
ऊर्द्ध्वं पूर्णाहुतेः प्रातर्हुत्वा तां सायमाहुतिम् ।
प्रातर्होमस्तदैव स्यादेष एवोत्तरो विधिः ॥ ६ ॥
पौर्णमासात्यये हव्यं होता वा यदहर्भवेत् ।
तदहर्ज्जुहुयादेवममावास्यात्ययेऽपि च ॥ ७ ॥
अहूयमानेऽनश्नंश्चेन्नयेत् कालं समाहितः ।
सम्पन्ने तु यथा तत्र हूयते तद्विहोच्यते ॥ ८ ॥
आहुताः परिसंख्याय पात्रे कृत्वाहुतीः सकृत् ।
मन्त्रेण विधिवद्धुत्वाधिकमेवापरा अपि ॥ ९ ॥
यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे यथा ॥ १० ॥
अपिवाज्ञातमित्येषा प्राजापत्यापिवाहुतिः ।
होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधिः स्मृतः ॥ ११ ॥
यद्यग्निरग्निनान्येन सम्भवेदाहितः क्वचित् ।
अग्नये विविचय इति जुहुयाद्वा घृताहुतिम् ॥१२ ॥
अग्नयेऽप्सुमते चैव जुहुयाद्वैद्युतेन चेत् ।

अग्नये शुचये चैव जुहुयाच्चेद् रग्निना ॥ १३ ॥
गृहदाहाग्निनाग्निस्तु यष्टव्यः क्षामवान् द्विजैः ।
दावाग्निना च संसर्गे हृदयं यदि तप्यते ॥ १४ ॥
द्विर्भूतो यदि संसृज्येत् संसृष्टमुपशामयेत् ।
असंसृष्टं जागरयेन्निरिशर्म्मैवमुक्तवान् ॥ १५ ॥
न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् ।
स्वगर्भसत्क्रियार्थाश्च यावन्नासौ प्रजायते ॥ १६ ॥
अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः ।
न हि पित्रा समानीतः पुत्रस्य भवति क्वचित् ॥ १७ ॥
यस्याग्नावन्यहोमः स्यात् स वैश्वानरदैवतम् ।
चरुं निरुप्य जुहुयात् प्रायश्चित्तं तु तस्य तत् ॥१८॥
परेणाग्नौ हुते स्वार्थं परस्याग्नौ हुते स्वयम् ।
पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च ॥ १९ ॥
अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा ।
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥ २० ॥
स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्म्मसु ।
पिण्डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात् ॥२१॥
भूतप्रवाचने पत्नी यद्यसन्निहिता भवेत् ।
रजोरोगादिना तत्र कथं कुर्वन्ति याज्ञिकाः ॥२२॥
महानसेऽन्नं या कुर्य्यात् सवर्णा तां प्रवाचयेत् ।
प्रणवाद्यपि वा कुर्य्यात् कात्यायनवचो यथा ॥ २३ ॥
यज्ञवास्तुनि मुष्ट्याञ्च स्तम्बे दर्भवटौ तथा ।
दर्भसंख्या न विहिता विष्टरास्तरणेषु च ॥ २४ ॥ १८ खण्डः ॥
निःक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा ।

प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं क्वचित् ॥१॥
मनसा नैत्यकं कर्म्म प्रवसन्नप्यतन्द्रितः।
उपविश्य शुचिः सर्वं यथाकालमनुद्रवेत् ॥ २ ॥
पत्न्या चाप्यवियोगिन्या शुश्रूष्योऽग्निर्विनीतया।
सौभाग्यवित्तावैधव्यकामया भर्तृभक्तया ॥ ३ ॥
या वा स्याद्वीरसूरासमाज्ञासम्पादिनी प्रिया।
दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत् ॥ ४ ॥
दिनत्रयेण वा कर्म्म यथा ज्येष्ठं स्वशक्तितः।
विभज्य सह वा कुर्य्युर्यथाज्ञानञ्च शास्त्रवत् ॥५॥
स्त्रीणां सौभाग्यतो ज्यैष्ठं विद्ययैव द्विजन्मनाम्।
नहि स्वल्पा न तपसा भर्त्ता तुष्यति योषिताम् ॥६॥
भर्त्तुरादेशवर्त्तिन्या यथोमा बहुभिर्व्रतैः।
अग्निश्च ताविताऽमुत सा स्त्री सौभाग्यमाप्नुयात् ॥७॥
विनयावनतापि स्त्री भर्त्तुर्या दुर्भगा भवेत्।
अमुनोमाग्निभर्तॄणामवज्ञातिः कृता तया ॥ ८ ॥
श्रोत्रियं सुभगां गाञ्च अग्निमग्निचितिं तथा।
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥ ९ ॥
पापिष्ठं दुर्भगामन्त्यं नग्नमुत्कृत्तनासिकम्।
प्रातरुत्थाय यः पश्येत् स कलेरुपयुज्यते ॥ १० ॥
पतिमुल्लङ्घ्य मोहात् स्त्री किं किं न नरकं व्रजेत्।
कृच्छ्रान्मनुष्यतां प्राप्य किं किं दुःखं न विन्दति ॥११॥
पतिशुश्रूषयैव स्त्री कान् लोकान् समश्नुते।
दिवः पुनरिहायाता सुखानामम्बुधिर्भवेत् ॥ १२ ॥
सदारोऽन्यान् पुनर्दारान् कथञ्चित् कारणान्तरात्।

य इच्छेदग्निमान् कर्त्तुं क्व होमोऽस्य विधीयते ॥१३॥
खेऽग्नाविव भवेद्धोमो लौकिके न कदाचन ।
न ह्याहिताग्नेः स्वं कर्म्म लौकिकेऽग्नौ विधीयते ॥१४॥
षड़ाहुतिकमन्येन जुहुयाद्ध्रुवदर्शनात् ।
न ह्यात्मनोऽर्थं स्याचावद्यावन्न परिणीयते ॥ १५ ॥
पुरस्तात् त्रिविकल्पं यत् प्रायश्चित्तमुदाहृतम् ।
तत् षड़ाहुतिकं शिष्टैर्यज्ञविद्भिः प्रकीर्त्तितम् ॥ १६ ॥१८ खण्डः॥

इति कात्यायनविरचिते कर्म्मप्रदीपे द्वितीयः प्रपाठः ॥

असमक्षन्तु दम्पत्योर्होतव्यं नर्त्विगादिना ।
द्वयोरप्यसमक्षं हि भवेद्धुतमनर्थकम् ॥ १ ॥
विहायाग्निं सभार्य्यश्चेत् सीमामुल्लङ्घ्य गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यते ॥ २ ॥
अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः ।
पालयेदुपशान्तेऽस्मिन् पुनराधानमिष्यते ॥ ३ ॥
ज्येष्ठा चेद्बहुभार्य्यस्य अतिचारेण गच्छति ।
पुनराधानमत्रैक इच्छन्ति न तु गौतमः ॥ ४ ॥
दाहयित्वाग्निभिर्भार्य्यां सदृशीं पूर्वसंस्थिताम् ।
पात्रैश्चाथाग्निमादध्यात् कृतदारोऽविलम्बितः ॥ ५ ॥
एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् ।
दाहयित्वाग्निहोत्रेण यज्ञपात्रैश्च धर्म्मवित् ॥ ६ ॥
द्वितीयाञ्चैव यः पत्नीं दहेद्वैतानिकाग्निभिः ।
जीवन्त्यां प्रथमायान्तु ब्रह्मघ्नेन समं हि तत् ॥ ७ ॥
मृतायान्तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत् ।
ब्रह्मोज्झं तं विजानीयाद्यश्च कामात् समुत्सृजेत् ॥ ८ ॥

मृतायामपि भार्य्यायां वैदिकाग्निं न हि त्यजेत्।
उपाधिनापि तत् कर्म्म यावज्जीवं समापयेत् ॥ ९ ॥
रामोऽपि कृत्वा सौवर्णां सीतां पत्नीं यशस्विनीम्।
ईजे यज्ञैर्बहुविधैः सह भ्रातृभिरच्युतः ॥ १० ॥
यो दहेदग्निहोत्रेण स्वेन भार्य्यां कथञ्चन।
सा स्त्री सम्पद्यते तेन भार्य्या वास्य पुमान् भवेत्॥११॥
भार्य्या मरणमापन्ना देशान्तरगतापि वा।
अधिकारी भवेत् पुत्रो महापातकिनि द्विजे ॥ १२ ॥
मान्या चेन्म्रियते पूर्वं भार्य्या पतिविमानिता।
त्रीणि जन्मानि सा पुंस्त्वं पुरुषः स्त्रीत्वमर्हति ॥१३॥
पूर्वैव योनिः पूर्वावृत् पुनराधानकर्म्मणि।
विशेषोऽत्राग्न्युपस्थानमाजयाहुत्यष्टकं तथा ॥ १४ ॥
कृत्वा व्याहृतिहोमान्तमुपतिष्ठेत पावकम्।
अध्यायः केवलाग्नेयः कृत्तिजामिरमानसः ॥ १५ ॥
अग्निमीड़े अग्न आयाह्यग्न आयाहि वीतये।
तिस्रोऽग्निर्ज्योतिरित्यग्निं दूतमग्ने मृड़ेति च ॥ १६ ॥
इत्यष्टावाहुतीर्हुत्वा यथाविध्यनुपूर्वशः।
पूर्णाहुत्यादिकं सर्वमन्यत् प्रवदाचरेत् ॥ १७ ॥
अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः।
न तावत् पुनराधानमन्यारण्योर्विधीयते ॥ १८ ॥
विनष्टं स्रुक् स्रुवं न्युब्जं प्रत्यक्स्थलमुदर्च्चिषि।
प्रत्यगग्रञ्च मुषलं प्रहरेज्जातवेदसि ॥ १९ ॥ २० ॥ खण्डः ॥
स्वयंहोमासमर्थस्य समीपमुपसर्पणम्।
तत्राप्यसक्तस्य सतः शयनाच्चोपवेशनम् ॥ १ ॥

हुतायां सायमाहुत्यां दुर्बलश्चेद्‌गृही भवेत्।
प्रातर्होमस्तदैव स्याज्जीवेच्चेच्छुः पुनर्नवा ॥२॥
दुर्बलं स्नापयित्वा तु शुद्धचैलाभिसंवृतम्।
दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् ॥ ३ ॥
घृतेनाभ्यक्तमाप्लाव्य सवस्त्रमुपवीतिनम्।
चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषितम् ॥ ४ ॥
हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु।
मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः ॥ ५ ॥
आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम्।
एकोऽनुगच्छेत्तस्यार्द्धमर्द्धं पथ्युत्सृजेद्भुवि ॥ ६ ॥
अर्द्धमादहनं प्राप्त आसीनो दक्षिणामुखः।
सव्यं जान्वाच्य शनकैः सतिलं पिण्डदानवत् ॥७॥
अथ पुत्रादिराप्लुत्य कुर्य्याद्दारुचयं महत्।
भूप्रदेशे शुचौ देशे पश्चाच्चित्यादिलक्षणे ॥ ८ ॥
ततोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे।
आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रां नसि स्रुवम् ॥९॥
पादयोरधरां प्राचीमरणीमुरस्युत्तराम्।
पार्श्वयोः शूर्पचमसे सव्यदक्षिणयोः क्रमात् ॥१०॥
मुषलेन सह न्युब्जमन्तरूर्वोरुलूखलम्।
चत्रीवोलोकमत्र वमनस्युनयनोविभीः ॥ ११ ॥
अपसव्येन कृत्वैतद्वाग्यतः पितृदिङ्मुखः।
अथाग्निं सव्यजान्वक्तो दद्याद्दक्षिणतः शनैः ॥१२॥
अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः।
असौ स्वर्गाय लोकाय स्वाहेति यजुरीरयन् ॥ १३ ॥

एवं गृहपतिर्दग्धः सर्व्वं तरति दुष्कृतम्।
यश्चैनं दाहयेत् सोऽपि प्रजां प्राप्नोत्यनिन्दिताम् ॥१४॥
यथा स्वायुधधृक् पान्थो ह्यरण्यान्यपि निर्भयः।
अतिक्रम्यात्मनोऽभीष्टं स्थानमिष्टञ्च विन्दति ॥ १५ ॥
एवमेषोऽग्निमान् यज्ञपात्रायुधविभूषितः।
लोकानन्यानतिक्रम्य परं ब्रह्मैव विन्दति ॥१६॥ २१ खण्डः॥
अथानवेक्षमित्यापः सव एव शवस्पृशः।
स्नात्वा सचेलमाचम्य दद्युरस्योदकं स्थले ॥ १ ॥
गोत्रनामानुवादान्ते तर्पयामीत्यनन्तरम्।
दक्षिणाग्रान् कुशान् कृत्वा सतिलन्तु पृथक् पृथक् ॥ २॥
एवं कृतोदकान् सम्यक् सर्वान् शाद्वलसंस्थितान्।
आप्लुत्य पुनराचान्तान् वदेयुस्तेऽनुयायिनः ॥ ३ ॥
मा शोकं कुरुतानित्ये सर्वस्मिन् प्राणधर्म्मिणि।
धर्म्मं कुरुत यत्नेन यो वः सह गमिष्यति ॥ ४ ॥
मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणाम्।
यः करोति स संमूढो जलवुद्वुदसन्निभे ॥ ५ ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥ ६ ॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः।
कर्म्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥ ७ ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥८॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रियाः कार्य्याः प्रयत्नतः ॥९॥

एवमुक्त्वा व्रजेयुस्ते गृहाल्लघुपुरःसराः ।
स्नानाग्निस्पर्शनाज्याग्रैः शुध्येयुरितरे कृतैः ॥ १० ॥ २२खण्डः ॥

एवमेवाहिताग्नेस्तु पात्रन्यासादिकं भवेत् ।
कृष्णाजिनादिकश्चात्र विशेषः सूत्रचोदितः ॥ १ ॥
विदेशमरणेऽस्थीनि ह्याहृत्याभ्यज्य सर्पिषा ।
दाहयेदूर्णयाच्छाद्य पात्रन्यासादि पूर्ब्ववत् ॥ २ ॥
अस्थ्नामलाभे पर्णानि सकलान्युक्तयावृता ।
भर्ज्जयेदस्थिसंख्यानि ततः प्रभृति सूतकम् ॥ ३ ॥
महापातकसंयुक्तो दैवात् स्यादग्निमान् यदि ।
पुत्रादिः पालयेदग्निं युक्त आदोषसंक्षयात् ॥ ४ ॥
प्रायश्चित्तं न कुर्य्याद्यः कुर्वन् वा म्रियते यदि ।
गृह्यं निर्व्वापयेच्छ्रौतमप्स्वस्येत् सपरिच्छदम् ॥ ५ ॥
सादयेदुभयं वाप्सु ह्यग्नोऽग्निरभवद्यतः ।
पात्राणि दद्याद्विप्राय दहेदप्स्वेव वा क्षिपेत् ॥ ६ ॥
अनयैवावृता नारी दग्धव्या या व्यवस्थिता ।
अग्निप्रदानमन्त्रोऽस्या न प्रयोज्य इति स्थितिः ॥ ७ ॥
अग्निनैव दहेद्भार्य्यां स्वतन्त्रा पतिता न चेत् ।
तदुत्तरेण पात्राणि दाहयेत् पृथगन्तिके ॥ ८ ॥
अपरेद्युस्तृतीये वा अस्थ्नां सञ्चयनं भवेत् ।
यस्तत्र विधिरादिष्ट ऋषिभिः सोऽधुनोच्यते ॥ ९ ॥
स्नानान्तं पूर्ब्ववत् कृत्वा गव्येन पयसा ततः ।
सिञ्चेदस्थीनि सर्व्वाणि प्राचीनावीत्यभाषयन् ॥ १० ॥
शमीपलाशशाखाभ्यामुद्धृत्योद्धृत्य भस्मनः ।
आज्येनाभ्यज्य गव्येन सेचयेद्गन्धवारिणा ॥ ११ ॥

मृतपात्रसंपुटं कृत्वा सूत्रेण परिवेष्ट्य च ।
खभ्रं खात्वा शुचौ भूमौ निखनेद्दक्षिणामुखः ॥१२॥
पूरयित्वावटं पङ्कपिण्डशैवालसंयुतम् ।
दत्त्वोपरि समं शेषं कुर्य्यात् पूर्वाह्णकर्म्मणा ॥ १३ ॥
एवमेवाग्टहीताग्नेः प्रेतस्य विधिरिष्यते ।
स्त्रीणामिवाग्निदानं स्यादथातोऽनुक्तमुच्यते ॥१४॥ २३खण्डः
सूतके कर्म्मणां त्यागः सन्ध्यादीनां विधीयते ।
होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनापि वा फलैः ॥ १ ॥
अकृतं हावयेत् स्मार्त्ते तदभावे कृताकृतम् ।
कृतं वा हावयेदन्नमन्वारम्भविधानतः ॥ २ ॥
कृतमोदनशक्त्वादि तण्डुलादि कृताकृतम् ।
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ॥३॥
सूतके च प्रवासेषु चाशक्तौ श्राद्धभोजने ।
एवमादिनिमित्तेषु हावयेदिति योजयेत् ॥ ४ ॥
न त्यजेत् सूतके कर्म्म ब्रह्मचारी स्वकं क्वचित् ।
न दीक्षणात् परं यज्ञे न कृच्छ्रादि तपश्चरन् ॥५ ॥
पितर्य्यपि मृते नैषां दोषो भवति कर्हिचित् ।
आशौचं कर्म्मणोऽन्ते स्यात्त्र्यहं वा ब्रह्मचारिणः ॥६॥
श्राद्धमग्निमतः कार्य्यं दाहादेकादशेऽहनि ।
प्रत्याब्दिकन्तु कुर्व्वीत प्रमीताहनि सर्वदा ॥ ७ ॥
द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा ।
सपिण्डीकरणञ्चैव एतद्वै श्राद्धषोड़शम् ॥ ८ ॥
एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः ।
न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तदा ॥९॥

यानि पञ्चदशाद्यानि अपुत्रस्येतराणि तु ।
एकस्मिन्नह्नि देयानि सपुत्रस्यैव सर्वदा ॥ १० ॥
न योषायाः पतिर्दद्यादपुत्राया अपि क्वचित् ।
न पुत्रस्य पिता दद्यान्नानुजस्य तथाग्रजः ॥ ११ ॥
एकादशेऽह्नि निर्वर्त्य अर्वाग्दर्शाद्यथाविधि ।
प्रकुर्वीताग्निमान् पुत्रो मातापित्रोः सपिण्डताम् ॥ १२ ॥
सपिण्डीकरणादूर्ध्वं न दद्यात् प्रतिमासिकम् ।
एकोद्दिष्टेन विधिना दद्यादित्याह गौतमः ॥ १३ ॥
कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकञ्च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥ १४ ॥
अर्घेऽक्षय्योदके चैव पिण्डदानेऽवनेजने ।
तन्त्रस्य तु निवृत्तिः स्यात् स्वधावाचन एव च ॥ १५ ॥
ब्रह्मदण्डादियुक्तानां येषां नास्त्यग्निसत्क्रिया ।
श्राद्धादिसत्क्रियाभाजो न भवन्तीह ते क्वचित् ॥ १६ ॥ २४ खण्डः ॥

सन्ध्याम्नायेऽग्नौ हुत्वैतत् पञ्चकं लाघवार्थिभिः ।
पठन्ति तत्र शाखिनो ह्यान्मन्त्राणामेव विंशतिः ॥ १ ॥
अग्नेः स्थाने वायुचन्द्रसूर्याग्निवसुवद्रुह्य च ।
समस्य पञ्चमोऽप्येवं चतुश्चतुरितिश्रुतेः ॥ २ ॥
प्रथमे पञ्चके पापी लक्ष्मीरिति पदं भवेत् ।
अपि पञ्चसु मन्त्रेषु इति यज्ञविदो विदुः ॥ ३ ॥
द्वितीये तु पतिघ्नी स्यादपुत्रेति ततोऽर्के ।
चतुर्थे त्वपसव्येति हुत्वाहुतिविंशकम् ॥ ४ ॥
हुतिहोमे न पञ्चसु ...नामसु तथाष्टसु ।
चतुर्थ्यामत्र हुत्वैतन्नोपनमसु इह हूयते ॥ ५ ॥

स्तनाग्रपल्लवो गूढः शुङ्गेति परिकीर्त्यते ।
पतिव्रता व्रतवती ब्रह्मबन्धुस्तथाऽस्मृतः ॥ ६ ॥
शलाटु नीलमित्युक्तं यथुः स्तबक उच्यते ।
कपुष्णिकाभितः केशा मूर्द्धि्न पश्चात् कपुच्छलम् ॥७॥
श्वाविच्छलाका शललो तथा वीरतरः शरः ।
तिलतण्डुलसम्पक्कः कृषरः सोऽभिधीयते ॥ ८ ॥
नामधेये मुनिवसुपिशाचावहुवत् सदा ।
यच्चास्य पितरो देवा यष्टव्यास्तिथिदेवताः ॥९॥
आग्नेयाद्येऽथ सर्पाद्ये विशाखाद्ये तथैव च ।
आषाढ़ाद्ये धनिष्ठाद्ये अश्विन्याद्ये तथैव च ॥१०॥
द्वन्द्वान्येतानि बहुवन्नक्षत्राणां जुहुयात् सदा ।
द्वन्द्वद्वयं द्विवच्छेषमवशिष्टान्यथैकवत् ॥ ११ ॥
देवतास्वपि हूयन्ते बहुवत् सार्वपित्तयः ।
देवाश्च वसवश्चैव द्विवद्देवाश्विनौ सदा ॥ १२ ॥
ब्रह्मचारी समादिष्टो गुरुणा व्रतकर्म्मणि ।
वाढमोमिति वा ब्रूयात्तथैवानुपालयेत् ॥ १३ ॥
सशिखं वपनं कार्य्यमास्नानाद्ब्रह्मचारिणा ।
आशरीरविमोचाय ब्रह्मचर्य्यं न चेद्भवेत् ॥ १४ ॥
न गात्रोत्सादनं कुर्य्यादनापदि कदाचन ।
जलक्रीड़ामलङ्कारान् व्रती दण्ड इवाप्लवेत् ॥१५॥
देवतानां विपर्य्यासे जुहोतिषु कथं भवेत् ।
सर्व्वं प्रायश्चित्तं हुत्वा क्रमेण जुहुयात् पुनः ॥१६॥
संस्कारा अतिपत्येरन् स्वकालाच्चेत् कथञ्चन ।
हुत्वैतदेव कर्त्तव्या ये तूपनयनादधः ॥ १७ ॥

अनिष्ट्वा नवयज्ञेन नवान्नं योऽत्यकामतः।
वैश्वानरश्चरुस्तस्य प्रायश्चित्तं विधीयते ॥ १८ ॥ २५ खण्डः ॥

चरुः समश्ननीयो यस्तथा गोयज्ञकर्म्मणि।
वृषभोत्सर्ज्जने चैव अश्वयज्ञे तथैव च ॥ १ ॥
श्रावण्यां वा प्रदोषे यः क्षयारम्भे तथैव च।
कथमेतेषु निर्व्वापाः कथञ्चैव जुहोतयः ॥ २ ॥
देवता सङ्ख्या ग्राह्या निर्वापास्तु पृथक् पृथक्।
तूष्णीं द्विरेव गृह्णीयाद्धोमश्चापि पृथक पृथक् ॥ ३॥
यावता होमनिर्वृत्तिर्भवेद्वा यत्र कीर्त्तिता।
शेषं चैत भवेत् किञ्चित्तावन्तं निर्वपेच्चरुम् ॥ ४ ॥
चरौ समश्ननीये तु पितृयज्ञे चरौ तथा।
होतव्यं मेचणेनान्य उपस्तीर्णाभिघारितम् ॥ ५ ॥
कालः कात्यायनेनोक्तो विधिश्चैव समासतः।
वृषोत्सर्गे यतो नोऽत्र गोभिलेन तु भाषितः ॥६॥
पारिभाषिक एव स्यात् कालो गोवाजियज्ञयोः।
अन्यस्मादुपदेशात्तु स्वस्तरारोहणस्य च ॥ ७ ॥
अथवा मार्गपाल्येऽह्नि कालो गोयज्ञकर्म्मणः।
नीराजनेऽह्नि वाश्वानामिति तन्त्रान्तरे विधिः ॥ ८॥
शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते।
धान्यपाकवशादन्ये श्यामकोवनिनः स्मृतः ॥ ९ ॥
अश्वयुज्यां तथा कृष्यां वास्तुकर्म्मणि याज्ञिकाः।
यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते ॥ १० ॥
द्वे पञ्च द्वे क्रमेणैता हविराहुतयः स्मृताः।
शेषा आज्येन होतव्या इति कात्यायनोऽब्रवीत् ॥११॥

पयोयदाज्यसंयुक्तं तत् पृषातकमुच्यते ।
दध्येके तदुपासाद्य कर्त्तव्यः पायसश्चरुः ॥ १२ ॥
व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदं घ्नन्ति धारिताः ॥ १३ ॥
संस्काराः पुरुषस्यैते स्मर्य्यन्ते गौतमादिभिः ।
अतोऽष्टकादयः कार्य्याः सर्वे कालक्रमोदिताः ॥१४॥
सकृदप्यष्टकादीनि कुर्य्यात् कर्म्माणि यो द्विजः ।
स पंक्तिपावनो भूत्वा लोकान् प्रैति घृतश्च्युतः॥१५॥
एकाहमपि कर्म्मस्थोयोऽग्निशुश्रूषकः शुचिः ।
नयत्यत्र तदेवास्य शताहं दिवि जायते ॥ १६ ॥
यस्त्वाधायाग्निमाशास्य देवादीनैभिरिष्टवान् ।
निराकर्त्तामरादीनां स विज्ञेयो निराकृतिः ॥१७॥२६खण्डः॥

यच्छ्राद्धं कर्म्मणामादौ या चान्ते दक्षिणा भवेत् ।
अमावास्यां द्वितीयं यदन्वाहार्य्यं तदुच्यते ॥ १ ॥
एकसाध्येष्ववर्हिःषु न स्यात् परिसमूहनम् ।
नोदगासादनञ्चैव क्षिप्रहोमा हि ते मताः ॥ २ ॥
अभावे व्रीहियवयोर्दध्ना वा पयसापि वा ।
तदभावे यवाग्वा वा जुहुयादुदकेन वा ॥ ३ ॥
रौद्रन्तु राक्षसं पित्र्यमासुरं चाभिचारिकम् ।
उक्त्वा मन्त्रं स्पृशेदाप आलभ्यात्मानमेव च ॥ ४ ॥
यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते ।
तत्र व्याहृतिभिर्हुत्वा दण्डं दद्यात्द्विजातये ॥५॥
लवणं मधु मांसञ्च क्षारांशो येन हूयते ।
उपवासेन भुञ्जीत नोक्तरात्रौ न किञ्चन ॥ ६ ॥

स्वकाले सायमाहुत्या अप्राप्तौ होतृहव्ययोः।
प्राक्प्रातराहुतेः कालः प्रायश्चित्ते हुते सति॥ ७॥
प्राक् सायमाहुतेः प्रातर्होमकालानतिक्रमः।
प्राक्पौर्णमासाद्दर्शस्य प्राग्दर्शादितरस्य तु॥ ८॥
वैश्वदेवे त्वतिक्रान्ते अहोरात्रमभोजनम्।
प्रायश्चित्तमथो हुत्वा पुनः सन्तनुयाद्व्रतम्॥ ९॥
होमद्वयात्यये दर्शपौर्णमासात्यये तथा।
पुनरेवाग्निमादध्यादिति भार्गवशासनम्॥ १०॥
अनृचो माणवो ज्ञेय एणः कृष्णमृगः स्मृतः।
रुरुर्गौरमृगः प्रोक्तस्तस्यत्वं शोण उच्यते॥ ११॥
केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः।
ललाटसंसितो राज्ञः स्यात्तु नासान्तिको विशः॥ १२
ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः॥ १३॥
गौर्विशिष्टतया विप्रैर्वेदेष्वपि निगद्यते।
न ततोऽन्यद्वरं यस्मात्तस्माद्गौर्वर उच्यते॥ १४॥
येषां व्रतानामन्तेषु दक्षिणा न विधीयते।
वरस्तत्र भवेद्दानमपि वाच्छादयेद्गुरुम्॥ १५॥
अस्थानोच्छ्वासविच्छेदघोषणाध्यापनादिकम्।
प्रमादिकं श्रुतौ यत् स्यादयातयामत्वकारि तत्॥ १६॥
प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः।
क्रियते छन्दसां तेन पुनराप्यायनं भवेत्॥ १७॥
अयातयामैश्छन्दोभिर्यत् कर्म क्रियते द्विजैः।
क्रीड़मानैरपि सदा तत्तेषां सिद्धिकारकम्॥ १८॥

गायत्रीञ्च सगायत्रां वार्हस्पत्यमिति त्रिकम् ।
शिष्येभ्योऽनूच्य विधिवदुपाकुर्य्यात्ततः श्रुतिम् ॥२९॥
छन्दसामेकविंशानां संहितायां यथाक्रमम् ।
तच्छन्दस्काभिरेवग्भिराद्याभिर्होमइष्यते ॥ २० ॥
पर्वभिश्चैव गानेषु ब्राह्मणेषूत्तरादिभिः ।
अङ्गेषु चर्चामन्त्रेषु इति षष्टिर्जुहोतयः ॥ २१ ॥२७ खण्डः॥
अक्षतास्तु यवाः प्रोक्ता भृष्टाधाना भवन्ति ते ।
भृष्टास्तु व्रीहयो लाजा घटाः स्थाण्डिक उच्यते ॥ १ ॥
नाधीयीत रहस्यानि सोत्तराणि विचक्षणः ।
नचोपनिषदश्चैव षण्मासान् दक्षिणायनान् ॥ २ ॥
उपाकृत्योदगयने ततोऽधीयीत धर्मवित् ।
उत्सर्गश्चैक एवैषां तैष्यां प्रौष्ठपदेऽपिवा ॥ ३ ॥
अजातव्यञ्जना लोम्नी न तया सह संविशेत् ।
अयुगूः काकबन्ध्याद्या जाता तां न विवाहयेत् ॥ ४ ॥
संसक्तपदविन्यासस्त्रिपदः प्रक्रमः स्मृतः ।
स्मार्त्ते कर्म्मणि सर्वत्र श्रौते त्वध्वर्य्युचोदितः ॥ ५ ॥
यस्यां दिशि वलिं दद्यात्तामेवाभिमुखो बलिम् ।
अदणाकर्मणि भवेद्यञ्च कर्म न सर्वदा ॥ ६ ॥
वलिशेषस्य हवनमग्निप्रणयनन्तथा ।
प्रत्यक्षं न भवेयातामुल्मुकन्तु भवेत् सदा ॥ ७ ॥
पृषातकप्रपण निर्वपस्य हविषस्तथा ।
शिष्टस्य प्राशने मन्त्रस्तत्र सर्वेऽधिकारिणः ॥ ८ ॥
ब्राह्मणानामसान्निध्ये स्वयमेव पृषातकम् ।
अवेक्षेद्धविषः शेषं नवयज्ञेऽपि भक्षयेत् ॥ ९ ॥

छुरीमांसावदानार्थः कृत्स्ना स्विष्टकृदावृता ।
वपामादाय जुहुयात्तत्र मन्त्रं समापयेत् ॥ ३ ॥
हृज्जिह्वा क्रोड़मस्थीनि यकृद्वृक्कौ गुदं स्तनाः ।
श्रोणिस्कन्धसटापार्श्वं पश्वङ्गानि प्रचक्षते ॥ ४ ॥
एकादशानामङ्गानामवदानानि सङ्ख्यया ।
पार्श्वस्य वृक्कसक्थ्नोश्च द्वित्वादाहुश्चतुर्दश ॥ ५ ॥
चरितार्था श्रुतिः कार्य्या यस्मादप्यनुकल्पशः ।
अतोऽष्टर्चेन होमः स्याच्छागपक्षे चरावपि ॥ ६ ॥
अवदानानि यावन्ति क्रियेरन् प्रस्तरे पशोः ।
तावतः पायसान् पिण्डान् पशुभावेऽपि कारयेत् ॥ ७ ॥
ऊहनव्यञ्जनार्थन्तु पशुभावेऽपि पायसम् ।
सद्रवं श्रपयेत्तद्वदन्वष्टक्येऽपि कर्म्मणि ॥ ८ ॥
प्राधान्यं पिण्डदानस्य केचिदाहुर्मनीषिणः ।
गयादौ पिण्डमात्रस्य दीयमानत्वदर्शनात् ॥ ९ ॥
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः ।
ब्राह्मणस्य परीक्षायां महायत्नप्रदर्शनात् ॥ १० ॥
आमश्राद्धविधानस्य विना पिण्डैः क्रियाविधिः ।
तदालभ्याप्यनध्यायविधानश्रवणादपि ॥ ११ ॥
विद्वन्मतमुपादाय ममाप्येतद्धृदि स्थितम् ।
प्राधान्यमुभयोर्यस्मात्तस्मादेष समुच्चयः ॥ १२ ॥
प्राचीनावीतिना कार्य्यं पित्र्येषु प्रोक्षणं पशोः ।
दक्षिणोद्वासनान्तञ्च चरोर्निर्वपणादिकम् ॥ १३ ॥
सव्ययज्ञदानानां प्रधानार्थो न हीतरः ।
प्रधानं हवनञ्चैव शेषं प्रकृतिवद्भवेत् ॥ १४ ॥

द्वीपमुन्नतमाख्यातं माद्रा चैवेष्टका स्मृता ।
कीलिनं सजलं प्रोक्तं दूरखातोदको मरुः ॥ १५ ॥
द्वारगवाक्षस्तम्भैः कर्द्दमभित्त्यन्तकोणवेधैश्च ।
नेष्टं वास्तुद्वारं विद्धमनाक्रान्तमार्य्यैश्च ॥ १६ ॥
वशङ्गमाविति व्रीहीच्छंखश्चेति यवांस्तथा ।
असावित्यत्र नामोक्त्वा जुहुयात् क्षिप्रहोमवत् ॥१७॥
साक्षतं सुमनोयुक्तमुदकं दधिसंयुतम् ।
अर्घ्यं दधिमधुभ्याञ्च मधुपर्को विधीयते ॥ १८ ॥
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ ।
कांस्यापिधानं कांस्यस्थं मधुपर्कं समर्पयेत् ॥१९॥ २९ खण्डः ॥
इति कात्यायनविरचिते कर्म्मप्रदीपे तृतीयः प्रपाठकः ॥
समाप्ता चेयं कात्यायनसंहिता ॥

अथ बृहस्पतिस्मृतिः ॥

इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणम् ।
मघवान् ! वाग्विदां श्रेष्ठं पर्यपृच्छद्बृहस्पतिम् ॥
भगवन् केन दानेन सर्वतः सुखमेधते ।
यदक्षयं महार्घं च तन्मे ब्रूहि महातप ! ॥
एवमिन्द्रेण पृष्टोऽसौ देवदेवपुरोहितः ।
वाचस्पतिर्महाप्राज्ञो बृहस्पतिरुवाच ह ॥
सुवर्णदानं गोदानं भूमिदानं च वासव ! ।
एतत् प्रयच्छमानस्तु सर्वपापैः प्रमुच्यते ॥
सुवर्णं रजतं वस्त्रं मणिरत्नं च वासव ! ।
सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति ॥

फालाकृष्टां महीं दत्त्वा सबीजां शस्यशालिनीम् ।
यावत् सूर्य्यकरा लोकास्तावत् स्वर्गे महीयते ॥
यत्किञ्चित् कुरुते पापं पुरुषो वृत्तिकर्षितः ।
अपि गोचर्म्ममात्रेण भूमिदानेन शुध्यति ॥
दशहस्तेन दण्डेन त्रिंशद्दण्डानि वर्त्तनम् ।
दश तान्येव विस्तारो गोचर्मं तन्महाफलम् ॥
सवृषं गोसहस्रं च यत्र तिष्ठत्यतन्द्रितम् ।
बालवत्सप्रसूतानां तद्गोचर्म्म इति स्मृतम् ॥
विप्राय दद्याच्च गुणान्विताय तपोवियुक्ताय जितेन्द्रियाय ।
यावन्मही तिष्ठति सागरान्ता तावत् फलं तस्य भवेदनन्तम् ॥
यथा बीजानि रोहन्ति प्रकीर्णानि महीतले ।
एवं कामाः प्ररोहन्ति भूमिदानसमार्जिताः ॥
यथाप्सु पतितः सद्य स्तैलबिन्दुः प्रसर्पति ।
एवं भूमिकृतं दानं सस्ये सस्ये प्ररोहति ॥
अन्नदाः सुखिनो नित्यं वस्त्रदश्चैव रूपवान् ॥
स नरः सर्वदो भूपयो ददाति वसुन्धराम् ।
यथा गौर्भरते वत्सं क्षारमुत्सृज्य क्षीरिणी ॥
एवं दत्ता सहस्राक्ष ! भूमिर्भरति भूमिदम् ।
शङ्खं भद्रासनं छत्रं चरस्थावरवारणाः ॥
भूमिदानस्य पुण्यानि फलं स्वर्गः पुरन्दर ! ।
आदित्यो वरुणो वह्निर्ब्रह्मा सोमो हुताशनः ॥
शूलपाणिश्च भगवानभिनन्दति भूमिदम् ।
आस्फोटयन्ति पितरः प्रहर्षन्ति पितामहाः ॥
भूमिदाता कुले जातः स नस्त्राता भविष्यति ।

तीर्थान्याहुरतिदानानि गावः पृथ्वी सरस्वती ॥
तारयन्ति हि दातारं सर्वात्पापादसंशयम् ।
प्रावृता वस्त्रदा यान्ति नग्ना यान्ति त्ववस्त्रदाः ॥
तृप्ता यान्त्यन्नदातारः क्षुधिता यान्त्यनन्नदाः ।
कांक्षन्ति पितरः सर्वे नरकाद्भयभीरवः ॥
गयां यो यास्यति पुत्रः स नः त्राता भविष्यति ।
एष्टव्या बहवः पुत्राः यद्येकोऽपि गयां व्रजेत् ॥
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ।
लोहितो यस्तु वर्णेन पुच्छाग्रे यस्तु पाण्डुरः ॥
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ।
नीलः पाण्डुरलाङ्गूलस्तृणमुद्धरते तु यः ॥
षष्टिर्वर्षसहस्राणि पितरस्तेन तर्पिताः ।
यत्र शृङ्गगतम्पङ्कं कूलस्तिष्ठति चोद्धृतम् ॥
पितरस्तस्य गच्छन्ति सोमलोकं महाद्युतिम् ।
पृथोर्यदोर्दिलीपस्य नृगस्य नहुषस्य च ॥
अन्येषाञ्च नरेन्द्राणां पुनरन्या भविष्यति ।
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ॥
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ।
यस्तु ब्रह्मघ्नः स्त्रीघ्नो वा यस्तु वै पितृघातकः ॥
गवां शतसहस्राणां हन्ता भवति दुष्कृती ।
स्वदत्तां परदत्तां वा यो हरेच्च वसुन्धराम् ॥
श्वविष्ठायां क्रिमिर्भूत्वा पितृभिः सह पच्यते ।
आक्षेप्ता वानुमन्ता च तमेव नरकं व्रजेत् ॥
भूमिदो भूमिहर्त्ता च नापरं पुण्यपापयोः ।

ऊर्द्ध्वींवावतिष्ठेत यावदा भूतसंप्लवम् ॥
अग्नेरपत्यं प्रथमं हिरण्यं भूर्वैष्णवी सूर्य्यसुताश्चगावः ॥
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनङ्गाञ्च महीञ्च दद्यात्।
षडशीति सहस्राणां यो जनानां वसुन्धराम्।
स्वतो दत्ता तु सर्वत्र सर्वकामप्रदायिनी ॥
भूमिं यः प्रतिगृह्णाति भूमिं यस्य प्रयच्छति।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
सर्वेषामेव दानानां एकजन्मानुगं फलम्।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥
योगहिंस्यादहं ह्यात्मा भूतग्रामं चतुर्विधम्।
तस्य देहाद्वियुक्तस्य भयं नास्ति कदाचन ॥
अन्यायेन हृता भूमिर्यैर्नरैरपराहिता।
हरतो हारयन्तश्च हन्युस्ते सप्तमं कुलम् ॥
हरते हरयेद्यस्तु मन्दबुद्धिस्ततो हतः।
स वध्यो वारुणैः पाशैस्तिर्य्यग्योनिषु जायते ॥
अश्रुभिः पतितैस्तेषां दानानामपकीर्त्तनम्।
ब्राह्मणस्य हृते क्षेत्रे हृतन्त्रिपुरुषं कुलम् ॥
वापीकूपसहस्रेण अश्वमेधशतेन च।
गवां कोटिप्रदानेन भूमिहर्त्ता न शुध्यति ॥
गामेकां स्वर्णमेकं वा भूमेरप्यर्द्धमङ्गुलम्।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम्।
हुतं दत्तं तपोधीतं यत्किञ्चिद्धर्मसञ्चितम् ॥
अर्द्धाङ्गुलस्य सीमाया हरणेन प्रणश्यति।
गोवीथीं ग्रामरथ्याञ्च श्मशानं गोपितं तथा ॥

सम्पीड्य नरकं याति यावदाभूतसंप्लवम्।
ऊषरे निर्जले स्थाने प्रस्तं शस्यं विसर्जयेत्॥
जलाधारश्च कर्त्तव्यो व्यासस्य वचनं यथा।
पञ्चकन्यानृते हन्ति दश हन्ति गवानृते॥
शतमश्वानृते हन्ति सहस्रं पुरुषानृते।
हन्ति जाता न जातांश्च हिरण्यार्थे नृतं वदेत्॥
सर्वं भूम्यानृते हन्ति मास्म भूम्यनृतं वदी।
ब्रह्मस्वे मा रतिं कुर्य्याः प्राणैः कण्ठगतैरपि॥
अनौषधमभैषज्यं विषमे तद्धलाहलम्।
न विषं विषमित्याहुः ब्रह्मस्वं विषमुच्यते॥
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्।
लोहखण्डाश्मचूर्णं च विषञ्च ज्वरयेन्नरम्॥
ब्रह्मस्वं त्रिषु लोकेषु कः पुमान् ज्वरयिष्यति।
मन्युप्रहरणा विप्रा राजानः शस्त्रपाणयः॥
शस्त्रमेकाकिनं हन्ति विप्रमन्युः कुलक्षयम्।
मन्युप्रहरणा विप्रा चक्रप्रहरणो हरिः॥
चक्रात्तीव्रतरो मन्युस्तस्माद्विप्रं न कोपयेत्।
अग्निदग्धाः प्ररोहन्ति सूर्यप्रदग्धास्तथैव च॥
मन्युदग्धस्य विप्राणामङ्कुरो न प्ररोहति।
अग्निर्दहति तेजसा सूर्यो दहति रश्मिभिः॥
राजा दहति दण्डेन विप्रो दहति मन्युना।
ब्रह्मस्वेन तु यत् सौख्यन्देवस्वेन तु या रतिः॥
तद्धनं कुलनाशाय भवत्यात्मविनाशकम्।
ब्रह्मस्वं ब्रह्महत्या च दरिद्रस्य च यद्धनम्॥

गुरुमित्रहिरण्ये च स्वर्गस्थमपि पीडयेत्।
अन्नखेन तु यच्छिद्रं तच्छिद्रं न प्ररोहति॥
प्रच्छादयति तच्छिद्रमन्यत्र तु विसर्पति।
अन्नखेन तु पुष्टानि साधनानि बलानि च॥
संग्रामे तानि लीयन्ते सिकतासु यथोदकम्।
श्रोत्रियाय कुलीनाय दरिद्राय च वासव!॥
सन्तुष्टाय विनीताय सर्वभूतहिताय च।
वेदाभ्यासस्तपोज्ञानमिन्द्रियाणां च संयमः॥
ईदृशाय सुरश्रेष्ठ! यद्दत्तं हि तदक्षयम्।
आमपात्रे यथान्यस्तं क्षीरं दधि घृतं मधु॥
विनश्येत्पात्रदौर्बल्यात्तच्च पात्रं विनश्यति।
एवं गाञ्च हिरण्यञ्च वस्त्रमन्नं महीं तिलान्॥
अविद्वान् प्रतिगृह्णाति भस्मीभवति काष्ठवत्।
यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः॥
बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः।
कुलं तारयते धीरः सप्त सप्त च वासव!॥
यस्तटाकं नवं कुर्य्यात् पुराणं वापि खानयेत्।
स सर्वं कुलमुद्धृत्य स्वर्गे लोके महीयते॥
वापीकूपतड़ागानि उद्यानोपवनानि च।
पुनः संस्कारकर्त्ता च लभते मौलिकं फलम्॥
निदाघकाले पानीयं यस्य तिष्ठति वासव!।
स दुर्गं विषमं कृत्स्नं न कदाचिदवाप्नुयात्॥
एकाहं तु स्थितं तोयं पृथिव्यां राजसत्तम!।

कुलानि तारयेत्तस्य सप्त सप्त पराण्यपि ॥
दीपालोकप्रदानेन वपुष्मान् स भवेन्नरः ।
प्रोक्षणीयप्रदानेन स्मृतिं मेधाञ्च विन्दति ॥
कृत्वापि पापकर्म्माणि यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण न स पापेन लिप्यते ॥
भूमिर्गावस्तथा दाराः प्रसह्य ह्रियते यदा ।
नचावेदयते यस्तु तमाहुर्ब्रह्मघातकम् ॥
निवेदितस्तु राजा वै ब्राह्मणैर्मन्युपीड़ितैः ।
तं न तारयते यस्तु तमाहुर्ब्रह्मघातकम् ॥
उपस्थिते विवाहे च यज्ञे दाने च वासव ! ।
मोहाच्चरति विघ्नं यः स मृतो जायते क्रिमिः ॥
धनं फलति दानेन जीवितं जीवरक्षणात् ।
रूपमैश्वर्य्यमारोग्यमहिंसाफलमश्नुते ॥
फलमूलाशनात् पूज्यं स्वर्गः सत्येन लभ्यते ।
प्रायोपवेशनाद्राज्यं सर्वत्र सुखमश्नुते ॥
गवाढ्यः शक्रदीक्षायाः स्वर्गगामी तृणाशनः ।
स्त्रियस्त्रिषवणस्नायी वायुं पीत्वा क्रतुं लभेत् ॥
नित्यस्नायी भवेद्दर्क्षः सन्ध्ये द्वे च जपन् द्विजः ।
न तत्साधयते राज्यं नाकपृष्ठमनाशके ॥
अग्निप्रवेशे नियतं ब्रह्मलोके महीयते ।
रत्नानां प्रतिसंहारे पशून् पुत्रांश्च विन्दति ॥
नाके चिरं स वसते उपवासी च यो भवेत् ।
सततं चैकशायी यः स लभेदीप्सितां गतिम् ॥

वीरासनं वीरशय्यां वीरस्थानमुपाश्रितः ।
अक्षय्यास्तस्य लोकाः स्युः सर्वकामगमास्तथा ॥
उपवासश्च दीक्षाश्च अभिषेकश्च वासव ! ।
कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते ॥
अधीत्य सर्ववेदान् वै सद्यो दुःखात् प्रमुच्यते ।
पावनं चरते धर्मं स्वर्गे लोके महीयते ॥
बृहस्पतिमतं पुण्यं ये पठन्ति द्विजातयः ।
चत्वारि तेषां वर्धन्ते आयुर्विद्या यशो बलम् ॥

॥ इति बृहस्पतिप्रणीतं धर्मशास्त्रं सम्पूर्णम् ॥

पराशरसंहितायाम् ।

प्रथमोऽध्यायः ।

अथातो हिमशैलाग्रे देवदारुवनालये ।
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥
मानुषाणां हितं धर्म्मं वर्त्तमाने कलौ युगे ।
शौचाचारं यथावच्च वद सत्यवतीसुत ! ॥
तच्छ्रुत्वा ऋषिवाक्यन्तु सशिष्याग्न्यर्कसन्निभः ।
प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ॥
नचाहं सर्व्वतत्त्वज्ञः कथं धर्म्मं वदाम्यहं ।
अस्मत् पितैव प्रष्टव्य इति व्यासः सुतोऽवदत् ॥
ततस्ते ऋषयः सर्व्वे धर्म्मतत्त्वार्थकाङ्क्षिणः ।
ऋषिं व्यासं पुरस्कृत्य गता वदरिकाश्रमे ॥
नानावृक्षसमाकीर्णं फलपुष्पोपशोभितम् ।
नदीप्रस्रवणाकीर्णं पुण्यतीर्थैरलङ्कृतम् ॥
मृगपक्षिगणाख्यञ्च देवतायतनावृतम् ।
यक्षगन्धर्व्वसिद्धैश्च नृत्यगीतसमाकुलम् ॥
तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरम् ।
सुखासीनं महात्मानं मुनिमुख्यगणावृतम् ॥

कृताञ्जलिपुटो भूत्वा व्यासस्तु ऋषिभिः सह ।
प्रदक्षिणाभिवादैश्च स्तुतिभिः समपूजयत् ॥
अथ सन्तुष्टमनसाः पराशरमहामुनिः ।
आह सुस्वागतं ब्रूहीत्यासीनो मुनिपुङ्गवः ॥
व्यासः सुस्वागतं ये च ऋषयश्च समन्ततः ।
कुशलं कुशलेत्युक्त्वा व्यासः पृच्छत्यतः परम् ॥
यदि जानासि मे भक्तिं स्नेहाद्वा भक्तवत्सल ! ।
धर्मं कथय मे तात ! अनुग्राह्योऽस्म्यहं तव ॥
श्रुता मे मानवा धर्म्मा वाशिष्ठाः काश्यपास्तथा ।
गार्गेया गौतमाश्चैव तथा चौशनसाः स्मृताः ॥
अत्रेर्विष्णोश्च साम्बर्त्ता दाक्षा आङ्गिरसास्तथा ।
शातातपाश्च हारीता याज्ञवल्क्यकृता श्च ये ॥
कात्यायनकृता श्चैव प्राचेतसकृताश्च ये ।
आपस्तम्बकृता धर्म्माः शङ्खस्य लिखितस्य च ॥
श्रुता ह्येते भवत्प्रोक्ताः श्रौतार्थास्तेन विस्मृताः ।
अस्मिन्मन्वन्तरे धर्म्माः कृतत्रेतादिके युगे ॥
सर्व्वे धर्म्माः कृते जाताः सर्वे नष्टाः कलौ युगे ।
चातुर्वर्ण्यसमाचारं किञ्चित् साधारणं वद ॥
व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः ।
धर्मस्य निर्णयं प्राह सूक्ष्मं स्थूलञ्च विस्तरात् ॥
शृणु पुत्र ! प्रवक्ष्येऽहं शृण्वन्तु ऋषयस्तथा ॥
कल्पे कल्पे क्षयोत्पत्तौ ब्रह्मविष्णुमहेश्वराः ।
श्रुतिः स्मृतिः सदाचारो निर्णेतव्याश्च सर्वदा ॥
न कश्चिद्वेदकर्त्ता च वेदस्मर्त्ता चतुर्मुखः ।

तथैव धर्मं स्मरति मनुः कल्पान्तरान्तरे ॥
अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे परे ।
अन्ये कलियुगे नृणां युगरूपानुसारतः ॥
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमित्याहुर्द्दानमेकं कलौ युगे ॥
कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शाङ्खलिखितः कलौ पाराशरः स्मृतः ॥
त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकन्तु कर्त्तारञ्च कलौ युगे ।
कृते सम्भाषणात् पापं त्रेतायाञ्चैव दर्शनात् ।
द्वापरे चान्नमादाय कलौ पतति कर्मणा ॥
कृते तु तत्क्षणाच्छापस्त्रेतायां दशभिर्द्दिनैः ।
द्वापरे मासमात्रेण कलौ सम्वत्सरेण तु ॥
अभिगम्य कृते दानं त्रेतास्वाहूय दीयते ।
द्वापरे याचमानाय सेवया दीयते कलौ ॥
अभिगम्योत्तमं दानमाहूतञ्चैव मध्यमम् ।
अधमं याच्यमानं स्यात् सेवादानञ्च निष्फलम् ॥
कृते चास्थिगताः प्राणास्त्रेतायां मांससंस्थिताः ।
द्वापरे रुधिरं यावत् कलावन्नादिषु स्थिताः ॥
धर्म्मो जितो ह्यधर्मेण जितः सत्योऽनृतेन च ।
जिता भृत्यैस्तु राजानः स्त्रीभिश्च पुरुषा जिताः ॥
सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति ।
कुमार्य्यश्च प्रसूयन्ते तस्मिन् कलियुगे सदा ॥
युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजाः ।

तेषां निन्दा न कर्त्तव्या युगरूपाहि ते द्विजाः ॥
युगे युगे च सामर्थ्यं शेषं मुनिविभाषितम् ।
पराशरेण चाप्युक्तं प्रायश्चित्तं प्रधीयते ॥
अहमद्यैव तद्धर्ममनुस्मृत्य ब्रवीमि वः ।
चातुर्वर्ण्यसमाचारं शृणुध्वं मुनिपुङ्गवाः ! ॥
पाराशरमतं पुण्यं पवित्रं पापनाशनम् ।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥
चतुर्णामपि वर्णानामाचारो धर्मपालकः ।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥
षट्कर्म्माभिरतो नित्यं देवतातिथिपूजकः ।
हुतशेषन्तु भुञ्जानो ब्राह्मणो नावसीदति ॥
सन्ध्यास्नानं जपो होमः स्वाध्यायो देवतार्च्चनम् ।
वैश्वदेवातिथेयञ्च षट्कर्म्माणि दिने दिने ॥
प्रियो वा यदिवा द्वेष्यो मूर्खः पण्डित एव वा ।
वैश्वदेवे तु संप्राप्तः सोऽतिथिः स्वर्गसंक्रमः ॥
दूराद्धानं पथि श्रान्तं वैश्वदेवे उपस्थितम् ।
अतिथिं तं विजानीयान्नातिथिः पूर्व्वमागतः ॥
न पृच्छेद्गोत्रचरणं न स्वाध्यायव्रतानि च ।
हृदयं कल्पयेत्तस्मिन् सर्व्वदेवमयोहि सः ॥
नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा ।
अनित्यं ह्यागतो यस्मात्तस्मादतिथिरुच्यते ॥
अपूर्व्वः सुव्रती विप्रो अपूर्व्वो वातिथिस्तथा ।
वेदाभ्यासरतो नित्यं त्रयोऽपूर्व्वा दिने दिने ॥
वैश्वदेवे तु संप्राप्ते भिक्षुके गृहमागते ।

उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्जयेत् ॥
यती च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ।
तयोरन्नमदत्त्वा च भुक्त्वा चान्द्रायणञ्चरेत् ॥
यतिहस्ते जलं दद्याद्भैक्षं दद्यात् पुनर्जलम् ।
तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम् ॥
वैश्वदेवकृतान् दोषान् शक्तो भिक्षुर्व्यपोहितुम् ।
नहि भिक्षु कृतान् दोषान् वैश्वदेवो व्यपोहति ॥
अकृत्वा वैश्वदेवन्तु भुञ्जते ये द्विजातयः ।
सर्व्वे ते निष्फला ज्ञेयाः पतन्ति नरके शुचौ ॥
शिरोवेष्टन्तु यो भुङ्क्ते योभुङ्क्ते दक्षिणामुखः ।
वामपादे करं न्यस्य तद्वै रक्षांसि भुञ्जते ॥
यतये काञ्चनं दत्त्वा ताम्बूलं ब्रह्मचारिणे ।
चौरेभ्योऽप्यभयं दत्त्वा दातापि नरकं व्रजेत् ॥
पापोवा यदि चाण्डालो विप्रघ्नः पितृघातकः ।
वैश्वदेवे तु सम्प्राप्तः सोऽतिथिः स्वर्गसंक्रमः ॥
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
पितरस्तस्य नाश्नन्ति दशवर्षशतानि च ॥
न प्रसज्याति गो विप्रो ह्यतिथिं वेदपारगम् ।
अददन्नान्नमात्रन्तु भुक्त्वा भुङ्क्ते तु किल्बिषम् ॥
ब्राह्मणस्य मुखं क्षेत्रं निरुदकमकण्टकम् ।
वापयेत् सर्व्वबीजानि सा कृषिः सर्व्वकामिका ॥
सुक्षेत्रे वापयेद्बीजं सुपात्रे दापयेद्धनं ।
सुक्षेत्रे च सुपात्रे च यत्क्षिप्तं नैव नश्यति ॥
अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः ।

तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदो हि सः॥
क्षत्रियोहि प्रजा रक्षन् शस्त्रपाणिः प्रचण्डवत्।
विजित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत्॥
न श्रीः कुलक्रमायाता स्वरूपाल्लिखितापि या।
खड्गेनाक्रम्य भुञ्जीत वीरभोग्या वसुन्धरा॥
पुष्पं पुष्पं विचिनुयान्मूलच्छेदं न कारयेत्।
मालाकार इवोद्याने न तथाङ्गारकारकः॥
लोहकर्म तथा रत्नं गवाञ्च प्रतिपालनम्।
वाणिज्यं कृषिकर्माणि वैश्यवृत्तिरुदाहृता॥
शूद्राणां द्विजशुश्रूषा परो धर्मः प्रकीर्त्तितः।
अन्यथा कुरुते किञ्चित्तद्भवेत्तस्य निष्फलम्॥
लवणं मधु तैलञ्च दधि तक्रं घृतं पयः॥
न दूष्येच्छूद्रजातीनां कुर्य्यात् सर्व्वस्य विक्रयम्॥
अविक्रेयं मद्यमांसमभक्ष्यस्य च भक्षणम्।
अगम्यागमनञ्चैव शूद्रोऽपि नरकं व्रजेत्॥
कपिलाक्षीरपानेन ब्राह्मणीगमनेन च।
वेदाक्षरविचारेण शूद्रस्य नरकं ध्रुवम्॥
इति पाराशरे धर्मशास्त्रे प्रथमोऽध्यायः॥

द्वितीयोऽध्यायः।

अतःपरं गृहस्थस्य धर्माचारं कलौ युगे।
धर्मं साधारणं शक्यं चातुर्व्वर्ण्याश्रमागतम्॥
संप्रवक्ष्याम्यहं भूयः पाराशर्य्य प्रचोदितः।
षट्कर्मनिरतो विप्रः कृषिकर्माणि कारयेत्॥

द्वितीयोऽध्यायः।

हलमष्टगवं धर्म्यं षड्गवं मध्यमं स्मृतम्।
चतुर्गवं नृशंसानां द्विगवं वृषघातिनाम्॥
क्षुधितं तृषितं श्रान्तं बलीवर्द्दं न योजयेत्।
हीनाङ्गं व्याधितं क्लीवं वृषं विप्रो न वाहयेत्॥
स्थिराङ्गं नीरुजं दृप्तं वृषभं षण्डवर्जितम्।
वाहयेद्दिवसस्यार्द्धं पश्चात् स्नानं समाचरेत्॥
जपं देवार्च्चनं होमं स्वाध्यायं साङ्गमभ्यसेत्।
एकद्वित्रिचतुर्व्विप्रान् भोजयेत् स्नातकान् द्विजः॥
स्वयंकृष्टे तथा क्षेत्रे धान्यैश्च स्वयमर्जितैः।
निर्व्वपेत् पञ्च यज्ञानि क्रतुदीक्षाञ्च कारयेत्॥
तिला रसा न विक्रेया विक्रेया धान्यतःसमाः।
विप्रस्यैवंविधा वृत्तिस्तृणकाष्ठादिविक्रयः॥
ब्राह्मणस्तु कृषिं कृत्वा महादोषमवाप्नुयात्।
सम्वत्सरेण यत्पापं मत्स्यघाती समाप्नुयात्।
अयोमुखेन काष्ठेन तदेकाहेन लाङ्गली॥
पाशको मत्स्यघाती च व्याधः शाकुनिकस्तथा।
अदाता कर्षकश्चैव पञ्चैते समभागिनः॥
कण्डनी पेषणी चुल्ली उदकुम्भोऽथ मार्जनी।
पञ्च सूना गृहस्थस्य अहन्यहनि वर्त्तते॥
वृक्षान् छित्त्वा महीं हत्वाहत्वा तु मृगकीटकान्।
कर्षकः खलु यज्ञेन सर्व्वपापात् प्रमुच्यते॥
यो न दद्याद्द्विजातिभ्यो राशिमूलमुपागतः।
स चौरः सच पापिष्ठो ब्रह्मघ्नं तं विनिर्द्दिशेत्॥
राज्ञे दत्त्वा तु षड्भागं देवानाञ्चैकविंशकम्।

विप्राणां त्रिंशकं भागं कृषिकर्त्ता न लिप्यति ।
क्षत्रियोऽपि कृषिं कृत्वा द्विजान् देवांश्च पूजयेत् ।
वैश्यः शूद्रः सदा कुर्यात् कृषिवाणिज्यशिल्पकान् ॥
विकर्म कुर्वते शूद्रा द्विजसेवाविवर्जिताः ।
भवन्त्यल्पायुषस्ते वै पतन्ति नरकेषु च ॥
चतुर्णामपि वर्णानामेष धर्मः सनातनः ।
इति पाराशरे धर्मशास्त्रे द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

अतः शुद्धिं प्रवक्ष्यामि जनने मरणे तथा ।
दिनत्रयेण शुद्ध्यन्ति ब्राह्मणाः प्रेतसूतके ॥
क्षत्रियो द्वादशाहेन वैश्यः पञ्चदशाहकैः ।
शूद्रः शुद्ध्यति मासेन पराशरवचो यथा ॥
उपासने तु विप्राणामङ्गशुद्धिस्तु जायते ।
ब्राह्मणानां प्रसूतौ तु देहस्पर्शो विधीयते ॥
जाते विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥
एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः ।
त्र्यहात् केवलवेदस्तु द्विहीनो दशभिर्दिनैः ॥
जन्मकर्मपरिभ्रष्टः सन्ध्योपासनवर्जितः ।
नामधारकविप्रस्य दशाहं सूतकं भवेत् ॥
एकपिण्डास्तु दायादाः पृथग्दारनिकेतनाः ।
जन्मन्यपि विपत्तौ च भवेत्तेषां तु सूतकं ॥

तृतीयोऽध्यायः ।

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ।
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते ॥
प्राप्नोति सूतकं गोत्रे चतुर्थपुरुषेण तु ।
दायाद्विच्छेदमाप्नोति पञ्चमो वात्मवंशजः ॥
चतुर्थे दशरात्रं स्यात् षण्णिशा पुंसि पञ्चमे ।
षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयम् ॥
पञ्चभिः पुरुषैर्युक्ता अश्राद्धेया सगोत्रिणः ।
ततः षट्पुरुषाद्याश्च श्राद्धे भोज्याः सगोत्रिणः ॥
भृग्वग्निमरणे चैव देशान्तरमृते तथा ।
बाले प्रेते च सन्न्यासे सद्यः शौचं विधीयते ॥
दशरात्रेष्वतीतेषु त्रिरात्राच्छुद्धिरिष्यते ।
ततः सम्वत्सरादूर्द्धं सचैलं स्नानमाचरेत् ॥
देशान्तरस्थतः कश्चित् सगोत्रः श्रूयते यदि ।
न त्रिरात्रमहोरात्रं सद्यः स्नात्वा विशुद्ध्यति ॥
आत्रिपक्षात्त्रिरात्रं स्यादाषण्मासाच्च पक्षिणी ।
अहः सम्वत्सरादर्व्वाक् सद्यः शौचं विधीयते ॥
अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया ॥
यदि गर्भोविपद्येत स्रवते वापि योषितां ।
यावन्मासं स्थितोगर्भोदिनं तावत् स सूतकः ॥
आ चतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्द्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥
प्रसूतिकाले संप्राप्ते प्रसवे यदि योषिताम् ।
जीवापत्ये तु गोत्रस्य मृते मातुश्च सूतकम् ॥

रात्रावेव समुत्पन्ने मृते रजसि सूतके ।
पूर्व्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥
दन्तजातेऽनुजाते च कृतचूड़े च संस्थिते ।
अग्निसंस्करणं तेषां त्रिरात्रं सूतकं भवेत् ।
आ दन्तजननात् सद्य आचूड़ान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतात्तेषां दशरात्रमतः परम् ॥
गर्भे यदि विपत्तिः स्यात्दशाहं सूतकं भवेत् ।
जीवन् जातो यदि प्रेतः सद्यएव विशुद्ध्यति ॥
स्त्रीणां चूड़ान्न आदानात् संक्रमात्तदधःक्रमात् ।
सद्यः शौचमथैकाहं त्रिरहः पितृबन्धुषु ॥
ब्रह्मचारी गृहे येषां हूयते च हुताशने ।
सम्पर्कं नच कुर्व्वन्ति न तेषां सूतकं भवेत् ॥
सम्पर्काद्दुष्यते विप्रो नान्यो दोषोऽस्ति ब्राह्मणे ।
सम्पर्केषु निवृत्तस्य न प्रेतं नैव सूतकं ॥
शिल्पिनः कारुका वैद्या दासीदासाश्च नापिताः ।
श्रोत्रियाश्चैव राजानः सद्यः शौचाः प्रकीर्त्तिताः ।
सव्रती मन्त्रपूतश्च आहिताग्निश्च यो द्विजः ।
राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः ॥
उद्यतो निधने दाने आर्त्तो विप्रो निमन्त्रितः ।
तदैव ऋषिभिर्दृष्टं यथाकालेन शुद्ध्यति ॥
प्रसवे गृहमेधी तु न कुर्य्यात् सङ्करं यदि ।
दशाहाच्छुद्ध्यते माता अवगाह्य पिता शुचिः ॥
सर्व्वेषां शावमाशौचं मातापित्रोर्द्दशाहिकं ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥

यदि पत्न्यां प्रसूतायां सम्पर्कं कुरुते द्विजः।
सूतकन्तु भवेत्तस्य यदि विप्रः षड़ङ्गवित्॥
सम्पर्काज्जायते दोषो नान्यो दोषोऽस्ति ब्राह्मणे।
तस्मात् सर्वप्रयत्नेन सम्पर्कं वर्जयेद्द्विजः॥
विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके।
पूर्वं सङ्कल्पितं द्रव्यं दीयमानं न दूष्यति॥
अन्तरा तु दशाहस्य पुनर्मरणजन्मनी।
तावत् स्यादशुचिर्विप्रो यावत्तत् स्यादनिर्दशम्॥
ब्राह्मणार्थे विपन्नानां वन्दिगोग्रहणे तथा।
आहवेषु विपन्नानामेकरात्रन्तु सूतकं॥
द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदकौ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखे हतः॥
यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः।
अक्षयाँल्लभते लोकान् यदि क्लीवं न भाषते॥
जितेन लभते लक्ष्मीं मृतेनापि सुराङ्गनाः।
क्षणविध्वंसिकेऽमुष्मिन् का चिन्ता मरणे रणे॥
यस्तु भग्नेषु सैन्येषु विद्रवत्सु समन्ततः।
परित्राता यदा गच्छेत् स च क्रतुफलं लभेत्॥
यस्य छेदक्षतं गात्रं शरशक्त्यृष्टिमुद्गरैः।
देवकन्यास्तु तं वीरं गायन्ति रमयन्ति च॥
वराङ्गनासहस्राणि शूरमायोधने हतं।
नागकन्याश्च धावन्ति मम भर्त्ता भवेदिति॥
ललाटदेशाद्रुधिरं हि यस्य
तत्तस्य जन्तोः प्रविशेच्च वक्त्रे।

तत् सोमयानेन हि तस्य तुल्यं
संग्राममयज्ञे विधिवच्च दृष्टम् ।
यं यज्ञसंघैस्तपसा च विद्यया
स्वर्गैषिणो वात्र यथैव विप्राः ।
तथैव यान्त्येवहि तत्र वीराः
प्राणान् सुयुद्धेन परित्यजन्तः ॥
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते ॥
असगोत्रमबन्धुञ्च प्रेतीभूतञ्च ब्राह्मणं ।
नीत्वा च दाहयित्वा च प्राणायामेन शुद्ध्यति ॥
न तेषामशुभं किञ्चिद्द्विजानां शुभकर्मणि ।
जलावगाहनात्तेषां शुद्धिः स्मृतिभिरीरिता ॥
अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा ।
स्नात्वा चैव तु स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति ॥
क्षत्रियं स्मृतमज्ञानाद्ब्राह्मणो योऽनुगच्छति ।
एकाहमशुचिर्भूत्वा पञ्चगव्येन शुद्ध्यति ॥
शवञ्च वैश्यमज्ञानाद्ब्राह्मणो योऽनुगच्छति ।
कृत्वा शौचं द्विरात्रञ्च प्राणायामान् षडाचरेत् ॥
प्रेतीभूतन्तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
नयन्तमनुगच्छेत त्रिरात्रमशुचिर्भवेत् ॥
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति ॥
विनिवर्त्य यदा शूद्रा उदकान्तमुपस्थिताः ।
द्विजैस्तदानुगन्तव्या इति धर्मविदो विदुः ॥

तस्माद्‌द्विजो मृतं शूद्रं न स्पृशेन्न च दाहयेत्।
दृष्टे सूर्य्यविलोकेन शुद्धिरेषा पुरातनी ॥
इतिपाराशरे धर्मशास्त्रे तृतीयोऽध्यायः।

चतुर्थोऽध्यायः।

अतिमानादतिक्रोधात् स्नेहाद्वा यदिवा भयात्।
उद्बध्नीयात् स्त्री पुमान् वा गतिरेषा विधीयते ॥
पूयशोणितसंपूर्णे अन्धे तमसि मज्जति।
षष्टिं वर्षसहस्राणि नरकं प्रतिपद्यते।
नाशौचं नोदकं नाग्निं नाश्रुपातञ्च कारयेत् ॥
वोढारोऽग्निप्रदातारः पाशच्छेदकरास्तथा।
तप्तकृच्छ्रेण शुद्ध्यन्तीत्येवमाह प्रजापतिः ॥
गोभिर्हतं तथोद्बद्धं ब्राह्मणेनतु घातितम्।
संस्पृशन्ति तु ये विप्रा वोढारश्चाग्निदाश्च ये ॥
अन्येऽपि वानुगन्तारः पाशच्छेदकराश्च ये।
तप्तकृच्छ्रेण शुद्ध्यन्ति कुर्य्युर्ब्राह्मणभोजनम् ॥
अनडुत्सहितां गाञ्च दद्युर्विप्राय दक्षिणाम्।
त्र्यहमुष्णं पिवेदापस्त्र्यहमुष्णं पयः पिवेत्।
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्रयम् ॥
यो वै समाचरेद्विप्रः पतितादिष्वकामतः।
पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा ॥
मासार्द्धं मासमेकं वा मासद्वयमथापिवा।
अब्दार्द्धमब्दमेकं वा तदूर्द्ध्वं चैव तत्समः ॥

त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत् ।
तृतीये चैव पक्षे तु कृच्छ्रं सान्तपनं चरेत् ॥
चतुर्थे दशरात्रं स्यात् पराकः पञ्चमे मतः ।
कुर्य्याच्चान्द्रायणं षष्ठे सप्तमे त्वैन्दवद्वयम् ॥
शुद्ध्यर्थमष्टमे चैव षण्मासात् कृच्छ्रमाचरेत् ।
पक्षसंख्याप्रमाणेन सुवर्णान्यपि दक्षिणा ॥
ऋतुस्नाता तु या नारी भर्त्तारं नोपसर्पति ।
सा मृता नरकं याति विधवा च पुनः पुनः ॥
ऋतौ स्नातान्तु यो भार्य्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥
अदुष्टापतितां भार्य्यां यौवने यः परित्यजेत् ।
सप्तजन्म भवेत् स्त्रीत्वं वैधव्यञ्च पुनः पुनः ॥
दरिद्रं व्याधितं मूर्खं भर्त्तारं या न मन्यते ।
सा मृता जायते व्याली वैधव्यञ्च पुनः पुनः ॥
ओघवाताहृतं वीजं यथा क्षेत्रे प्ररोहति ।
क्षेत्री तल्लभते वीजं न वीजी भागमर्हति ॥
तद्वत् परस्त्रियाः पुत्रौ द्वौ सुतौ कुण्डगोलकौ ।
पत्यौ जीवति कुण्डः स्यात्मृते भर्त्तरि गोलकः ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः ।
दद्यान्माता पिता वापि स पुत्रो दत्तको भवेत् ॥
परिवित्तिः परीवेत्ता यया च परिविद्यते ।
सर्व्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥
दाराग्निहोत्रसंयोगं यः कुर्य्यादग्रजे सति ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ॥

द्वौ कृच्छ्रौ परिवित्तेस्तु कन्यायाः कृच्छ्र एव च।
कृच्छ्रातिकृच्छ्रौ दातुश्च होता चान्द्रायणञ्चरेत्॥
कुब्जवामनषण्डेषु गद्गदेषु जड़ेषु च।
जात्यन्धे वधिरे मूके न दोषः परिवेदने॥
पितृव्यपुत्रः सापत्न्यः परनारीसुतस्तथा।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥
ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चिन्तयेत्।
अनुज्ञातस्तु कुर्व्वीत शङ्खस्य वचनं यथा॥
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो न विद्यते॥
मृते भर्त्तरि या नारी ब्रह्मचर्य्ये व्यवस्थिता॥
सा मृता लभते स्वर्गं यथा सद्ब्रह्मचारिणः॥
तिस्रः कोट्यर्द्धकोटी च यानि रोमाणि मानुषे।
तावत् कालं वसेत् स्वर्गे भर्त्तारं यानुगच्छति॥
व्यालग्राही यथा व्यालं विलादुद्धरते बलात्।
एवमुद्धृत्य भर्त्तारं तेनैव सह मोदते।
इति पाराशरे धर्म्मशास्त्रे चतुर्थोऽध्यायः॥

पञ्चमोऽध्यायः।

वृकश्वाभ्यां शृगालाद्यैर्यदि दष्टस्तु ब्राह्मणः।
स्नात्वा जपेत गायत्रीं पवित्रां वेदमातरम्॥
गवां शृङ्गोदके स्नातो महानद्यास्तु सङ्गमे।
समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत्॥

वेदविद्याव्रतस्नातः शुना दष्टस्तु ब्राह्मणः ।
स हिरण्योदके स्नात्वा घृतं प्राश्य विशुद्ध्यति ॥
सव्रतस्तु शुना दष्टस्त्रिरात्रं समुपोषितः ।
घृतं कुशोदकं पीत्वा व्रतशेषं समापयेत् ॥
अव्रतः सव्रतो वापि शुना दष्टो भवेद्द्विजः ।
प्रणिपत्य भवेत् पूतो विप्रैश्चानुनिरीक्षितः ॥
शुना घ्रातावलीढस्य नखै र्विलिखितस्य च ।
अद्भिः प्रक्षालनाच्छुद्धिरग्निना चोपचूलनम् ॥
शुना च ब्राह्मणी दष्टा जम्बुकेन वृकेण वा ।
उदितं सोमनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥
कृष्णपक्षे यदा सोमो न दृश्येत कदाचन ।
यां दिशं व्रजति सोमस्तां दिशञ्चावलोकयेत् ॥
असद्ब्राह्मणके ग्रामे शुना दष्टस्तु ब्राह्मणः ।
वृषं प्रदक्षिणीकृत्य सद्यः स्नानाद्विशुद्ध्यति ॥
चाण्डालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि ।
आहिताग्निर्मृतो विप्रो विषेणात्महतो यदि ।
दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्जितम् ॥
स्पृष्ट्वा चोह्य च दग्ध्वा च सपिण्डेषु च सर्व्वथा ।
प्राजापत्यं चरेत् पश्चाद्विप्राणामनुशासनात् ॥
दग्ध्वास्थीनि पुनर्गृह्य क्षीरैः प्रक्षालयेद्द्विजः ।
पुनर्द्दहेत् स्वकाग्नौ तन्मन्त्रेण च पृथक् पृथक् ॥
आहिताग्निर्द्विजः कश्चित् प्रवसन् कालचोदितः ।
देहनाशमनुप्राप्तस्तस्याग्निर्वर्त्तते गृहे ॥
श्रौताग्निहोत्रसंस्कारः श्रूयतामृषिसत्तमाः ॥

कृष्णाजिनं समास्तीर्य्य कुशैश्च पुरुषाकृतम्॥
षट् शतानि शतञ्चैव पलाशानाञ्च वृन्तकम्।
चत्वारिंशच्छिरे दद्यात् षष्टिं कण्ठे विनिर्दिशेत्॥
बाहुभ्याञ्च शतं दद्यादङ्गुलीषु दशैव तु।
शतञ्चोरसि संदद्यात् त्रिंशच्चैवोदरे न्यसेत्॥
अष्टौ वृषणयोर्दद्यात् पञ्च मेढ्रे च विन्यसेत्।
एकविंशतिमूरुभ्यां जानुजङ्घे च विंशतिम्॥
पादाङ्गुल्योः शतार्द्धञ्च पात्राणि च तथा न्यसेत्।
शम्यां शिश्ने विनिःक्षिप्य अरणीं वृषणे तथा॥
जुहूं दक्षिणहस्तेन वामहस्ते तथोपभृत्।
कर्णौचोदूखलं दद्यात् पृष्ठे च मुषलं ततः॥
निःक्षिप्योरसि दृषदं तण्डुलाज्यतिलान्मुखे।
श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्थालीञ्च चक्षुषोः॥
कर्णौ नेत्रे मुखे घ्राणे हिरण्यशकलं क्षिपेत्।
अग्निहोत्रोपकरणं गात्रे शेषं प्रविन्यसेत्॥
असौ स्वर्गाय लोकाय स्वाहेति च घृताहुतीः।
दद्यात् पुत्रोऽथवा भ्राता ह्यन्यो वापि स्वधर्मिणः॥
यथा दहनसंस्कारस्तथा कार्य्यं विचक्षणैः।
ईदृशन्तु विधिं कुर्य्याद्ब्रह्मलोके गतिर्ध्रुवम्॥
ये दहन्ति द्विजास्तन्तु ते यान्ति परमां गतिम्।
अन्यथा कुर्वते किञ्चिदात्मबुद्धिप्रबोधिताः॥
भवन्त्यल्पायुषस्ते वै पतन्ति नरके ध्रुवम्॥

इति पाराशरे धर्मशास्त्रे पञ्चमोऽध्यायः।

षष्ठोऽध्यायः।

अतः परं प्रवक्ष्यामि प्राणिहत्यासु निष्कृतिम्।
पराशरेण पूर्व्वोक्तां मन्वर्थेऽपि च विस्तृताम्॥
हंससारसक्रौञ्चांश्च चक्रवाकं सकुक्कुटम्।
जालपादांश्च शरभमहोरात्रेण शुध्यति॥
बलाकाटिट्टिभानाञ्च शुकपारावतादिनाम्।
आटिनाञ्च बकानाञ्च शुध्यते नक्तभोजनात्॥
भासकाककपोतानां सारीतित्तिरिघातकः।
अन्तर्जले उभे सन्ध्ये प्राणायामेन शुध्यति॥
गृध्रश्येनशिरिश्चिराहचार्मोलूकनिपातने।
अपक्काशी दिनं तिष्ठेत्त्रिकालं मारुताशनः॥
वल्गुणीचटकानाञ्च कोकिलाखञ्जरीटकान्।
लावकारक्तपादांश्च शुध्यते नक्तभोजनात्॥
कारण्डवचकोराणां पिङ्गलाकुररस्य च।
भारद्वाजनिहन्ता च शुध्यते शिवपूजनात्॥
भेरुण्डश्येनभासंश्च पारावतकपिञ्जलान्।
पक्षिणामेव सर्व्वेषामहोरात्रेण शुध्यति॥
हत्वा नकुलमार्जारसर्पाजगरडुण्डुभान्।
कृशरं भोजयेद्विप्रान् लौहदण्डश्च दक्षिणाम्॥
शल्लकीशशकागोधामत्स्यकूर्म्माभिपातने।
वृन्ताकफलभोक्ता च त्र्यहोरात्रेण शुध्यति॥
वृकजम्बूकऋक्षाणां तरक्षूणाञ्च घातने।
तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयम्॥

गजगवयतुरङ्गानां महिषोष्ट्रनिपातने।
शुध्यति सप्तरात्रेण विप्राणां तर्पणेन च॥
मृगं रुरुं वराहञ्च अज्ञानाद्यस्तु घातयेत्।
अफालकृष्टमश्नीयादहोरात्रेण शुध्यति॥
एवं चतुष्पदानाञ्च सर्वेषां वनचारिणाम्।
अहोरात्रोषितस्तिष्ठेज्जपन् वै जातवेदसम्॥
शिल्पिनं कारुकं शूद्रं स्त्रियं वा यस्तु घातयेत्।
प्राजापत्यद्वयं कुर्य्याद्वृषैकादशदक्षिणा॥
वैश्यं वा क्षत्रियं वापि निर्द्दोषमभिघातयेत्।
सोऽतिकृच्छ्रद्वयं कुर्य्याद्गोविंशं दक्षिणां ददेत्॥
वैश्यं शूद्रं क्रियासक्तं विकर्मस्थं द्विजोत्तमम्।
हत्वा चान्द्रायणं कुर्य्याद्दद्याद्गोत्रिंशदक्षिणाम्॥
क्षत्रियेणापि वैश्येन शूद्रेणैवेतरेण वा।
चाण्डालवधसंप्राप्तः कृच्छ्रार्द्धेन विशुध्यति॥
चौराः श्वपाकचाण्डाला विप्रेणापि हता यदि।
अहोरात्रोपवासेन प्राणायामेन शुध्यति॥
श्वपाकं वापि चाण्डालं विप्रः सम्भाषते यदि।
द्विजसम्भाषणं कुर्य्याद्गायत्रीं वा सकृज्जपेत्॥
चाण्डालैः सह सुप्तन्तु त्रिरात्रमुपवासयेत्।
चाण्डालैकपथङ्गत्वा गायत्रीस्मरणाच्छुचिः॥
चाण्डालदर्शनेनैव आदित्यमवलोकयेत्।
चाण्डालस्पर्शने चैव सचैलं स्नानमाचरेत्॥
चाण्डालखातवापीषु पीत्वा सलिलमग्रजः।
अज्ञानाच्चैव नक्तेन त्वहोरात्रेण शुध्यति॥

चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम्।
गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात्॥
चाण्डालोदकभाण्डे तु अज्ञानात् पिवति जलम्।
तत्क्षणात् क्षिपते यस्तु प्राजापत्यं समाचरेत्॥
यदि न क्षिपते तोयं शरीरे यस्य जीर्य्यति।
प्राजापत्यं न दातव्यं कृच्छ्रं सान्तपनञ्चरेत्॥
चरेत् सान्तपनं विप्रः प्राजापत्यन्तु क्षत्रियः।
तदर्द्धन्तु चरेद्वैश्यः पादं शूद्रस्य दापयेत्॥
भाण्डस्थमन्त्यजानान्तु जलं दधि पयः पिवेत्।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः॥
ब्रह्मकूर्च्चोपवासेन द्विजातीनान्तु निष्कृतिः।
शूद्रस्य चोपवासेन तथा दानेन शक्तितः॥
ब्राह्मणो ज्ञानतो भुङ्क्ते चाण्डालान्नं कदाचन।
गोमूत्रयावकाहाराद्दशरात्रेण शुद्ध्यति॥
एकैकं ग्रासमश्नीयाद्गोमूत्रयावकस्य च।
दशाहनियमस्थस्य व्रतं तत्र विनिर्द्दिशेत्॥
अविज्ञातश्च चाण्डालः सन्तिष्ठेत्तस्य वेश्मनि।
विज्ञाते तूपसंन्यस्य द्विजाः कुर्व्वन्त्यनुग्रहम्॥
ऋषिवक्त्राच्च्युता धर्म्मा स्मायन्ते वेदपावनाः।
पतन्तमुद्धरेयुस्ते धर्मज्ञाः पापसङ्कटात्॥
दध्ना च सर्पिषा चैव क्षीरगोमूत्रयावकम्।
भुञ्जीत सह सर्व्वैश्च त्रिसन्ध्यमवगाहनम्॥
त्र्यहं भुञ्जीत दध्ना च त्र्यहं भुञ्जीत सर्पिषा।
त्र्यहं क्षीरेण भुञ्जीत एकैकेन दिनत्रयम्॥

भावदुष्टं न भुञ्जीयान्नोच्छिष्टं कृमिदूषितम् ।
त्रिपलं दधिदुग्धस्य पलमेकन्तु सर्पिषः ॥
भस्मना तु भवेच्छुद्धिरुभयोस्ताम्रकांसयोः ।
जलशौचेन वस्त्राणां परित्यागेन मृण्मयम् ॥
कुसुम्भगुड़कार्पासलवणं तैलसर्पिषी ।
द्वारे कृत्वा तु धान्यानि गृहे दद्याद्धुताशनम् ॥
एवं शुद्धस्ततः पश्चात् कुर्य्याद्ब्राह्मणभोजनम् ।
त्रिंशतं गा वृषञ्चैकं दद्याद्विप्रेषु दक्षिणाम् ॥
पुनर्लेपनिया तेन होमजप्येन शुद्ध्यति ।
आधारेण च विप्राणां भूमिदोषो न विद्यते ॥
रजकी चर्मकारी च लुब्धकस्य च पुक्कसी ।
चातुर्वर्ण्यगृहे यस्य त्वज्ञानादधितिष्ठति ॥
ज्ञात्वा तु निष्कृतिं कुर्य्यात् पूर्व्वोक्तस्यार्द्धमेव च ।
गृहदाहं न कुर्व्वीताप्यन्यत् सर्वञ्च कारयेत् ॥
गृहस्याभ्यन्तरे गच्छेच्चाण्डालो यस्य कस्यचित् ।
तस्माद्गृहाद्विनिःसृत्य गृहभाण्डानि वर्जयेत् ॥
रसपूर्णन्तु यद्भाण्डं न त्यजेच्च कदाचन ।
गोरसेन तु संमिश्रैर्जलैः प्रोक्षेत् समन्ततः ॥
ब्राह्मणस्य व्रणद्वारे पूयशोणितसम्भवे ।
कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ॥
गवां मूत्रपुरीषेण दध्ना क्षीरेण सर्पिषा ।
त्र्यहं स्नात्वा च पीत्वा च कृमिदुष्टः शुचिर्भवेत् ॥
क्षत्रियोऽपि सुवर्णस्य पञ्च माषान् प्रदापयेत् ।
गोदक्षिणान्तु वैश्यस्याप्युपवासं विनिर्द्दिशेत् ॥

शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुद्ध्यति ।
ब्राह्मणांस्तु नमस्कृत्य पञ्चगव्येन शुद्ध्यति ॥
अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः ।
प्रणम्य शिरसा धार्य्यमग्निष्टोमफलं हि तत् ॥
व्याधिव्यसनिनि श्रान्ते दुर्भिक्षे डामरे तथा ।
उपवासो व्रतो होमो द्विजसम्पादितानि वा ॥
अथवा ब्राह्मणास्तुष्टाः स्वयं कुर्व्वन्त्यनुग्रहम् ।
सर्व्वधर्म्ममवाप्नोति द्विजैः सम्वर्द्धिताशिषा ॥
दुर्ब्बलेऽनुग्रहः कार्य्यस्तथा वै बालवृद्धयोः ।
अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रहः स्मृतः ॥
स्नेहाद्वा यदि वा लोभाद्भयादज्ञानतोऽपि वा ।
कुर्व्वन्त्यनुग्रहं ये वै तत्पापं तेषु गच्छति ॥
शरीरस्यात्यये प्राप्ते वदन्ति नियमन्तु ये ।
महत्कार्य्योपरोधेन न स्वस्थस्य कदाचन ॥
स्वस्थस्य मूढाः कुर्वन्ति नियमन्तु वदन्ति ये ।
ते तस्य विघ्नकर्त्तारः पतन्ति नरकेऽशुचौ ॥
सएव नियमस्त्याज्यो ब्राह्मणं योऽवमन्यते ।
वृथा तस्योपवासः स्यान्न स पुण्येन युज्यते ॥
सएव नियमो ग्राह्यो यं य कोऽपि वदेद्द्विजः ।
कुर्य्याद्वाक्यं द्विजानाञ्च अकुर्वन् ब्रह्महा भवेत् ॥
उपवासो व्रतञ्चैव स्नानं तीर्थं जपस्तपः ।
विप्रैः सम्पादितं यस्य सम्पन्नं तस्य तद्भवेत् ॥
व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्म्मणि ।

सर्वं भवति निश्छिद्रं ब्राह्मणैरुपपादितम् ॥
ब्राह्मणा जङ्गमं तीर्थं निर्जलं सर्वकामदम् ।
तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ॥
ब्राह्मणा यानि भाषन्ते भाषन्ते तानि देवताः ।
सर्ववेदमया विप्रा न तद्वचनमन्यथा ॥
अन्नाद्ये कीटसंयुक्ते मक्षिकाकीटदूषिते ।
अन्तरा संस्पृशेच्चापस्तदन्नं भस्मना स्पृशेत् ॥
भुञ्जानो हि यदा विप्रः पादं हस्तेन संस्पृशेत् ।
उच्छिष्टं हि स वै भुङ्क्ते यो भुङ्क्ते मुक्तभाजने ॥
पादुकास्थो न भुञ्जीत पर्य्यङ्के संस्थितोऽपिवा ।
शुना चाण्डालदृष्टो वा भोजनं परिवर्जयेत् ॥
पक्वान्नञ्च निषिद्धं यदन्नशुद्धिस्तथैवच ।
यथा पराशरेणोक्तं तथैवाहं वदामि वः ॥
मितं द्रोणाढकस्यान्नं काकश्वानोपघातितम् ।
केनैतच्छुद्ध्यते चान्नं ब्राह्मणेभ्यो निवेदयेत् ॥
काकश्वानावलीढन्तु द्रोणान्नं न परित्यजेत् ।
वेदवेदाङ्गविद्विप्रै र्धर्मशास्त्रानुपालकैः ॥
प्रस्था द्वात्रिंशतिर्द्रोणः स्मृतो द्विप्रस्थ आढकः ।
ततो द्रोणाढकस्यान्नं श्रुतिस्मृतिविदोविदुः ॥
काकश्वानावलीढं तु गवाघ्रातं खरेण वा ।
स्वल्पमन्नं त्यजेद्विप्रः शुद्धिर्द्रोणाढके भवेत् ॥
अन्यस्योद्धृत्य तन्मात्रं यच्च नोपहतं भवेत् ।
सुवर्णोदकमभ्युक्ष्य हुताशेनैव तापयेत् ॥

कृतायनेन संस्पृष्टं सुवर्णसलिलेन च ।
विप्राणां ब्रह्मघोषेण भोज्यं भवति तत्क्षणात् ॥
इति पाराशरे धर्मशास्त्रे षष्ठोऽध्यायः ॥

सप्तमोऽध्यायः ।

अथातो द्रव्यसंशुद्धिः पराशरवचोयथा ।
दारवाणान्तु पात्राणां तक्षणाच्छुद्धिरिष्यते ॥
मार्ज्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्म्मणि ।
चमसानां ग्रहाणाञ्च शुद्धिः प्रक्षालनेन तु ॥
चरूणां स्रुक्स्रुवाणाञ्च शुद्धिरुष्णेन वारिणा ।
भस्मना शुद्ध्यते कांस्यं ताम्रमम्लेन शुद्ध्यति ॥
रजसा शुद्ध्यते नारी विकलं या न गच्छति ।
नदी वेगेन शुद्ध्येत लेपो यदि न दृश्यते ॥
वापीकूपतड़ागेषु दूषितेषु कथञ्चन ।
उद्धृत्य वै घटशतं पञ्चगव्येन शुद्ध्यति ॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत् कन्या अत ऊर्द्धं रजस्वला ॥
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिबन्ति पितरः स्वयम् ॥
माता चैव पिता चैव ज्येष्ठो भ्राता तथैवच ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥
यस्तां समुद्वहेत् कन्यां ब्राह्मणोऽज्ञानमोहितः ।
असम्भाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः ॥

यः करोत्येकरात्रेण वृषलीसेवनं द्विजः ।
स भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्विशुध्यति ॥
अस्तं गते यदा सूर्य्ये चाण्डालं पतितं स्त्रियम् ।
सूतिकांस्पृशतश्चैव कथं शुद्धिर्विधीयते ॥
जातवेदं सुवर्णञ्च सोममार्गं विलोक्य च ।
ब्राह्मणानुगतश्चैव स्नानं कृत्वा विशुध्यति ॥
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी ब्राह्मणी तथा ।
तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुध्यति ॥
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा ।
अर्द्धकृच्छ्रं चरेत् पूर्वा पादमेकमनन्तरा ॥
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजा तथा ।
पादोनं चैव पूर्व्वायाः परायाः कृच्छ्रपादकम् ॥
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा ।
कृच्छ्रेण शुध्यति पूर्वा शूद्रा दानेन शुध्यति ॥
स्नाता रजस्वला या तु चतुर्थेऽहनि शुध्यति ।
कुर्य्याद्रजोनिवृत्तौ तु दैवपित्र्यादिकर्म्म च ॥
रोगेण यद्रजः स्त्रीणामन्वहन्तु प्रवर्त्तते ।
नाशुचिः सा ततस्तेन तत् स्याद्वैकालिकं मतम् ॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥
आतुरे स्नानउत्पन्ने दशकृत्वो ह्यनातुरः ।
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत् स आतुरः ॥
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥

अनुच्छिष्टेन शूद्रेण स्नानं स्पर्शे विधीयते ।
उच्छिष्टेन च संस्पृष्टः प्राजापत्यं समाचरेत् ॥
भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते ।
सुरामात्रेण संस्पृष्टं शुध्यतेऽग्न्युपलेपनैः ॥
गवा घ्रातानि कांस्यानि श्वकाकोपहतानि च ।
शुध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च ॥
गण्डूषं पादशौचञ्च कृत्वा वै कांस्यभाजने ।
षण्मासान् भुवि निक्षिप्य उद्धृत्य पुनराहरेत् ॥
आयसेष्वपसारेण सीसस्याग्नौ विशोधनम् ।
दन्तमस्थि तथा शृङ्गं रौप्यं सौवर्णभाजनम् ॥
मणिपाषाणशङ्खाश्च एतान् प्रक्षालयेज्जलैः ।
पाषाणे तु पुनर्घृष्टिरेषा शुद्धिरुदाहृता ॥
मृद्भाण्डदहनाच्छुद्धिर्धान्यानां मार्जनादपि ।
अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ॥
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ।
वेणुवल्कलचीराणां क्षौमकार्पासवाससाम् ॥
और्णानां नेत्रपट्टानां जलाच्छौचं विधीयते ।
तूलिकाद्युपधानानि पीतरक्ताम्बराणि च ॥
शोषयित्वार्कतापेन प्रोक्षयित्वा शुचिर्भवेत् ।
मुञ्जोपस्करशूर्पाणां शाणस्य फलचर्मणाम् ॥
तृणकाष्ठादिरज्जूनां मुदकप्रोक्षणं मतम् ।
मार्जारमक्षिकाकीटपतङ्गकृमिदर्दुराः ॥
मेध्यामेध्यं स्पृशन्त्येव नोच्छिष्टान् मनुरब्रवीत् ।
भूमिं स्पृष्ट्वा गतं तोयं [illegible]न्योन्यविप्रुषः ॥

भुक्तोच्छिष्टं तथा स्नेहं नोच्छिष्टं मनुरब्रवीत् ।
ताम्बूले तुफले चैव भुक्तस्नेहानुलेपने ॥
मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत् ।
रथ्याकर्द्दमतोयानि नावः पन्थास्तृणानि च ॥
मरुतार्केण शुध्यन्ति पक्वेष्टकचितानि च ।
अदुष्टा सन्तता धारा वातोद्धूताश्च रेणवः ॥
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन ।
क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथानृते ॥
पतितानाञ्च सम्भाषे दक्षिणं श्रवणं स्पृशेत् ।
अग्निरापश्च वेदाश्च सोमसूर्य्यानिलास्तथा ॥
एते सर्व्वेऽपि विप्राणां श्रोत्रे तिष्ठन्ति दक्षिणे ।
प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ॥
विप्रस्य दक्षिणे कर्णे सान्निध्यं मनुरब्रवीत् ।
देशभङ्गे प्रवासे वा व्याधिषु व्यसनेष्वपि ॥
रक्षेदेव स्वदेहादि पश्चाद्धर्मं समाचरेत् ।
येन केन च धर्मेण मृदुना दारुणेन च ॥
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ।
आपत्काले तु सम्प्राप्ते शौचाचारं न चिन्तयेत् ।
स्वयं समुद्धरेत् पश्चात् स्वस्थो धर्म्मं समाचरेत् ॥

इति पाराशरे धर्मशास्त्रे सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

गवां बन्धनयोक्त्रेतु भवेन्मृत्युरकामतः ।
अकामात् कृतपापस्य प्रायश्चित्तं कथं भवेत् ॥
वेदवेदाङ्गविदुषां धर्मशास्त्रं विजानताम् ।
स्वकर्मरतविप्राणां स्वकं पापं निवेदयेत् ॥
अत ऊर्द्धं प्रवक्ष्यामि उपस्थानस्य लक्षणम् ।
उपस्थितोहि न्यायेन व्रतादेशनमर्हति ॥
सद्योनिःसंशये पापे न भुञ्जीतानुपस्थितः ।
भुञ्जानो वर्द्धयेत् पापं पर्षद्यत्र न विद्यते ॥
संशये तु न भोक्तव्यं यावत् कार्य्यविनिश्चयः ।
प्रमादश्च न कर्त्तव्यो यथैवासंशयस्तथा ॥
कृत्वा पापं न गूहेत गुह्यमानं विवर्द्धते ।
स्वल्पं वाथ प्रभूतं वा धर्मविद्भ्यो निवेदयेत् ॥
ते हि पापे कृते वेद्या हन्तारश्चैव पाप्मनाम ।
व्याधितस्य यथा वैद्या बुद्धिमन्तो रुजापहाः ॥
प्रायश्चित्ते समुत्पन्ने ह्रीमान् सत्यपरायणः ।
मृद्वार्जवसम्पन्नः शुद्धिं गच्छेत मानवः ॥
सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः ।
क्षत्रियो वाथ वैश्योवा ततः पर्षद मावजेत् ॥
उपस्थाय ततः शीघ्रमार्त्तिमान् धरणीं व्रजेत् ।
गात्रैश्च शिरसा चैव नच किञ्चिदुदाहरेत् ॥
सावित्र्याश्चापि गायत्र्याः सन्ध्योपास्त्यग्निकार्य्ययोः ।
अज्ञानात् कृषिकर्त्तारो ब्राह्मणा नामधारकाः ॥

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।
सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥
यद्वदन्ति तमोमूढा मूर्खा धर्ममतद्विदः ।
तत्पापं शतधा भूत्वा तद्वक्तुरधि गच्छति ॥
अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः ।
प्रायश्चित्ती भवेत् पूतः किल्बिषं परिषद्व्रजेत् ॥
चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः ।
स धर्म इति विज्ञेयो नेतरैस्तु सहस्रशः ॥
प्रमाणमार्गं मार्गन्तो ये धर्मं प्रवदन्ति वै ।
तेषामुद्विजते पापं सद्भूतगुणवादिनाम् ॥
यथाश्मनि स्थितं तोयं मारुतार्केण शुध्यति ।
एवं परिषदादेशान्नाशयेदेव दुष्कृतम् ॥
नैव गच्छति कर्त्तारं नैव गच्छति पर्षदम् ।
मारुतार्कादिसंयोगात् पापं नश्यति तोयवत् ॥
अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः ।
पञ्च त्रयो वा धर्म्मज्ञाः परिषत् सा प्रकीर्त्तिता ॥
मुनीनामात्मविद्यानां द्विजानां यज्ञयाजिनाम् ।
वेदव्रतेषु स्नातानामेकोऽपि परिषद्भवेत् ॥
पञ्च पूर्वं मया प्रोक्तास्तेषाञ्चैव त्वसम्भवे ।
स्ववृत्तिपरितुष्टा ये परिषत् सा प्रकीर्त्तिता ॥
अत ऊर्द्ध्वन्तु ये विप्राः केवलं नामधारकाः ।
परिषत्त्वं न तेषां वै सहस्रगुणितेष्वपि ॥
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ।
ब्राह्मणास्त्वनधीयानास्त्रयस्ते नामधारकाः ॥

ग्रामस्थानं यथा शून्यं यथा कूपस्तु निर्जलः।
यथा हुतमनग्नौ च अमन्त्रो ब्राह्मणस्तथा॥
यथा षण्ढोऽफलः स्त्रीषु यथा गौरूषराफला।
यथा चाज्ञेऽफलं दानं यथा विप्रोऽनृचोऽफलः॥
चित्रं कर्म यथानेकैरङ्गैरुन्मील्यते शनैः।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकः॥
प्रायश्चित्तं प्रयच्छन्ति ये द्विजा नामधारकाः।
ते द्विजाः पापकर्म्माणः समेता नरकं ययुः॥
ये पठन्ति द्विजा वेदं पञ्चयज्ञरताश्च ये।
त्रैलोक्यं धारयन्त्येते पञ्चेन्द्रियरताश्रयाः॥
सुप्रणीतः श्मशानेषु दीप्तोऽग्निः सर्वभक्षकः।
तथैव ज्ञानवान् विप्रः सर्वभक्षश्च दैवतम्॥
अमेध्यानि च सर्व्वाणि प्रक्षिपन्त्युदके यथा।
तथैव किल्बिषं सर्वं प्रक्षिप्यं द्विजेऽमले॥
गायत्रीरहितो विप्रः शूद्रादप्यशुचिर्भवेत्।
गायत्रीब्रह्मतत्त्वज्ञाः संपूज्यन्ते द्विजोत्तमाः॥
दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः।
कः परित्यज्य दुष्टाङ्गां दुहेच्छीलवतीं खरीम्॥
धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः।
क्रीड़ार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः॥
चातुर्वेद्यो विकल्पी च अङ्गविद्धर्मपाठकः।
प्रपन्नाश्रमिणो मुख्याः परिषत् स्युर्दशावराः॥
राज्ञाश्चानुमते चैव प्रायश्चित्तं द्विजो वदेत्।
स्वयमेव न वक्तव्या प्रायश्चित्तस्य निष्कृतिः॥

ब्राह्मणांश्च व्यतिक्रम्य राजा यत् कर्त्तुमिच्छति ।
तत्पापं शतधा भूत्वा राजान मुपगच्छति ॥
प्रायश्चित्तं सदा दद्याद्देवतायतनाग्रतः ।
आत्मानं पावयेत् पश्चाज्जपन् वै वेदमातरम् ॥
सशिखं वपनं कृत्वा त्रिसन्ध्यमवगाहनम् ।
गवां गोष्ठे वसेद्रात्रौ दिवा ताः समनुव्रजेत् ॥
उष्णे वर्षति शीते वा मारुते वाति वा भृशम् ।
न कुर्व्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ॥
आत्मनो यदि वान्येषां गृहे चेत्रेऽथवा खले ।
भक्षयन्तीं न कथयेत् पिवन्तञ्चैव वत्सकम् ॥
पिवन्तीषु पिवेत्तोयं संविशन्तीषु संविशेत् ।
पतितां पङ्कमग्नां वा सर्वप्राणैः समुद्धरेत् ॥
ब्राह्मणार्थे गवार्थे वा यस्तु प्राणान् परित्यजेत् ।
मुच्यते ब्रह्महत्याद्यैर्गोप्ता गोब्राह्मणस्य च ॥
गोवधस्यानुरूपेण प्राजापत्यं विनिर्द्दिशेत् ।
प्राजापत्यन्तु यत्कृच्छ्रं विभजेत्तच्चतुर्विधम् ॥
एकाहमेकभक्ताशी एकाहं नक्तभोजनः ।
अयाचिताश्येक महरेकाहं मारुताशनः ॥
दिनद्वयं चैकभक्तोद्विदिनं नक्तभोजनः ।
दिनद्वयमयाची स्याद्द्विदिनं मारुताशनः ॥
त्रिदिनञ्चैकभक्ताशी त्रिदिनं नक्तभोजनः ।
दिनत्रयमयाची स्यात्त्रिदिनं मारुताशनः ॥
चतुरहन्त्वेकभक्ताशी चतुरहं नक्तभोजनः ।
चतुर्दिनमयाची स्याच्चतुरहं मारुताशनः ॥

प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्।
विप्राय दक्षिणां दद्यात् पवित्राणि जपेद्द्विजः॥
ब्राह्मणान् भोजयित्वा तु गोघ्नः शुद्धो न संशयः।
इति पाराशरे धर्मशास्त्रेऽष्टमोऽध्यायः।

नवमोऽध्यायः।

गवां संरक्षणार्थाय न दुष्येद्रोधबन्धयोः।
तद्वधन्तु न तं विद्यात् कामात् कामकृतन्तथा॥
अङ्गुष्ठमात्रः स्थूलो वा बाहुमात्रः प्रमाणतः।
आर्द्रस्तु सपलाशश्च दण्ड इत्यभिधीयते॥
दण्डादूर्द्ध्वं यदन्येन प्रहरेद्वा निपातयेत्।
प्रायश्चित्तं चरेत् प्रोक्तं द्विगुणं गोव्रतञ्चरेत्॥
रोधबन्धनयोक्त्राणि घातनञ्च चतुर्विधम्।
एकपादञ्चरेद्रोधे द्विपादं बन्धने चरेत्॥
योक्त्रेषु पादहीनं स्याच्चरेत् सर्व्वं निपातने।
गोचारे च गृहे वापि दुर्गेष्वपि समेष्वपि॥
नदीष्वपि समुद्रेषु खातेऽप्यथ दरीमुखे।
दग्धदेशे स्थिताः गावः स्तम्भनाद्रोध उच्यते॥
योक्त्रदामकडोरैश्च घण्टाभरणभूषणैः।
गृहे वापि वने वापि बद्धा स्याद्गौर्मृता यदि॥
तदेव बन्धनं विद्यात् कामाकामकृतञ्च यत्।
हले वा शकटे पंक्तौ भारे वा पीड़ितो नरैः॥
गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वधः।

मत्तः प्रमत्त उन्मत्तश्चेतनो वाप्यचेतनः ॥
कामाकामकृतक्रोधोदण्डैर्हन्यादथोपलैः ।
प्रहता वा हता वापि तद्धि हेतुर्निपातने ॥
मूर्च्छितः पतितो वापि दण्डेनाभिहतः स तु ।
उत्थितस्तु यदा गच्छेत् पञ्च सप्त दशैव वा ॥
ग्रासं वा यदि गृह्णीयात्तोयं वापि पिवेद्यदि ।
पूर्वव्याध्युपसृष्टश्चेत् प्रायश्चित्तं न विद्यते ॥
पिण्डस्थे पादमेकन्तु द्वौ पादौ गर्भसम्मिते ।
पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् ॥
पादेऽङ्गरोमवपनं द्विपादे श्मश्रुणोऽपि च ।
त्रिपादे तु शिखावर्जं सशिखन्तु निपातने ॥
पादे वस्त्रयुगञ्चैव द्विपदे कांस्यभाजनम् ।
पादोने गोवृषं दद्याच्चतुर्थे गोद्वयं स्मृतम् ॥
निष्पन्नसर्वगात्रन्तु दृश्यते वा सचेतनम् ।
अङ्गप्रत्यङ्गसम्पन्ने द्विगुणं गोव्रतं चरेत् ॥
पाषाणे नैव दण्डेन गावो येनाभिघातिताः ।
शृङ्गभङ्गे चरेत् पादं द्वौ पादौ तेन यातने ॥
लाङ्गूले कृच्छ्रपादन्तु द्वौ पादावस्थिभञ्जने ।
त्रिपादञ्चैव कर्णे तु चरेत् सर्वं निपातने ॥
शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च ।
यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते ॥
व्रणभङ्गे च कर्त्तव्यः स्नेहाभ्यङ्गस्तु पाणिना ।
यवसश्चापहर्त्तव्यो यावद्दृढबलो भवेत् ॥
यावत्सम्पूर्णसर्व्वाङ्गस्तावत्तं पोषयेन्नरः ।

गोरूपं ब्राह्मणस्याग्रे नमस्कृत्य विवर्जयेत् ॥
यद्यसम्पूर्णसर्व्वाङ्गो हीनदेहो भवेत्तदा ।
गोघातकस्य तस्यार्द्धं प्रायश्चित्तं विनिर्द्दिशेत् ॥
काष्ठलोष्ट्रकपाषाणैः शस्त्रेणैवोद्धतो बलात् ।
व्यापादयति यो गान्तु तस्य शुद्धिं विनिर्द्दिशेत् ॥
चरेत् सान्तपनं काष्ठे प्रजापत्यन्तु लोष्ट्रके ।
तप्तकृच्छ्रन्तु पाषाणे शस्त्रे चैवातिकृच्छ्रकम् ॥
पञ्च सान्तपने गावः प्राजापत्ये तथा त्रयः ।
तप्तकृच्छ्रे भवन्त्यष्टावतिकृच्छ्रे त्रयोदश ॥
प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम् ।
तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः ॥
अन्यत्राङ्कनलक्ष्मभ्यां वाहने मोहने तथा ।
सायं संयमनार्थन्तु न दुष्येद्रोधबन्धयोः ॥
अतिदाहेऽतिवाहे च नासिकाभेदने तथा ।
नदीपर्वतसञ्चारे प्रायश्चित्तं विनिर्दिशेत् ॥
अतिदाहे चरेत्पादं द्वौ पादौ वाहने चरेत् ।
नासिके पादहीनन्तु चरेत्सर्वं निपातने ॥
दहनाच्च विपद्येत अबद्धो वापि यन्त्रितः ।
उक्तं पाराशरेणैव ह्येकपादं यथाविधि ॥
रोधबन्धनयोक्त्राश्च भारः प्रहरणन्तथा ।
दुर्गप्रेरणयोक्त्राश्च निमित्तानि बधस्य षट् ॥
बन्धपाशसुगुप्ताङ्गो म्रियते यदि गोपशुः ।
भवने तस्य नागस्य पापि कृच्छ्रार्द्धमर्हति ॥

न नारिकेलैर्नच शाणवालै-
र्नचापि मौञ्जैर्नैच बन्धशृङ्खलैः।
एतैस्तु गावो न निबन्धनीया-
बद्ध्वातु तिष्ठेत् परशुं गृहीत्वा॥
कुशैः काशैश्च बध्नीयाद्गोपशुं दक्षिणामुखम्।
पाशलग्नाग्निदग्धेषु प्रायश्चित्तं न विद्यते॥
यदि तत्र भवेत् काण्डं प्रायश्चित्तं कथं भवेत्।
जपित्वा पावनीं देवीं मुच्यते तत्र किल्बिषात्॥
प्रेरयन् कूपवापीषु वृक्षच्छेदेषु पातयन्।
गवाशनेषु विक्रीणंस्ततः प्राप्नोति गोबधम्॥
आराधितस्तु यः कश्चिद्भिन्नकक्षो यदा भवेत्।
श्रवणं हृदयं भिन्नं मग्नो वा कूटसङ्कटे॥
कूपादुत्क्रमणे चैव भग्नो वा ग्रीवपादयोः।
स एव म्रियते तत्र त्रीन् पादांस्तु समाचरेत्॥
कूपखाते तटीबन्धे नदीबन्धे प्रपासु च।
पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यते॥
कूपखाते तटीखाते दीर्घखाते तथैव च।
अन्येषु धर्मपारेषु प्रायश्चित्तं न विद्यते॥
वेश्मद्वारे निवासेषु यो नरः खातमिच्छति।
स्वकार्य्यगृहखातेषु प्रायश्चित्तं विनिर्द्दिशेत्॥
निशि॰ बन्धनिरुद्धेषु सर्पव्याघ्रहतेषु च।
अग्निविद्युद्विपन्नानां प्रायश्चित्तं न विद्यते॥
ग्रामघाते शरौघेण वेश्मबन्धनिपातने।
अतिवृष्टिहतानाञ्च प्रायश्चित्तं न विद्यते॥

संग्रामे प्रहतानाञ्च ये दग्धा वेश्मकेषु च।
दावाग्नि ग्रामघाते वा प्रायश्चित्तं न विद्यते॥
यन्त्रिता गौश्चिकित्सार्थं मूढगर्भविमोचने।
यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते॥
व्यापन्नानां बहूनाञ्च बन्धने रोधने ऽपिवा।
भिषग्मिथ्याप्रचारे च प्रायश्चित्तं विनिर्दिशेत्॥
गोवृषाणां विपत्तौ च यावन्तः प्रेक्षका जनाः।
न वारयन्ति तां तेषां सर्वेषां पातकं भवेत्॥
एको हतो यैर्बहुभिः समेतै
र्नज्ञायते यस्य हतोऽभिघातात्।
दिव्येन तेषामुपलभ्य हन्ता
निवर्त्तनीयो नृपसन्नियुक्तैः॥
एका चेद्बहुभिः कापि दैवाद्व्यापादिता भवेत्।
पादं पादञ्च हत्यायाश्चरेयुस्ते पृथक् पृथक्॥
हतेषु रुधिरं दृश्यं व्याधिग्रस्तः कृशो भवेत्।
नाना भवति दृष्टेषु एवमन्वेषणं भवेत्॥
मनुना चैवमेकेन सर्वशास्त्राणि जानता।
प्रायश्चित्तन्तु तेनोक्तं गोषु चान्द्रायणं चरेत्॥
केशानां रक्षणार्थाय द्विगुणं गोव्रतं चरेत्।
द्विगुणे व्रत आदिष्टे दक्षिणा द्विगुणा भवेत्॥
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः।
अकृत्वा वपनं तस्य प्रायश्चित्तं विनिर्दिशेत्॥
यस्य न द्विगुणं दानं केशश्च परिरक्षितः।
तत्पापं तस्य तिष्ठेत वक्ता च नरकं व्रजेत्॥

यत्किञ्चित् क्रियते पापं सर्व्वं केशेषु तिष्ठति ।
सर्व्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलिद्वयम् ॥
एवं नारीकुमारीणां शिरसो मुण्डनं स्मृतम् ।
न स्त्रियाः केशवपनं न दूरे शयनाशनम् ॥
न च गोष्ठे वसेद्रात्रौ न दिवा गा अनुव्रजेत् ।
नदीषु सङ्गमे चैव अरण्येषु विशेषतः ॥
न स्त्रीणामजिनं वासो व्रतमेवं समाचरेत् ।
त्रिसन्ध्यं स्नानमित्युक्तं सुराणामर्च्चनं तथा ॥
बन्धुमध्ये व्रतं तासां कृच्छ्रचान्द्रायणादिकम् ।
गृहेषु नियतं तिष्ठेच्छुचिर्नियममाचरेत् ॥
इह यो गोबधं कृत्वा प्रच्छादयितुमिच्छति ।
स याति नरकं घोरं कालसूत्रमसंशयम् ॥
विमुक्तो नरकात्तस्मान्मर्त्त्यलोके प्रजायते ।
क्लीवो दुःखी च कुष्ठीच सप्त जन्मानि वै नरः ॥
तस्मात् प्रकाशयेत् पापं स्वधर्मं सततं चरेत् ।
स्त्रीबालभृत्यगोविप्रेष्वतिकोपं विवर्जयेत् ॥

इति पाराशरे धर्मशास्त्रे नवमोऽध्यायः ।

दशमोऽध्यायः ।

चातुर्वर्ण्यस्य सर्व्वत्र हीयं प्रोक्ता तु निष्कृतिः ।
अगम्यागमने चैव शुद्धौ चान्द्रायणञ्चरेत् ॥
एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः ॥

कुक्कुटाण्डप्रमाणान्तु ग्रासञ्च परिकल्पयेत् ।
अन्यथा भावदुष्टस्य न धर्मो नैव शुद्ध्यति ॥
प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम् ।
गोद्वयं वस्त्रयुग्मञ्च दद्याद्विप्रेषु दक्षिणाम् ॥
चाण्डालीञ्च श्वपाकीञ्च ह्यभिगच्छति यो द्विजः ।
त्रिरात्रमुपवासी स्याद्विप्राणामनुशासनात् ॥
सशिखं वपनं कुर्य्यात् प्राजापत्यत्रयञ्चरेत् ।
ब्रह्मकूर्च्चं ततः कृत्वा कुर्य्याद्ब्राह्मणतर्पणम् ॥
गायत्रीञ्च जपन्नित्यं दद्याद्गोमिथुनद्वयम् ।
विप्राय दक्षिणां दद्याच्छुद्धिमाप्नोत्यसंशयम् ॥
क्षत्त्रियस्यापि वैश्यो वा चाण्डालीं गच्छतो यदि ।
प्राजापत्यद्वयं कुर्य्याद्दद्याद्गोमिथुनन्तथा ॥
श्वपाकीमथ चाण्डालीं शूद्रो वै यदि गच्छति ।
प्राजापत्यं चरेत् कृच्छ्रं दद्याद्गोमिथुनन्तथा ॥
मातरं यदि गच्छेत भगिनीं पुत्रिकान्तथा ।
एतास्तु मोहितो गत्वा त्रीन् कृच्छ्रांस्तु समाचरेत् ॥
चान्द्रायणत्रयं कुर्य्याच्छिश्नच्छेदेन शुद्ध्यति ।
मातृस्वसृगमे चैव आत्ममेढ्रनिकर्त्तनम् ॥
अज्ञानात्तास्तु यो गच्छेत् कुर्य्याच्चान्द्रायणद्वयम् ।
दशगोमिथुनन्दद्याच्छुद्धिः पाराशरोऽब्रवीत् ॥
पितृदारान् समारुह्य मातुराप्तां भ्रातृजाम् ।
गुरुपत्नीं स्नुषाञ्चैव भ्रातृभार्य्यां तथैव च ॥
मातुलानीं सगोत्राञ्च प्राजापत्यत्रयञ्चरेत् ।
गोद्वयं दक्षिणां दत्त्वा शुद्ध्यते नात्र संशयः ॥

पशुवेश्यादिगमने महिष्युष्ट्रीकपीस्तथा ।
खरीञ्च शूकरीं गत्वा प्राजापत्यं समाचरेत् ॥
गोगामी च त्रिरात्रेण गामेकं ब्राह्मणे ददत् ।
महिष्युष्ट्रीखरीगामी त्वहोरात्रेण शुध्यति ॥
डामरे समरे वापि दुर्भिक्षे वा जनक्षये ।
वन्दिग्राहे भयार्त्ते वा सदा स्वस्त्रीं निरीक्षयेत् ॥
चाण्डालैः सह सम्पर्कं या नारी कुरुते ततः ।
विप्रान् दश वरान् गत्वा स्वकं दोषं प्रकाशयेत् ॥
आकण्ठसम्मिते कूपे गोमयोदककर्दमे ।
तत्र स्थित्वा निराहारा त्वेकरात्रेण निष्क्रमेत् ॥
सशिखं वपनं कृत्वा भुञ्जीयाद्यावकौदनम् ।
त्रिरात्रमुपवासित्वा ह्येकरात्रं जले वसेत् ॥
शङ्खपुष्पीलतामूलं पत्रञ्च कुसुमं फलम् ।
सुवर्णं पञ्चगव्यञ्च क्वाथयित्वा पिवेज्जलम् ॥
एकभक्तं चरेत् पश्चाद्यावत् पुष्पवती भवेत् ।
व्रतं चरति तद्यावत्तावत् संवसते वहिः ॥
प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम् ।
गोद्वयं दक्षिणां दद्याच्छुद्धिः पाराशरोऽब्रवीत् ॥
चातुर्वर्ण्यस्य नारीणां कृच्छ्रचान्द्रायणं व्रतम् ।
यथा भूमिस्तथा नारी तस्मात्तां नतु दूषयेत् ॥
वन्दिग्राहेण या भुक्ता हत्वा बद्धा बलाद्भयात् ।
कृत्वा सान्तपनं कृच्छ्रं शुध्येत् पाराशरोऽब्रवीत् ॥
सकृद्भुक्ता तु या नारी नेच्छन्ती पापकर्मभिः ।
प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन तु ॥

पतत्यर्द्धं शरीरस्य यस्य भार्य्या सुरां पिवेत् ।
पतितार्द्धशरीरस्य निष्कृतिर्न विधीयते ॥
गायत्रीं जपमानस्तु कृच्छ्रं सान्तपनं चरेत् ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥
जारेण जनयेद्गर्भं गते त्यक्ते मृते पतौ ॥
तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम् ॥
ब्राह्मणी तु यदा गच्छेत् परपुंसा समन्विता ।
सा तु नष्टा विनिर्द्दिष्टा न तस्या गमनं पुनः ॥
कामान्मोहाद्यदा गच्छेत्त्यक्त्वा बन्धून् सुतान् पतिम् ।
सा तु नष्टा परे लोके मानुषेषु विशेषतः ॥
दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते ।
दशाहं न त्यजेन्नारीं त्यजेन्नष्टश्रुता तथा ॥
भर्त्ता चैव चरेत् कृच्छ्रं कृच्छ्रार्द्धं चैव बान्धवाः ।
तेषां भुक्त्वा च पीत्वा च अहोरात्रेण शुद्ध्यति ॥
ब्राह्मणी तु यदा गच्छेत् परपुंसा विवर्जिता ।
गत्वा पुंसां शतं याति त्यजेयुस्तान्तु गोत्रिणः ॥
पुंसो यदि गृहं गच्छेत्तदशुद्धं गृहं भवेत् ।
पितृमातृगृहं यच्च जारस्यैव तु तद्गृहम् ॥
उल्लिख्य तद्गृहं पश्चात् पञ्चगव्येन शुद्ध्यति ।
त्यजेन्मृण्मयपात्राणि वस्त्रं काष्ठञ्च शोधयेत् ॥
सम्भारान् शोधयेत् सर्व्वान् गोकेशैश्च फलोद्भवान् ।
ताम्राणि पञ्चगव्येन कांस्यानि दश भस्मभिः ॥
प्रायश्चित्तं चरेद्विप्रो ब्राह्मणैरुपपादितम् ।

गोद्वयं दक्षिणां दद्यात् प्राजापत्यं समाचरेत् ॥
इतरेषा महोरात्रं पञ्चगव्येन शोधनम्।
सपुत्रः सह भृत्यैश्च कुर्य्याद् ब्राह्मणभोजनम् ॥
आकाशं वायुरग्निश्च मेध्यं भूमिगतं जलम्।
न दुष्यन्तीह दर्भाश्च यज्ञेषु च समास्तथा ॥
उपवासैर्व्रतैः पुण्यैः स्नानसन्ध्यार्च्चनादिभिः।
जपैर्होमैस्तथा दानैः शुद्ध्यन्ते ब्राह्मणाः सदा ॥
इति पाराशरे धर्मशास्त्रे दशमोऽध्यायः ॥

एकादशोऽध्यायः।

अमेध्यरेतोगोमांसं चाण्डालान्नमथापिवा।
यदि भुक्तन्तु विप्रेण कृच्छ्रं चान्द्रायणञ्चरेत् ॥
तथैव क्षत्रियो वैश्य स्तदर्द्धन्तु समाचरेत्।
शूद्रोऽप्येवं यदा भुङ्क्ते प्राजापत्यं समाचरेत् ॥
पञ्चगव्यं पिवेच्छूद्रो ब्रह्मकूर्च्चं पिवेद्द्विजः।
एकद्वित्रिचतर्गाश्च दद्याद्विप्रादनुक्रमात् ॥
शूद्रान्नं सूतकस्यान्न मभोज्यस्यान्नमेवच।
शङ्कितं प्रतिषिद्धान्नं पूर्व्वोच्छिष्टं तथैवच ॥
यदि भुक्तन्तु विप्रेण अज्ञानादापदापि वा।
ज्ञात्वा समाचरेत् कृच्छ्रं ब्रह्मकूर्च्चन्तु पावनम् ॥
व्यालैर्नकुलमर्ज्जारै रन्नमुच्छिष्टितं यदा।
तिलदर्भोदकैः प्रोक्ष्य शुद्ध्यति नात्र संशयः ॥
शूद्रोऽप्यभोज्यं भुक्तान्नं पञ्चगव्येन शुद्ध्यति।

क्षत्रियो वापि वैश्यश्च प्राजापत्येन शुद्ध्यति ॥
एकपंक्त्युपविष्टानां विप्राणां सहभोजने ।
यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं न भोजयेत् ॥
मोहाद्वा लोभतस्तत्र पंक्तावुच्छिष्टभोजने ।
प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सान्तपनन्तथा ॥
पीयूषश्वेतलसुनवृन्ताकफलगृञ्जनम् ॥
पलाण्डुं वृक्षनिर्य्यासं देवस्वं कवकानि च ।
उष्ट्रीक्षीरमविक्षीरमज्ञानाद्भुञ्जते द्विजः ॥
त्रिरात्रमुपवासी स्यात् पञ्चगव्येन शुद्ध्यति ।
मण्डूकं भक्षयित्वा च मूषिकामांसमेव च ॥
ज्ञात्वा विप्रस्त्वहोरात्रं यावकान्नेन शुद्ध्यति ।
क्षत्रियोवापि वैश्योवा क्रियावन्तौ शुचिव्रतौ ।
तद्गृहेषु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः ॥
घृतं तैलं तथा क्षीरं गुडं तैलेन पाचितम् ।
गत्वा नदीतटे विप्रो भुञ्जीयाच्छूद्रभोजनम् ॥
अज्ञानाद्भुञ्जते विप्राः सूतके मृतकेऽपिवा ।
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्द्दिशेत् ॥
गायत्र्यष्टसहस्रेण शुद्धः स्याच्छूद्रसूतके ।
वैश्ये पञ्चसहस्रेण त्रिसहस्रेण क्षत्रियः ॥
ब्राह्मणस्य यदा भुङ्क्ते प्राणायामेन शुद्ध्यति ।
अथवा वामदेव्येन साम्ना चैकेन शुद्ध्यति ॥
शुष्कान्नं गोरसं स्नेहं शूद्रवेश्मन आगतम् ।
पक्वं विप्रगृहे पूतं भोज्यं तन्मनुरब्रवीत् ।
आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि ।

मनस्तापेन शुद्ध्येत द्रुपदां वा शतं जपेत्॥
दासनापितगोपाल कुलमित्रार्द्धसीरिणः।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्॥
शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः।
संस्कृतस्तु भवेद्दास्यो ह्यसंस्कारैस्तु नापितः॥
क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः।
स गोपाल इति ज्ञेयो भोज्यो विप्रैर्न संशयः॥
वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः।
आर्द्धिकस्स तु ज्ञेयो भोज्यो विप्रैर्न संशयः॥
भाण्डस्थित मभोज्येषु जलं दधि घृतं पयः।
अकामतस्तु यो भुङ्क्ते प्रायश्चित्तं कथं भवेत्॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्युपसर्पति।
ब्रह्मकूर्च्चोपवासेन यथावर्णस्य निष्कृतिः॥
शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुद्ध्यति।
ब्रह्मकूर्च्चमहोरात्रं श्वपाकमपि शोधयेत्॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
निर्द्दिष्टं पञ्चगव्यन्तु पवित्रं पापनाशनम्॥
गोमूत्रं कृष्णवर्णायाः श्वेताया गोमयं हरेत्।
पयश्च ताम्रवर्णाया रक्ताया दधि चोच्यते॥
कपिलाया घृतं ग्राह्यं सर्व्वं कापिलमेव वा।
गोमूत्रस्य पलं दद्यादश्मस्त्रिपलमुच्यते॥
आज्यस्यैकपलं दद्यादङ्गुष्ठार्द्धन्तु गोमयम्।
क्षीरं सप्तपलं दद्यात् पलमेकं कुशोदकम्॥
गायत्र्याऽऽदाय गोमूत्रं गन्धद्वारेति गोमयम्।

आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि॥
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम्॥
पञ्चगव्यमृचा पूतं स्थापयेदग्निसन्निधौ॥
आपोहिष्ठेति चालोड्य मानस्तोकेति मन्त्रयेत्।
सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः॥
एभिरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि।
इरावती इदं विष्णुर्मानस्तोके च शंवती॥
एतैरुद्धृत्य होतव्यं हुतशेषं स्वयं पिबेत्।
आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु।
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु॥
यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम्।
ब्रह्मकूर्चो दहेत् सर्व्वं यथैवाग्निरिवेन्धनम्॥
पिबतः पतितं तोयं भाजने मुखनिःसृतम्।
अपेयं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत्॥
कूपे च पतितं दृष्ट्वा श्वशृगालौ च मर्कटम्।
अस्थि चर्म्मादि पतितं पीत्वा मेध्या अपो द्विजः॥
नारन्तु कूपे काकञ्च विड्वराहखरोष्ट्रकम्।
गावयं सौप्रतीकञ्च मायूरं खाड्गकं तथा॥
वैयाघ्रमार्क्षं सैंहं वा कुणपं यदि मज्जति।
तड़ागस्याथ दुष्टस्य पीतं स्यादुदकं यदि॥
प्रायश्चित्तं भवेत् पुंसः क्रमेणैतेन सर्वशः।
विप्रः शुद्ध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात्॥
एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुद्ध्यति॥
परपाकनिवृत्तस्य परपाकरतस्य च।

अपचस्य च भुक्त्वान्नं द्विजश्चान्द्रायणञ्चरेत् ॥
अपचस्य च यद्दाने दातुश्चास्य कुतः फलम् ।
दाता प्रतिग्रहीता च द्वौ तौ निरयगामिनौ ॥
गृहीत्वाग्निं समारोप्य पञ्च यज्ञान्न वर्त्तयेत् ।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्त्तितः ॥
पञ्चयज्ञं स्वयं कृत्वा परान्नेनोपजीवति ।
सततं प्रातरुत्थाय परपाकरतो हि सः ॥
गृहस्थधर्म्मौं यो विप्रो ददाति परिवर्ज्जितः ।
ऋषिभिर्धर्म्मतत्त्वज्ञैरपचः परिकीर्त्तितः ॥
युगे युगे च ये धर्म्मास्तेषु धर्मेषु ये द्विजाः ।
तेषां निन्दा न कर्त्तव्या युगरूपा हि ब्राह्मणाः ॥
हुङ्कारं ब्राह्मणस्योक्त्वा त्वङ्कारञ्च गरीयसः ।
स्नात्वा तिष्ठन्नहःशेषमभिवाद्य प्रसादयेत् ॥
ताड़यित्वा तृणेनापि कण्ठे वा बध्यवाससा ।
विवादेनापि निर्ज्जित्य प्रणिपत्य प्रसादयेत् ॥
अवगूर्य्य त्वहोरात्रं त्रिरात्रं क्षितिपातने ।
अतिकृच्छ्रञ्च रुधिरे कृच्छ्रमन्तरशोणिते ॥
नवाहमतिकृच्छ्रं स्यात् पाणिपूरान्नभोजनम् ।
त्रिरात्रमुपवासः स्यादतिकृच्छ्रः स उच्यते ॥
सर्व्वेषामेव पापानां सङ्करे समुपस्थिते ।
शतसाहस्रमभ्यस्ता गायत्री शोधनं परम् ॥

इति पाराशरे धर्म्मशास्त्रे एकादशोऽध्यायः ।

द्वादशोऽध्यायः।

दुःस्वप्नं यदि पश्येत्तु वान्ते वा क्षुरकर्मणि।
मैथुने प्रेतधूमे च स्नानमेव विधीयते॥
अज्ञानात् प्राश्य विण्मूत्रं सुरां वा पिबते यदि।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥
अजिनं मेखला दण्डो भैक्षचर्य्या व्रतानि च।
निवर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि॥
स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं विधीयते।
पञ्चगव्यं ततः कृत्वा स्नात्वा पीत्वा विशुद्ध्यति॥
जलाग्निपतने चैव प्रव्रज्यानाशकेषु च।
प्रत्यवसितमेतेषां कथं शुद्धिर्विधीयते॥
प्राजापत्यद्वयेनापि तीर्थाभिगमनेन च।
वृषैकादशदानेन वर्णाः शुद्ध्यन्ति ते त्रयः॥
ब्राह्मणस्य प्रवक्ष्यामि वनं गत्वा चतुष्पथम्।
सशिखं वपनं कृत्वा प्राजापत्यत्रयञ्चरेत्।
गोद्वयं दक्षिणां दद्याच्छुद्धिः स्वायम्भुवोऽब्रवीत्।
मुच्यते तेन पापेन ब्राह्मणत्वञ्च गच्छति॥
स्नानानि पञ्च पुण्यानि कीर्त्तितानि मनीषिभिः।
आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च॥
आग्नेयं भस्मना स्नानमवगाह्य तु वारुणम्।
आपोहिष्ठेति च ब्राह्मं वायव्यं रजसा स्मृतम्॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते।
तत्र स्नात्वा तु गङ्गायां स्नातो भवति मानवः॥

स्नानार्थं विप्रमायान्तं देवाः पितृगणैः सह।
वायुभूताद्धि गच्छन्ति तृषार्त्ताः सलिलार्थिनः॥
निराशास्ते निवर्त्तन्ते वस्त्रनिष्पीड़ने कृते।
तस्मान्न पीड़येद्वस्त्रमकृत्वा पितृतर्पणम्॥
विधुनोति हि यः केशान् स्नातः प्रस्नवतोद्विजः।
आचामेद्वा जलस्थोऽपि स वाह्यः पितृदैवतैः॥
शिरः प्रावृत्य कं बद्धा मुक्तकच्छशिखोऽपिवा।
विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत्॥
जले स्थलस्थो नाचामेज्जलस्थश्च वहिःस्थले।
उभे स्पृष्ट्वा समाचान्त उभयत्र शुचिर्भवेत्॥
स्नात्वा पीत्वा क्षुते सुप्ते भुक्ते रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासोविपरिधाय च॥
क्षुते निष्ठीविते चैव दन्तोच्छिष्टे तथानृते।
पतितानाञ्च सम्भाषे दक्षिणं श्रवणं स्पृशेत्॥
ब्रह्मा विष्णुश्च रुद्रश्च सोमः सूर्य्योऽनिलस्तथा।
ते सर्वे ह्यपि तिष्ठन्ति कर्णे विप्रस्य दक्षिणे॥
दिवाकरकरैः पूतं दिवास्नानं प्रशस्यते।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्॥
मरुतो वसवो रुद्रा आदित्याश्चादिदेवताः।
सर्वे सोमे विलीयन्ते तस्मात् स्नानन्तु तद्ग्रहे॥
खलयज्ञे विवाहे च संक्रान्तौ ग्रहणेषु च।
शर्वर्य्यां दानमस्त्येषु नान्यत्रेति विनिश्चयः॥
पुत्रजन्मनि यज्ञे च तथा चात्ययकर्मणि।
राहोश्च दर्शने दानं प्रशस्तं नान्यदा निशि॥

महानिशा तु विज्ञेया मध्यस्थप्रहरद्वयम् ।
प्रदोषपश्चिमौ यामौ दिनवत् स्नानमाचरेत् ॥
चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी ।
एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत् ॥
अस्थिसञ्चयनात् पूर्वं रुदित्वा स्नानमाचरेत् ।
अन्तर्दशाहे विप्रस्य पूर्वमाचमनं भवेत् ॥
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ।
सोमग्रहे तथैवोक्तं स्नानदानादिकर्मसु ॥
कुशपूतन्तु यत्स्नानं कुशेनोपस्पृशेद्द्विजः ।
कुशेनोद्धृततोयं यत् सोमपानसमं स्मृतम् ॥
अग्निकार्य्यात् परिभ्रष्टाः सन्ध्योपासनवर्जिताः ।
वेदञ्चैवानधीयानाः सर्वे ते वृषलाः स्मृताः ॥
तस्माद्वृषलभीतेन ब्राह्मणेन विशेषतः ।
अध्येतव्योऽप्येकदेशो यदि सर्वं न शक्यते ॥
शूद्रान्नरसपुष्टस्याप्यधीयानस्य नित्यशः ।
जपतो जुह्वतो वापि गतिरूर्द्ध्वा न विद्यते ॥
शूद्रान्नं शूद्रसम्पर्कः शूद्रेण तु सहासनम् ।
शूद्राज्ज्ञानागमश्चापि ज्वलन्तमपि पातयेत् ॥
मृतसूतकपुष्टाङ्गो द्विजः शूद्रान्नभोजने ।
अहं तां न विजानामि कां कां योनिं गमिष्यति ॥
गृध्रो द्वादश जन्मानि दश जन्मानि शूकरः ।
श्वयोनौ सप्तजन्म स्यादित्येवं मनुरब्रवीत् ॥
दक्षिणार्थन्तु यो विप्रः शूद्रस्य जुहुयाद्धविः ।
ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत् ॥

मौनव्रतं समाश्रित्य आसीनो न वदेद्‌द्विजः।
भुञ्जानो हि वदेद्यस्तु तदन्नं परिवर्जयेत्॥
अर्द्धे भुक्ते तु यो विप्रस्तस्मिन् पात्रे जलं पिवेत्।
हतं दैवञ्च पित्र्यञ्च आत्मानञ्चोपघातयेत्॥
भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः।
न देवा स्तृप्तिमायान्ति निराशाः पितरस्तथा॥
गृहस्थस्तु यदा युक्तो धर्ममेवानुचिन्तयेत्।
पोष्यधर्मार्थसिद्ध्यर्थं न्यायवर्त्ती सुबुद्धिमान्॥
न्यायोपार्जितवित्तेन कर्त्तव्यं ह्यात्मरक्षणम्।
अन्यायेन तु यो जीवेत् सर्वकर्मवहिष्कृतः॥
अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः।
दृष्टमात्रं पुनन्त्येते तस्मात् पश्येत्तु नित्यशः॥
अरणिं कृष्णमार्जारश्चन्दनं सुमणिं घृतम्।
तिलान् कृष्णाजिनं छागं गृहे चैतानि रक्षयेत्॥
गवां शतं सैकवृषं यत्र तिष्ठत्ययन्त्रितम्।
तत्क्षेत्रं दशगुणितं गोचर्म परिकीर्त्तितम्॥
ब्रह्महत्यादिभिर्मर्त्यो मनोवाक्कायकर्मजैः।
एतद्गोचर्मदानेन मुच्यते सर्वकिल्बिषैः॥
कुटुम्बिने दरिद्राय श्रोत्रियाय विशेषतः।
यद्दानं दीयते तस्मै तदायुर्वृद्धिकारकम्॥
आषोड़शदिनादर्वाक् स्नानमेव रजस्वला।
अत ऊर्द्ध्वं त्रिरात्रं स्यादुशना मुनिरब्रवीत्॥
युगं युगद्वयञ्चैव त्रियुगञ्च चतुर्युगम्।

चाण्डालसूतिकोदक्यापतितानामधः क्रमात् ॥
ततः सन्निधिमात्रेण सचैलं स्नानमाचरेत् ।
स्नात्वावलोकयेत् सूर्य्यमज्ञानात् स्पृशति यदि ॥
वापीकूपतड़ागेषु ब्राह्मणो ज्ञानदुर्बलः ।
तोयं पिवति वक्क्रेण श्वयोनौ जायते ध्रुवम् ॥
यस्तु क्रुद्धः पुमान् भार्य्यां प्रतिज्ञायाप्यगम्यताम् ।
पुनरिच्छति ताङ्गन्तुं विप्रमध्ये तु श्रावयेत् ॥
श्रान्तः क्रुद्धस्तमोभ्रान्त्या क्षुत्पिपासाभयार्द्दितः ।
दानं पण्यमकृत्वा च प्रायश्चित्तं दिनत्रयम् ॥
उपस्पृशेत्त्रिषवणं महानद्युपसङ्गमे ।
चीर्णान्ते चैव गां दद्याद्ब्राह्मणान् भोजयेद्दश ॥
दुराचारस्य विप्रस्य निषिद्धाचरणस्य च ।
अन्नं भुक्त्वा द्विजः कुर्य्याद्दिनमेकमभोजनम् ॥
सदाचारस्य विप्रस्य तथा वेदान्तवादिनः ।
भुक्त्वान्नं मुच्यते पापादहोरात्रान्तु वै नरः ॥
ऊर्द्ध्वोच्छिष्टमधोच्छिष्टमन्तरीक्षमृतौ तथा ।
कृच्छ्रत्रयं प्रकुर्व्वीत आशौचमरणे तथा ॥
कृच्छ्रदेव्ययुतञ्चैव प्राणायामशतत्रयम् ।
पुण्यतीर्थे नार्द्रशिरः स्नानं द्वादशसंख्यया ।
द्वियोजनं तीर्थयात्रा कृच्छ्रमेवं प्रकल्पितम् ॥
गृहस्थः कामतः कुर्य्याद्रेतसः सेचनं भुवि ।
सहस्रन्तु जपेद्देव्याः प्राणायामैस्त्रिभिः सह ॥
चातुर्वेद्योपपन्नस्तु विधिवद्ब्रह्मघातके ।

समुद्रसेतुगमनप्रायश्चित्तं विनिर्द्दिशेत् ॥
सेतुबन्धपथे भिक्षां चातुर्वर्ण्यात् समाचरेत्।
वर्जयित्वा विकर्मस्थांश्छत्रोपानद्विवर्जितः ॥
अहं दुष्कृतकर्मा वै महापातककारकः।
गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः ॥
गोकुलेषु वसेच्चैव ग्रामेषु नगरेषु च।
तथा वनेषु तीर्थेषु नदीप्रस्रवणेषु च ॥
एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरम्।
दशयोजनविस्तीर्णं शतयोजनमायतम् ॥
रामचन्द्रसमादिष्टं नलसञ्चयसञ्चितम्।
सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति ॥
यजेत वाश्वमेधेन राजा तु पृथिवीपतिः ॥
पुनः प्रत्यागतो वेश्म वासार्थं सुपसर्पति।
सपुत्रः सह भृत्यैश्च कुर्य्याद्ब्राह्मणभोजनम् ॥
गांश्चैवैकशतं दद्याच्चातुर्वेद्येषु दक्षिणाम्।
ब्राह्मणानां प्रसादेन ब्रह्महा तु विमुच्यते ॥
सवनस्थां स्त्रियं हत्वा ब्रह्महत्याव्रतं चरेत् ॥
मद्यपश्च द्विजः कुर्य्यान्नदीं गत्वा समुद्रगाम् ॥
चान्द्रायणे ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्।
अनडुत्सहितां गाञ्च दद्याद्विप्रेषु दक्षिणाम् ॥
अपहृत्य सुवर्णन्तु ब्राह्मणस्य ततः स्वयम्।
गच्छेन्मुषलमादाय राजाभ्यासं वधाय तु ॥
ततः शुद्धिमवाप्नोति राज्ञासौ मुक्तएवच।

कामकारकृतं यत् स्यान्नान्यथा वधमर्हति॥
आसनाच्छयनाद्यानात् सम्भाषात् सहभोजनात्।
संक्रामति हि पापानि तैलविन्दुरिवाम्भसि॥
चान्द्रायणं यावकञ्च तुलापुरुष एवच॥
गवाञ्चैवानुगमनं सर्वपापप्रणाशनम्॥
एतत् पाराशरं शास्त्रं श्लोकानां शतपञ्चकम्।
द्विनवत्या समायुक्तं धर्मशास्त्रस्य संग्रहः॥
यथाध्ययनकर्माणि धर्मशास्त्रमिदं तथा।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिना॥
इति पाराशरे धर्मशास्त्रे द्वादशोऽध्यायः॥

समाप्ता चेयं पराशरसंहिता॥

अथ वृहत्पराशरसंहितायाम् ।

प्रथमोऽध्यायः ।

व्यक्ताव्यक्ताय देवाय वेधसेनऽन्ततेजसे ।
नमस्कृत्वा प्रवक्ष्यामि धर्मान् पाराशरोदितान् ॥
अथातो हिमशैलाग्रे देवदारुवनाश्रमे ।
व्यासमेकाग्रमासीन ऋषयः प्रष्टुमागताः ॥
मानुषाणां हितं धर्मं वर्त्तमाने कलौ युगे ।
वर्णानामाश्रमाणाञ्च किञ्चित्साधारणं वद ॥
युगे युगेषु ये प्रोक्ता धर्मा मन्वादिभिर्मुने ! ।
वाच्यं तेनैव ते कर्त्तुं वर्णैराश्रमवासिभिः ॥
स पृष्टो मुनिभिर्व्यासो मुनिभिः परिवेष्टितः ।
प्रष्टुं जगाम पितरं धर्मान् पाराशरं ततः ॥
सर्वेषा माश्रमाणाञ्च वरे वदरिकाश्रमे ।
स विवेशाश्रमे तस्मिन् तनुं योगीव वेधसः ॥
नानापुष्पलताकीर्णे फलपुष्पैरलङ्कृते ।
नदी प्रस्रवणानेकैः पुण्यतीर्थोपशोभिते ॥
मृगपक्षिभिराकीर्णे देवतायतनावृते ।
यक्ष गन्धर्व सिद्धैश्च नृत्यगीतसमाकुले ॥

तस्मिन्नृषिसभामध्ये शक्तिपुत्रः पराशरः।
सुखासीनो महातेजा मुनिमुख्यगणावृतः॥
कृताञ्जलिपुटो भूत्वा व्यासस्तु मुनिभिः सह।
प्रदक्षिणाभिवादैश्च मुनिभिः प्रतिपूजितः॥
ततः सन्तुष्टमनसा पाराशरमहामुनिः।
व्यासस्य स्वागतं ब्रूयात् आसीनो मुनिपुङ्गवः॥
वशस्य स्वागतं तेन आसीनानां समन्ततः।
कुशलं कुशलेत्युक्त्वा व्यासः पृच्छ ततः परम्॥
यदि जानासि मां भक्तं स्नेहोवा यदि वत्सलः।
धर्मं कथय मे तात! अनुग्राह्यो ह्यहं यदि॥
श्रुतास्तु मानवा धर्मा गार्गीया गौतमास्तथा।
वाशिष्ठाः काश्यपाश्चैव तथा गोपालकस्य च॥
आत्रेया विष्णुसम्बन्धा दाक्षाश्चाङ्गिरसस्तथा।
शातातपाश्च हारीतयाज्ञवल्क्यकृतास्तथा॥
आपस्तम्बकृता धर्माः सशङ्खलिखितास्तथा।
कात्यायनकृताश्चैव प्रचेतसकृतास्तथा॥
श्रुतिरालोड्डवा तात! श्रुत्यर्था मानवाः स्मृताः।
मन्वर्थं सर्वधर्माणां कृतादि त्रियुगेषु च॥
धर्मन्तु त्रियुगाचारं स शक्यन्तु कलौ युगे।
वर्णानामाश्रमाणाञ्च किञ्चित्साधारणं वद॥
व्यासवाक्यावसानेतु मुनिमुख्यः पराशरः।
सुखासीनो महातेजा इदं वचनमब्रवीत्॥
क्रियन्ते नैव वेदाश्च नैवान्ये प्रभवन्ति ते।
न कश्चिद्वेदकर्त्तास्ति वेदस्मर्त्ता चतुर्मुखः॥

तथा सधर्मं स्मरति कल्पे कल्पान्तरान्तरे।
अन्ये कृतयुगे धर्मा स्त्रेतायां द्वापरे परे॥
अन्ये कलियुगे नृणां युगह्रु सानुरूपतः।
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते॥
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे।
कृते तु मानवा धर्मा स्त्रेतायां गौतमस्य च॥
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः।
त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्॥
द्वापरे कुलमेकन्तु कर्त्तारञ्च कलौ युगे।
कृते सम्भाष्य पतिते स्त्रेतायां स्पर्शनेन च॥
द्वापरे भक्षणोऽन्नस्य कलौ पतति कर्मणा।
अभिगम्य कृते दानं त्रेतामाहूय दीयते॥
द्वापरे याच्यमानन्तु सेवया दीयते कलौ।
अभिगम्योत्तमन्दानम् आहूतञ्चैव मध्यमम्॥
अधमं याच्यमानं स्यात् सेवादानञ्च निष्फलम्।
कृते त्वस्थिगताः प्राणा स्त्रेतायां मांस मेव च॥
द्वापरे रुधिरं यावत्कलौत्वन्नाद्यमेव च।
कृते तात्क्षणिकः शाप स्त्रेतायां दशभिर्दिनैः॥
मासेन द्वापरे ज्ञेयः कलौ सम्वत्सरेण तु।
युगे युगेषु ये धर्मास्तेषु धर्मेषु ये द्विजाः॥
ते द्विजा नावमन्तव्या युगरूपा द्विजोत्तमाः।
धर्मस्य सत्यमायुश्च तुर्य्यांशेन कलौ युगे॥
अदनात्तदनद्यस्य तुच्छमासुरकार्य्यतः।
धर्मस्य लोकदम्भार्थं पाषण्डार्थं तपस्विनः॥

विविधा वाग्वञ्चनार्थं कलौ सत्यानुसारिणी।
अल्पक्षीरप्रदा गावो ह्यल्पसस्या च मेदिनी॥
स्त्रीजनस्य स्त्रियः सर्वा रत्यर्थं कृतमैथुनाः।
पुरुषश्च जिताः स्त्रीभी राजानो दस्युभिर्जिताः॥
जितो धर्मश्च पापेन अनृतेन तथा ऋतम्।
शूद्राश्च ब्राह्मणाचाराः शूद्राचारास्तथा द्विजाः॥
अन्त्यानुयायिनश्चाद्या वर्णास्तदुपजीविनः।
कृतन्तु ब्राह्मणयुग त्रेता तु क्षत्रियं युगम्॥
वैश्यन्तु द्वापरयुगं कलिः शूद्रयुगं स्मृतम्।
चातुर्वर्णिकनारीणां तथा तुरीयजन्मनी॥
यतिर्द्विजाभ्युपास्यादि धर्मेद्धि मंहती कलौ॥
शनि नयाकर्नि दत्ते फलाप्तिः पुरुषस्य सा॥
दत्तेषु दशभिर्नृणां फलाप्तिः स्यात् कलौ युगे।
युगस्वरूपमाख्यातमन्यं निगदतः शृणु॥
वर्णाश्रमाश्रमाणाञ्च सर्वेषां धर्मसाधनम्।
मृगः कृष्णश्चरेद्यत्र स्वभावेन महीतले॥
वसेत्तत्र द्विजातिस्तु शूद्रो यत्र तु तत्र तु।
हिमपर्वतविन्ध्याद्रौ विनाशेन प्रयागयोः॥
मध्ये तु पावनोद्देशो म्लेच्छदेशस्ततः परम्।
देशेष्वन्येषु या नद्यो धन्याः सागरगाः शुभाः॥
तीर्थानि यानि पुण्यानि मुनिभिः सेवितानि च।
वसेयुस्तदुपान्तेऽपि समिच्छन्तो द्विजातयः॥
मुनिभिः सेवितत्वाच्च पुण्यदेशः प्रकीर्तितः।
यत्र पानं नपेयस्य देशेऽभक्ष्यस्य भक्षणम्॥

अगम्यागामिता यत्र तं देशं परिवर्जयेत्।
एवं देश: समाख्यातो यत्रीय सु द्विजन्मनाम्॥
एव मेवानुवर्त्तेरन्देशं धर्मानुकाङ्क्षिण:।
वसन्वा यत्र तत्रापि स्वाचारं न निवर्जयेत्॥
षट्कर्माणि च कुर्वीरन् इति धर्मस्य निश्चय:।
पराशर: स्वयमाह शास्त्रं पुत्रस्य वत्सल:॥
अथात: सम्प्रवक्ष्यामि द्विजकर्मादिकं द्विजा:!।
षट्कर्म वर्णा धर्माश्च प्रशंसा गो वृषस्य च॥
अदोह्यवाह्यौ यौ तत्र चीरं चीरप्रयोक्रिया।
अमावास्यानिषिद्धानि ततश्च पशुपालनम्॥
अन्नतोयप्रशंसा च वाह्या वाह्या वसुन्धरा।
अयार्थक्रषतोऽपापं तदप्यस्यापि शोधनम्॥
वह्निं सिता मखश्चापि विवाह: कन्यका वरा:।
स्त्रीषु धर्मो मख: पञ्च द्विजातिस्वर्गसाधनात्॥
विधि: प्राणोऽग्निहोत्रस्य आधानादिकसंस्कृति:।
व्रतचर्य्यादि तद्धर्मा: प्रशंसा पुत्रजन्मन:॥
कृत्स्नो गृहस्थधर्मश्च भक्ष्याभक्ष्यं तथैवच।
निषिद्ध वस्तुकथनं पात्रशुद्धि स्तथा पुन:॥
द्रव्याणाञ्च तथाशुद्धिरुपाकर्माणि कर्म च।
अनध्याया स्तथा श्राद्धं विप्रा! कालहविर्युतम्॥
बलिर्नारायणीयश्च सूतकाशौच मेव च।
परिषत्प्रायश्चित्तानि तद्व्रतानि यथा द्विजा:॥
विधिवत्सर्वदानानि तेषाञ्चैव फलानि च।
भूमिदानप्रशंसा च विशेषो विप्रकालयो:॥

इष्टापूर्त्तौ तथा विद्वन्! पृथक्तयोः फलानि च।
प्रतिग्रहविधिं स्तद्वद्यथा तस्य प्रतिग्रहः॥
विनायकादिशान्तीनां विधयश्च द्विजोत्तमाः!।
वानप्रस्थस्य धर्मोऽपि तथा धर्मो यतेरपि॥
चतुराश्रमभेदोऽपि वपुर्निन्दा तथैव च।
योगोऽर्चिर्धूमयोर्मार्गौ कालं कृतान्त मेव च॥
दृष्टश्च तत्परं ध्येयं सर्वमेतत्पराशरः।
प्रोक्तवान् व्यासमुख्यानां शेषं मुनिविभाषितम्॥
नियुक्तः सुव्रतः शेषं विप्राणां ख्यापनाय च।
पराशरो व्यास वचो निशम्य
यदाह शास्त्रं चतुराश्रमार्थम्।
युगानि रूपञ्च समस्तवर्णा
हिताय वच्यत्यथ सुव्रतस्तत्॥
शक्तिसूनो रनुज्ञातः सुतपाः सुव्रतस्त्विदम्।
चतुर्वर्णाश्रमाणाञ्च हितं शास्त्र मयाब्रवीत्॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे व्यासप्रश्ने शास्त्रसंग्रहोद्देशकथनं नाम प्रथमोऽध्यायः॥१॥

द्वितीयोऽध्यायः।

पराशरमतं पुण्यं पवित्रं पापनाशनम्।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च॥
चतुर्णामपि वर्णाना माचारो धर्मपालनम्।
आचारभ्रष्टदेहानां भवेद्धर्मपराङ्मुखः॥

षट्कर्माभिरतो नित्यं देवतातिथिपूजकः।
हुतशेषन्तु भुञ्जानो ब्राह्मणो नावसीदति॥
कर्माणि कानीह कथञ्चितानि
कार्याणि वर्णैश्च क्रिमात्मकानि।
तेषा मनेहाकरणे विधिश्च
सर्वं प्रसादात्प्रतनुष्व मह्यम्॥
कर्मषट्कं प्रवक्ष्यामि यत् कुर्वन्ति द्विजातयः।
गृहस्था अपि मुच्यन्ते संसारे बन्धहेतुभिः॥
यथोद्देशक्रमं शास्त्रं यच्छ्रुतं श्रुतिहर्षकृत्।
तदुक्तं कर्म तत् पुंसां शृणुध्वं पापनाशनम्॥
सन्ध्या स्नानं जपश्चैव देवतानाञ्च पूजनम्।
वैश्वदेवं तथातिथ्यं षट्कर्माणि दिने दिने॥
सन्ध्यामथ प्रवक्ष्यामि देवताकालनामभिः।
वर्णर्षिछन्दसा युक्तं यद्विधानं यथार्चनम्॥
यांवन्मन्त्रा यथोपास्ति रुपस्पर्शनमेव च।
आवाहनं विसर्गञ्च यावन्मानं क्रमेणतु॥
दिवसस्य च रात्रेश्च सन्धः सन्ध्येति कीर्तिता॥
सोपास्या सद्द्विजैर्यत्नात् स्वात्तैर्विश्वमुपासितम्।
मध्याह्नेऽपि च सन्धिः स्यात् पूर्वस्याह्नः परस्परम्॥
पूर्वाह्नो ह्यपराह्नस्तु नये चेति श्रुतिक्रमात्।
पूर्वसन्ध्या तु गायत्री ब्राह्मणी हंसवाहना॥
रक्तपद्मारुणा देवी रक्तपद्मासनास्थिता।
रक्ताभरणभासाङ्गा रक्तमाल्याम्बरा तथा॥
अक्षमालाध्रुवा धारा चारुहस्ताऽभरार्चिता।

प्रागादित्योदयाद्विद्वान् मुहूर्त्ते वैधवे सति॥
उत्थायोपासयेत्सन्ध्यां यावत्स्यादर्कदर्शनम्।
विश्वमातः! सुराभ्यर्चे! पुण्ये! गायत्रि! वैधसि!॥
आवाहयाम्युपास्त्यर्थं एह्येनोऽस्ति पुनीहि माम्।
सन्ध्या माध्याह्निका श्वेता सावित्री रुद्रदेवता॥
वृषेन्द्रवाहना देवी बालत्रिशिखधारिणी।
श्वेताम्बरधरा श्वेता नानाभरणभूषिता॥
श्वेतस्रगक्षमालापि कृतानुरक्तशङ्करा।
जलाधारा धरा धात्री धरेन्द्राङ्गभवाभवा॥
स्वभाविभातभूराद्या सुरौघनुतपादृद्वया।
मातर्भवानि! विश्वेशि! विश्वविश्वजनार्चिते!॥
शुभे! वरे! वरेण्या हि आहूता हि पुनीहि माम्॥
सन्ध्या सायन्तनी कृष्णा विष्णुदेवा सरस्वती।
स्वर्गगा कृष्णवस्त्रा तु शङ्खचक्रगदाधरा॥
कृष्णस्त्रभूषणैर्युक्ता सर्वज्ञानमया वरा।
सर्ववाग्देवता सर्वा ब्रह्मादिवचसि स्थिता॥
वीणाक्षमालिका चारुहस्ता स्मिता वरानना।
चतुर्दशजनाभ्यर्च्या कल्याणी शुभकप्रदा॥
मातर्वाग्देवते! देवि। वरेण्ये! च वरप्रदे!।
सर्वमङ्गलसुत्ये! आहूते! हि पुनाहि माम्॥
ब्रह्मेशार्कहरीणान्तु सङ्गमोऽस्तूभयोर्भवेत्।
माध्याह्निकायां सन्ध्यायां सर्वदेवसमागमः॥
पूजाभिकाङ्क्षिणो येच येच किञ्चिज्जनार्थिनः।
आज्यान्नभागधेया ये येचाग्निहुतभागिनः॥

अन्यान्युच्चावचानीह स्थावराणि चराणि च ।
साध्याह्निकामुपेचन्ते तेषामाप्यायिका हि सा ॥
यस्तस्यां नार्चयेद्देवान् तर्पयेत पितॄंस्तथा ।
भूतान्युच्चावचानीह सोऽन्धतामिस्रमृच्छति ॥
ईशान्याभिमुखो भूत्वा द्विजः पूर्वमुखोऽपि वा ।
सन्ध्यामुपासयेद्यद्वत्तथावत्तन्निबोधत ॥
आमणेर्वन्धनाद्धस्तौ पादौ चाजानुतः शुचिः ।
प्रक्षाल्य चाचमेद्विद्वानन्तर्जानुकरो द्विजः ॥
निर्मलात् फेनपूताभि र्मनोज्ञाभिः प्रयत्नवान् ।
आचमेद्ब्रह्मतीर्थेण पुनराचमनाच्छुचिः ॥
वक्त्रनिर्मार्जनं कृत्वा द्विस्तेनैवाधराख्यया ।
अद्भिश्च संस्पृशेत् खानि सर्वाण्यपि विशुद्धयेत् ॥
अङ्गुष्ठेन प्रदेशिन्या सव्यपाणिस्थवारिणा ।
घ्राणं संस्पृश्य नेत्रे च तेन नासिकया श्रुती ॥
नाभिञ्च तत्कनिष्ठाभ्यां वक्षः करतलेन च ।
शिरः सर्वाभिरंशौ च अङ्गुल्यग्रैश्च संस्पृशेत् ॥
अनस्य प्राणसंरोधं कृत्वा चोपस्पृशेत्पुनः ।
अत्रोपस्पर्शने मन्त्रं प्रातः केचित्पठन्ति हि ॥
सूर्य्यश्च मेति मध्याह्ने पुनस्त्वापो विपर्ययम् ।
मन्त्राभिमन्त्रितं कृत्वा कुशपूतञ्च तज्जलम् ॥
आचम्य विधिवद्धीमान् सन्ध्योपासन माचरेत् ॥
सोङ्कारां चैव गायत्रीं जप्त्वा व्याहृतिपूर्वकम् ।
आपोहिष्ठादि जल्पन्ति च्छन्दोदैवर्षिपूर्वकम् ॥
छन्दोभिर्विनियोगैश्च मन्त्रब्राह्मणसंयुतम् ।

एतद्धीनं न कुर्वीत कुर्य्यात् चेत्तत्तदासुरम् ॥
मृत्युभीतैः पुरा देवैरात्मनश्छादनाय च ।
छन्दांसि संस्मृतानीह छादितास्तैस्ततोऽमराः ॥
छादनाच्छन्द उद्दिष्टं वाससी कृत्तिरेव वा ।
छन्दोभिरावृतं सर्वं विद्या सर्वत्र नान्यतः ॥
यस्मिन्मन्त्रे तु ये देवा स्तेन मन्त्रेण चिह्नितम् ।
मन्त्रं यद्दैवतं विद्यात् सवितुस्तत्र देवता ॥
येन यदृषिणा दृष्टं सिद्धिः प्राप्ता तु येन वै ।
मन्त्रेण तस्य संप्रोक्तो मुनेर्भावस्तदात्मकः ॥
यत्र कर्मणि चारब्धे जपहोमार्चनादिके ।
क्रियते येन मन्त्रेण विनियोगस्तु स स्मृतः ॥
अस्य मन्त्रस्य चार्थोऽयमयं मन्त्रोऽनुवर्त्तते ।
तत्तस्य ब्राह्मणा ज्ञेयं मन्त्रस्येति श्रुतिक्रमः ॥
एतद्धि पञ्चकं ज्ञात्वा क्रियते कर्म यद्द्विजैः ।
तदनन्तफलं तेषां भवेद्वेदनिदर्शनात् ॥
अकामेनापि यन्न्यूनं कुर्य्यात् कर्म द्विजोऽपि यः ।
तेनासौ हन्यते कर्त्ताऽव्रती गन्त्वाधमृच्छति ॥
कुर्वन्नज्ञो द्विजः कर्म जपहोमादि कञ्चन ।
नासौ तस्य फलञ्चिन्देत् कर्ममात्रं हि तस्य तत् ॥
आपद्यते स्थाणु गर्तं स्वयं वापि प्रलीयते ।
या तथामानि छन्दांसि भवत्यफलदान्यपि ॥
सिन्धुद्वीप ऋषिश्छन्दो गायत्रीस्तत्तु तिसृषु ।
आपो हि दैवतं प्रोक्त रापोहिष्ठादिषु द्विजाः ॥
गोभिलो राजपुत्रस्तु द्रुपदायास्तृषिर्भवेत् ।

अनुष्टुभं भवेच्छन्द आपश्चैव तु दैवतम् ॥
सौत्रामण्यावभृतके विनियोगस्य कल्पितः ॥
उदुत्यमृषिः प्रस्कण्वो गायत्रं सूर्य्यदेवता ।
चित्रमित्यत्र कुत्सस्तु शर्वरी सूर्य्यदेवता ॥
प्रणवो भूर्भुवः स्वश्च गायत्र्याप ऋचा त्रयम् ॥
अघमर्षणसूक्तस्य ऋषिरेवाघकर्मणा ।
छन्दोऽत्रानुष्टुभं प्रोक्त रापश्चैव तु दैवतम् ॥
द्रुपदाघमर्षणं सूक्तं मार्जने व्याहरेदिति ।
स्मृतिभिः परिशिष्टैश्च विशेषस्तोयसेचने ॥
उल्काज्योर्द्धं विभागेन कर्तव्यः सोऽपि स द्विजैः ।
आपोहिष्ठेति त्रिऋचं अष्टाक्षरपदं नच ॥
पादान्ते प्रक्षिपेद्वापि पादमध्येन च क्षिपेत् ।
भूमौ मूर्द्ध्नि तथाकाशे मुद्धाकाशे तथा भुवि ॥
एवं वारिं द्विजः सिञ्चन् तर्पयेत् सर्वदेवताः ।
उदुत्यञ्चित्रं देवाना मुपस्थाने नियोजयेत् ॥
हंसः शुचिः सदित्यादि केचिदिच्छन्ति सूरयः ।
अव्याकृतमिदं ह्यासीत् सदेवासुरमानुषम् ॥
सङ्क्षेपायासृजद् ब्रह्मा सप्तमा व्याहृतीः पुरा ।
भूर्भुवः स्वर्मह र्जनस्तपः सत्यं तथैव च ॥
आद्यास्तिस्रो महाप्रोक्ताः सर्वत्रैव नियोजनात् ।
अग्निर्वायुस्तथा सूर्य्यो बृहस्पत्याप एव च ॥
इन्द्रश्च विश्वदेवाश्च देवताः समुदाहृताः ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥
त्रिष्टुप् च जगतीचैव छन्दांस्येतान्यनुक्रमात् ।

भरद्वाजः कश्यपश्च गौतमोऽत्रिस्तथैव च ॥
विश्वामित्रो जमदग्निर्वशिष्ठश्च ऋषिः क्रमात् ।
एताभिः सकलं व्याप्तमेताभ्यो नास्ति चापरम् ॥
सप्तैते स्वर्गलोका वै सत्यादूर्द्ध्वन्नविद्यते ।
तस्माल्लोकात्परा मुक्ति रर्व्वाचीना पदेच्छया ॥
प्राणसंयमनेष्वेता अभ्यस्याः पूर्वकादिभिः ।
ॐमापोज्योतिरित्येतच्छिरः पश्चात्प्रयुज्यते ॥
प्रत्योङ्कारसमायुक्तो मन्त्रोऽयं तैत्तिरीयके ।
अतोङ्कारवदार्षादि विदु र्ब्रह्मविदो जनाः ॥
प्रणवाद्यन्त गायत्री प्राणायामेष्वयं विधिः ॥
गायत्र्यादिकचित्राल्लै र्मन्त्रैश्च प्रागुदीरितैः ॥
उपासीरन्द्विजास्तावद्यावन्नोदेति भास्करः ।
गवां बालपवित्रेण यस्तु सन्ध्यामुपासते ॥
सर्वतीर्थाभिषेकं तु लभते नात्र संशयः ।
गोबालदर्भसारञ्च खड्गं कनकमेव च ॥
दर्भतास्त्रतिलं वापि एतैस्तर्पणकाद्विजाः ।
स सन्तर्प्य पितृन्देवानात्मानं त्रिदिवं नयेत् ॥
त्रिंशत्कोट्यस्तु विख्याता मन्देहा नाम राक्षसाः ।
उद्यन्तं ते विवस्वन्तं बलादिच्छन्ति खादितुम् ॥
दिने दिने सहस्रांशु रद्भ्यस्तैरभिद्रुतः ।
भानुर्हीनः कृतस्तेषां तद्वश्यत्वमिहागतः ॥
अतस्तस्य च तेषाञ्च ह्यभूद्युद्धं सुदारुणम् ।
किं भविष्यति युद्धेऽस्मिन् नित्यभूसुरविस्मयः ॥
अरुणस्य च ये बाणा यद्वलन्तो विवस्वतः ।

विलज्ञ्यास्ते निवर्त्तन्ते मन्देहानामदर्शनात् ॥
रवेरप्यशक्तो ह्यस्मात् यातायाता ह्यशक्तितः।
अप्राप्तशरीराणां स्वामिनैव लयङ्गताः ॥
हेषाशब्दमकुर्व्वाणाः शफस्फुरणवर्जिताः।
स्वाङ्गा निर्जयाज्जाताः सूर्य्यस्यन्दनवाजिनः ॥
ततो देवगणाः सर्वे ऋषयश्च तपोधनाः।
यत्सन्ध्यान्ते उपासीत प्रक्षिपन्ति जलं महत् ॥
ओँङ्कारब्रह्मसंयुक्तं गायत्र्या चाभिमन्त्रितम्।
दह्येरंस्तेन ते दैत्या वज्रिभूतेन वारिणा ॥
सहस्रांशुरथे तिष्ठन् योऽधीयानश्च तु स्मृतीः।
याज्ञवल्क्यः समीचेत ऋषीशानुक्तवांस्ततः ॥
सत्वे त्वनुदिवादित्ये सन्ध्योपास्तिकरी भवेत्।
उदिते सति या सन्ध्या बालक्रीड़ोपमा च सा ॥
सन्ध्या येन न विज्ञाता ज्ञात्वा नैव ह्युपासिता।
स जीवन्नेव शूद्रश्च ह्याशु गच्छति सान्वयः ॥
मान्त्रं पार्थिवमाग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसञ्चेति सप्तैतानु क्रमेण तु ॥
शन्न आपस्तु वै मान्त्रं मृदालम्भन्तु पार्थिवम्।
भस्मना स्नानमाग्नेयं गोरेणूनानिलं स्मृतम् ॥
आतपे सति या वृष्टि र्दिव्यस्नानं तदुच्यते।
बहिर्नद्यादिके स्नानं वारुणं प्रोच्यते बुधैः ॥
यत्ध्यानं मनसा विष्णोर्मानसं तत्प्रकीर्त्तितम्।
असामर्थ्येन कायस्य कालशक्त्याद्यपेक्षया ॥
तुल्यं फलानि सर्वाणि स्मरत्याह पराशरः।

स्नानानां मानसंस्थानं मन्वाद्यैः परमं स्मृतम् ॥
कृतेन येन मुच्यन्ते गृहस्था अपितु द्विजाः ।
नित्यादीनां त्रयाणां तु स्नानानामौषसं परम् ॥
सद्यः पापहरं प्राहुः प्राजापत्यव्रताधिकम् ।
उषस्युषसि यत्स्नानं क्रियतेऽनुदितेऽरवौ ॥
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ।
प्रातरुत्थाय यो विप्रः प्रातःस्नायी सदा भवेत् ॥
सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ।
अस्नातो नाचरेत्कर्म जपहोमादि किञ्चन ॥
विद्यन्ते च सुप्तानि दूषितानि स्रवन्ति च ।
अङ्गानि समतां यान्ति उत्तमान्यधमैः सह ।
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।
स्रवते च दिवारात्रौ प्रातः स्नानेन शुद्ध्यति ॥
उषःस्नानं प्रशंसन्ति सर्वे च पितरोऽमराः ।
दृष्टादृष्टकरं पुण्यं शंसन्ति पितरोऽपि हि ॥
प्रातःस्नायी हि यो विप्रः सोऽर्हः स्यात्सर्वकर्मसु ।
तत्कृतं कर्म यत्किञ्चित्तत्सर्वं स्याद्यथार्थवत् ॥
अविद्वान् स्नानकालेतु यः कुर्य्याद्दन्तधावनम् ।
पापीयान् रौरवं याति पितृशापहतो ध्रुवम् ॥
यच्च श्मश्रुषु केशेषु यद्वा देहे च लोमसु ।
हस्ताभ्याञ्च न वस्त्रेण जलं विद्वान् हि मार्जयेत् ॥
मार्जिते पितरः सर्वे सर्वा अपिच देवताः ।
तथा सर्वे मनुष्याश्च त्यजेरन नियतं द्विजम् ॥
स्नानं सञ्चिन्तितं सर्वे तीर्थं पितृदिवौकसः ।

ततो नद्यादिसौ गच्छन्निराशा स्ते प्रयान्ति हि॥
येतु स्नानार्थिन स्तीर्थं सञ्चिन्तन्ति जलाश्रयाः।
तद्देह मुपतिष्ठन्ति ब्रह्मैव पितृदिवौकसः॥
अतो न चिन्तयेत्तीर्थं व्रजेद्देवतु चिन्तितम्।
देवखातनदीस्रोतःसरःसु स्नान माचरेत्॥
स्नानं नद्यादि बन्धेषु सद्भिः कार्यं सदम्बुषु।
कृत्रिमन्तोयं कूपस्थं तोयं तत्र तु कृत्रिमम्॥
न तीर्थे स्त्र्याकुले स्नायान्न सज्जनसमाश्रिते।
दर्भहीनोऽन्यचित्तस्तु न नग्नो न शिरो विना॥
कदाचिद्विदुषा मिथ्या न स्नातव्यं पराम्भसा।
अम्भःकर्तुः कृतांशेन स्नानकर्त्तापि लिप्यते॥
पञ्च वा सप्त वा पिण्डान् स्नायादुद्धृत्य तत्र तु।
वृथास्नानादिकानीह विशेषेण विवर्जयेत्॥
वृथा चोष्णोदकस्नानं वृथा जप्यमवैदिकम्।
वृथा चाश्रोत्रिये दानं वृथा भुक्तमसाक्षिकम्॥
मासे नभसि न स्नायात्कदाचिन्निम्नगासु च।
रजस्वला भवन्त्येता वर्जयित्वा समुद्रगाः॥
नापो मूत्रपुरीषाभ्यां नाग्निर्दहति कर्मणा।
न स्त्री दुष्यति जारेण न विप्रो वेदकर्मणा॥
न स्नायात् क्षोभितास्तासु स्वयं न क्षोभयेच्च ताः।
न निर्गतासु तीर्थाच्च पतन्तीष्वाहतासु च॥
रविसंक्रान्तिवारेषु ग्रहणेषु शशिक्षये।
व्रतेषु चैव षष्ठीषु न स्नायादुष्णवारिणा॥
न स्नायाच्छूद्रहस्तेन नैकहस्तेन वा तथा।

उष्णाभिरपि स्नाया दाहृताभिर्द्विजातिभिः ॥
स्वभावाभिरनुष्णाभिः नहसाभिस्तथा द्विजः ।
नवाभिर्निर्दशाहाभिरसंस्पृष्टाभिरन्त्यजैः ॥
यः स्नानमाचरेन्नित्यं तं प्रशंसन्ति देवताः ।
तस्माद्दशगुणं स्नानं सदा कार्यं द्विजातिभिः ॥
उत्साहाप्यायनस्वान्त प्रशान्तिशक्तिवृद्धिदम् ।
कीर्तिं कान्ति वपुः पुष्टि सौभाग्यायुःप्रवर्धनम् ॥
स्वर्गश्च दशभिर्युक्तं गुणैः स्नानं प्रशस्यते ।
सूर्य्यादि दिनवारोक्तं तैलाभ्यञ्जनपूर्वकम् ॥
हृत्तापकीर्त्तिमरणं सुतस्थानाशित्यवः ।
आयुश्चार्कादिवारेषु तैलाभ्यङ्गे फलं क्रमात् ॥
जलावगाहनं नित्यं स्नानं सर्वेषु वर्णिषु ।
शक्तेरहरहः कार्यं तस्याथ विधिरुच्यते ॥
गोशकृन्मृत्कुशांश्चैव पुष्पाणि पत्रिकां तथा ।
स्नानार्थी प्रयतोनित्यं स्नानकाले सदाहरेत् ॥
स्वमनोऽभिमतं तीर्थं गत्वा प्रक्षाल्य पादयोः ।
हस्तौ चाचम्य विधिवच्छिखाबन्धैकचेतसा ॥
मृदम्बुभिश्च गात्राणि क्रमात्प्रक्षालयेद्यथा ।
पादौ जङ्घे कटीश्चैव क्रमात्प्राणं जलैस्त्रिभिः ॥
प्रक्षाल्य हस्ता वाचम्य नमस्कृत्य च तज्जलम् ।
गुह्योपगुह्यम् इत्येतद्यञ्जसा प्रयताञ्जलिः ॥
उरू देहेतिमन्त्रं च कुर्य्यादापोऽभिमन्त्रिताः ।
विधिज्ञाः कवयः केचिन्मन्त्रतत्वार्थवेदिनः ॥
यत्र स्थानेषु यत्तीर्थं नदी पुण्यतरा तथा ।

तां ध्यायेन्मनसा नित्यम न्यतीर्थं न चिन्तयेत् ॥
गङ्गादिपुण्यतीर्थानि क्षत्रिमादिषु संस्मरेत्।
तां ध्यायेन्मनसा वापि अन्यतीर्थं न चिन्तयेत्।
महाव्याहृतिभिः पश्चाद्राचामेत्प्रयतोऽपि सन्।
उदुत्तम इतित्यस्तु मन्त्रेण प्राङ्मुखो विशेत् ॥
येऽग्नयो दिवि चेत्ये तत्कुर्य्याद्दालम्भन न्ततः।
सूर्य्यं पश्यन् जलं मुक्ता समुत्तीर्य ततः स्थलम् ॥
आचम्याथ हरेन्मृत्स्नान्तया कायं समालभेत्।
अश्वक्रान्ते रथक्रान्त इत्याद्यपि पठन्तिहि ॥
मृत्तिका हरणे चैव इति वाशिष्ठजोऽब्रवीत्।
समालभेत्त्रिभिर्मन्त्रै रिदं विष्णादिभिर्द्विजः ॥
शिरश्चांसा वक्ष उरः पादौ जङ्घं क्रमेणतु।
भास्कराभिमुखो मज्जेदापो ह्यस्मानिति त्रिभिः ॥
उद्धृत्य सर्वगात्राणि निमज्याथ पुनः पुनः।
उत्तीर्य्याचम्य गात्राणि गोमयेनाथ लेपयेत् ॥
मानसोक्त इति त्युक्ता प्राग्वदङ्गक्रमेण तु।
इमं मे वरुण ! त्वन्नः सत्यं नय उदुत्तमम् ॥
ऋचं त्ववभृथेत्येतैरात्मान मभिषेचयेत्।
निमज्याचम्य चात्मानं दर्भैर्मन्त्रैश्च पावयेत् ॥
हविष्मतीरिमा आप इदमाप स्तथैवच।
देवीराप इति द्वाभ्यामापो देवीरितीत्यृचा ॥
संस्मृत्य द्रुपदां देवीं शन्नो देवीरपां रसम्।
प्रत्यङ्गं मन्त्रनवकमापो देवी पुनन्तु माम् ॥
चिन्तितं मां पुनात्वेतन्मन्त्रेणापि च पावयेत्।

हिरण्यवर्णा इति च पावमाना तथापरे ॥
तरत्समन्दि धावन्ति पवित्राण्यानि शक्तितः ।
स्नानकर्मात्मकैर्मन्त्रै रन्यैरप्यम्बु दैवतैः ॥
प्राण्यात्मान निमज्याथ आचान्तस्त्वन्यदाचरेत् ।
कार्यं कायप्रदेशानां तथा चैवोदकस्य च ॥
प्राक्तत्ये सति चैवायं विधिरन्यो विपर्यये ।
सोङ्काराञ्चैव गायत्रीं महाव्याहृतिभिः सह ॥
त्रिसप्त वैकशावर्त्ता स्नानाद्विद्वानपि द्विजः ।
च्छन्दोमन्यं परैर्युक्तं स्वशाखाक्षरसंयुतम् ॥
आवर्त्य प्रणवं स्नायाच्छतमर्धशतं दशम् ।
चिद्रूपं परमं ज्योतिर्निरालम्बमनामयम् ॥
अव्यक्त मव्ययं शान्तं स्नायाद्वापि हरिं स्मरेत् ।
गायत्री वारिसंस्नातः प्रणवै निर्मलाकृतः ॥
विष्णुस्मरणा संशुद्धि स्त्र्यहं सर्वेषु कर्मसु ।
योऽधीते वेदवेदार्थं सुस्नातः सर्ववारिषु ॥
शुद्धे दशुचिनः स्नान्तस्तच्छुद्धस्तु शुचिर्यतः ।
मन्त्रैश्च मनसा स्नानं नो गोमयस्वदम्बुभिः ॥
तैस्चेन्नोखुरमत्स्याश्च स्नानस्य फलमाप्नुयुः ।
भाव पूत पवित्रः स्यान्मन्त्रपूत स्तथा नरः ॥
उभयेन पवित्रस्तु नित्यस्नायी शुचिर्नरः ।
विधिदृष्टन्तु यत्कर्म करोतु विधिना नरः ॥
न किञ्चित् फलमाप्नोति कुशमात्रं हि तस्य तत् ।
उत्पद्यन्ते जले मत्स्या विपद्यन्ते तु तत्र च ॥
तिष्ठन्तोऽपि च ते स्नानि फलं नैवाप्नुयुर्हताः ।

विधिहीनं भवेद्दुष्टं कृतमश्रद्धयापि च ॥
तद्धरन्त्यसुरास्तस्य मूढत्वादकृतात्मनः ।
श्रद्धाविधिसमायुक्तं कर्म यत्क्रियते नृभिः ॥
शुचिभिर्ह्येकचित्तैस्तु तदनन्त्याय कल्पते ।
उदात्त मनुदात्तञ्च विसर्गान्तं तथैवच ॥
द्रुतञ्च स्वरितोदात्तं स्वरं विन्द्यात्तथा प्लुतम् ।
स्वरान्तं व्यञ्जनान्तञ्च विसर्गान्त तथैवच ॥
सानुस्वारं पृथक्त्वञ्च ज्ञातमन्यपरंच यत् ।
हतं शतक्रतुर्हन्ति वज्रेण शतपर्वणाम् ॥
यथा तथा प्रवक्तारं मन्त्रहीनं स्वरादिभिः ।
स्वरतो वर्णतः सम्यक् सन्ध्याध्यानजपादिषु ॥
सर्वे मन्त्राः प्रयोक्तव्याः हीनाः स्युरफला नृणाम् ।
नाभेरधस्तादङ्गानि चालयित्वा मृदम्भसा ॥
उपविष्टः सितवस्त्रे मन्त्रैः प्रोच्य शुचिर्भवेत् ।
चतुरश्चतुरस्त्वङ्गे द्वौ द्वौ च जङ्घयोस्तथा ॥
द्वौ द्वौ च जानुनोर्न्यस्य ऊर्वोः पञ्च च पञ्च च ।
द्वावप्येवं तथा गुह्ये दश द्वादश वक्षसोः ॥
द्वौ द्वौ गले च बाह्वोश्च द्वौ द्वे च सुमुखेष्वपि ।
द्वौ द्वौ च चक्षुषोः श्रुत्योः सप्तोङ्काराश्च मूर्द्धनि ॥
न्यस्तप्रणवसर्वाङ्गः स्नातः स्यात्सर्ववारिषु ।
अकारं मूर्ध्नि विन्यस्य उकारं नेत्रमध्यतः ॥
मकारं कण्ठदेशेतु ब्रह्मीभवति वै द्विजः ।
अनग्नाक्लिष्टधौतेतु विद्वान्व रक्तवाससी ॥
परिधाय मृदम्बुभ्यां करौ पादौ च मार्जयेत् ।

तद्वाससोरसम्पत्तौ शोणाक्षौमाविकानि च॥
कुन्तपं योगपट्टञ्चा द्विवासास्तु यथा भवेत्।
न जीर्णं नीलकाशायां माञ्जिष्ठेन च वाससा॥
मूत्राद्युपगतेनैव शुचिः स्यान्नैकवाससा।
एकं वासो यथा प्राप्तं परिधाय मनः शुचिः॥
अन्ये कृत्वोत्तरासङ्गम् आचम्य प्राङ्मुखः स्थितः।
प्रत्योङ्कारसमायुक्ताः प्रणवाद्युतकास्तथा॥
महाव्याहृतयः सप्त दैवतार्षादिसंयुतम्।
प्रणवाद्यन्त गायत्र्या तस्याः शिरस्तथैवच॥
त्रिरावर्त्तनमेतस्याः प्राणायामो विधीयते।
शक्त्या सुसंयमं कृत्वा तथाचम्य विधानतः॥
उपास्य विधिवत्सन्ध्यामुपस्थाय च भास्करम्।
गायत्रीं शक्तितो जप्त्वा तर्पयेद्देवताः पितॄन्॥
अन्वारब्धेन तोयेन पाणिना दक्षिणेन तु।
तृप्यता मिति वक्तव्यं नाम्ना तु प्रणवादिना॥
ब्रह्मेशकेशवान् पूर्वं प्रजापति मथाश्रुतिम्।
छन्दो यज्ञानृषीन् सिद्धानाचार्य्यान् स्तनपायिनः॥
गन्धर्ववत्सरर्त्तूंश्च मासान्दिननिशानि च।
देवान्देवानुगांश्चापि नागान् नागकुलानि च॥
सरितः सागरां स्तीर्थान् पर्वतान् कुलपर्वतान्।
किन्नरान् खेचरान्यक्षान्मनुष्यान्नथ तर्पयेत्॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः।
आसुरिः कपिलश्चैव वोढः पञ्चशिखस्तथा॥
मानुषान् यातुधानांश्च तेषाञ्चैव कुलान्यपि।

सुपर्णांश्च पिशाचांश्च भूतान्यथ पशूंस्तथा॥
वनस्पतींश्चौषधींश्च भूतग्रामं चतुर्विधम्।
ब्रह्माद्यो मया कृता आगत्य ददतु त्वपः॥
अनृणं मां प्रकुर्वन्तु प्रसीदन्तु ममोपरि॥
ततः पूर्वाग्रदर्भेषु साग्रेषु सकुशेषु च॥
प्रादेशिकेषु शुद्धेषु ब्रह्मादिभ्योऽम्बुनिक्षिपेत्।
अन्वारभ्यापसव्येन पाणिना दक्षिणेन तु॥
दक्षिणं जानु भूलग्नो देवेभ्यः सेचयेज्जलम्।
देवेभ्यश्च नमः स्वाहा पितृभ्यश्च नमः स्वधा॥
मन्यन्ते कवयः केचिदित्येव तर्पणक्रमः।
तर्पमाणेषु कर्मत्वं निजत्वञ्च क्रियापदम्॥
तर्पयामि पितॄन्देवानित्याऽऽहुरपरे पुनः।
सिच्यमानेन तोयेन मन्यन्ते मुनयोऽपरे॥
देवास्तृप्यन्तु पितरः तृप्यन्त्विति निदर्शनम्।
उदीरतामङ्गिरस आयन्तुनोर्जमित्यपि॥
पितृभ्यश्च स्वधायिभ्यो ये चेह नियतास्तथा।
अग्निष्वात्तापकृतास्च तथा बर्हिषदोऽपि च॥
येन पूर्वेच पितरः सोमपाना मुदीरयेत्।
आवाह्य च पितॄनेतैरद्य सव्योपवीतिना॥
दक्षिणाभिमुखो द्वाभ्याङ्कराभ्या मम्बुसेचयेत्।
भूलग्नं सव्यजानुश्च दक्षिणाग्रकुशेषु च॥
रुक्मरौप्यतिलैस्ताम्रदर्भमन्त्रैः क्षिपेत्पयः।
विना रौप्यसुवर्णाभ्याम्बिना ताम्रतिलैरपि॥

विना दर्भैश्च मन्त्रैश्च पितॄणान्नोपतिष्ठति ।
दर्भैर्लोहितदर्भैश्च काशवीरणवल्वजैः ॥
शुकधान्यतृणैर्वापि दर्भकार्यं श्रयेद्द्विजः ।
न तर्पयेत्पतन्तीभिर्विद्वानद्भिः कथञ्चन ॥
पात्रस्थाभिः सदर्भाभिः सतिलाभिश्च तर्पयेत् ।
वसून्रुद्रांस्तथादित्यान्नमस्कारस्वधान्वितान् ॥
एते च दिव्यपितर एतदायत्तमानुषाः ।
ध्रुवोऽध्वरश्च सोमश्च आपश्चैवानलोऽनिलः ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।
अजैकपाद् हि बुध्नीर्विरूपाक्षोऽथ रैवतः ॥
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ।
सावित्रश्च जयन्तश्च पिनाकीत्यपराजितः ॥
एते रुद्राः समाख्याता एकादश सुरोत्तमाः ।
इन्द्रो धाता भगः पूषा मित्रोऽथ वरुणोऽर्यमा ॥
अंशुर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च ।
एते वै द्वादशादित्या देवानां परमाः स्मृताः ॥
एवञ्च दिव्याः पितरः पूज्याः सर्वे प्रयत्नतः ।
कव्यवालोऽनलः सोमो यमश्चैव तथार्यमा ॥
अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोऽपि च ।
एते चान्ये च पितरः पूज्याः सर्वे प्रयत्नतः ॥
एतैस्तु तर्पितैः सर्वैः पुरुषास्तर्पिता नृभिः ।
यमश्च धर्मराजश्च मृत्युश्चैव तथान्तकः ॥
वैवस्वतश्च कालश्च सर्वभूतक्षय स्तथा ।
औदुम्बरश्च नीलश्च दध्नश्च परमेष्ठिना ॥

चित्रश्च चित्रगुप्तश्च वृकोदर स्तथार्यमा ।
एतैस्तु तर्पितैः सद्भिर्विवस्वांस्तर्पितो नृभिः ॥
तस्मात्प्राक् तर्पयित्वैतान् त्रिंशतीन्तर्पयेत्ततः ।
मातामहान्मातुलांश्च सखिसम्बन्ध बान्धवान् ॥
स्वजनज्ञातिवर्गीयानुपाध्यायान् गुरूनपि ।
मित्रान् भृत्यानपत्यांश्च ये भवन्ति तदा स्मृतौ ॥
तान् सर्वांस्तर्पयेद्विद्वान् इच्छन्ते ते यतो जलम् ।
जलस्थश्च जले सिञ्चेत् स्थलस्थश्च तथा स्थलम् ॥
पादौ स्थाप्याभयस्यैव भवेत्तूभयतः शुचिः ।
गोशृङ्गमात्र मुत्क्षिप्य करौ विप्रो जले स्थितः ।
अम्बरे तु क्षिपेद्वारि आकाशे दक्षिणामुखः ॥
पितॄणां स्थानमाकाशं दक्षिणादिक्तथैव च ।
स्थलगो नार्द्रवासास्तु कुर्य्याद्वै तर्पणादिकम् ॥
प्रेताहृते नार्द्र वासा नैकवासाः समाचरेत् ।
एवं हि तर्पणं कृत्वा सर्वेषां विधिवद्द्विजः ॥
निष्पीड़येत् स्नानवस्त्रं येन स्नातो भवेद्द्विजः ।
निष्पीड़यति यः पूर्वं स्नानवस्त्र मजानतः ॥
निराशाः पितरस्तस्य यान्ति देवाः सहर्षिभिः ।
निष्पीड़येत् स्नानवस्त्रं तिलदर्भैः समन्वितम् ॥
न पूर्वं तर्पणाद्वस्त्रं नैवाम्भसि न पादयोः ।
एषु चेत्पीड़येद्वस्त्रं राक्षसं तदतिक्रमात् ॥
वस्त्रनिष्पीड़ने मन्त्र मिमं श्लोक मुदाहरेत् ।

तिलदर्भसमायुक्तं कुर्व्वन्त्युर्नष्टदेहिनाम् ॥
ये मे कुले लुप्तपिण्डाः पुत्रदाराविवर्जिताः ।
तेषां तु दत्तमक्षय्य मिदमस्तु तिलोदकम् ॥
पितृवंशे मृता येच मातृवंशे तथैवच ।
एवं तृप्तिर्भवेत्तेषां तिलैस्तु सह वारिभिः ॥
यदप्सु मलनिक्षेपः शौचस्नानादि कुर्वताम् ।
तस्य पापव्यपोहार्थमिमं मन्त्र मुदीरयेत् ॥
यन्मया दूषितं तोयं मलैः शरीरसम्भवैः ।
तस्य पापस्य निष्कृत्यै यक्ष्मणा स्तत्र तृप्यताम् ॥
अस्वरेभ्योऽय यक्ष्मभ्यो ददामीदं जलाञ्जलिम् ।
अन्यथा घ्नन्ति ते सर्व्वं सुकृतं पूर्वसञ्चितम् ॥
अपुत्रा ये मृताः केचित्पुमांसो योषितोऽपि वा ।
अस्मिन्वंशे पितेभ्यो वै दत्तं वस्त्रजलं मया ॥
नास्तिक्येनापि यो विप्र स्तर्पयेत्पितृदेवताः ।
स तत्तृप्तिकरो धर्मान् प्राप्नुयात्परमाङ्गतिम् ॥
नास्तिक्याद्वस्तुतो यस्तु तर्पयेन्न पितॄन् द्विजः ।
पिवन्ति देहिनं स्रावं पितरस्तज्जलार्थिनः ॥
पितॄणां पितृतीर्थेन देवानां देवकेन तु ।
इति मत्वातु कुर्व्वाणा मुच्यन्ते गृहमेधिनः ॥
पञ्च तीर्थानि विप्रस्य करे सन्ताय दक्षिणे ।
ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यन्तु सौमिकम् ॥
ब्राह्मंर पश्चिमलेखायां दैवं ह्यङ्गुलमूर्धनि ।
प्राजापत्यं कनिष्ठादौ मध्ये सौम्यं विजानत: ॥

अङ्गुष्ठस्य प्रदेशिन्या मध्ये पित्र्यं प्रतिष्ठितम् ।
कुर्य्यादहरहश्चैवं सम्यक् ज्ञात्वा विधानतः ॥
स प्राप्नुयाद्गृहस्थोऽपि ब्रह्मणः पद मव्ययम् ।
स्नात्वा हुत्वा च जप्त्वा च दत्त्वाचैवं तु योऽश्नुते ॥
अमृतं सोऽश्नुते नित्यं तस्य स्थान मनामयम् ।
अस्नात्वाश्नुमलं भुङ्क्ते अजप्त्वा पूयशोणितम् ॥
अजुह्वंश्च कृमीन् कीटान् अददंश्च शकृत्तथा ।
आह्लादकरणं स्नानं दुःखशोकापहन्तथा ॥
दुःस्वप्ननाशनञ्चैव कार्य्यं स्नानमतः सदा ।
चित्तप्रसाद बलरूप तपांसि मेधा
मायुष्यशौचसुभगत्वमरोगिताञ्च ।
ओजस्वितान्विष मदात्पुरुषस्य वीर्य्यम्
स्नानं यशोविभवसौख्यमलोलुपत्वम् ॥
गीर्वाणवृन्दद्विजसत्तमस्तुतः
प्राप्तो मयायुञ्च वशिष्ठपौत्रतः ।
पापप्रनाशं वितनोति यः स्तुतः
प्रचोदितः स्नानविधिः सलेशः ॥
उद्देशतो मया प्रोक्तः स्नानस्य परमो विधिः ।
द्विजन्मनां हितार्थन्तु जपस्यातः परं विधिः ॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां संहितायां षट्कर्मस्नानविधिर्नाम तृतीयोऽध्यायः । ३ ।

चतुर्थोऽध्यायः ।

जपस्यातः प्रवक्ष्यामि विधिं पराशरोदितम् ।
यावद्विधं जप यद्यद्यथाकार्य्यं द्विजातिभिः ॥
जप्यानि ब्रह्मसूक्तानि शिवसूक्तानि चैव हि ।
वैष्णवानि च सूक्तानि तथा पौराण्यनेकधा ॥
सारस्वतानि दौर्गाणि वारुण्यान्यनलानि च ।
पौराणिकानि चान्यानि तथा सिद्धान्तिकानि च ॥
सर्वेषां जपसूक्ताना ऋचां च यजुषां तथा ।
साम्नां चैकाक्षरादीनां गायत्री परमो जपः ।
तस्याश्चैवतु ॐकारो ब्राह्मणाय उपासितः ।
आभ्यान्तु परमं जप्यं त्रैलोक्येऽपि न विद्यते ॥
तयोश्च देवतार्षादि समासान्तोऽभिधीयते ।
येन विज्ञानमात्रेण द्विजो ब्रह्मत्व मश्नुते ॥
आसीन्नच यदा किञ्चित्सदेवासुरमानुषैः ।
तदेकाक्षरमेवासीदात्मविन्यस्तविश्वकः ॥
गम्भीरद्वितीयोऽपि एकाकी दिवि मोदते ।
चिन्तयामास गायत्रीं प्रत्यक्षा साऽभवत्तदा ॥
गायत्री सा भवत्पत्नी प्रणवोऽभूत्पतिस्तया ।
पुनरन्यौ च दम्पत्याविति ताभ्या मभूज्जगत् ॥
प्रणवो हि परं तत्वं त्रिदेवं त्रिगुणात्मकम् ।
त्रिदेवत्वं त्रिधामञ्च त्रिप्रच्चं त्रिरवस्थितम् ॥
त्रिमानञ्च त्रिकालञ्च त्रिलिङ्गं कवयो विदुः ।

सर्वमेतत्त्रिरूपेण व्याप्तन्तु प्रणवेन तु ॥
ऋग्यजुः सामवेदश्च त्रिवेद इति कीर्तितः ।
सत्वं रज स्तमश्चैव त्रिगुणास्तेन चोच्यते ॥
ब्रह्मा विष्णुस्तथेशान स्त्रिदैवत मितीर्ष्यते ।
अग्निः सोमश्च सूर्य्यश्च त्रिधामेति प्रकीर्तिताः ॥
अन्तःप्रज्ञं बहिः प्रज्ञं घनप्रज्ञ मुदाहृतम् ।
हृत्कण्ठे तालुके चेति त्रिस्थान मिति कीर्त्यते ॥
अकारोकारमश्चेति त्रिमात्रा उच्यते सुत ! ।
भूतम्भव्यं भविष्यञ्च त्रिकाल मिति स स्मृतः ॥
स्त्रीपुंनपुंसकञ्चेति त्रिलिङ्गेति प्रकीर्त्तितः ।
त्रिस्वभावःस्थतो वेदो मन्तव्यो ब्रह्मवादिभिः ॥
पर्यवस्यति यत्रैतद्विश्व मुत्पद्यते यतः ।
निर्मात्रिकः समात्रोऽपि मात्रैरपि निरादिकः ॥
स जप्यः सर्वदा सद्भिः ध्यातव्यश्च विधानतः ।
वेदेषु चैव शास्त्रेषु बहुधा स प्रकीर्तितः ॥
तथा सत्यपि चैकोऽयं षट्काराद्य स्तदा स्थितः ।
कर्मारम्भेषु सर्वेषु त्रिमात्रं सम्प्रकीर्तितः ॥
स्थितो यत्र तथोङ्कारः स्मर्तव्यः स तथैव हि ।
ऋग्वेदः स्वरितोदात्त उदात्तस्तु यजुः श्रुतौ ॥
सामवेदः स विज्ञेयो दीर्घः स्वप्लुत एव च ।
सनत्कुमारसिद्धान्ते प्रणवो विष्णुरुच्यते ॥
यस्मिंस्तस्य च विश्रान्ति स्तत्परं ब्रह्मसञ्ज्ञितम् ।
उच्चारितस्य तस्याथ विश्रान्तञ्च यदक्षरम् ।

तदक्षरं समाध्याये यस्तत्रैव स लीयते ॥
घण्टास्तनितवत्तस्य विश्रान्तिः शब्दवेधसः ।
कुर्वीत ब्रह्मविद्विप्रो यदीच्छेद्योग मात्मनः ॥
सर्वस्यापि च शब्दस्य ह्यन्तमुच्चारितस्य च ।
स ध्यायेद्यस्तु स ज्ञानी शब्दब्रह्मविदुच्यते ॥
याज्ञवल्को मुनीनाञ्च प्राब्रवीज्जनकस्य च ।
वशिष्ठजोऽपि तं ब्रूयात् स्वभवे शब्दवेधसः ॥
तैलधारा मिवाच्छिन्नदीर्घघण्टानिनादवत् ।
अवाग्जं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥
स्थित्वा सर्वेषु शब्देषु सर्वं व्याप्त मनेन हि ।
न तेन हि विना किञ्चिद्वक्तुं यान्ति गिरा यतः ॥
उद्गीत मक्षरं ह्येतदुद्गीथञ्च उपासते ।
उपास्यो मध्यतस्त्वेष दान्तं विश्रामयेद्धृदि ॥
प्रणवाद्याः स्मृता वेदाः प्रणवे तर्पणे स्थिताः ।
वाङ्मयं प्रणवं सर्वं तस्मात्प्रणव मभ्यसेत् ॥
ब्रह्मार्षं तत्र विज्ञेयमग्निश्च दैवतं महत् ।
आद्यच्छन्दः स्मरेत्तत्र नियोगोद्धयाति कर्मणि ॥
उत्पन्नमेतत् यजतः समस्तम्
व्याहृत्य तिष्ठेत्प्रलयेऽपि यत्र ।
एकाक्षरेणापि जगन्ति येन
व्याप्तानि कोऽन्यः परमोऽस्ति तस्मात् ॥
ध्येयं न जप्यं न च पूजनीयं
तस्मान्न देवाक्षरणीय मन्यत् ।

दुस्तार संसारपयोधिमग्न-
तारा य विष्णुप्रणवः स पूज्यः ॥
उक्तमुद्देशतो ह्येतत् नृप मेकाक्षरस्य च।
जप्या च सततं देवी गायत्री साधुनोच्यते ॥

इति श्रीवृहत्पाराशरीये षट्कर्मणि स्वरूपवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः।

गायत्र्याः संप्रवक्ष्यामि देवार्षादिक्रमेण तु।
अक्षराणाञ्च विन्यासं तेषाञ्चैव तु देवताः ॥
जपे यथाविधा कार्य्या यथाविधा च सार्च्चयेत्।
होमे यथा च कर्त्तव्या यथाथ वाभिचारके ॥
यत्फलं जपहोमादौ यथावज्जप्यते च सा।
ध्यातव्या च यथा देवी यथावत्तन्निबोधत ॥
गायत्री तु परं तत्वं गायत्री परमा गतिः।
सर्व्वाऽमरैरियं ध्याता रत्यं व्याप्तं तया जगत् ॥
उत्पाद्यते त्रिपादाया स्तस्यां पुनर्निवेशितम्।
गायत्री प्रकृतिर्ज्ञेया ओँङ्कारः पुरुषः स्मृतः ॥
ताभ्यां उभयसंयोगाज्जगत्सर्वं प्रवर्त्तते।
पादास्त्रय स्त्रयो वेदा स्तेषु तत्वाक्षराणि च ॥
चतुर्विंशतिरेव स्यात्तैर्व्याप्तमखिलं जगत्।

आदाय चैकं प्रथमन्तु पाद ऋग्भ्यो द्वितीयन्तु तथा यजुर्भ्यः।
साम तृतीयन्तु ततो भवेत्सा सावित्र्यदेवी स्वयमेव सर्गे॥
दैवत्यमस्यां सविता सुरार्च्यं च्छन्दोऽपि गायत्रमभूच्च तस्याम्।
विश्वस्य मित्रो द्विजराजपुत्त्रो मुनिर्नियोगस्तु जपादिकेषु॥
अस्यान्तु तत्त्वाक्षरविंशतिस्तु चत्वारि पादत्रितयन्तु तस्याम्।
भूरादिभिस्तिसृभिः संप्रयुक्तां सोङ्कारमेतद्वदनं परस्याम्॥
केचिद्भुतार्थं वदनवदन्ति सौविर्भ्रदेव्याः श्रुतितत्त्वविज्ञाः।
इमाश्च वक्तुं सकलामराणामित्येतया व्याप्तमशेषमेतत्॥
भूम्यादिकेन त्रितयेन पादं पादश्च वेदत्रितयेन चास्याः।
प्राणादिकेन त्रितयेन पाद पादौ त्रिभिर्व्याप्तमशेषमस्याः॥

यत्सूर्य्यमस्या द्विज वेत्ति पादं
स वेत्ति विद्वान् परमं पदन्तु।
व्याप्तिः परस्याः सकलापि चैषा
यो वेत्ति चैनां स तु वित्तमः स्यात्॥
गायत्रीं यो विजानाति ज्ञात्वा नैव उपासयेत्।
नामधारकमात्रोऽसौ न विप्रो वृषलोहि सः॥
किं वेदैः पठितैः सर्वैः सेतिहासपुराणकैः।
साङ्गैः सावित्रहीनेन न विप्रत्वमवाप्यते॥
गायत्रीमेव यो ज्ञात्वा सम्यगभ्यसते पुनः।
इहामुत्र च पूज्योऽसौ ब्रह्मलोकमवाप्नुयात्॥
गायत्री चैव वेदाश्च ब्रह्मणा तोलिताः पुरा।
वेदेभ्यश्च सहस्रेभ्यो गायत्र्यतिगरीयसी॥
तदक्षरेषु दैवत्यं चतुर्विंशति कथ्यते।

सन्न्यासं यद्विबोधेन कुर्वन् ब्रह्मत्वमाप्नुयात् ॥
जानीयादक्षरं देव्याः प्रथमामाग्नुमुक्षणे ।
प्राभञ्जनं द्वितीयन्तु तृतीयं अग्निदैवतम् ॥
विद्युतश्च तुरीयन्तु पञ्चमन्तु यमस्य तु ।
षष्ठन्तु वारुणं तत्वं सप्तमन्तु बृहस्पतेः ॥
पार्ज्यन्यमष्टमं तत्वं नवमं चन्द्रदैवतम् ।
गान्धर्वं दशमं विद्यात्त्वष्टुरेकादशं तथा ॥
मैत्रावरुणमन्यद्वै पुष्णस्तथा त्रयोदशम् ।
चतुर्दशं सुरेशस्य प्रागिदं ब्रह्मणा स्मृतम् ॥
मरुद्देवात्मकं ज्ञेयं पञ्चदशं यदक्षरम् ।
सौम्यञ्च षोड़शं तत्व माङ्गिरसमथापरम् ॥
विश्वेषाञ्चैव देवाना मष्टादशमथाक्षरम् ।
अश्विनौ चोनविंशन्तु विंशं प्राजापतेर्विदुः ॥
एकविंशं कुवेरस्य द्वाविंशं शङ्करस्य च ।
त्रयोविंशं तथा ब्राह्मं चतुर्विंशन्तु वैष्णवम् ॥
इति ज्ञात्वा द्विजः सम्यक् स सर्वाक्षरदेवताः ।
कुर्वन् जपादिकं कर्म परं श्रेयोऽधिगच्छति ॥
पादाङ्गुष्ठादिमूर्द्धान्त मात्मनो वपुषि न्यसेत् ।
अक्षराणि च सर्वाणि पृच्छन् ब्रह्मत्वमात्मनः ॥
पादाङ्गुष्ठयुगे त्वेकं एकङ्गुल्फद्वयोर्द्वयोः ।
जानुनोश्च द्वयोरेकमेकन्तु रेकयोर्द्वयोः ॥
गुह्ये कव्यां तथैकैकं एकैकं जठरो रसैः ।
स्तनद्वये तथैकन्तु न्यसेदेकं गले तथा ॥

वक्त्रे तालुनि हृक् श्रुत्योः चतुर्ष्वेकैकमेव च।
भ्रुवोर्मध्ये तथैकन्तु ललाटे चैकमेव हि॥
याम्यपश्चिमसौम्येषु एकैक मेकमूर्द्धनि।
गायत्रीन्यस्तसर्वाङ्गो गायत्री विप्र उच्यते॥
लिप्यते न स पापेन पद्मपत्रमिवाम्भसि।
यः प्रोक्तोऽक्षरविन्यासो व्याहृतीनामथोच्यते॥
सप्तापि व्याहृतीर्न्यस्य भवेद्भर्गो जपादिषु।
भूर्लोकं पादयोर्न्यस्य भुवर्लोकन्तु जानुनोः॥
स्वर्लोकं कटिदेशे तु नाभिदेशे महस्तथा।
जनलोकन्तु हृदये कण्ठदेशे तपस्तथा॥
भ्रुवोर्ललाटसन्ध्योश्च सत्यलोकः प्रतिष्ठितः।
हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्॥
तच्छुभ्रं ज्योतिषां ज्योति स्तद्यदात्मविदो विदुः।
देवस्य सवितुर्भर्गो वरेण्यञ्च धीमहि।
तद्ध्यानकन्धियो यस्तु ब्रह्मत्वे च प्रचोदयात्॥
छन्दोदैवतपर्णञ्च विनियोगञ्च ब्राह्मणम्।
मन्त्रं पञ्चविधं ज्ञात्वा द्विजः कर्म समाचरेत्॥
स्वरतो वर्णतश्चैव परिपूर्णं भवेद्यथा॥
हीनं न विनियुञ्जीत मन्त्रन्तु मात्रयापि च।
देवतायतने कुर्य्याज्जपं नद्यादिकेषु च॥
आश्रमेषु यतीनाञ्च गोष्ठे वा स्वगृहेऽपि वा।
चतुर्षु मतिपूर्वेषु ह्येनमादि क्रमेण तु॥
दशगुणं सहस्रं स्यात् फलं निष्काममन्त्रकम्।

असमीपे जलं कुर्य्यात् समङ्गं तद्भवेद्यथा ॥
असङ्ख्य मासुरं यस्मात्तस्मात्तद्गणयेद् ध्रुवम् ।
स्फाटिकै र्द्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः ॥
अक्षमाला प्रकर्त्तव्या प्रशस्ता ह्युत्तरोत्तरा ।
अभावे त्वक्षमालायाः कुशग्रन्थ्याथ पाणिना ॥
यथा कथञ्चिद्गणयेत्ससङ्ख्यं तद्भवेद्यथा ।
प्रणवो भूर्भुवः स्वश्च पुनः प्रणवसंयुतम् ॥
अत्योङ्कारसमायुक्तां मन्यन्ते कवयोऽपरे ।
प्रणवान्ते तथाचादौ आङ्कुरन्ये जपे क्रमम् ॥
आदौ चैवतु चोङ्कार आद्यन्तादिक्रमोऽन्ततः ।
तदाद्यञ्च तदन्तञ्च कुर्य्यात्प्रणवसम्पुटम् ॥
आद्यन्तरचितं कुर्य्यात् इति पाराशरोऽब्रवीत् ।
अक्षर प्रतिलोपेन सोङ्कारेण क्रमेणतु ।
पुट्कारान्ताञ्च कुर्वीत प्रच्छन्नंत्रिविधं बुधः ॥
होमेऽपि च जपं कुर्य्यात् प्रणवावर्जनं द्विजः ।
अभिप्रेतार्थहेमादौ स्वाहान्तन्त मुदीरयेत् ॥
सङ्कीर्णतां यदा पश्येद्रागाद्वा द्विषतोऽपि वा ।
तदा जपेच्च गायत्रीं सर्वदोषापनुत्तये ।
रुद्रजाप्यानि कार्य्याणि सूक्तञ्च पुरुषस्य च ।
शिवसङ्कल्पजप्यञ्च सर्वं कुर्य्याद्विधानतः ॥
घ्नन्ति जप्तानि पापानि श्रेयोदद्युस्तदर्थिनः ।
अतो जपं सदा कुर्य्याद्यदिच्छे च्छुभमात्मनः ॥
द्रुपदां वा जपेद्देवी मजपाञ्चम्बुकान्तथा ।

प्रणवञ्च सदाभ्यस्येद्याति ब्रह्मत्वमिच्छति ॥
प्रणवानामयुक्ताभ्यां तथा षोड़शभिः शतैः ॥
पुंसाङ्गच्छत्यहोरात्रं तत्सङ्ख्यामजपां विदुः ॥
रविमण्डलमध्यस्थे पुरुषे लोकसाक्षिणि ।
समर्पितमयाचेदं सूर्याख्ये ब्रह्मणः पदे॥
न जपं प्रसभं कुर्यात् प्रसभं घ्नन्ति राक्षसाः ।
ब्राह्मणा भागधेयस्तु तेषाञ्चैवावधीकृताः ॥
उपांशुन्तु जपं कुर्यात् काय्यं चैव तु मानसम् ।
निवृत्तोष्ठमुपांशु स्यादचलोष्ठं तु मानसम् ॥
द्विविधन्तु जपं कुर्यादुपांशुं मानसन्तथा ।
उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ॥
उपांशुजपयज्ञस्य मानसे च रतस्य च ।
इहैव याति वेधस्त्वमिति पाराशरोऽब्रवीत् ॥
विधियज्ञाः पाकयज्ञा ये चान्ये बहवो मखाः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
जपेनैकेन सिद्धेन किल सिद्धं भवेदिह।
कुर्य्यादन्यं न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥
शतेन जन्मजनितं सहस्रेण पुराकृतम् ।
अयुतेन त्रिजन्मोत्थं गायत्री हन्ति पातकम् ॥
दशभिर्जन्मजनितं शतेन तु पुराकृतम् ॥
सहस्रेण त्रिजन्मोत्थं गायत्री हन्ति पातकम् ।
अस्मिन् कलियुगे विद्वान्विधिवत्कर्म यत् कृतम् ॥
भवेद्द्वयगुणं तद्धि कृताद्यैर्युगतो ध्रुवम् ।

न च तच्छक्यते कर्तुं मात्राम्नायस्य भूषणात् ॥
अयथार्थकृतात्पाठान्मन्त्रसिद्धिर्गरीयसी ।
नच मन्त्रोपहसनं स्वपार्श्वमवलोकयेत् ॥
नान्यसक्तो न तप्तस्थो न चैवार्द्रशिरास्तथा।
नाट्टीणां पादमाक्रम्य न चैवह्नि तथाकरौ ॥
नैवम्बिधं जपङ्कुर्य्यान्नच सञ्चालयेत्करौ ।
प्रच्छन्नानि च दानानि ज्ञानञ्चानिरहङ्कृतम् ॥
जपानि च सुगुप्तानि तेषां फलमनन्तकम् ।
य एवमभ्यसेन्नित्यं ब्राह्मणः संयतेन्द्रियः ॥
स ब्रह्मलोक माप्नोति तथा ध्यानार्चनादपि ।
अथान्यत्सम्प्रवक्ष्यामि विशेषन्तु पितामह ॥
लब्धवान्वेधसः पृष्टाद्गायत्रीध्यान मुत्तमम् ।
तदक्षरे तु यद्वर्णं यत्र यत्र च यः स्मरेत् ॥
यत्फलं लभते कृत्वा यथा तस्याः समर्चनम् ।
तत्प्रकृतिं स च स्वान्तस्त्विकारो बुद्धिरेव च ॥
तुरीत्येतदहङ्कारं वशब्दं विद्धिपापहम्।
रे स्पर्शन्तु णिरूपं च यं रसङ्गन्धमात्रभम् ॥
गोः श्रोत्रन्देत्वचश्चक्षुः सकार रसना तथा ।
यो नासाच तथा वाग्मी हि हस्तौ च द्विपादृद्वयम् ॥
य उपस्थन्तु दं योन्यो नखं प्राकारमारुतम् ।
चो तेजोदलजं यद्भा गायत्र्यास्तत्वचिन्तनम् ॥
चतुर्विंशतितत्वानामप्येकमक्षरेषु यः ।
गायत्रीं संस्मरेद्दूयोगान् स याति ब्रह्मणः पदम् ॥

लकारं पादयोर्न्यस्य ब्रह्मविष्णुशिवाकृतिम् ।
शान्तम्पद्मासनारूढन्ध्यानाद्दहति किल्बिषम् ॥
सकारं पादयोर्न्यस्वा अतसीपुष्पसन्निभम् ।
पद्ममध्यस्थितं सौम्यन्तद्धन्ति चोपपातकम् ॥
विकार जङ्घयोर्द्वासिन्ध्यायेदेतद्विचक्षणः ।
ब्रह्महत्याकृतं पापं हन्यात्तद्धि स्मृतः क्षणात् ॥
उकारं जानुदेशे तु इन्द्रनीलसमप्रभम् ।
निर्द्दहेत् सर्व्वपापानि ग्रहरोग मुपद्रवम् ॥
ऊर्वोर्विविमलन्ध्यायेत् शुद्धस्फाटिकविद्युतिम् ।
विज्ञातं हन्ति तत्पापमगम्यागमनं कृतम् ॥
रेकारं वृषणे प्रोक्तं विद्युत्स्फुरिततेजसम् ।
मित्रद्रोहकृतं पापं स्मरणादेव नाशयेत् ॥
णिगुह्ये श्वेतवर्णन्तु जातिपुष्पसमद्युतिम् ।
गुरुहत्याकृतं पापं शोधयेद्ध्यानचिन्तनात् ॥
यङ्कट्यां तारका वर्णाश्चन्द्र वधिणा भूषितम् ।
गोहत्याविहितं पापं गोकारस्य विशोधयेत् ॥
श्यामं रक्तञ्च देकारन्ध्यानकृद्देशमाश्रयेत् ।
हृदि कुन्देन्दुवर्णाभम्बकार ममृतं स्रवेत् ॥
गुरुहत्याकृतं पापं वकारेण प्रणश्यति ।
स्यकारं विन्यसेत्कण्ठेत्वोष्ठं स्फाटिक सन्निभम् ॥
मनसोपार्जितं पापं स्य कारेण प्रणश्यति ।
धिकारं वसुदैवत्यं वदनं स्वर्णसन्निभम् ॥
प्रतिग्रहकृत पापन्तत्क्षणादेव नश्यति ।

मकारं पद्मरागाभं शिरस्थं दीप्ततेजसम् ॥
पूर्वजन्मकृतं पापं मकारेण प्रणश्यति।
ह्लिकारं नासिकाग्रेतु पूर्णचन्द्रसमप्रभम् ॥
पूर्वात्परतरं पापं स्मरणादेव नश्यति ।
धीकारं त माङ्गिरसन्नेत्रयोर्विन्यसेद्बुधः ॥
मनोवाक्कायिकं पापं चिन्तनादेव नश्यति ।
योकारं रक्तवर्णाभ मिन्द्रनीलसमप्रभम् ॥
प्राणिहत्याकृतं पापं योकारेण विनश्यति ।
द्वितीयं तु तथा प्रोक्तं योकारं रुक्मसन्निभम् ॥
निर्दहेद्दुष्टपापानि अपेयामेयकानि च ।
नकारे सुमुखे पूर्व मादित्योदयसन्निभम् ॥
सकृद्ध्यात्वा द्विजश्रेष्ठः स गच्छेदैन्द्रवं पदम् ।
नीलोत्पलदलश्यामं प्रकारं दक्षिणामुखे ॥
सकृद्ध्यात्वा द्विजश्रेष्ठः स गच्छेद्वैष्णवं पदम् ।
सौम्यङ्गोरोचनापीतं चोकारम्पश्चिमामुखम् ॥
सकृद्ध्यात्वा द्विजश्रेष्ठः सगच्छेद्ब्रह्मणः पदम्।
शङ्खकुन्देन्दुधवलन्दकारञ्चोत्तरामुखम् ॥
सकृद्ध्यात्वा द्विजश्रेष्ठः स गच्छेद्ब्रह्म शाश्वतम् ।
यकारस्तु शिरः प्रोक्तश्चतुर्वेदनसंयुतम् ॥
याकारं सगुणं प्रोक्तश्चतुर्विंशति संस्मृतम् ।
यं यं पश्यति चक्षुर्भ्यां यं यं स्पृशति पाणिना ॥
यं यं च भाषते चित्ते तत्सर्वं पूतमेवच ।
जाप्येतु त्रिपदा ज्ञेया ब्राह्मणैस्तत्वचिन्तकैः

जम्बुका नाम सा देवी यजुर्वेदप्रतिष्ठिता ।
अन्तर्जले विरावर्त्य मुच्यते ब्रह्महत्यया ॥
सा देवी द्रुपदा नाम वेदे वाजसनेयके ।
सोपनीय समस्तानि महतां स द्विजोत्तमः ॥
ब्रह्मणः पदमाप्नोति यद्गत्वा न निवर्त्तते ।
प्रमादेन कथञ्चिद्वा जपं कुर्वन् भवेष्वपि ॥
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति स्मृतिः ।
तद्विष्णोरिति मन्त्रोऽयं स्मर्त्तव्यः सर्व्वकर्म्मसु ॥
आवर्त्य प्रणवौ वापि सर्व्वस्यादिर्यतोहि सः ।
अभ्यसेत्प्रणवान्नित्य मेकचित्तसमाहतः ॥
गायत्री च तथा देवी वैदिकन्तु जपं हियत् ।
पौराणं पाञ्चरात्रञ्च योऽभ्यसेन्मुक्ति माप्नुयात् ॥
यावेद स्तानि वै तानि यान्येतानि च सा स्मृतिः ।
जपेनयेनेहकृतेन पुंसो ददाति मार्गं सवितापि कर्तुं ।
अयंहि सर्व्वेष्टकृतान्वरिष्ठोविधेः पदं यास्यति निर्विकल्पः ॥
यदुक्तं धर्म्मशास्त्रेषु तथा सर्वश्रुतिष्वपि ।
उपनिषत्तमन्त्रद्वत् विप्रहितं प्रकीर्त्तितम् ॥
न्यासन्तनुत्रन्च बन्धदेहे
जग्राह वोङ्कारमयीसुतीक्ष्णम् ।
विप्रस्य वक्ष्यान्त्विपदान्न लोके
मतः स दुष्टः कुनखश्च कुर्यात् ॥

इति श्रीबृहत्पाराशरीये जपनिर्णयः ॥

देवार्चनं प्रवक्ष्यामि यदुक्तं ऋषिभिः पुरा ॥
वैदिकैरेव तन्मन्त्रैर्यस्य एतस्य तैरिति ।
अर्चयेद्वैदिकैर्मन्त्रैर्नानुग्राह्यमुपेक्षते ॥
वैदिकोऽनुग्रहस्तस्य वेदश्चित्करणेन तु ।
ब्रह्माणं वैधसैर्मन्त्रैर्विष्णुं स्वैः शङ्करं स्वकैः ॥
अन्यानपि तथा देवानर्चयेत्स्वीयमन्त्रकैः ।
मन्त्रन्यासम्पुरा कृत्वा स्वदेहे देवतासु च ॥
गायत्र्योङ्कारन्यस्ताङ्गः पूजयेद्विष्णुमव्ययम् ।
न्यस्त्वा तु व्याहृतीः सर्वाः प्रोक्तस्थानक्रमेण तु ॥
ब्रह्मीभूतः शुचिः शान्तो देवयाग मुपक्रमेत् ।
विष्णुरादिरयं देवः सर्वामरगणार्चितः ॥
नामग्रहणमात्रेण पापयोगांश्छिनत्ति यः ।
तदर्चनं प्रवक्ष्यामि विष्णोरमिततेजसः ॥
यद्बुद्ध्वा मुनयः सर्वे विष्णोः सायुज्यमाप्नुयुः ।
षट्स्वेषु हरेस्सम्यगर्चनं मुनिभिः कृतम् ॥
अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
अग्नौ क्रियावतां येषां दिवि देवमनीषिणाम् ॥
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिम् ।
आपो ह्यायतनन्तस्य तस्मात्तासु सदा हरिः ॥
सर्वगत्वेन विष्णोस्तु स्थण्डिले भावितात्मनाम् ।
दद्यात्पुरुषसूक्तेन आपः पुष्पाणि चैव हि ॥
अर्चितं स्यादिदन्तेन नित्यम्भुवनसप्तकम् ।
अनुष्टुभस्य सूक्तस्य त्रिभन्तस्य च दैवतम् ॥

पुरुषो यो जगद्बीज मृषिर्नारायणः स्मृतः ।
अस्य सूक्तस्य सर्वस्य ऋचा न्यासं यथाक्रमम्॥
देवे आत्मनि च तथा सम्प्रवक्ष्याम्यतः परम् ।
हस्तन्यासम्पुरा कृत्वा स्मृत्वा विष्णुन्तथाव्ययम् ॥
शिखाबन्धञ्च दिग्बन्धं सोऽर्चयेद्विष्णुमात्मनि ।
प्रथमाम्विन्यसेद्वामे द्वितीयां दक्षिणे करे ॥
तृतीया वामपादेतु चतुर्थीं दक्षिणे न्यसेत् ।
पञ्चमीं वामजानौ तु षष्ठीं च दक्षिणे न्यसेत् ॥
सप्तमीं वामकक्षाञ्च दक्षिणायान्तथाष्टमीम् ।
नवमीं नाभिमध्येतु दशमीं हृदि विन्यसेत् ॥
एकादशीं वामपादौ द्वादशीं दक्षिणे न्यसेत् ।
कण्ठे त्रयोदशीं न्यस्वा तथा वक्त्रे चतुर्दशीम् ॥
अक्ष्णोः पञ्चदशीं न्यस्वा षोडशीं मूर्द्ध्नि विन्यसेत् ।
एव न्यासविधिं कृत्वा पश्चात् योगं समाचरेत् ॥
आसने चिन्तयेन्मेरु मष्टदलं सकर्णिकम् ।
व्याहृतीना मथ न्यासं कुर्य्यात्तद्विधिवद्द्विजः ॥
भूर्लोकं पादयोर्न्यस्वा भुवर्लोकन्तु जानुनोः ।
स्वर्लोकं कटिदेशेतु नाभिदेशे महस्तथा ॥
जनोलोकन्तु हृदये कण्ठदेशे कटीस्तथा ।
भ्रुवोर्ललाटसन्ध्योस्तु सत्यलोकः प्रतिष्ठितः ॥
हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रज्योतिषां ज्योतिस्तत्सदात्मविदो विदुः ॥
आवाहन मथ प्राक्ङ विष्णोरमिततेजसः ।

यदर्चाकृतये तस्य स्वदेहे चिन्तयेद् यथा ॥
आद्य मावाहयेद् देवम्चाच पुरुषोत्तमम्।
यथादेशे तथा देहे न्यासं कृत्वा विधानतः ॥
द्वितीययासनन्दद्याद्द्यात्पाद्यं तृतीयया।
चतुर्थ्यार्घ्यः प्रदातव्यः पञ्चम्याचमनन्तया ॥
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रधौतकम्।
यज्ञोपवीतं चाष्टम्या नवम्या गन्ध मेव च ॥
पुष्पन्देयं दशम्यातु एकादश्याच धूपकम्।
द्वादश्या दीपकन्दद्यात् त्रयोदश्या निवेदनम् ॥
चतुर्दश्याञ्जलिं कुर्यात्पञ्चदश्या प्रदक्षिणम्।
षोड़श्योद्वासनं कुर्याच्छेषकर्माणि पूर्ववत् ॥
स्नाने वस्त्रे निवेद्ये च दद्यादाचमनं हरेः।
षण्मासात्सिद्धिमाप्नोति एवमेवहि योजयेत् ॥
आदित्यमण्डले देवन्ध्यात्वा विष्णुमुपैति यः।
स याति ब्रह्मणः स्थानं नात्र कार्या विचारणा ॥
ध्येयो दिनेश परिमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ॥
केयूरवान्मकरकुण्डलवान् किरीटि-
हारी हरि र्मुनिजनैर्धृतशङ्खचक्रः ॥
सूक्तेन विष्णुविधिना समुदीरितेन
योगेन नित्यमजमादिमनन्तमूर्त्तिम्।
भक्त्यार्चयेत्पठति यश्च स विष्णुदेहम्
विप्रो विशेद्धरिवरेण कृतार्थदेहः ॥

पञ्चरात्रविधानेन स्थण्डिले वापि पूजयेत्।
जलमध्यगतो वापि पूजयेज्जलमध्यतः॥
द्वादशार्चनव्यूहपञ्चतत्वक्रमेण तु।
अभावे धौतपत्रस्य पत्रिकायास्तथा द्विजः॥
जलेऽपि हि जलेनैव मन्त्रैरेवार्चयेद्धरिम्।
विष्णुर्विष्णुत्यजस्तु चिन्तयेद्धरिमेव तु॥
तिष्ठन्व्रजंस्तथासीनः शयानोऽपि हरिं सदा।
संस्मरन्नाशुभं पश्येदिहामुत्र च वै द्विजः॥
रुद्रं रुद्रविधानेन ब्रह्माणञ्च विधानतः।
सूर्यं संहितमन्त्रैश्च तदीरितविधानतः॥
दुर्गां कात्यायनीं चैव तथा वाग्देवतामपि।
स्कन्दं विनायकञ्चैव योगिनीं क्षेत्रपालकान्॥
विधानेनार्चयेत्सर्वान्यो विप्रो भक्तितत्परः।
विष्णुना सुप्रसन्नेन विष्णुलोकमवाप्नुयात्॥
ग्रहांश्च पूजयेद्विद्वान् ब्राह्मणः शान्तितत्परः।
आरोग्यपुष्टिसंयुक्तो दीर्घमायुष्यमाप्नुयात्॥
ग्रहा गावो नृपा विप्राः सद्भिः पूज्याः सदा द्विजैः।
पूजिताः पूजयन्त्येते दहन्ति चापमानिताः॥
यो हितः सर्वसत्वेषु गोनृपब्राह्मणेषु च।
इहामुत्र स पूज्योऽसौ विष्णुलोकमवाप्नुयात्॥
उक्तो गृहस्थस्य सुरार्चनस्य
अन्यो विधिर्विष्णुजनस्य लब्धैः।
कार्यो द्विजातिः प्रतिवासरं यो

वेदोक्तमन्त्रैः समये हिताय ॥
देवपूजाविधिः प्रोक्त एष उद्देशतो मया ।
वैश्वदेवस्य वक्तव्यो विधिर्विप्र ! मयाधुना ॥
इति बृहत्पाराशरीये धर्मशास्त्रे देवपूजाविधिः समाप्तः ॥

वैश्वदेवं प्रवक्ष्यामि यथाकार्यं द्विजातिभिः ।
स्वगृह्योक्तविधानेन जुहुयाद्वैश्वदैवकम् ॥
हविष्यस्य द्विजोभावे यथालाभहृतं हविः ।
जुहुयाद्विधिवद्भक्त्या यथा स्याच्चित्तनिर्वृतिः ॥
यद्वा तदापि होतव्य मग्नौ किञ्चिद्द्विजातिभिः ।
फलम्वा यदिवा मूलं घासम्वा यदिवा पयः ॥
अहुत्वा च द्विजोऽश्नीयाद्यत्किञ्चित् स्वयमश्नुते ।
अश्नीयाच्चेदहुत्वापि नरकं स समाविशेत् ॥
जुहुयादन्नमक्षारवर्जमन्नं हुताशने ।
अनुज्ञातो द्विजैस्तैस्तु त्रिः कृत्वा पुरुषर्षभः ॥
यदाग्नौ हूयते नैव यस्य ग्रासो न दीयते ।
अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणञ्चरेत् ॥
लौकिके वैदिके नैव वैश्वदेवो हि नित्यशः ।
लौकिके पापनाशाय वैदिके स्वर्गमाप्नुयात् ।
अभावादग्निहोत्रस्य आवसथ्यस्य वा तथा ।
अस्मिन्नग्नौ पचेदन्नं तत्र होमो विधीयते ॥

अग्निः सोमः समस्तौ तौ विश्वदेवास्तथैव च।
धन्वन्तरीः कुहूस्तद्वदनुमातः प्रजापतिः॥
द्यावाभूम्योः स्विष्टिकृच्च कृत्वा तेभ्यः पुनः पुनः॥
कुर्याद्बलिकृतं पश्चात्सर्वदिक्षु प्रदक्षिणम्।
सूत्वाम्नैस्तस्य पुंभ्यश्च यमाय च सहानुगैः॥
मरुद्भ्यश्च क्षिपेद्द्वारि अप्सरोभ्यस्तथा हरेः।
वनस्पतिभ्यः सर्वेभ्यो मुसलोलूखले हरेत्॥
श्रियै च भद्रकाल्यै च उष्णीषपादयोः क्रमात्।
ब्रह्मणे सानुगायेति मध्ये चैव हरेद्बलिम्॥
वास्तवे सानुगायेति वास्तुमध्ये वलिं हरेत्।
विश्वेभ्यश्चैव देवेभ्यो बलिमाकाशमुत्क्षिपेत्॥
द्युचरेभ्यश्च भूतेभ्यो नक्तञ्चारिभ्य एव च।
वास्तुपृष्टे च कुर्वीत बलिं सर्वान्न भूतयेत्॥
पितृभ्यो बलिशेषन्तु सर्वं दक्षिणतो हरेत्।
पतितेभ्यः श्वपाकेभ्यः पापानां पापरोगिणाम्॥
कृमिकीटपतङ्गानां सर्वेभ्योऽपि बलिं हरेत्।
एवं सर्वाणि भूतानि यो विप्रो नित्यमर्चयेत्॥
तत्स्थानं परमाप्नोति यज्ज्योतिः परवेधसः।
गृह्योऽग्नौ वैश्वदेवन्तु प्रोक्तमेतन्मनीषिभिः॥
अनग्निकस्तु कुर्वीत वैश्वदेवं कथं त्विति।
महाव्याहृतिभिस्तिस्रः समस्ताभिस्तथा परा॥
इत्याहुतीश्चतस्रस्तु तथा वेदकृतोऽपि च।
त्रियम्बकं यजामह इत्यादीनाहुतिद्वयम्॥

वैश्वदेवेच जुहुयाद्विशेषोऽन्यत्र वै पुनः ।
अल्पमृत्युनिवृत्त्यर्थमायुःपुष्टिविवृद्धये ॥
जुहुयात् त्र्यम्बकं देवं विल्वपत्रैस्तिलैस्तथा ।
विनायकाय होतव्या तथा घृतस्य चाहुतिः ॥
सर्वविघ्नोपशान्त्यर्थं पूजयेत्मन्ततस्तुतम् ।
गणानान्त्विति मन्त्रेण स्वाहाकारान्तपादतः ॥
चतस्रो जुहुयात्तस्मै गणेशाय तथाहुतीः ।
तद्विष्णोरिति जुहुयाद्विधिसम्पूर्णताकृते ॥
प्रणवेन च गायत्र्या केचिज्जुह्वति सद्द्विजाः ।
एतौ वै सर्वदैवत्यौ एतत्परन्न किञ्चन ॥
एताभ्यां जुहुते नैव सर्वेभ्योऽपि हुतम्भवेत् ।
जुहुयात्सर्पिषायुक्तं सव्येन पयसाथ वा ॥
व्रीहिना च विकारेण तिलतैलेन वा पुनः ।
संप्रोक्ष्य पयसा वापि अन्नात्त मश्नुयादपि ॥
अस्नेहाश्चापि गोधूमाः शालयो हवनीयकाः ।
हविस्तु हविरभ्युक्तमहविस्तु हविर्यतः ॥
अभ्यक्तमेव होतव्य मतोरूक्षं विवर्जयेत् ।
दरिद्राश्चिन्तितामेके रूक्षान्नहवनें विदुः ॥
जठराग्नेः क्षयश्चैके रूक्षासनमिहोच्यते ।
ओंकारपूर्विकाः सर्वाः स्वाहाकारान्तिकास्तथा ॥
जुहुयादग्निको विप्रो गृहमेधीहि नित्यशः ।
बलिशेषञ्च भूतेभ्यः सर्वेभ्योऽप्यविशेषतः ॥
हुत्वाथ कृष्णवर्त्मानं कृताञ्जलि प्रसादयेत् ।
त्वमग्ने ! द्युतिरेतेन मन्त्रेण भक्तिमान् द्विजः ॥

आब्रह्मन्निति मन्त्रन्तु जपेद्वै सर्वकामिकम् ।
अहाव्यग्न इति ह्येतं मन्त्रञ्च प्रयतो जपेत् ॥
अन्यद्गौताशनं मन्त्रं जपित्वा च समापयेत् ।
सर्वशान्तिकरत्वर्थं तथाग्निर्देवतेति च ॥
ज्ञानं धनमरोगित्वं गतिमिच्छंस्तथा द्विजः ।
शम्भुमग्निं रविं विष्णु मर्चयेद्भक्तितः क्रमात् ॥
अजानन् यो द्विजोनित्य मकृत्वा निस्तृतं हविः ।
पितृदेवमनुष्याणा मृणात्युक्तः प्रयात्यधः ॥
शाकञ्चापि तृणं वापि हुत्वाश्नावश्नुते द्विजः ।
सर्वकामसमायुक्तः सोऽत्रैव सुखमश्नुते ॥
स्वरेण वर्णेन च यद्विहीनं तथैव हीनं कृपयापि यच्च ।
तथातिरिक्तं मम तत् क्षमस्व तदस्तु चाग्ने: परिपूर्णमेतत् ॥
सर्वपापप्रणोदाय सर्वकामाय वै द्विजः ।
द्विजन्मनां हितार्थाय वैश्वदेव उदाहृतः ॥
इति श्रीबृहत्पाराशरे वैश्वदेवविधिः ॥

आतिथ्यं संप्रवक्ष्यामि चातुर्वर्ण्यफलप्रदम् ।
चतुर्वर्णातिथिः प्रोक्तः कालप्राप्तो बहुश्रुतः ॥
अदृष्टोऽदृष्टगोत्रादिरज्ञाताचारविद्यकः ।
सन्ध्यामालक्षताचारस्तज्ज्ञैः सोऽतिथिरुच्यते ॥
क्षुत्तृष्णाध्वश्रमश्रान्तः प्राणत्राणान्नयाचकः ।
गृहिणो वैश्वदेवान्ते गृहद्वारमुपागतः ॥
विष्णुरूपोऽतिथिः सोऽयं मत्तारार्थमिहागतः ।
इति मत्वाच भक्त्या च हृणुयाद्भोजनायतम् ॥

त्वं मुखेन समायातः सर्वदेवमयो विधिः।
निर्दह्य सर्वपापानि ममाचायुः प्रयास्यति॥
ब्राह्मणैः सह भोक्तव्यो भक्त्या प्रक्षाल्य पादयम्।
आसनार्घादिकं दत्त्वा दत्त्वा स्रक्चन्दनादिकम्॥
योगिनो विविधैर्वेषैर्भ्रमन्ति धरणीतले।
नराणामुपकाराय ते चाज्ञातस्वरूपिणः॥
तस्मादभ्यर्चयेत्प्राप्तं श्राद्धकालेऽतिथिं द्विजः।
श्राद्धक्रियाफलं हन्ति तत्र वापूजितोऽतिथिः॥
तस्मादपूर्वमेवात्र पूजयेदागतोऽतिथिः।
कदाचित्कश्चिदागच्छेत्तारयेद्यस्तु पूर्वजान्॥
यतिर्वा ह्यग्निहोत्री च तथापि सखस्तद्विजः।
सद्वैतेऽतिथयः प्रोक्ता अपूर्वस्य दिने दिने॥
अतिथेऽमरदेहस्त्वं मत्तारार्थमिहागतः।
संसारपङ्कलग्नं मा मुद्धरस्वाघनाशने॥
नैक ग्रामे वसन्वीह मुनीशैरुच्यतेऽतिथिः।
अन्यत्र दृष्टपूर्वोऽपि नासावतिथिरुच्यते॥
क्षत्रियो यदि वा गच्छेदतिथिस्तस्य वेश्मनि।
भक्तेषु सत्सु विप्रेषु कामतस्तु तमाशयेत्॥
वैश्यो वा यदिवा शूद्रो विप्रगृहं समाव्रजेत्।
तौ भृत्यैः सह भोक्तव्यौ इति पाराशरोऽब्रवीत्॥
क्लीबो वा यदि वा काणः कुष्ठी वा व्याधितोऽपि वा।
आगतो वैश्वदेवान्ते प्रष्टव्यः सर्वदेवता॥
दक्षिणेनापि वैश्येन तथा च वृषलेन च।
आतिथ्यं सर्ववर्णानां कर्तव्यं स्यादसंशयम्॥

योऽतिथीन्पूजयेद्भक्त्या तथाभ्यागमनेन च ।
बालवृद्धादिकस्यैव तस्य विष्णुः प्रसीदति ॥
देवा मनुष्याः पितरश्च सर्वे सूर्य्येन तृप्तेन च भूरि तिष्ठन् ।
तस्मान्नदातुस्त्वमराङ्गनाभिस्तस्यातिथिः केन समन्वमस्ति ॥
इति श्रीबृहत्पाराशरे अतिथिविधिः समाप्तः ॥

वर्णधर्मान् प्रवक्ष्यामि यत्कृतं ब्राह्मणादिभिः ।
निबोधध्वं द्विजास्तद्धै संक्षेपेण पृथक् पृथक् ॥
यजने याजने विप्रे तथा दान प्रतिग्रहे ।
अध्यापन मध्ययनं कर्माख्येतानि षट् तथा ॥
प्रजानां रक्षणं दान मरीणां निग्रहन्तथा ।
यजनाध्ययने राज्ञि विषयासक्तिवर्जनम् ॥
यजनाध्ययने दानं पाशुपाल्यन्तथा कृषी ।
वाणिज्यञ्च कुसीदञ्च कर्मषट्कं प्रकीर्त्तितम् ॥
शुश्रूषा ब्राह्मणादीनां तेभ्य आजीवनन्तथा ।
एष धर्मः स्मृतः शूद्रो वाणिज्येन च जीवनम् ॥
सर्वेषां जीवनं प्रोक्तं धर्मेणैव च कर्मणाम् ।
भिन्नवृत्तिर्यथा न स्यात् कुर्य्याद्विप्रस्तथा च तत् ॥
कुर्वन्नुक्तानि कर्माणि वृत्त्या वा क्षत्रियस्य च ।
वृत्त्यभावे द्विजो जीवेद्भिन्नवृत्तिं विवर्जयेत् ॥
क्षत्रिये प्रजापालत्वं शस्त्रभृत्त्वं प्रचण्डता ।
निर्जयेत्परसैन्यानि एष धर्मः स्मृतो नृप ! ॥
पुष्पपुष्पं विचिनुयान्मूलच्छेदं न कारयेत् ।
मालाकार इवारामे प्रजासु स्यात्तथा नृपः ॥

लोहकर्मरथानाञ्च गवाञ्च प्रतिपालनम् ।
गोरक्षा कृषिवाणिज्यं वैश्यवृत्तिरुदाहृता ॥
शूद्रस्य द्विजशुश्रूषा परोधर्मः प्रकीर्तितः ।
अन्यथा कुरुते यस्तु तद्भवेत्तस्य निष्फलम् ॥
लवणं मधु तैलञ्च दधि तक्रं घृतं पयः ।
न दूष्येच्छूद्रजातीनां कुर्य्यात् सर्वस्य विक्रियाम् ॥
विक्रयं मद्यमांसाना मभक्ष्यस्य च भक्षणम् ।
अगम्यागामिता चौर्य्यं शूद्रे स्युः पापहेतवः ॥
कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ।
वेदाक्षरविचारेण शूद्रस्य नरकं ध्रुवम् ॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः ।

अतःपरं गृहस्थस्य कर्माचारं कलौ युगे ।
धर्मसाधारणं साक्षाच्चतुर्वर्णक्रमागतम् ॥
युष्माकं सम्प्रवक्ष्यामि पाराशरप्रचोदितम् ।
षट्कर्मसहितोविप्रः कृषिवृत्तिं समाश्रयेत् ॥
हीनाङ्गं व्याधिसंयुक्तं प्राणहीनञ्च दुर्बलम् ।
क्षुद्युक्तं तृषितं श्रान्तमनड्वाहं न वाहयेत् ॥
स्थिराङ्गं नीरुजं तृप्तं शान्तं षण्ड विवर्जितम् ।
अधृष्टं सबलप्राण मनड्वाहं न वाहयेत् ॥
वाहयेद्दिवसस्यार्धं पश्चात् स्नानं समाचरेत् ।

कुगवैर्न कृषिं कुर्य्यात्सर्वथा धेनुसंग्रहः॥
बन्धनं पालनं रक्षा द्विजः कुर्य्याद्गृही गवाम्।
वत्साश्च यत्नतो रक्ष्या वर्धन्ते ते यथाक्रमम्॥
न दूरे तास्तु मोक्तव्या चरणाय कदाचन।
दूरे गावश्चरन्त्यो वै न भवन्ति शुभायनाः॥
प्रातरेवहि दोग्धव्या दुग्धाः सायं तथा गृही।
दोग्धुर्विपर्य्ययेणैव वर्द्धन्ते ताः कदाचन॥
अनादेयतृणास्त्यक्ता स्रवन्त्यनुदिनं पयः।
तुष्टिकृद्देवतादीनां पूज्या गावः कथन्न ताः॥
यस्याः शिरसि ब्रह्मास्ते स्कन्धदेशे शिवः स्मृतः।
पृष्ठे विष्णुस्तथा तस्थौ श्रुतयश्चरणेषु तु॥
या अन्या देवताः काश्चित्तस्या लोमसु ताः स्थिताः।
सर्वदेवमया गौस्तु तुष्येत्तद्भक्तितो हरिः॥
हरति स्पर्शनात्पापं पयसा पोषयन्ति याः।
प्रापयन्ति दिवं दत्ताः पूज्या गावः कथन्न ताः॥
यच्छफाहतभूमेस्तु उद्धताः पांशुसंस्पृशः।
क्षीणयेत् पुरुषस्यैनो वन्द्या गावः कथन्न ताः॥
शकृन्मूत्रं हि यस्यास्तु पितुः पुनाति पातकम्।
किमपूज्यं हि तस्या गौरिति पाराशरोऽब्रवीत्॥
गौरवत्सा न दोग्धव्या नचैवं गर्भसन्धिनी।
प्रसूता च दशाहार्वाग्दोग्धा चेन्नरकं व्रजेत्॥
दुर्बला व्याधिसंयुक्ता पुष्पिता या द्विवत्सभूः।
सा साधुभिर्न दोग्धव्यावर्षीभिः सुखमीप्सुभिः॥

कुलान्ते पुष्पिता गावः कुलान्ते बहवस्तिलाः।
कुलान्ते चलचित्ता स्त्री कुलान्ते बन्धुविग्रहः॥
एकत्र पृथिवी सर्वा सशैलवनकानना।
तथा गौ र्ज्यायसी साक्षादेकतोभयतोऽमुखी॥
यथोक्तविधिनायैता वर्णैः पाल्यास्तु पूजिताः।
पात्रयेत्पूजयन्नेताः सम्प्रेमेह च मोदते॥
दक्षिणाभिमुखा गाव उत्तराभिमुखा अपि।
बन्धनीयास्तथैतास्तु न च प्राक्पश्चिमामुखा॥
गोहृषा वाजिशालायां सुतीक्ष्णं लोहदात्रकम्।
स्थाप्य तु सर्वदा तस्यां गवि लग्नविमोक्षणात्॥
गावो देयाः सदा रक्ष्याः पोष्याः पाल्याश्च सर्वदा।
ताड़यन्ति च ये पापा येचाकर्षन्ति ता नराः॥
नरके पच्यन्तेऽङ्गानि श्वाखैनच प्रपीड़िताः।
स पशुचर्म दण्डेन मृदु तासां निवर्त्तयेत्॥
गच्छ गच्छेति तां ब्रूयान्मा भैरिति वारयेत्।
संस्पृशन् गां नमस्कृत्य कुर्य्यात्तान्तु प्रदक्षिणम्॥
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा।
तृणोदकादिसंयुक्तं यः प्रदद्याद्गवाह्निकम्॥
सोऽश्वमेधसमं पुण्यं लभते नात्र संशयः।
पृथिव्यां यानि तीर्थानि समुद्राश्च सरांसि च॥
गवां शृङ्गोदकस्नाने कलां नार्हन्ति षोड़शीम्।
कुतस्तेषां हि पापानि येषां गृह मलङ्कृतम्॥
सततं बालवत्साभिर्गोभिः स्त्रीभिरिव स्वयम्।
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्॥

तिष्ठन्त्येकत्र सत्त्वानि हरिरेकत्र तिष्ठति।
गोभिर्यज्ञाः प्रवर्तन्ते गोभिर्देवाः प्रतिष्ठिताः॥
गोभिर्वेदाः समुद्गीर्णाः स षडङ्गपदः क्रमात्।
सौरभेयास्तु तस्याग्रे पृष्ठतोऽप्यस्य ताः स्थिताः॥
वसन्ति हृदये नित्यन्तासां मध्ये वसन्ति ये।
ते पुण्यपुरुषाः क्षीणां नाकेऽपि दुर्लभाश्च ये॥
शृङ्गमूले स्थितो ब्रह्मा शृङ्गमूले तु केशवः।
शृङ्गाग्रे शङ्करं विद्यात्त्रयोदेवाः प्रतिष्ठिताः॥
शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च।
सर्वे देवाः स्थिता देहे सर्वदेवमया हि गौः॥
ललाटाग्रे स्थिता देवी नासामध्ये तु षण्मुखः।
कम्बलाश्वतरौ नागौ तत्कर्णौ यौ व्यवस्थितौ॥
स्थितौ तस्याश्च सौरभ्याश्चक्षुषोः शशिभास्करौ।
दन्तेषु वसवश्चाष्टौ जिह्वायां वरुणः स्थितः॥
सरस्वती च हुङ्कारे यमयक्षौ च गण्डयोः।
ऋषयो रोमकूपेषु प्रस्रावे जाह्नवीजलम्॥
कालिन्दी गोमये तस्या अपरा देवता स्तथा।
अष्टाविंशतिदेवानां कोट्यो लोमसु ताः स्थिताः॥
उदरे गार्हपत्योऽग्नि र्हृदये दक्षिण स्तथा।
मुखे चाहवनीयस्तु चावसथ्यौ च कुक्षिषु॥
एवं यो वर्त्तते गोषु ताड़नं क्रोधवर्जितः।
महतीं श्रिय माप्नोति स्वर्गलोके महीयते॥
कुल्यं तस्या न लङ्घेत पूतिगन्धं न वर्जयेत्।
यावत्पिबति तद्गन्धं तावत्पुण्यं प्रवर्धते॥

यो गां पयस्विनीं दद्यात्तरुणीं वत्ससंयुताम्।
शिवस्यायतनं दत्त्वा दत्तन्तेन तु विश्वकम्॥
उक्ता गौ वेधसा सृष्टा तस्य स्तुत्यादनाय च।
तैरुत्पादितशस्येन सर्वमेतद्धि धार्य्यते॥
यश्चैतान् पालयेत् यत्नाद्वर्धयेच्चैव यत्नतः।
जगन्ति तेन सर्वाणि साक्षात् स्युः पालितानि च॥
यावद्गोपालने पुण्य मुक्तं पूर्वमनीषिभिः।
उक्ष्णोऽपि पालने तेषां फलं दशगुणं भवेत्॥
जगद्देतद्धृतं सर्वम नडुत्त्व चराचरम्।
वृष एव्यवती रक्षा पालनीयस्तु सर्वदा॥
धर्मोऽयं भूतले साक्षाद्ब्रह्मणा हितताड़िताः।
त्रैलोक्यं धारणायालमन्नानाद्य प्रसूयते॥
अनादेयानि घासानि विध्वंसन्ति सकामतः।
भ्रमिता भूतलं दूरमुक्षाणाड्डो न पूजयेत्॥
उत्पादयन्ति शस्यानि मर्दयन्ति वहन्ति च।
आनयन्ति दवीयस्य मुक्ष्णोर्वा कोऽधिको भुवि॥
स्कन्धेन दूराच्च वहन्ति भारं माचादि किञ्चिद्यनपत्युरत्व।
स्वीयेन जीवेन परस्य जीवं रक्षन्ति पुष्णन्ति विवर्धयन्ति॥
पुण्यास्तु गावो वसुधातले मां विभ्रत्यमुङ्गोष्ठगर्भभारम्।
भारः पृथिव्या दशताड़िताया एकस्य चाष्णो ह्यपि साधुवाचः॥
एकेन दत्तेन वृषेण येन दत्ता भवेयुर्द्दश सौरभेयाः।
माहेत्यपीयं धरणीं समाना तस्माद्वृषात् पूजितमस्ति चान्यः॥
उत्पाद्य शस्यानि तृणाचरन्ति तदेव भूयः सकलं वहन्ति।
न भारखिन्नाः प्रवदन्ति किञ्चिदहोवृषाद्धार्यति जीवलोकः॥

तृतीयेऽह्नि चतुर्थे वा यदेवोप्ता दृढीभवेत् ।
तदा न सातु भेतव्या नैव प्रागदुर्बलस्य च ॥
नाम।बेत्रनकीलन्तु खादिरं वाथ सैंशिपम् ।
द्वादशाङ्गुल कङ्कार्य्यन्तज्ञैस्त्रीणि समेच वा ॥
शाला द्विजेन्द्रा वृषगोहयानां ता याम्यदिग्द्वारवतीं विदध्यात्।
सौम्या ककुप्द्वारवतीं सुशोभान्तेषां शमिच्छन् ध्रुतमात्मनश्च॥
गावो वृषो वा हयहस्तिनो वा अन्येऽपि सर्वे पशवो द्विजेन्द्राः ।
याम्या मुखा दिङ्मुखमुत्तरा दिङ्मुखाश्शका स्ते खल बन्धनीयाः॥
शालाप्रवेशे वृषगोपशूनां राजापि यत्नाद्धयकुञ्जराणाम्।
होमञ्च सप्तार्चिषि शास्त्रयुक्तं कुर्य्याद्विजन्मो द्विजपूजनञ्च ॥
लाङ्गलं यत्प्रवक्ष्यामि यत्काष्ठं यत्प्रमाणतः ।
हलीशायास्तथात्मानं प्रतोदस्य युगस्य च ॥
चत्वारिंशत्तथाचाष्टा वङ्गुलानि कुहः स्मृतः ।
अथार्द्धमङ्गलैर्भोज्यो हलीशा वेधतस्य यः ॥
षोड़शैव तु तस्याधः षड्विंशति तथोपरि ।
वेधस्तथाच कर्त्तव्यः प्रमाणेन षड़ङ्गुलः ॥
अष्टाङ्गुलमुरस्तस्य वेधादूर्द्धं प्रकल्पयेत् ।
ग्रीवा दशाङ्गुला चोर्द्धं हस्तग्राही ततः स्मृतः ॥
अङ्गुलैश्चाष्टभिस्तन् स्याद्वेधः स्यात्प्रतिहारकः ।
तस्याधस्ताद्यच्चत्वारि स वेधश्चतुरङ्गुलः ॥
सार्वत्रचैः शुभा कार्य्या तद्वेधस्त्र्यङ्गुलो भवेत् ।
पञ्चाङ्गुलमुरस्तस्याः शिरस्येति विभाजनम् ॥
पृष्ठत्वं शिरसोधार्य्यं हस्ततलप्रमाणकम् ।
अङ्गुलानि तथा चाष्टौ उरसः पृथुता स्मृता ॥

बन्धाऽहिः प्रतीहारी षड्विंशदङ्गुला भवेत्।
सुतीक्ष्णो लोहपाल्यस्य मुक्तादामादिदारकृत्॥
नगरं चीरवृक्षस्य न विल्वपिचुमर्दयोः।
इत्यादीनां हि कुर्व्वाणं न नन्दति चिरं गृही॥
प्राञ्जला सप्तहस्ता तु हलीषा विदुषा मता।
तस्य वेधः सवर्णायाः कार्य्यौ नववितस्तिभिः॥
ह्रस्वाव्ययोर्न तत्कुर्य्यात् कीर्त्तितौ तौ प्रकीर्त्तितौ।
प्रमादतस्तु ताः कुर्वन् सशस्यो नश्यते गृही॥
नीचोच्चवृषमानेन तज्ज्ञास्तां प्रवदन्ति हि।
चतुर्हस्तं युगं कार्य्यं स्कन्धस्थानेऽर्धचन्द्रवत्॥
शेषस्कन्धाः कदम्बस्य शालाधन्यतमस्य च।
तस्या वेधाद्वहिः कार्य्या दशाङ्गुलप्रमाणिका॥
तन्माने च प्रवालीच तदन्तरदशाङ्गुलम्।
प्रतोदविषमग्रन्थि वैणवस्य चतुः करः॥
तदग्रे तु प्रकर्त्तव्या यवाकारातु लोहवत्॥
हीनातिरिक्तं कर्त्तव्यं नैव किञ्चित्प्रमाणतः।
कुर्य्यादनडुहा दैन्याददैन्यां नरकं व्रजेत्॥
यथा भीष्टं तथा शोभं वाहकस्य प्रमाणतः।
भूमेश्च कर्षणायालं तज्ज्ञाः सर्ववदन्ति हि॥
योजनं तु हलस्याथ प्रवक्ष्यामि यथा तथा।
श्रेष्ठनक्षत्र संयुक्ते पुण्येऽह्नि तद्विधीयते॥
यत्र दिने तु बुध्येत तत्र कार्य्यं विजानता॥
यत्र कृत्यं हितं चापि पुण्यं वा मनसि स्मरेत्।
तत्र विद्वान् द्विजश्रेष्ठः पुण्येऽह्नि तद्विधीयते॥

मातृश्राद्धं द्विजः कृत्वा यथोक्तविधिना गृही।
द्रव्यकालानुसारेण कुर्वतो धर्मतः कृषिम्॥
प्रोल्लिखन् मण्डलं पुष्पधूपदीपैः समर्चयेत्।
इन्द्राय च तथाश्विभ्यां मरुद्भिश्च तथा द्विजः॥
कुर्य्याद्बलिं हुतिं विद्वान् उदलश्यश्चयाय च।
तथा कुमार्य्यै शीतायै अनुमत्यै तथा बलिम्॥
नमः स्वाहेति मन्त्रेण सवालन्नात्मनः शुभम्॥
दधिगन्धाक्षतापुष्पैः शमीपत्रैस्तिलैस्तथा।
दद्याद्बलिं वृषाणाञ्च तथाज्यप्राशनं तथा॥
संस्पृश्य शिरःफालाग्रे हेम्ना वा राजतेन वा।
प्रलेप्य मधुसर्पिर्भ्यां कुर्य्याच्चैव प्रदक्षिणाम्॥
अग्न्योदृशौ मण्डलं कुर्य्यात् कृत्वा सीरप्रवाहणम्।
पुष्पं लाङ्गलकल्याणं कल्याणाय नमोऽस्त्विति॥
सीतायाः स्थापनं कुर्य्यात् पाराशरऋषिं स्मरेत्।
सीतां युञ्जत इत्याद्यैर्मन्त्रैःशीरं प्रवाहयेत्।
दधिदूर्वाक्षतैः पुष्पैः शमीपत्रैश्च पुण्यदैः॥
सीतां पूज्य वशो भक्तो रक्तवस्त्रविशाणकौ।
सप्त धान्यानि चादाय प्रोक्ष्य पूर्वामुखो हली॥
तानि दत्त्वोक्षणः क्षेत्रे किरन् भूमौ कृषेद्द्विजः।
न यवैर्न तिलैर्हीन द्विजः कुर्य्याच्च कर्षणम्॥
तद्विहीनन्तु कुर्वाणं न प्रशंसन्ति देवताः।
तिलमात्रच्युतं तोयं दक्षिणस्याम्पतेर्दिशि॥
तेन तृप्यन्ति पितरो यावन्न तिलविक्रयः।
विक्रीणीते तिलान् यस्तु तर्पयेत्सर्पिर्देवताः॥

विसृज्य पितरस्तन्तु प्रयान्तीव तिलैः सह।
उषाजलं यवस्तम्बपत्रेभ्यो भूतले पतत्॥
पयोदधिघृताद्यैस्तु तर्पयेत्सर्वदेवताः।
देवपर्जन्यभूसीरयोगात् कृषिः प्रजायते॥
व्यापारात् पुरुषस्यापि तस्मात्तचोद्यतो भवेत्।
शालीन् भूशणकार्पासं वार्त्ताकुप्रभृतीनि च॥
वापयेत्सर्वबीजानि सर्ववापी न सीदति।
चन्द्रक्षये यतिर्विप्रो यो कुर्यात्क्षुरान् क्वचित्॥
तत्पञ्चदशवर्षाणि त्यजन्ति पितरो हि तम्।
चन्द्रक्षये द्विजो विद्वान्यो भुङ्क्ते तु पराशनम्॥
भोक्तुर्मासार्जितं पुण्यं भवेदशन मस्य तत्।
चन्द्रार्कयोस्तु संयोगे कुर्याद्यः स्त्रीनिषेवणम्॥
स रेतोभोजिनस्तस्य षण्मासं पितरो हिताः।
चन्द्रक्षये च यः कुर्य्यान्नरस्तरुनिकृन्तनम्॥
तत्पर्णसङ्ख्यया तस्य भवन्ति भ्रूणहत्यकाः।
वनस्पतिगते सोमे योऽप्यध्वानं व्रजेन्नरः॥
प्रभ्रष्टद्विजकर्माणं न त्यजन्त्यमरादयः।
वासांसि दुःप्रणाशाय रजकस्था मतिः क्षिपेत्॥
पिबन्ति पितरस्तस्य मासं वस्त्रजलन्तु तत्।
सोमक्षये द्विजो याति तत्कायस्तु हुताशनम्॥
तद्देवं पितृशापाग्निदग्धो नरक माविशेत्।
अष्टमीं कामभोगेन षष्ठी तैलोपभोगिना॥
कुट्टुत्य दन्तकाष्ठेन हिनस्त्यासप्तमं कुलम्।

चन्द्राप्रतीता: पुरुषास्तु देवा दद्यादपत्या यदि दन्तकाष्ठम् ।
नराधिराज: सहितस्तु तेन घात: कृत: स्यात्मिहदेवतानाम् ॥

तत्राभ्यज्य विषाणानि गावश्चैव वृषास्तथा ।
चरणाय विसृज्यन्ते आगतान्निशि भोजयेत् ॥
य उत्पाद्येह शस्यानि सर्वाणि तृणचारिण: ।
जगत्सर्वं धृतं यैस्तु पूज्यन्ते किन्न ते वृषा: ॥
येनैकेन प्रदत्तेन दत्तं गोदशकम्भवेत् ।
यद्रूपेण स्थितो धर्म: पूज्यन्ते किन्न ते वृषा: ॥
पाल्याहि यत्नतस्ते वै वाहनीया यथाविधि ।
स याति नरकं घोरं यो वाह यत्यपालयत् ॥
नाधिकाङ्गो न हीनाङ्ग: पुष्पिताङ्गो न दूषित: ।
वाहनीयो हि शूद्रेण वाहयन् चयमाप्नुयात् ॥
वर्जयेद्दुष्टदोषांश्च गावो वै दोहने नर: ।
पाल्या वै यत्नत: सर्वे पालयन् शुभमाप्नुयात् ॥
अन्नार्थं मेतानुत्पाणा: ससर्ज परमेश्वर: ।
अन्नेनाप्यायते सर्वं त्रैलोक्यं सचराचरम् ॥
अग्निर्ज्वलति चान्नार्थं वाति चान्नाय मारुत: ।
गृह्णाति चाम्भसां सूर्यो रसानन्नाय रश्मिभि: ॥
अन्नं प्राणो बलं चान्न मन्नाज्जीवित मुच्यते ।
अन्नं सर्वस्य चाधार: सर्व मन्ने प्रतिष्ठितम् ॥
सुरादीनां हि सर्वेषा मन्न वीजं परं स्थितम् ।
तस्मादन्नात्परं तत्वं न भूतं न भविष्यति ॥
द्यौ: पुमान्धरणी नारी अम्भोवीजन्दिवश्च्युतम् ।
वसुधाती तोयसंयोगादन्नादीनां हि सम्भव: ॥

आपोमूलं हि सर्वस्य सर्बमप्सु प्रतिष्ठितम् ।
आपोऽमृतरसो ह्याप आपः शुक्रं बलं महः ॥
सर्वस्य वीज मापो वै सर्वं मद्भिः समावृतम् ।
अद्य आप्यायना ह्यापः आपो ज्येष्ठतरा ह्यतः ॥
किञ्चित्कालं विनाऽन्नाद्यै र्जीवन्ति मनुजादयः ।
न जीवन्ति विना तानि तस्मादापोऽमृतं स्मृतम् ॥
दत्तानि चाद्भिरेतस्यां किं न दत्तं क्षितौ भवेत् ।
तथान्नेन प्रदत्तेन सर्वं दत्तं भवेदिह ॥
अतोऽप्यन्नार्थभावेन कर्त्तव्यं कर्षणं द्विजः ।
यथोक्तेन विधानेन लाङ्गलादिप्रयोजनम् ॥
सीते ! सौम्ये ! कुमारि ! त्व देवि ! देवार्चिते ! श्रिये ।
सत्कृताहि यथासिद्धा तथा मे सिद्धिदा भव ॥
सकृत् सूनोर्विना नाम्ना सीतयाः स्थापनं विना ।
विनाऽभ्युक्षणरक्षार्थं सर्वं हरति राक्षसः ॥
वापने नवने क्षेत्रे खले गन्त्रीप्रवाहणे ।
एष एव विधिर्ज्ञेयो धान्यानाञ्च प्रवेशने ॥
देवतायतनोद्यानानिपातस्थानगो व्रजन् ।
सीमा श्मशानभूमिञ्च वृक्षच्छाया क्षितिं तथा ॥
भूमिं निखातयूपाञ्च अयनस्थानमेव च ।
अन्यामपि हि चावाह्यां न कृषन् कृषिकृत् हराम् ॥
नोषरां वाहयेद्भूमिं वर्चाश्मककरीटिताम् ।
वाहयन्नाप्रमत्तश्च न नदीपुलिनं तथा ॥
यद्यसौ वाहयेल्लोभात्द्वेषाद्वापि हि मानवः ।
क्षीयतेऽसौ चिरात्पापात् सपुत्रपशुबान्धवः ॥

नरकं घोरतामिस्रं पापीयान्याति चैनसः ॥
योऽपहृत्य परकीयां कृषिकृद्वाहयेद्धराम् ।
स भूमिस्तेन पापेन ह्यनन्तनरकं वसेत् ॥
न दूरे वाहयेत् क्षेत्रं नचैवात्यन्तिके तथा ।
वाहयेन्नपथे क्षेत्रं वाहयन्दुःखभाग्भवेत् ।
क्षेत्रेष्वेव वृतिं कुर्य्यात् स स्पष्टो नावलोकयेत् ॥
न लङ्घयेत्पशूनासौ नाभीयाद्याञ्च शूकरः ।
बन्धस्य यत्नतः कार्य्यो मृगयुत्रासनाय च ॥
अत्राप्युपद्रवं राजा तस्करादिसमुद्भवम् ।
संरक्षेत्सर्वतो यत्नाद्यस्मात् षड्भागमौकरात् ॥
कृषिकृन्मानवस्त्वेवं मत्वा धर्मं कृषे र्ध्रुवम् ।
अनवद्यां शुभां स्निग्धां जलावगाहनक्षमाम् ॥
निम्नां हि वाहयेद्भूमिं यत्र विश्रमते जलम् ।
वाहयेत्त जलाभ्यर्णे अपुष्टोऽसेकसम्भवैः ॥
शारद सुक्षकैः स्थानं कस्वादि वापयेद्बली ।
अर्धासकासुकार्पासं तदन्यत्र तु हैमतम् ॥
वसन्तग्रीष्मकालीय मप्यूस्निग्धेषु तद्विदः ।
केदारेषु तथा शालीन् जलोपान्तेषु चेक्षवः ॥
वृन्ताकशाकमूलानि कन्दानि च जलान्तिके ।
वृष्टिविश्रान्तपानीयक्षेत्रेषु च यवादिकान् ॥
गोधूमांश्च मसूरांश्च खल्लान् खलकुलन्तथा ।
समस्निग्धेषु चाप्यानि भूमिजीवान् विजानता ॥
तिला बहुविधा वाप्या अतसीशणमेव च ।
सृदग्धु यो जगत्सर्वं वापयेत्कृषिकृन्नरः ॥

सम्पश्येन्नरतः सर्वान् गोवृषादीन् स्वयङ्गृही ।
चिन्तयेत्सर्वमात्मानं स्वयमेव कृषिं व्रजेत् ॥
प्रथमं कृषिवाणिज्यं द्वितीयं योनिपोषणम् ।
तृतीये विक्रयं बक्रं चतुर्थं राजसेवनम् ॥
नखैर्विलिखते यः स्यात् ब्रूयुर्दोषं मनीषिणः ।
तस्याः सीरविदारेण किन्न पापं क्षितेर्भवेत् ॥
तृणैकच्छेदमात्रेण प्रोच्यते क्षयमायुषः ।
असङ्ख्यकन्दनिर्वासादसङ्ख्यातम्भवेद्दयम् ॥
यद्वर्षं मत्स्यबधानां तथा सङ्कर्षणामपि ।
अहः कुक्कुटिकानाञ्च तद्दिने कृषिजीविनाम् ॥
बधकानाञ्च यत्पापं यत्पाप स्मृगयोरपि ।
कदर्य्याणाञ्च यत्पापं यत्पापं कृषिजीविनाम् ॥
वणिनाञ्च गृहस्थानां कृषिवृत्त्युपजीविनाम् ।
तदेनसो विशुद्ध्यर्थं प्राह सत्यवतीपतिः ।
द्वादशो नवमो वापि सप्तमः पञ्चमोऽपि वा ॥
धान्यभागः प्रदातव्यो देहिनः चेत्रिणो ध्रुवम् ।
अप्रसर्य्यद्धूतभूमौ च विशाब्धिक्षेत्रभुग्भवेत् ॥
एकैकांशापकर्म स्याद्यावद्दशमसप्तमौ ।
ग्रामेशस्य नृपस्यापि वर्णिभिः कृषिजीविभिः ॥
स तु भागः प्रदातव्यो यतिस्ते कृषिभागिनौ ।
व्यूढौ तु मध्यमात्रायां देयोऽंशः स्याच्चतुर्दशः ॥
एकैकांशाय चर्षस्तु यावद्दशमसप्तमौ ।
ब्राह्मणास्तु कृषिं कुर्वन्स्वाहयेद्दिच्छया धराम् ।
न किञ्चित्कस्यचिद्दद्यात्स सर्वस्य प्रभुर्य्यतः ।

ब्रह्मा वै ब्राह्मणानां स्वात्मभुखसृजदादितः ॥
तद्रक्षणाय बाहुभ्यामसृजत् क्षत्रियानपि ।
पशुपाल्याशनोत्पत्त्यै ऊरुभ्याञ्च तथा विशः ॥
द्विजदास्याय पद्भ्याय पद्भ्यां शूद्रमकल्पयत् ।
यत्किञ्चिज्जगतौ यत्र भूगेहाश्व गजादिकम् ॥
स्वभावेनेह विप्राणां ब्रह्मा स्वयमकल्पयत् ।
ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ ॥
न तयोरन्तरं किञ्चित्प्रजा धर्मेण रक्षयेत् ।
तस्मान्न ब्राह्मणो दद्यात् कुर्वाणो धर्मतः कृषिम् ॥
ग्रामेशस्य नृपस्यापि किञ्चिन्तमप्यसौ बलिम् ।
अथान्यत्सम्प्रवक्ष्यामि कृषिकृच्छुद्धिकारणम् ॥
संशुद्धः कर्षको येन स्वर्गलोकमवाप्नुयात् ।
सर्वसत्वोपकाराय सर्वत्र कृषिकृन्नरः ॥
कुर्य्यात् कृषिं प्रयत्नेन सर्वसत्वोपजीव्यकृत् ।
सर्वस्य स्थितिकारणात्म देवपितृभिः पुनः ॥
मनुष्याणान्तु पोष्याय कृषिं कुर्य्यात् कृषीबलः ।
वयांसि चान्यसत्वानि क्षुत्तृष्णापीड़ितो द्विजः ॥
विमुक्तः सर्वपापेभ्यः स्वर्लोकसमवाप्नुयात् ।
चतुर्दिक्षु खले कुर्य्यात्प्राच्यामतिघनावृतिम् ॥
सैकद्वारपिधानञ्च पिदध्याच्चैव सर्वतः ।
खरोष्ट्राजोरणाश्चान् विशतस्तु निवारयेत् ॥
श्वशूकर शृगालादिकाकोलूककपोतवान् ।
त्रिसन्ध्यं प्रोक्षणं कुर्य्यात् दानीयाभ्युक्षणाम्बुभिः ॥
रक्षा च भस्मना कुर्य्याज्जलधाराभिरक्षणम् ।

त्रिसन्ध्य मर्चयेत्सीतां पराशरमृषिं स्मरन्।
प्रेतभूतादिनामानि न वदेच्च तदग्रतः॥
सूतिकागृहवत्तत्र कर्त्तव्यन्तत्र रक्षणम्।
हरन्त्यरचितं यस्मात् रक्षांसि सर्वमेव हि॥
प्रशस्तादिव पूर्वाह्णे नापराह्णे न सन्ध्ययोः।
धन्योन्मानं सदा कुर्यात्सीतापूजनपूर्वकम्॥
यजेत खलभिक्षाभिः कलेरोहित्वएव हि।
भक्त्या सर्वं प्रदत्तं हि तत्समस्तमिहाक्षयम्॥
खलयज्ञा पवित्रैषा ब्रह्मणा निर्मिता पुरा।
भागधेयमयां कृत्वा तां गृह्णन्त्वीह मामिकाम्॥
शतक्रत्वादयो वैराः पितरः सोमपादयः।
सनकादिमनुष्यांश्च येचान्ये दक्षिणाशनः॥
तदुद्दिश्य च विप्रेभ्यो दद्याच्च प्रथमं हली।
विवाहे खलयज्ञे च संक्रान्तौ ग्रहणेषु च॥
पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्।
अन्येषामर्थिनां पश्चात्कारुकाणां पुनः पुनः॥
दीनानामप्यनाथानां कुष्ठीनां कुशरीरिणाम्।
क्लीवान्धबधिरादीनां सर्वेषामपि दीयते॥
वर्णानां पतितानाञ्च व्युहग्भूतानि तर्पयेत्।
चाण्डालानांश्च पाकानां प्रीत्यात्युच्चावचाददत्॥
ये केचिदागतास्तत्र पूज्यास्ते विधिवद्द्विजाः।
स्तोकशः सीरिभिः सर्वैं वर्णिभिर्गृहमेधिभिः॥
दत्त्वात्वनृतया वाचा क्षमेणाय विसर्जयेत्।
तत्कृत्वा स्वगृहं गच्छेच्छ्राद्धमभ्युदयं श्रवेत्॥

शरद्वह्वेमन्तवसन्तनवान्नैः श्राद्धमाचरेत्।
नो हुत्वानन्तदश्नीयादश्नन्तं तद्व्ययमश्नुते॥
कृषानुत्पाद्य धान्यानि खलयज्ञं समाप्य च।
सर्वरत्नवृहि ो युक्त इहामुत्र सुखी भवेत्॥
कृषेरन्यतमो धर्मो न लभेत् कृषितोऽन्यतः।
न सुखं कृषितोऽन्यत्र यदि धर्मेण कर्षति॥
अवस्त्रत्वं निरन्नत्वं कृषितो नैव जायते।
अनातिथ्यञ्च दुस्तत्वं गोम ो न कदाचन॥
निर्धनत्वमसभ्यत्वं विद्यायुक्तस्य कर्हिचित्।
अस्थानित्वमभाग्यत्वं न सुशीलस्य कर्हिचित्॥
वदन्ति कवयः केचित् कृष्यादीनां विशुद्धये।
लाभस्यासंप्रदानञ्च सर्वेषां शुद्धिकृद्भवेत्॥
प्रतिग्रहचतुर्थांशं वणिर्लाभं तृतीयकम्।
कृषितो विंशतिश्चैव ददते नास्ति पातकम्॥
राज्ञो दत्त्वा च षड्भागं देवतानां च विंशकम्।
त्रयस्त्रिंशञ्च विप्राणां कृषिकर्मा न लिप्यते॥

कृष्या च चोत्पाद्य यवादिकानि
धान्यानि भूयांसि मखान्विधाय।
मुक्तो गृहस्थोऽपि पराशरप्राक्
तस्यामयः कश्चिदवादिदोषाः॥

देवा मनुष्याः पितरश्च सर्वे साध्याश्च यक्षाश्च सकिन्नराश्च।
गावो द्विजेन्द्राः सह सर्वसत्वैः कृष्यं न तृप्तानि मनाक् द्युरेति॥
यश्चैतदालोच्य कृषिं विदध्यात् लिप्येत पापेन स भूभवेन।
सीरेत तस्यानि विदारितापि स्याद्भूतधात्री वरदानदात्री॥

षट् कर्माणि कृषिं येतु कुर्युर्ज्ञानविधिं द्विजाः ।
ते सुरादिवरप्राप्ताः स्वर्गलोकमवाप्नुयुः ॥
षट्कर्मभिः कृषिः प्रोक्ता द्विजानां गृहमेधिनाम् ।
गृहञ्च गृहिणीमाहुस्तद्विवाहमथोच्यते ॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रणीतायां कृषिकर्मसीतायज्ञोपवर्णनं नाम तृतीयोऽध्यायः॥

चतुर्थोऽध्यायः ।

स्वयञ्च वाहयेत् चेत्रे धान्यैश्च स्वयमर्जितैः ।
कुर्याद्विवाहयागादिपञ्चयज्ञांश्च नित्यशः ॥
अष्टौ विवाहा नारीणां संस्काराय प्रकीर्तिताः ।
ब्राह्मादिकं क्रमेणैव सम्प्रवक्ष्याम्यतः पृथक् ॥
जात्यादिगुणयुक्ताय पुस्त्वे सति वराय च ।
कन्यालङ्कृत्य दीयेत विवाहो वेधसः स तु ॥
रेतो मज्जति यस्यास्तु मूत्रञ्च ह्रादिकेऽनिलम् ।
पुमान् स्यात् लक्षणैरेतै र्विपरीतैश्च षण्डकः ॥
ये यज्ञे वर्त्तमाने तु ऋत्विजः कर्म कुर्वते ।
कन्यालङ्कृत्य दीयेत विवाहः स तु दैवकः ॥
वराय गुणयुक्ताय विदुषे सदृशाय च ।
कन्या गोद्वयमादाय दीयेतार्षः स उच्यते ॥
कन्या चैव वरश्चोभौ इच्छया धर्मचारिणौ ।
स्यातामिति च यत्नोक्तं दानं कार्यं विधिस्त्वयम् ॥
एतावद्देहि मे द्रव्य मित्युक्त्वा प्राक् प्रदाय च ।

यत्र कन्यां प्रदीयेत स दैवत्यविधिः स्मृतः ॥
यत्रान्योन्याभिलाषेण उभयोर्वरकन्ययोः ।
तयोस्तयोर्विवाहः स्याद्गान्धर्वः प्रथितः स तु ॥
युद्धे हृत्वा बलात्कन्यां यत्रास्थित्याप इत्यृषा ।
उह्यन्तु स तु विद्वद्भिर्विवाहो राक्षसः स्मृतः ॥
सुप्तां वापि प्रमत्तां वा कन्यां छलेन भुज्यते ।
सर्वेभ्यः स तु पापिष्ठः पैशाचः प्रथितोऽष्टमः ॥
आद्या वाद्यस्य षट् प्रोक्ता धर्माश्चत्वार एव हि ।
चत्वारोऽन्ये द्वितीयस्य आद्यस्य च द्वयस्य च ॥
पञ्चमस्य तथाषष्ठः स्मृतौचतु चतुर्थयोः ।
द्वितीयस्यापि यत्प्रोक्ता एतयोस्तेन चाष्टमः ॥
वैधस्याद्यनुरूपेण द्वितीयापरयोः स्मृतः ।
सर्वसप्तममेकस्याद्वितीयस्यैव कीर्त्तितः ॥
अन्त्यावत्यधमौ चोक्ता वद्वाहः शक्रसूनुना ।
यथायुधस्वरूपेण प्रोक्तो दैत्यस्तु मानुषः ॥
वार्त्तायां प्राक्ततोऽधस्ताच्चतुराद्यविवाहजैः ।
स्वात्मानं द्विगुणान्वस्याद्दश सप्त च यस्य षट् ॥
स्त्रीणामाजन्मशर्मार्थिं वंशशुद्धौ प्रयत्नवान् ।
वरं हि कवयो विद्वान् जात्यादिगुणसयुतम् ॥
जातिर्विद्यावयः शक्तिरारोग्यं बहुपक्षता ।
अर्थित्वं वित्तसम्पत्तिरष्टावेते वरे गुणाः ॥
जातिर्विद्या च रूपञ्च कुलञ्चैव नवं वयः ।
आरोग्यत्वं विशेषेण पुंस्त्वे सत्यपि भक्षयेत् ॥
जातीरूपञ्च शीलञ्च वयो नवमरोगिता ।

स्वाचरत्वं विशेषेण सलक्षवरमाश्रयेत् ॥
स याति रूपं वित्तञ्च तथाग्रेवयसं दृढम् ।
सन्तोषजननं स्त्रीणां प्रज्ञावानाश्रयेद्वरम् ॥
न जातिं नच विद्याञ्च वित्तं वाचरणं स्त्रियाम् ।
किमु तत्प्राप्तिमिच्छन्ति तस्मात्प्रीतिकरं श्रयेत् ॥
पिता यत्र सगोत्रत्वं माता यत्र सपिण्डता ।
न च तामुद्वहेत्कन्यां दारकर्मण्यनादृताम् ॥
कन्यायाश्च वरस्यापि सन्तोभयो भवेद्धृतिः ।
तथा कन्यां वरो धीमान्वरयेद्वंशशुद्धये ॥
नानामतानि सर्वेषां सतां कन्यां वरं प्रति ।
सन्तानार्थं विशुद्ध्यर्थं जात्यादिषु च नान्यतः ॥
दूरस्थानामविद्यानां मोक्षं धर्मानुयायिनाम् ।
शूराणां निर्धनानाञ्च न देया कन्यका बुधैः ॥
वर्जयेदतिरिक्ताङ्गीं कन्यां हीनाङ्गरोगिणीं ।
अतिलोम्नीं हीनलोम्नी मवाचमतिवाग्युताम् ॥
पिता पितामहो भ्राता माता मातामहोऽपि वा ।
कन्यदाः स्युः क्रमेणैते पूर्वाभावे परः परः ॥
अधिकारी यदा न स्यात्तदस्याथ नृपस्य सा ।
तद्गिराच स्वयञ्चयं कन्यापि वरयेद्वरम् ॥
पिङ्गलां कपिलां कृष्णां दुष्टवाक्काकनिस्वनाम् ।
स्थूलाङ्गजङ्घपादाञ्च सदा चाप्रियवादिनीम् ॥
त्यजेन्नागनदीनाम्नीं पक्षिदृक्षर्क्षनामिकाम् ॥
अद्रिप्रत्याल्यनाम्नीञ्च तथाभीषणनामिकाम् ।
सुजातिमुद्वहेत्कन्यां सुरूपां लक्षणान्विताम् ॥

अरोगिणीं सुशीलाञ्च तथा श्वाहमतीमपि।
सुलज्जां शुभनासाञ्च पतिप्रीतिकरीमपि॥
श्वश्रुश्वशुरगुर्वादिशुश्रूषाकारिणीं प्रियाम्।
अव्यङ्गकुलसञ्जाता मनभिश्वस्तवंशजाम्॥
प्रस्वेदसुभगां धाता शुभमिच्छन् समुद्वहेत्।
विप्रः स्वामपरेद्वेतु राजा स्वामपरे तथा॥
वैश्यः स्वाञ्च चतुर्थीञ्च क्रमेणैव समुद्वहेत्।
पितृभिः सप्तमीमेके मातृतः पञ्चमीमपि॥
उद्वहेदितिमत्यन्ते कुलधर्मसमाश्रिताः।
उक्तलक्षणकन्यायां कृत्वा पाणिग्रहं द्विजः॥
धर्मोद्वाहनकेनापि तदा दद्याद्धुताशनम्।
दायाद्यकाले वा दद्यात्तदुक्तं कर्मकृद्द्विजः॥
यदा वापि भवेद्भक्तिः सम्पत्तिर्वा तदा भवेत्।
ऋतावृतौ स्त्रियङ्गच्छेत् स्त्रीच्छया चवरं स्मरन्॥
सर्वन्तदिच्छया कुर्याद्यथाभयोभवेद्रतिः।
भोज्यालङ्कारवासोभिः पूज्याः स्युः सर्वदा स्त्रियः॥
यथा किञ्चिन्न शोचन्ति नित्यं कार्य्यन्तथा नृभिः।
आयुर्वित्तं यशः पुत्राः स्त्रीप्रीत्या स्यु र्नृणां सदा॥
नश्यन्ते ते तदा प्रीतौ तासां शापादसंशयः।
स्त्रियश्च यत्र पूज्यन्ते सर्वदा भूषणादिभिः॥
देवाः पितृमनुष्याश्च मोदन्ते तत्र वेश्मनि।
स्त्रियस्तुष्टाः स्त्रियः साक्षाद्दुष्टाश्च दुष्टदेवताः॥
वर्धयन्ति कुलन्तुष्टाः नाशयन्त्यपमानिताः।
नापमान्याः स्त्रियः सद्भिः पतिश्वशुरदेवरैः॥

त्यक्ता पिता च मात्रा च तथा बन्धुभिरेव च।
स्त्री यस्य पुरुषस्यापि यत्नेभयो भवेद्गतिः॥
तत्र धर्मार्थकामाः स्युः स्त्र्यधीना यतस्त्वमी।
षट् कर्माणि नृणान्तेषां येषां भार्य्या पतिव्रता।
पतिलोकन्तु ता यान्ति तपसा तेन योगवित्॥
पतिव्रता तु साध्वी स्त्री अपि दुष्कृतकारिणी।
पतिमुद्धृत्य याति द्यां काकीव पतिता रुजाम्॥
जीवन्वापि मृतोवापि पतिरेव प्रभुः स्त्रियाम्।
नान्यच्च दैवता तासां तमेव प्रभुमर्च्चयेत्॥
अन्यस्य पि हि दुष्टा स्त्री यान्यभावा प्रियम्पतिम्।
सा गच्छेन्नरकं घोरन्तद्रोहाद्दयुतेऽपि च॥
नियोज्य गृहकृत्येषु सर्वदा ता नृभिः स्त्रियः।
गृहार्थासक्तचित्तास्तास्तदेवार्हन्ति शोचितुम्॥
स्त्रीणामष्टगुणः कामो व्यवसायश्च षड्गुणः।
लज्जा चतुर्गुणा तासा माहारश्च तदर्द्धकः॥
न वित्तं नैव जातिञ्च नापिरूपमपेक्षते।
किन्तु ताभिः पुमानेष इति मत्वैव भुज्यते॥
विकुर्वाणाः स्त्रियो भर्त्तुरायुष्यधननाशकाः।
अनायासेन वा स्वस्य यथाशक्त्या भवन्ति हि॥
नारीणाञ्च नदीनाञ्च न गतिर्ज्ञायते नृभिः।
कूलं कूलं प्रयायिन्योः कालक्षेपो न जायते॥
चेष्टाचरित्रचित्राणि दैवानेव विदुः स्त्रियाम्।
किं पुनः प्राणिमात्रा स्तु सर्वथा नष्टबुद्धयः॥

तस्मात्ताः सर्वथा रक्ष्याः सर्वोपायैर्नृभिः सदा।
श्वशुरैर्देवराद्यैस्ताः पितृभ्रात्रादिभिस्तथा॥
विवाहात् प्राक् पिता रक्षेत्ततः पतिस्तु यौवने।
रक्षेयुर्वार्द्धके पुत्राः नास्ति स्त्रीणां स्वतन्त्रता॥
स्वातन्त्र्येण विनश्यन्ति कुलजा अपि योषितः।
न स्वातन्त्र्य मतस्तासां प्रजापति रकल्पयत्॥
अशौचास्त्र सशौचास्त्र अमेध्या अपि पावनाः।
दुर्वाचोऽपि सुवाचस्ता स्तस्मादन्वेषयेत्ततः॥
शौचं वाचं च मेध्यत्व सोमगन्धर्वपावकाः।
ददुस्तासां वरानेतां स्तस्मान्मेध्यतराः स्त्रियः॥
भर्त्तारो वो भविष्यन्ति युष्मच्चित्तानुसारिणः।
रक्षणीयास्तत स्तास्तु सर्वभावेन योषितः॥
समाहृत्याकृष्य मिद्याद्यैर्देवन्यस्तां नृणां तनौ।
अर्धकाया नृणां तास्ताः पृथक् धर्मादिना स्त्रियम्॥
नदी वापी स्त्रियं गच्छेन्न सगर्भां व्यवस्थिताम्।
अभिगच्छेदविद्वान् यस्तदा भूः क्षयमेति च।
नदी वापी स्त्रियं गच्छेदिच्छं स्तदिच्छयापि च॥
न पर्वसु न सन्ध्यासु नाद्याश्चतुरात्रिषु।
वन्ध्याष्टमेऽधिवेत्तव्या नवमे च मृतप्रजा॥
एकादशी स्त्रीजननी सद्यस्त्वप्रियवादिनी।
न वक्त्रेऽभिगमं कुर्यात्प्राणी गृहीतयोषितः।
कुर्याच्चेत्पितर स्तस्य पतन्ति रेतसोभुजः॥
भार्य्याधीनं सुखं पुंसां भार्याहीनं गृहं वनम्।

भार्य्याधीना सुखोत्पत्ति र्भार्य्याधीनः शुभोदयः ॥
यत्र भार्य्या गृहं तत्र भार्य्याधीनं गृहं वनम्।
न गृहेण गृहस्थः स्यात् भार्य्यया कथ्यते गृही ॥
गृहीस्याद् गृहधर्मेण स वै पञ्चमखादिकाः।
तद्धीनो न गृहस्थः स्यात् भार्य्यया कथ्यते गृही ॥
श्रौतो वा यदिवा स्मार्त्तः सर्वेषां गृहमेधिनाम्।
कण्डन्युदककुम्भीच चुल्ली पेषण्युपस्करम् ॥
पञ्चयज्ञविधानेन कुर्यात्पञ्च महामखान् ॥
पञ्चसूना वहन्त्यत्र सूनादोषो न विद्यते ॥
यद्दादौ वेदमारभ्य स्नात्वा भक्त्या द्विजोत्तमः।
अध्यापयेद्द्विजान् शिष्यान् स वै ब्रह्ममखः स्मृतः॥
यः स्नात्वाऽहरहः कुर्या द्देवांश्च मनुजान् पितॄन्।
तर्पयेदम्भसा भक्त्या पितृयज्ञः सवै मखः ॥
श्रौतेवा यदिवा स्मार्त्ते यज्जुहोति हुताशने।
विधिवत्तिः सवै विप्रः स तु देवमखः स्मृतः ॥
दशस्वाशासु यः कुर्याद्वृतशेषो वलिं द्विजः ॥
इन्द्रादिभ्यस्तथान्येभ्यः स वै भूतमखो मतः।
समागतातिथिं भक्त्या यश्चोजयति नित्यशः ॥
अन्यानभ्यागतांश्चैव समानीयेष्टि रुच्यते।
एवं पञ्चमखत्वं स्यान्मधुमांसाज्यपायसम् ॥
स सन्तर्प्य पितॄन् देवान् मनुजः स्वर्गमाप्नुयात्।
गृहस्थायौषधिं मत्वा त्वाचं धेनुं चतुःस्तनीम् ॥
स्वर्गौकसः पितॄन् देवान् पुन्यातिथिवरानपि।

स्वर्गौकोभिः पितृभ्यस्तु पुज्यास्ते ऽतिथयो द्विजैः ॥
चत्वारस्तु सुता एते यजुर्वेद उदाहृतः ।
स्वाहाकारो वषट्कारो हन्तकारस्तथा स्वधा ॥
दैवानि भागधेयौ द्वौ अन्यश्च मनुजां स्तथा ।
पितॄणाञ्च चतुर्थस्तु इतिवेदनिदर्शनम् ॥
इति निवृत्य विधिवत्सकलं कर्म नैत्यिकम् ॥
प्राणाग्निहोत्रविधिना भुञ्जीतान्न मघापहम् ।
अदत्त्वा पोष्यवर्गस्य ह्यकृत्वाऽध्यापनादिकम् ॥
असात्त्विकश्च योऽश्नीयात्सोऽश्नीयात्किल्बिषं द्विजः ।
प्राङ्मुखादिक्रमेणाशु दिव्यायुः कीर्तिकीर्त्तितम् ॥
दिव्याग्निस्थानसत्त्वाद्याद्दूयन्तदश्नन्ति राक्षसाः ॥
अथ प्राणाग्निहोत्रस्य श्रूयतां द्विजसत्तमाः ! ॥
वक्ष्यमाणो विधिः पुन्यः पावनः प्रेत्य चेह च ।
यो विधि देवतान्यस्तसंसारबन्धनाशकृत् ॥
तद्विदस्तु दिवं यान्ति मुक्ता देवान् ऋणेन च ।
उद्धरेद्यदि मत्वाशु पुरुषानेकविंशति ॥
सर्वेष्टिफलभाक् यायाद्ब्रह्म धर्मं क्षय मक्षयम् ।
यः कालाकालविद्विप्रो नैनःस्पर्शी स कर्हिचित् ।
सोऽस्पृष्टो नाविशेत्तत्र यज्ज्ञात्वा नैव संसृतौ ।
दशपञ्चाङ्गुलव्याप्तं नासिकाया बहिःस्थितम् ॥
जीवो यत्र विशुद्ध्येत सा कला षोडशी स्मृता ।
सर्वमेतत्तया व्याप्तं त्रैलोक्यं सचराचरम् ॥
ब्रह्मविद्येति विख्याता वेदान्ते च प्रतिष्ठिता ।

न वेदं वेदमित्याहुर्वेदन्नाम परम्पदम् ॥
तत्पदं विदितं येन स विप्रो वेदपारगः ।
आकृतिः सा परा ज्ञेया सा च शान्तिः प्रकीर्तिता ।
गायत्री सा च विज्ञेया सा च सन्ध्या प्रकीर्तिता ॥
तज्जप्यं तच्च वै ज्ञेयं तद्व्रतं तदुपासितम् ।
तां कलां यो विजानाति स कलज्ञो द्विजः स्मृतः ॥
यत्तुरीयं पदं प्रोक्तं यस्मिन् लीनमिदं जगत् ।
तत् ज्ञात्वा परमं तत्त्वं न भूयः पुरुषो भवेत् ॥
प्राणमार्गास्त्रयः प्रोक्तास्तिस्रो नाड्यः प्रकीर्तिताः ।
ईड़ा च पिङ्गला चैव सुषुम्ना च तृतीयका ॥
ईड़ा च वैष्णवी नाड़ी ब्रह्माणी पिङ्गला स्मृता ।
सुषुम्ना चेश्वरी नाड़ी त्रिधा प्राणवधा स्मृता ॥
उत्तरं दक्षिणं ज्ञेयं दक्षिणोत्तरसंज्ञितम् ।
मध्येतु विषुवं ज्ञेयं पुटद्वयविनिःसृतम् ॥
संक्रान्तौ विषुवञ्चैव यो विजानाति विग्रहम् ।
नित्यमुक्तः स योगी च ब्रह्मवादिभिरुच्यते ॥
मध्याह्ने चार्धरात्रे च प्रभातेऽस्तमये तथा ।
विषुवन्तं विजानीयात्पुटद्वयविनिःसृतम् ॥
हृत्पुण्डरीकमरणीं मनोमन्थनमेव च ।
प्राणरज्ज्वा न्यसेदग्निं राजाध्वर्युः प्रतिष्ठितः ॥
ज्वालयेत्पूरकेणाग्निं स्थापयेत्कुम्भकेन तु ।
रेचकेणोर्ध्ववक्त्रेण ततो होमं करोति यः ॥
यत्तद्धृदि स्थितं पद्ममधोनालं व्यवस्थितम् ।

तद्वै विकासते पद्मं प्रणवन्तञ्च सर्पति ॥
वामहस्तधृते पात्रे दक्षिणे चाम्भसि स्थिते।
सनाद मुच्चरेच्छिम्र आच्छन्नाग्रन्तु पूरयेत् ॥
पूरयेत् पूरकं प्राज्ञ निश्चलं कुम्भकं भवेत्।
विनिहत्य शनैर्वायू रेचकान्तं विनिर्दिशेत् ॥
स्वाहान्तैः प्रणवाद्यैश्च स्वस्वनाम्ना च वायुभिः।
जितात्मा योषितः षष्ठः षड़ाहुत्याहुतिं भवेत् ॥
जिह्वादत्तं ग्रसेदन्नं दन्तैश्चैव न तत् स्पृशेत्।
दशनैः स्पृष्टमात्रेण पुनराचम्य चारभेत् ॥
मुख माहवनीयोऽग्निर्गार्हपत्य स्तथोत्तरे।
उदये दक्षिणाग्निश्च गृहाग्निश्चापि दक्षिणे ॥
सभ्यश्चोत्तरतश्चान्य इत्यग्निस्मरणक्रमः।
प्राणाप्येव हि होत्रादि चिन्तयेत्तद्वदेव तु ॥
होतारं प्राणमित्याहुरुद्गातारमपानकम्।
ब्राह्मणं व्यानमित्येके उदानाध्वर्युमित्यपि ॥
समानञ्चेह यज्वान मिति ऋत्विक् क्रमं बुधः।
अहङ्कारं पशुं कृत्वा प्राणञ्च पशुमित्यपि ॥
बुद्धिः प्रत्यरणिः पृथ्वी लोमानि च कुशाः स्मृताः।
मनोविभक्ता त्वग्जिह्वा इति तास्ते प्रचक्षते ॥
कृत्वा तु मात्मोङ्कारं ऊङ्कारञ्च तथा पुनः।
उत्तिष्ठज्ज्वनताग्रे च हरिल्लोहितपिङ्गलः ॥
सुप्तः परिधये तुभ्यं जुहङ्क्षि दैवतञ्च यत्।
विजिह्वो यो जाठराग्नेः स्वाहा प्राणाय वात्ययः ॥

इन्द्रगोपककर्णाय त्रिजिह्वायाग्निदैवतम्।
ॐ स्वाहा अपानाय स्वाहाकारान्त मुच्चरेत्॥
गोक्षीरसमवर्णाय पर्जन्यवह्निदैवतम्।
स्वाहोदानाय सोङ्कार मनलाय परार्चिषे॥
तड़ित्समानवर्णाय वाय्वाग्निर्दैवतायते॥
ॐ स्वाहाच समानाय ॐ स्वाहा चाह वेधसे।
तर्जनीमध्यमाङ्गुष्ठै र्लग्नप्राणस्य चाहुतिः॥
मध्यमानामिकाङ्गुष्ठै र्व्यानस्य परिकीर्तिता।
कनिष्ठानामिकाङ्गुष्ठै रपानायाहुतिः स्मृता॥
मध्यमानामिकास्वन्या मुदाने जुहुयाद्बुधः।
समाने सर्वैरुद्धृत्य आहुतिः स्यात्समानता॥
जलं पीत्वा तु तृप्यन्ति रेचयञ्च शनैः शनैः।
ततोऽन्यद्द्रव्यमश्नीयात् पूरणायोदरस्य च॥
विधिं प्राणाग्निहोत्रस्य ये द्विजा नैव जानते।
अपानेन तु भुञ्जन्ते तेषां सुखमपानवत्॥
यो ज्ञात्वा तु विधिं भुङ्क्ते यथोक्त मिदमाचरेत्।
इहामुत्र च पूज्यत्वं ब्रह्मभूयाय कल्पते॥
त्रिःसप्तकुलमुद्धृत्य दातुरप्यक्षयं भवेत्।
दातुरपि हि यत्पुण्यं भोक्तुश्चैव हि तत् फलम्॥
दाता चैव तु भोक्ता च तावुभौ स्वर्गगामिनौ।
यो जानाति विधिं चेमं स भवेद्ब्रह्मवित्तमः॥
एकं पिबति गण्डूषं यजेदर्द्धं धरातले।
पीतेन पितृतृप्तिस्तु भुमौ च भूमिदेवता॥

पिवेद्द्वितीयं गण्डूषं ब्राह्मणो ज्ञानदुर्बलः।
स हतः पितृदैवत्य मात्मानं नरकं व्रजेत्॥
रहस्यं सर्वशास्त्रेषु सर्वशास्त्रेषु दुर्बलम्।
ज्ञानानामुत्तमं ज्ञानं न कस्यचित्प्रकाशयेत्॥
ज्ञानानि च प्रकाश्यानि पुंसामविदुषां वदेत्।
स प्राणस्य फलं तेषा मात्मानं नरके नयेत्॥
अश्नीयाद्दिधिवन्न्यस्तपात्रः कृतपरीहृतः।
पूजितान्नमवाग्जुष्टः स पैशाच ममाचिकम्।
वाग्यतन्यस्तपात्रोऽपि विप्रासान् पि वा द्विजः॥
तस्य विराचपुरुषस्तु दानेऽपि कवयोविदुः।
चतुस्त्रिकोणवृत्ता च विप्रक्षत्रविशां क्रमात्॥
वदन्ति परिकल्पयन्ति तद्धीनान्नतु राक्षसम्।
गृह्णीयात्प्रागपोशानं तथा भुक्त्वा सकृन्नृपः॥
अनग्न मश्नतं तत् स्यात् भक्तमन्नं द्विजन्मना।
काले भुक्त्वा समुत्थाय प्रोष्य विप्रं समीक्ष्य च॥
अहःपतिन्तच स्थित्वा चिन्तयेद्बकृत्कृत्यकम्।
भार्य्या भोजनवेलायां भिक्षां सम्प्राय पञ्च वा॥
दत्त्वा शेषं समश्नीयात्मापत्यभृत्यकैः सह।
निवृत्य साऽपि सकलं किञ्चित् स्थित्वा सुखेन च॥
स्वस्वीयकृत्यकार्य्येषु सापि सा त्वपरा पुनः।
उपास्य पश्चिमां सन्ध्यां कृत्वा चैवाग्निमुत्तमाम्॥
किञ्चित्पश्चात्समश्नीयात्सायं प्रातरिति श्रुतिः।
स्वाध्याय मभ्यसेत्किञ्चित् यामद्वयमथीति च॥

शयानो मध्यमौ यामौ ब्रह्मभूयाय कल्पते ।
सुशयने शयीताद्ये एकान्ते च स्त्रिया सह ॥
सेवनं मैथुनादीनां वदन्ति मुनिपुङ्गवा: ।
ऋतुत्त्रयात् सुपुत्रार्थी आधानविधिना द्विज: ॥
प्रसह्य भस्मना योनि मितितन्त्रेति दर्शनात् ।
कृत्वाधानविधानन्तु स्त्रीयोग मभ्यसेत् पुन: ॥
मन्त्रेदविकृतौ योनौ विकाराद्विकृता: प्रजा: ।
ब्रह्मन्मुहूर्त्तमुत्थाय प्रात:सन्ध्या मुपक्रमेत् ।
आसूर्य्योदयनात्प्रात: सायञ्चै वर्त्तदर्शनात् ॥
अनृतं मद्यगन्धञ्च दिवामैथुनमेव च ।
पुनाति वृषलस्यान्नं सन्ध्या वहिरुपासिता ॥
सिन्दुरारुणाभं भाति यौवनं यौवतारति ।
उदयेऽस्तमये भानौ तावत्सन्ध्येति शक्तिज: ॥
आधानतो द्वितीयेतु मासे पुंसवने भवेत् ।
सीमन्तोन्नयनं षष्ठे कार्य्यं मासेऽष्टमेऽपि वा ॥
जातस्य जातकर्मादि विधिवच्छ्राद्धपूर्वकम् ।
दिने चैकादशनामकर्मादिवद्द्विजन्मनाम् ॥
तुर्यनिष्क्रमणं मासे षष्ठेऽन्नप्राशनं तथा ।
चूड़ाकर्म द्वितीयेऽब्दे कार्यं वा कुलधर्मत:॥
सर्वं स्त्रियां विमन्त्रं तु कार्यं कार्यविमुक्तये।
न स्यर्यस्य द्विजा: ख्वेता: श्रियाश्चैव कथञ्चन॥
स व्रात्य: स परित्याज्यो द्विजो यस्माद् द्विजन्मनाम् ।
मुञ्जमौर्वशयानान्तु त्रिवृता रशना स्मृता ॥

कार्पासशणमेषोर्णाभ्युपवीतानि विदृतिः ।
पालाशवटपीलूनां दण्डाश्च क्रमशः स्मृताः ॥
कार्ष्णं च रौरवं वास्त मजिनानि द्विजन्मनाम् ।
शिरोललाटनासान्तः क्रमाद्दण्डाः प्रकीर्तिताः ॥
अव्रणाः सत्वचो दग्धा उक्ताः शुभकरा नृणाम् ।
गायत्र्या त्रिष्टुप् जगत्या तेषामुपनायनम् ॥
गायत्र्यामिव शेषो वा युञ्ज्यादित्यपरेषु च ।
सवितुः पाठः सवितुर्विश्वारूपाणि चक्रमात् ॥
औपासनायिका मन्त्रा विप्रादीना मुदाहृताः ।
ब्रह्मणो विप्रगेहेषु नृपस्तेषूत्तमेषु च ॥
वैश्यो विप्रो नृपः स्वेषु कुर्याद्भिक्षां स्ववृत्तये ।
एकान्नञ्च द्विजोऽश्नीयाद्ब्रह्मचारी व्रते स्थितः ॥
भिक्षाव्रतं द्विजातीनां उपवाससमं स्मृतम् ।
प्रतिग्रहो न भिक्षा स्यो न तस्याः परपाकता ॥
सोमपानसमा भिक्षा अतोऽश्नीत स भिक्षया ।
भिक्षया यस्तु भुञ्जीत निराहारः सउच्यते ॥
भिक्षामन्नाभिशस्तेषु साचारेषु द्विजेषु च ।
भिक्षेत भिक्षां क्रमशो गुरोः कुलं विवर्जयेत् ॥
स्वसारं मातरञ्चापि मातृस्वसारमेव च ।
भिक्षेत प्रथमां भिक्षां याचेतं न विमानयेत् ॥
भवति ! भिक्षां मे देहि भिक्षां भवति ! देहि मे ।
भिक्षां मे देहि भवति ! क्रमेणैतदुदाहरेत् ॥
द्वादशाब्दं व्रतं धार्य्यं षट् त्र्यब्दं तु स्रुतिं प्रति ।
आदित्याब्दे व्रजेत्तद्वै दत्त्वा तु गुरवे वरम् ॥

त्रयस्तु स्नातकाः प्रोक्ताः विद्याव्रतोपसेविनः।
विद्यां समाप्य स स्नायाद्विद्यास्नातक उच्यते॥
समाप्य च व्रतं यस्तु व्रतस्नातक उच्यते।
द्वयं समाप्य यः स्नायात्स विनामाभिधीयते॥
अष्टैकद्वादशाब्दानि सगर्भाणि द्विजन्मनाम्॥
मुख्यकालो व्रतस्यैष ह्यन्य उक्तो विपर्यये॥
द्विगुणाब्देषु कर्त्तव्या क्रमादुपनतिर्द्विजे।
हीनगायत्रीच व्रात्या उक्तकालादनन्तरम्॥
नाध्येयो नैव चोद्वाह्यो व्यवहारविवर्जितः।
न याज्यानार्चकार्य्येषु प्रयोज्यास्तु इति श्रुतिः॥
क्लीबन्निर्लोमवक्त्रा ये निर्लोमदेहवक्षसः।
उदरस्थानपत्याश्च अदृश्यास्ते विगर्हिताः॥
येऽजस्रं विहितं कुर्युः प्राप्नुयुस्ते सदा शुभम्।
दीर्घायुष्ट्वं प्रजावत्त्व मरोगित्वं यशोदिवम्॥
क्षीणायुष्यं दरिद्रत्व मप्रजत्वं सरोगिताम्।
गर्हितत्वं च लोकेऽत्र विदुर्निषिद्धकारिणः॥
प्रातर्वा यदिवा साय मद्यादन्नमनर्च्चितम्॥
नानाज्यस्यानपोशानं शुभप्रेप्सु द्विजन्मनाम्।
आपोशानं विना नाद्यान्नादद्यान्न मनर्च्चितम्।
अनाज्यं न दिवा सायं शुभमिच्छन् समश्नुते॥
षोड़शाब्दानि विप्रस्य द्वाविंशति नृपस्य च।
चतुर्विंशतिरन्यस्य व्रात्यास्ते स्युरतः परम्॥
उपनेया न ते विप्रैर्नाध्याप्याः शूद्रधर्मिणः।
न व्यवहार्याश्चार्य्याश्च इति धर्मविदो विदुः॥

स्त्रीणामुद्वाह एको वै वेदोक्तःपावनो विधिः ।
स्त्रीपुंसोर्यत्र विन्यासः सुन्वोरन्योन्य मुच्यते ॥
स्वस्मिन्यस्माद्विभर्त्त्येषा पतिर्विभर्ति सोऽपि ताः ।
अतो भार्या च भर्ता चेत्यत्र वेदो निदर्शनम् ॥
पतिर्विशति यज्जायां गर्भो भूत्वेह मातरम् ।
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥
जातोक्ता तेन जाया वै यदस्यां जायते पुनः ।
इयमाभवनं भार्य्या वीजमस्यां निषिच्यते ॥
देवा ऊचुर्मनुष्याश्च भार्य्या तु जननी तु यः ।
आत्मना जायते ह्यात्मा सेरावत्यतितारिणीम् ॥
भार्य्या जाया जनन्येषा इति वेदप्रतिष्ठितः ।
यस्मात्त्रातिपुंनाम्नो नरकात् पुत्र उच्यते ॥
सर्वां संहृष्टिमाहृत्य तद्व्रतं ब्रह्मणैकताम् ।
यः पिता जातपुत्रस्य पश्येच्चेज्जीवतो मुखम् ॥
सर्वं मे सफलं प्राप्तमैहिकामुत्रकञ्च यत् ।
किं दण्डै रजिनैस्तीर्थैस्तपोभिः किं समाधिभिः ॥
पुमांसः ! पुत्तमिच्छध्वं स वै लोके वदावदः ।
प्राणान्नमुस्मिन् शरणं हि वासो रूपं हिरण्यं पशवो विवाहः ।
सखा च यज्वा कृपणश्च पुत्री ज्योतिः परम्पुत्र इहाप्यमुत्र ॥
स पुण्यकृत्तमो लोके यस्य पुत्रश्चिरायुषः ।
विशेषेण द्विधर्मज्ञः स परं ब्रह्म विन्दति ॥
पुत्रेण प्राप्यते स्वर्गो जातमात्रेण तु ध्रुवम् ।
तस्मादिच्छन्ति सर्वेऽपि पशवोऽपि वयांसि च ॥
जायायास्तद्धि द्विजत्वं यदस्यां जायते पुनः ।

पुत्रस्यापि स पुत्रत्वं य स्त्राति नरकार्णवात्।
यः पिता स तु पुत्रस्तु जायैवहि जनन्यपि॥
न पृथक्त्वं विदुस्तज्ज्ञा अनयोः परयोरपि।
अथं हि पत्न्या पुरुषस्य तस्य ध्रुवं भवेत्पुत्रजन्मेह यस्य।
तद्वीक्ष्य चोर्ध्वं पशवो वयांसि पुत्रार्थिनो मातरमारुहन्ति॥
जनिष्यमाणा इच्छन्ति पितरः स्वकुले सुतान्॥
कश्चिद्गत्वा गयायां नोऽवश्यं पिण्डान् प्रदास्यति।
यजत्यन्योऽश्वमेधेन नीलं मोच्यति गोग्रहे॥
दृष्टव्यं पितृभिः सर्वपुत्रेभ्यः सकलं फलम्।
शुद्धशौर्यैकचित्तो वा शास्त्रान्मोक्ष्यति गोग्रहे॥
दानदो वा कुरुक्षेत्रे ज्ञानी वाथ भविष्यति।
पुच्छे शिरसि यः शुक्लः शुक्लपा लोहितं वपुः॥
देवाद्यभीष्टो नीले यः कृष्णः पावनो वृषः।
रक्तो वा यदि वा शुक्ल शृविषाणः शुभेच्छयाः॥
यो न हीनातिरिक्ताङ्गस्तं वा वृषं समुत्सृजेत्।
दुहितापि तथा साध्वी श्वशुरयोरपांसितक्षत्॥
पतिव्रता च धर्मज्ञा अपि दुर्गतिलङ्घवेत्।
यः पिता स च वै पुत्र स्तत्समा दुहितापि च॥
पुत्रश्च दुहिता चोभौ पितुः सन्तानकारकौ।
तत्सुतः पावयेद्वंशान् लोके मातामहादिकान्॥
दौहित्रः पुत्रवत् स्वर्गं ज्ञातौ शास्त्रैश्च तौ समौ।
आधानादिकसंस्काराः प्रोक्ताश्चैव द्विजन्मनः॥
कर्त्तव्याश्च स्वशाखोक्ताः केचित् कुलक्रिया च।

चत्वारिंशच्च ते सर्वे निषेकाद्याः प्रकीर्तिताः ॥
मन्त्रदीक्षा च विविधा तथैवान्येष्टिकर्म च ।
कुलाचारोऽपि कर्त्तव्य इतिशास्त्रविदो विदुः ॥
देशाचारस्तथाधर्म इति प्राह पराशरः ।
अयं हि परमो धर्मः सर्वेषामिति निश्चयः ॥
हीनाचारश्च पुरुषो निन्द्यो भवति सर्वशः ।
क्लेशभागीच सततं व्याधितोऽल्पायुरेव च ॥
आचारे व्यवहारे च दुराचारो विपर्ययः ।
नृणामाचारतो धर्मः स्यादधर्मो विपर्ययात् ॥
आचारवन्तो मनुजा लभन्ते आयुष्यवित्तं च सुतञ्च सौख्यम् ।
धर्मं तथा शाश्वतमीशलोक मत्रापि विद्वज्जनपूजिताञ्च ।
वेदाः सहाङ्गैः स पुराणविद्याशास्त्राणि वेदानिच तद्विहीनम् ॥
कुर्युर्नवैतानि च संस्मृतानि नरं पवित्रं प्रवदन्ति वेदाः ।
येऽधीतवेदाः क्रियया विहीना जीवन्ति वेदैर्मनुजाधमास्तान् ॥
वेदास्त्यजेयु र्निधनस्य काले नीडं शकुन्ता इव ज्ञातपक्षाः ।
आचारहीननरदेहगताश्च वेदाः
शोचन्ति किन्तु कृतवन्त इतिस्म चित्ते ॥
यं नो भवेद्वपुषि चास्य शुभप्रहीणे
स्यानन्तदत्र भवबन्धननाशकर्त्ता ।
कर्त्तव्यं यत्नतः शौचं शौचमूलं द्विजातयः ।
शौचाचारविहीनानां सर्वाः स्यु र्निष्फलाः क्रियाः ।
तच्छुद्धि र्द्विविधं प्रोक्तं वाह्यमाभ्यन्तरं तथा ।
विण्मूत्रशोधनं वाह्यं चित्तशुद्धिस्तथान्तरम् ।

गन्धलेपायनं ब्राह्मं शौचमाहुर्मनीषिणः ॥
मृद्भिरद्भिर्निलयस्य तत्कर्त्तव्यं द्विजातिभिः ।
भावशुद्धिपरं शौच माहुराभ्यन्तरं बुधाः ॥
यस्य पुंसस्तु यच्छौचं शौचैस्तस्य किमन्यकैः ।
वाङ्मनोजलशौचानि यशः सदा द्विजन्मनाम् ॥
त्रिभिः शौचैरुपेतो यः स सर्गो नात्र संशयः ।
स्त्रियं रिरंसुर्द्रविणं जिहीर्षुर्वधञ्चिकीर्षुर्मनुजः परस्य ।
विवक्षुरत्यन्तमवाच्यवाचं कथं स शुद्धिं समुपैति शौचात् ॥
किं निकामस्य नारीभिः किं गताशोस्य सम् द्विजैः ।
यतेन्द्रियस्य किं शौचै निष्फलं । मुर्खदानवत् ॥
न गतिर्मूर्खदानेन न तारोऽम्बुनि चाश्मनः ।
तस्मात्तस्य न दातव्यं सह दाता स मज्जति ॥
यथा भस्म तथा मूर्खो विद्वान् प्रज्वलिताग्निवत् ।
होतव्यञ्च समिद्धाग्नौ जुहुयात्को नु भस्मनि ॥
यथा शूद्रस्तथा मूर्खो शूद्रश्च भस्मवत् तथा ।
शूद्रेण सह सम्बेषं मूर्खे दानं विवर्जयेत् ॥
ग्रहीता च तावद्विद्वान् तद्दाता रोहको यथा ।
आत्मानं तारयेत्तञ्च नदीं.वैतरणीं द्विजः ॥
यो मूर्खो विशदाचारः षट्कर्माभिरतः सदा ।
स नयन् स्वर्ग मात्मानं ह्यन्यांश्चैव न पीड़येत् ॥
न विद्यते तयोर्यस्य अददच्च प्रतिग्रहम् ।
अददानः स दातारमात्मानं मप्यधो नयन् ॥
हेम भूमिं तिलान् गाश्च अविद्वान् हि ददाति यः ।

भस्मीभवति सोऽह्नाय दातुः स्यान्निष्फलं भवेत् ॥
तस्मादद्गति नो दद्यादल्पयोऽपि प्रतिग्रहम् ।
विप्रतत्त्वापरिज्ञानी विप्रिणाल्पेन नश्यति ॥
सर्वं गवादिकं दानं पात्रे दातव्य मर्चितम् ।
विद्वद्भिर्नत्कपात्रे तु गतिमिच्छद्भिरात्मनः ॥
हस्तिकृष्णाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः ।
महिप्रास्तान्न गृह्णीयु र्गृह्णन्त स्तु पतन्ति ते ॥
कृष्णाजिनप्रतिग्राही हयानां शुक्रविक्रयी ।
नवश्राद्धस्य भोक्ता च न भूयः पुरुषो भवेत् ॥
यो गृह्णाति कुरुक्षेत्रे मार्गगां द्विमुखीं गजम् ।
नवश्राद्धान्नभुक्ताश्च वर्ज्या निर्माल्यवद्द्विजाः ॥
एते यान्त्यन्धतामिस्रं यावच्चानुसहस्रकम् ।
विष्णोश्च वह्नेश्च रवेश्च जाता
पृथ्वीच येयञ्च सुनिश्च गौश्च ।
कालेच पात्रे विधिना प्रदत्ताः
प्राप्नोति लोको नियमे तदुक्तम् ॥
वेदाविद्वान् सदाचारः सदा वसति सन्निधौ ।
भोजने चैव दाने च वर्जनीयो न सत्तमैः ॥
अत्यासन्नमधीयानान् ब्राह्मणान् यो व्यतिक्रमेत् ।
भोजने चैव दानेच हिनस्त्यासप्तमं कुलम् ॥
अनृचोऽपि निराचाराः प्रतिकार्सिनिवासिनः ।
अन्यत्र हव्यकव्याभ्यां भोज्यास्ते वत्सवादिषु ॥
प्रोक्ताः प्रतिग्रहाभावे प्राप्ताग्रां बृहदापदि ॥

विप्रोऽस्मिन् प्रतिगृह्णन्वा यतस्ततोऽपि नाशभाक्॥
गुर्व्वादियोग्यवर्गार्थी दैवाद्यर्थञ्च सर्व्वतः।
प्रत्याददीत द्विजाग्य्रस्तु भृत्यर्थमात्मनोऽपि च॥
दधिक्षीराज्यमांसानि गन्धपुष्पाम्बुमत्स्यकान्।
शय्यासनाशनं शाकं प्रत्याख्येयं नहि क्वचित्॥
अपि दुष्कृतकर्म्मभ्यः समादद्यादयाचिता।
पतितादिस्तदन्येभ्यः प्रतिग्राह्यमसंशयम्॥
शक्तः प्रतिगृहीतुं यो वेदज्ञस्तत्सु संवृतम्।
लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितः॥
प्रतिग्रहस्पृशां वापि याचितं यो न यच्छति।
तत्कोटिगुणशस्तोऽसौ स्वतो दासत्वमृच्छति॥
दाता च यः स्मरेद्दानं प्रतिग्राही न पात्यते।
उभौ तौ नरकं यातो दाता चैव प्रतिग्रही॥
अपात्रस्य हि यद्दत्तं दानं स्वल्पमपि द्विजः।
गृहीता तत्क्षणाद्याति भस्मत्वञ्चाप्यवारितः॥
वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति।
प्रत्यक्षलिङ्गमेवेह दातृयाचकयो रतः।
दातृहस्तो भवेदूर्द्ध्वं मधस्तिष्ठेत्प्रतिग्रही।
दातृयाचकयोर्भेदो हस्ताभ्यामेव सूचितः॥
सूनादीनाञ्चतुर्वर्णां तथा निन्दितभूयते।
न विद्वान् प्रतिगृह्णीयात्प्रतिगृह्णन् व्रजत्यधः॥
पुष्टो दशगुणं पूर्व्वात् सुनिश्चयमथाधिकृत्।
वैश्यो निषिद्धनृपतिप्रतिग्राही परे क्रमात्॥

परपाकं वृथामांसं देवानामृषिदूषितम्।
अनुपाककृतं चैव तथा मांसञ्च नादिकम्॥
न भोक्तव्यमभोज्यान्नं कन्दमूलादिकञ्च यत्।
न पातव्यं न पेयञ्च द्विजैरन्नं न गर्हितम्॥
सत्यमुक्तः सदा ब्रूयाच्छनैर्धर्मं समाचरेत्।
यमान् स नियमान् कुर्याद्गार्हस्थ्यं व्रतमाचरेत्॥
मातृपितृउपाध्यायान् गुरूंस्त्विमान् सदार्चयेत्।
एतान् श्रेष्ठान् तथाचान्यान्नित्यं विप्रोऽभिवादयेत्॥
दमञ्च सर्वदा कुर्य्याद्दानं दद्याच्च सर्वदा।
दयाञ्च सर्वदा कुर्य्यात्तद्विना नरकाश्रयः॥
दाम्यन् स सर्वदात्मानं दाम्ययन्तु सदा द्विजः।
दयध्वमिति वै वेश्याः! श्रुतिर्वाजसनेयिकी॥
यत्त्रिधा कारकं कुर्य्यात् स्तनयित्नुध्वनिन्दिवि।
ददेद्वेति दमं दानं दयामिति च शिक्षयेत्॥
रसारसैः समा ग्राह्या देया अपि च नान्यथा।
न रसैर्लवणं ग्राह्यं समतो हीनतोऽपि वा॥
तिला अपि समा देया यस्मात् अपिच नान्यथा।
प्रपीड्यानि न यन्त्रेषु ब्रूयुरेतन्मनीषिणः॥
विक्रयं व्यपदेशेन दुग्धदध्यादिसर्पिषम्।
शुश्रूषां न तिरस्कुर्य्यादुपासां नावधीरयेत्॥
न निन्द्यांश्च समाभ्यर्च्यान्न विक्रीणीत गर्हितान्।
अदेयानि नवै दद्यादत्याज्यानि न वै त्यजेत्॥
अभाष्यं नैव भाषेच्च होमाङ्गाद्यांश्च न क्षिपेत्।

न संवदेच्च पित्राद्यैः पतिताद्यैर्न संविशेत् ॥
न मतिं नीचवर्णाय दद्यादुच्छिष्टमेव च।
मतिं शूद्रस्य यो दद्याद्येचैनं पर्युपासते ॥
न किञ्चित्तस्य चादेयं व्रतादिनियमादिकम्।
आचक्षाणस्तु तद्धर्मं नरकाग्नौ प्रपच्यते ॥
नाद्यादन्नं निषिद्धस्थं स्वप्याद्वा नार्द्ररात्रिषु।
वेदविद्यावितानानि विक्रीणीत न कर्हिचित् ॥
नापात्यानि रसाद्यानि भूवृत्तिश्चान्वयेऽपि च।
नापच्येत्तु स्वपाणिभ्यां न च कण्डूतिलङ्घवेत् ॥
पादुका नच पालाशा न वृक्षादिनिकृन्तनम् ॥
नोत्सृज्यं ष्ठीवनाद्यञ्च कदाचिद्वै गवादिषु।
पद्भ्यां स्पृश्यो गवाघ्रातो नोच्छिष्टो न च तद्गतिः ॥
न लङ्घ्या वस्त्रतन्त्वादि वाय्वग्न्यो र्नान्तरा गतिः।
न द्वयोर्विप्रयोर्नाग्न्योः सौरभेयोः पतिस्त्रियोः ॥
न विप्राग्न्योर्विप्रपिण्डौ नो ग्राह्यौ विष्णुतार्क्ष्ययोः।
सौरभेयोर्जलाग्न्योश्च माहेयीजलयोरपि ॥
आनुव्योमादिकानान्तु न कुर्य्यादन्तरागतिम्।
भोजनादिषु नासक्तां पश्येन्न विगतांशुकाः ॥
न गच्छेत् स्त्रीं रजोयुक्तां न च तया सहाश्नुयात्।
उत्तरीयं विना नैव न नग्नो न शयीत च ॥
न गेहे चैव मार्गादौ न निषिद्धककुम्मुखः।
नापगाङ्गेयचर्यादि नचविष्ठा ग्टहान्तिके ॥
अतिकालातियानि च शुभमिच्छन्विसर्जयेत्।

यस्येन्द्रचापभद्राद्या मूलनाम्ना न निर्दिशेत् ।
इन्द्रचापं ध्यायन्ति ये न खातव्याः परस्य ते ।
वर्जयेद्दादनञ्चैव पादयोः कांश्यभोजने ॥
पैशुन्यं मर्मभेदञ्च न वदेन्म्लेच्छभाषितम् ।
प्राकृतं वक्रशस्त्राणि पाषण्डहेतुकानि च ॥
न करं मस्तके दद्यान्मस्तके न करं तथा ।
न जातु नो शिरोधार्य्यं न प्रावृत्तशिरा भ्रमेत् ॥

वैनाश्च बन्धश्च कदर्यचौराः क्लीवाभिशस्तागणिकासु जातु ।
यो वृद्धजीवी गणदीक्षका ये तेषां न भोज्यं ह्यशनं द्विजातेः ॥
क्रूरातुरा बृद्धचिकित्सकाश्च या पुंश्चली यौ च विरुद्धशव ।
व्रात्याश्मत्ता अवजा जिताश्च अग्राह्यमेषामशनं द्विजस्य ॥
ये दाम्भिका येच सुवर्णकारा उच्छिष्टभोजी पतितश्च यश्च ।
ये पुत्रभार्या बहुयाचका ये विप्रस्य नैकेऽपि न भोज्यमन्नम् ॥
यः सोमशस्त्रं सुकृताम्बुचक्रं क्षीराज्यमांसं लवणाजिनानि ।
क्षौमाज्यलाक्षाश्च तिलान् फलानि एषां न विक्रीत कदन्नमाद्यम् ॥
जीवन्ति नित्याम्बरसान्वयानां कर्मोच कार्य्येऽपि च तन्तुवायाः ।
राजा नृशंसो रजकःकृतघ्नो भोज्यन्न तेनैव च हिंसकाश्च ॥
ये चैलधाराश्च सुराकृता ये शून्यं न वाचोह्यनृतं वदाश्च ।
ये वन्दिनो येऽपिच याचकाश्च विप्रस्य चैतेऽपि न भोज्यशस्याः ॥

मध्वाशनमधूच्छिष्ट दधिक्षीररसोदनः ।
मनुष्यः फलपूजाश्च कुशवत् पुष्पवीरुधः ॥
कौशेयकेशकुतपा नीरं विषं रसस्तथा ।
शाके कुशकपिण्याक गन्धनीषधिमूलकाः ॥

विक्रीणन्ति य एतानि वस्तूनि मनुजाधमाः।
तेषामन्नं न भोक्तव्यन्तथोपपत्तिवेश्मनः॥
यो बद्धस्य कदर्यस्य भुञ्जीतान्नं द्विजाधमः।
तद्गुणानद्रवत्स स्यान्मृतो विट्शूकरो भवेत्॥
योऽन्नं वार्धुषिकस्यापि जातापत्यादिकस्य च।
अन्यस्यापि निषिद्धस्य सोऽनन्तं नरकं व्रजेत्॥
पाणिगृहीतभार्यायां सत्यां यस्तु नराधमः।
शूद्रीहस्तेन यो भुङ्क्ते पतितः स सदैव तु॥
त्यक्ता ये नोढभार्यान्तु त्यक्तः स पितृदैवतैः।
देवादित्यक्तः पापीयान् शूद्रादप्यधिकः स्मृतः॥
यः शूद्रीं भजते नित्यं शूद्री तु गृहमेधिनी।
वर्जितः पितृदेवैस्तु रौरवं यात्यसौ द्विजः॥
यः शूद्रायां स्वयं जातो ह्यन्यस्यां सोऽपि तत्पुनः।
अन्यस्याञ्च पुनः सोऽपि किन्तस्य प्रेत्य चिन्तनम्॥
सर्वान् भुञ्जीत नरकान् विंशतिं त्वेकवर्जितान्।
रौरवादीन् क्रमेणैव पापिष्ठो यावदन्तरम्॥
हेमन्तशिशिरर्त्वोश्च प्रोष्ठपद्या परस्य च।
पञ्चत्वपरपक्षेषु कार्य्या साग्निभिरष्टका॥
हेमन्तशिशिरे चैका एकैकाथ तथापरा।
प्रोष्ठपद्या द्विजातिभ्यो ह्यष्टका इति केचन॥
दर्शश्च पौर्णमासश्च तथैवाग्रहायणद्वयम्।
चतुर्मासीव्रतान्येव कार्याणि साग्निकैर्द्विजैः॥
अनूचानः क्रतुं कुर्युः सदैव व्रतचारिणः।

अग्निहोत्ररता नित्यं मातापित्रादिपूजकाः ॥
प्रतिग्रहनिवृत्ताश्च जपहोमपरायणाः ।
वृत्तवन्तश्च ये विप्राः स्नातकास्ते प्रकीर्त्तिताः ॥
संक्रान्तिरर्कवारश्च व्यतीपातो युगादयः ।
शुभर्क्षदिनयोगाश्च कार्य्या साग्निभिरष्टका ॥
न शूद्राय भिक्षेत नैतत् कर्त्तव्यं कर्म च द्विजैः ।
चण्डालत्वमवाप्नोति यज्ञार्थं शूद्रयाचकः ॥
लब्धं यज्ञाय स विप्रो न दद्याद्यज्ञकर्मणि ।
स वायसोऽथ वा गृध्रः काकोवाथ प्रजायते ॥
शिलोञ्छवृत्तिर्विप्रस्य तथा चैकाह्निकाशनः ।
त्र्याहाह्निकाशनो वा स्यात् कुम्भीकुशलधान्यकः ॥

पूर्वं पूर्वतरः श्रेयानेषां सद्भिः प्रकीर्त्तितः ।
सोमपः स्यात्त्रिवर्षान्न तत्पूर्वकृतमाशनः ॥
सोमेष्टिं पशुयज्ञञ्च कुर्य्याच्च प्रतिवासरम् ।
इष्टिर्वैश्वानरी यातु कर्त्तुं वै तदसम्भवेत् ॥
सत्यामर्थस्य सम्पत्तौ न कुर्य्याद्धीनदक्षिणाम् ।
तत्कृतञ्च भवेद्व्यर्थं प्राप्नुयात्पशुयोनिताम् ॥
श्रद्धापूतञ्च दातव्यं पात्रे दानं समर्चितम् ।
याचितेऽपि हि दातव्यं पूतं स्वश्रद्धया धनम् ॥
शूद्रान्नं ब्राह्मणोऽश्नन्वै मासं मासार्द्धमेव च ।
तद्योनावभिजायेत सत्यमेतद्विदुर्बुधाः ॥
आशूद्रस्यादशूद्रान्नो मृतश्चैवोपजायते ।
द्वादशं दश वाष्टौ च गृध्रशूकरपुष्कलः ॥

उदरस्थितशूद्रान्नो ह्यधीयानोऽपि नित्यशः ।
जुह्वन्वापि जपन्वापि गतिमूर्ध्वां न विन्दति ॥
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् ।
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् ॥
तस्माच्छूद्रं न भिक्षेरन्यज्ञार्थं सद्द्विजातयः ।
श्मशानमिव तच्छूद्रस्तस्मात्तं परिवर्जयेत् ॥
कणानामथ वा भिक्षां कुर्यात्चेद्वृत्तिकर्शितः ।
स शूद्राणां गृहे कुर्वन् न तत्पापेन लिप्यते ॥
विशुद्धान्वयसञ्जातो निवृत्तो मांसमद्ययोः ।
द्विजभक्तिर्वणिग्वृत्तिस्तच्छूद्रः संप्रकीर्तितः ॥
उदक्यास्पृष्टसंस्पृष्टं वीक्षितं वाप्युदक्यया ।
स्वस्पृष्टं शकुनोत्सृष्टं प्रयत्नेन विवर्जयेत् ॥
उच्छिष्टञ्च पदा स्पृष्टं शुक्तञ्च पतितेक्षितम् ।
पर्युषितञ्च विट्कास्यं केशकीटाद्युपाहितम् ।
पत्युच्छिष्टं गवाघ्रातं प्रयत्नेन विवर्जयेत् ॥
नाश्नीरन्नेतदशनं सामिषन्ते द्विजातयः ।
शूद्राणामपि भोज्यान्नाः स्युर्दासनापितादयः ॥
सस्नेहमशनंभोज्यं चिरस्थमपि यद्भवेत् ।
अनुक्ता अपि भोज्याः स्युः सद्यश्चेता यवादयः॥
गर्भिण्या वत्ससुभयागवादे र्वर्जयेत्पयः ।
स्त्रीणामेकशफोष्ट्रीणां तथारण्यकमाविकम् ॥
प्रकृता ब्राह्मणी गौश्च महिष्याजा स्तथैव च ।
दशरात्रेण शुद्ध्येत भूमिष्ठं च नवञ्जलम् ॥

शाकादिकञ्च विट्जातं कवचानि च वर्जयेत् ।
मांसंकीटादिभिर्जुष्टं प्रयत्नेन विवर्जयेत् ॥
एवं ये कव्यमश्नन्ति तथा विष्ठाभुजश्च ये ।
शुकटिट्टिभदात्यूहान् कपोतपिकसारिकाः ॥
सेधाद्यान् पञ्च षट् पञ्च सिह्वाद्यान्मत्स्यकांश्च षट् ।
धर्मशास्त्रोदितानद्यात् सर्वाकारांश्च वर्जयेत् ॥
भक्ष्यप्राणां स्त्यजेन् मांसं श्राद्धयज्ञोत्सवेष्वपि ।
कृत्वा च विधिवत् श्राद्धं नाद्यमतिथिनामिषम् ॥
यदैवाव्ययसम्पत्तिस्तदैवामन्त्रयेद्द्विजान् ।
कृत्वाच विधिवत् श्राद्धं पश्चात् तत् स्वयमश्नुयात् ॥
नाद्यादविधिना मांसं ह्त्युद्दिष्टेऽपि धर्मवित् ।
भक्षयन्नरके तिष्ठेत्पशुलोमसमाः समाः ।
गृहस्थोऽपि हि यो नाद्यात्पिशितन्तु कदाचन ॥
स साक्षान्मुनिभिः प्रोक्तो योगी च ब्रह्मलोकगः ।
न स्वयञ्च पशुं हन्याच्छ्राद्धादिक उपस्थिते ॥
क्रव्याद्यैः सारमेयाद्यैर्हृतं मृगादिमाहरेत् ।
एतच्छाकवदिच्छन्ति पवित्रं द्विजसत्तमाः ॥
समर्थो यस्य यस्तु स्यादन्नं दत्त्वा तु देहिनाम् ।
सतामिति निरातङ्को लोमहृष्टं निगद्यते ।
अन्नादेरपि भक्ष्यस्य स्नेहमद्यामिषस्य च ॥
महाफलानि वृत्तौ स्यात् प्रवृत्तिः स्वर्गसाधना ।
एकोऽष्टशतमश्वेन यजेत पशुना द्विजः ।
अन्योन्यं मांसमश्नाति स्वर्गप्राप्तिस्तयोः समा ॥

हेम राजन्! शङ्खस्य ताम्रस्य वैणवस्य च।
चर्मणोरज्जुवस्त्राणां शुद्धिर्जायेत वारिणा॥
तदादियज्ञपात्राणां धान्यानां वाससामपि।
अन्येषां जयरूपाणां प्रोक्षणाच्छुद्धिरिष्यते॥
मार्जनाद्यज्ञपात्राणां हस्तेन मखकर्मणि।
अम्भोगे यत्र केशणैः शुद्धेतां कौशिकाविके॥
श्रीफलैरंशुपट्टानां सारिष्टैः कुतपस्य च॥
क्षममयानि पुनः पाकैः क्षौमाणि सितसर्षपैः।
शुद्धेत कारुहस्तस्थं पण्यं यत् स्यात्प्रसादितम्॥
भैक्षञ्च प्रक्षोणाच्छुद्धेत् पिष्टिः माद्यान्नयस्य तु।
स्त्रीमुखञ्च सदा शुद्धं भूमिर्लेपविवर्जिता।
अपरा दहनाद्यैश्च गृहं मार्जनलेपनैः॥
द्रवद्रव्याणि शुध्यन्ति वह्निना प्लावनेन च।
क्रव्यादाद्यात् हृतं मांसं सर्वदा शुचि कीर्तितम्॥
तृप्तिकृत् सौरभेयाश्च स्वभावात् सङ्कुदा मतिः।
वदन्ति सूरयो वारि पवित्रमिति सर्वदा॥
गौर्वह्निश्च वनच्छाया जलमश्वो वसुन्धरा।
विप्रुषो मक्षिकानाञ्च न दुष्यन्ति कदाचन॥
शुतिः प्रस्थापने वत्सः अजाश्वौ मुखतस्तथा।
न तु गौर्मुखतो मेध्या न कस्य मुखजा मलाः॥
सोमभास्करयो र्भाभिः पथशुद्धिः प्रकीर्तिता।
श्रोष्ठाधरौ श्मश्रुकरौ सस्नेहौ भोजनादनु॥
न दुष्येत्स्वकजः प्राह बालवृद्धौ स्त्रियोर्मुखम्।
स्नात्वा पीत्वा च भुक्त्वा च सुप्त्वा तप्त्वा तथैव च॥

गत्वा रथ्यादिके चैव शुद्धिराचमनेन तु ।
नापो मूत्रपुरीषाभ्यां नाग्निर्दहति कर्मणा ॥
न स्त्री दुष्यति जारेण न विप्रो वेदकर्मणा ।
पद्माश्मलोहफलकाष्ठ चर्ममाण्डस्य तोयैः ॥
स्वयमेव शौचात् पुंसां निशास्वध्वनि निःसहायम् ।
न स्त्रीणाञ्च सदा शुद्धिर्विहिता च सतामपि ॥
नभसः पञ्चदश्यां तु पञ्चम्यां च तथापरे ।
नभसस्य चतुर्दश्या मुपाकर्म यथोदितम् ॥
तद्विदः केचिदिच्छन्ति नभसः श्रवणेन तु ।
हस्तेन वाथ पञ्चम्या मध्यायानां वदन्ति तत् ॥
यत्र शाखोपवीतः स्याद्ब्रह्मचारी द्विजोत्तमः ।
तच्छाखा विहितं तस्य उपाकर्मादि कीर्त्तने ॥
अतो वेदाधिकारत्वं वेदपाठस्य कीर्त्तने ।
अनुपाकृतविप्राद्यैर्वेदाध्ययन दुष्कृतम् ॥

मुञ्जोपवीताजिन दण्डकाष्ठम्
त्याज्यं न तत्स्याद्व्रतचारिणा मपि ।
अक्लिष्टमेकोहतलोपपापम्
संस्कारमन्यं न पुनर्नयेयुः ॥

ओषधीनां तु सद्भावे स्वशाखाविहितन्तु रत् ।
रोहिण्या च सहस्यस्य उपाकर्माणि कुर्वते ॥
न भवेदनुपाकर्म ब्राह्मणः स्नातको व्रती ।
कर्मच्युतो भवेद्व्रात्यो व्रात्यानिष्कृतिकः शुचिः ॥
तथा तत्स्यादनध्यायी कृतगुर्वादिषु त्यहम् ।
मित्रकादिष्वहोरात्र मधीत्यारण्यकः शुचिः ॥

अष्टकासु तथाष्टम्यां पौर्णमास्यां शशिक्षये ।
मन्वादौ युगपत्वादौ विन्दुपातात् क्षयेऽपि च ॥
चतुर्मासि द्वितीयायां चतुर्दश्यामहर्निशम् ।
अहोरात्रे नृपे संस्थे व्रतिनि श्रोत्रिये यतौ ।
अत्र त्र्यहमनध्याय मिच्छन्ति चापरे द्व्यहम् ॥
अशौचस्तूतकान्तं च यावच्छुद्धिस्तयोर्भवेत् ।
देशान्तरगते प्रेते श्रुतेऽपि स्यादहर्निशम् ॥
गुर्वादौ वा नृपत्यादौ इति वाशिष्ठजोऽब्रवीत् ।
प्रतिग्रही त्वहोरात्रं भुक्त्वा श्राद्धकमेव च ॥
तज्ज्ञा ब्रूयुरनध्याय मृतुसन्धा वहर्निशम् ।
यस्मादौ च रहो भोक्ता रहोरात्रा विदुर्बुधाः ।
अकाले वा कृते वृष्टिवह्निदा येच रूपमाः ।
ग्रामेषु दुःखितानाञ्च खरादीनाञ्च निःस्वने ॥
पतितस्यावशूद्रान्त्यसन्निधाने न कीर्त्तयेत् ।
आत्मन्येव शुचौ देशे विद्युत्स्तनितरोहिते ॥
वधे च कलहे देशविप्लवे लोकविग्रहे ।
पांशुवर्षेऽम्बुमध्ये च दिग्दाहग्रामदाहयोः ॥
नीहारे च भवेद्विद्वान् सन्ध्ययोरुभयोरपि ।
सार्वश्च न पठेद्विद्वान् पूतिगन्धेतयैव च ।
विशिष्टेचागते गेहे गात्रासृङ्निर्गमे तथा ॥
भोजनायोपविष्टस्य स्तुत्थितस्याद्र पाणिनः ।
वान्ते चान्ते तथा जीर्णे महापात्रेऽतिमारुते ॥
राजा वृषौ च यज्ञादौ आरूढस्य तथा द्विजः ।
एतानन्यांश्च तत्कालान् अनाध्यायान्विदुर्बुधाः ॥

यो वर्जयेदनध्यायान्वेदाध्ययनकृद्द्विजः ।
भवन्ति तस्य सफला वेदाः प्रोक्तफलप्रदाः ॥
येच तेषु पठन्त्यज्ञाः पाठलोभेन लोभिताः ।
न शाश्वता भवेद्विद्या निष्फला च तथा द्विजः ॥
यः पठेद्विधिवद्वेदान् तत्प्रतीन्द्रियसंयमी ।
ब्रह्मत्वमिह लोकेऽपि ऐश्वर्यसुखभाक् भवेत् ॥
जनानां शृण्वतां यस्तु मार्गे गच्छन् पठेद्द्विजः ।
निष्फलास्तस्य वेदाश्च वेदविप्लवदोषभाक् ॥
यः पठेत् स्वरहीनन्तु लक्षणेन विवर्जितम् ।
सङ्कीर्णग्राममध्ये तु संभवेत् वेदविप्लवी ॥
ये स्वाध्यायानधीयीरन् अनध्यायेषु लोभतः ।
वज्ररूपेण ते मन्त्रा स्तेषां देहे व्यवस्थिताः ॥
नाक्रामेदमरादीनां च्छायां तथा परस्त्रियः ।
वान्तष्ठीवनविण्मूत्र कार्पासास्थिकपालिकाम् ॥
तानन्त्येयाः स्पृश्च डिम्बाडम्बरगान् स्पृशेयु द्विजाः ।
श्रियं कामं च मा काङ्क्षेन्नस्पृशेन्मर्म कस्यचित् ॥
नित्यं वर्त्तेत चाजस्रं धर्मञ्च नित्यमर्जयेत् ॥
न किञ्चित्ताडयेद्धीमान् सुतं शिष्यञ्च ताडयेत् ।
ताडयेन्नाभितोऽधस्तान्नतानन्यत्र ताडयेत् ॥
आचारेण सदा विद्वान् वर्त्तते यो यतेन्द्रियः ।
स ब्रह्म परमाप्नोति चारण्येऽमुत्र चेह च ॥
आचारमूलं श्रुतिशास्त्रतत्त्वं आचारनाशान्न तदुक्तसत्यम् ।
आचारपर्णानि हि वाग्मिणोगोत् वाचारपुष्पाणि यशोधनानि ॥
आचारवृक्षस्य फल हि नाकलक्ष्याञ्च सुस्वादुरसञ्च मुक्तिः ।

तस्मादनन्तं फलदन्तु तत्त्वमाचारमेवाश्रय यत्नपूर्वम् ॥
ये धर्मशास्त्रे विहिताश्च केचिद्धर्मा द्विजाग्र्यैरपि तेच सर्वे ।
यत्नेन कार्या पितृदेवभक्तैः श्राद्धानि कार्याण्यथ तानि वक्ष्ये ॥
यत्नेन धर्मा गृहमेधिविप्रैः प्रीतेन वाचा वपुषा च कार्यः ।
आयुः प्रजा श्री र्भुवि पूजितत्वं तस्माल्लभन्ते दिवि देवभोगान् ॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रोक्तायां धर्मसंहितायां चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

आदित्यचन्द्रावचन्द्रे भच्छायाग्रहणसंक्रमे ।
व्यतीपातविषुवत् कृष्णपक्षपातार्धलब्धिषु ॥
अष्टका नयने द्वे च श्राद्धं प्रति यदा रुचिः ।
पुण्यः श्राद्धस्य कालोऽयमृषिभिः परिकीर्तितः ॥
युगादिषु च कर्त्तव्यं मन्वन्तरादिकेऽपि च ।
श्राद्धकालोह्ययं प्रोक्तो मन्वाद्यैर्धर्मकर्तृभिः ॥
नवान्नं नवोदकञ्चैव नवच्छन्नं तथागृहम् ।
नाश्नन्ति येषु चेहन्ते पितरो हि यमास्तव ॥
काणः पौनर्भवो रोगी पिशुनो वृद्धिजीवकः ।
कृतघ्नो मत्सरी क्रूरो मितभुक् कुनखोऽगुदः ॥
विच्छिप्रजननश्चिलीश्यावदन्तावकीर्णिनः ।
हीनाङ्गश्चातिरिक्ताङ्गो विक्लवो परनिन्दकः ॥
क्लीबोऽभिशस्तवाक् दुष्टभृतकाध्यापकस्तथा ।
कन्यादूषी वणिग्वृत्तिर्विनग्नः सोमविक्रयी ॥

भार्याजितोऽनपत्यश्च कुण्डाशी कुण्डगोलकः ।
पित्रादित्यागकृत्तेन वृषलो पतितस्तु ॥
अनुक्तवृत्तिस्तन्त्रातः परिपूर्वापतिस्तथा ।
अजापालो माहिषिकः कर्मदुष्टाश्च निन्दिताः ॥
योऽसत्प्रतिग्रहग्राही यश्च नित्यं प्रतिग्रही ।
ग्रहसूनकदूतौच पितृश्राद्धेषु वर्जिताः ॥
एकादशाहे भुञ्जन्तः शूद्रान्नरससंयुताः ।
गुरुतल्पगो ब्रह्मघ्नो यस्य चोपपति र्गृहे ॥
प्रेतस्पृक् चैवनिर्नेक्ता चोपयाचकयाचकौ ।
बककाकविडालाश्च शूद्रवृत्तिश्च गर्हितः ॥
वाक्दुष्टबालदमको नित्यमप्रियवाक्यया ।
आसक्तो द्यूतकामादावतिवाक् चैव दूषितः ॥
निराचाराश्च ये विप्राः पितृमातृविवर्जिताः ।
विद्वांसोऽपि हि नाभ्यर्च्याः पितृश्राद्धेषु सत्तमैः ॥
न वेदैः केवलैर्वापि तपसा केवलेन च ।
संवृत्तैः किन्तु तैः प्रोक्ताः पावता ब्राह्मणास्य च ॥
यत्र वेदास्तपो यत्र यत्र वृत्तं द्विजाग्रजे ।
पितृश्राद्धेषु तं यत्नाद्विद्वान्विप्रं समर्चयेत् ॥
वेदशास्त्रार्थविच्छान्तः शुचिर्धर्ममनाः सदा ।
गायत्री ब्रह्मचिन्ताकृत् पितृश्राद्धे स पावनः ॥
रथन्तरं बृहज्ज्येष्ठः सामवित् त्रिसुपर्णकः ।
त्रिमधुश्चापि यो विप्रः पितृश्राद्धेषु पूजितः ॥
मातामहश्च दौहित्रो भागिनेयोऽथ मातुलः ।
मातृस्वस्रेयश्च तथा तथा मातुलजोऽपि वा ॥

जामाता श्वशुरो बन्धुर्भार्या भ्राताच तत्सुतः।
सुवृत्ताश्च सदाचारा ये ते श्राद्धेषु पावनाः॥
ऋत्विग्गुरुरूपाध्याय आचार्यः श्रोत्रियोऽपरः।
एते श्राद्धेषु वै पूज्याः ज्ञातिसम्बन्धिबान्धवाः॥
अग्निहोत्री च यो विप्र आवसथ्याग्निकोऽपि च।
पितृमातृपरावेतौ भोक्तव्यौ हव्यकव्ययोः॥
कृष्येकवृत्तिजीवी यो भोक्ता मात्रादिकेषु च।
षट्कर्मनिरतः पूज्यो हव्यकव्ये सदैव हि॥
चतुर्वृत्तिः सदाचारो मात्रादिभक्तितत्परः।
शुचिः षट्कर्मयुक्तश्च हव्यकव्येषु पूजितः॥
युगानुरूपतो यस्तु विद्याचारादिसंयुतः।
स पूज्योऽनभिशस्तः स षट्कर्मनिरतो द्विजः॥
इत्युक्तगुणसम्पन्नान् ब्राह्मणान् पूर्ववासरे।
निमन्त्रयेत सद्भक्त्या नियोगस्थानपूर्वकम्॥
सव्येन देवतार्थन्तु पित्रर्थमपसव्यवान्।
ततस्तै श्चरितव्यं स्यादुक्तं पितृव्रतद्विजैः॥
जितेन्द्रियैस्तु भाव्यं स्याद्धौरात्रमतन्द्रितैः।
तस्मिन्नहनि वा प्रात र्यत्र श्राद्धमवस्थितम्॥
निमन्त्रयेत तान् भक्त्या तैश्च भाव्यं जितेन्द्रियैः।
विप्रोरूपाश्वपृष्ठस्थाः पितृमातामहादयः॥
भुञ्जन्ति क्रमशः श्राद्धे तथा पिण्डार्थिनोऽपि च।
निमन्त्रेत द्विजं श्राद्धे न शयीत स्त्रिया सह॥
अध्वानं न च वै यायान्न ब्रूयादनृतन्तथा।
नाधीयीत दिवास्वापं न कुर्वीत न सम्वदेत्॥

न म्लेच्छपतितैः सार्द्धं न वदेच्च निषिद्धकम् ।
प्राङ्मुखौ दैविकौ विप्रौ विप्रास्त्रय उदङ्मुखाः ॥
एकैको वा भयत्र स्या दसम्पत्ताविति क्रमः ।
पात्रं वा दैविकं कृत्वा विप्र एकस्तु पैतृके ॥
इति वा निर्वपेत् श्राद्धं निर्धनश्चान्यदाचरेत् ।
गत्वारण्यमनालुप्य ऊर्द्ध्वबाहुर्विरौत्यदः ॥
निरन्नो निर्धनो देवाः पितरो ह्यानृणाङ्कुरु ।

न मेऽस्ति वित्तं न गृहं न भार्या
श्राद्धं कथं वः पितरः ! करोमि ।
वने प्रविश्येह कृतं मयोच्चै-
र्भुजाहते वर्त्मनि मारुतस्य ॥
श्राद्धार्थमेतद्भवतां प्रदत्तम्
मत्त्वं दयध्वं पितृदेवताभ्यः ।
अस्या वचोऽन्विप्र भुजावतस्त्व्
दिवाच रात्रिं समुपोष्य तिष्ठेत् ॥
भवेत्स चैतेन कृतेन तेषा
मृणां न मुक्तः पितृदेवतानाम् ।
निर्वित्तनिर्भाग्य निराश्रयाणाम्
श्राद्धस्य मार्गः प्रथितो मुनीन्द्रैः ॥

ख्यातं मया रुदित्वा वः पितरः श्राद्धदेवताः ।
श्राद्धार्थस्य विमुक्तोऽहं महतः पितरो मया ॥
कृतोपवासः स तस्मात् श्राद्धर्णाद्विप्रमुच्यते ।
एतैश्चापि न यः कुर्य्यात् पितरस्तेन वै हतान् ॥
सम्पत्तावथ पात्राणामेकैकस्य त्रयस्त्रयः ।

पित्रादौ ब्राह्मणाः प्रोक्ताश्चत्वारो वैश्वदेविके ॥
द्वौ वापि दैविके विप्रौ चैकैकोवा न दोषभाक्।
स्यान्मातामहिकेऽप्येवमेकोऽपि वैश्वदेविके ॥
नतु वैकृतु सर्वेषां आश्वलायनमतः स्थितम्।
पितॄणामर्चयेद्विप्रो मन्त्रपिण्डनिदर्शनम् ॥
न मातामहिकं श्राद्धं श्रोतुमुक्तान्तु साग्निके।
अनग्निकस्य तत् कुर्य्यादिति केचिन्मतं विदुः ॥
साग्निकस्यापि कार्य्यं स्यात् श्राद्धं मातामहं द्विजैः।
षट् दैवत्यमितीत्येकेऽप्येकेनु पार्वणद्वयम् ॥
अपुत्रस्य पितृव्यस्य तत्पुत्रैर्भ्रातृजो भवेत्।
स एव तस्य कुर्वीत पिण्डदानोदकक्रियाः ॥
पार्वणन्तेन कार्य्यंस्यात् पुत्रवत् भ्रातृजेन तु।
पितृस्थाने तु तं कृत्वा शेषे पूर्ववदुच्चरेत् ॥
श्राद्धं पत्यापि कार्य्यं स्यात् अपुत्रा यास्तु योषितः।
तस्यापि हि तया कार्य्यमेकत्वं हि तयोर्यतः ॥
भ्रातुर्ज्येष्ठस्य कुर्वीत कार्य्यं ज्येष्ठोऽनुजस्य च।
देवहीनन्तु तत् कुर्यात् इति धर्मविदो विदुः ॥
पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया।
पुत्राभावेतु पत्नीच तदभावे सहोदरः ॥
पित्रादीनान्तु कर्तव्यं समीलन्ते यतस्त्वमी।
नावश्येयास्तु ते सर्वे कृते तु स्यान्महत् फलम् ॥
पितामहस्य चान्येषां यस्य जीवन्नवा द्विजः।
प्रत्यक्षास्तेऽपि वै पूज्याः संस्थित्यर्थं यतश्च तत् ॥
विद्यमानस्त्वयाणां स्यात् प्रत्यक्षः पूज्य एव सः।

गौतमस्य मतं ह्येतदिति वाशिष्ठजोऽब्रवीत् ॥
विद्यमाने तु पितरि श्राद्धं कर्त्तुमुपस्थितः ।
पितृवत्पितृपित्रादेः कुर्य्याच्छ्राद्धमसंशयम् ॥
पुत्रिकायाः सुतः श्राद्धं निर्वपेन्मातुरेव सः ।
तत्पितुर्निर्वपत्यस्मात् तृतीयं तु पितुः पितुः ॥
अतएव द्विजः पुत्रीमुद्वहेन्न कथञ्चन ।
उद्वोढ़ुः पुत्रः पुत्रोऽसौ पुत्रोऽसौ मातुरेव हि ॥
पुत्त्रस्य दुहितुश्चैव समौ तौ धार्मिकौ पथि ।
अर्थकृतौच विप्रोक्तौ तुल्यौ तौ शक्रजोऽब्रवीत् ॥
मुख्यं यथा पितुः श्राद्धन्तथा मातामहस्यच ।
पुत्रदौहित्रयोर्लोके विशेषो नोपपद्यते ॥
दौहित्रः पार्वणश्राद्धे ~~कारस्तु कुलाऽपत्था~~ ।
तथा कृष्णाजिनं विद्वान् इति शास्त्रविदो विदुः ॥
काम्यमभ्युदयञ्चैव द्विविधं पार्वणं स्मृतम् ।
तथाकामन्तु काम्यं स्याद् वृद्धावभ्युदये स्मृतः ॥
क्षत्रियायान्तु यो जातो वैश्यायान्तु तथा सुतः ।
ब्राह्मणस्य पितुस्तौ तु निर्वपेतां द्विजाग्रवत् ॥
क्षत्रियस्य सुतश्चैव तथा वैश्यसुतोऽपि च ।
कृतान्नेन द्विजांस्तर्पेच्छ्राद्धद्वयञ्च निर्वपेत् ॥
आमान्नेन तु शूद्रस्य कुर्षीत्तु द्विजपूजनम् ।
कृत्वा श्राद्धन्तु निर्वप्य सजातीनाशयेत्तथा ॥
यः शूद्रो भोजयेद्विप्रान् कृतपाकाशनेन तु ।
सकृद्विप्रकृते ताभिर्लिप्यते स कुजोऽभवीत् ॥
शूद्रपाकं द्विजेभ्यश्च विभवान्यो ददाति यः ।

कृमीभवति पाताले स युगानेकविंशतिः ॥
भोजितेन तु विप्रेण यत्पापं तस्य जायते ।
तेनासौ लिप्यते मूढो यः शूद्रो भोजयेद्द्विजान् ॥
योऽहं मन्ये द्विजाभ्यान्तु शूद्रान्वतेन भोजयेत् ।
स गच्छेन्नरकं घोरं पुनरावृत्तिदुर्लभम् ॥
यत्किञ्चिद्दुष्कृतं विप्रे पूर्वं कृतन्तु तिष्ठति ।
तेनासौ लिप्यते पापी यः शूद्रो भोजयेद्द्विजान् ।
शूद्रोच्छिष्टन्तु यो भुङ्क्ते मन्ये विप्रोऽधमः स तु ॥
कृमित्वं याति विष्ठायां युगानि ह्येकविंशतिः ।
शूद्रोच्छिष्टन्तु भुञ्जानः पञ्चाहानि द्विजोत्तमः ॥
स तद्विष्ठाकृमित्वं हि प्राप्नोति हि शतं समाः ।
अतो न भोजयेद्विप्रान्निवपेन्नैव पूजयेत् ॥
शूद्रान्नं भोजनाद्युक्तं इति पाराशरोऽब्रवीत् ।
अग्नौकरणपिण्डांश्च कुर्यादामान्नेन तु ॥
घृतदधिमध्वाज्यैः सम्पृक्तः शक्तुकैरपि ।
यवाद्यसंस्कृतान्नेन हेमापि च स निर्वपेत् ॥
उष्णेन पयसा वापि नद्याद्श्राद्धकृत्तथा ।
नामान्नेन द्विजैः कार्यं कदाचिदपि सद्द्विजैः ॥
अर्पयित्वा द्विजौ कस्तु तथापि पाकमाश्रयेत् ।
न कुर्य्यात् परपाकेन नैकपाकेन तु द्वयम् ॥
नैकश्राद्धे द्वय कुर्यान्नच कुर्यात् परान्नभुक् ।
पित्रादीनां सगोत्रा ये तथा मातामहस्य च ॥
तेषामेकेन पाकेन कार्यं पिण्डविवर्जितम् ।
केचित् सपिण्डमिच्छन्ति समगोत्रस्तथा तथा ॥

पिता मातामहश्च स्याद्भिन्नगोत्रतया तथा।
पृथक् कर्तुमशक्यं स्यादर्घपात्राद्यसम्भवे॥
अवश्यन्तत्र कर्तव्यमेकदैवमपाश्रयेत्।
येषां नोद्वाहसंस्कारो ह्यन्यसंस्कारसंस्कृताः॥
सङ्कल्पितं भवेत्तेषां श्राद्धं कार्य्यं ह्यहनि।
केचित्सपिण्डमिच्छन्ति ब्राह्मं संस्कारवत्तथा॥
आद्यो हि ब्राह्मसंस्कारस्तस्मात् पिण्डान् प्रदीयते।
सर्वेष्वपि निमित्तेषु कर्तव्यं पिण्डसंयुतम्॥
पितॄणां त्रिविधा यस्मात्तृप्तिः प्रोक्ता मुनीश्वरैः।
वैश्वदेवः सदा कार्य्यो श्राद्धे च समुपस्थिते॥
पाकशुद्ध्यर्थमेवैतत् पूर्वमेतद्विधीयते।
वैश्वदेवोऽग्रतश्चैव श्राद्धकाले विशेषतः॥
पाकशुद्धिस्तु विज्ञेया भुक्तोच्छिष्टं तु वर्जयेत्।
संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैवच॥
अग्रतो वैश्वदेवं हि पश्चादेकादशेऽहनि।
एकोद्दिष्टविशेषेण प्रागेव ह्यग्निपूजनम्॥
कालस्तु कुतपस्तस्य रोहिणः पार्वणस्य च।
वामतश्चासनन्दद्यात् पितृकार्य्येषु सत्तमः॥
दैविके दक्षिणन्तद्ददिति पाराशरोऽब्रवीत्।
आसने चासनन्दद्याद्वामे वा दक्षिणेऽपि वा॥
पितृकार्येषु वामन्तु दैवे कर्मणि दक्षिणम्।
पितृश्राद्धेषु यो दद्याद्दक्षिणं दर्भमासनम्॥
नाश्नन्ति पितरस्तस्य साध्यानि वत्सराणि षट्।
तस्माद्वामतो वा पात्रे पितृकर्मणि चासनम्॥

दैविके दक्षिणा तद्वदिति वाशिष्ठजोऽब्रवीत्।
कुत्र काले च कर्त्तव्यं श्राद्धन्तत् पैतृकं प्रभो!॥
वदस्व निश्चयन्तत्र विवदन्त्यपरेऽत्र तु।
पञ्चदशमुहूर्त्तो हस्तत्प्रागर्द्धं दिनं स्मृतम्॥
अपरार्धं स्मृता रात्रि स्तन्मध्यः कुतपो मतः।
यथा यथा च ह्रस्वत्वं पुंसः स्यादेनसो भवेत्॥
तथा तथा पवित्रं स्यात्कालः श्राद्धार्चनादिषु।
च्छायेयं पुरुषस्यैनस्तत्पादार्धो भवेदधः॥
आधानश्राद्धदानादेः स कालोऽक्षयकृत् स्मृतः।
अयुतं तु मुहूर्त्तानामर्द्धं ह्यष्टदशाधिकम्॥
त्रिंशद्भिस्तै रहोरात्रमिति माध्यन्दिनी श्रुतिः।
दिवसस्याष्टमे भागे मन्दीभवति भास्करे॥
स कालः कुतपो ज्ञेयस्तत्र दत्तन्तु चाक्षयम्।
मध्याह्ने तु गते सूर्ये न पूर्वे नच पश्चिमे॥
तुल्याग्रसंस्थिते चैव सोऽष्टमो भाग उच्यते।
मध्याह्नाच्चलितो भानुः किञ्चिन्मन्दगतिर्भवेत्॥
स कालो रौहिणो नाम पितॄणां दत्तमक्षयम्।
तस्मात् सर्वप्रयत्नेन रौहिणन्तु न लङ्घयेत्॥
अकाले विधिना दत्तं न देवपितृगामि तत्।
अष्टवृद्धि भवेद्यत्र तत्राब्दमुभयात्मकम्॥
श्राद्धन्तत्र च कुर्वीत मासयोरुभयोरपि।
पिण्डवर्ज्यमसंक्रान्ते संक्रान्ते पिण्डसंयुतम्॥
षष्टिभिर्दिवसैर्मास स्त्रिंशद्भिः पक्ष उच्यते।
संक्रान्तिरहितः पक्ष स्तत्र कार्यं विपिण्डकम्॥

सिनीवालीमतिक्रम्य यदा संक्रमते रविः।
युक्तसाधारणैर्मासैः स काल उत्तरोभवेत् ॥
संक्रान्तिवर्जितः काल समलः पापसम्भवः।
रक्षसाम्भागधेयोऽसौ ब्रह्मवादिविवर्जितः ॥
तत्र नैमित्तिकं कार्य्यं श्राद्धं पिण्डविवर्जितम्।
नित्यं तु सततं कार्य्य मिति पाराशरोऽब्रवीत् ॥
अहोभिर्गणितैर्यत् स्यात् तत्कार्यं यच्च सर्व्वदा।
तिथिनक्षत्रयोगश्च जातकर्मादिकाश्च ये ॥
नैमित्तिकाश्च दैवाद्ये कार्य्यास्तेऽपि मलिम्लुचे।
तीर्थस्नानं गजच्छायां द्विमुखीं गोप्रदानवत् ॥
मलिम्लुचेऽपि कर्त्तव्य सपिण्डीकरणान्तथा।
आग्रहण ममावास्या मष्टकाग्रहसंक्रमम् ॥
अधिमासेऽपि कार्य्यं स्यादिति पाराशरो ऽब्रवीत्।
नित्यञ्च नित्यशः कार्यमिष्टकामांश्च वर्जयेत् ॥
वार्षिकं पिण्डवर्जं स्यादन्यस्मिन् पिण्ड संयुतम्।
दृष्टिराग्रहणं श्राद्ध मन्वाहार्यञ्च सर्वदा ॥
कर्त्तव्य सततं विप्रैरिष्टिकामांश्च वर्जयेत्।
दैवे कर्मणि संप्राप्ते तिथौ यत्रोदितो रविः ॥
सा तिथिः सकला ज्ञेया विपरीता तु पैतृके ॥
वृद्धिमह्दिवसे कार्यं श्राद्धमाभ्युदिकं द्विजः।
क्षीणमानदिने कार्यं श्राद्धं विद्वन्! क्षयादिकम् ॥
मित्रे चैव सगोत्रे च पितृमातृसहोदरे।
आसनञ्चैव दातव्य भोक्तव्या एवमेव ते ॥
ब्राह्मणं न सगोत्रन्तु पूजयेत् पितृकर्मणि।

नोपतिष्ठन्ति तत्तेषां किन्तु स्याच्च निराशता॥
स्वगोत्रं भोजयेद्यस्तु पितृश्राद्धेषु वै द्विजः।
हतास्तु पितरस्तेन न भुक्तमुपतिष्ठति॥
श्राद्धं कुर्वन् द्विजोऽज्ञानात् स्वगोत्रं यस्तु भोजयेत्।
स लुप्तपितृदेवः सन्नरकं प्रतिपद्यते॥
तस्मान्न गोत्रिणं विप्रं भोजयेद्विधिपूर्वकम्।
जातिमात्रो न भोज्यस्तु श्रोत्रियैस्तु द्विजोत्तमैः॥
दक्षिणाप्रवणे देशे श्राद्धं कुर्य्यात्तु पैतृकम्।
पितॄणां पावनो देशः स प्रोक्तोऽक्षयतृप्तिकृत्॥
देशे काले च पात्रे च विधिना हविषा च यत्।
तिलैर्दर्भैश्च मन्त्रैश्च श्राद्धं स्यात् श्रद्धयान्वितम्॥
तैजसानि तु पात्राणि ह्यर्घाय भोजनाय च।
स्वल्पाषाण मयान्येके अपराण्यपरे विदुः॥
पलाशपद्मपत्राणि अनिषिद्धानि यानि च।
तानि श्राद्धेषु कार्याणि पितृदेवहितानि च॥
वृद्धिश्राद्धेषु मन्यन्ते मृण्मयानि तु केन च।
शौनकस्य मतं ह्येतत् वृथाकार्य्यन्तु मृण्मयम्॥
एकद्रव्याणि कार्याणि पात्राणि भोजनार्थयोः।
त्रीणि पैतृककार्य्याणि भेदमेकत्र वर्जयेत्॥
एकस्य वैश्वदेवानि पैतृकाण्येकवस्तुनः।
इतिवा तानि कार्य्याणि भेदमेकत्र वर्जयेत्॥
वटाश्वत्थार्कपत्रेषु न भुञ्जीत कदाचन।
न जातिकुसुमैर्विद्वान् विल्वपत्रैश्च नार्चयेत्॥
सुरभीनागकर्णाद्यैः करवीरैश्च नारकैः।

बिल्वपत्रैरर्चयेद्विद्वन् पितृश्राद्धेषु गर्हितैः॥
तद्भुञ्जानैः कुतः श्राद्धं निराशैः पितृभिर्गतैः।
सर्वाण्यपि च पुष्पाणि निषिद्धान्यपराणि तु॥
वर्जयेत् पितृश्राद्धेषु केतकीकुसुमानि च।
गोरम्भाभृङ्गराजाद्यै र्मल्लिकाकुब्जकैरपि॥
समर्चयेत् द्विजान् श्राद्धे हव्यकव्योदिते द्विजः।
न दद्याद्गुग्गुलं श्राद्धे द्विजानां पितृदैवते॥
धूपाभावे तु कर्तव्यं घृतधूपं द्विजोत्तमः।
कुङ्कुमाद्यं चन्दनञ्च देयं गन्धविमिश्रितम्॥
ऊर्द्ध्वञ्च तिलकं कुर्यान्न कुर्याच्च त्रिपुण्ड्रकम्।
ऊर्द्ध्वञ्च तिलकं कुर्याद्दैवे पित्रे च कर्मणि॥
निराशाः पितरो यान्ति यस्तु कुर्य्यात् त्रिपुण्ड्रकम्।
पवित्रं यदि वा दर्भं करे कृत्वा द्विजान्तरः॥
समालभेत् द्विजानञ्च स्वन् श्राद्ध मसुरं भवेत्।
गन्धाश्च विविधा देयाः कर्पूरागुरुमिश्रिताः॥
शक्त्या वस्त्राणि देयानि तदभावे च निष्क्रयम्।
दीपश्च सर्पिषा देय स्तिलतैलैश्च वा पुनः॥
न काष्ठतैलैरन्यैस्तु कदाचित् सार्षपावसैः।
देशधर्मं समाश्रित्य वंशधर्मं तथापरे॥
सूरयः श्राद्धमिच्छन्ति पार्वणाञ्च त्रयान्यपि।
स्त्रीणामपि पृथक् श्राद्धं न मन्यन्ते स्वधर्मतः॥
मातामहस्वगोत्रेण मातुस्ते तु सपिण्डताम्।
मातामह्यास्सहेच्छन्ति मातुस्तेऽपि सपिण्डताम्॥
स्त्रीणां स्त्रीगोत्रसम्बन्धात् पुंगोत्रेण नृणां यतः।

सपिण्डीकरणं काले श्राद्धद्वयमुपस्थितम् ॥
देवाद्यं प्रथमं कुर्यात् पितृणां तदनन्तरम् ।
देवाद्यं पार्वणं प्रोक्तं प्रेतश्राद्ध मथापरम् ॥
एकतन्त्र ततः पश्चात् कृत्वा विप्रांश्च भोजयेत् ।
पितृणा मर्घ्यपात्राणि प्रेतपात्र मथापरम् ॥
प्रेतपात्रन्तु तत् कृत्वा पितृपात्रेषु योजयेत् ।
ये समाना इति द्वाभ्यां पूर्ववच्छेष माचरेत् ॥
सपिण्डीकरणं यस्य कृतं न स्याद्द्विजन्मनः ।
आदेयं तस्य देयं स्यात् पिण्डमेकं तु निर्वपेत् ॥
सपिण्डीकरणञ्चैतत् स्त्रियाश्चैव त्रयाह्निकम् ।
एकादशाह्निकं कृत्वा योऽह्नि मासि च मासिके ॥
वर्षे वर्षे च कर्तव्यं मृतेऽहनिच तत् पुनः ।
नापुत्रस्य सपिण्डत्वं केचिदिच्छन्ति तद्विदः ॥
विशेषतोऽनपत्यस्य सत्यप्यत्राधिकारिणी ।
विद्यमानः पिता यस्य स चेद्यदि विपद्यते ॥
तदन्तरा सपिण्डत्वं वदन्ति श्राद्धवादिनः ।
आभ्युदयिकसम्पत्तौ अर्चा प्रागेव कारयेत् ॥
कुर्यात् परिजनेनैतत् स्वयं वापि द्विजोत्तमः ॥
संन्यसन् सर्वकर्माणि तत् आद्याय च तद्दिने ।
अग्निदाप्यदिनञ्चैके केचिन्मृतदिनं विदुः ॥
विदेशस्थे मृताहस्तु शुक्लेवासि तु द्वादशी ।
संग्रामे संस्थितानाञ्च प्रेतपक्षे शशिक्षये ॥
अग्निसर्पादि मृत्यूनां षण्मासोपरि सत्क्रिया ।
तेषां पार्वण मेवोक्तं मृताहेऽपि च सत्तमैः ॥

चन्द्रक्षया नाशक संयुगेषु यः प्रेतपक्षे क्षतवत्सदण्डः।
सपिण्डतानन्तर माब्दिकानां भवन्ति तेषा मिह पार्वणानि॥
क्षयाह्निकादि कार्याणि ब्रूयुर्धर्मविदो जनाः।
अब्दादूर्ध्वञ्चरन्त्यके कृत्वा च वैष्णवीं बलीम्॥
विष्णुचैनं विना नार्वाक् प्रदत्तमुपतिष्ठति।
वियुता वृक्षपातेन अश्वेन महिषेण वा॥
इत्यादिकेन मृत्युः स्यात् यत्र तिथौ च तत्र च।
तन्निमित्तस्य शुद्ध्यर्थं मासि मासि क्षयाह्निकम्॥
कर्त्तव्यमवधौ याव त्ततः कुर्वीत सत्क्रियाम्।
अनाशक मृतानाञ्च क्षयाहेऽपि च पार्वणम्।
मन्यासवद्भि मन्यन्ते केचि द्विदु रवैदिकम्॥
एकोद्दिष्ट मदैवं स्यादेकार्थकपवित्रकम्।
आवाहनाग्नौ करणं हीनं तदपसव्यवत्॥
पूर्वोत्तर प्लवे देशे श्राद्धं स्यान्मातृ पूर्वकम्।
शतपीतादिपिष्टेन चर्चिते भूतले च तत्॥
उद्दिष्टक्रतुकालस्य तत् प्रागेव विधीयते।
आभ्युदयिक दैवानि पूर्वाह्ले सु रिति स्मृतिः॥
तिलाक्षतोदकै र्युक्ताः न्यासनादिप्रदक्षिणम्।
परि स्त्वित्यादि मन्त्रेण कृत्वा च शान्तिपूर्वकम्॥
व्रीहयो यवगोधूमाः अक्षताश्चाक्षताः स्मृताः।
अक्षतामलकैः पिण्डान् दधिकर्कन्धु मिश्रितैः॥
नान्दीमुखेभ्यो देवेभ्योः प्रदक्षिण कुशासनम्।
पितृभ्य स्तन्मुखेभ्यश्च प्रदक्षिण मिति स्मृतिः॥
कर्कन्दुभि र्यवैः पुष्पैः शमीपत्रै स्तिलैस्तथा।

तेभ्योह्यर्घ्यः प्रदातव्यः पितृभ्यो दैवतैः सह।
मातामहानामप्येवं षट् दैवत्यं श्रियेद् द्विजः॥
माङ्गल्य पूर्वकं सर्वं गन्धाद्यपि च धारयेत्।
तृप्तिस्तत् पितृमातॄणां धूपो देयश्च गुग्गुलः॥
घृताभिषार धूपो वा यथा स्यात् परिपूर्णता।
दीपाश्च बहवो देयाः विप्रं प्रति घृतेन च॥
तैलेभ केन ये वापि नवनीतेन चैव हि।
मालत्या शत पत्रावा मल्लिका कुन्दयो रपि।
केतक्या पाटलायावा देया श्राद्धे न लोहिताः॥
वासांसि च यथाशक्त्या दद्यात्तेभ्योऽथ निक्रयम्।
परिपूर्णं तथा तत्स्यात्तथाकार्य्यं भवेदिति॥
सुवेश भूषणैः स्रूवसालङ्कारै स्तयान्तरैः।
कुङ्कुमाद्यनुलिप्ताङ्गै र्भोव्यन्तु ब्राह्मणैः सह॥
स्त्रियोऽपितु तथा भूता गीतनृत्यादिहर्षिताः।
दुन्दुभीनादहृष्टाङ्गा मङ्गलध्वनिकारिकाः॥
सोमसदोऽग्निस्वात्ताश्च तथा बर्हिषदोऽपि च।
सोमपाश्च तथा विद्ध स्तथैव च हविर्भुजः॥
आज्यपाश्च तथा वत्स तथा परे सुकालिनः।
एते चान्ये च पितरः पूज्या सर्वै द्विजाग्रजैः॥
वसवश्च तथा रुद्रा स्तथैवादितिसूनवः।
देवता अपि यज्ञेषु स्वायम्भुवादि कीर्तिताः॥
एते च पितरो दिव्या स्तथा वैवस्वतादयः।
ये तत्पौत्राः प्रपौत्राश्च असंख्याः पितरः स्मृताः॥
एते श्राद्धेषु सन्तर्प्या सु निचाद्यै र्द्विजातिभिः।

सन्तर्पिता इमे सर्वान् प्रीणयन्ति नृणां पितॄन् ॥
प्राक् सङ्केतितान्वि ान् स्नातान् काले समागतान् ।
दत्त्वार्घ्यान् कृतवत् शौचान् आचान्तानुपवेशयेत् ॥
ये स्पृशन्त्यत स्त न्येऽङ्घ्रि चाचमन्ति पिवन्ति च ।
तेषान्न जायते शुद्धिराचमन्त्यस्त्वजाङ्घ्रि ते ।
सर्वाणि स्वानि कार्याणि कार्यच्छिद्राणि चात्मनः ॥
तैराचान्तै र्भवेच्छुद्धिरशुचिस्त्वन्यथा भवेत् ।
व्याहृत्य वैष्णवान् मन्त्रान् स्मृत्वा च सर्वमातरम् ॥
शान्तस्वान्तौ द्विजान् पृष्टे करिष्ये श्राद्धमित्यथ ।
करवे करवाणीति पृष्ट्वा ब्रूयु र्द्विजास्ततः ॥
अनुज्ञाये वचो ह्येतत् कुरुष्व यत् कृतं कुरु ।
ततो दर्भासनं कृत्वा देवेभ्यः समयं पुनः ॥
दक्षिणं जानुमन्वास्य दक्षिणाञ्च तथासनम् ।
पात्रद्वय मतोऽर्घ्यार्थं तैजसञ्चैकवस्तुजम् ॥
आसनं सपवित्रं तत् समभ्यर्च्य विधानतः ।
प्राङ्मुखोऽमरतीर्थेषु शन्नोदेव्योदकं क्षयेत् ॥
यवोऽसीति यवांस्तत्र तूष्णीं पुष्पाणि चन्दनम् ।

यवोऽसि पुण्यमिति संश्रितोऽसि
सम स्तथान्य प्रभुरस्यमुत्र ।
मरुन्मनुष्य पितृगणास्य तृप्तैर
क्षितावतीर्णोऽसि हितोऽसि पुंसाम् ॥
इत्यादपूर्वक मिमानवतेन वेधा
भूयः प्रसन्न मनसा तदुपासितः सन् ।

चिक्षेप तान् सलिलनाथ प्रसिच्यताद्भि-
तेनाहृता वरुण दैवतका बभूवुः॥
आनीयमान्विधिरिमान्वरुणस्य लोकान्
अन्नप्रभून्भुवि यवान् वसुलोक तृप्तैः।
तत्पिष्ठ पक्वहविषा पितृदेवतानाम्
तृप्ता वसन्ति दिवि दानवरास्तएव॥

ततः सव्यं करं न्यस्य विप्रो दक्षिणजानुभिः।
देवानावाहयिष्येव मिति वाच मुदीरयेत्॥
आवाहये त्यनुज्ञा च विश्वे देवाः स आगतः।
विश्वे देवा शृणुतेममिति मन्त्रद्वयं पठेत्।
सोमेन सहराज्ञेति केचित्पठन्त्यदोऽपि च॥
व्याहृत्य मन्त्रमावाह्य हस्ते दत्त्वा पवित्रकम्॥
अर्चयेत्तं द्विजं पुष्पैः दद्यादर्घं करे पुनः।
विश्वेभ्य स्त्वेष देवेभ्यस्तुभ्य मर्घ्यं प्रदीयते॥
या दिव्या इति मन्त्रेण पाणौ विप्रस्य तं क्षिपेत्।
अपसव्य मतः कृत्वा निर्वर्त्य वैश्वदैवकम्॥
आपो भूमिगताः केचिदादित्येत्यभिमन्त्र्यच।
पुनस्ताभिकयाभ्याञ्च कुर्वन्ति मुखमार्जनम्॥
उदकं गन्धधूपांश्च वासांसि चन्दनं स्रजः।
दत्त्वा आपः च सोद्भूता दद्यात् पितृ कुशासनम्।
सोदकान् द्विगुणीभूतान् सतिलान् सकुशानपि॥
गोकर्णमात्रकान् साग्रान् प्रदद्याद्वामपार्श्वतः।
चतुर्थ्यन्तं सगोत्रञ्च पितृनाम च शर्मवत्॥
उच्चार्य्य परयोस्तद्ददिदं तुभ्यं कुशासनम्।

पित्रर्घ्यं मर्घ्यं पात्राणि संपूज्य दक्षिणामुखः ॥
तिलोऽसीत्येतदुच्चार्य्य यवस्थाने तिलान् क्षिपेत् ।
भूलग्नः सव्यजानुः सन् पितृतीर्थे नचात्वरः ।
पितृध्यानमनाः कुर्यात् पितृकार्य्यमशेषतः ॥
आवाहयिष्ये पित्रादीन् अनुज्ञावाहयेति च ।
उशन्तः स्त्वेति वदीर्य यथायन्तु न इत्यपि ॥
अन्येत्वपहता असुरा इत्यादि च पठन्ति हि ।
अन्यविघ्नव्यपोहार्थं वक्तव्य मिति केचन ॥
प्राग्वद्दिग्प्राचनं कार्यं प्राग्वदर्घ्यप्रसेवनम् ।
प्राग्वन्मन्त्रं समुचार्य्य प्राग्वच्च मुखमार्जनम् ॥

एते तिलास्तु विधिना शशिलोकतस्तु
प्राकृत्य भोजन हिते न शुभाय धन्यः ।
छित्वा मलानि पुरुषस्यच तर्पणाद्यै
र्ये घ्नन्ति तेषु भुवि सत्सु कुतो भयं स्यात् ॥
तिलोऽसि चन्द्रामृतदैवतोऽसि
हितोऽस्यशेषे पितृ देवतानाम् ।
कर्तापि तृप्तिं परमां पितृणा
मुक्तोऽसिते न भवता विधिसम्भवोऽसि ॥

अर्घ्यपात्राणि सर्वाणि कृत्वा तान् पाद्यपात्रके ।
पितृभ्यः स्थान मसीतिन्युब्जं कुर्य्यादधश्च तत् ॥
यस्तूद्धरेदविज्ञाना दर्घ्यपात्रन्तु पैतृकम् ।
तद्धि श्राद्ध मभोज्यं स्यात् कृत्यैः पितृगणै र्गतैः ॥
आश्रित्य प्रथमं पात्रं तिष्ठन्ति पितरो नृणाम् ।
श्राद्धे तस्मान्न त द्विद्वानुद्धरेत् प्रथमं सुधीः ।

वाचयेत् परिपूर्णन्तु वासोदत्त्वा विधानतः।
अस्त्वेतु परिपूर्णन्तु ब्रूयुरेते द्विजातयः॥
ससर्पिः पात्र मादाय सपिधानं विधानतः।
नत्वा सर्वान् द्विजान् पृच्छेत्करिष्येऽग्नाविति द्विजः॥
कुरुष्वेति त्वनुज्ञाता जुहोत्यग्नौ ततः पुनः।
भोजने पितृविप्राणा मितिमन्त्र मुदीरयेत्॥
अग्निशब्दं चतुर्थैकवचनान्तं समुच्चरेत्।
कव्यवाहनशब्दं च सोमं पितृमदित्यपि॥
पङ्क्तिमूर्द्धान मेवात्र पृच्छेदितिह केचन।
पितृश्राद्धप्रदानत्वात् साग्निस्त्वे नाथवा पुनः॥
तृतीयां मनसा दद्यात् यमाय त्वेतवा पुनः।
तुष्णीं यत्र तु होमादौ प्रजापतिस्तु तत्रतु॥
अहं वाक् तस्मिन् वाक् सम्वादो भून्मनोगिरीः।
अहव्यवाद्यते वाणी अमुष्याग्नेः प्रजापतेः॥
अग्नावाहुतयः प्रोक्तास्तिस्रएव मनीषिभिः।
अग्निवद्विप्रपात्रेषु पश्चात्तज्जु हुयाद् द्विजः॥
अग्नौकरण शेषन्तु पितृपात्रेषु दापयेत्।
प्रतिपाद्य पितृणां तु दद्याद्वै वैश्वदेविके॥
यस्याग्नौकरणं दद्यात् पितृविप्रकरेषु च।
तेनोच्छेषित मेतत् स्यात्सममाग्निस्तावतैव तु॥
पितरः कव्यवक्त्राश्च वह्निवक्त्राश्च देवताः।
अतः पाणौ न तद्देयं देयं पात्रे कुशान्विते।
वैश्वदेविकविप्राणां पात्रे वा यदिवा करे॥
अनग्निक स्तु तद् दद्यात् प्रथमं वैश्व देविके।

हुतशेषमशेषाणां पात्रे दद्याद् द्विजोत्तमः ।
पृच्छेत्सर्वांश्च यत् कृत्यं सामान्येन द्विजोत्तमान् ॥
दत्त्वान्ये करणञ्चान्यं विप्राणां तृप्तिकृद्धविः ।
परिवेश्य मिति ब्रूयु स्ततोविधिरनन्तरः ॥
प्रागग्नौ करणं दद्यात् अन्यत्दत्त्वा च तृप्तिकृत् ।
एकीकृतं तु भुञ्जानाः प्रीणयन्तु नृणां पितॄन् ॥
परिवेश्य हविः सर्वं तदर्थं यच्च वै स्मृतम् ।
अभिमन्त्र्य मतः पात्रमपोशनप्रदानवत् ॥
अन्नपूर्णस्य पात्रस्य कर्त्तव्य मभिमन्त्रणम् ।
आपो दत्त्वा तु संकल्पमेष श्राद्धविधिर्वरः ॥
वर्जितानि न देयानि पितृप्रीतिं विजानतः ।
हविष्याणि प्रदेयानि वक्ष्यमाणानि वर्जयेत् ॥
निष्पावा राजमाषाश्च कुलत्थ कोरदूषकान् ।
मसूर सितपाकश्च पुष्पकं शाणमर्कटाः ॥
आढकास्तिलसिद्धार्थाः वस्त्रान्निस्वधनान्यके ।
पिण्याकं परिदग्धा च मथितञ्च विवर्जयेत् ॥
नापि नीरस निर्गन्धं करञ्जं सर्वशक्तुकम् ।
अप्रोक्षितं च यत्किञ्चित् पर्युषितञ्च वर्जयेत् ॥
लोहितान् वृक्षनिर्यासान् प्रत्यक्ष लवणानि च ।
कृताः कृष्णतिला वर्णाः सर्वाः पालाण्डु जातयः ॥
कृष्णजीरकवंश्याग्रास्तृणानि च विवर्जयेत् ।
कुम्भिकेषु कपालाङ्काः कट्फलं तण्डुलीयकम् ॥
नीलकाचसमच्छला शोभाञ्जन कुसुम्भिकाः ।
कोविदार करञ्जौ च सुमुखामूलकं तथा ॥

कूष्माण्डं गौरवन्ताकं वृहत्याश्च फलानि च।
करीरफलपुष्पाणि विडङ्गमरिचानि च।
जम्बारिका सुजम्बीरा सुकवी वीजपुरिकाः॥
तुम्बालावूनि पिप्पल्यः पटोलं पिण्डमूलकम्।
मसूराञ्जनपुष्पं च श्राद्धे दत्त्वा पतत्यधः॥
विषच्छन्नहतं मांस मन्यच्च चिरसंस्थितम्।
नित्यश्राद्धेऽपि वर्ज्यं स्याद्दिट्वराहचकोरयोः।
स्वायम्भुवादिभिः सर्वैं मुनिभि र्धर्मदर्शिभिः।
निषिद्धानि न देयानि पितृणा मर्हितानि च॥

एकेन किञ्चिदपरेण किञ्चित् किञ्चिच्च किञ्चित्परमस्तु सद्भिः।
श्राद्धे निषिद्धं त्वशनादि विद्वन्! सर्वं पितृणां नतु किञ्च देयम्॥
सौवीरनिङ्कूलवणादिभिः सुपाकस्य शुद्धिर्भवतीह यस्तु।
तद्वीजपूरान्मरिचादियोगात् सिद्धं प्रदेयं नतु दुष्यतीह॥
श्राद्धन्तु यस्य द्विजदीयमानं पित्रादिकस्येह भवेन्मनुष्यैः।
यदि श्रुतस्येह मनस्यभीष्टमासीत् पुरा यस्य तदेव देयम्॥
दातुस्तु यस्मिन् मनसोऽभिलाषः श्रद्धा भवेत्तत्र तु दीयमाने।
श्राद्धेऽपि देयं विधिवत्तदेव तदक्षयञ्चेति इतिप्रवादः॥
आनीतमम्भोनिधिवत्कथञ्चित् तत्याणिदत्तं भवतीह विद्वन्!।
हेमाम्बुनिक्षेपहरिस्मृताभ्या मच्छिद्रतामेति पराशरोक्तिः॥
इक्षीरसारैः क्षयखण्डयोगात् शाखाभिधेयं भवतीह विद्वन्!।
प्राण्यङ्गधूपान् मरिचादियोगात् पाकस्य शुद्धिं प्रवदन्ति तज्ज्ञाः॥

व्रीहयो यवगोधुमा मुद्गा माषास्तिला स्तथा।
नीवारश्यामकाद्यन्त मकृष्टसम्भवानि च॥
शर्करागुड़खण्डानि संशुद्धा क्षौद्रमेव च।

पितृश्राद्धे हविर्मुख्यं यद्वा तद्वास्य लोभतः ॥
यद्देहिना मत्र शरीरपुष्टैर्धाता ससर्जाशननाम किञ्चित्।
तत्सर्वधान्यान्यमितं ह्यवादि त्रेधा मुनीन्द्रेण पराशरेण ॥
श्यामाशराधादिककङ्गुजादि यत्किञ्चदस्मिन् सुखसाररूपम्।
अरण्यजं वा कृषिसम्भवं वा सस्यन्तदुक्तं ह्यशनेषु विद्वन्! ॥
काण्डाद्भवं यत्त्वशनेषु किञ्चित्पङ्कोद्भवं वा स्थलसम्भवं वा।
यत्तुच्छसारं बहुराजमस्मिन् सर्वाणि धान्यानि च शूकवन्ति॥
यत्सर्वसारं सतुदन्तु भक्ष्यं निःशूकस्तनान्वितमत्र किञ्चित्।
आप्यायनं देहभृता तु सद्य स्तत्प्रोक्तमन्नं ह्यशनेन सद्भिः॥
प्रतिस्रुतश्च भुक्तश्च कटु तिक्तश्च यत्तथा।
केचिदूचुरदेयानि ह्यश्वत्थप्रतिरोपिताः॥
तुण्डीकराण्यलाबूनि लिङ्गाख्यानि तु यानि तु।
नित्यं श्राद्धेऽप्यदेयं स्यादाह सत्यवतीपतिः॥
सोङ्कारया वै गायत्र्या दशावर्तितया जलम्।
पूतन्तु तेन तत्प्रोक्तं सर्वमन्नविशुद्धये॥
शुद्धवत्योऽथ कूश्माण्ड्यः पावमान्यस्तरत्समाः।
पूतेन वारिणैताभि रन्नशोधनमुत्तमम्॥
तद्विष्णोरिति मन्त्रेण गायत्र्या च प्रदत्तवान्।
प्रोक्षयेदशनं सर्वम् शूद्रदृष्ट्यादिशुद्धये॥
परिवेषयेत्समं सर्वं न कार्य्यं पङ्क्तिभेदनम्।
पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिन्दकः॥
आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः।
यद्येकपङ्क्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदिवार्थलोभात्।
वेदेषु दृष्टं ऋषिभिश्च गीतं तद्ब्रह्महत्यां मुनयो वदन्ति॥

देवान् पितॄन् मनुष्यांश्च वह्निमभ्यागतां स्तथा।
अभ्यर्च्य तु न भुञ्जानो वृथापाक इति स्मृतः॥
एतद्वै ब्राह्मणस्यास्ये जुहोमि चाम्नेऽमृतम्।
इदं विष्णुरिति ह्येतन्मन्त्रमुच्चार्य्य चापरे॥
द्विजाङ्गुष्ठं च तत्रान्ने निवेशयन्ति तद्विदः।
जप्वा व्याहृतिभि र्गायत्रीमधुमतीरिति॥
सङ्कल्पान्न मपोशानं ब्रूयाच्च मधुमध्विति।
आपोशनं प्रदेयान्नं न तत्सङ्कल्पयेद्द्विजः॥
सङ्कल्प्य नरके याति निराशैः पितृभिर्गतैः।
आपोशनो देवपित्रोः पाणौ तिष्ठति यो द्विजः॥
सङ्कल्पं कुरुतेऽज्ञानात् स्वसेन पितरो हताः।
जप्वाथ वैष्णवान् मन्त्रान् विप्रान् ब्रूयाद्यथासुखम्॥
भुञ्जीरन्वाक्यतास्ते तु पितृदेवहितैषिणः।
अत्युष्णमशनं कार्य्यं वचोवाच्यं पितृव्वदः॥
शूद्रश्च शूकरध्वाङ्क्षकुक्कुटानपलापयेत्।
भुञ्जते ब्राह्मणा यावत्तावत् पुण्यं जपेज्जलम्॥
पावमान्यानुवाक्यानि पितृसूक्तानि चैव हि।
ततस्तृप्तान् द्विजान् पृच्छे त्तृप्ताः सन्त्वनुशासनम्॥
तृप्ताः स्मेति द्विजा ब्रूयु स्तदन्नं विकिरेद्भुवि।
सकृत् सकृत्पयो दत्त्वा शेषमन्नं निवेदयेत्॥
यथाज्ञानं तथा कृत्वा पिण्डांस्तदनु निर्वपेत्।
यद्यद्भुक्तं द्विजैरन्नं तत्तदादाय विस्तरः॥
स्थालीपाकतिलोपेतं दक्षिणाभिमुखस्ततः।
अवनिज्यतिलान् दर्भान् पिण्डार्थ मवनीतले॥

तस्मिंश्च निर्वपेत्पिण्डान् गोत्रनामकपूर्वकान्।
यदेकलोकं पितृलोकमायुः प्राप्ता स्तथैवं नरकं नरा ये॥
अग्नौ हुतेन द्विजभोजनेन तृप्यन्ति पिण्डे भुवि ते प्रदत्तैः॥
यदन्नं लेपरूपन्तु क्रमात्तेषु च निक्षिपेत्।
प्रक्षाल्य सलिलं वारि अवनेजनवत् पुनः॥
निवृत्तानर्चयेत्पिण्डान् पुष्पगन्धानुलेपनैः।
दीपवासप्रदानेन पितॄनर्च्य समाहितः॥
वासो वस्त्रदशां दद्याद्विधिवन्मन्त्रपूर्वकम्।
केचिद्दत्त्वाविकं लोम केचिन्मतं न तद्विति॥
पञ्चाशद्वार्षिको यस्तु दद्याल्लोम स्वमंशुकम्।
तदवश्यं प्रदेयं स्याद्विधिसम्पूर्णताकृते॥
पवित्रं यदि वा दर्भं करात्ततोविनिक्षिपेत्।
प्रक्षाल्य हस्तावाचम्य प्रोक्षणादिकमाचरेत्॥
निर्वपन्त्यपरे पिण्डान् प्रागेव द्विजभोजनात्।
खादयेयुः शकुन्तैस्तान् पितॄणां तृप्तितत्पराः॥
मातामहानामप्येवं विप्रानाचामयेदथ।
वाक्यातीतद्विजान् स्वस्ति दद्याच्चैवाक्षतोदकम्॥
दक्षिणा हेम देवानां पितॄणां रजतं तथा।
शक्त्या दत्त्वा स्वधाकारं व्याहरेत् श्राद्धकृद्द्विजः॥
तिष्ठन् पिण्डान्तिके ब्रूयाद्वाचयिष्ये स्वधामिति।
वाच्यतामिति विप्रोक्तिः प्रवदेद्गोत्रपूर्वकम्॥
स्वधोच्यतामिति ब्रूयादस्तु स्वधेति तद्वचः।
ऊर्जं वहन्ति उच्चार्य्य जलं पिण्डेषु सेचयेत्॥
याः काश्चिद्देवताः श्राद्धे विश्वशब्देन जल्पिताः।

प्रीयतामिति च ब्रूयात् विप्रैरुक्तमिदं जपेत्।
दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च॥
श्रद्धा च नो मा व्यगमद् बहुदेयञ्च नोऽस्त्विति।
न्युब्जपिण्डार्घ्यपात्राणि कृत्वोत्तानानि संस्रवान्॥
चिप्त्वा पिण्डेष्वतो विप्रान् पितृपूर्वं विसर्जयेत्।
वाजे वाजे इति त्वृक्त्वा आमावाजस्य तान् बहिः॥
ब्रूयात्प्रदक्षिणीकृत्य तथा क्षमध्वमित्यपि।
पिण्डानां मध्यमं पिण्डं पितॄन्ध्यायं समाहितः॥
प्राशयेत् पुत्रकाम्या तु भार्य्यां तच्छ्राद्धदस्य तु।
स्नुषा वापि सगोत्रा वा पुत्रकामा द्विजाज्ञया।
आधत्त पितरो गर्भं व्याहरेयुर्द्विजातयः॥
महारोगगृहीतो वा तद्रोगोपशमाय च।
अत्तु मे पितरो रोगमित्युक्त्वा प्राशयेद्धितम्॥
अन्यानप्सु हुताशे वा चिपेद्दद्याद्द्विजाय वा।
अजाय वा प्रदद्याच्च पश्चाद्विप्रविसर्जनम्॥
उद्वाहं पितृकादेके पाकान्मातामहाय तु।
एकेनैव हि गच्छन्ति भिन्नगोत्रा स्तथा द्विजाः॥
अद्वैवेऽक्षय्यस्थाने तु वक्तव्यमुपतिष्ठताम्।
अभिरम्यतां स्वधास्थाने विप्रोक्तिरभिरताः स्म ह॥
ऊर्ध्वन्तु प्रोष्ठपद्यास्तु प्रतिपादादिकाश्च याः।
पुण्यास्तास्तिथयः सर्वाः दशापि सह पञ्चभिः॥
तेषाञ्चतुर्दशी प्रोक्ता शास्त्रे शस्त्रहता नराः।
पितृभ्यश्च त्रयोदश्यां गयाश्राद्धाधिकं फलम्॥
न तत्र पातयेत्पिण्डान् सन्तानेप्सुः कदाचन।

पिण्डदानेन कवयो वंशक्षयं वदन्ति हि ॥
सन्तानेप्सु स्त्रयोदश्यां न पिण्डान् पातयेन्नरः ।
पातयेन्न मतीक्ष्य प्राह सत्यवतीपतिः ॥
मघायुक्तत्रयोदश्यां पिण्डनिर्वपणं द्विजः ।
ससन्तानो नैव कुर्य्यादित्यन्ये कवयो विदुः ॥

यः संक्रान्ते भानुदिने च कुर्य्यात्
विशेषणं पारणकं द्विजन्मा ।
पिण्डप्रदानं पितृमेघ तद्वत्
ज्येष्ठे प्रपद्ये : सुतोऽनुजो वा ॥

पुत्रदा पञ्चमी कर्तुस्तथैवैकादशी तिथिः ।
सर्वकामा त्वमावास्या पञ्चम्यर्थं शुभा स्मृता ॥
अन्नक्षीरघृतं क्षौद्रमैत्वकन्दावशाकवत् ।
एतैस्तु तर्पितैर्विप्रैस्तर्पिताः पितरो नृणाम् ॥
देशः पर्वञ्च कालश्च हविःपात्रं च शक्ततः ।
पितृदैविकचित्तत्वं योगश्चेत् पितृभादिभिः ॥
शौचञ्च पात्रशुद्धाच श्राद्धञ्च परमा यदि ।
अन्नन्तत्तृप्तिकृच्छ्राद्धे एतत् खलु नचामिषे ॥
यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत् पितॄन् ।
सोऽविद्वांश्चन्दनं दग्ध्वा कुर्य्यादङ्गारविक्रयम् ॥
क्षिप्त्वा कूपे तथा किञ्चिद्बाल आदातुमिच्छति ।
पतत्यज्ञानतः सोऽपि मांसेन श्राद्धकृत्तथा ॥
सर्वथान्नं तथा न स्यात्तदैवामिषमाश्रयेत् ।
ब्राह्मणश्च स्वयं नाद्यात्ततः स्वादिहतं यदि ॥
अथान्यत्पापमृत्यूनां शुद्ध्यर्थं श्राद्धमुच्यते ।

कीन तेन येषान्तु शरीरमुपतिष्ठति ॥
दन्तिशृङ्गिगरव्याल निरग्निबन्धनैस्तथा।
विद्युन्निपातवृक्षैश्च विप्रैश्च स्वात्मना हताः ॥
प्राणसञ्जातकीटाश्च म्लेच्छैश्चैव हतास्तथा।
पापघ्नत्यव एवैते शुभगत्यर्थमुच्यते ।
नारायणवलिः कार्य्यो विधानन्तस्य उच्यते।
ऊर्द्धं षण्मासतः कुर्य्यादेक ऊर्ध्वन्तु वत्सरात् ॥
तेषां चैव व्यपोहार्थं कार्य्यो नारायणो वलिः।
धौतवासाः शुचिः स्नात एकादश्यामुपोषितः ॥
शुक्लाच्चेतु संपूज्यो विष्णुमीशं यमन्तथा।
नदीतीरं शुचिर्गत्वा प्रदद्याद्दश पिण्डकान् ॥
चौद्राज्यतिलसंयुक्तान् हविषा दक्षिणामुखः।
अभ्यर्च्य पुष्पधूपाद्यैः पुन्नामगोत्रपूर्वकान् ॥
विष्णुध्यानमनाः कुर्य्यात् ततः स्नानाम्भसि चिपेत्।
निमन्त्रयीत विप्रांश्च पञ्च सप्ताथ वा नव ॥
द्वादश्यां कुतपे स्नातान्धौतवस्त्रान् समागतान्।
हर्याराधनकाङ्क्षया प्रक्षालिताङ्घ्रियुग्मकान् ॥
दक्षिणाप्रवणे देशे शुचिस्तानुपवेशयेत्।
दैवे द्वौ तु त्रयः पित्र्ये प्राङ्मुखोदङ्मुखान् द्विजान् ॥
आसनावाहनार्घ्यञ्च कुर्यात् पार्वणवद्द्विजः।
भोजयेद्भक्ष्यभोज्यैश्च चौद्रैश्चवाज्यपायसैः ॥
तृप्तान् ज्ञात्वा ततो विप्रान् तृप्तिङ्गच्छेद्यथाविधि।
भोज्येन तिलमिश्रेण हविष्येन च तान् पुनः ॥
पञ्च पिण्डान् प्रदद्याद्वै दैवरूपमनुस्मरन्।

विप्रा ब्रह्मशिवेभ्यश्च त्रीन् पिण्डांश्च यथाक्रमम् ॥
यमाय सानुगायाथ चतुर्थं पिण्डमुत्सृजेत् ।
मृतं संचिन्त्य मनसा गोत्रनामकपूर्वकम् ॥
विष्णुं स्मृत्वा क्षिपेत् पिण्डं पञ्चमञ्च ततः पुनः ।
दक्षिणाभिमुखस्यैव निर्वप्य पञ्च पिण्डकान् ॥
आचम्य ब्राह्मणान् पश्चात् प्रोक्षणादिकमारभेत् ।
हिरण्येन च वासोभिर्गोभिर्भूम्याच तान् द्विजान् ॥
प्रणम्य शिरसा पश्चाद्विनयेन प्रसादयेत् ।
तिलोदकं करे दत्त्वा प्रेतं संस्मृत्य चेतसि ॥
गोत्रपूर्वं क्षिपेत्पाणौ विष्णुं बुद्ध्या निवेश्यच ।
वहिर्गत्वा तिलाम्भस्तु तस्माद्दद्यात्समाहितः ॥
मित्रभृत्यैर्निजैः सार्धं पश्चाद्भुञ्जीत वाग्यतः ।
एवं विष्णुमनै स्थित्वा यो दद्यात्पापमृत्यवे ॥
समुद्धरन्ति तं प्रेतं पराशरवचो यथा ।
सर्वेषां पापमृत्यूनां कार्यो नारायणो वलिः ॥
तस्मादूर्ध्वञ्च तेभ्योहि प्रदत्तमुपतिष्ठते ।
एवं श्राद्धैः समस्तान्यः सन्तर्पयति वै पितॄन् ॥
दद्युस्तानुत्तमांस्तस्य पितरस्तर्पिताः परान् ।
विद्यातपोसुखान् पुत्रान् पूज्यत्वमथ योषितः ॥
सौभाग्यैश्वर्यतेजश्च वलं श्रेष्ठमरोगताम् ।
यशःशुचित्वकुप्यानि सिद्धिञ्चैवात्मवाञ्छिताम् ॥
यशश्चान्दीर्घमायुश्च तथैवानुमतं मतिम् ।
अथान्यत् किञ्चिदाख्यामि पितॄणान्तु हिताय वै ॥
कृतेनैव स्वल्पेनापि प्राप्नुवन्ति विधेः फलम् ।

उच्छिष्टस्य विसर्गार्थं विधिस्तात्कालिको हि यः ॥
श्राद्धज्ञैर्विहितं यत्प्राक् पितृगणहितैषिभिः।
आदाय सर्वमुच्छिष्टमवनेजनवद्बुधः ॥
तत्रैव भक्षयेद्भूमौ तिलदर्भसमन्वितम्।
नरकेषु गता ये वै अल्पमृत्युमृता मम ॥
एतदाप्यायनन्तेषां चिरायैतद्ब्रवीन्मनुः।
करस्य मध्यतो देवाः करपृष्ठे तु राक्षसाः ॥
पात्रस्यालम्भनाद्दौच तस्मात्तन्न प्रदर्शयेत्।
दर्भाश्च स्वयमानेया दक्षिणाप्रवणोद्भवाः ॥
तर्पणाद्युच्छिता ये वै इत्याद्यास्त्र विसर्जयेत्।
न कुशङ्कुशमित्याहुर्दर्भमूलं कुशः स्मृतः ॥
छिन्नदर्भा इति प्रोक्ता तदग्र कुतपः स्मृतः।
हरिता याज्ञिका दर्भाः पीतकाः पाकयाज्ञिकाः।
सकुशाः पितृदैवत्यच्छिन्ना वै वैश्वदेविकाः ॥
दर्भमूले स्थितो ब्रह्मा दर्भमध्ये जनार्दनः।
दर्भाग्रे शङ्करस्तस्मौ दर्भाः देवत्रयान्विताः ॥
अहन्येकादे शश्राद्धे प्रतिमासं तु वत्सरम्।
प्रतिसम्वत्सरं कार्यमेकोद्दिष्टं तु सर्वदा ॥
एकस्य प्रथमं श्राद्धमर्वागब्दाच्च मासिकम्।
प्रतिसम्वत्सरश्चैव शेषत्रिपुरुषं स्मृतम् ॥
सपिण्डीकरणादूर्ध्वं प्रतिसम्वत्सरं सुतैः।
एकोद्दिष्टं प्रकुर्वीत पित्रोरप्यत्र पार्वणम् ॥
सपिण्डीकरणादूर्ध्वं प्रतिसम्वत्सरं द्विजैः।
मातापित्रोः पृथक्कार्यमेकोद्दिष्टं क्षयाहनि ॥

चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते।
एकोद्दिष्टविधानेन तत्कुर्याच्छस्त्रघातिते॥
पित्रादयस्त्रयो यस्य शस्त्रघातास्त्वनुक्रमात्।
स भूते पार्वणं कुर्य्यात् अष्टकानि पृथक् पृथक्॥
सपिण्डीकरणादूर्ध्वं पितुर्यः प्रपितामहः।
स तु लेपभुगित्येव प्रलुप्तपितृपिण्डतः॥
सपिण्डीकरणादूर्ध्वं कुर्यात् पार्वणवत्सदा।
प्रतिसम्वत्सरं विद्वान् च्छागलेपोविधिः स्मृतः॥
सपिण्डता तु कर्त्तव्या पितुः पुत्रैः पृथक् पृथक्।
स्वाधिकारप्रवृत्तत्वादितरः श्राद्धकर्तृवत्॥
यस्य सम्वत्सरादर्वाक् सपिण्डीकरणं भवेत्।
प्रतिमासं तस्य कुर्य्यात् प्रतिसम्वत्सरं तथा॥
अर्वाक् सम्वत्सरात् वृद्धौ पूर्णे सम्वत्सरेऽपि च।
एकपिण्डीकृतानान्तु पृथक्त्वं नोपपद्यते॥
सपिण्डीकरणादूर्ध्वं मृतकृष्णचतुर्दशीम्।
ये सपिण्डीकृतास्तेषां पृथक्त्वं नोपपद्यते॥
पृथक्त्वकरणे तस्य पुनः कार्या सपिण्डता।
स्त्रियं श्वश्र्वा पतिर्मात्रा तया सह सपिण्डयेत्॥
तदभावे पितामह्या तन्मात्रा चापरे विदुः।
नान्यथा तु पितामह्या मातामह्यास्तथापरे॥
उदके पिण्डदानञ्च भर्त्रा सह प्रदीयते।
अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषोऽपिवा॥
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम्।
अपुत्राश्च मृता ये च कुमाराः संस्कृता अपि।

समानता न तेषां स्यान्न स्वधा नाभिरम्यताम् ॥
भर्त्रा सपिण्डता स्त्रीणां कार्येति कवयो विदुः।
श्वश्र्वा सहापरे तस्यास्तन्मात्रा वा परे विदुः ॥
अनपत्येषु प्रेतेषु न स्वधा नाभिरम्यताम्।
एकोद्दिष्टेषु सर्वेषु न स्वधा नाभिरम्यताम् ॥
मित्रबन्धुसपिण्डेभ्यः स्त्रीकुमारस्य चैव हि।
दद्याद्वै मासिकं श्राद्धं सम्वत्सरं तु नान्यथा।
अप्रत्ययगतश्चैव कुलदेशस्यवर्त्मिना ॥
यो यथा कृपया युक्तः स तथैव हि निर्वपेत्।
दार्व्यार्थिं दृश्यते रूढे मानवं लिङ्गमेव च ॥
दृढीकृताच विद्वद्भिर्लोकरूढिर्गरीयसी।
विकल्पेषु च सर्वेषु स्वयमेवैक मादितः ॥
अङ्गीकरोति यः कर्ता सविधिस्तस्य नेतरः ॥
बहून्याजयते यस्तु वर्णाबाह्यांश्च नित्यशः।
म्लेच्छांश्च शौण्डकांश्चैव स विप्रो बहुयाजकः ॥
वर्त्तते यश्च चौर्येण सुवर्णेनोपहारकः।
स गृहीतसवर्णास्त्री स विप्रो गण उच्यते ॥
मृते भर्त्तरि या नारी रहस्यं कुरुते पतिम्।
ते तु वै आपयेद्गर्भं सा नारी गणिका स्मृता ॥
अन्यदत्ता तु या कन्या पुनरन्याय दीयते।
अस्या अभिन्नभोक्तव्यं पुनर्भूः कीर्तिता हि सा ॥
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता।
पुनः पत्युर्गृहं गच्छेत् पुनर्भूः सा द्वितीयका ॥
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते।

सवर्णाय सपिण्डाय पुनर्भूः सा तृतीयका ॥
प्राप्ते द्वादशवर्षेऽ च या रजो न बिभर्ति हि।
धारितन्तु तया रेतो रेतोधाः सा प्रकीर्त्तिता ॥
भर्तुर्या व्यभिचारेण नारी चरति नित्यशः।
अस्या अपि न भोक्तव्यं सा भवेत् कामचारिणी ॥
भर्तुः शासनमुल्लङ्घ्य स्वकामेन प्रवर्त्तते।
दीव्यन्ती च हसन्ती च सा भवेत् कामचारिणी ॥
पतित्यक्ता तु या नारी गृहादन्यत्र गच्छति।
गुदेषु रमते नित्यं स्वैरिणीन्तां विनिर्दिशेत् ॥
पतिं हित्वा तु या नारी सवर्ण मन्यमाश्रयेत्।
वर्त्तते ब्राह्मणत्वेन द्वितीया स्वैरिणी तु सा ॥
मृते भर्त्तरि या बाल्या क्षुत्पिपासातुरा तु सा।
तवाह मित्युपगता तृतीया स्वैरिणी तु सा ॥
देशकालमुपेक्ष्यैव गुरुभिर्या प्रदीयते।
उत्पन्नसाहसान्यस्मै चतुर्थी स्वैरिणी तु सा ॥
असत्पुत्रास्तु ये जातास्ते वर्ज्या हव्यकव्ययोः।
तथैव यतयस्तासां वर्जनीया प्रयत्नतः ॥
श्राद्धन्तैश्च न कर्तव्यं प्रतिलोमविधानतः।
वर्णाश्रमवहि स्यास्ते सङ्कीर्णजन्मसम्भवाः ॥
मातृणाञ्च पितृणाञ्च स्वीयानां पिण्डदाः स्मृताः।
उपपतिसुतो यस्तु यश्चैव दीधिषूपतिः ॥
परपूर्वा पतेर्जाता वर्ज्याः सर्वे प्रयत्नतः।
अजापालादिजाताश्च विशेषेण च वर्जयेत् ॥
मृतानुगमनं नास्ति ब्राह्मण्याब्रह्मशासनात्।

इतरे तुर्य्यवर्णेषु तपः परममुच्यते ।
भर्तुश्चित्यां समारोहेत् याच नारी पतिव्रता ।
अहन्येकादशे प्राप्ते पृथक् पिण्डे नियोजयेत् ॥
श्रौतैश्च स्मार्त्तै मन्त्रैश्च दम्पत्या वेव ताङ्गतौ ।
एकमृत्युगतौ चैव वङ्कावेकत्र यौ कृतौ ॥
एकत्वं तु तयोर्यस्मात् जातमाद्याय सानकम् ॥
एकादशादिकं श्राद्धं एकमेव स्मृतं बुधैः ।
एकत्वमिच्छन्ति मतिप्रहीणा एकादशाद्येषु मृतान्तु नार्य्यः।
ते स्वर्गमार्गे विनिहत्य कुर्युः स्त्रीसत्वदाता नरकेऽधिवासम् ॥
समानमृत्युना यस्तु मृतोभर्त्ता च योषिताम् ।
तस्याः सपिण्डता तेन पिण्डमेकं तु निर्वपेत् ॥
स्त्रीपात्रं पतिपात्रे तु सिञ्चयेदेकमेवहि ।
श्राद्धे त्रिपुरुषे लीणि तत् प्रत्यक्षं पितॄन् प्रति ॥
पत्या सह परा सुप्ता तेनैवास्याः सपिण्डता ॥
पितामह्यापि चान्यत्र ह्येतदाह पराशरः ।
अन्यप्रीतौ न चान्यस्य तृप्तिः कस्यापि दृश्यते ॥
एवं धीमन्नसुत्रापि तस्मान्नेकत्वमात्मने ।
एकत्वाश्रयणे धर्मौ नार्थालुब्धौ भवेद्ध्रुवम् ॥
तस्याः सुकृतसामर्थ्यात् पत्युः स्वर्गं इहेष्यते ।
भर्त्रा सह मृता यातु नाकलोकमभीप्सती ॥
साद्यश्राद्धे पृथक् पिण्डो नैकत्वन्तु स्मृतं बुधैः ।
पतिमृत्युः स्त्रियोस्त्यो निमित्तमेव जायते ॥
निर्निमित्तो नवै मृत्यु र्मृत्युना चैकता भवेत् ।

भर्त्रा सह मृता भार्य्या भर्त्तारं सा समुद्धरेत् ॥
तस्याः पतिव्रताधर्म्म एकत्वे तु हतो भवेत्।
बलीयस्त्वेन धर्मस्य तुच्छत्वाच्च समस्तया ॥
धर्म्मेण लिप्यते पाप मेकत्वे समता तयोः ।
नैकत्वन्तु तयो रस्माद्दत्तव्यं श्राद्धकर्म्मणि ॥
पृथगह्नि कर्त्तव्यं श्राद्धमेकादशादिकम् ।
यानि श्राद्धानि कार्य्याणि तान्युक्तानि पृथक् पृथक् ॥
कर्त्तव्यं यच्च तेऽप्युक्ता विशेषञ्च निबोधत ।
औरसाद्या मृताः पुत्त्रा मुनिभिर्द्वादशैव तु ॥
यथाजात्यनुसारेण वर्णानामनुसारतः ।
श्राद्धप्रदाः क्रमेण स्युः पूर्वाभावे परः परः॥
यस्माद्यो जायते पुत्रः स भवेत्तस्य पिण्डदः ।
तस्मात्तस्मादपीहन्ते मृताः प्रेतत्वमागताः ॥
तस्मादवश्यमेवं हि श्राद्धं कार्य्यं विधानतः ।
शूद्रस्य दासीजः पुत्त्रः कामदस्तु स पिण्डदः ॥
जात्या जातः सुतो मातुः पिण्डदः स्यात् सुतोऽपि च ।
जनकस्य न किञ्चित् स्यादर्थात्कामप्रवर्त्तनात् ॥
वायुभूताश्च पितरो दत्ताभिकाङ्क्षिणः सदा ।
तस्मात्तेभ्यः सदा देयं नृभिर्द्धर्मरतैः सदा ॥
ये खड्गिमांसमधुपायससर्पिरन्नै-
र्देशे च कालसहिते च सुपात्रदत्तैः ।
प्रीणन्ति देवमनुजान् पितृवंशजांश्च
तेषां नृणां तु पितरो वरदा भवन्ति ॥

उक्तश्राद्धविधिस्त्वेष वर्णानां पितृतृप्तिकृत्।
एवं दास्यति यः श्राद्धं वरान् सर्वानवाप्स्यति॥
इति श्रीवृहत्पाराशरीये श्राद्धनिर्णयो नाम
पञ्चमोऽध्यायः॥

षष्ठोऽध्यायः।

अगस्त्य उवाच।

अथातः सम्प्रवक्ष्यामि शुद्धिं पाराशरोदिताम्।
सूतके वाप्यशौचे वा यथावत्तां निबोधयेत्॥
प्रसवं सूतकं प्राहु राशौचं शाव मुच्यते।
यावत्कालञ्च यन्मासं तथा तावन्निगद्यते॥
केषाञ्चित्तेन वै मासं केषाञ्चिन्मरणान्तिकम्।
सद्यःशौचास्तथा चान्ये चान्ये चैकाह्निकाः स्मृताः॥
त्रिषट्दशदशद्वाभ्यां दशापि चैह पञ्चभिः।
तान्येव त्रिगुणान्याहु दिनान्यैव मनीषिणः॥
वक्ष्यमाणं निबोध त्व मुक्तक्रममिदं द्विज!।
शक्तिजो यन्मुनीनाञ्च प्राक् ब्रवीत् कलिधर्मवित्॥
विष्णुध्यानरतानाञ्च सदैव ब्रह्मचारिणाम्।
गृहमेधिद्विजानान्तु तथैव व्रतचारिणाम्॥
वेदतत्वार्थवेत्तॄणां नित्यस्नानकृतां तथा।
अन्तःसंसर्गिणामेषां नाशौचं नापि सूतकम्॥
संसर्गं वर्जयेद्यत्नात् संसर्गो दोषकारणम्।

वदन्ति मुनयः सर्वे वर्जने स्यान्न किल्बिषी ॥
वदन्ति मुनयः सर्वे संसर्गो दोषकारणम्।
असंसर्गः स्वकर्मस्थो द्विजो दोषैर्न लिप्यते ॥
दानोद्वाहेष्टिसङ्ग्रामे देशविप्लवकादिके।
सद्यः शौचं द्विजातीनां सूतकाशौचयोरपि ॥
दातृणां वृत्तिनामेके कवयः सत्रिणामपि।
सद्यः शौचमदोषाणां मूचुर्धर्मविदः कलौ ॥
सर्वमन्त्रपवित्रस्तु अग्निहोत्री षड़ङ्गवित्।
राजा च श्रोत्रियश्चैव सद्यःशौचः प्रकीर्तितः ॥
देशान्तरगते ताते मृते वापि सगोत्रिणि।
शेषाहानि दशाहार्वाक् सद्यः शौचमतः परम् ॥
पिण्डनिर्वर्तने जाते मृते वापि सगोत्रजे।
सर्वोऽपीहेति वासे स्यात् सद्यः शौचं विशोधनम्॥
सद्यः शौचं विधातव्यं सर्वास्तु दत्तजन्मनः।
बान्धवादिषु विज्ञेय मन्यदूर्द्ध्वं विधीयते ॥
नाशौचसूतके स्यातां नृपतीनां कदाचन।
यज्ञकर्मनिरक्तस्य ऋत्विजो दीक्षितस्य च ॥
पृथक् पिण्डमृते काले विदेशेऽन्यत्र च श्रुतेः।
जाते वापि च शुद्धिः स्यात् सद्यः शौचादसंशयम् ॥
सवेदः साग्निको दाहात् ब्राह्मणः शुद्धिमाप्नुयात्।
तथैकाहो नृपे संस्थे तथैव ब्रह्मचारिणि ॥
दुर्भिक्षे राष्ट्रभङ्गे च आपत्कालउपस्थिते।
उपसर्गमृतेवापि सद्यः शौचं विधीयते ॥
गोविप्रार्थविपन्नानां आहवेषु तथैव च।

ते योगिभिःसमाख्येयाः सद्यः शौचं विधीयते ॥
विप्रे संस्थे व्रतादर्वाक् श्रोत्रिये च तथा द्विजैः ।
अनूचाने गुरौ चैव आचार्य्ये वापि संस्थिते ॥
असंस्कृतस्त्रिया रात्रि श्रोत्रिये निधनङ्गते ।
त्रिरात्रमेव शौचं स्यात्तथैवोदकदायिनः ॥
विधानेनाग्निको विप्र स्त्रिरात्राच्छुद्धिमाप्नुयात् ।
मनीषिणः परे ब्रूयु रसपिण्डे त्र्यहं स्मृते ॥
प्रेतभूतञ्च यः शूद्रं ब्राह्मणाज्ञानदुर्बलः ।
नियतं ह्यनुगच्छेत त्रिरात्रमशुचि र्भवेत् ॥
षड्रात्रं नवरात्रञ्च शवस्पृशां विशुद्धकृत् ।
त्र्यहञ्चैव विशुद्ध्यर्थं धर्मशास्त्रविदो विदुः ॥
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफल मनुपूर्वं लभन्ति च ॥
अशुचित्वं न तेषान्तु पापं वाशुभकारणम् ।
जलावगाहनं तेषां सद्यः शौचं विधीयते ॥
असगोत्रम सम्बन्धं प्रेतीभूतं तथा द्विजम् ।
ऊढ्वादग्धद्विजाः सर्वे स्नानान्ते शुचयः स्मृताः ॥
एकरात्रं वहन्त्येके सद्यः स्नाने तथा परे ।
गोग्रहादिहतानाञ्च मुनयः शुचिकारणम् ॥
हतश्च यो विपद्येत शत्रुभिर्यत्र कुत्रचित् ।
स मुक्तो यतिवत्सद्यः प्रविशेत्परवेधसि ॥
सन्न्यासी युद्धसंस्थश्च सम्मुखं शत्रुभिर्नरः ।
सूर्य्यमण्डलमेत्तारावितिं प्राहुर्मनीषिणः ॥
पराङ्मुखे हते सैन्ये यो युद्धाय निवर्त्तते ।

तत्पदानीष्टतुल्यानि स्मृत्यां चाह पराशरः ॥
वक्रेतु प्रविशेद्यस्य लोहितं शिरसः पतत् ।
सोमपानेन ते तुल्या बिन्दवो रुधिरस्य च ॥
सन्यासेन हता ये वै प्रधने ये तनुत्यजः ।
मुक्तिभाजनकास्ते ते इति वेदो निदर्शनम् ॥
सद्यः शौचं विधातव्यं शुचिरेवं विधीयते ।
नोच्यन्ते ते हता लोके सद्यो ब्रह्मवपुर्गमाः ॥
सन्ध्याचारविहीनानां सूतकं ब्राह्मणा ध्रुवम् ।
अशौचं वा दशाहं स्यादिति प्राह पराशरः ॥
राज्ञस्तु द्वादशाहं स्यात् पक्षो वैश्यस्य पावनः ।
वृषभस्य तथा मासं त्वशुद्धादप्यति धर्मतः ॥
क्षत्रियादि पक्षः सद्भिर्मातुलादिषु कीर्तितः ।
गर्भस्रावे तु तैरुक्ता रात्रयो माससम्मिताः ॥
स्रावद्गर्भस्य विद्वांसो मासादर्वाक् चतुर्थकम् ।
पाताद्गर्भं वदन्त्येके तत्राधिक्यं च सूतकम् ॥
ऋणव्यसनरोगार्तपराधीनकुदर्यकम् ।
तृष्णावन्तो निराचाराः पितृमातृविवर्जिताः ॥
स्त्रीजिताश्चानपत्याश्च देवब्राह्मणवर्जिताः ।
परद्रव्यं जिहृक्षन्तः सद्यः सूतिकिनः सदा ।
पूर्वं किं सत्वशुद्धेवा अन्यदापद्यते यदि ॥
पूर्वेणैव तु शुध्येत जाते जातं हते हतम् ।
एकपिण्डाः स्वदायादाः पृथक् दारनिकेतनाः ॥
जन्मनि मरणे वापि भवेत्तेषान्तु सूतकम् ।
अग्नौम्बुगुप्रपातेच देशान्तरमृतेऽपि वा ॥

बाले प्रेतेच संन्यस्ते सद्यः शौचं विधीयते।
अजातदन्ता ये बाला येच गर्भाद्विनिःसृताः॥
न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया।
विवाहोत्सवयज्ञेषु चान्तराशौचसूतके॥
पूर्वसङ्कल्पितानर्थान् तानशौच्यान् ब्रवीन्मनुः।
शिल्पिनः कारुकाश्चैव दासीदासास्तथैव च॥
इत्यादीनां न ते स्नातामनुगच्छन्ति यां द्विजः।
पिता पुत्त्रेण जातेन दद्यात् श्राद्धन्तथोदितम्।
पितॄणां विधिवद्दानं तत्र तत्राप्यनन्तकम्॥
प्रसवे च द्विजातीनां न कुर्य्यात्सङ्करं यदि।
दशाहाच्छुध्यते माता अवगाह्य पिता शुचिः॥
अतिमानादतिक्रोधात् स्नेहाद्वा यदि वा भयात्।
उद्बध्य म्रियते यस्तु न तस्याग्निः प्रदीयते॥
न स्नायान्नोदकं दद्यान्नापि कुर्य्याद्दशौचताम्।
सर्पेण शृङ्गिणा वापि जलेन चाग्निना तथा॥
न स्नानादौ विपन्नस्य तथा चैवात्मघातिनः।
अर्वाक् द्विहायनादग्निं न दद्यान्मृतकस्य च॥
किन्तु तान्निखनेद्भूमौ कुर्यान्नैवोदकक्रियाम्।
सर्पादिप्राप्यमृत्यूना मग्निदाहादिकाक्रियाः॥
षण्मासेतु गते कार्या इति प्राह पराशरः।
शास्त्रदृष्टं बुधैः कार्यमन्यत्सञ्चयनादिकम्॥
तत्कृत्वाऽप्युक्तदिवसैः शुद्धमर्हति धर्मतः।
अन्यायमृतविप्राणां ये वोढारो भवन्तिहि॥
अग्निदाश्चैव ये तेषां तथोदकादिदायिनः।

उद्बन्धनमृतस्यापि यश्छिन्द्यात् रज्जुपाशकम् ॥
ते सर्वे पाशसंयुक्ताः प्रायश्चित्तस्य भाजनाः ।
यः सूतकाशौचविशुद्धकृत् स्यात्
आख्याय कालन्तमनुक्रमेण ।
पाराशरस्यास्बुजनिश्चिताया
वाच्यास्ततो निष्कृतयो द्विजास्ताः ॥
सूतकाशौचयो रुक्तः शुद्धिपन्थाऽनुपूर्वशः ।
सर्वैनसां विशुद्ध्यर्थं प्रायश्चित्तमथाब्रवीत् ॥
मनुर्वा याज्ञवल्क्यस्तु वशिष्ठः प्राह निष्कृतिम् ।
सा कृतादिषु वर्णानां सति धर्मे वपुष्मति ॥
मानसा वाचिका दोषास्तथा वै कार्य्यकारिताः ।
धर्माधीना नृणां सर्वे जायन्ते तेऽप्यनिच्छताम् ॥
तेषामुपरताद्यानां प्रेत्येह शुभमिच्छताम् ।
शक्तिजो निष्कृतिं प्राह युगधर्मानुरूपतः ॥
निष्कृतिं व्यवहाराणां सर्वं निष्कृतिकृद्यतः ।
कति विप्रैः कथं रूपैरिति वाच्या भवेद्धि सा ॥
तद्रूपञ्च प्रवक्ष्यामि यावद्भिः सा द्विजैर्भवेत् ।
यथाविधाश्च विप्राः स्युरिति विद्वन् ! प्रकीर्त्यते ॥
पर्षद्दशवरा प्रोक्ता ब्राह्मणैर्वेदवित्तमैः ।
तं यं ब्रूयुः स धर्मः स्यात् स्वयम्भूरित्यकल्पयत् ॥
देशशास्त्रविदो विप्रा यं ब्रूयुः सप्त पञ्च वा ।
त्रयो वापि स धर्मः स्यादेको वाध्यात्मवित्तमः ॥
संयमं नियमं वापि उपवासादिकञ्च यत् ॥
तद्गिरा परिपूर्णः स्यान्निष्कृतीरघहारिकाः ।

न लक्षणे तु मूर्खाणां नचैवाधर्मवादिनाम्॥
अविदुषां नातिलुब्धानां नचापि पक्षपातिनाम्।
श्रुताध्ययनसम्पन्न: सत्यवादी जितेन्द्रिय:॥
सदा धर्मरत: शान्त: सदापर्षत्वमर्हति।
न सा वृद्धैर्न तरुणै र्न सुरूपैर्धनान्वितै:॥
त्रिसिरेकेन पर्षत् स्याद्विद्वद्भिर्विदुषापि च।
तनया वयसापि स्यु र्वृद्धधर्मविदो द्विजा:॥
शिशवोऽपि हि मध्यस्था: सर्वत्र समदर्शना:।
न सा विप्रै र्भवेद्वृद्धै र्वृद्धा स्यु र्धर्मवादिन:॥
यत्र सत्यं स धर्म: स्यात् स्थलं यत्र न तादृशम्।

न सा सभा यत्र न सन्ति वृद्धा:
वृद्धा न ते ये न वदन्ति धर्मम्।
धर्मो वृथा यत्र न सत्यमस्ति
सत्यं न तद्यच्छलादानुविद्धम्॥

निष्कृतौ व्यवहारे च वृद्धस्याशंसनेऽपि च।
धर्मं वा यदिवाऽधर्मं पर्षं यत्प्राह तद्भवेत्॥
स्त्रीणाञ्च बालवृद्धानां क्षीणानां कुशरीरिणाम्।
उपवासाद्यशक्तानां कर्त्तव्योऽनुग्रहश्च तै:॥
ज्ञात्वा देशञ्च कालञ्च व्यय: सामर्थ्यमेव च।
कर्त्तव्योऽनुग्रह: सद्भि र्मुनिभि: परिकीर्तित:॥
लोभान्मोहाद्भयान्मैत्र्याद्यदि कुर्युरनुग्रहम्।
नरकं यान्ति ते मूढा शतधा वाग्मवाचिन:॥
प्रविश्य चोत्तमान्ते वै पर्षदानुग्रहात्स्थित:।
यथाकालं प्रकुर्युस्ते प्रायश्चित्तन्तदीरितम्॥

किन्त्वयं याचते देवः वदन्तोऽत्र द्विजातयः ।
सर्वे कुर्वन्ति नियतं गतपापं न संशयः ॥
प्रसादो विविधो दैव्यो दैत्याश्चासुरयेवच ।
क्रीड़यापि च तत्रैव देयास्तथैव ते द्विजाः ॥
व्यवहारो गोसमैस्तु ब्रूयाद्वापि च वै रतः ।
तथाकृतन्तु तत्पापन्तत्तथैव निवेदयेत् ॥
यस्तेषामन्यतो ब्रूयात् स पापीयान्पतत्यधः ।
सत्यमसत्य मेवात्र विपर्यस्तं वदेदितः ॥
स एवानृतवादी स्यात् सोऽनन्तनरकं व्रजेत् ।
ज्योतिषं व्यवहारश्च प्रायश्चित्तं चिकित्सितम् ॥
अजानन्यो नरो ब्रूयात् साहसं किमतः परम् ।
व्यवहारश्च तैः प्रोक्तो मन्वाद्यै धर्मवत् क्रमिः ॥
प्रजाभिर्न तु सर्वाभिर्नान्यैश्चतुर्भिर्मानवैः ।
तत् साधकप्रमाणानि व्याख्यितानि न तैर्विना ॥
जलादिनीचदिव्यानि साक्ष्योक्त्या शपथानि च ।
अन्ये जनपदाचारा अणुधर्म स्तथापरः ॥
पर्षद्भि र्ब्राह्मणैर्मत्वा निर्णेतव्यो यथाविधिः ।
यत्र जात्यनुसारेण देशकालानुधर्मतः ॥
कर्त्तव्यः सत्तमैः सर्वं माननीयोऽभिवादिभिः ।
गोब्राह्मणहतानाञ्च ये स्युर्दाहादिकारिणः ॥
तप्तकृच्छ्रेण शुद्ध्येयुरिति पाराशरोऽब्रवीत् ।
भोजयेद्ब्राह्मणान् पश्चात् स दृषा गौश्च दक्षिणाम् ॥
जायते पापनिर्मुक्तः शक्तिसूनो यथा वचः ।
अनाशिका निवृत्ता ये ब्रह्मचर्यात्तथा द्विजाः ॥

वैकालिकास्तु विज्ञेयाः सर्वकार्य्यविवर्जिताः।
सर्वे प्रविशयेयु वैते च वैडालिकैः समाः॥
तेषां सर्वाख्यपत्यानि पुक्कसैः सह घातयेत्।
ब्रह्मघ्नश्च सुरापश्च स्तेयी गुर्वङ्गनागमाः॥
एतेषां निष्कृती ब्रूयादेतत् संसर्गिणा मपि।
द्वादशाब्दन्तु विचरेद्ब्रह्मघ्नस्तत्कपालधृक्॥
सर्वत्र ख्यापयन् कर्मभिक्षा विप्रेषु सञ्चरन्।
दृष्ट्वा सेतुं समुद्रस्य स्नात्वा तु लवणाम्भसि॥
ब्राह्मणेषु चरन् भिक्षां स्वकर्म ख्यापयन् शुचिः।
मुण्डितस्तु शिखावर्जं स कौपीनो निराश्रयः॥
चीरचीवरवासा वै चिः स्नायी सन् शुचिर्व्रती।
संयताक्षश्चरेच्छान्त म्छत्रोपानद्वर्जितः॥
ब्रह्मघ्नोऽस्मीत्यहं वाच मिति सर्वत्र वै वदेत्।
गवाञ्च विंशतिर्दद्याद्दक्षिणां वृषसंयुताम्॥
ब्राह्मणेभ्यो निवेद्यैताः शुचिराख्याय भूपतेः।
पूर्वोक्तप्रत्यवायानां प्रायश्चित्त मिदं स्मृतम्॥
ब्राह्मणानां प्रसादेन तीर्थेषु गमनेन च।
गोशतस्य प्रदानेन शुध्यन्ति नात्र संशयः।
अवभृत्यैश्च मेधस्य स्नात्वा शुद्धि मवाप्नुयात्॥
आख्याय नृपतेर्वापि तेन संशोधितः शुचिः।
महापापानि सर्वाणि कथयित्वा महीपतेः॥
निष्कृतिं तद्गिरा दद्या दन्यथा तेऽपि तत्समाः।
रोगार्ताङ्गं द्विजं वापि मार्गे खेदसमन्वितम्॥
दृष्ट्वा कृत्वा निरातङ्कं ब्रह्मघ्नः शुद्धिमाप्नुयात्।

असंख्यातं धनं दत्त्वा विप्रेभ्यो वापि शुद्ध्यति ॥
अरण्ये निर्जने यत्ता शुद्ध्येत् त्रिर्वेदसंहिताम् ।
सुरापस्य प्रवक्ष्यामि निष्कृतिं श्रोतु मर्हसि ॥
सुरापस्तु सुरान्तप्तां पयो वा जलमेव वा ।
तप्तं गोमूत्रमाज्यं वा पीत्वा मृतोऽपि शुद्ध्यति ॥
यदि वा चैलवासो वा ब्रह्महत्याव्रतञ्चरेत् ।
यद्यज्ञानात्पिबेद्विप्रो द्विजातिर्वा सुरां पुनः ॥
पुनः संस्कारकरणात् शुद्ध्येदाह पराशरः ।
स्तेयं कृत्वा सुवर्णस्य शुद्धमेव द्विजातयः ॥
समर्प्य मूषलं राज्ञः ख्यापयेत् स्तेय कर्मकृत् ।
शक्तिश्चोभयतस्तीक्ष्ण मायसं दण्डमेव च ॥
खादिरं लगुडं वापि हन्यादेकेन तं नृपः ।
जीवतोऽपि भवेत् शुद्धो मुक्तो वा तेन पावनः ॥
मृतस्य प्रेत्य संशुद्ध्येत् पाराशरवचो यथा ।
न स्त्री प्रतिकृतं कृत्वा अग्निवर्णां च तां धमेत् ॥
गुर्वङ्गना गमन्तस्या लोहमय्यां तु स्थापयेत् ।
वृषणौ पुनरुत्कृत्य नैरृत्यामुत्सृजेत्तनुम् ॥
स मृतः शुद्धिमाप्नोति नान्यस्तस्य तु निष्कृतिः ।
सम्वत्सरं चरेत् कृच्छ्रं प्राजापत्य मथापि वा ॥
चान्द्रायणं चरेद्वापि त्रीन् मासानि जितेन्द्रियः ।
व्रते तु क्रियमाणे वै विपत्तिः स्यात् कथञ्चन ॥
स मृतोऽपि भवेच्छुद्ध इति धर्मविनिर्णयः ।
अनिर्दिष्टस्य पापस्य तथोपपातकस्य च ॥
तच्छुद्धौ पावनं कुर्यात् चन्द्रव्रत समाहितः ॥

तिष्ठेन्मासं पयोऽशित्वा पराकं वा चरेद्व्रतम्।
अनिर्दिष्टस्य पापस्य शुद्धिरेषा प्रकीर्तिता॥
क्षत्रियं ब्राह्मणं हत्वा गवां दद्यात् सहस्रकम्।
वृषभैकेन संयुक्तां पापादस्मात् प्रमुच्यते।
त्रीणि वर्षाणि शुद्ध्यर्थं ब्रह्मघ्नस्य व्रतं चरेत्॥
चान्द्रायणानि वा त्रीणि कृच्छ्राणि त्रीणि वा चरेत्।
वैश्यं हत्वा द्विजश्चैव अब्दमेकं व्रतञ्चरेत्॥
गवां ह्येकशतं दद्याच्चरेच्चान्द्रायणानि च।
कृच्छ्राणि वाचरेत् त्रीणि वचनाद्विदुषा मसौ॥
इह कार प्रदुष्टां स्त्रीं चातुर्वर्ण्यां द्विजातयः।
शूद्रहत्या व्रतं ते तु चरन्तः शुद्धिमाप्नुयुः॥
अनुलोमेन शूद्रं वा योषामव्यभिचारिणीम्।
शुद्धि मिच्छन्ति कवयश्चन्द्रवृत्तेन केचन॥
व्यभिचारात्तु ते हत्वा योषितो ब्राह्मणादयः।
दत्तिधनुर्वस्त्र गवां क्रमाद्दद्युर्विशुद्धये॥
साध्वीना मनस्वीनाञ्च नरो हत्वा सहस्रकम्।
चीर्णेन शुद्धिमागच्छेत् योषा सत्या व्रतेन तु॥
गोघ्नस्यातः प्रवक्ष्यामि निष्कृतिं श्रोतु मर्हथ।
यथा यथा विपत्तिः स्यात् तथा तच्चोपपद्यते॥
गोघाती पञ्चगव्याशी गोष्ठशायीच गोऽनुगः।
संयुक्तो माससमासेन गोप्रदानेन शुद्ध्यति॥
एकपादे तु लोमानि द्वये श्मश्रु निकृन्तयेत्।
पादत्रये शिखावर्जं सशिखं तु निपातिते॥
सशिखं वपनं कृत्वा द्विसन्ध्य मवगाहनम्।

गवां मध्ये वसेद्रात्रौ दिवा गाः समनुव्रजेत् ॥
तिष्ठन्तीभिश्च तिष्ठेत व्रजन्तीभिः सह व्रजेत् ।
पिबन्तीभिः पिबेत्तोयं संविशन्तीभिश्च संविशेत् ॥
शृङ्गकर्णादिसंयुक्तं चर्मोत्कृत्य तदाव्रतः ।
विपैकः सुचरेद्भिक्षां स्वकर्म ख्यापयन् व्रती ॥
गोघ्नस्य देहि मे भिक्षां इति वाचमुदीरयेत् ।
मासमेकं व्रतं कृत्वा गोप्रदानेन शुध्यति ॥
चौरव्याघ्रादिकेभ्यश्च सर्वप्राणैः समुद्धरेत् ।
गर्त्तप्रपातपङ्काच्च तथान्यादुपकारतः ॥
भोजयेद्ब्राह्मणान् पश्चात् पुष्पधूपादिपूर्वकम् ॥
दद्याद्गाश्च वृषञ्चैकं ततः शुध्यति किल्बिषात् ।
मुनयः केचिदिच्छन्ति विचित्रासु विपत्तिषु ॥
यथा सम्भवतस्तासु पृथक्पृथग्विनिष्कृतिम् ।
शस्त्रवस्त्राश्ममृत्पिण्डयष्टिमुष्टिप्रघातनम् ॥
योक्त्रकण्ठारणं रोधो बन्धनं विद्यदग्नयः ।
शङ्कपङ्कप्रपातश्च बद्धव्याघ्रादिभक्षणम् ॥
क्षुत्तृट्रोगचिकित्सा च तथादिदोहवाहने ।
मृत्युस्थानानि चैतानि गवामिति प्रबोधनम् ॥
प्रब्रूयात् पृथगेतेषु प्रायश्चित्तं पराशरः ।
उपेक्षणाच्च पङ्कादौ तथोपविषभक्षणैः ॥
वक्ष्यमाणक्रमेणैतत् शृणुध्वन्द्विजसत्तमाः ! ।
शस्त्रेण त्रीणि कृच्छ्राणि तदर्द्धं वासमाचरेत् ॥
अश्मना द्वे चरेत् कृच्छ्रे मृत्पिण्डे नास्ति कृच्छ्रकम् ।
यष्ट्या च द्वे चरेत् कृच्छ्रे साक्षात् यष्ट्या तु ते चरेत् ॥

योक्त्रे च पादमेकन्तु तारणे पादमेव च।
रोधने कृच्छ्रपादे द्वे कृच्छ्रमेकं तु बन्धने॥
कूपपाते चरेत् कृच्छ्र मर्धं वाप्यां समाचरेत्।
गोश्रृङ्गत्वखण्डपाते च प्राजापत्यञ्चरेद्‌द्विजः॥
क्षुत्तृट् रोगचिकित्सासु कृच्छ्रेण प्रेक्षणं चरेत्।
पतितां पङ्कलग्नां वा अवलिप्ताञ्च यो नरः॥
स्वस्य चान्यस्य चोत्प्रेक्ष्य सार्धकृच्छ्रं चरेच्छुचिः।
एकश्चेद्‌बहुभिर्विद्वान् क्षेडिताचेन्म्रियेत गौः॥
पादं पादञ्चरेयुस्ते इति पाराशरोऽब्रवीत्।
स्वबुधां योऽवलिप्ताङ्गां पश्यन्तो नोपकुर्वते॥
पातनोत्प्रेक्षणप्रोक्तञ्चरेयुस्ते व्रतं नरः।
या गर्त्तादौ विपद्येत क्षेडिता स प्रपत्य वा॥
पातक्षेडितयोरुक्तं तत्कर्त्ता व्रतमाचरेत्।
अलब्धा रज्जुदोषेण गौर्विपद्येत यस्य सः॥
व्रतपादञ्चरेत् शुध्येत्किञ्चिद्दद्यात्त, दक्षिणाम्।
यो गामपालयन् दुग्धा इतिवा वाहयेद्‌वृषम्॥
यदि म्रियेत तद्दोषात्तदा कृच्छ्रार्द्धमाचरेत्।
ग्रासं यो ना क्षुधार्तस्य तृषार्तस्य न वा जलम्॥
स्वीकृतस्य नरो दद्यात्स तत्पादव्रतञ्चरेत्।
या तु बद्धा चिकित्सार्थं विशल्यकरणाय च॥
औषधादिप्रदानाय विपन्ना नास्ति पातकम्।
विद्युत्पाताग्निदाहाभ्यां कुड्यांश्च पतनादिभिः॥
गोभिर्विपत्तिमापन्ने तत्र दोषो विपद्यते।
पालस्य रक्षतोऽरण्ये व्याघ्रादिर्गां निपातयेत्॥

अकुर्वतः प्रतीकारं कृच्छार्धं तस्य पावनम्।
शृण्वन् शून्येषु पालेषु तथान्यारण्यगामिषु॥
पाले सम्भाषयत्युच्चैर्हन्यात्तत्र न दोषभाक्।
गर्भिणीगर्भतुल्यातु तद्गर्भं न विशत्यतः॥
यत्नतोऽपि विपद्येत तत्र दोषो न विद्यते।
गर्भस्य पातने पादं द्वौ पादौ गात्रसम्भवे॥
पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनम्।
अङ्गप्रत्यङ्गभूतेन तद्गर्भे चेतनान्विते॥
द्विगुणङ्गोव्रतं कुर्य्यादेषा गोघ्नस्य निष्कृतिः।
वस्त्रादिवासने गौश्च बालदामकदोषतः॥
पादयोर्बन्धने चैव पादोनं व्रतमाचरेत्।
घण्टाभरणघोषेण गौश्च बन्धनमाप्नुयात्॥
चरेदर्धव्रतं तत्र भूषणार्थञ्च यत् कृतम्।
गौश्चेन्नादावधाशङ्की स्यात् कुर्यान्नैव निष्कृतिम्॥
तदा गोरोमतुल्यानि नरकाण्यविशत्क्रमाः।
यः स्नात्वा पापसम्भीतो विप्राराधनतत्परः॥
तदुक्तां निष्कृतिं कुर्याद्गुनेना नाश्नुतेऽशुभम्।
अन्यत्प्राणिवधस्याथ प्रवक्ष्यामि च निष्कृतिम्॥
गजादिवधशुद्ध्यर्थं यद्व्रतं याच दक्षिणा।
हस्तिनन्तुरगं हत्वा वृषभं खरमेव च॥
वृषाणास्त्वाशुकं गुञ्जान्दद्याद्व्रतं यथाक्रमम्।
अणाङ्गोनिष्कृयन्दत्वा परगोवधकृन्नरः॥
तस्यातिनिष्कृतिं कुर्य्याद्वधशुद्धिमपेक्षया।
हंसं येन कपिं श्येनं जलस्थलपक्षिखण्डनम्।

भासञ्च हत्वा स्युर्गावः शुद्धौ देयाः पृथक् पृथक् ॥
हंससारसचक्राङ्क मयूरमद्गुकुक्कुटान् ।
आटीपारावतक्रौञ्चशुकहा नक्तभोजनात् ॥
येषां जग्ने वृषन्दद्यात् प्रत्येकं शुद्धये द्विजः ।
मनीषिणो वदन्त्येनां प्राणिनां वधनिष्कृतिम् ॥
क्रौञ्चसारसहिंसाटिथिखिचक्राङ्ककुक्कुटान् ।
शुक टिट्टिभ मुद्गग्नो नक्ताशी नक्तहा शुचिः ॥
पारावतकपोतघ्नसारितित्तिचतापहा ।
त्रिसन्ध्यान्तर्जले प्राणान् आचम्य स्याच्छुचिर्द्विजः ॥
काङ्कं गृध्रञ्च श्येनञ्च अनक्रव्यालिपक्षिणम् ।
हत्वा स्यादुपवासेन शुचिराह पराशरः ॥
मण्डोरिसुखकं सर्वं हत्वागजरडिण्डिभौ ।
शर्कराभोजनन्दण्ड मायसे च ददन् शुचिः ॥
मेषञ्च शशकङ्गोधां हत्वा कर्म च शल्यकम् ।
वार्त्ताकुकुञ्जरञ्जग्धाहोरात्रोपषणात् शुचिः ॥
वृश्चिकान् जम्बुकान् हत्वा तरक्षू चौ तथा द्विजः ।
त्रिरात्रोपोषितः शुद्धोत्तिलप्रस्थप्रदानतः ॥
द्विजः शाखामृगं हत्वा सिंहं चित्रकमेव च ।
हत्वा सप्तोपवासानि दद्याद्ब्राह्मणभोजनम् ॥
महिषोष्ट्रगजाश्वानां हत्वा चान्यतमं द्विजः ।
त्रिः स्नात्वाचोपवासेन शुद्धः स्याद्द्विजपूजनात् ॥
वाराहं यदिवा रोहं हत्वा स्मगमकामतः ।
अकालक्लिष्टभोजी सन्नक्तकैकेन शुध्यति ॥
अथान्यत् संप्रवक्ष्यामि स्पर्शने दर्शनादिषु ।

अभक्ष्यभक्षणादौ च निष्कृतिं श्रोतुमर्हथ ॥
उद्‌क्या ब्राह्मणी स्पृष्टा मातङ्गपतितेन च।
चान्द्रायणेन शुध्येत द्विजानां भोजनेन च ॥
कापालिकादिनारीं तु गत्वाऽगम्यास्तथा पराम्।
भुक्त्वा विप्रस्तदन्नं स्याच्छुद्धिश्चन्द्रव्रतेन तु ॥
कामतस्तु व्रतं कुर्यादुक्तस्त्रीगमनादिषु।
चन्द्रव्रतद्वयं शुद्धौ पराशरवचो यथा ॥
दुग्धं सलवणं शक्तु सदुग्धं निशि सामिषान्।
दन्तच्छिन्नान् सकृद्दत्तान् पृथक्शावजलानपि ॥
योऽद्यादुच्छिष्टमाज्यं तु पीतशेषं जलं पिबेत्।
एकैकशो विशुध्यर्थं विप्रश्चन्द्रव्रतं चरेत्।
वासांसि यावतो यस्य पतन्ति जलबिन्दवः ॥
तदपुण्यं जलस्थानं नरकस्य शिलान्तिकम्।
तत्र पीत्वा जलं विप्रः श्रान्तस्तृट्परिपीड़ितः ॥
तदेनसो विशुद्ध्यर्थं कुर्य्याच्चान्द्रायणव्रतम्।
नटीं शैलूषिकीञ्चैव रजकीं वेणुजीविनीम् ॥
गत्वा चान्द्रायणं कुर्य्यात् तथा चर्मोपजीविनीम्।
गां नृपञ्चैव वैश्यञ्च शूद्रं वास्यानुलोमजम् ॥
क्षत्रियादिस्त्रियं गत्वा विप्रश्चान्द्रायणं चरेत्।
ब्राह्मणान्नं ददत् शूद्रः शूद्रान्नं ब्राह्मणो ददत् ॥
द्वावप्येतावभोज्यान्नौ चरेतां शशिनो व्रतम्।
विप्रेणामन्त्रितो विप्रः शूद्राहृतञ्च योऽश्नुते ॥
अमुत्र पितृभोक्तारौ शुद्ध्येतामैन्दवेन तु।
समानार्थां स यो गच्छेन्मातामह सगोत्रजाम् ॥

मातुलस्य सुताञ्चैव विप्रश्चान्द्रायणं चरेत्।
पीतशेषं जलं पीत्वा भुक्तशेषं तथा घृतम्॥
अथ मूत्रपुरीषे तु द्विजश्चान्द्रायणं चरेत्।
सूनाहस्ताच्च गोमांसं अद्यादापद्यमकामतः॥
पीत्वा चन्द्रव्रतं कुर्य्यात् पावनं शुद्धिदं परम्।
प्राज्ञः सन् पञ्च यज्ञान् यो न कुर्वीत द्विजाधमः।
परपाकरतो नित्यं आत्मपाकविवर्जितः॥
अदाता च सदा लुब्धः सोऽपचः परिकीर्तितः।
द्विजस्यास्यान्नमश्नाति स कुर्यादैन्दवं व्रतम्॥
गणिकागणयोरन्नं यदन्नं बहु याचकम्।
सीमन्तोन्नयने भुक्त्वा द्विजश्चान्द्रायणं चरेत्॥
अजानन् यः समश्नीयात् पदपृष्ठे द्विजाधमः।
सोऽभक्ष्यसममश्नाति द्विजश्चान्द्रायणं चरेत्॥
महापातकिनामन्नं योऽद्यादज्ञानतो द्विजः।
अज्ञानात्तप्तकृच्छ्रं तु जानंश्चान्द्रायणं चरेत्॥
प्रपातविषवह्न्यम्बुप्रवज्याधर्मचासकान्।
यथा हताश्च हन्ताच प्रत्यवसन्तिकाः स्मृताः॥
केचिदेतद्विशुद्ध्यर्थ मिच्छन्ति व्रतमैन्दवम्।
दक्षिणां सवृषां गाश्च दद्युश्च द्विजभोजने॥
म्लेच्छद्वारेऽतिथौ प्राप्ते तस्मादत्त्वा समश्नुते।
तदन्नमभोज्यं स्याद्भुक्त्वा चान्द्रायणं चरेत्॥
सव्यहस्तस्यदर्भो यो ब्राह्मणः समुपस्पृशेत्।
अङ्कपानेन तत्तुल्यं पीत्वा शशिव्रतं चरेत्॥
भुङ्क्ते सव्यासनस्थोऽतः पिबेद्वापि द्विजोत्तमः।

अभक्ष्येण हि तत्तुल्यं चरेच्चान्द्रायणं व्रतम् ॥
आसनादूढपादः सन् वस्त्रस्यार्द्धपटे कृतम्।
मुखेन धमिते भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ॥
उद्धृत्य वामहस्तेन यत्किञ्चित् पिबति द्विजः।
सुरापानेन तत्तुल्यं पीत्वा चान्द्रायणं चरेत्।
अश्नीयात् येन स्पृष्टेन उच्छिष्टं चाश्नुते हि सः ॥
चरन् चान्द्रायणं शुद्ध्येत्त्रीणि कृच्छ्राणि वा द्विजः।
चान्द्रायणं नवश्राद्धे पारकी मासिके यथा ॥
आब्दिके पादकृच्छ्रं स्यादेकाहः पुनराब्दिके।
स्नानमन्येषु कुर्वीत प्राणायामञ्जपन् तथा ॥
यः स्वैरिणीनाञ्च पुनर्भुवाञ्च यः कामचारी द्विजयोषिताञ्च।
रेतोऽश्नतां पाकमना यदद्याद्विप्रः स चन्द्रव्रतकृच्छ्रुचिः स्यात् ॥
वेश्मन्यज्ञातचाण्डालो द्विजाते र्यदि तिष्ठति।
ब्रह्मकूर्चं चरेन् मासन्त्रिः स्नायी नियतेन्द्रियः ॥
स्नेहांश्च घृततैलादीन् वस्त्राणि स्वासनानि च।
बहिः कृत्वा दहेद्गेहं संशुद्धो भोजयेद्द्विजान् ॥
गोविंशतिं वृषञ्चैकन्तेभ्यो दद्याच्च दक्षिणाम्।
इमं हि निष्क्रयं ब्रूयुश्चन्द्रव्रतस्य केचन ॥
अस्य पापस्य शुद्ध्यर्थं चरेद्वा त्वैन्दवं व्रतम्।
इमं वा निष्क्रयं दद्यात् इत्येके कवयोविदुः ॥
महापातकशुद्ध्यर्थं सर्वनिष्कृतये नरैः।
उपग्रामेश्वविदितैः कुर्वाणैः शुद्धिराप्यते ।
सुरामूत्रपुरीषाणां लीढ्वा त्वकामकामतः।
पुनः संस्कारकरणात् शुद्ध्येदाह पराशरः ॥

अभक्ष्यभक्षणेविप्र स्तथैवापेयपानकृत्।
व्रतमन्यत् प्रकुर्वीत वदन्त्यन्ये द्विजोत्तमाः।
कुशाब्जाश्वत्थपालाशविल्वोडुम्बरवारिणाम्।
पानेन जायते शुद्धिः षड्रात्रेण न संशयः॥
द्रोण्यम्बूशीरकुम्भाभस्त्रस्थं केशवारि च।
पीत्वारण्ये प्रयातोऽयं पञ्चगव्यं पिबन् शुचिः॥
भाण्डस्थितमभोज्यानां पयो दधि घृतं पिबन्।
द्विजाति रुपवासेन शूद्रो दानेन शुद्ध्यति॥
तत्तोयपीतजीर्णाङ्ग तप्तकृच्छ्रं चरेद्‌द्विजः।
सर्वे ते तु जले सद्यः प्राजापत्यं समाचरन्॥
रजकाद्यम्बुपाने तु प्रजापत्यं समाचरेत्।
वान्ते जले तदर्धं तु शूद्रः स्यात् पादकृच्छ्रकृत्।
जलकूपकाद्यम्बु पीत्वा शुद्धा द्विजातयः।
गोमूत्र यावकाहाराः शुद्ध्येयु र्दिवसैस्त्रिभिः॥
घृतं दधि तथा दुग्धं गोष्ठेवा शौचसूतके।
अभिचारस्य तद्भुक्त्वा भुक्त्वा वा शूद्रभोजनम्॥
द्रुणद्रां वा द्विजो भुक्त्वा मानस्तोक्यामथापि वा।
क्षुधातिपीड़ितैः पेयमित्याहैतत् पराशरः॥
सूतकान्नं द्विजो भुक्त्वा त्रिरात्रोपोषणाच्छुचिः।
तोयपाने त्वसौ कुर्यात् पञ्चगव्यस्य चाशनम्।
द्रोण्योदकं तदर्धं वा प्रस्थं प्रस्थार्धमेव च॥
घृतमुच्छिष्टसंसृष्टं प्रोक्षणाच्छुचितामियात्।
चरुपक्वं घृतं पक्वं अन्नं काकाद्युपाहृतम्॥
तद्ग्रासः स्यान्नसन्त्यागात्पूतं हेम्नाम्बुसिञ्चनात्।

केचिद्वदन्ति तज्ज्वास्तु तस्याग्निनावचूडनम् ॥
केचित् प्रणवयुक्तेन वारिणा प्रोक्षणं विदुः।
केशकीटकसंदुष्टं अन्नं मक्षिकयापि च ॥
स्पृष्टं वारिवा तत्र प्रक्षेप्तव्यं विशुद्धयेत्।
उदक्या ब्राह्मणी स्पृष्टा क्षत्रियापि ह्युदक्यया ॥
अर्द्धकृच्छ्रं चरेत् पूर्वं तदर्द्धमपराचरेत्।
प्राजापत्यं च विट्स्त्र्याः विट्स्त्री पादमाचरेत् ॥
शूद्रा स्पृष्टाचरेत् कृच्छ्रं शूद्री दानेन शुध्यति।
ब्राह्मण्या ब्राह्मणी स्पृष्टा उदक्योदक्यया च ते।
चरेतां पादकृच्छ्रे द्वे कृते स्नाने विशुध्यति ॥
ब्राह्मणी क्षत्रियां स्पृष्ट्वा ब्राह्मणीव्रतमाचरेत्।
अपरा क्षत्रियायास्तु वक्तव्यमेव मन्ययोः ॥
रजस्वला तु संस्पृष्टा श्वभिःशूद्रैश्च वायसैः।
स्नानं यावन्निराहारं पञ्चगव्येन शुध्यति ॥
ब्राह्मण्युदक्या संस्पृष्टा मातङ्गैर्मेदभिल्लकैः।
गोमूत्रयावकाहारा षड्रात्रेण च शुध्यति ॥
उच्छिष्टं ब्राह्मणः स्पृष्ट्वा द्विजातिस्त्रीरजस्वलाम्।
प्राजापत्येन सशुध्येत् चीर्णकृच्छ्रेण वा पुनः ॥
वदन्ति कवयः केचिदेतद्दोषविशुद्धये।
प्राणायामशतञ्चास्य पञ्चगव्यस्य प्राशनम् ॥
उच्छिष्टं ब्राह्मणः स्पृष्ट्वा ब्राह्मण्युदक्यया चरेत्।
प्राजापत्यञ्च गायत्री मयुतं नियमं सकृत् ॥
क्षत्रियादिभिरेतस्य स्पर्शने व्रतमाचरेत्।
अनुच्छिष्टस्य तत्स्पर्शे स्नानकर्म यतः स्मृतम् ॥

रजकादिकसंस्पर्शे द्विजन्मोदक्ययोषितः ।
प्राजापत्यञ्चरेद्विप्रा अन्यांश्चरेयुरंशतः ॥
उदक्यां ब्राह्मणीं गत्वा क्षत्रियो वैश्ययेव च ।
त्रिरात्रोपोषितः प्राश्य गव्यमाज्यं शुचिर्भवेत् ॥
क्षत्रिणीचैव वैश्यां च स्नानं गत्वा तु कामतः ।
चरेत् सान्तपनं विप्रस्तत्पापस्य विमोचकृत् ॥
वैश्याश्च क्षत्रियो गत्वा वैश्यश्च शूद्रिणीं तथा ।
प्राजापत्यञ्चरेत् मासं इति ब्रूयात् पराशरः ॥
उच्छिष्टा ब्राह्मणी स्पृष्टा शुना वा वृषलेन वा ।
शुद्धा भवति सा तावत् यावत् पश्यति शीतगुम् ॥
विप्रामश्वजनीं वैश्यां महिष्युष्ट्रीमजां खरीम् ।
प्राजापत्यञ्चरेद्गत्वा ह्येकैकस्य विशुद्धये ।
शूद्रीन्तु ब्राह्मणो गत्वा मासं मासार्द्धमेव च ।
गोमूत्रयावकाहारो मासार्द्धेण विशुद्ध्यति ॥
नृपोऽप्यश्वजनीं गत्वा प्राजापत्यं समाचरेत् ॥
वैश्यपत्नीमसौ गत्वा कृत्वा सान्तपनं शुचिः ।
शुद्रीन्तु क्षत्रियो गत्वा गोमूत्रयावकाशनः ॥
दशभिर्दिवसैः शुद्ध्येत् वैश्यः सोऽप्येवमेव हि ।
उत्तमागमने नार्याः सर्वे ते स्युः कटाग्निना ॥
महापथचरं ब्राह्मं खरयानेन योषितः ।
चण्डालमेदभिल्लानामभिगम्य स्त्रियं नरः ॥
शुद्ध्येत्पयोव्रतं कुर्वन् मासार्द्ध मघमर्षणम् ।
पतितां च द्विजाग्रः स्त्रीं प्राजापत्यञ्चरेद्द्विजः ॥
तैलिकस्य स्त्रियं गत्वा गत्वा मद्यकृतः स्त्रियम् ।

अन्त्यानामिगतः स्त्रीणां पुंसामनुलोमजेन तु ॥
इमां निष्कृतिमिच्छन्ति हतयोनिश्च केचन।
पितृव्यमातृभार्य्यां च मातृष्वसारमेव च।
भगिनीञ्चैव धात्रीञ्च गत्वा कृच्छ्रं समाचरेत् ॥
षण्मासं केचदिच्छन्ति इमां गत्वा विशुद्ध्यति।
कृच्छ्रं धर्मविदो विप्राः शुद्धितत्वार्थवेदिनः ॥
गुरुपत्नीं द्विजो गत्वा मातृष्वसृदुहितृषु।
क्षिपेत् शुद्ध्यर्थमात्मानं सुसमिद्धे हुताशने ॥
उपाध्यायनृपाचार्य्यशिष्ययोषिद्गमी नरः।
षण्मासात् कृच्छ्रचरणात् शुद्ध्येदाह पराशरः।
कृतचाण्डालसंस्पर्शः कृतमूत्रकरो द्विजः ॥
षड्रात्रोपोषणात् शुद्ध्येत् भुक्त्वाचान्तो भवेत् शुचिः।
उद्धोच्छिष्टस्य संशुद्ध्यै केचित्प्राजापतिव्रतम् ॥
पराकं पञ्चगव्यञ्च केचित् ब्रूयुर्मनीषिणः।
उच्छिष्टं ब्राह्मणः स्पृष्ट्वा उच्छिष्टेन द्विजेन तु ॥
आचम्यैव तु शुध्येतां विष्णुनामानि कीर्त्तनात्।
क्षत्रियेण तु संस्पृष्टो ब्राह्मणो नक्तभोजनात् ॥
वैश्येन तु च संस्पृष्टो नक्ताशी पञ्चगव्यपः।
शूद्रेण तु च संस्पृष्ट एकरात्रोपवासकृत् ॥
उच्छिष्टैः पुनरेतैस्तु प्रोक्तं द्विगुणमर्हति।
उच्छिष्टः शूद्रसंस्पृष्टः शुना वापि द्विजोत्तमः।
उपोष्य पञ्चगव्येन शुद्धिः स्यादपरे विदुः ॥
अनुच्छिष्टोऽपि यत्स्पर्शात् स्नाति वर्णी विशुद्धये।
उच्छिष्टस्तस्य संस्पर्शे चरेत्प्राजापतिव्रतम्।

रजकाद्यन्त्यजस्पृष्टः शुद्ध्यै तदर्धमाचरेत्।
ब्राह्मण्युदक्या कृच्छ्रेण प्राजापत्येन चापरे॥
उदक्या ब्राह्मणा स्पृष्टी मृताङ्गपतितेन वा।
तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुद्ध्यति॥
उदक्यासूतकाम्लेच्छसंस्पर्शेऽस्तमिते रवौ।
उक्तदानादिधर्मेण शुद्ध्येत् द्विजोऽग्नि सन्निधौ॥
वन्दयित्वा पवित्रत्वं मन्त्रार्करश्मिवायुभिः।
मुनयो धर्मवेत्तारो रात्रौ चन्द्रांशुरश्मिभिः॥
कृमिश्च ब्राह्मणः प्राश्य षडहं पञ्चगव्यकम्।
हेम्नो ददञ्च षण्मासात्तथा गाञ्च विशुद्ध्यति॥
पञ्चाहेन नृपः शुध्येत्तथा हेम ददञ्च गाम्।
चतुर्याहेन वैश्यस्तु चतुर्मासान् गवा सह॥
त्र्यहेण च चतुर्थेन तस्माङ्गञ्च त्रयञ्च गाम्।
सकृत्यस्मात्कृते स्नान मेतदाह पराशरः॥
पङ्क्तिं निःसार्य्य विप्रस्यां कामतोऽकामतोऽपि वा।
गायत्र्या च सहस्रेण जप्तेन तु भवेच्छुचिः॥
यः कश्चिद्धरति भूमिं हेम गामश्वमेव वा।
स तं यत्नात्प्रसाद्यार्ऽपि तदुक्तः शुद्धिमाप्नुयात्॥
आख्याय भूभृते वापि तेन संशोधितः शुचिः।
द्रव्यदण्डादिमुक्तिर्वा तपसा वा शुचिर्नरः॥
निराहारा जायते च एतदाहुर्मनीषिणः॥
विनिर्गता यदा शूद्रादुदक्यान्ते व्यवस्थिता।
तदा द्विजैस्तु द्रष्टव्य इति धर्मवि[illegible]दुः॥
दुःस्वप्नदर्शने चैव वान्ते वा क्षुर[illegible]।

मैथुने कूटधूमे च सद्यः स्नानं विधीयते ॥
चिताञ्च चितिकाष्ठञ्च यूपं चाण्डालमेव च ।
स्पृष्ट्वा देवलकञ्चैव सवस्त्र जलमाविशेत् ॥
जम्बुकश्च शूकरैस्तु यदि स्पृष्टो भवेन्नरः ।
अष्टोत्तरशतं जप्त्वा गायत्र्याः शुद्धिमर्हति ॥
शुनोघ्राणावलीढस्य नखैर्विलिखितस्य च ।
अद्भिः प्रक्षालनं कार्य्यमग्निना वावधूननम् ॥
अवज्ञान्तु गुरोः कृत्वा नक्तं तस्य तु भोजनम् ।
नक्षत्रदर्शनं त्वन्ये इति प्राह पराशरः ॥
कुमारी तु शुना स्पृष्टा जम्बुकेन वृषेण वा ।
यां दिशं व्रजते सूर्य्यं तां दिशं सा विलोकयेत् ॥
दिवसे तु यदा ग्रामे शुना स्पृष्टो भवेद्द्विजः ।
विप्रं प्रदक्षिणीकृत्य घृतं प्राश्य विशुध्यति ॥
चातुर्वर्ण्यान्तु या नारी कृताभिगमनापि च ।
प्रक्षाल्य नाभिं यावत्तत् लिङ्गशौचं निजं विदुः ॥
अभिगच्छन् सुतार्थञ्च कृताहृतौ स्त्रियं द्विजः ।
न च कुर्वीत स स्नानं नाभेरधस्तु शोधयेत् ॥
तुङ्कारन्तु गुरोरुक्त्वा हुङ्कारन्तु गरीयसम् ।
प्रसाद्यैतावेनश्चेत्यात् स्नात्वा शुद्धो द्विजोत्तमः ।
विवादे शास्त्रतोऽजित्वा भार्या यस्य तु जायते ॥
श्मशाने जायते तस्य तमोभावेन दुष्कृतम् ।
ताडयित्वा तृणेनापि स्कन्धेनाबध्य रज्जुना ॥
विवादेनापि निर्जित्य तं प्रसाद्य विशुध्यति ।
उच्छीर्यं च चरेत् कृच्छ्रमतिकृच्छ्रं निपातने ॥

कृच्छ्रातिकृच्छ्रोऽसृक्पाने कृच्छ्रोऽस्यान्तरशोणिते ।
प्रेतं दृष्ट्वा च दग्ध्वा च शुद्धिः स्नानात् द्विजन्मनाम् ।
उपवासमथो वापि ब्रह्मकूर्चञ्च पावनम् ।
प्रेतभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ॥
नीयते ह्यनुगच्छंस्तु त्रिरात्र मशुचिर्भवेत् ।
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ॥
प्राणायामशतं कृत्वा घृतं पाश्य विशुध्यति ।
अङ्गुल्या दन्तकाष्ठन्तु प्रत्यक्षलवणं यथा ॥
मृत्तिकाभक्षणञ्चैव तुल्यं गोमांसभक्षणम् ॥
कृत्वान्यतममेतेषां शुध्यर्थ मात्मनो हितम् ।
चरेत् शशिव्रतं विप्र इति प्राहुर्मनीषिणः ॥
केचिद्वदन्ति मुनयः कृच्छ्रं प्राजापतिं तथा ।
तदर्धं पादकृच्छ्रे वा ब्रूयुरन्ये द्विजोत्तमाः ॥
अधोच्छिष्टं द्विजोऽज्ञानादूयद्यदद्यं हि किञ्चन ।
भुक्ता नाचम्य वा कुर्य्यात् त्रिरात्रं केह निष्कृतिः ॥
नक्तोपवासबाह्ये तु अन्यत्र द्विगुणञ्चरेत् ।
अष्टोत्तरशतं जप्त्वा गायत्र्याः शुद्धिमर्हति ॥
अधोच्छिष्टं द्विजः स्पृष्ट्वा श्वोच्छिष्टं वृषलेन तु ।
नक्षत्रदर्शनेऽश्नीयात् पञ्चगव्यपुरःसरम् ॥
अथोधोच्छिष्टं विप्राद्यैश्चोच्छिष्टं शूद्रसंस्पृशः ।
उपरासेन शुध्येयुः पञ्चगव्यस्य पावनम् ॥
श्वकाकीकाकसंस्पृष्टो भुञ्जानो ब्राह्मणश्च यः ।
तदन्नस्य परित्यागात् कृत्वा स्नानन्तु शुद्ध्यति ॥
यज्ञोपवीतेन विना भोजनं कुरुते द्विजः ।

अपि मूत्रपुरीषे वा रेतःसेवनमेव च ॥
त्रिरात्रोपोषितो विप्रः पादकृच्छ्रन्तु भूमिपः ।
अहोरात्रोषितो वैश्यः शुद्धिरेषा पुरातनी ॥
विप्रः कुकृत्यनिष्ठीव्यं कृत्वाऽनृतभाषणम् ।
वचनं पतितैः कृत्वा दक्षिणं श्रवणं स्पृशेत् ॥
विप्रस्य दक्षिणे कर्णे नित्यं वसति पावकः ।
अङ्गुष्ठे दक्षिणे पाणौ तस्मात्तेन च तं स्पृशेत् ॥
प्रेक्षणं शशिनोऽर्कस्य ब्रह्मेशविष्णुसंस्मृतिम् ।
गायत्र्याः शतसाहस्रं सर्वपापहरं स्मृतम् ॥
गायत्र्यष्टसहस्रन्तु ब्रह्महत्याविशोधनम् ।
शूद्रबधे द्विजाग्रस्य गायत्र्यष्टसहस्रकम् ॥
राज्ञः पञ्चसहस्राणि ह्यद्विजस्य तदर्धकम् ।
योगेन गतिशीलस्तु यदि वा स्यात्सदा नरः ॥
ता वुभौ सर्वदा त्याज्यौ निश्चितं सर्वकर्मसु ।
मक्षिकासन्ततिर्धारा विप्रुषो ब्रह्मविन्दवः ॥
स्त्रीमुखं बालवृद्धञ्च न दूष्यन्ति कदाचन ।
आत्मस्त्री ह्यात्मबालञ्च आत्मवृद्धं तथैव च ॥
आत्मनः शुचयस्तानि परेषा मशुचि स्तथा ।
उत्पन्नमातुरे स्नानं दशकृत्वो ह्यनातुरः ॥
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्ध्येत्स आतुरः ।
विवाहोत्सवयज्ञेषु संग्रामे जनसङ्कुले ॥
पलायने वनेऽरण्ये स्पृष्टास्पृष्टिर्न दूष्यति ।
आद्यस्पर्शे भवेत् स्नानं द्वितीयस्यापि तत्स्मृतम् ॥
शिरःप्रोक्षणमन्येषा मन्यत्राचमनं स्मृतम् ।

पलाशशमिपाकाष्टदन्तधावनकृन्नरः॥
दिवा कीर्तिं समश्नीयाद्यावन्नां नैव पश्यति।
पद्माश्मलोहं फलकाष्ठचर्म भाण्डस्थतोयैः स्वयमेव शौचात्।
पुंसां निशास्वार्धकनिःसृतानां स्त्रीणां च शुद्धिर्विहिता सदैव॥
स्नानस्पृष्टेन येन स्यात्काष्ठाद्यैर्यदि तं स्पृशेत्।
नावारोहणवत् स्पृशन् ततोपस्पर्शनाच्छुचिः॥
म्लेच्छलूनाशनस्पर्शे क्षेत्रे वा यदि वा स्थले।
उपस्पर्शे शिरः प्रोक्ष्य संशुद्धो जायते द्विजः॥
वस्त्रसंस्पर्शनं तस्य सचैलाङ्गाऽवगाहनम्।
अङ्गस्पर्शनवत्तस्य वन्दति द्विजसत्तमाः॥
चण्डालोदकसंस्पर्शे शुद्धिः स्नानेन जायते।
तथा तद्भाण्डसंस्पर्शे स्नानमाहुर्मनीषिणः॥
उदक्यास्पर्शने स्नायादंशुकेनाङ्गतोऽपिवा।
स्याद्यतः स्पृश्यपि स्नानं तुल्याः सर्वरजस्वलाः॥
संस्पर्शे मेदभिल्लानां तथैव ब्रह्मघातिनाम्।
पतितानां च संस्पर्शे स्नानमेव विधीयते॥
रजस्वलाद्यैः संस्पर्शे उपस्पर्शनमेवच।
उदक्यायास्तृतीयेऽह्नि केचिदाचमनं विदुः॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी।
तृतीये रजकी प्रोक्ता चतुर्थे तु विशुद्ध्यति॥
पुरुहूतः पुरा दैत्यं त्रिशिर्षाख्यञ्जघान यत्।
तद्वधः ब्रह्महत्यायास्तत्फलं स ददौ स्त्रियम्॥
आसां तत्प्रभृति स्त्रीणामस्पृश्यत्वं स[illegible]वत्।
अंशे दिनत्रयं ह्येतच्छुक्रगुर्वादिकल्पि[illegible]म्॥

शवराश्च पुलिन्दाश्च नटाश्च कैवटास्तथा ।
एतान्रजकसन्तुल्यान् केचिदाहुर्मनीषिणः ॥
रजकाद्याभिगामित्वे वैश्यो गोमूत्रयावकम् ।
चरन्ति षड्गुणाहोभिः कृच्छ्रं वा द्विगुणाञ्चरेत् ॥
ब्रह्मक्षत्रियविट्जाता शूद्रास्तेऽनुक्रमेण तु ।
क्रमातिक्रमतश्चान्ये म्लेच्छान्त्यवर्णसम्भवः ॥
भोज्याशनास्तु तच्छूद्रा अन्ये भोज्यासनाः स्मृताः ।
आमाशनानि भोज्यानि घृतमुच्छिष्टमुच्यते ॥
दासनापितगोपालकुलमित्रार्द्धसीरिणः ।
भोज्यान्नो नापितश्चैव यश्चात्मानं निवेदयेत् ॥
पर्युषितं चिरस्थञ्च भोज्यं स्नेहसमन्वितम् ।
यवगोधूमावस्नेहो तथा गोरसविक्रयः ॥
आपन्नतो द्विजोऽश्नीयात् गृह्णीयाद्वा यतस्ततः ।
न स लिप्येत पापेन पद्मपत्रमिवाम्भसा ॥
स्थापितं शूद्रगेहेऽन्नकूट पक्वञ्च यद्भवेत् ।
नीत्वा नद्यादिके तद्वै प्रोक्ष्य भुञ्जनकिल्विषी ॥
गायत्र्योङ्कारपूताभिः केचिदद्भिश्च प्रोक्षणम् ।
मन्यन्ते विष्णुमन्त्रेण कलिधर्मसमाः स्मृताः ॥
आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः ।
म्लेच्छभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः ॥
आभीरभाण्डसंस्थानि पयोदधिघृतानि च ।
तावत्पूतं हि तद्भाण्डं यावत्तत्र तु तिष्ठति ॥
पूतानि सर्वपुण्यानि काकहस्थस्थितानि च ।
स्वादत्तानि च भक्ष्याणि यत्नतस्तु द्विजातिभिः ॥

सर्वैः स्वोपस्करैर्युक्ता शय्या रक्तांशुकानि च ।
पुष्पाणि चैव शुद्ध्यन्ति प्रोक्षणानि न संशयः ॥
अलेपं रूपमयं भाण्डं भाण्डं संशयमेव च ।
प्रोक्षणादेव शुद्ध्येत सलेप मग्नि ताडनात् ॥
भस्मना शुद्ध्यति कांसं सुरयाथ न लिप्यते ।
सुरा मूत्रपुरीषाभ्यां शुद्ध्यति तापलेपनैः ॥
अलिप्तं मद्यमूत्राद्यै स्ताम्रं मम्लेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा नद्यश्च वेगसंयुताः ॥
अवेगमपि यद्भूरि सरिद्वारि ह्रदश्च यत् ।
सकृदस्पर्शसंस्पृष्टं न तद्दूष्यन्ति सद्भिरः ॥
सत्येन ब्रूयते वाणी धर्मः सत्येन वर्तते ।
तस्मात्सत्यं हि वक्तव्यमात्मशुद्धौ द्विजातिभिः ॥
रथ्याकर्दमतो यानि नावः पथि तृणानि च ।
मारुतार्केण शुद्ध्यन्ति निशि चन्द्रर्क्षमारुतैः ॥
यथासम्भव सुक्तानि प्रायश्चित्तानि सत्तम ! ।
उक्तानुक्तानि सर्वाणि ज्ञातव्यानि द्विजातिभिः ॥
प्रायश्चित्तं न तत्प्रोक्तं धर्मशास्त्रप्रवक्तृभिः ।
द्विजैस्तत्र प्रकल्प्यं स्याद्धर्मशास्त्रार्थचिन्तकैः ॥

उक्ता मया निष्कृतयः समासात्संशुद्धये वर्णचतुष्टयस्य ।
व्रतानि तासां विहितानि यानि वक्ष्याम्यतस्तानि निबोधयेति॥

इति श्रीवृद्धहारीतपराशरीये धर्मशास्त्रे सुव्रतप्रणीते प्रायश्चित्तनिर्णयो नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ।

व्रतान्यथ प्रवक्ष्यामि चान्द्रवादिक्रमेण तु ।
पापक्षयकृतैर्यैः स्याद्धर्मार्थी च महोदयः ॥
चन्द्रवृद्ध्याश्नीयाद्ग्रासान् शुक्ले कृष्णे च ह्रासयेत् ।
चन्द्रक्षयेन भोक्तव्यं मध्ये शशिव्रतञ्चरेत् ॥
विपरीतान् क्रमाद्ग्रासानादावादौ च ग्रासयेत् ।
वर्धन्ते दैन्यपक्षे तु पिप्पलीमध्यमैन्दवम् ॥
अष्टावष्टौ समश्नीयात्स व्रती प्रतिवासरम् ।
अष्टाग्रासिकमित्याप चान्द्रायण मथापरम् ॥
शतद्वयन्तु पिण्डानां चत्वारिंशत्समन्वितम् ।
मासेनैवोपभुञ्जीत चान्द्रायण मथापरम् ॥
चतुरः प्रातरश्नीयात्सायं ग्रासांश्च तावता ।
शिशुचान्द्रायणं तज्ज्ञैः प्रोक्तं पापापनोदनम् ॥
मध्यन्दिने यदश्नीयात्सायं ग्रासांश्च तावता ।
चान्द्रायणं यतीनां तत्तत्त्वज्ञैः परिकीर्तितम् ॥
शिखण्डसम्मितान् ग्रासान् चन्द्रव्रतप्रयोजने ।
दोषः स्यादन्यथाभावे तस्मादुक्तं न दापयेत् ॥
एकभुक्तैश्च नक्तैश्च तथैवायाचितैरपि ।
उपवासैश्चतुर्भिश्च कृच्छ्रं षोडशभिर्दिनैः ॥
उष्णं जलं पयः सर्पिरेकैकञ्च त्र्यहं पिबेत् ।
वायुभक्षस्त्र्यहं तिष्ठेत्तप्तकृच्छ्रोऽयमुच्यते ॥
पलमेकं जलं पीत्वा पलमेकं तथा पयः ।
पलमेकं तथाज्यस्य मानमेतत्प्रकीर्तितम् ॥

एतत्तु त्रिगुणं प्रोक्तं महासान्तपनं स्मृतम्।
प्राजापत्यञ्च कृच्छ्रञ्च पराकस्त्रिगुणो महान्॥
पद्मोदुम्बरराजीवं विल्वपत्रं कुशोदकम्।
प्रत्येकं प्रत्यहं प्राश्य पर्णकृच्छ्रः प्रकीर्त्तितः॥
प्रत्येकं प्रत्यहं गव्यं सकृत् मुद्धे पयो दधि।
घृतं कुशोदकं पीत्वा उपवासश्च सप्तमः॥
एभिः समाशनैरुक्तं दिव्यं सान्तपनं द्विजैः।
सप्ताहेन तु कृच्छोऽयं मुनिभिः परिकीर्त्तितः॥
एतत्तु त्रिगुणं तज्ज्ञैर्महासान्तपनं स्मृतम्।
प्राजापत्यञ्च कृच्छ्रञ्च पराकस्त्रिगुणो महान्॥
एकभुक्तञ्च नक्तञ्च अयाचितविशेषणे।
पादकृच्छोऽयमुद्दिष्ट स्त्रिघ्नं प्राजापतिव्रतम्॥
अयमेवातिकृच्छ्रः स्यात्पाणिपूतान्नभोजनः।
कृच्छ्रातिकृच्छ्रपयसा दिवसानेकविंशतिम्॥
दिनैर्द्वादशभिः प्रोक्तः पराकः समुपोषितैः।
एकह्यद्व्यहादीनि नक्तञ्चैव यथा स्मृतम्॥
समश्नीय तिलपिण्याकं तक्रं तोयं कुशोदकान्।
पञ्चमे ह्युपवासः स्यात्सौम्यकृच्छोऽय मुच्यते॥
चान्द्रायणे च कृच्छ्रे च त्रिकालं स्नानमाचरेत्।
स्नानद्वयन्तु कर्त्तव्यं व्रतेष्वेवापरेषु च॥
शक्तिं ज्ञात्वा शरीरस्य स्नानं कार्य्यं तथा व्रतम्।
असामर्थ्येन कार्य्यञ्च याचं पर्षत्त्वनुग्रहम्।
ब्रह्मकूर्चं प्रवक्ष्यामि व्रताना मुत्तमं व्रतम्॥
कृतेन येन मुच्यन्ते प्राणिनः सर्व्वकिल्बिषैः।

नीलिकायास्तु गोमूत्रं कृष्णायाः सकृदुद्धरेत् ॥
पयश्च ताम्रवर्णायाः पीतायाश्च तथा दधि ।
कपिलायाः घृतञ्चैव महापातकनाशनम् ॥
अभावे सर्ववर्णानां कपिलायाः समुद्धरेत् ।
पलानि पञ्च मूत्रस्य अङ्गुष्ठार्धन्तु गोमयम् ॥
क्षीरं सप्तपलं ग्राह्यं दध्नः पलत्रयं तथा ।
घृतं चाष्टपलं ग्राह्यं पलमेकं कुशाम्भसः ॥
मन्त्रैः सर्वाणि चैतानि अभिमन्त्र्याथ मिश्रयेत् ।
गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् ॥
आप्यायस्वेति वै क्षीरं दधिक्राव्णस्तथा दधि ।
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ॥
निष्पन्नं पञ्चगव्यञ्च पात्रैः क्रमेण तत्पिवेत् ।
मध्यमेन पलाशस्य तत्पत्रेण पिवेद्द्विजः ॥
द्वितीयं पद्मपत्रेण ब्रह्मपत्रेण चापरम् ।
चतुर्थं ताम्रपत्रेण तत्पिवेद्व्रतकृद्द्विजः ॥
आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ।
उद्धृत्य प्रणवेणैव तत्पिवेत्प्रणवेन तु ॥
विष्णुं संस्नापयेद्भक्त्या पञ्चगव्येन चार्चयेत् ।
कूश्माण्डै र्जुहुयान्मन्त्रैः पञ्चगव्यं हुताशने ।
सव्याहृत्या च गायत्र्या तथैव प्रणवेन च ॥
ब्रह्मकूर्च्च मिदं प्रोक्तं व्रतं पञ्चदिनात्मकम् ।
पञ्चगव्यञ्च संप्राश्य पञ्चरात्रोपवासकृत् ॥
नक्तेन वासमश्नीयाद्यावच्छक्त्या दिनानि च ।
पश्चाद्दिक्रम्पारणकं व्रतस्यास्य प्रकीर्तितम् ॥

निर्दहेत्सर्वपापानि ब्रह्मकूर्च मिति स्मृतम् ॥
अन्ये वदन्ति कवयः उपवासं विना व्रतम् ॥
जप्यं होमंच कर्त्तव्यं देवतार्चनमेव च।
पञ्चगव्यञ्च होतव्यं पञ्चगव्यं समश्नीयात् ॥
ब्राह्मणान् भोजयेत्तावद्यावत्कुर्यादिदं व्रतम्।
यत्त्वगस्थिगतं पापं तिष्ठते पुरुषस्य च॥
ब्रह्मकूर्चो दहेत् सर्वं समिद्धाग्नि रिवेन्धनम्।

यानीह पापानि भवन्ति पुंसां दैवादकामादथ कामतोवा।
उक्तानि तेषां मुनिना व्रतानि शुद्ध्यर्थमेतान्यपराणि चैवम् ॥
धर्मार्थ मेतानि कृतानि पुंसां दद्युर्दिवौकस्त्व विमुक्तसिद्धिः।
अत्राप्यपूज्यत्वमशेषलोकैस्तेजःशरीरीति चरेन् गता भीः ॥
यस्यास्ति भीतिः पुरुषस्य पापात् इच्छेच्च कर्त्तुं त्वयमेनसाञ्च।
प्रीत्येव तं च व्रतदानजप्यं प्रोहिश्य मेतव्रतदन्यतस्तु ॥
वदन्ति दानं मुनयः प्रधानं कलौ युगे नान्यदिहास्ति किञ्चित्।
विशोधनं स्वर्गमिहापि पूज्यं वदामि तस्मादथ दानधर्मात् ॥

इति श्रीबृहत्पाराशरीये सुव्रत प्रायश्चित्तनिर्णयः सप्तमोऽध्यायः।

अष्टमोऽध्यायः।

दानानि विधिना सार्धं जगौ यानि पराशरः।
व्यासस्य तानि वक्ष्यामि श्रूयतां द्विजसत्तमाः! ॥
दानेन प्राप्यते स्वर्गो दानेन सुखमश्नुते।
इहामुत्र च दानेन पूज्यो भवति मानवः।

न दानात् परतो धर्मं स्त्रैलोक्ये सचराचरे ।
मुमुक्षवोऽपि योगीशा भिक्षादानोपजीविन: ॥
अन्नं तोयसमायुक्तं पृथगेते तथैव च ।
सर्वोपस्करसंयुक्तं गृहञ्च गृहमात्रकम् ॥
वृषादियुक्तसीरञ्च एकं वृषं तथैव च ।
गृह्याग्निना प्रदानेन गोप्रदानं तथैव च ।
सौरभेयीं द्विवक्त्राञ्च तिलधेनुमत:परम् ।
घृतधेनुं अम्बुधेनुं हेमधेनुं सविस्तरम् ॥
कृष्णाजिनप्रदानञ्च वाजिस्यन्दनमेव च ।
एकहस्तिप्रदानञ्च कन्यादानफलं तथा ॥
भूमिदानफलञ्चैव तुलापुरुषमेव च ।
हेमरूप्यप्रदानञ्च ननाकारादिसमन्वितम् ॥
त्रपुसीसकताम्रादिसर्वधातुप्रदानवत् ।
नक्षत्रतिथियोगेषु यद्यद्दानञ्च तत् फलम् ॥
विद्यादानं फलं तस्य प्रजादान मथैव च ।
अभयादिकदानानि प्रतिग्रहे यथाविधि ॥
इष्टापूर्त्तौ फलोपेतौ सर्वं विस्तरतो मया ।
शक्तिसूनाश्रुतं पूर्वं क्रमात्कथयत: शृणु ॥
गोहिरण्यादिदानानां सर्वेषामप्यनुत्तमम् ।
अन्नदानमपेक्षन्ते सर्वेऽपि हि दिवौकस: ।
अन्नार्थं मातरिश्वाह्यन्नार्थञ्च तथानल: ॥
अन्नार्थं सविता चैव खातिष्ठति भास्वति ।
अन्नकाम: ससर्जेदं विधिरप्यखिलं जगत् ॥
तस्मादन्नात्परं तत्त्वं न भूतं न भविष्यति ।

दद्यादन्नरहस्तस्मादन्नं विप्राय मानवः ॥
कृतं वा यदि वा चामं स स्वर्गे सुखमेधते ।
शोभनान् प्रभूतान् सर्वान् पक्वान्नपरिपूरितान् ॥
अपूपै रुदकाद्यैश्च दत्त्वा दिवं सुखं व्रजेत् ।
द्विजान् यः पाययेत्तोयं अन्यानपि पिपासितान् ॥
प्रपां तु कारयेद्ग्रीष्मे प्राप्नोति देवलोकताम् ।
षट् पात्राख्यादिकं दद्याद्वर्षासु च प्रतिश्रयम् ॥
पादाभ्यङ्गन्तथैवैधः शीते चावरणानि च ।
उपानत्पादुके चैव दत्त्वामानवाप्नुयात् ॥
सप्तव्रीहिसमायुक्तं सर्वस्नेहसमन्वितम् ।
सर्वोपस्करसंयुक्तं सर्वालङ्कारभूषितम् ॥
हिरण्यं गोवृषांश्चैव कुलिशाद्युपधानकैः ।
चारुस्त्रीभूषणैर्युक्तं सकांस्यं ताम्रभाजनम् ॥
कण्डण्यादिसमायुक्तं दद्यात्पात्राय मानवः ।
पक्वेष्टकाचितं कृत्वा सर्वलक्षणसंयुतम् ॥
हैरण्मयं वा तथा सद्यः कृत्वा चाश्ममयं तथा ।
दत्त्वा स्थान मवाप्नोति प्रजापतेरशंसयम् ॥
प्राकारा यत्र सौवर्णाः गृहाण्युच्चैस्तराणिच ।
माणिक्यगारुडैर्वज्रै र्मौक्तिकैर्भूषितानि च ॥
देवकन्यासहस्रेण स वृतो गीतनृत्यकैः ।
सेव्यमानोऽप्सरःसङ्घैः प्रजापतिसमं वसेत् ॥
अनड्वाहौ च धूर्वाहौ बलवन्तौ सुलक्षणौ ।
तरुणौ सविषाणौ च घण्टाभरणभूषितौ ॥
अदुष्टावेकवर्णौ तु शरीरौ दक्षिणान्वितौ ।

य आहूय द्विजाग्राय दद्याद्भक्त्या तु मानवः ॥
सोऽनडुद्रोमतुल्यानि स्वर्गे वर्षाणि तिष्ठति ।
अमरीभिर्वृतोऽजस्रं सेव्यमानश्च दैवतैः ॥
एकोऽपि हि वृषो देयो धूर्धरः शुभलक्षणः ।
अरोगश्चापरिक्लिष्टो यस्मात्स दशगोसमः ॥
एकेन दत्तेन वृषेण येन दत्ता भवेयुर्दश सौरभेयाः ।
आहेमपीताद् धरणीसमानात्तस्माद्वृषात् पूज्यतमोऽस्ति नान्यः ॥
धेनुदानं प्रवक्ष्यामि यथादेयं द्विजातिभिः ।
यो विधिर्दक्षिणायाश्च तथा सर्वं निबोधत ॥
एकरात्रोषितः स्नातो गोदाता पञ्चगव्यतः ।
पञ्चामृतेन संस्नाप्य संपूज्य मधुसूदनम् ॥
सवत्सां वस्त्रसंयुक्तां शतयज्ञोपवीतिनीम् ।
सुविषाणां सुरूपाञ्च सर्वलक्षणसंयुताम् ॥
हेमकल्पितशृङ्गाञ्च सुरूपां चरणाग्रकाम् ।
पयस्विनीं सुशीलाञ्च हिरण्योपरि संस्थिताम् ॥
हिरण्यं वाचयित्वाग्रे स द्विजायोपपादयेत् ।
प्राङ्मुखाय च विप्राय धेनुन्ताञ्च उदङ्मुखीम् ॥
इमां त्वं प्रतिगृह्णीष्व प्रीतोऽस्तु केशवो हरिः ।
इति दत्त्वोदकं हस्ते पादान्यष्टौ विसर्जयेत् ॥
व्यावर्त्तेत ततः पश्चात् प्रणम्य शिरसा द्विजम् ।
अनेन विधिना धेनुं यो विप्राय प्रयच्छति ॥
स विष्णुप्रीणनाद्याति विष्णुलोकमसंशयम् ।
आत्मनः पुरुषान् सप्त प्रागस्तान् सप्त सप्त च ॥
आत्मानं सप्तजन्मोत्थान् पापाद्विमुच्यते नरः ।

पदे पदे तु यज्ञः स्याद्गोर्वत्सस्य च मानवः॥
फलमाप्नोति विप्रेन्द्राः शुद्धा वै तत्पुरा हरेः।
सर्वकामसमृद्धात्मा सर्वलोकेषु पूजितः।
नाम्ना पापापहास्तावद्यावदिन्द्राश्चतुर्दश॥
इक्ष्वाकूणान्तथा चान्यैर्बहुधा वसुधाधिपैः॥
यैर्या नृभिरियं दत्ता जग्मुस्तेऽपिच विष्टपम्।
दीयमानं च पश्यन्ति ये भवन्त्यनुमोदकाः॥
तेऽपि पापविनिर्मुक्ताः विष्णुलोकमवाप्नुयुः।
पादद्वयं मुखं योन्यां प्रसवन्त्यां प्रदृश्यते॥
यदा च द्विमुखी गौः स्यात् देया यावन्न सूयते।
क्षौणीतुल्या तदा सा गौः सर्वैरुक्ता मुनीश्वरैः॥
सापि प्राग्विधिना देया सक्षाद्या दोहना द्विजाः!।
एकत पृथिवी सर्वा सशैलवनकानना॥
तस्या गौर्ज्यायसी साक्षादेकतोभयतोमुखी।
गोर्वत्सस्य च लोमानि यावत्संख्यानि सत्तमाः!॥
तावत्संख्यानि सर्वाणि ध्रुवं ब्रह्मजने वसेत्।
यश्चारोगामक्लिष्टाङ्गान्धेनुं वा यदि वा तनुम्॥
दद्यात् स्वर्गमवाप्नोति देया यथा तथाहि गौः।
तिलधेनुं प्रवक्ष्यामि प्रीणनाय हरेरिमाम्।
यया तुष्यति गोविन्दो दत्तया नु गवाऽनघः॥
ब्रह्महा स्वर्णहा गोघ्न पितृमातृसुहृद्वधात्।
अग्निदो गुरुहा चैव तथैव गुरुतल्पगः॥
सर्वपापसमायुक्तो युक्तो यश्चोपपातकैः।
सर्वैनोभिः प्रमुच्यन्ते तिलधेन्वा प्रदत्तया॥

अनुलिप्ते महीपृष्ठे वस्त्राजिनप्रसारिते ।
धर्मज्ञाः केचिदिच्छन्ति कुतपेच तिलाह्वरे ॥
प्रस्तीर्य चाविकं भूमौ तत्र कृष्णाजिनं पुनः ।
तिलांस्तु प्रक्षिपेत्तत्र कृष्णाद्रकचतुष्टयम् ॥
कुर्यादुत्तरतोऽभ्यर्णे आढकेन तु वत्सकम् ।
सर्वरत्नैरलङ्कुर्यात् सौरभेयीं सवत्सकाम् ॥
कार्ये हेममये शृङ्गे सास्ना सूत्रमयी तथा ।
ताम्रपृष्ठेक्षुपादाच कार्या मुक्ताफलेक्षणा ॥
प्रशस्तपत्रश्रवणा फलरत्नवती तथा ।
शुभस्वक्षयलाङ्गूली नवनीतस्तथान्वितः ॥
नारङ्गैर्वीजपूरैश्च जम्बीरैर्नारिकेलकैः ।
बदराम्रकपित्थैश्च मणिमुक्ताफलार्चिताम् ॥
सितवस्त्रयुगच्छन्नां सितच्छत्रसमन्विताम् ।
ईदृग्विधाञ्चा तां कुर्यात् श्रद्धया परयान्वितः ॥
कांश्यापदोहनां दद्यात् केशव । प्रीयतामिति ।
कुर्याद्धि दृष्टिवद्विद्वानिमां प्रत्युत्तरामुखीम् ॥
सम्यगुच्चार्य विधिना दत्त्वैनेन द्विजोत्तमः ।
सर्वपापैर्विनिर्मुक्तः पितरं स पितामहम् ॥
प्रपितामहन्तथा पूर्वं पुरुषाणां चतुष्टयम् ।
द्विजेन्द्रास्तारयन्त्ये तान्तिलधेनुप्रदा नरः ॥
यश्च गृह्णाति विधिवत् पुरुषान् सोऽपि तावतः ।
चतुर्दश तथा येच दद्भुतश्चानुमोदिकः ॥
दीयमानञ्च पश्यन्ति तिलधेनुञ्च ये नराः ।
शृण्वन्ति येच तां भक्त्या परया नाम तद्भवाः ।

तेऽप्यशेषाघनिर्मुक्ताः प्रयान्ति विष्णुलोकताम् ॥
अशान्ताय सुशीलाय तथा मत्सरिणे बुधः ।
तिलधेनुं नरो दद्याद् दस्मात्तत्र धार्मिके ॥
त्रिरात्रं यस्तिलाधारस्तिलधेनुं प्रयच्छति ।
तथैकरात्रन्तु पुनस्तिलानत्ति सभक्तिकः ॥
दातुर्विशुद्धपापस्य तस्य पुण्यवतो द्विजः ।
चान्द्रायणादप्यधिकं शस्तं तत्तिलभक्षणम् ।
एवं प्रतिगृह्णीतापि आदत्ते विधिना द्विजः ॥
स तारयति दातारं आत्मानञ्च न संशयः ।
प्रतिग्रहन्तु दीप्ताग्निदग्धविप्रमुखेरिताः ॥
न स्फुरन्तीह मन्त्राश्च जपहोमादिकेषु च ।
तदा न दीयते तस्य न तं कर्मणि योजयेत् ॥
निष्फलं तत्कृतं कर्म हतस्यौषधदानवत् ।
अथातः संप्रवक्ष्यामि घृतधेनुमपि द्विज ! ।
येन सा विधिना देया तां प्रवक्ष्याम्यतः शृणु ॥
वदामि धेनुं घृतकल्पितां यो विधिश्च यैवै निचयैः प्रकल्प्या ।
फलं प्रदाने मनुजस्य यस्मात् कृपाच पातन्त्वनुपर्वं यत्र ॥
गोक्षीरसर्पिर्मधुखण्डदध्ना संस्थाप्य विष्णुं शुभवारिणाच ।
संपूज्य पुष्पैश्च विलेप्य गन्धैर्दद्यान्निवेद्यञ्च सधूपदीपम् ॥
घृतञ्च वह्निर्घृतमेव सोमो घृतञ्च सूर्य्यो घृतमेव चाम्भः ।
प्रदेहि तस्मात् घृतमेव विद्वन् ! घृते प्रदत्ते सकलं प्रदत्तम् ॥
घृतेन गव्येन तु पूर्णकुम्भं प्रकल्पयेत गौः करकञ्च वत्सः ॥
हिरण्यगर्भां मणिरत्नशोभां तुरुष्ककर्पूरसुचारुनासम् ॥

शृङ्गे च कृष्णागुरुदारवे च सौवर्णनेत्रे पटसूत्रसास्ना ।
क्षौमञ्च पुच्छं गुडदुग्धवक्त्रं जिह्वाच तस्या वरशर्करायाः ॥

द्राक्षोत्थैश्च हि खर्जूरैरन्यैः स्वादुफलैरपि ।
उरस्तस्याः प्रकर्त्तव्यं पृष्ठन्ताम्रञ्च धीमता ॥

इक्षुयष्टिमयाः पादाः शफा रौप्यमयास्तथा ।
धान्यैश्च सप्तभिः पार्श्वौ लोमानि सितसर्षपैः ॥

कांस्यदोहाच कर्त्तव्या सितवस्त्रच्छदा तथा ।
शितच्छत्रसमायुक्ता सितचामरभूषिता ॥

सितयज्ञोपवीता च सितस्रग्दाम भूषिता ।
वत्सस्य कुर्य्यादिति सङ्गतानि प्रोक्तानि सर्वाण्यपि यानि धेनोः ।
अङ्गानि सर्वाणि च तद्वदस्य छत्रं सवस्त्रं च तथैव विप्र ? ॥
गृहाण चैनां मम पापहृत्यै दुस्तारसंसारपयोधिपोतः ॥
संसारतारो भुवि भूमिदेव ! स्वर्गं प्रदेहि त्वम विप्रराज ! ।
विष्णुः सुरेशो घृतरश्मिरस्याः प्रीतोऽस्तु दानेन वरं प्रदातुः ॥
व्याहृत्य चैतन्निजहस्ततोयं दत्त्वा नमस्तेति च वाग्विधेया ।
दाता द्विजेनात्र तु पूर्वमुक्तं संप्राप्य सर्पिर्व्रतमात्मशुध्यै ॥
कार्य्यं प्रमुक्तोऽखिलकिल्बिषैस्तु प्राप्नोति लोकान् घृतदुग्धदिग्धान् ॥

घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ।
तेषु लोकेषु विप्रेश ! सुपुण्येषु प्रजायते ॥

पितुरूर्ध्वन्तु ये सप्तपुरुषास्तस्य येऽप्यधः ।
तांस्तेषु द्विजलोकेषु स नयंस्त्यक्तकिल्बिषः ॥

स कामाबाप्तियं दृष्टिः कथिता तव सत्तम ! ।
विष्णुलोकं नरा यान्ति निष्कामाः घृतधेनुदाः ॥

जलधेनुं प्रव भि प्रीतये दत्तया यया ।

देवदेवो हृषीकेशः सर्वगः सर्वभावनः॥
जलधेनुं द्विजश्रेष्ठ! सम्पूर्णरजतस्थितम् ॥
रत्नगर्भमशेषैस्तु ग्रामैर्वन्यैः समन्वितम्।
सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम्॥
कुष्ठमांसीसुरोशीर बालकामलकैर्युतम्।
प्रियङ्गुपत्रसंयुक्तं सितयज्ञोपवीतिनम्॥
सोपानत्कञ्च सच्छत्रं दर्भविष्टरसंस्थितम्।
चतुर्भिः संवृतं पात्रै स्तिल पूर्णैश्चतुर्दिशम्॥
स्थगितं दधि पात्रेण घृतक्षौद्रवता मुखे।
उपोषितः समभ्यर्च्च वासुदेवं सुरेश्वरम्॥
पुष्पधूपोपहारैश्च यथा विभवसम्भवम्।
संकल्प्य जलधेनुञ्च समभ्यर्च्च जनार्दनम्॥
पूजयेद्वत्सकं तद्वत् कृतञ्जलमयं बुधः।
अत्रोचुरपरे केचित् पूजयेत् घृतवत्सकम्।
पञ्चांशेन तु कुम्भस्य चतुर्थांशेन वा परे।
एवं संपूज्य गोविन्दं जलधेनुं सवत्सकाम्॥
सितवस्त्रधरः शान्तो वीतरागो विमत्सरः।
दद्याद्विप्राय विप्रेन्द्र! प्रीत्यर्थं जलशायिनः॥
जलशायी जगद्योनिः प्रियतां मम केशवः।
इति चोच्चार्य्य विप्रेन्द्रो विप्राय प्रतिपादयेत्॥
अपक्वाशनिना स्थेयं अहोरात्र मतः परम्।
अनेन विधिना दत्त्वा जलधेनुं द्विजोत्तम!॥
सर्वराज्य मवाप्नोति यत् यत् ध्यायेत् स मानवः।
शरीरारोग्य माढ्यत्वं प्रशमः सर्वकामिकः॥

दृथां भवति दत्तायां जलधेन्वां न संशयः ।
इमामपि प्रशंसन्ति जलधेनुं द्विजोत्तम ! ॥
ये नरास्तेन वै यान्ति विष्णुलोक मसंशयम् ।
हेमाज्याभ्यस्तिलैर्विद्वन् ! यद्यपि गो प्रकल्पिताम् ॥
भक्त्यास्तु ते तथाप्येवं धर्मशास्त्रमतोद्विज ! ।
अथातः संप्रवक्ष्यामि दानानामुत्तमं परम् ॥
यद्दत्त्वा मानवो याति सायुज्यं परवेधसः ।
धेनुर्देया सुवर्णस्य कारयित्वा द्विजातये ॥
यान्दत्त्वा प्राक्महीपालाः ब्रह्मणः सहशङ्कराः ।
सा चतुर्भि स्त्रिभिर्वाप्यष्टद्ववर्णपलै र्द्विजः ॥
द्वाभ्यां वापि पलाभ्यान्तु पलेनैकेन वा पुनः ।
हीनं तु नैव कर्त्तव्यं सत्यां सम्पदि स द्विजः ॥
हीनन्तु कुर्वतो दानं दातुस्तु निष्फलं भवेत् ।
चतुर्थांशेन धेन्वास्तु हेमवत्सं प्रकल्पयेत् ॥
सर्वरत्नैरलङ्कुर्य्याद्दत्त्वमाणक्रमणे तु ।
राजतं वत्सकं कुर्य्याद्ब्रूयुरन्ये च तद्विदः ॥
अलङ्काराश्च सर्वेऽपि गोवद्रत्नैः प्रकल्पयेत् ।
सकाशाद्वासुदेवस्य सुशालायां युधिष्ठिरः ॥
दत्त्वा प्राप्तो हरेर्लोकं सा मयेयमुदीरिता ।
मुक्ताफलशफा कार्या प्रबालकविषाणका ॥
पद्मरागाक्षियुग्मा च घृतपात्रस्तनान्विता ।
कर्पूरागुरुनासाच शर्करारसना तथा ॥
सुष्ठुदृग् युग्मपार्श्वाच क्षौमसास्नावती तथा ।
दूर्व्वादिगुड़जानुश्च पञ्चगव्य मपानकम् ॥

नारीकेलैश्च कर्त्तव्यौ कर्णौ पृष्ठञ्च कांस्यकम् ।
सप्तरत् त्नलाङ्गूल सप्तधान्यसमावृता ॥
फलपुष्पोपसंपन्ना च्छत्रोपानत्समन्विता ।
सुवर्णधेनुः कार्या च विप्राय प्रतिपादयेत् ॥
अश्वमेधसहस्रस्य दत्त्वा फलमवाप्नुयात् ।
कुलानां हि सहस्रन्तु स्वर्गं नयत्यसंशयः ॥
किमन्यैर्बहुभिर्दानै रत्नहेमगवाऽनया ।
हेमधेनुप्रदानेन कृतकृत्यो हि वर्त्तते ॥
हिरण्यगर्भो भगवान् प्रीयतामिति कीर्त्तयेत् ।
उपवासी विशुद्धात्मा दत्त्वा सोमरविग्रहे ॥
दीयमानञ्च पश्यन्ति ये नरा हेमगामिमाम् ।
रक्षोभूतपिशाचाद्या स्तो नश्यन्ति सद्द्विज ! ॥
एता मयोक्तास्तव वत्स! सर्वा इष्टादिका तपारतोऽत्र गावः।
इक्ष्वाकुभूभृत्प्रभृति क्षितीशा ऊचुर्दिवं [illegible] विधिवत् प्रदाय ।
कृष्णाजिनस्य दानस्य प्रवक्ष्यामि यथाविधिम् ॥
प्रमाणञ्च विधिर्यस्य यस्मै विप्राय दीयते ।
वैशाख्यां पूर्णिमायाञ्च कार्त्तिक्या मथवाऽपि वा ।
एतयोस्तु प्रदातव्यं रविसोमग्रहेऽपि च ॥
अक्लिष्टमच्छिद्रमलोकमश्च सप्राणरन्ध्रं सशफं सशोफम् ।
साण्डं प्रदेशं सविषाणवक्त्रं शस्तं प्रदाने सित कृष्णचर्म।
एतमेव विधं चर्म गृहीत्वा द्विजपावनम् ।
कल्पयेद्धेनुवत्तच्च हेमशृङ्गादिकं पुनः ।
शृङ्गे हेममये तस्य शफांश्च रजतस्य च ॥
मुक्ताफलैश्च लाङ्गूलं कुर्य्यात् शास्त्रं विवर्जयेत् ।

अनुलिप्ते महीपृष्ठे प्रस्तृते कुतपेऽंशुके ॥
तत्र प्रसारयेन्मार्गं तिलैस्तदपि पूरयेत् ।
वदन्ति तद्विदश्चैव चतुर्द्रोणांस्तु पूरयेत् ।
नाभिपुन्मात्रकं कुर्य्यादपरे कवयोविदुः॥
नाभिमात्रं वदन्त्यन्ये राशिं कुर्यादिति द्विजः ।
हेमनाभञ्च तं कुर्यात् हेमकर्षेण तु द्विजः ॥
शक्त्या वापि प्रकर्त्तव्यं मनः शुद्धिर्यथा भवेत् ।
सौवर्णंक्षीरपूर्णन्तु प्राज्यपादौ च दापयेत् ॥
राजतं दधिपूर्णन्तु यथा दक्षिणतो द्विजः ।
ताम्रमाज्यभृतं पात्रं पश्चिमस्यां तथादिशि ॥
क्षौद्रपूर्णं तथा कांस्यं चतुर्दिक्षु क्रमेण तु ।
शक्त्या वापि च कर्त्तव्यं वित्तशाठ्यं विवर्जयेत् ॥
तद्दद्याद्द [illegible]दुषे ब्राह्मणायाहिताग्नये ।
परिधाप्या[illegible] ते वस्त्रे अलङ्कृत्य च भूषणैः ॥
चतस्रो दृष्टयः कार्य्या इत्यन्ये कवयो विदुः ।
वदन्ति कवयो गाथां मार्गमाहात्म्यवेदिनः ॥
न सा विद्वांश्च वि[illegible]ांसः पुराणार्थविदोऽपरे ।
यस्तु कृष्णाजिनं दद्यात् सखुरं शृगसंयुतम् ॥
तिलैः प्रच्छाद्य वासोभिः सर्वरत्नैरलङ्कृतम् ।
ससमुद्रगुहान्तेन सशैलवनकानना ॥
चतुरन्ताम्भ संयुक्ता पृथिवी नात्र संशयः ।
कृष्णाजिने तिलान् दत्त्वा हिरण्यमधुसर्पिषा ॥
ददाति यस्तु विप्राय सर्वन्तरति दुष्कृतम् ।
यः कृष्णाजिनमास्तीर्य हेमरत्नयुतैस्तिलैः ॥

वस्त्राद्दतं सोपवासो विष्णोरापत्तनोस्तथा।
वैशाख्यां पूर्णिमायाञ्च कार्त्तिक्यां वा समाहितः।
दद्याद्व्रततपोयुक्ते ब्राह्मणे च जितेन्द्रिये॥
शान्तानीके वाह्निताग्नौ प्रदद्याद्भूरिदक्षिणाम्।
यावन्त्यजिनलोमानि तिलाः वस्त्रस्य तन्तवः॥
तावन्त्यब्दसहस्राणि दाता विष्णुपुरे वसेत्।
विशेषमपरे ब्रूयुर्विषुवायनयोर्द्वयोः॥
तदन्नणवह्निर्लोम प्रग्रीवं तु प्रसारयेत्।
चतसृषु तथा दिक्षु सौवर्णराजतानि च॥
निधाय शक्त्या पात्राणि क्षीराद्यैः पूरितानि च।
तस्याः पश्चात् समिद्धाग्निं परिसंमृज्य तं पुनः॥
पर्युक्ष्य च परिस्तीर्य महाव्याहृतिभिस्ततः।
सद्यो हुत्वातिलांस्तत्र विप्राय प्रतिपादयेत्॥
नाभिं स्पृशन्नदीतीर्यं मार्गं गृह्णास्यहं त्विदम्।
धीमान्दद्याद्द्विजेन्द्राय वाचयित्वा प्रतिग्रहम्॥
पश्चाद्वस्त्रादिकं दद्यात् एष प्रतिग्रहे स्थितः।
मया गीतांप्यथो गाथा मुदाहरन्ति तद्विदः॥
दातॄणां सत्तमानान्तु विशेषप्रतिपत्तये।
गोभूहिरण्यसंयुक्तमार्गमेकं ददाति यः॥
स सर्वपापकर्मापि सायुज्यं ब्रह्मणो व्रजेत्।
प्रोक्तेन चैतेन मुनीशमार्गं दद्याद्द्विजेन्द्रे विधिना प्रयुक्तम्।
पापानि हत्वा स पुरातनानि यायात्स वेधोवपुषा च योगी॥
सुखासनञ्च यो दद्यात् जापकाख्य मथोत्तमम्।
देवयानैर्दिवं यान्ति स्तूयमानैः स दैवतैः॥

यं रथं हयसंयुक्तं हेमपुष्पैरलङ्कृतम् ।
कृतरज्जुञ्च पादाद्यै र्नेत्रपादकृतैरपि ॥
तत्सर्वं स्थगितं वस्त्रैः परिपट्टालकैः शुभैः ।
मुक्ताफलै स्तथानेकै र्मणिभिश्चोपशोभितम् ॥
अग्रे चैव शुभे वस्त्रे भूषितावत्यलङ्कृतम् ।
तद्भूषणैरलङ्कृत्य सुखयन्त्रसुशोभितौ ॥
सपर्याणौ कशायुक्तौ ग्रीवाभरणभूषितौ ।
शुभलक्षणसंयुक्तौ तरुणौ तत्र योजयेत् ॥
रविसोमग्रहे दद्याच्छुभवान् यत्र कर्मणि ।
अयनयोर्वा द्विजाग्र्याय स प्राप्नोत्यर्कलोकताम् ॥
वसेद्दिवि समन्तत्र सेव्यमानः स दैवतैः ।
एकमपि हि यं दद्यात् सर्वालङ्कारभूषितम् ॥
स लब्ध्वा सुवर्णञ्च सोऽश्वलोक मवाप्नुयात् ।
दद्यादश्वरथं यस्तु हेमरत्नविभूषितम् ॥
दिव्यवस्त्रपरिच्छन्नं नेत्रपट्टादिभिः शुभैः ।
सौवर्णैरर्धचन्द्रैश्च राजतैर्वा विभूषितम् ॥
शुभैर्मुक्ताफलैरन्यै र्नीलवस्त्रादिभि स्तथा ।
गजौ सुलक्षणोपेतौ सुशीलौ निरुजावपि ॥
सुरदानौ सुरूपौ च हेमालङ्कारभूषितौ ।
दिव्यवस्त्रैः परिच्छिन्नौ कर्णशाखावलम्बिनौ ॥
पटिनेत्रादिकाद्यौ तौ विशिष्टमणिभूषितौ ।
ईदृग्रथञ्च संयोज्य पताकाभि र्विभूषितम् ॥
शोभितं पुष्पमालाभिः शङ्खदुन्दुभिनिःस्वनैः ।
चतुर्वेदाय विप्राय त्रिवेदाय तथा पुनः ॥

शुचये च द्विवेदाय श्रोत्रियाय कृतेष्टये ।
अलङ्कृत्य स मालाभि रङ्गुलीयसुवाससी ॥
तस्य हस्तोदकं दद्यात् प्रीयतां केशवस्त्विति ।
एवं हस्तिरथं दद्यात् समभ्यर्च्य द्विजातये ॥
निहत्य सर्वपापानि विष्णुलोके महीयते ।
वसेच्चतुर्भुजस्तत्र सेव्यमानश्चतुर्भुजैः ॥
अनन्तकाले स तिष्ठेच्छङ्खचक्रगदाधरः ।
पश्यन्तीह रथं ये तु दीयमानं नरा द्विज ! ॥
तेऽपि विष्णुपुरं यान्ति वाशिष्टस्य वचो यथा ।
एकेनैऽपि कृपो दद्याद्धस्तिनञ्च स भूषणम् ॥
सवस्त्रं हेमरदनं नखे रजतकल्पितैः ।
मणिमुक्ताफलैर्युक्तं सुवर्णरजतान्वितम् ॥
पूर्वोक्ताय च विप्राय चतुर्वेदाय वा द्विजः ।
दद्याच्च विधिवत् सोऽपि सदा विष्णुपुरं वसेत् ॥
विधिवद्यश्च गृह्णाति सर्वमपि प्रतिग्रहम् ।
दातृलोकमवाप्नोति पराशरवचो यथा ॥
अलङ्कृत्य तु यः कन्यां ब्राह्मे ह्यद्वाहेन यच्छति ।
अन्योद्वाहेन केनापि हस्तिदानशतं लभेत् ॥
हस्तिदानस्य यत् पुण्यं तस्माच्छतगुणं फलम् ।
कन्यादा विधिवत्सर्वे प्राप्नुवन्ति ह्यसंशयम् ॥
पुत्रदानं समिच्छन्ति योविद्वान् स मनीषिणः ।
कन्यान्तस्तेऽपि मन्यन्ते पुत्रदानशतं वरम् ॥
भूमिं शस्यवतीन्दद्याद्यस्तु विप्राय मानवः ।
स भुक्तभुक्ततुल्यस्तु विष्णुलोके समावसेत् ॥

योगे चर्मप्रमाणेच भूमिं दद्याद्द्विजातये।
स विष्णुलोकमाप्नोति केचिद्दूचर्मनीषिणः॥
षड्भिस्तु प्रहिता विप्रा वंशास्तूभयतो द्विजः।
तेनैव द्विगुणानाङ्करिति केचिन्निवर्त्तनम्॥
पञ्चहस्तकदण्डानां चत्वारिंशद् दशाहत।
पञ्चभिर्गुणिता सा तु निवर्तनमिति स्मृतम्॥
बालवत्सकधेनूनां सहस्रं यत्र तिष्ठति।
तद्वै निवर्तनं ज्ञेयं इति केचिद्वदन्ति हि॥
ताम्रपट्टे पटे वापि लेखयित्वा च शासनम्।
ग्रामं विप्राय वा दद्याद्दशसीरक्षितिं पुनः॥
सीरस्यैकस्य वा दद्यात्तस्य पुण्यं किमुच्यते।
भूम्यंशु कणिकातुल्याः समा विष्णुपुरे वसेत्॥
भूमिदानात्परो धर्मो त्रैलोक्येऽपि न विद्यते।
पादैकमात्रदानेन तस्य विष्णुपुरे स्थितिः॥
तस्य दानात्परो धर्मस्तद्वृत्तेश्च त्रयन्तया।
तस्मात्तां यत्नतो दद्याद्धरणञ्च विवर्जयेत्॥
इहैव भूमिदानस्य प्रत्यक्षं चिह्नमीर्य्यते।
क्षितिदः स्वर्गतो भ्रष्टः क्षितिनाथः पुनर्भवेत्।
भुनक्ति च पुनर्भोगो यथा दिवि तथा भुवि।
गजैरश्वैर्नरैर्युक्तो हेमरत्नविभूषितः॥
वरस्त्रीगणसंसेव्यः स्तूयमानः स्वबन्धुभिः।
छत्रालङ्कारसंयुक्तो वस्त्रवाद्योत्सवादिभिः॥
इत्यादि भूमिदानस्य चिह्नन्ते वत्स! कीर्तितम्।
वित्तेनापि हि यः क्रीत्वा भूमिं विप्राय यच्छति।

यावत्तिष्ठति सा भूमिस्तावत् स्वर्गे महीयते।
गृहभूमिञ्च यो दद्याद्दद्याद्दाखममात्वकाम्॥
गृहस्योपस्करन्दद्याद्गृहदानफलं लभेत्।
कियन्मात्वञ्च यो दद्याद्भूमिं विप्राय मानवः॥
तस्यापि हि महापुण्यन्दद्यादङ्गुलमात्रकम्।
नैतस्मात्परमं दानं क्वियदस्ति धरातले॥
पुण्यफलं प्रवक्ष्यामि विशेषेण तु तत् शृणु।
हैमानि यत्र मानानि मणिभिर्भूषितानि च॥
प्राकारा तत्र सौवर्णाश्चतुर्द्वाराः सुतोरणाः।
दिव्याश्चाप्सरसो यत्र तासां सङ्ख्या ह्यनेकशः॥
सुपर्व्वाणौ कसायुक्तौ ग्रीवाभरणभूषितौ।
दृष्ट्वा याः कामदेवोऽपि नचेत्कामातुरः क्षणात्।
सुकेशाः सुललाटास्ता बालचन्द्रोपमभ्रुवः॥
सुनासाकर्णगण्डाश्च शुभोष्ठाधरपल्लवाः।
सुग्रीवा भुजपाल्यग्राः पीनोत्तुङ्गस्तनास्तथा॥
सुमध्योरुनितम्बाश्च सुश्रोण्यश्च शुभोरुकाः।
सुजानुजङ्घागुल्फाश्च सुपादाः सुनखास्तथा॥
केन रूपेण ता वर्ण्या भवन्त्यप्सरसा द्विजाः।
वैष्णवाः गणिकाः सर्वाः दिव्यस्रग्वस्त्रभूषणाः॥
दिव्यानुलेपलिप्ताङ्गा दिव्यालङ्कारभूषिताः।
मन्मथोऽपि हि तान् दृष्ट्वा भवेत्कामातुरः क्षणात्॥
वर्ण्यन्ते ताः कथं देव्यो या लक्ष्मीप्रतिमोपमाः।
वैष्णवाप्सरसां सङ्घैर्वेष्टिताश्चामरारिभिः।
गीयमानश्च गन्धर्वैः स्तूयमानश्च दैवतैः॥

वसेन्विष्णुपुरे तावद्यावत् विष्णुरजः क्षितौ ।
पुण्यं वै भूमिदानस्य कथितन्तव वत्सक ! ॥
मोक्तुर्धरित्री कुलपर्वताश्च पाथोऽर्णवः स्वर्गतलादिकादिः ।
देयानि सर्वाणिच सर्वकामैः प्रोक्तानि दानानि पुरावदद्भिः ॥
आत्मतुल्यं सुवर्णस्य रजतं द्रव्यमेव च ।
यो ददाति द्विजाग्रेभ्योस्तस्याप्येतत् फलं भवेत् ॥
ब्रह्महत्यादिपापैस्तु यदि युक्तो भवेन्नरः ।
स तत्पापविनिर्मुक्त प्रोक्ते विष्णुपुरे व्रजेत् ॥
तुलापुरुषभूम्यो च दीयमानौ च ये नराः ।
पश्यन्ति तेऽपि यान्त्येव येच स्युरनुमोदकाः ॥
गुडं वा यदि वा खण्डं लवणञ्चापि तोलितम् ।
यो ददात्यात्मना तुल्यं नारी वा पुरुषोऽपि वा ॥
पुमान् प्रद्युम्नवत्स ! स्यान्नारी स्यात्पार्वतीसमा ।
सौभाग्यरूपसंयुक्ते भुञ्जीतान्ते त्रिविष्टपम् ॥
हिरण्यदक्षिणायुक्तं सवस्त्रं भूषणान्वितम् ।
अलङ्कृत्य द्विजाग्रान्तं परिधाप्य च वाससी ।
खण्डादितोलितं पश्चाद्विप्राय प्रतिपादयेत् ।
सर्वकामसमृद्धात्माऽनन्तकालं वसेद्दिवि ॥
उष्ट्रं खराजं महिषञ्च मेषं अश्वान् करेणुं महिषीमजांश्च ।
ब्रूयुः खरोष्ट्री मविकां मुनीन्द्रा ! हेमादियुक्तं सकलञ्च दानम् ॥
वराणि रत्नानि च हैमरूप्य शुभानि वासांसि च कांस्यताम्रे ।
उपाधिमात्रं करभादि कृत्वा हेमादिदानं द्विज ! दीयते हि ॥
केचिद्वदन्ति चैतानि कृत्वा हेममयानि च ।
सर्वोपस्करयुक्तानि देयानि हेमधेनुवत् ॥

अर्चयित्वा हृषीकेशं पुण्येऽह्नि विधिपूर्वकम् ।
अग्निशुद्धं सुवर्णञ्च विप्रमाहूय यच्छति ॥
स मुक्त्वा विष्णुलोकन्तु यदा गच्छति संसृतौ ।
तदाऽसौ तेन पुण्येन धनयुक्तो द्विजो भवेत् ॥
यो रौप्यमुत्तमं दद्यादर्थिने ब्राह्मणाय च ।
सोऽतीवधनसंयुक्तो रूपयुक्तश्च जायते ॥
माणिक्यानि विचित्राणि नानानामानि यो नरः ।
तथा ताम्रञ्च कांस्यञ्च त्रपुं वा सीसकादि वा ॥
यो दद्याद्भक्तितो विप्रे स सोमलोकमवाप्नुयात् ।
सम्पूज्य सततं लोकं रूपवानिह जायते ।
घृतं ददाति यो विप्रे सोऽत्यन्तं सुखमश्नुते ॥
भोजनाभ्यञ्जनार्थं वा भवेत्सोऽपि सुखी नरः ।
तैलप्रदानेन सततं भोजनाभ्यञ्जनाय च ॥
स्निग्धदेहोऽपि तेजस्वी रूपयुक्तश्च जायते ।
मृदङ्गञ्च सकर्पूरं तुरुष्कं चन्दनादिकम् ॥
गन्धद्रव्याणि दत्त्वा तु शुभगन्धः प्रजायते ।
ताम्बूलं पुष्पमालाञ्च पुष्पालङ्करणानि च ॥
सुमतिर्वीर्य्यवांश्चैव धनयुक्तश्च जायते ।
शिशिरर्त्तौ च यो दद्यादनलं सैन्धनं नरः ॥
स समिद्धोदराग्निः सन् प्रज्ञास्वास्थ्ययुतो भवेत् ।
यो दद्याद्ब्राह्मणेभ्यश्च नित्यं मेधांसि मानवः ॥
श्रियायुक्तो भवेदत्र संग्रामे चापराजितः ।
किञ्च वा बहुनोक्तेन दानस्य विस्तरेण च ॥
यद्यदिष्टतमन्तस्य तत्तस्मै प्रतिवादयेत् ।

तिलान् दर्भांश्च नित्यार्थं तृणान्यास्तरणाय च ॥
भुक्त्वा स तु सुखं स्वर्गे जातश्चात्र भवेद्भुवि ।
गुडमिक्षुरसञ्चखण्डं दुग्धखर्ज्जूरसाधकान् ॥
फलानि दत्त्वा सर्वाणि स्वादूनि मधुराणि च ।
सर्वाणि फलशाकानि लवणानि तथा द्विज ! ॥
स्थाप्यानि गृहपात्राणि शुभगोत्रो भवेन्नरः ।
कूष्माण्डन्त्रपुषं दत्त्वा वृन्ताकादिपटोलकान् ॥
शुभानि कन्दमूलानि सुहृष्टः पुत्रवान् भवेत् ।
वदराम्रकपित्थानि खर्जूरदाड़िमानि च ॥
चिञ्चाश्चामलकं दत्त्वा पुत्रवानिह जायते ।
या नारी द्विज ! चैतानि द्विजे भक्त्योपपादयेत् ॥
सर्वं तस्य भवेत्तद्धि धेनुदानसमन्वितम् ।
भोजनाच्छादनं दत्त्वा दत्त्वा चोपानहौ द्विजः ॥
स्वर्गलोकन्तु सम्भुज्य सर्वकामोऽत्र जायते ।
याः पुण्यनार्यश्च सकामिपुंसां कामोपभुक्त्यै निजदेहदाः स्युः ।
गीर्वाणचेतोहररूपवत्यः पौरन्दरास्ता गणिका भवन्ति ॥
गृहं वा मणिकां वापि शयनासनविष्टपम् ।
दत्त्वा च कश्चिपं विद्वान् विप्रान् यः पाठयेन्नरः ॥
धरादानादिकं व्यास विद्यादानं शताधिकम् ।
विद्यार्थिनाञ्च विप्राणां पादाभ्यङ्ग मुपानहौ ॥
यो ददाति द्विजश्रेष्ठ ! ब्रह्मलोकं स गच्छति ।
आदावारभ्य वेदांस्तु शास्त्रं वाच्यतमं द्विजः ! ॥
अध्यापयेत् द्विजान् शिष्यान्विद्यादानं तदुच्यते ।
उपाध्यायं निवेश्याग्रे तस्य कृत्वा च वर्तनम् ॥

विद्यां भक्त्या प्रयच्छेद्यः परब्रह्मण्यसौ विशेत् ।
विद्यार्थिनेऽथ विप्राय यो दद्याद्भोजनं द्विजः ॥
पादाभ्यङ्गं तथा स्नानं सोऽपि दानाग्रभाग् भवेत् ।
यः स्वयं पाठयेद्विप्रान् स्नात्वा भक्त्या च स द्विजः ॥
सात्मा ब्रह्ममभ्येति नागपृष्ठञ्च संहृतौ ।
ऋचं वा यदि वार्द्धं च पादं पादार्द्धमेव च ॥
अध्यापयति तस्यापि नास्ति शिष्यस्य निष्कृतिः ।
मन्त्ररूपं द्विजो दद्यादेकमपि शुभाक्षरम् ।
तस्य दानस्य वै शिष्यो न कर्त्तुं निष्कृतिं क्षमः ॥
यद्विप्र ! शिष्यप्रतिपादितेन विद्याप्रदानेन न तुल्यमस्ति ।
नूनं धरित्र्यामविनाशि किञ्चित् तस्मात्प्रदेयं तु तदेव विद्वन् ! ॥
रोगार्त्तस्यौषधं पथ्यं यो ददाति नरस्य तु ।
अन्यस्यापि च कस्यापि प्राणदः स तु मानवः ॥
किन्नरैर्भूषणैर्दत्तैर्गोभिर्वासोभिरेव च ।
आदत्ते प्राणहीनेन प्राणदानमतः परम् ॥
अन्नं प्राणो जलं प्राणः प्राणस्त्वौषधमुच्यते ।
तस्मादौषधदानेन दाता सुरसमो द्विज ! ॥
प्राणदानं हि यो दद्यात्सर्वेषामपि देहिनाम् ।
स याति परमं स्थानं यत्र देवश्चतुर्भुजः ॥
यो दद्यान्मधुरां वाचमाश्वासनकराश्चितम् ।
रोगक्षुधादिनार्त्तस्य स गोमेधफलं लभेत् ॥
क्लीबान्धबधिरादीनां रोगार्त्तानां शरीरिणाम् ।
यत्किञ्चिद्दीयते तेषां यद्दानं तदुच्यते ॥
ये यच्छन्ति दयादानं कृत्वा दीनदयां नरः ।

तेऽपि तद्दानधर्मेण विष्णुलोकमवाप्नुयात् ॥
अथान्यत्सम्प्रवक्ष्यामि तिथिमासगतं द्विज ! ।
यत्प्रदाने मुनिश्रेष्ठ ! विशिष्टं फलमिष्यते ॥
मासे मार्गशिरे दान पूर्णचन्द्रतिथौ नरः ।
विधीनथ प्रवक्ष्यामि यत्प्रदानं महत् फलम् ॥
कांस्यपात्रमक्लिष्टन्तु लवणं प्रस्थपूरितम् ।
हिरण्यनाभं वस्त्रेण कुसुम्भेन च च्छादितम् ।
स्नाताचान्ताय विप्राय सवस्त्रं प्रतिपाद्य च ।
सौभाग्यरूपलावण्ययुक्तो भवति मानवः ॥
गौरसर्षपयुक्तेन पौष्यामुत्सादितो नरः ।
स पुनरभिषेक्तव्यः कुम्भेन हव्यसर्पिषा ॥
सर्वगन्धोदकैस्तोयैः फलरत्नसमन्वितैः ।
सुवर्णप्रमुखं दृष्ट्वा प्रदद्यात्तु द्विजातये ॥
घृतेन स्नापयेद्विष्णुं भक्त्या सम्पूज्ययेद्धरिम् ।
घृतञ्च जुहुयाद्वह्नौ घृतं दद्याद् द्विजातये ॥
छत्रं वस्त्रयुतं दद्यात्सोपवासः समाहितः ।
कर्मणा तेन धर्मज्ञः पुष्टिमाप्नोत्यनुत्तमाम् ॥
माघ्यां कुर्व्वंस्तिलैः श्राद्धं मुच्यते सर्वकिल्बिषैः ।
शुभं शयनमास्तीर्य फाल्गुण्यां स द्विजातये ॥
रूपद्रविणसंयुक्तो भार्य्यां रूपवतीं लभेत् ।
नरः प्राप्नोति धर्मज्ञः श्रियं प्राप्नोत्यनुत्तमाम् ॥
नार्य्यपि शुभभर्त्तारं रूपसौभाग्यसंयुतम् ।
प्राप्नोति विपुलान् भोगान्नात्र कार्य्या विचारणा ॥
पौर्णमासीषु चैतासु मासर्क्षसंयुतासु च ।

एतेषामेव दानानां फलं दशगुणं भवेत् ॥
महापौर्णासु चैतासु फलमक्षय मश्नुते ।
द्वादश्यां चैव शुक्लस्य चैत्रे वस्त्रप्रदो नरः ॥
अक्षयं फलमाप्नोति नागलोक मनुत्तमम् ।
इत्यन्तं कथितं विप्र! फलं चैत्रस्य सत्तम! ॥
दद्याद्धेमच वैशाखे द्वादश्यां यो नरः सितम् ।
शुक्ले च्छत्रोपानहौ च विष्णुलोक मवाप्नुयात् ॥
आस्तीर्य शयनं दत्त्वा प्रशास्य भोगशायिनम् ।
आषाढशुक्लद्वादश्यां चैतद्दीप मवाप्नुयात् ॥
श्रावणे वस्त्रदानेन विष्णुसायुज्य मृच्छति ।
गोदः प्रयाति गोलोकं मासे भाद्रपदे द्विजः ॥
पौर्णेदश्वशिरसम् अश्वं दत्त्वा तथाश्विने ।
विष्णुलोक मवाप्नोति कुल मुद्धरते स्वकम् ॥
स नरो वस्त्रदानेन कार्त्तिक्यां दिवमाप्नुयात् ।
प्रदानं लवणानां तु मार्गशीर्षे महाफलम् ॥
धान्यानाञ्च तथा पौषे दारूणा मप्यनन्तरे ।
फाल्गुणे सर्वगन्धानां भवेद्दानं महाफलम् ॥
शजर्क्षसंयुता चैत्रे द्वादश्यां तु महाफलम् ।
मासे तु माधवे शुक्लद्वादश्याचा ऽसंयुता ॥
वायव्येन युताशुक्रे शुचौ मूलेन वैष्णवी ।
नभस्यश्विनयोः पुण्या श्रावण्यजर्क्षसंयुता ॥
पौष्णार्द्रं संयुता चैत्रं हेमार्गे कृत्तिकायुता ।
सहस्ये रिक्थकोपेता तपसि चादित्यसंयुता ॥
गुर्वर्क्षयुक्तपुष्ये च द्वादशी पावना स्मृता ।

नक्षत्रयुक्तास्त्वेतासु दत्त्वा दानानद्यन्तकम् ॥
मेषं च मेषसंक्रान्तौ गोवृषं वृषसंक्रमे ।
शयनासनदानञ्च मिथुनोपगमे तथा ॥
कर्कप्रवेशे शक्तून् हि प्रदद्याच्छर्करां तथा ।
सिंहप्रवेशे पात्राणां तैजसानां तथैव च ॥
तुलाप्रवेशे धान्यानां वीजाना मतिचोत्तमम् ।
कीटप्रवेशे वस्त्राणां वेश्मानां दानमेव च ॥
धनुः प्रवेषे वस्त्राणां यानानाञ्च महाफलम् ।
झषप्रवेशे सर्वेषां अन्नानां दानमुत्तमम् ॥
स्नेहानाञ्चैव दारूणां दानमग्ने स्तथैव च ।
कुम्भप्रवेशे दानन्तु गवामर्थे तृणस्य तु ।
मीनप्रवेशे स्नानानां माल्यानामपि चोत्तमम् ॥
दानान्यशेतानि मया द्विजेन्द्र! प्रोक्तानि कालेनु नरः प्रदाय ।
प्राप्नोति कामान् मनसात्यभीष्टांस्तस्मात्प्रशंसन्ति हि कालदानम्॥
अशौचसूतके वापि न दातव्यः प्रतिग्रहः ।
सतोरपि तयो र्देया परन्तूभयदक्षिणा ॥
रात्रौ दानं न दातव्यं दातव्य मभयं द्विज ! ।
त्रयाणामपि देयानि विद्याकन्या प्रतिग्रहाः ॥
पाद्यानामतिथीनाञ्च गवामपि च पूजनम् ।
रात्रावपि च कर्त्तव्य मिति पाराशरोऽब्रवीत् ॥
शुचिः सन्नशुचिर्वापि दद्यात् गृह्णीत चोभयम् ।
अक्षयं दानकालोऽयं यदोभय मुपस्थितम् ॥
अन्यप्रतिग्रहो विद्वान् ग्राह्यश्च शुचिना सह ।
अशौचसूतके चैव न तु ग्राह्या भवन्ति ते ॥

अव्यक्तेनच धर्मज्ञ ! तथा मुक्तिशिखेन च ।
स्नात्वाचम्य पयः स्पृश्य गृह्णीत प्रयतः शुचिः ॥
द्रव्यस्य नाम गृह्णीयाद्दाता तथा निवेदयेत् ।
तोयं दत्त्वा तथा दाता दाने विधिरयं स्मृतः ॥
प्रतिगृहीता सावित्रं सर्वमत्र त्वुदीरयेत् ।
सार्धद्रव्येण तत् सर्वं तद्द्रव्यस्य तु दैवतम् ॥
समापय्य ततः पश्चात्कामं स्नात्वा प्रतिग्रहम् ॥
प्रतिग्रही पठेदुच्चैः प्रतिगृह्यद्विजोत्तमात् ।
मन्द्रं पठेत राजान्यादुपांशु च तथाविशः ॥
मनसा च तथा शूद्रात् कर्त्तव्यं स्वस्तिवाचनम् ।
सोङ्कारं ब्राह्मणो ब्रूयात् निरोङ्कारं महीपतिः ॥
उपांशु च तथा वैश्ये स्वस्ति शूद्रे तथैव च ।
न दानं यशसे दद्यात् नभयान्नोपकारिणे ॥
न नृत्यगीतशीलेभ्यो हासिकेभ्यश्च धार्मिकः ।
पात्रभूतोहि यो विप्रः प्रतिगृह्य प्रतिग्रहम् ॥
असत्सु विनियुञ्जीत तस्मै देयं न तद्भवेत् ।
सञ्चयं कुरुते यस्तु समादाय इतस्ततः ॥
धर्मार्थं नोपयुञ्जीत न तं तस्कर मर्चयेत् ।
यस्मै दद्याद्द्विजा ! यस्य नत्वा तमुररी नरः ॥
दानञ्च हृदि संचिन्त्य जलमध्ये जलं क्षिपेत् ।
वदन्ति मुनयो गाथां परोक्षे दानमत्फलम् ॥
परोक्षे चैव यद्दानं प्रत्यक्षात्कोटिशो भवेत् ।
पात्रं मनसि सञ्चिन्त्य गुणवन्त मभीप्सितम् ॥
अप्सु ब्राह्मणहस्ते वा भूमावपि जलं क्षिपेत् ।

दानकाले तु संप्राप्ते पात्रे चासन्निधौ जलम् ॥
अन्यविप्रकरे दद्याद्दानं पात्राय दीयते।
विष्णुस्ते तारणायास्तु गृह्णन्ति हि करोदकम् ॥
तद्दानं ब्रह्म संप्राप्त मक्षय्य मिति विष्णुगाः।
लक्ष्मीष्टष्टा च यद्दत्तं दरिद्रायार्थिने द्विज ! ॥
तदक्षय्यं समुद्दिष्ट मिति पराशरोऽब्रवीत्।
राज्यभ्रष्टञ्च राजानं यस्तं राज्ये निवेशयेत्।
विष्णुलोकसमं भुज्य भवेत्पतिर्दिवौकसाम् ॥
प्रतिगृह्य द्विजार्थं यो न यच्छति च तं पुनः।
न च स्मारयते विप्र स्तुल्यन्तदुपपातकम् ॥
प्रतिश्रुत्य तु यत्किञ्चिद्द्विजेभ्यो न ददाति यः।
स वै द्वादश जन्मानि शृगालीं योनिमाप्नुयात् ॥
दृष्ट्यादीनि प्रवक्ष्यामि यथा लक्षणदीक्षितान्।
मानभूमिन्तिलादीनां यथावत्तां निबोधत ॥
अजातदन्ता या तु स्याद्गर्भदन्तसमन्विता।
वर्षादर्वाक् चतुर्थाच्च यावदेतत् प्रकीर्तिता।
सुशीला च सुवर्णा च अरोगा च यशस्विनी ॥
सुवत्सा प्रथमं सूता दृष्टिगैरभिधीयते।
अरोगा या परिक्लष्टा प्रसवत्यप्रसूतिका ॥
सूता सातिपयोयुक्ता सा गोसामान्यतः स्मृता।
पूर्वोक्तगुणसंयुक्ता प्रत्यङ्गे प्रसवा तथा ॥
साथ गौर्धेनुरित्युक्ता वाशिष्ठस्यवचो यथा ॥
पञ्चगुञ्जो भवेन्माषः कर्षः षोड़शभिस्च तैः।
तैश्चतुर्भिः पलं प्रोक्तं दाने मानं च पुण्यदम् ॥
भद्रनारिकहस्ताभिः प्रसृतीभिश्च तास्त्वभिः।

माषाश्चत्वै श्चतुर्भिश्च श्चेतिकेति प्रकीर्त्तिताः ॥
ताभिश्चतस्टभिः प्रस्थश्चतुर्भिराटकैश्च तैः।
द्रोणश्चतुर्भिस्तै रक्तो धान्यमानं प्रकीर्त्तितम् ॥
तैलप्रस्टतिभिर्भाण्डं चतस्टभिर्यत्प्रपूर्यते।
तैश्चतुर्भिश्च कूर्चश्च तैश्चतुर्भिश्च वैफलम् ॥
पातैश्चतुर्भिः स्यात्तथी पाटी तच्च चतुष्टयम्।
करकं चतस्टभि स्ताभिश्चतुर्भिस्तैर्घटः स्मृतः ॥
इत्येतैः कविभिः प्रोक्तं घृतगोतिलगोसमाः।
किञ्चिच्च बहुनोक्तेन दानस्य तु पुनः पुनः॥
दीयते यद्दरिद्राय कुटुम्बिने तदक्षयम्।
सकृद्दधाय विप्राय भक्त्या परमया वसु ॥
दीयन्ते वेदविदुषे तदुपतिष्ठन्ति यौवने।
अथान्यत्सम्प्रवक्ष्यामि दानानि निष्फलानि तु ॥
तथा निष्फलजन्मानि तथा तव निबोधत।
वृथा जन्मानि चत्वारि वृथा दानानि षोड़श ॥
तानि पृथक् प्रवक्ष्यामि निबोध त्वं द्विजोत्तम !।
अपुत्रस्य वृथा जन्म ये च धर्मवहिष्कृताः॥
दरिद्रस्य वृथा जन्म व्याधितस्य तथैव च।
अपुण्यस्थाने यद्दत्तं वृथादानं प्रकीर्त्तितम् ॥
आरूढपतिते दानं अन्यायोपार्ज्जितञ्च यत्।
व्यर्थं मब्राह्मणे दानं पतिते तस्करेऽपि च ॥
गुरोरप्रीतिजनके कृतघ्ने ग्रामयाचके।
ब्रह्मबन्धौ च यद्दानं यद्दत्तं वृषलीपतौ ॥
वेदविक्रयिणे चैव यस्य चोपपतिर्गृहे।

स्त्रीजिते चैव यद्दत्तं व्यालग्राहे तथैव च ॥
परिचारके तु यद्दत्तं वृथा दानानि षोड़श।
तमोवृत्तश्च यो दद्याद्भयात् क्रोधात्तथैव च ॥
विद्धवृत्तंहि तत्सर्वं भुङ्क्ते गर्भस्थ एवहि।
ईर्ष्यया मन्युना दानं यद्दान मर्थकारणात् ॥
यो ददाति द्विजातिभ्यो बालाभावे तदश्नुते।
स्वयं नीत्वा च यद्दानं भक्त्या पात्रे प्रदीयते ॥
अप्रमेयगुणं तद्धि उपतिष्ठति यौवने।
यत्सद्विप्राय वृद्धाय भक्त्या परमया वतु ॥
दीयते वेदविदुषे तदुपतिष्ठति वार्द्धके।
तस्मात्सर्वास्ववस्थासु सर्वदानानि सत्तम ! ॥
दातव्यानि द्विजातिभ्यः स्वर्गमार्ग मभीप्सता।
भूमेः प्रतिग्रहं कुर्याद्भूमिं कृत्वा प्रदक्षिणाम् ॥
करे गृह्य तथा कन्यां दासदासी तथा द्विजः।
करन्तु हृदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रहः।
आरुह्य च गजस्योक्तकर्णस्याश्वः प्रकीर्तितः ॥
तथा वैकशफानाञ्च सर्वेषा मविशेषतः।
प्रतिगृह्णीत गां स्पृङ्गे पृष्ठकृष्णाजिनं तथा ॥
कर्णजाः पशवः सर्वे ग्राह्याः पुच्छे विचक्षणैः।
प्रतिग्रहं तथोष्ट्रस्य आरुह्येव तु पादुके ॥
ईशायान्तु रथो ग्राह्यः छत्रं दण्डे तु धारयेत्।
द्रुमाणा मथ सर्वेषां मूले न्यस्तकरो भवेत्।
आयुधानि समादाय तथामुच्य विभूषणम्।
धर्मध्वज स्तथा स्पृष्ट्वा प्रविश्य च तथागृहम् ॥

अवतीर्य तु सर्वाणि जलस्थानानि यानि तु।
उपविश्य च शय्यायां स्पर्शयित्वा करेण वा॥
द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा ब्राह्मणः पठेत्।
कन्यादाने तु च पठेद् द्रव्याणि तु पृथक् पृथक्॥
प्रतिग्रहं द्विजश्रेष्ठ! तथैवान्त भवन्ति ते।
द्रव्याणामथ सर्वेषां द्रव्यसंश्रयणान्नरः॥
वाचयेज्जलमादाय हुङ्कारेण प्रतिग्रहम्।
प्रतिग्रहस्य यो धर्मं यो जानाति द्विजो विधिम्॥
सद्रव्यस्तेन्यसंयुक्तो नरकं प्रतिपद्यते।
अथापि वक्ष्यामि विधिं विशेषं वाजिदानतः॥

दातृग्रहीत्रोरपि येन पुण्यं स्वर्गाय जायेत शृणुध्वमेतत्।
गृह्णीत योऽश्वं विधिवद्द्विजेन्द्रः कुर्य्यादसौ पञ्चदिनानि पूर्वम्॥
पञ्चोपचारैर्युतविष्णुपूजां कूष्माण्डमन्त्रैर्घृतदुग्धहेम।
यद्ग्राम इत्यादि गवत्वतीयं सोङ्कारभूरादिभिरन्वितं च॥
प्रत्येकमष्टौ जुहुयाद्द्विजाग्र्याः! तदा तथामानसयेद्द्विजेन्द्राः!।
सौर्येण मन्त्रेण च तद्वदष्टौ षष्ठ्या प्रयुक्तं नियतं जुहोति॥
कुर्य्याच्च गायत्र्यजपं सहस्रं पश्चात्प्रगृह्णं तुरगं द्विजेन्द्रः।
दातापि चैतद्व्रतमाविदध्याद्द्विजाग्र्यवत्प्राक्तनयोर्विशुद्धौ।
द्वावप्यमू सूर्य्यं जलं लभेते अत्रापि पूज्यौ द्विजवृन्दमध्ये॥

अश्वप्रतिग्रहविधिः।

पुराणगीता सु भवन्ति गाथा विशिष्टपुण्यप्रतिपादनाय।
तिथौ प्रदत्तं द्विज! यत्र पूर्वं क्रमेण चैतं पुनरुच्यतां तु॥
श्रावणे शुक्लपक्षे तु द्वादश्यां दीयते द्विज!।
गोप्रदानेन गोविन्दो वन्दत्येतन्मनीषिणः॥

पक्षे शुक्ले तथा वत्स ! द्वादश्यां घृतधेनुकाम्।
घृतार्चिः प्रणतायालं प्रदद्यात् फलदायिनीम् ॥
तथैव माघद्वादश्यां प्रदत्ता तिलगौर्द्विज ! ।
केशवं प्रीणयन्त्याशु सर्वान् कामान् प्रयच्छति ॥
ज्यैष्ठे मासि सिते पक्षे द्वादश्यां जलधेनुकाम् ।
दत्त्वा विप्राय विधिना प्रीणयन्त्यम्बुशायिनम् ॥
यत्र वा तत्र वा काले यद्वा तद्वा प्रदीयते ।
विशेषार्थमिदं प्रोक्तं नान्यत्काले निषेधनम् ॥
विष्णुमुद्दिश्य विप्रेभ्यो निःस्वेभ्यो यत् प्रदीयते ।
भवेत्तदशनं दानं उक्तमल्पाक्षरैरिदम् ॥
काले पात्रे तथा देशधनं न्यायार्जितं तथा ।
यद्दत्तं ब्राह्मणश्रेष्ठे तदनन्तं प्रकीर्तितम् ॥
चन्द्रे वा यदिवा सूर्ये दृष्टे राहौ महाग्रहे ।
अक्षय्यं कथितं सर्वं तदप्यर्कै विशिष्यते ।
द्वादशी पुण्यशुक्लासु विशेषाच्छ्रावणेन तु ॥
यत्र प्रदीयते किञ्चित्तदनन्तं द्विजोत्तम ! ।
वैशाखे शुक्लपक्षे तु विशेषादपि मानवः ॥
आषाढी कार्त्तिकी चैव फाल्गुणी तु विशेषतः ।
तिस्रश्चैताः पौर्णमास्यो दाने विप्र ! महाफलाः ॥
व्यतीपातेषु सर्वेषु समर्क्षेषु द्विजोत्तम ! ।
ग्रहसंक्रमकाले तु तीव्ररश्मे विशेषतः ॥
तुला मेषप्रयागेषु योगेषु मिथुनस्य च ।
देवैर्महाफलं दानन्तेभ्योऽपि स्यान्महाफलम् ॥
यदा प्रविशते भानु र्मकरं द्विजसत्तम ! ।

आषाढेऽश्वयुजे पौषे चैत्रे शुक्ले तथैव च॥
द्वादशीसहितं प्रोक्तं पुण्यं दिनचतुष्टयम्।
मिथुनञ्च तथा कन्यां धन्विनं मीनमेव च॥
प्रविष्टे भास्करे पुण्यं कथितं द्विजसत्तम!।
षड़शीतिमुखं नाम दाने दिनचतुष्टयम्॥
अच्छिन्ननाड्यां यद्दत्तं पुत्रे जाते द्विजोत्तम!।
संस्कारे चैव पुत्रस्य तदक्षय्यं प्रकीर्त्तितम्॥
एताश्च विविधाः प्रोक्ताः स्वाश्च कार्य्या यथोदितम्।
सर्वास्वपिहि सद्भिश्चैरित्थं धर्ममभीप्सुभिः॥
सत्यञ्च नैधिद्विज नालकल्पि सिद्ध्यर्थमुक्तानि कियन्ति विप्राः!।
दानानि वक्ष्याम्यथ पूर्त्तधर्मं माघेन पुंसोर्विहितेन धर्मः।
ब्रह्मेशहरिसूर्य्याणां स्कन्दे भास्वाश्विने तथा।
ईशदुर्गागृहाणाञ्च गृहाणि कारयेन्नरः॥
इष्टकामशतं वापि यश्चार्पयति विष्णवे।
अनेन विधिना कुर्यात् विष्णुलोकमवाप्नुयात्॥
एवं यः सर्वदेवानां मन्दिरं कारयेन्नरः।
स याति वैष्णवं लोकं परितुष्टो हरिर्नरः॥
समाचरति यो भग्नं सुधया लेपयेद्यथा।
शुभ्रं पतिञ्च यस्तन्तु विशिष्टै र्देवलेपनैः॥
सम्मार्ज्जयति यस्तन्तु यथाचैवानुलेपयेत्।
प्रदीपन्तत्र योदद्यात् स याति विष्णुलोकताम्॥
पूजयेद्यस्तु विधिना पञ्चोपचारसंयुतः।
स विष्णुलोकमभ्येति क्रीड़ते च चतुर्भुजे॥
यावन्तत् श्रेष्ठिकास्तत्र वित्तदैवस्य सद्मनि।

तावन्त्यब्दसहस्राणि विष्णुलोकं समाविशेत् ॥
स नित्यन्तत्तड़ाकानि पुष्करिण्यश्च दीर्घिकाः।
तथा कूपाश्च कर्त्तव्या वाप्यश्च गृहमेधिभिः ॥
खातमात्रञ्च कर्त्तव्यं एकादिकजलं नरैः।
यावत्पीत्वा जलं गौस्तु तृषार्त्तापि तृषी भवेत् ॥
पिबन्ति सर्वसत्वानि तृषार्ता अम्भसामिव।
गण्डूषानि तु तावन्ति तत्कर्त्ता तत्समन्दिवि ॥
यावन्ति ह्युपकुर्वन्ति गण्डूषानि क्रि॰ातु च।
कुर्वतां स्नानशौचादि यावदाचमनं तथा ॥
तावत्संख्यानि वर्षाणि लक्षाणि दिवि मोदते।
अथ स च विशेत् स्वर्गे सेव्यमानोऽप्सरोगणैः ॥
आरामाश्चापि कर्त्तव्याः शुभवृक्षैः सुशोभितैः।
अश्वत्थोदुम्बरप्लक्षचूतराजादनीवरैः ॥
जम्बूनिम्बकदम्बैश्च खर्ज्जूरै र्नारिकेलकैः।
वकुलैश्चम्पकैर्हृद्यैः पाटलाशोकर्किंशुकै.।
द्रुमैर्नानाविधैरन्यैः फलपुष्पोपयोगिभिः ॥
जातीजपादिपुष्पैस्तु शोभिताश्च समन्ततः।
फलोपयोगिनः सर्वे तथा पुष्पोपयोगिनः ॥
आरामेषु च कर्त्तव्याः पितृदेवोपयोगदाः।
गाथामुदाहरन्त्यत्र तद्विदः कवयोऽपरे ॥
वृक्षारोपणकं पुंसा सुक्ता याः पुण्यवाचकाः।
अश्वत्थमेकं पिचुमर्दमेकं न्यग्रोधमेकं दशचिञ्चिणीश्च ॥
षट्चम्पकं तालशतत्रयं च पञ्चाम्रवृक्षैर्नरकं न पश्येत् ॥

यावन्ति खादन्ति फलानि वृक्षाः क्षुदग्निदग्धस्य तु वृक्षणीयान् ।
वर्षाणि तावन्ति वसन्ति नाके दत्त्वोषकल्पपुरुषाः स्वमरौघसेव्याः ॥
पुष्पाणि यावन्ति च पुष्पिणां तु दिवौकसां मूर्ध्नि धरातले वा ।
पतन्ति तावन्ति च वत्सराणां कल्याणि वृक्षैर्दिवमारुहन्ति ॥
यत्कालपक्वैर्मधुरैरलं खं शाखाच्युतैः स्वादुफलैर्नगाद्याः ।
सर्वाणि सत्वानि समर्पयस्व तत्आश्रदानेन च वृक्षनाथान् ॥
उद्दिश्य विष्णुं जगतामधीशं नारायणं यत्पुरुषः करोति ।
आनन्त्यमाप्नोति कृतं तु तस्मादनन्ततोयं भगवान् पुराणः ॥
दानानि सर्वाण्यभिधाय विद्वन् ! नष्टश्च पूर्तं गृहमेधिकर्म ।
कुर्वन्ति शान्तिं मनुजाः शुभाय वक्ष्यामि तत्स्यादयसर्वशान्त्यै ॥
उक्तानि सर्वदानानि इष्टापूर्तश्च सत्तमाः ! ।
अतःपरं प्रवक्ष्यामि गणेशादिकशान्तयः ॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रणीतायां
धर्मसंहितायां दानधर्मेषु पूर्त्तविनिर्णयो
नामाष्टमोऽध्यायः ॥

नवमोऽध्यायः ।

शान्तीनामथ सर्वासां ग्रहशान्तिः परा स्मृता ।
ग्रहेभ्योऽपि गणेशस्तु तस्य शान्तिरथोच्यते ॥
यदि पुंस्कृतकर्माणि भवन्ति फलदानि हि ।
तदा धर्मार्थकामास्तु संसिध्येरन् सदा नृणाम् ॥
तन्नृभिः क्रियमाणानां सर्वेषां कर्मणामयम् ।
विघ्नार्थमसृजद्ब्रह्मा शङ्करश्च विनायकम् ॥

तेनोपहतपुंसान्तु कर्म स्यान्निष्फलं कृतम्।
स्त्रीणामपि तथा सर्वं क्रियमाणन्तु निष्फलम्॥
जलावगाहनं स्वेन क्रव्यादारोहणं तथा।
खरोष्ट्रम्लेच्छसंसर्गं गुड़काषायवाससम्॥
पश्यन्त्यात्मानमेवेह सीदन्तं प्रतिवासरम्।
यानि कर्माणि कुर्वीत तानि स्युः क्लेशदानि हि॥
राजपुत्रो न राज्याप्ता यथाप्ता न तु कन्यका।
अन्तर्वत्नीन्यपत्याप्ता आचार्ये तु न सा द्विज!॥
अधीयानास्तु विद्याप्ता कृषिकृत्सस्यसम्पदा।
वणिग्वर्त्तन लाभेन युज्यन्ते तद्वतश्च सन्॥
तस्मात्तदुपशान्त्यर्थं समभ्यर्च्य गणेश्वरम्।
स्नपनङ्कारयेत्तस्य विधिवत्पुण्यवासरे॥
स्वासनासीन संस्नाप्य आरक्तार्षभचर्मणि।
सितसर्षपकल्केन साज्येनाच्छादितस्य च॥
विलिप्त शिरसस्तस्य गन्धैः सर्वैस्तथौषधैः।
अष्टौ वा चतुरो वापि स्वस्ति वाच्यं द्विजान् शुभान्॥
एकवर्णैश्चतुर्भिश्च पुम्भिः कुम्भैश्च यज्जलम्।
समानीतं क्षिपेत्तत्र वक्ष्यमाणन्दर्शत्विमाः॥
अश्वेभस्थानवल्मीके ह्रदसङ्गमसृत्तिका।
रोचनां गुग्गुलं गन्धान् तस्मिन्नम्भसि तान् क्षिपेत्॥
यत्ते द्वैपायनं स्नानं सहस्राक्ष ऋषिस्मृतम्।
तेन त्वा शतधारेण पावमान्यः पुनन्त्विमाः॥
ऋचाभिः पावमानीभिः कुम्भन्तमभिमन्त्रयेत्।
शक्रादिदशदिक्पाला ब्रह्मेशकेशवादयः॥

आपस्ते घ्नन्तु दौर्भाग्यं शान्तिं ददतु सर्वदा।
सुचित्रियान इत्यादौ मन्त्रैर्नैकाभिषेचनम् ॥
वदन्ति वदतां श्रेष्ठाः दौर्भाग्यस्योपशान्तये।
समुद्रा गिरयो नद्यो मुनयश्च पवित्रता ॥
दौर्भाग्यं घ्नन्तु मे सर्वे शान्तिं यच्छन्तु सर्वदा।
पादजङ्घोरुजङ्घाश्च नितम्बोदरनाभिषु ॥
स्तनांसे बाहुहस्ताग्रग्रीवा श्रंसाङ्गसन्धिषु।
नासा ललाटे कर्णभ्रू केशान्तेषु च यत्स्थितम् ॥
तदपो घ्नन्तु दौर्भाग्यं शान्तिं यच्छन्तु सर्वदा।
स्नातस्य मस्तके दर्भान् सव्येन परिगृह्यते ॥
जुहुयात्सर्षपन्तैलमौदुम्बरस्रुवेण तत्।
मितश्च संमितश्चैव तथा सालकटङ्कटौ ॥
कूष्माण्डो राजपुत्रश्चेत्यन्तस्वाहा समन्वितैः।
नामभिश्च बलिं दद्यान्मन्त्रैर्नाम स्वधान्वितैः ॥
चतुष्पथं समाश्रित्य सूर्प्ये कृत्वा कुशांस्ततः।
निधाय तेषु दर्भेषु शुक्लाशुक्लांश्च तण्डुलान् ॥
ओदनं पललोपेतं यत्कामान् मत्स्यकानपि।
तथा मांसञ्च कुल्माषान् तत्रैव त्रिविधां सुराम्।
पूरिकेण्डेरिकान् पूपान् फलानि मूलसंस्रजः ॥
गच्छेत् स मातुः पार्वत्याः कुर्यादुपस्थितं पुनः।
दूर्वासर्षपपुष्पैश्च पूर्णमाषाञ्जलिं क्षिपेत् ॥
सौभाग्य मम्बिके! देहि भगरूपं यशोऽपि च।
श्रियो युक्तांश्च कामांश्च तथा शौर्यञ्च देहि मे ॥
गणेशमात! रम्भाले! यत्किञ्चिन्मदभीप्सितम्।

एतच्चाम्बे ! च तद्देहि देहि गौरि ! वरान् वरान् ॥
अनन्तु वाससी शुक्ले परिधायाहं ते शुभे ।
सितचन्दनलिप्ताङ्गः सितस्रग्भूषणान्वितः ॥
तान् नत्वा च द्विजान् सर्वान् भोजयेद्विविधाशनैः ।
वस्त्रयुग्मं गुरोर्दद्यात्तेतु तस्य वराशिषः ॥
एतानि सम्पूज्य गणाधिदेवं विघ्नोपशान्त्यै जननी तथास्य ।
स्मार्त्तोक्तसम्यग्विधिना समासात्प्राप्नोति चान्यान्मनसा यमिच्छेत्॥
स्नात्वा विधायाऽर्चनमम्बिकायाः सम्पूज्य लोकान् सखिबन्धुलोकान्।
आचार्यहृद्यान्वनिताकुमारी प्रश्वस्तविघ्नः श्रियमेति गुर्वीम् ॥
स्मृत्युक्तमन्त्रैर्विधिवत्स युक्तै र्नित्यं द्विजानन्दनपूजनं च ।
कृतान्तरायान्विनिहत्य सर्वान् कुर्यादथातो ग्रहयागमेनम् ॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे शान्त्यध्याये विनायकशान्तिः सम्पूर्णा ॥

मुनीनां व्यासमुख्यानां शुश्रूषासुपुरोऽब्रवीत् ।
शुभाय ग्रहपूजायां वदतस्तानि बोधत ॥
यद्वर्णा यत्सुतान्विद्वान् जाता देशेषु येषु च ।
तेषां तदधिदैवत्यं सन्निधौ दक्षिणाय च ॥
यस्य यस्य च दिग्भागे मण्डलं स्याद्विवस्वतः ।
होमकर्मणि यो विप्रो या सन्ध्या समिधावपि ।
अग्निकुण्डप्रमाणा तु प्रमाणं समिधामपि ॥
सर्वमेव यथोद्देशं वक्ष्यामि द्विजसत्तम ! ।
रक्तः काश्यपजो भानुः शुक्लो ब्रह्मसुतः शशी ॥
रक्तो रुद्रसुतो भौमः पीतः सोमसुतो बुधः ।

पीतो ब्रह्मा सुराचार्य्यः शुक्लः शुक्रो भृगूद्वहः॥
कृष्णः शनीरवेः पुत्रः कृष्णो राहुः प्रजापतिः।
कृष्णः केतुः कृशानुश्च कृष्णपापास्त्रयोऽप्यमी॥
कालगोऽयं पुनः सोम आवन्त्यः सोम उच्यते।
मागधो बुधइत्युक्तो गौतमस्तु बृहस्पतिः॥
सैंधवोदानवाचार्यसौरिसौराष्ट्रदेशजः।
राहुशङ्कलदेशोत्थो मध्यदेशभवोऽग्निभूः॥
जन्मदेश इमे प्रोक्ताः ग्रहजातक वेत्तृभिः।
शम्भुं रविं पुमान् चन्द्रं स्कन्धभौमं हरिं बुधम्॥
ब्राह्मणञ्च गुरुं विद्याच्छुक्रं शुक्रं यमं शनिम्।
कालं राहुं चित्रगुप्तं केतु मित्यधिदैवतम्॥
एतद्विज्ञाय यत्कुर्य्यात्तत्सर्वं सफलं भवेत्।
अर्कस्त्वर्काय होतव्यः सर्वव्याधिप्रणाशनः॥
सुधामुचे च सोमाय पालाशः सर्वकामिकः।
खदिरश्चार्थलाभाय मङ्गलाय विवेकिभिः॥
स्वरूपकृदपामार्गो होतव्यश्च बुधाय च।
प्रभाप्रदस्तथाश्वत्थो होतव्योऽमरमन्त्रिणे॥
अजी सौभाग्यकृद्देया दैत्यामात्याय सद्द्विज!।
धर्मविद्यार्थकृद्दर्भान् स द्विजैर्वह्निसूनवे॥
दधिक्षीराज्यसंमिश्राः समिधः शुभदृद्धये।
शमी पापोपशान्त्यर्थं होतव्या मन्दगामिने॥
दीर्घायुर्धर्मकृद्दूर्वा होतव्या राहवे द्विज!।
प्रादेशमात्रका सर्वा अष्टा वष्टोत्तरं शतम्॥
अष्टाविंशतिरेकैकं सङ्ख्यैषा प्रतिदैवतम्।

दद्यात्तु फलभूयस्त्व मुक्तादन्यत्र राघसम् ॥
नव भुवनकं लेख्यं चतस्रं मण्डलं द्विज ! ।
ग्रहांस्तत्र प्रतिष्ठाप्य वक्ष्यमाणक्रमेण तु ।
मध्येतु भास्करः स्थाप्य पूर्वदक्षिणतः शशी ।
दक्षिणेन धरासूनु र्बुधः पूर्वोत्तरेण तु ॥
उत्तरस्यां सुराचार्यः पूर्वस्यां भृगुनन्दनः ।
पश्चिमायां शनिः कुर्य्यात् राहुर्दक्षिणपश्चिमे ॥
पश्चिमोत्तरतः केतुरिति स्थाप्याः ग्रहाः क्रमात् ।
पटे वा मण्डले लेख्या ईशान्यां दिशि पावकान् ॥
भास्करः स्फाटिकश्चन्द्रो रक्तचन्दनकोऽपरः।
सोमसूनु सुराचार्य्यौ स्वर्णशोभौ प्रकीर्त्तितौ ॥
रजतो भृगुपुत्रस्य कार्ष्णश्च स शनैश्चरः ।
राहुश्च सैसकः कार्यः कार्यः केतुश्च कांस्यकः ॥
सर्वानेतन्मया कृत्वा समभ्यर्च्च सदा गृही ।
लेखयेद्दर्णकैः स्वैः स्वैर्विधिवत्पीठकेन वा ॥
ग्रहाणां साधिदैवानां प्रतिष्ठापन मन्त्रकान् ।
वदन्ति मन्त्रतत्त्वार्थवेदिनो द्विजसत्तम ! ॥
आदित्यं गर्भमित्युक्त मग्निं दूतमनेन वा ।
एताभ्यां स्थापयेदर्कं त्र्यम्बकम् इति शङ्करम् ॥
अप्स्वन्तरीति शीतांशुः श्रीश्च त इति पार्वती ।
स्योना पृथ्वीति भौमञ्च य इन्द्रं देति वा गुहम् ॥
इदं विष्णु र्बुधः स्थाप्य तद्विष्णोरिति वै हरिम् ।
इन्द्र आसां सुराचार्य्य आब्रह्मणां निबोधकम् ॥
इन्द्र देवी भृगोः सूनुं सर्वात्मेत्यमराधिपम् ।

शन्नो देवी रवेः सूक्तं यमाय त्वा तथा यमम् ॥
अयं गौरिति राहुश्च कालं कार्षीरसीति च ।
ब्रह्मजज्ञेति केतुश्च चित्रं चित्रावसोरिति ॥
ब्रूयुरेतानि मन्त्राणि मूलमन्त्राणि चापरे ।
आकृष्टेन च तीव्रांशोरिमन्देवा निशाकरम् ॥
अग्निर्मूर्धेति भूसुनोरुद्बुध्यस्व बुधस्य च ।
बृहस्पतेरिति गुरो रन्नात्परिस्रुतो भृगोः ॥
शन्नो देवी शनेर्गन्तुः काण्डात् काण्डात्परस्य च ।
केतुं कृण्वनग्निसूक्तुरयमंशः प्रकीर्तितः ॥
वेदमन्त्रैः सदा पूज्या विधिना ते द्विजन्मना ।
कर्त्तव्याश्चरवो मन्त्रैः स्वैः स्वैश्च प्रतिदैवतम् ॥
सघृता सयवाश्चापि होतव्याश्च द्विजैस्तिलाः ।
मध्यमानामिकामूललग्नाङ्गुष्ठं चतस्त्रभिः ॥
यावन्तोऽङ्गुलिभिर्ग्रासा स्तिला स्तावत्तवाहुतिम् ।
हस्तमात्रं पृथिव्यां न वेधोऽपि तावतैव तु ॥
बाहुमात्रं वदन्त्येके एके चारत्निमाकम् ।
चतुरस्रं खनेत्कुण्डमेकयोनिसमन्वितम् ॥
शुभमेखलया युक्तं सुशान्तिकरमुत्तमम् ।
होमार्थं मण्डलं कुर्य्याच्चतुर्द्वारसमन्वितम् ॥
चतुर्दिक्षु ध्वजाः कार्या नानावर्णाः शुभावहाः ।
तथा तत्रोदकुम्भाश्च दूर्वापल्लवसंयुताः ॥
पुनर्नवीकृतं पद्मं मण्डपांभावमाश्रयेत् ।
षट्कर्मनिरताः शान्ता ये न दग्धाः प्रतिग्रहे ॥

नियोज्यास्तेऽग्निकार्यादौ स्युरन्मन्त्रा द्विजोत्तमाः ।
प्रतिग्रहा निदग्धश्च जपहोमादि कुर्वतः ॥
यस्य मन्त्राण्यवीर्याणि तत्कृतं कर्म निष्फलम् ।
ओदनं सगुडं भानोः पायसं शशिन स्तथा ॥
हविष्यं भूमिपुत्त्रस्य चीरान्नञ्च बुधस्य च ।
पूर्णं हविः शनैः केतो र्माषं राहोः स्तताम्रतम् ॥
चित्रान्नमग्निसूनोश्च भाज्यानामपि यस्य याः ।
होमं कृतस्तथान्येऽपि सदृष्टत्ताय द्विजाग्रजाः ॥
यथावर्णानि वासांसि देयानि कुसुमानि च ।
देया गन्धाश्च सर्वेषां देयो धूपश्च गुग्गुलः ॥
धेनुः शङ्खो वृषः स्वर्णं वासोऽश्वश्चासिता च गौः ।
आविग्छागलकश्चैव क्रमशो दक्षिणाः स्मृताः ॥
प्रत्यहं प्रतिमासञ्च प्रत्यब्दं वा विधानतः ।
वर्णिभिश्च ग्रहाः पूज्या राजभिस्तु सदैव हि ॥
दुःखितो यस्य यस्तु स्यात् पूज्यस्तस्य स यत्नतः ।
वेधसैते नियुक्ताः प्राक् स्वभर्त्तां पूजयिष्यथ ॥
वरं ददाति संहृष्टा विप्रा अग्नि र्नृपा ग्रहाः ।
असन्तुष्टा दहन्त्येते तस्मात्तानर्चयेत्सदा ॥
ग्रहाधीन मिदं सर्वं उत्पत्तिप्रलयात्मकम् ।
जगत्प्रभावभावौ च तस्मात्पूज्यतमा ग्रहाः ॥
सानुकूलै र्ग्रहैर्यानि कुर्यात्कर्माणि मानवः ।
सफलानि भवन्त्यस्य निष्फलानि स्युरन्यथा ॥
कुर्वन्ति चैतद्विधिना ग्रहाणा मातिथ्यमब्दं प्रतिवासरं ये ।

आरोग्यदेहा धनधान्ययुक्ताः दीर्घायुषः स्त्रीशतगा भवन्ति ॥

इति श्रीवृहत्पाराशरीये धर्मशास्त्रे ग्रहशान्तिर्नाम शान्त्यध्यायः ।

वसेत्म कस्मात्सदनेष्वतोऽद्भुतं वयोवसेयुर्यदरण्यवासिनः ।
विशेषतो गृध्रकपोतपिङ्गलास्तथैव चोलूकसकाकवायसाः ॥

तरचुगोमायुमृगायुगोभि-
र्द्विधाप्यकस्मादकुतोऽपि निर्भयः ।
विशन्ति यत्त्वेतदतीव चाद्भुतम्
गृहे पुरे तच्छनिकृते हि सिद्धये ॥

अथाद्भुतानि जायन्ते वर्णानां गृहमेधिनाम् ।
नानाविधानि तेषान्तु प्रशान्त्यै शान्तिरिष्यते ॥
यस्याद्भुतानि जायन्ते गृहे तस्य समादिशेत् ।
धनधान्यक्षयो वापि पुत्रभार्य्याक्षयस्तथा ॥
भयञ्चा जायते शत्रो राज्ञो वा जायते भयम् ।
शान्तिस्तत्र विधातव्या यथोक्तं मुनिपुङ्गवैः ॥
यदि गोधूमशाखायां यवशाखोपजायते ।
यवगोधूमशाखाश्च देवसर्वाशनेषु च ॥
सर्षपे तिलशाखा च तिले शाखासु सर्षपम् ।
माषे मुद्गस्तु मुख्ये स्यात् अल्पगवृष्टिर्भवेद्यदि ॥
अम्भः पूर्णे तु कुम्भेतु ज्वलदग्निमवेक्षते ।
उदपनन्तु कूपानां मन्त्री वा मधुजालकम् ।
विधिवद्वायुलिङ्गैश्च निर्वाप्य पायसं चरुम् ॥
महावाताय वाताय तद्वद्यं प्रशाम्यतु ।

त्रिपञ्चसप्त वा कृत्वा सर्वत्र त्वत्र तुल्यता॥
स्त्रियो गौर्वा महिष्या वा सुतौ वत्सौ च पण्डकौ।
द्वौ द्वावाशु प्रजायेति तत्र शान्तिर्विधीयते॥
वृषवज्ञोद्दयं नर्देत् वडवाश्ववदाहरेत्।
अश्वतरी प्रसूते वा प्रस्वेदः प्रतिमासु च॥
मृदङ्गपटहादीनामकुतोऽपि ध्वनिर्यदा।
काकगृध्रकपोताद्याः प्रविशेयुर्गृहे पुरे॥
यवपिष्टेन निर्लिप्य विधिवद्वारुणं वरम्।
मन्त्रैर्वरुणदैवत्यैर्जुहुयाद्वरुणाय तम्॥
महावरुणदेवाय ह्यपाञ्च पतये तथा।
अन्यैर्वरुणदैवत्यैर्मन्त्रैश्च जुहुयाच्चरुम्॥
विप्रस्तु जुहुयान्मन्त्रैरेतैन वरुणाय तम्।
अन्यस्य तुल्यतां कृत्वा स्वाहान्तैर्वरुणदैवतैः॥
इन्द्रचापेक्षणं रात्रौ शस्त्रप्रज्वलनन्तथा।
गजस्य शफवस्त्रान्तर्ज्वलनं प्रतिवीक्षणम्॥
स्थूणाप्ररोहणं यत् स्याद्भाण्डस्थानप्ररोहणम्।
विद्युन्निर्घातवज्राणां पतनं वा भवेद्यदि॥
सुदाकुड्याकसंसर्गं विपरीतप्रदर्शनम्।
शुभाय चरुराग्नेयो निर्वाप्यो विधिवद्द्विजैः॥
अग्नये त्वग्निराजाय महावैश्वानराय च।
हृदये मम यत्त्वेतत्सर्वत्र च वदेद्बुधः॥
गृहशान्तिश्च सर्वत्र शनिपूजा तथैव च।
दक्षिणा सवृषा गौस्तु वस्त्रयुग्मं द्विजायते।

एतेषु चान्येष्वपि चाड्गतेषु जातेषु सावित्रजपं सहस्रम्।
होमं विदध्यादपि विष्णुमन्त्रै र्ब्रह्मेशमन्त्रैरपिवा द्विजोत्तमैः॥
इति श्रीवृहत्पाराशरीये शान्त्यध्याये अद्भुतशान्तिः।

अभिधास्येऽथ रुद्राणां शान्तये गृहमेधिनाम्।
पञ्चानाञ्च विधानन्तु यत्कृतं हन्ति पातकम्॥
ब्राह्मणा विधिवत् स्नात्वा सर्वोपद्रवनाशनम्।
कुर्युर्विधानं रुद्राणां यजुर्विधाननिर्मितम्॥
इषेत्वादिषु मन्त्रेषु खं ब्रह्मा तेषु या क्रिया।
दशप्रणवयुक्तेषु भूर्भूवःस्वरितीति च॥
आर्षञ्छन्दश्च दैवत्यं न्यासञ्च विनियोगतः।
पराशरोदितं वक्ष्ये शेषं सुनिविभाषितम्॥
मनोज्योतिरबोध्याग्निमूर्धानञ्च मर्माणि ते।
मानस्तोक इतिह्येतत्प्रथमं पञ्चकं स्मरेत्॥
याते रुद्रेति वु आयाशिरोऽस्मिन्महदर्णवे।
असंख्यातसहस्राणि ललाटे विन्यसेद्बुधः॥
चक्षुषोर्विन्यसेद्द्वेतु त्र्यम्बकञ्च यजामहे।
मानस्तोक इति ह्येतन्नासिकायां न्यसेद्बुधः॥
अवतत्य धनुर्वक्त्रे नीलग्रीवाय वा गले।
नस्त आयुध इत्येतत्स्मरे्न्मन्त्रप्रकोष्ठके॥
विन्यसेद्वास्तुमन्त्रोऽयं ये तीर्थानिति हस्तयोः।
नमोऽस्तु किरिकेभ्यो वै हृदये मलनाशनम्॥
ताभ्यां विद्वान् न्यसेत् पार्श्वं नमो हिरण्यबाहवे।

गुह्यमन्त्रस्तु संस्मार्य इमा रुद्राय इत्यपि ॥
मानो महान्तइत्योर्वौ एष ते रुद्रेतिजानुनोः ।
अवरुद्रमिति ह्येतज्जङ्घयोर्मन्त्रमुच्चरेत् ॥
कवचे मध्यमेतद्धै तदुपरिस्थित इति ।
नेत्रन्तु नीलग्रीवाय प्रमुञ्चन् मनोऽस्त्रकम् ॥
य एतावन्त एतेन विदध्युर्दिक् प्रबन्धनम् ।
ॐमितिच नमस्कारमथवा च ते ततः पुनः ॥
रुद्रायेति विधानज्ञो दशाक्षरन्तदा न्यसेत् ।
प्रणवं विन्यसेन्मूर्द्ध्नि नकारं नासिकान्तरे ॥
मोकारन्तु ललाटे तु भकारं मुखमध्यतः ।
गकारं कण्ठदेशेतु वकारं हृदये न्यसेत् ॥
तेकारं दक्षिणे हस्ते रुकारं वामतो न्यसेत् ।
द्राकारं नाभिदेशेतु यकारं पादयोर्न्यसेत् ॥
त्रातारमिन्द्रं त्वन्नाग्ने सुगन्नः पन्थानमिति ह्यपि ।
तत्त्वा यामि वदेद्दानो नियुद्भिरित्यपीरयेत् ॥
वयं सोम तमीशानं असौरुद्रा इति स्मरेत् ।
स्योना पृथिवी ह्येतत् कुर्वीत संपुटं द्विजः ।
सुत्रामादिदिशांपालान् प्राच्यादिषु स्मरेदथ ॥
रौद्रीकरणमेतद्धै कृत्वा पापैः प्रमुच्यते ।
यक्षरक्षःपिशाचाद्याः प्रेतभूतग्रहादिकाः ॥
दुष्टदैत्याश्च शाकिन्यो रेवत्यो वृद्धकाश्च याः ।
सिंहव्याघ्रादयोऽरण्या ये दुष्टश्वापदद्दा निजाः ॥
म्लेच्छशकचोराद्या यमदूतश्चदाकवः ।
रौद्रभूतमिमं सर्वे द्विजं पश्यन्ति वह्निवत् ॥

देदीप्यमानमर्च्चिर्भिर्दुष्टदृग्वधकारकः।
दह्यमानो दवीयः सु सप्तधामसु धामभिः॥
प्रपश्यन्ति हि ये दुष्टा द्विजास्ते रुद्ररूपिणः।
पञ्चास्यमीश्यमात्मानं सर्व्वाभरणभूषितम्॥
मृगलाञ्छनमूर्धानं शुद्धस्फटिकसन्निभम्।
फणासहस्रविस्फूर्जदुरगेन्द्रोपवीतिनम्॥
सप्तार्च्चिषं ज्वलज्ज्वालं जटाजूटकिरीटिनम्।
सहस्रकरपादाब्जखट्वाङ्गाङ्गविभूषितम्॥
ब्रह्माण्डखाण्डवक्तारं नृकपालकधारिणम्।
देदीप्यमानचन्द्रार्कज्वलदग्नित्रिनेत्रिणम्॥
त्रैलोक्यज्योतिः कङ्कास्वत्स्कन्धकपालमालिनम्।
दीप्तनक्षत्रमालाभदक्षमल्लाधरद्विजः॥
निःशेषवारिसम्पूर्णं कमण्डलुधरं ध्वजम्।
जगत्व्याधियकृन्नादद्दण्डमेककधारिणम्॥
केयूरबद्धनागेन्द्रमूर्धमणि विराजितम्।
विचित्र किङ्किणीं मालां मुक्ताराव विराजितम्॥
घर्घराव्यक्तनिर्गच्छद्गम्भीरारावनूपुरम्।
सद्धेमपट्टनीं लाभ व्याघ्रचर्मोत्तरीयकम्॥
विद्युल्लताप्रभागङ्गं शुभ्रमूर्धसुरार्च्चितम्।
समस्त भुवनाभाव धरणोच्छासनस्थितम्॥
त्रैलोक्यवनितामूर्धानं तद्देहार्धञ्च पार्वतीम्।
लक्षसूर्यप्रभाभास्वत् त्रैलोक्यकृतपाण्डुरम्॥
अमृतप्लुत हृष्टाङ्गं दिव्यभोगसमाकुलम्।
दिग्दैवतैः समायुक्तं सुरासुरनमस्कृतम्।

नित्यं शाश्वत मव्यक्तं व्यापिनं नन्दिनं ध्रुवम्॥
द्विजो ध्यात्वा भवात्मनं सम्यक् ग्रहस्वरूपिणम्।
सम्प्रपद्यस्तान्तराय: सन्ततीयजनमारभेत्॥
अनुलिप्ते सुगुप्ते च देशे गोचर्ममात्रके।
स्थण्डिलाब्जमालिख्य मन्त्रैः प्रक्षाल्य तं पुन:॥
तत्र पूजादिकं कुर्यान्नमश्च शाम्भवाय च।
मानो महा न्त इति च सिद्धमन्त्रं स्मरेद्द्विज:।
स ललाटे पुनर्ध्यात्वा तेजोरूपं पुनर्द्विज:।
दशाक्षरेण मन्त्रेण दद्यात्पाद्यादिकौ पुन:॥
न्यासमन्त्रैश्च सोङ्कारैर्मानस्तोक इति च्यपि।
शम्भवे इति मन्त्रेण दद्याद्गन्धोदकादिकम्॥
पुष्पधूपञ्च दीपादि यथालाभं निवेदिकम्।
दशाक्षरेण तेनैव तत: कुर्यात् पुनर्द्विज:॥
शिखा तस्य तु रुद्रस्योत्तरनारायणं द्विज:।
शिर: पुरुषसूक्तञ्च शिवसङ्कल्पहृद्यकृत्॥
कवचञ्चाप्रतिरथ नेत्रविभ्राट् बृहत्पिबन्।
शतरुद्रीयमन्त्रेण देवस्यास्त्रं प्रकल्पयेत्॥
पञ्चाङ्गानि स्मरेद्दृष्टप्रणवं पूजयेद्द्विज:।
उद्धृत्य प्रणवेनेशं विकिरन्द्रेति विसर्जयेत्॥
रुद्ररूपो द्विजो यश्च कुर्यात्तद्विच सिध्यति।
अक्षतान्वा तिलान्वापि यवान्वा समिधोऽपि वा॥
शम्भवे इति जुहुयात् सर्वांस्तानाज्यसिक्तकान्।
पञ्चपञ्चाथ षड्वाथ अष्टावष्टौ तथापि च॥
दशदशैकादश वा जुहुयात्साधको द्विज:।

द्विजः स्वदारसन्तुष्टः शुचिः स्नाती जितेन्द्रियः ॥
जपतर्पणहोमादौ रतो यो वत्सरं जपेत्।
दशानामश्वमेधानां फलं प्राप्नोति वै द्विजः ॥
सौवर्ण पृथिवीदान पुण्यभावः प्रजायते।
महापापोपपापैश्च मुक्तो रुद्रत्वमृच्छति ॥
एकादशगणान् रुद्रानावर्त्य याति रुद्रताम्।
रुद्रजापी शुचिः पुण्यः पाङ्क्तेयः श्वाङ्गभुग्वरः ॥
वंशानां विंशतिश्चैकान्तारयेद्रुद्रजाप्यकृत्।
एकतो योगिनः सर्वे ज्ञातिभिः सह सद्व्रतैः ॥
एकतो रुद्रजापी तु मान्यः सर्वस्वदैवतैः।
पात्रमत्र पवित्रञ्च नाधिकं रुद्रजापिनः ॥
तस्मै दत्तं कृतम्भुक्तन्तदानन्त्याय कल्पते।
अथातः सिद्धिकामः सन् कन्दमूलफलाशनः ॥
गोमूत्रयावकक्षीर दधिशाकान्न भोजनः।
हविष्यभोजनो वास्मै विप्रायोत्पन्नभोजनः ॥
जपहोमादि कुर्वाणो यथोक्तफलभाग्भवेत्।
शिरः साहस्र रुद्राणां जप्तैर्दशशतैर्ध्रुवम् ॥
सर्वे मन्त्रा भवन्त्यस्य ब्राह्मणस्योक्तकारिणः।
सिद्धमन्त्रा भवन्त्यस्य चिन्तितार्थफलप्रदाः ॥
रुद्रस्यैवास्य सर्वे ते भवन्तीश्वरनोदिताः।
एकादशशुभान् कुम्भान्नाहृत्य विधिसम्मितान् ॥
सहिरण्यान् सवस्त्रांश्च फलपुष्पोपशोभितान्।
गन्धोदकाक्षतैर्युक्तान्नमस्कृत्वाऽभिमन्त्र्यच।
एकादशमहात्मान मन्त्रं वा हितकाम्यया।

विनायकोपसृष्टञ्च स्नापयेत् का पदाहृतम् ॥
धृतवत्सां काकबन्ध्यां स्नापयेच्च तथातुराम् ।
जपन्नेतत्सकृद्विप्रः सर्व्वदोषैर्विमुच्यते ॥
अनड्वाहञ्च वस्त्रञ्च दद्याद्धेनुञ्च दक्षिणाम् ।
भोजयेद्विदुषो विप्रान् समाप्तौ कर्म्मणो द्विजः ॥
भक्त्यैकादशवस्त्राद्यैर्यथाशक्त्या समर्चयेत् ।
अथवा चरुभिः साक्षी शिरो रुद्रसहस्रकम् ॥
जपेद्गृहे तथारण्ये लिङ्गाग्रे च शिवालये ।
अग्न्यागारे समुद्रे च नदीनिर्झरपर्वते ॥
जपेदन्यत्र वा विद्वान् शुचौ देशे मनोरमे ।
धीरो दृढव्रतो मौनी जितक्रोधो जितेन्द्रियः ॥
श्वेतवासास्त्वधःशायी रुद्रलोके महीयते ।
नमो गणेभ्य इत्यस्य मन्त्रस्य ब्राह्मणोऽयुतम् ।
जप्त्वा च श्रीफले हुत्वा सर्वकार्य्ये तु सिद्धिभाक् ।
नमोऽस्तु नीलग्रीवायेत्येतन्मन्त्रेण सप्तधा ॥
आवर्त्त्योदकमामन्त्र्य विषार्त्तश्रवणे जपेत् ।
विषेण मुच्यते सद्यः काकदष्टोऽपि जीवति ॥
विषस्यापि भवेन्न स्यात्तस्य नरस्य कर्हिचित् ।
ग्रहग्रस्तं ज्वरग्रस्तं रक्षःशाकिनि दूषितम् ॥
ब्रह्मराक्षसग्रस्तञ्च अन्यदोषोपदंहितम् ।
प्रमुञ्चन् धन्विन इति भस्मना सर्षपैस्तथा ।
ताडयेन्मुञ्च मुञ्चेति शीघ्रमेव विमुञ्चति ॥
नमः शम्भव इत्यस्य मन्त्रस्यापशुभं द्विजः ।
जप्त्वा खादिरसमिद्भास्च हुत्वा विप्रः सहस्रकम् ॥

तीक्ष्णतैलप्लुतं सम्यक् मन्त्रान्ते मोचनम् वरम् ।
फट्कारेण च जुहुयात् तयोरेवाचिराद्भवेत् ॥
जलमध्ये शतावर्त्त्या सद्योवृष्टिर्निगद्यते ॥
नाभिमात्रे जले विप्रः प्रविश्य जुहुयाज्जलम् ।
कुर्यादेकार्णवां धात्रीं मन्त्रमाहात्म्यतो भ्रमम् ॥
नमः स्वस्य इत्यनेन मन्त्रेण तु सहस्रकम् ।
लवणं मध्वाहुतीनान्तु राजा शीघ्रं वशी भवेत् ॥
द्विगुणाम्पलाशसमिधं महावाणी प्रजायते ।
त्रिगुणां नवपद्मानां पाताले सिद्ध्यति ध्रुवम् ॥
चतुर्गुणेन मन्त्रेण वरदा श्रीः प्रजायते ।
समुद्रगा नदीतीरे पुलिने वा पवित्रके ॥
खड्गोपरि श्रीफलानां कृत्वा त्रिगुणसहस्रकम् ।
अणिमादिकसिद्धीनामेभिरेव भवेद्द्विजः ॥
छन्दोदैवतमार्षेयमथातः शतरुद्रिये ।
ज्ञानेन कर्मसम्पत्त्वं द्विजानां येन जायते ॥
आद्यानुवाके रुद्राणां आद्यायाश्च क्वचिद्द्विजः ।
छन्दोगायत्र्यमन्यास्तु अनुष्टुप्तिसृषु स्मरेत् ॥
पङ्क्तिस्तिसृषु विज्ञेया अनुष्टुप् तिसृषु स्मृताः ।
द्वयोश्च जगती विप्र उक्तमध्यानुवाककम् ॥
आद्यानुवाके प्रथमा बृहती जगती तथा ।
अनुष्टुप्च तृतीयायां द्वयोस्त्रि ष्टुप् स्मृता द्विज ! ॥
अपरासु तथाऽनुष्टुप्सु अनुवाकद्वयं स्मृतम् ।
रुद्रः सर्वासु देवत्वं विनियोगो यथोचितः ॥
यज्जाग्रतादि षट्के च शिवसंकल्पमार्षकम् ।

रुद्रस्तु देवता षट्सु विनियोगो जपादिषु ॥
अद्भ्यः सम्भृत इत्यादौ उत्तरनारायणऋषिः ।
पूर्वानुवाके दैवत्यं अनुष्टुप्छन्दः प्रकीर्तितम् ॥
आशुः शिशान इत्यादिरप्रीतिरथ उच्यते ।
एतन्नाम्ना मुनिस्तत्र देवतारामरेश्वरः ॥
दैवत्यमापतेत् ह्यत्र छन्दस्त्रिष्टुप् प्रकीर्तितः ।
विभ्राट् बृहदित्यादौ सूर्यो दैवतमुच्यते ॥
एतत्सञ्चिन्त्य सकलं द्विजाग्र्यो रुद्रजाप्यकृत् ।
यद्यदारभते तत्तद्यथोक्तफलदम्भवेत् ॥
तदा ध्यायन् यथ्मितृणां आज्ञानान्द्रविणस्य च ।
प्रजानामायुषः कीर्तिभूयस्त्वं रुद्रजापिनः ॥
इमं पुण्यं पवित्रञ्च रहस्यं पापनाशनम् ।
रुद्रविधिं विधिश्रेष्ठ ! कुर्याद्विप्रः शिवे रतः ॥

कुर्याद्य एवं विधिवद्विधानं शम्भोरजस्रम्प्रयितं द्विजेन्द्राः ! ।
प्राप्नोति नाकं स शिवस्य साक्षादत्रापि स स्याच्छिववत्स पूज्यः॥
मन्त्राणि सर्वाणि च स द्विजस्य आदेशकर्तॄणि भवन्ति यस्य ।
यः साधयेत्प्रोक्तविधानयत्नो मन्त्राभिपूज्यः स तु शम्भुवत्स्यात् ॥

इति श्रीबृहत्पाराशरीये शान्त्यध्याये रुद्रशान्तिः समाप्ता ।

मन्त्रन्त्रिनेत्रं जुहुयाद्धुताशे योविल्वपत्रैर्घृतदुग्धयुक्तैः ।
मृत्युञ्च हत्वा श्रियमेव ध्यात्वा प्राप्नोति पश्चाच्छिवलोकमेव ॥

पञ्चभागास्तथा पञ्च पञ्चेन्द्राः पञ्चवाहणाम् ।
षष्ठाहुतीर्जपित्वाथ सर्वपापैः प्रमुच्यते ॥

अथातः सम्प्रवक्ष्यामि तटागेष्टिविधिं शुभम् ।
येन कृतेन तेषान्तु प्रतिष्ठा सा प्रजायते ॥
अस्मात्तातस्य तातेन पृच्छति रघुपुङ्गवे ।
तटागाद्युत्सवविधिः प्रोक्तो सोऽयं प्रकीर्त्तितः ॥
दीर्घिकासु तटागेषु सन्निहितासु यो विधिः ।
वशिष्ठः प्रोक्तवान् सम्यक् दशरथस्य पृच्छतः ॥
तस्माद्यः श्रुतवान् शक्तिसूनवेऽतः पराशरः ।
तत्प्रसादेन तत्प्रोक्तो योविधिः संप्रचक्षते ॥
तटागादिनिपातानां यावदुत्सर्जनं कृतम् ॥
तावन्न परकीयन्तु स्नानादीनामनर्हकम् ।
अप्रतिष्ठितदेवानां न कार्यं पूजनं यथा ॥
अप्रतिष्ठितपापानां प्रोक्तन्तोयमपेयवत् ।
तदुत्सर्गः प्रकर्त्तव्यो निजवित्तानुसारतः ॥
वित्तशाठ्यं प्रहेयं स्यादित्यब्रवीत्पराशरः ।
तद्विधिज्ञः शुचिः शान्तो ब्राह्मणो धर्मवित्तमः ॥
तत्कृत्यर्थं वरेण्योऽसौ चतुर्भिर्ब्राह्मणैः सह ।
सतोयं स तु कर्त्तव्यः प्रतिधर्मविदृद्धये ॥
विपरीतमतिर्यः स्यात् तत्कृतं कर्म निष्फलम् ।
तटागपालिपृष्ठेतु मण्डपं तत्र कारयेत् ॥
पूर्वोत्तरप्लवे देशे शुभे शौचसमाहितः ।
चतुरस्रं चतुर्द्वारं दशहस्तप्रमाणतः ॥
स्वार्मिहस्तप्रमाणेन तोरणानि तु कारयेत् ।
कार्य्याः विचित्राः पताका नानावर्णाः समन्ततः ॥

शुभपल्लभसंयुक्ता द्वारेषु कलशाः स्मृताः।
यथावर्णं यथाकाष्ठं यथाकार्य्यं प्रमाणतः॥
तथा यूपान् प्रवक्ष्यामि सर्वेषां हितकाम्यया।
पालाशो ब्राह्मणस्योक्तो न्यग्रोधः क्षत्रियस्य च॥
वैल्वो वैश्यस्य यूपः स्याच्छूद्रस्योदुम्बरः स्मृतः।
शिरः प्रमाणं विप्रस्य ह्याकण्ठं क्षत्रियस्य च॥
उरःप्रमाणं वैश्यस्य शूद्रस्य नाभिमात्रकम्।
पूर्वस्य दक्षिणे भागे तोरणं तत्र कारयेत्॥
ब्रह्मस्थानञ्च तन्मध्ये अष्टौ भागाः प्रकीर्त्तिताः।
तेषामुत्तरतः सोमं कुवेर कुविदङ्गतम्॥
धनदं धननागेति ईशावास्येति शङ्करम्।
आकृष्टेनेत्यादिमन्त्रैश्च स्वैः स्वैः कल्पास्तथा ग्रहाः॥
त्रातारमिन्द्रमितीन्द्रं अग्निदं ते च पावकम्।
अग्निपृथुरित्यादि धर्मविच्च द्विजोत्तमः॥
तद्विष्णोरिति वै विष्णुं नमः सूर्नेति नैरृतम्।
सप्त ऋषय इत्यादि मन्त्रेण सप्त ऋषिस्तथा॥
वरुणस्योत्तम्भनमसि वरुणन्तु प्रकल्पयेत्।
एतद्वा विंशतिः स्थाना निमन्त्रिताः पृथक् पृथक्॥
इमं मे त्वन्नसत्वन त्वायामि ह्यनुत्तमम्।
समुद्रोऽसि समुद्रेति त्रीन् समुद्रानिति ह्यसि॥
इशवारुणमन्त्रैस्तु आहुतीनां शतद्वयम्।
अष्टशतं शतं वापि विंशमष्टोत्तरं शतम्॥
गोसहस्रशतं वापि शतार्द्धं वा प्रदीयते।
अलाभे चैव गां दद्यादेकामपि पयस्विनीम्॥

अरोगां वत्ससंयुक्तां सुरूपां भूषणान्विताम्।
सौवर्णाराजतास्ताम्राः कांस्याः सीसाश्च शक्तितः॥
मत्स्यनक्रादयः कार्य्या विविधाः पूर्ववद्द्वये।
गोवत्सौ वत्सवद्दौ च आग्नेय्यां दिशि संस्थितौ॥
वायव्यभिमुखौ तत्र तारयेद्वारिमध्यतः।
वस्त्रयुग्मानि त्रिः स्थाप्य छत्रिकामुद्रिकां शुभाम्॥
शक्त्यान्वितैः प्रदातव्यं विप्रान् प्रसाद्य भक्तितः।
दद्याद्विप्रेभ्यः सन्तोष्य छत्रोपानहमेव च॥
सुहेम शुभसंयुक्तां शय्यां दद्याच्च शक्तितः।
आसनानि च शस्तानि भाजनानि निवेदयेत्॥
एतत्प्रदक्षिणीकृत्य स्वात्मना च विपश्चितः।
प्रसादयेद्द्विजान् भक्त्या इष्टापूर्त्तं फलं नरः॥
कृताञ्जलिपुटो भूत्वा विप्राणामग्रतः स्थितः।
ब्रूयादेवं भवन्तोऽत्र सर्वे विप्रवपुर्धराः॥
तद्रूपन्तारयध्वं मां संसारार्णवतो द्विजाः!॥
आगता मम पुण्येन पूर्वपुण्यप्रसाधकाः।
कूर्मञ्च मकरांश्चैव सौवर्णं तत्र कारयेत्॥
मीनञ्च राजतञ्चैव ताम्रदर्दुरकाः स्मृताः।
जलकुम्भचराद्यांश्च सैन्धवांस्तत्र प्रकल्पयेत्।
अन्ये च जलजास्तत्र शक्त्या ताम्रान् प्रकल्पयेत्॥
इमं पुण्यं पवित्रञ्च तटाकादिविधिं नरः।
खातयित्वा तटागानि स्वभावात् सम्भवर्जिताः॥
मानवः क्रीडते स्वर्गे यावदिन्द्राश्चतुर्दश।
एतद्विधानं विदधाति भक्त्या सर्वेषु खातेषु तड़ागकेषु।

सर्वैश्च कामैः परिपूर्णदेहो भुङ्क्ते धरित्र्यामपि सर्वभोगान्॥
वदान्ति केचिद् वरुणस्य लोके प्रयाति लोकान् वरुणस्य कुम्भे।
संपूज्यतां तत्र पुनर्धरित्र्यां नरेन्द्रतामेति पराशरोक्तिः॥

इति श्रीबृहत्पाराशरीये शान्त्यध्याये वापीकूपतटागादि शान्तिविधिः समाप्तः।

अथातः सम्प्रवक्ष्यामि नरेन्द्राः! श्रूयतामयम्।
लक्षहोमविधिः पुण्यः कोटिहोमविधिस्तथा॥
स्वयम्भूर्यमुवाच प्राक् अस्मत्तातपितामहः।
तमिमं सम्प्रवक्ष्यामि श्रूयतां पापनाशनम्॥
ये वेह ब्राह्मणाः कार्य्याः भूमिर्यावत्तु मण्डपम्।
समिधो याश्च मन्त्राश्च अन्यच्च तत्र यद्भवेत्॥
लक्षहोमविधिं विप्राः! कथ्यमानं निबोधत।
युग्माश्च ऋत्विजः कार्य्या ब्राह्मणा ये विपश्चितः॥
नियमव्रतसम्पन्ना महिताः पार्थिवेन तु।
नित्यं जपपराश्चैव नियोज्यास्तादृशा द्विजाः॥
कन्दमूलफलाहाराः दधिक्षीराशिनोऽपि वा।
प्रागुदक् पूर्वदेशेषु समे स्थण्डिलमेव च॥
तत्र वेदिं च कुर्वीत पञ्चहस्तसमन्वितम्।
दक्षिणोत्तर आयामे त्रिंशत्तु पूर्वपश्चिमे॥
कुण्डानि खनितव्यानि अङ्गुल्या नैकविंशतिम्।
निधापयेद्धिरण्यञ्च रत्नानि विविधानि च॥
सिकता परिदेया च तत्राप्यग्निं समिन्धयेत्।
आज्यभागाहुतीर्हुत्वा न वाहुत्या च होमयेत्॥

अग्निं सोमञ्च सूर्य्यञ्च विष्णुञ्चैव प्रजापतिम्।
विश्वेदेवान् महेन्द्रञ्च मित्रं स्विष्टिकृतं तथा॥
दधिमधुघृताक्तानां समिधाञ्चैव यज्ञिनाम्।
होमयेच्च सहस्रञ्च तत्र चैव यथाक्रमम्॥
चतुर्विंशति गायत्र्या मानस्तोकेति षड् तथा।
विंशग्रहाभिमन्त्रैश्च चत्वारि विष्णुदैवतैः॥
कुष्माण्डैर्जुहुयात्तञ्च विकिरेद्दाश षोड़श।
जुहुयाद्दशसहस्राणि जातवेदस इत्यृचे॥
पञ्चसहस्राणि जुहुयात् जुहुयादिन्द्रदैवतैः।
हुते शतसहस्रे तु अभिषेकन्तु कारयेत्॥
इष्टाभिषेकं यत्प्रोक्तं तदुक्तापि शुभप्रदम्॥
अथवा षोड़शं कुम्भैः सहिरण्यैः समङ्गलैः।
सर्वौषधिसमायुक्तैः सर्वरत्नविभूषितैः॥
अभिषेकं ततस्तस्मिन् प्रधाना दक्षिणाः स्मृताः।
हयाश्वरथयानानि भूमिवस्त्रै र्युगानि च॥
अजञ्च गोशतं हेम ऋत्विजाञ्चैव दक्षिणाम्।
वृषानेकादशैवाथ दश दद्याच्च धेनवः॥
अशक्त्या वा प्रदद्याद्गां वित्तशाठ्यं विवर्जयेत्।
एवं कृते तु यत्किञ्चिद्‌ ग्रहपीड़ासमुद्भवम्॥
भौममाकाशजं वापि असद्वा यदि जायते।
तत्सर्वं लक्षहोमेन प्रशमं यात्यसंशयम्॥
शान्तिर्भवति पुष्टिश्च बलं तेजः प्रवर्द्धते।
हृष्टिर्भवति राष्ट्रे च सर्वोपद्रवसङ्क्षयः॥

इति श्रीवृहत्पाराशरीये लक्षहोमविधिः सम्पूर्णः॥

अथातः सम्प्रवक्ष्यामि कोटिहोमविधिं द्विजाः!।
श्रूयतामादरेणायं सर्वकामफलप्रदः॥
सानुष्ठाना द्विजाः प्रोक्ता ऋत्विजा यागकर्मणि।
विधिज्ञाश्चैव मन्त्रज्ञाः स्वदारनिरताश्च ये।
कार्यश्चैव विशेषेण ग्रहयागविधिर्विदः!॥
एकाङ्गविकलो विप्रो धनधान्यापहारकः।
सर्वाङ्गविकलो यस्तु यजमानं स हिंसति॥
वर्ज्यः सर्वप्रयत्नेन विधिमन्त्रज्ञविद्विज!।
कार्यश्चैव विशेषेण ग्रहयज्ञस्य विद्विजैः॥
ग्रहाः फलन्तु साङ्गाश्च सुराश्चैव नरेश्वराः!।
अधीष्यं येच मन्त्राणां कृत्वा चाष्टोत्तरं शतम्॥
स एव ऋत्विग्विज्ञेयः सर्वकामफलप्रदः।
आवाहनीयो यत्नेन प्रणिपत्य मुहुर्मुहुः॥
एवं कृते तु यत्किञ्चिद्दुष्टग्रहपीडासमुद्भवम्।
तत्सर्वं नाशयेत्येव कृतघ्नः सौहृदं यथा॥
अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयम्भुवा।
आहुतीभिः प्रयत्नेन दक्षिणाभिः फलेन च॥
पूर्ववद्ग्रहदेवाना मावाहनविसर्जने।
होममन्त्रास्त एवोक्ताः स्नानदानन्तथैव च॥
मण्डपश्चैव वेद्याश्च विशेषञ्च निबोधत।
कोटिहोमे चतुर्हस्तं चतुर्हस्तायतं पुनः॥
योनिवक्त्रद्वयोपेतं तदप्याङ्कन्निमेखलम्।
ह्यङ्गुलोद्धृतकार्याच प्रथमा मेखला बुधैः॥
त्र्यङ्गुलैरद्धृतातद्वद् द्वितीया मेखला स्मृता।

उच्छ्रये ऽखला या तु तृतीया चतुरङ्गुला ॥
द्व्यङ्गुलस्तत्र विस्तारः पूर्वयो रेव शस्यते ।
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलविस्तृता ॥
कूर्मपृष्ठोन्नतं मध्ये पार्श्वतस्त्र्यङ्गुलोन्नता ।
गजोष्ठसदृशा तद्वदायामाच्छिद्रसंयुता ॥
एतत्सर्वेषु कुण्डेषु योनिलक्षणमुच्यते ।
मेखलोपरि सर्वत्र अश्वत्थपत्रसन्निभाम् ॥
वेदीच कोटिहोमे स्यान्मण्डपस्य चतुर्मुखः ।
पूर्वद्वारेऽपि संस्थाप्य बह्वृचं वेदपारगम् ॥
यजुर्वेदन्तथा याम्ये पश्चिमे सामवेदिनम् ।
अथर्ववेदं तद्वच्च उत्तरे स्थापयेद्बुधः ॥
अष्टौ तु होमकाः कार्या वेदवेदाङ्गवेदिनः ।
एवं द्वादशविप्राणां वस्त्रमाल्यानुलेपनैः ॥
पूर्ववत् पूजयेद्भक्त्या सर्वाभरणभूषितैः ।
रात्रिसूक्तञ्च सौरञ्च पावमानन्तु मङ्गलम् ॥
पूर्वतो बह्वृचः शान्तिं पठमानोह्युदङ्मुखम् ।
सौक्तं रौद्रञ्च सौम्यञ्च कूष्माण्डं शान्तिमेव च ॥
पाठयेद्दक्षिणे द्वारे यजुर्वेदिनमुत्तमम् ।
सौवर्णमथ वै राज्य माग्नेयीं रुद्रसंहिताम् ॥
ज्येष्ठसामन्तथा शान्तिं च्छन्दोगं पश्चिमे जपेत् ।
पञ्चभिः सप्तभिर्वाथ होमः कार्यस्य पूर्ववत् ॥
स्नाने दाने च मन्त्राः स्यु स्तएव द्विजसत्तमाः ।
वसोर्धाराविधानन्तु लक्षहोमवदिष्यते ॥
अनेन विधिना यस्तु ग्रहपूजां समाचरेत् ।

सर्वान् कामानवाप्नोति ततो विष्णुपुरं व्रजेत् ॥
यः पठेत् शृणुयाद्वापि ग्रहयागमिमं नरः ।
सर्वपापविशुद्धात्मा पदमैन्द्रं स गच्छति ॥
अश्वमेधसहस्रञ्च दश चाष्टौ च धर्मवित् ।
कृत्वा यत् फलमाप्नोति कोटिहोमात्तदश्नुते ॥
ब्रह्महत्यासहस्राणि भ्रूणहत्यार्बुदानि च ।
नश्यन्ति कोटिहोमेन स्वयम्भूवचनं यथा ॥
प्रपेदिरे तस्य पितामहाद्याः शुभेषु पापेन गरीयसा तान् ।
उद्धृत्य नाकं स नयेद्धि सर्वान्यो लक्षहोमे नृपतीरतः स्यात् ॥
राष्ट्रं मनोवाञ्छितवृष्टियुक्तं धान्यैश्च रत्नैः पशुभिः समेतम् ।
निर्द्वन्द्वनीरोगमरस्तु तस्माद्यो लक्षकोटीहवनं विदध्यात् ॥
यो लक्षहोमं विदधाति भूभृत् तद्व्यलक्षं शतहोमकः स्यात् ।
प्रत्यब्दमाप्नोति स दीर्घमायुर्भुङ्क्ते सपत्नान् विजयं धरित्रीम् ॥
यो ब्रह्मघाती गुरुदारगोऽपि ग्रामाविदाहोद्भवपापयुक्तः ।
राजा स मुक्तः शतलक्षहोमाग्निः शेषपापैर्विबुधत्वमेति ॥
तस्मात्तदा भूपतयो विदध्युर्वृष्टीः प्रजासौख्यबलस्य पुष्ट्यै ।
आयुःप्रवृद्धौ विजयाय कीर्त्यै लक्षस्यहोमे ग्रहयोगमेतम् ॥
इति श्रीबृहत्पाराशरीये कोटिहोमः सम्पूर्णः ॥

अथो अन्यत्प्रवक्ष्यामि विधिम्पावनमुत्तमम् ।
अस्मत्तातप्रतातोऽयं रघुपुत्राय धीमते ॥
अनपत्यस्य पुत्रार्थं कुर्याद्वैभाण्डिकं स्वयम् ।
सहस्रशीर्षसूक्तस्य विधानञ्चरुपाककम् ॥

येयैः कृतं नृपैः पूर्वैरन्यैरपि द्विजोत्तमैः।
उपासितन्तु सङ्क्रुद्धा श्रोत्रियैर्वेदपारगैः॥
आत्मविद्भिर्निराहारैर्व्रीहिभिर्मन्त्रउत्तमैः।
क्रियमाणाः क्रियाः सर्वाः सिध्यन्ति व्रतचारिभिः॥
न पाठान्न धनात् स्नानात् नात्मनः प्रतिपादनात्।
प्रोक्तस्य कर्मणः पुंसां सर्वा भवन्ति सिद्धयः॥
शुक्लपक्षे शुभे वारे शुभनक्षत्रगोचरे।
द्वादश्यां पुत्रकामाय संकुर्वन्ति च वैष्णवम्॥
दम्पत्योरुपवासश्च ह्येकादश्यां सुरालये।
ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्दनम्॥
चरुं पुरुषसूक्तेन श्रपयेत् पुरुषकाम्यया।
प्राप्नुयाद्वैष्णवं पुत्रं चिरायुः सन्ततिक्षमम्॥
द्वादश्यां द्वादश सम्यग् विधिवन्निर्वपेच्चरून्।
यः करोति द्रुतं याति स विष्णोः परमं पदम्॥
हुत्वाज्यं विधिवत्पूर्वं ऋग्भिः षोडशभिस्तथा।
समिधोऽश्वत्थवृक्षस्य हुत्वाज्यं जुहुयात् पुनः॥
उपस्थानं ततः कुर्यात् ध्यात्वाच मधुसूदनम्।
हविर्होमं पुनः कृत्वा जुहुत्यश्च घृताहुतीः॥
हविःशेषं नमस्कृत्य नारी नारायणं पतिम्।
संप्राश्य च हविःशेषं लघ्वासीत वसेद्गृहे॥
ततः कृत्वा इदं कर्म कर्त्तव्यं द्विजतर्पणम्।
रजः स्त्रीषु निवर्तेत यावद्गर्भं न विन्दति॥
असूता मृतपुत्रा वा यावत्कन्या प्रसूयते।
क्षिप्रं सा जनयेत् पुत्रं पराशरवचो यथा॥

होमान्ते दक्षिणान्दद्यात् धेनुं वासस्तथा तिलान्।
भूमिं हिरण्यं वस्त्राणि यथासम्भवमेव वा॥
यः सिद्धमन्त्रः सततं द्विजेन्द्राः! संपूज्य विष्णुं विधिवत्सुतीर्थे।
इमं विधानं विदधाति सम्यक् स पुत्रमाप्नोति हरेः प्रसादात्॥

इति श्रीवृहत्पाराशरीये शान्त्यध्याये पुत्रकामोऽयं पुरुषसूक्तविधिः सम्पूर्णः॥

अथातः सम्प्रवक्ष्यामि ग्रहमन्त्रोऽधिदैवतम्।
आर्षञ्छन्दश्च यज्ज्ञानात्कर्म स्यात्समलङ्कृतम्॥
आकृष्णेनेति मन्त्रेऽस्मिन्दैवत्यं सविता मतः।
ऋषिर्हिरण्यरूपाख्यं त्रिष्टुप्छन्दः प्रकीर्तितम्॥
आप्यायस्वेति सोमोऽत्र दैवतं गौतमो मुनिः।
गायत्रीच्छन्द उद्दिष्टं विनियोगो यथोदितम्॥
अग्निर्मूर्द्धेति मन्त्रोऽत्र दैवतां भौममुच्यते।
विरूपाक्षो मुनिर्धीमान् छन्दोगायत्र्य मिष्यते॥
उद्बुध्यस्वेति मन्त्रस्य बुधश्चैव तु दैवतम्।
मुनिर्बुधश्च मन्त्रस्य त्रिष्टुप्छन्दः प्रकीर्तितम्॥
शुक्रत्वमिति चोत्यत्र शुक्र इत्यधिदैवतम्।
शुक्रस्यापि तथार्षञ्च विराट्छन्दः प्रकीर्तितम्॥
शन्नो देवीतिचेत्यत्र शनिदैवत मुच्यते।
सिन्धुर्नाम मुनिर्विद्वान् छन्दोगायत्र्य मुच्यते॥
काण्डात्काण्डादिभिर्मन्त्रस्य राहुर्दैवत मुच्यते।
ऋषिः प्रजापतिः प्रोक्तोऽनुष्टुप्छन्दः प्रकीर्तितम्॥
केतुं कृण्वन्निति प्रोक्तं दैवतं केतुरेव हि।
मधुच्छन्दस आर्षञ्च गायत्र्यं छन्द एव हि॥

स्योना पृथिवीत्यत्र स्कन्दस्य देवता स्मृता।
इन्द्रकुत्सेति दैवत्य मिन्द्र एव स्मृतो बुधैः॥
आर्षन्तत्स्वस्य चापुत्र स्त्रिष्टुप्छन्दः प्रकीर्तितम्।
यस्मिन्नृचेति चेत्यत्र यमोवै देवता परा॥
ऋषिस्तु कुशलो नाम छन्दोऽनुष्टुप् स्मरेद्बुधः।
ब्रह्मजज्ञमित्यत्र च कालो दैवतकं महत्॥
मुनिर्यमानतुर्नाम त्रिष्टुप्छन्दो विधीयते।
आयाते मेतिच त्वस्यां चित्रगुप्तस्तु दैवतम्॥
आर्षन्तु वामदेवस्य त्रिष्टुप्छन्दो त्वयो बुधैः।
अग्निं दूतमितिच्यं स्यादग्निर्वै देवता स्मृता॥
आर्षं मेधातिथेरत्र छन्दोगायत्र्यमेव हि।
अस्यस्तु सोम इत्यत्र सोमं वैदैवतं स्मरेत्॥
मेधातिथिरिहाप्यर्षोऽनुष्टुप्छन्दस्य उच्यते।
भूतिपृथिव्यन्तरिक्ष मित्यत्र दैवतं चितिः॥
ऋषिः शातातपः स्मृत्वा छन्दश्चानुष्टु कुवुच्यते।
पुरुषसूक्तस्य दैवत्यं पुरुषेच हितं बुधैः॥
आर्षं नारायणस्येह छन्दश्चानुष्टुविर्त्यपि।
इन्द्रोपीन्द्रो मरुत्वन्तो मरुत्वान्दैवतं महत्॥
आर्षन्तु काश्यपस्येह गायत्र्यच्छन्दएव हि।
मरुत्वनित्यत्रबुधैः सुरेन्द्रो देवता मता॥
अत्रापि कश्यपस्यार्षं गायत्र्यच्छन्दएव हि।
उत्तानपर्ण मित्यत्र इन्द्रो दैवत मुच्यते॥
आर्षं साङ्ख्यस्य चैवोक्तम् अनुष्टुप्छन्द इत्यपि।
प्रजापते इति ह्यत्र देवता च प्रजापतिः॥

हिरण्यगर्भस्यार्षन्तु त्रिष्टुप्छन्दो मतं बुधैः।
आयं गौरिति चात्र देवता पूजने मता॥
सर्पराजमुनिश्चात्र गायत्र्यं च्छन्द इष्यते।
एष ब्रह्मा ऋत्विज इति ब्रह्मद्विषोऽधिदैवतम्॥
ऋषिर्वै वामदेवोऽत्र गायत्र्यच्छन्द इष्यते।
आतन्वन् इन्द्रइ दव्रत् सुरेन्द्रं शर्मणोश्वरः॥
वामदेवोह्यस्य आर्षं गायत्र्यच्छन्द इत्यपि।
जातवेदस इत्यत्र जातवेदास्तु दैवतम्॥
कश्यपस्यार्षमत्रापि च्छन्दोऽनुष्टुप् प्रकीर्तितम्।
आनोनियुद्भिरित्यस्मिन् वायु दैवतमुच्यते॥
आर्षञ्चात्र वसिष्ठस्य अनुष्टुप्छन्द एव हि।
नमः प्रकाशदैवत्यं मुनिप्रोक्तं प्रजापतिः॥
गायत्र्यं च्छन्दसाञ्चरं विनियोगो यथोचितम्।
ईषो उपेति चात्यत्र अश्विनौ दैवते स्मरेत्॥
प्रस्कण्वस्यार्षमत्रापि गायत्र्यच्छन्द उत्तमम्।
मरुतो यस्य हि क्षयस्य मरुद्दैवत मुच्यते॥
गौतमश्च मुनिर्विद्वन्! च्छन्दसः प्रथमं मुने!।
दैवत्य मार्षं सहच्छन्दसां यो मत्वाद्विजाग्र्यःकुरुते विधानम्।
वेदोक्तमर्थं भवतिस्म सर्वं सम्यक्फलं कर्त्तुमिहाप्यमुत्र॥
यो लक्षहोमं त्वयुत कोटिहोमं राजा विदध्यात्प्रतिवर्षमेकम्।
राष्ट्रे सुवृष्टिर्विजयः सुभिक्षम् आरोग्यता स्यात् सुकृतस्य वृद्धिः॥
भवन्ति पुत्राः शुभसन्तति क्षमाश्चिरायुषो राजहिता धरित्र्याम्।
सुकीर्त्तिमन्तो जयिनोऽपि राज्ये प्रतापवन्तो रविचन्द्रतुल्याः॥
इति श्रीवृहत्पाराशरीये शान्तिविधिर्नाम नवमोऽध्यायः।

दशमोऽध्यायः ।

अथातो नृपतेर्धर्मं वक्ष्यामि हितकाम्यया ।
पराशरोदितं विप्रा ! वक्ष्यमाणं निबोधत ॥
भूभृत् भूमा परो देवपूज्योऽसौ परदेवकः ।
स विधाता च सर्वस्य रक्षिता शासितापि च ॥
इन्द्रादियमवित्तेशवारीशमातरिश्वनः ।
शीतांशुस्तीव्रभासश्च ब्रह्माद्यो द्विजो नृपः ॥
नृपो वेधा नृपः शम्भु र्नृपोऽर्कौ विष्टरश्रवाः ।
दाता हर्त्ता नृपः कर्त्ता नृणां कर्मानुसारतः ॥
नापृच्छेयदि राजानं दण्डं नाप्यावरिष्यतः ।
नामास्या स्तमेष्यतिच नाभविष्यज् जगत्स्थितिः ॥
नाशंक्ष्यन् पुरोडाशान्मनुष्यपितृदेवताः ।
नाभविष्यत् श्वकाकानां भागधेयं हुतं हविः ॥
विगुणोऽपि यथा पूज्यः स्त्रियाश्च सत्पतिर्भवेत् ।
तथा राजा प्रजानान्तु पूज्यः स्याद्विगुणोऽपि सन् ॥
स्वधर्मस्थान् नृपो लोका नन्यान् पुत्रानिवौरसान् ।
शास्त्र्य धर्मविदोदण्ड मधर्मकारिणश्च तान् ॥
दण्डधृतो नरान् कुर्य्याद्धर्मज्ञानार्थसाधकान् ।
समर्थानश्वपत्यादौ शूरान् स्वामिहितोद्यतान् ॥
शुचीन् प्रज्ञांश्च धर्मज्ञान् विप्रान् मुद्राकरान्विवान् ।
लेखकानपि कायस्थान् लेख्यकृत्तु हितैषिणः ॥
अमात्यान्मन्त्रिणो दूतान्यथोदितपुरोहितान् ।
प्राड्विवाकं समस्तान्वा हितांश्च रक्षकानपि ॥

शूरानथ शुचीन् प्राज्ञान्परिविश्वासकारिणः।
सर्व्वस्थानेषु चाध्यक्षं सतकृत्य वेदिनोऽपरे॥
मदायत्तं कुमाराणा मन्तःपूर्व्वपलक्षणम्।
वृद्धानशुचिनो विप्रां श्शुचीननवद्यान्न भीरुकान्॥
यथोदितानि दुर्गाणि कुर्य्युस्ते परिरक्षणम्॥
उद्वाहमुदितं स्त्रीणां यौवने बन्धुकारणात्।
पुरस्कृत्य च विज्ञान मात्मरक्षा च यत्नतः॥
प्रातः सन्ध्यार्चनादूर्द्धं गुडं पुंसवनं स्मृतम्।
यथोक्तकार्य्ये शाठ्ये च नित्यं कुर्य्यात् परीक्षणम्॥
कोशेभाश्वरथादीनां हेतीनां वर्मणामपि।
कुर्य्याच्च दर्शनं नित्यं सतन्द्रितो महीपतिः॥
अमात्यमन्त्रयोक्तृणां सन्मन्त्रं नित्यशोऽपि च।
वेदार्थञ्च सदा होमशान्तिञ्च वृद्धसेवनम्॥
यज्ञदानं तथोत्पातं समये शान्तयोऽपि च।
वर्जनं विषयासक्तो भूमिदानस्य शासनम्॥
अन्तिवर्जितदेशे तु नीतिज्ञो मन्त्रकृद्भवेत्।
नित्यमुत्साहयुक्तः स्याद् विजिगीषु रुदायुधः॥
सदालङ्कारयुक्तश्च सदैव प्रियवाक्‌चयः।
सदाप्रियहिते युक्तः पूज्यो नाकेऽप्यसौ नृपः॥
सदा साधुषु सन्मानं विपरीतेषु घातनम्।
दण्डं दण्ड्येषु कुर्वाणो राजेष्टिफलमश्नुते॥
वृद्धान् साधून् द्विजान् मौलान् यो न सन्मानयेन्नृपः।
पिण्डं कुर्व्वीत नामीषां भूभृत् क्षिप्रं क्षयं व्रजेत्॥
यस्तु सन्मानयेदेतान् नित्यं विप्रांश्च पूजयेत्।

पराजयेत सोऽरातीनजेयोऽप्यपि जायते ॥
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्चोरतस्करैः।
धान्येत्तुतृणतोयैश्च सम्पन्नं परमण्डलम् ॥
हीनवाहनपुष्टान्तु मत्वा तत्प्रविशेन्नृपः।
मासे सहसि यात्रार्थी कृतपुण्यश्च घोषवान् ॥
विधिवद्दूयानकं कुर्य्यात् सहाहै रक्षयेद्बलम्।
यत्राचलसरीरक्षा द्रुवरक्षातु यत्र तु ॥
वासं तत्र विधायैव रात्रौ रक्षेद्बलं स्वकम्।
चतुर्दिक्षु च सैन्यस्य शूरान्धनुर्धरान्निशि ॥
स्वयं राजा नियुञ्जीत समीक्ष्य भूबलाबलम्।
राज्यस्य षड् गुणान् मत्वा सन्धिविग्रहयानकान् ॥
आसनं संश्रयं द्वैधं सम्यक्ज्ञात्वा समाचरेत्।
निर्भेदं स्वबलं कुर्य्यात् हन्याच्च भिन्नचेतसा ॥
दासीकर्मकरान् दासान् भिद्यन्ते न क्षयेन्नृपः।
निकटस्थायिनो नित्यं जानन्ति चेष्टितं प्रभोः ॥
तस्मात्ते यत्नतो रक्ष्या भेदमूलं यतस्त्वमी।
ये ते परस्य यत्नेन भेदनीयास्ततोऽपरे ॥
यथा परो न जानाति तथा भेदं समाचरेत्।
परमात्मविधानानां व्यलीकहृतशङ्कितम् ॥
उत्थापयेत् स्वसेनायाः स्वाद्यताचित्तभेदिनः।
परसैन्ये बहून् पातान् विविधान् कुहकानपि ॥
करीषाङ्गरदानादि वह्निपातानमेकशः।
स्वसैन्येऽभवदित्यादि नृपो यत्नेन रक्षयेत् ॥
नियुज्य यन्त्रपुरुषान् नक्तं सर्वं निशामयेत् ॥

अन्तर्भीकृत् वहिः शूरान् साग्निकान् ब्राह्मणोत्तमान् ।
धर्मज्ञान् कुलसम्भूतान् विदध्यादात्मसन्निधौ ॥
प्रविशेत्परदेशे तु प्रजां स्वीकृत्य संविशेत् ।
उत्साय्यं मार्गतो दूरीकृत्वापि मार्गतो व्रजेत् ॥
शस्यानि दाहयेत्सर्वं सयवानि धनानि च ।
भिन्द्यात्सर्वं निपानानि प्राकारं परिखां तथा ॥
अपमृत्युमुपादाय भूमिसाधारणं पुनः ।
गमयेद्वार्षिकान् मासानसौ च वसुधानृपः ॥
न युद्धमाश्रयेत् प्राज्ञो न कुर्य्यात् स्वबलक्षयम् ।
न प्रभेदेन दानेन त्रिभिरेवं वशं नयेत् ॥
वदन्ति सर्वे नीतिज्ञा दण्डस्यागतिका गतीः ।
तद्वशं वशमायाति यथा रिपुस्तथा श्रयेत् ॥
आक्रान्ता दर्भसूच्योऽपि विद्युद्दृष्टश्चोपपातनम् ।
न तापित युक्तो च युद्धसिद्धौ अरसिद्धिवत् ॥
स्वस्यस्यात्ययिके देशे युद्धमिच्छेत् स्वधर्मवित् ।
ततः प्रविश्य तद्दूरं भूमियुद्धं समारभेत् ॥
किञ्चित् सुप्तेषु लोकेषु क्षपायां यद्धमुत्सृजेत् ।
सन्धीरवासतोवापि पीड़येत्परसैन्यकम् ॥
व्यूहैर्व्यूहयथोक्तैर्वा रक्षां कृत्वापि चात्मनः ।
सैन्यकांस्तान् समस्तांश्च नृपो युद्धाय प्रेषयेत् ॥
समानयेत् समस्तांश्च यो वसेदायतौ नृपः ।
अन्विच्छन् जयलक्ष्मीं तु नीतिज्ञः पृथिवीपतिः ॥
प्रणयेनापि पत्या च शय्यास्थोऽपि च मानवः ।
पुष्पैरपि न युद्धेत युद्धं तत्र विपत्तये ॥

हीनं परबलं मत्वा निरुत्साहमनादरम्।
समस्तबलसंयुक्तः स्वयमुत्थाप्य योधयेत्॥
न हन्यान् मुक्तकेशन्तु नाशयेन्न निरायुधम्।
पराङ्मुखञ्च प्रहतं न तवास्मीति वादिनम्॥
अन्यानपि च विद्वांश्च न हन्यात् धर्मयुद्धकृत्।
हन्यात्तेन्नरकं याति भ्रूणहत्यासमेनसा॥
पराङ्मुखीकृते सैन्ये यो युद्धान्न निवर्त्तते।
तत्पदानीष्टितुल्यानि भूत्यर्थमेकचेतसः॥
शिरोहतस्य ये वक्त्रे विशन्ति रक्तविन्दवः।
सोमपानेन तत्तुल्या इति वासिष्ठजोऽब्रवीत्॥
युद्धन्ते भूभृतो येच भूम्यर्थमेकचेतसः।
इष्टैस्तैर्बहुभिर्योगैरेवं यान्ति त्रिविष्टपम्॥
येषु एवापरो धर्मो नृपतेर्यद्रणार्जितम्।
वित्तन्दीयेत विप्रे स्यात् प्रजाभ्यश्चाभयं सदा॥
तदा तु वशतां याति स देशो न्यायतोऽर्जितः।
तद्देशव्यवहारेण यथावत्परिपालयेत्॥
रणार्जितेन वित्तेन राजा कुर्य्यान्मखान् द्विजान्।
अर्चयेद्विविधद्विद्वान् सतान् सन्मानयेदपि॥
मातुलः श्वशुरो बन्धु रन्यो वापिच यो जितः।
अदण्ड्यः कोऽपि नो राजा राजनीतिविदो विदुः॥
सुसहायमप्रमादं शूरं प्रज्ञानुरागदम्।
सोत्साहं विजिगीषुञ्च भूभृत् चिप्रं निवेदयेत्॥
मत्वाचार्यवतः सर्वान् नियुक्तार्थनियुग्भवेत्।

सार्थकांश्चैव युञ्जीत सर्वतोऽर्थमुपार्जयेत् ॥
सर्वाण्यपि च वित्तानि यतस्ततोऽपि राजनि ।
नृपस्य यदि जातानि देवद्रव्याणि कोशवत् ।
आदाय रक्ष्य चात्मान ततस्तत्र च तत् क्षिपेत् ॥
वित्तं वार्द्धुषिकाणान्तु कदर्यस्यापि यद्भवेत् ।
पाषण्डिगणिकावित्तं हरन्नातो न किल्बिषी ॥
देवब्राह्मणपाषण्डिगणका गणिकादयः ।
वणिग्वार्धुषिकाः सर्वे स्वस्थे राजनि सुस्थिताः ॥
सप्तार्चिश्वाश्वगोमांसान् यस्य दहत्यकिल्बिषी ।
गृह्णीयात् सर्वतो राजा करान् यः पीडयेत् प्रजाः ॥
स्तोकं स्तोकन्तु फलकं मांसं भुङ्क्ते चिरन्तराम् ।
सदा चोद्यमिना भाव्यं नृपेण विजिगीषुणा ॥
विजिगीषुर्नृपो नान्यैः कदाचिदभिभूयते ।
तदेवं हृदि सन्ध्यायन् निरुत्साहो नृपो भवेत् ॥
दैवपूरुषसंयोगे सर्वाः सिध्यन्ति सिद्धयः ॥

नैकेन चक्रेण रथः प्रयाति नचैकपक्षोऽङ्ग! चयाति पक्षी ।
एवं हि दैवेन च केवलेन पुंसोऽर्थसिद्धि र्नरकारतो वा ॥
केचिद्धि दैवस्य तु केवलस्य प्राधान्यमिच्छन्ति विधिप्रवीणाम् ।
पुंस्कारयुक्तस्य नरस्य केचिदप्यत्र दृष्टा पुरुषार्थसिद्धिः ।

अत्युद्यमी क्रियतएवच यः श्रमी च
शौर्य्यान्वितश्च गुणवांश्च सुधीश्च विद्वान् ।
प्राप्नोति नैव विधिना स पराङ्मुखेन
स्वीयोदरस्य परिपूरणमन्नमात्रम् ॥

शुभानि हर्म्याणि वराङ्गनाश्च नानाप्रकारो विभवो नरस्य ।
उर्वीपतित्वञ्च नृकारता च सर्वं हि सम्यक् नयमेति दैवात् ॥
केषां हि पुंसां महतो हि दैवात् स्थानस्थितानामपि चार्थसिद्धिः ।
एषां प्रभुत्व बहुजीविताच एको हि दैवो बलवानतोऽत्र ॥
पुंस्त्रीप्रयोगादथ युक्तयोगात् तयोर्हि मध्ये विदधाति गर्भम् ।
स्त्रीणान्तु तत् विप्र ! नचापि पुंसां सर्वाणि चैषां मनुजेश्वरत्वम्
कामात्तु गर्भस्य न सम्भवोऽस्ति कामान्तु शुक्र नतु वीर्य्यहीनम् ।
अधत्त गर्भोऽपि जहाति गर्भं काचिच्च गर्भं न बिभर्ति दैवात् ॥
धाता विधाता निजकर्मयोगाद् विधेस्त्वभीष्टं त्वनुभावभाव्यम् ।
देवागणानां नच दैत्यकानां स ह्येव कर्त्ता तु मनूद्भवानाम् ॥
दैवान्मघोनापि सहस्रमक्ष्णां दैवाद्धिमांशोः क्षयरोगता च ।
दैवात्पयोधौ लवणोदकत्वं दैवाद्भवेच्छिवतरा च वृष्टिः ॥
यद्यप्यमुष्यं न परोऽस्ति दैवात् कुर्य्यात्तथापीह नरो नृकारम् ।
उद्दीपयेत्कर्मकरो नृकारादुद्दीपितं श्रीरिववै तनोति ।
दैवेन केचिच्च हठेन केचित् केचिन् नृकारेण नरस्य चार्थाः ।
सिध्यन्ति यत्नेन विधीयमाना स्तेषां प्रधानं नरकारमाहुः ॥
स्वामिप्रधानं त्वयदुर्गकोशान् दण्डञ्च मित्राणिच नीतियज्ञाः ।
अङ्गानि राज्यस्य वदन्ति सप्त सप्ताङ्गपूर्वो नृपतिर्धराभुक् ॥
दुर्वृत्तसद्वृत्तनरेषु दण्डं राज्ञा विधेयं निपुणार्थसिद्धौ ।
दण्डञ्च मत्वाऽर्जितवित्तसत्त्वात् हीनार्थ पुंसाञ्च दमन्ति हीनम् ।
अन्यायतो ये जननं जनेश्वराः संपीड्य वित्तानि नयन्ति लोभात् ।
तत्क्रोधवह्नि परिदग्धकायाः क्षीणायुषस्ते तु भवन्ति भूपाः ।
दण्डो महान्मध्यकमन्यशस्तु मानन्तु तस्य त्रसरेणुकादि ॥
साशीति साहस्रपणमहान् स्यादर्धादिके चैव तदर्धको वा ।

सर्वार्थपादस्य हरस्य दण्डः पात्यो नृपेणेति वदन्ति सद्यः॥
पाण्यादिपाच्छेदनमारणाञ्च निर्वासनं राष्ट्रतएव सद्यः।
ज्ञात्वापराधं मनुजस्य यस्तु देशञ्च कालञ्च वयोवपुश्च॥
दण्डेषु दण्डं विदधाति भूभृत्साम्यं स बध्नाति पुरन्दरस्य।
यः शास्त्रदृष्टेन यथा नरेश्वरो दण्डं विदध्याद्विधिवत्कराञ्च॥
स चैवकीर्त्तीर्वितनोति गुर्वीरायुश्च दीर्घं दिवि देवभोगान्।
यस्तूक्तमार्गाणि कुलानि राजा श्रेणींश्च जातीश्वरताञ्च लोकान्
आनीय मार्गे विदधाति धर्मे नागेशगीर्वाणगणैः प्रशस्यम्।
अन्यश्च वह्निर्जलवित्तनाथशीतांशुरूपाणि ह बिभ्रतीह॥
सर्वं च भूयस्त्विह रूपकञ्च तत्तथ्यमानं शृणुत द्विजेन्द्राः!।
यदा जिगीषुर्धृतशस्त्रपाणिः स्वयं समालब्ध स विद्धसैन्यः॥
सर्वान् सपत्नांश्च स हन्तुकामस्तदासहर्यश्व इवावभाति।
आकारणात्कारणतोऽपि एष प्रजा हतेयं स सहस्रकीर्तिः॥
यदा तदैनं नृपतीति विज्ञास्तनूनपात्तं प्रवदन्ति भूपम्॥
धर्मासनस्थश्रुतिशास्त्रदृष्टाः शुभाशुभाचारविचारकृत्स्यात्॥
धर्म्येषु दानं त्वघकृत्सु दण्डं यदावनीशः सच धर्मराजः।
धनप्रदानेन करोति हृष्टा भूभृत्तदासान्द्रविणेशवस्थान्॥
समस्तशीतांशुगुणप्रयोक्ता यदायदासेष शुभाय शास्येत्।
प्रसन्नमूर्तिर्गतमत्सरः सन् तदोच्यते सोम इव क्षितीशः॥
आज्ञा नृपाणां परमं हि तेजो येषां न मन्ये त सशस्त्रवध्यः।
ब्रूयाच्च कुर्याच्च वदेच्च भूभृत्कार्यन्तदेवं भुवि सर्वलोकैः॥
दुर्धर्षतीक्ष्णांशुसमानदीप्तो ब्रूयान्मनुष्यः प्रधर्षं नृपस्य।
यस्तस्य तेजोऽप्यवमन्यमान्यः सद्यः स पञ्चत्व मुपैति पापात्॥

योऽङ्गाय सर्वं विदधाति पश्चेत्
शृणोति जानानि चकास्ति शास्ति।
कस्यापि चाज्ञां न विभर्ति राज्ञः
समस्तदेवांशभवोऽहि यस्मात्॥
यः स्वधर्मे स्थितो राजा प्रजां धर्मेण पालयन्।
सर्वकामसमृद्धात्मा विष्णुलोकमवाप्नुयात्॥
इति श्रीवृहत्पाराशरीये राजधर्मः सम्पूर्णः।

अथ विप्रो वनं गच्छेद्विना वा सह भार्यया।
जितेन्द्रियो वसन्नेव नित्यशौताग्निकर्मकृत्॥
वन्यैर्मुन्यशनैर्मेध्यैः श्यामनीवारकङ्गुभिः।
कन्दमूलफलैः शाकैः स्नेहैश्च फलसम्भवैः।
सायं प्रातश्च जुहुयात् त्रिकालं स्नानमाचरेत्॥
चर्मचीवरवासा वै श्मश्रुलोमजटाधरः।
पितृंश्च तर्पयेन्नित्यं देवांश्चाजस्रमर्चयेत्।
अर्चयेदतिथीन् नित्यं भृत्यांश्चापि प्रपोषयेत्॥
न किञ्चित् प्रतिगृह्णीयात् स्वाध्यायेनैत्यमाचरेत्।
सर्वसत्त्वहितोपेतो दान्तश्चाप्यात्मचिन्तकः॥
सन्न्यस्तश्चान्तको नित्य दानशीलः सदा द्विजः।
किञ्चिद्देहं समास्थाय स वृत्या वर्तयेत्सदा॥
एकाहिकान्तु कुर्वीत मासैकञ्चार्थसञ्चयम्।
षाण्मासिकञ्चाब्दिकञ्च यत्नार्थं च वने वसेत्।
त्यक्त्वा तदाश्विने मासि अन्य स्थानं समाचरेत्॥
यथावदग्निहोत्रं तु समिधाग्नौ च पालयेत्।

कृच्छ्रचान्द्रपराकाद्यैः पञ्चमासोपवासकैः ॥
त्रिरात्रैर्वैकरात्रैश्च आश्रमस्थः क्षपेद्वपुः ।
तिष्ठन्नाव्रतिकस्तत्र स्वपेद्धस्तथा निशि ॥
अतन्द्रितो भवेन्नित्यं वासरं प्रपदैर्नयेत् ।
योगाभ्यासरतोनित्यं स्थानासनविहारवान् ॥
वसन्तग्रीष्मवर्षासु जलाग्न्याकाशमाश्रयेत् ॥
दन्तोलूखलिको वापि कालपक्वभुगेव च ।
स्थाद्वाश्मकुट्टकोविप्रः फलस्नेहैश्च कर्मकृत् ॥
शत्रौ मित्रे समः स्याच्च तथैव सुखदुःखयोः ।
समदृष्टिश्च सर्वेषु न विशेद्वनगह्वरम् ॥
म्लेच्छव्याप्तानि सर्वाणि वनानि हि कलौ युगे ।
न भूयः शासितारस्तु ग्रामोपान्ते वसेदतः ॥
ग्रामाच्च नगराद्दे शात्तथारण्यवनानि च ।
नित्यंशरणीचिताव्येव सर्वेषां फलदानि हि ॥
भूपतेः प्रथमं तत्स्यात् कृत्यं शंसेद्द्विजाग्रतः ।
यागं वाऽरण्यवासं वा कुर्यात्तु तदनुज्ञया ॥
सुत्रामानलवायूनां यमस्येन्द्रविवस्वताम् ।
यदा वित्तेशयोर्ब्रह्मा मात्राभ्यो निर्ममौ नृपम् ॥
पारत्रिकन्तु यत्किञ्चित् यत्किञ्चिदैहिकं तथा ।
नृपाज्ञया द्विजातीनां तत्सर्वं सिद्ध्यति ध्रुवम् ॥
नृपतेः प्रथमं न स्यात् स वै द्विज ! मखादिकम् ।
रक्षार्थं कथयित्वा तु यथाकार्यं समापयेत् ॥
धेनुपूर्वं वशिष्ठस्य ह्यसौ दुर्वाससोऽपि च ।
वनवासाश्रमस्थस्य ह्यग्निकार्याय तांश्रयेत् ।

पलस्नेहाय दानस्य कालवैमुख्यतोद्विजः॥
तथा गोदुग्धसर्पिष्य मग्निकार्यं समापयेत्।
सर्वकालेषु सर्वेषु तथा चैवाश्रमेषु च॥
गोदुग्धादि पवित्रं स्यात् सर्वकार्येषु सत्तमाः!॥
सर्वकार्येषु सर्वेषु भिक्षां कुर्याद्वनाश्रमी।
तथा सर्वे प्रकुर्वन्ति पितृदेवार्चनादिकम्॥
अष्टौ भुञ्जीत वा ग्रासान् ग्रामादाहृत्य यत्नवान्।
आश्रमः संत्यजं गच्छेदनिलां प्रागुदीचिकाम्॥

विप्रोविधाय वनवासविधेयधर्मान्
सर्वानिमानुक्तविधिक्रमेण।
संशुद्य पापानि वपु विशोध्य
ब्रह्माधिगच्छेत् परमं द्विजेन्द्रः॥

आश्रमत्रयधर्मान्प्राक् चरित्वा ते द्विजातयः।
द्वयोश्च वा ततः पश्चाच्चतुर्थाश्रममाचरेत्॥
द्विजाग्रजो यदा पश्येद्वलिं पलित मात्मनः।
उपरतिं तथाक्षाणां क्षीणकामः रुवै द्विजः॥
समीक्ष्य पुत्रपौत्रं वा दृष्ट्वा वा दुहितुः सुतम्।
अधीत्य विधिवद्वेदान् कृत्वा यागविधानताम्॥
निश्चयं मनसा कृत्वा चतुर्थाश्रममावसेत्।
प्राजापत्यं विधायेष्टिं वनाद्वाश्रमनोऽपिवा॥
समस्तदक्षिणायुक्तां सर्ववेदान्तशास्त्रवान्।
अग्निनात्मनि चारोप्य दण्डान्विधिवदाचारेत्॥
किञ्चिद्वेदं समास्थाय तद्धर्मेण च वर्त्तयेत्।
वाङ्मनःकायदण्डांश्च तथा सत्त्वादयो गुणाः॥

सुमुख्यो नियतो यस्य स त्रिदण्डीति कथ्यते ।
कमण्डलुक्षमालाच भिक्षापात्र मथापरम् ॥
काषायवासःकौपीनकार्य्यार्थं वस्त्रमेव च ।
शिखायज्ञोपवीतञ्च दण्डानां त्रितयं तथा ॥
द्विकालबिधिवत् स्नानं भिक्षया चापि भोजनम् ।
शुद्धैकवृत्तिर्विप्रेषु सत्कर्म निरतेषुच ॥
भिक्षावर्णोयतिः प्रोक्तो वृत्तवर्जन्तथैव च ।
असंभाष्यं श्वशून्येच तथाच शिल्पकारुभिः ॥
अवक्तव्यं तथा स्त्रीभिरेतत्कृत्यं यतेः स्मृतम् ।
सर्वदा दन्भसंरोधो नित्यमेकान्तशीलतः ॥
सदैव प्राणसंरोधः सदैवाध्यात्मचिन्तनम् ।
स्त्रद्वेणुदार्वलाव्वश्ममयं पात्रं यतेः स्मृतम् ॥
शुचिरम्भस्त्वमीषाञ्च गोबालस्याघमर्षणम् ।
न दण्डेनैव दण्डेन विना वातेन वा तथा ॥
मोक्षावाप्ति र्भवेत्पुंसां किन्तु साध्यात्मचिन्तनम् ।
समत्वं सुखदुःखेषु तथा वै द्वेषरागयोः ॥
आत्म समानधर्म्मत्व मजस्रं चात्मचिन्तनम् ।
यतिभिस्त्रिभिरेकत्वं द्वाभ्यां पञ्चभिरेव च ॥
न स्थातव्यं कदाचित्स्यात्‌शिस्यन्तो नाशमाप्नुयुः ।
बहुत्वं यत्र भिक्षाणां वार्तास्तत्र विचित्रकाः ॥
स्नेहपैशुन्य मात्सर्यभिक्षाणां नृपतेरपि ।
तस्मादेकान्तशीलेन भवितव्यं सदा द्विज ! ॥
आत्मास्यासरतो नित्यं ब्रह्मावाप्ति मभीप्सताम् ।
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ॥

अध्यात्मयोगयुक्तस्य ब्रह्मावाप्तिर्भवेद्यतः।
यतेन्द्रियोऽपि दण्डाद्यैर्युवा तस्य तथा निरुक्॥
युवा निरुक्तयाभिक्षुरात्मह्रुद्धप्रहर्षकः।
भिक्षुर्गृहे वसेत्तत्र कामार्थान्योऽभिगच्छति॥
तत्स्थानेन तथा चैव सह तेनैव तापयेत्।
निवसेदेकरात्रञ्च बहिर्यत्र तु वेश्मनि॥
स तारयति वृद्धान्वै विंशतिं पितृमातृतः।
भिक्षुर्यस्यात्मनन्तु ब्रह्म योगाभ्यासरतो भवेत्॥
परिणामस्य योगेन चतकृत्यो गृही स तु।
निर्ममो निरहङ्कारः सर्वैः सह प्रयच्छति।
ब्रह्मण्यात्मनि गोमायो मूले इच्छास दामहक्।
चिह्नानि धात्रा कथितानि यस्यवक्रे सयस्याभिहितेव भिक्षा॥
योध्यानवान्वा सततं जिताक्षः स ब्रह्मकाष्ठ्योगमनं करोति॥
वनस्थ भिक्षुधर्मान्वै यानब्रवीत्पराशरः।
तथावदभिधायेतान् वक्ष्याम्याश्रमभेदकान्॥
इति श्रीबृहत्पाराशरीये धर्मशास्त्रे वानप्रस्थयति-
धर्मोनाम दशमोऽध्यायः।

एकादशोऽध्यायः।

अथातः संप्रवक्ष्यामि भेदमाश्रमसम्भवम्।
ब्रह्मचर्यादिकानान्तु तथा तथ्यं निबोधत॥
चतुर्णामाश्रमाणां तु भेदो दृष्टो मनीषिभिः।
प्रत्येकशो वदाम्येतत् शृणुध्वं द्विजसत्तमाः॥

ब्रह्मचारी गृहस्थश्च वानप्रस्थस्तथा यती ।
एतद्भेदं प्रवक्ष्यामि शृणुध्वं पापनाशनम् ॥
चतुर्धा ब्रह्मचारी च स्वाद्दा यत्र यतस्तथा ।
प्राजापत्या बृहच्चेति लक्षणानि पृथक् पृथक् ॥
अक्षारलवणाशित्या गायत्र्याच स प्रत्यहम् ।
वर्त्तते त्रपया नित्यं गायत्र्यं तत्प्रकीर्तितम् ॥
चतुर्धा द्वादशाब्दानि योऽधीयानश्चतुः श्रुतीः ।
भिक्षया ब्रह्मचर्येण तेष्वध्यात्मं तदुच्यते ॥
ऋतुकालाभिगामी सन् परस्त्रीपर्ववर्जकः ।
वेदानध्येति भिक्षाभुक् प्राजापत्योऽयमुच्यते ॥
गुरोर्वा गुरुपुत्रस्य तत्पत्न्या वापि सन्निधौ ।
यो वसेदात्मसंत्राणं ब्रह्मचारी स नैष्ठिकः ॥
गृहस्थस्य चतुर्भेदो मतः शालीनतीव्रकौ ।
यायावरास्तथा चान्ये घोरसंन्यासिकास्तथा ॥
कृषिगोरक्षवाणिज्यैः सर्वान् कुर्वन् क्रियां द्विजः ।
विहितोऽह्यात्मविद्यश्च वार्तावृत्तिः स उच्यते ॥
ददात्यध्येति यजते याजयेत् चैव पाठयेत् ।
कुर्यात्कर्म प्रतिग्राही शालीनोऽध्यानकृद्द्विजः ॥
उक्तः सन् कारयेदन्यां क्रियां कुर्यात्प्रतिग्रहे ।
पाठको नियतात्मा च यायावरः स उच्यते ॥
तिष्ठेद् यस्य शीलोञ्छाभ्यां सुवृत्ताङ्गिश्च वर्त्तते ।
आत्मविच्च क्रियां कुर्यात् घोरसंन्यासिकः स तु ॥
वानप्रस्थचतुर्भेदो वैखानस उदुम्बरः ।
वालखिल्यो वनेवासी तल्लक्षणमथोच्यते ॥

फलैर्मूलैरकृष्णान्नैरग्निकल्पेन वै वसन्।
कुर्यात्पञ्च महायज्ञानात्मविद्वैखानसः स तु॥
द्रुमानि तत्फलः कृष्णाधने धनुः उदम्बरे।
योवा वसेदतो ज्ञानी पञ्चयज्ञाग्निकर्मकृत्॥
वनस्थो बालखिल्यो यो वसेत् वल्कलचीवरम्।
अग्निकार्यकृदात्मज्ञः दुर्जातसेवितं त्यजेत्॥
चतुरोऽन्यानमूनग्निकार्यं कुर्वन्वने वसेत्।
फलस्नेहैः फलैर्वन्यै र्बहुभिः श्रुतिचोदितम्॥
उद्धृत्य परिभूताद्रि तथा वै वित्तहृत्तिकः।
फलैर्वन्यै र्वनान्तैश्च फेनपः पञ्चयज्ञकृत्॥
पुत्रस्य भ्रातृपुत्रस्य भ्रातृदौहित्रयोरपि।
न दुष्यात्रः कुटीस्थोवा यद्भैक्ष्यं वृत्तिभुक् द्विजः॥
ज्ञेयो बहूदयो नाम यश्च पवित्रपादुकः।
शिखासनोपवीतानि धातुकाषायवासकृत्॥
चतुर्भेदपरिव्राट् स्यात् कुटीचरबहूदकौ।
हंसाः परमहंसाश्च वच्यन्ते तु पृथक् पृथक्॥
साधुवृत्ति र्द्विजो यस्तु भिक्षाभुगात्मचिन्तकः।
बहूदकः स्वयं ज्ञेयः परिव्राट् स त्रिदण्डधृक्॥
एके दण्डधरा हंसाः शिखोपवीतधारिणः।
वार्याचारकराः शान्ता भूतानामभयप्रदाः॥
वसेदेकक्षपां ग्रामे नगरे पञ्च सर्वशः।
मर्षयन्तो व्रतैर्देहमात्मध्याने सदा रताः॥
एकदण्डधरा मुण्डा कन्थाकौपिनवाससः।
अत्यन्तलिङ्गिनोऽव्यक्ताः सर्वदैव च मौनिनः॥

शिखादिरहिताः शान्ताः भस्मत्तरवधारिणः ।
नग्नः शूरामरैः केश वासिनो ब्रह्मचिन्तकः ॥
ये ते परमहंसा वै नैष्ठिका ब्रह्मभिक्षवः ।
भक्ता स्वव्रतभेदज्ञैरात्मनः प्रार्थनापराः ॥
यो ब्रह्मचर्यें व्रतचारिभेदो
भेदो गृहस्थस्य तथैव यत्नतः ।
हिरण्यवासो द्विजकर्मभेदो
ह्युक्तो मयासीद्द्विजभिक्षुभेदः ॥

इति वृहत्पाराशरीये वानप्रस्थयत्याश्रमभेदो नाम एकादशोऽध्यायः ॥

द्वादशोऽध्यायः ।

मुमुक्षवो विरज्यन्तो देहाद्देहादितो यथा ।
शरीरज्ञास्तया प्राज्ञः परब्रह्मलयं गताः ॥
स्वेवाद्यग्न्यम्बुधात्वीभि सारव्यामाश्नुनाशि तत् ।
तन्मुख्ये गुणसंयुक्ते तत्पञ्चत्वात्मनं व्रजेत् ॥
शुक्लशोणितसंयोगात् स्त्रीकोष्ठपाकसम्भवम् ।
दुःखेन दशभिर्मासैर्व्यापितम्भूरि दोहदैः ॥
जनन्यादौ गृहाभावे गर्भस्तस्यापि दुःखितः ।
अतश्च जायमानस्य योनियन्त्रनिपीड़नात् ॥
जातस्य बालरोगाद्यैः यौगिनीग्रहदोषतः ।
देहिनः सर्वदा दुःखं पूजाजन्मादिकैर्ग्रहैः ॥
एवं बाल्ये महद्दुःखं कामार्थं यौवनेऽपि च ।

स्त्रिया विना तु स्यादूर्षाद्दरिद्रैश्वर्ययोरपि॥
क्षुत्तृड्भ्यां प्रथमे वित्तं रक्षणाद्यै द्वितीयके।
द्वन्द्वत्वे वा तयोर्दुःखन्तस्माद् दुःखमयं वपुः॥
मांसेन लोपितं बालं स्नायुभिः कुल्यसञ्चयम्।
मेदोमेहनसम्पूर्णं कफपित्तस्य साश्रयम्॥
अमेध्यपूर्णभस्त्रावं दध्रे वै सर्वदा शुचिः।
छन्नायाः स्नानगन्धाद्यैर्निर्गन्धीक्रियते बहिः॥
दुर्गन्धः सर्वरन्ध्रेषु स्वघ्राणोद्वेगकारणम्।
सततञ्च स्वावमेध्यङ्किं देहे शोच्यते शुभम्॥
यदद्‌ग्धं भवेन्मृत्स्ना दग्धभस्मत्वमाप्नुयात्।
मृतस्य दृश्यने किञ्चित्तृणाकोपरतस्य च।
क दृहाभ्युद्यते विद्वान् कस्येह म्रियते पुनः।
यन्नोपममिदन्धीमन्! वायुत्यक्तं स्रतम्भवेत्॥
पृथगात्मा पृथक्स्वात्तं पृथक् स्वानि दर्शानि च।
पृथक्भूतानि भूतानि पृथक्तेषां गुणोत्तरः॥
पृथक् पापं दिवायुश्च तद्गतिश्च पृथक् पृथक्।
पृथक् पृथगिति ह्येतत् पृथग्भिः किमिहोच्यते॥
आरम्भकाणि यान्येव तेषु यान्ति तदंशकाः।
अत्ययाद् यदवाप्नोति याति वीर्यं पुनर्वपुः॥
शृणुयात् पादपस्पर्शे जिघ्रेत् स्वादेन्द्रियां स्मरेत्।
स्वपेच्च जागृयाद्गच्छेद्वृत्यन्नायेद्यतेत वा॥
गृह्णीयाद्यद्यथाप्यद्य जायेत स नयेदपि।
सोऽखिलश्चेतृपरो देहाद्योदेहीति निगद्यते॥
नैकश्च स्याच्चदेहे वै प्रत्यभिज्ञा कथम्भवेत्।

एकाहक् दंष्ट्ररूपस्य पुनरन्येन पश्यतः।
अद्राक्षं यदहो वस्तु तदेवैतत्स्पृशाम्यथ॥
यच्चास्पृश्यं च पश्यामि प्रतीतिर्यस्य जायते।
दर्शनाभ्यां तु सततं ग्रहेशादेकवस्तुनः॥
अस्ति ह्यात्मा परो देहात् यो देहीति च कथ्यते।
गृहीच गृहमध्यस्थो लग्नादिच समाचरेत्॥
देहे चताद्रिसंरोहात् नशो देह्यस्ति कश्चन।
स एव पूज्यते कुर्वन् उद्देशो तस्य तावति।
वार्यते कर्मणा चार्यं बाध्यते कर्मणापि च॥
उभयस्यापि चैवात्र प्रत्यक्षं दृश्यते द्विजाः!।
मायावित्तञ्च मूकत्वमतिक्रान्तागताम्बुमान्॥
अन्नं बाधान्यहर्तॄणां पिशुने पूतिनासिना।
भरती वर्णकैश्चित्रैर्देहस्य वर्णयेत्तथा॥
कुर्वन्नानाविधं कर्म तथात्मा कर्मजस्तनूः।
जरायुजाण्डजादीनि वपूंसि यो ग्रहेन्निजैः॥
कर्मभिर्वर्णभेदैश्च चित्रदैर्मत्यरूप्यतः।
बधिरान्धकिनः क्लीबा जायन्ते पुरुषाधमाः॥
निरतः स पुनर्भूत्वा विद्वद्विप्रकुलेषु च।
महाकूर्चांश्च जायन्ते लक्षणाङ्कितयान्विताः॥
धनवन्तः प्रजायन्ते वेदवन्तो यशस्विनः।
रूपसम्भाग्यसम्पृक्ताः सर्वेषां नयनप्रियाः॥
ब्रह्माद्याश्चरतां शान्ताः षट्कर्मनिरतास्तथा।
पञ्चयज्ञकृतो नित्यं अग्निष्टोमादिषु स्थिताः॥
द्विजोपास्तिकरा नित्यङ्कुर्वाचार्यादि पूजकाः।

चतुराश्रमधर्माणां कथिताः समदर्शिनः ॥
गुणैः सर्वैः समायुक्तास्तेजस्विनो द्विजप्रियाः।
एवम्भूताश्च ये विप्रास्तेषां विष्णुः सदान्तिके ॥
विष्णुश्च सर्वदैवत्यं तस्माद्विष्णुमयोभवेत्।
दैवत्यार्चाकृतां नित्यं गुरूपास्तिष्टतान्तया ॥
ब्रह्मैवाचामतां सम्यक् ब्रह्मनान्विध्यगच्छति।
तदुपास्यं सदा ब्रह्म यावत्साधनकञ्च यत् ॥
बहुपापान्विदित्वा यः संसरेन्नेह मानवे।
वदन्ति ब्रह्मदेवेशे ब्रह्मन्यासमनेकशः ॥
ब्रह्मापि द्विविधं धाम न परं परमेव च।
समानं सपरं ब्रह्म शब्दब्रह्मेति कीर्तितम् ॥
प्रणवाख्यन्निरूपन्तत् प्रागेव हि विशेषतः।
प्राणायामे तदभ्यस्य पूरकाद्यैश्च वायुभिः ॥
पूरको कुम्भको वायू रेचकस्तु द्वितीयकः।
येन व्यावर्तते वायुर्नासाग्रान्निःसरन्बहिः ॥
श्वासयोगेन तं प्राज्ञः पूरकं तद्विदोऽनिलम्।
श्वासयोगं वदन्त्येनं कवय स्तन्तु पावनम् ॥
विदुस्तं रेचकं तज्ज्ञाः रेच्यश्च शनकैः शतैः ॥
न वेगाद्रेचयेद्वायुः सर्वथा विघ्नभाक् भवेत्।
मोचयेन्मन्दमन्दन्तु वह्निः स्यात् कुम्भितो यथा ॥
नासाग्रस्थितपाणिस्तु सशिखज्वालनं त्वमम्।
अनिलं रेचयेद्योगी न मन्दं वाति वेगवान् ॥
न ज्ञायतेऽनिलो यस्य निःसरन्नासिकाग्रतः ॥
यस्मात्तं कुञ्चितो जन्म प्राणयोगी स उच्यते।

दीर्घायुष्यं परं ज्ञानं समस्ता योगसिद्धयः॥
देहे तस्यावतिष्ठन्ति प्राणायामवशीकृताः।
यत्र तिष्ठति जीवोऽस्य निःस्पृहोऽमृत उच्यते।
स किन्न धार्य्यते प्राणो ब्रह्मा तिष्ठति यत्र तु॥
प्राण एव हि चात्मा च प्राणो देहस्य वाहकः।
शरीरान्निःसृते प्राणे नात्मा विग्रहवाहकः॥
देहन्त्यक्त्वा यदा जीवो वहिराकाशमाश्रितः।
तदा निर्विषयो वायुर्भवेदत्र न संशयः॥
तदा ससर्ज देहेषु नासाग्रमाश्रितः शिवः।
प्रत्यक्षः सर्वभूतानां तिष्ठते नच लक्ष्यते॥
तदा न श्वसते वायुस्तदा निष्कल मुच्यते।
नाभिसंस्थन्तु विज्ञाय जन्मबाधाद्विमुच्यते॥
देहस्थः सर्वसत्वानां स जीवति शृणोति च।
धर्माधर्म्मौ अवष्टभ्यौ देहे देहे व्यवस्थितौ॥
सुहृत्कक्षसंस्थस्तु अथ ऊर्द्धं प्रधावति।
धर्माधर्म्ममहापाशै र्गृहीतः स प्रवर्त्तते॥
अर्द्धमुच्छ्वसते यावत् प्राणोद्र्व्यसमीरणात्।
तावत्प्राणस्तु विज्ञेयो यावन्नासाग्रमाश्रितः॥
अवस्थं निष्कलं ब्रह्म यावन्न श्वसते द्विजः।
श्वसनेन समायोगादाकाशात्पुनरागतः॥
नासारन्ध्रसमालीन स्तदा निष्कल उच्यते।
स जीव इति विख्यातः स विष्णुः स महेश्वरः॥
ध्यातव्या देवतास्तत्र क्रमेण पूरकादिषु।
विष्णुब्रह्मेश्वरास्तेषु स्थानेषु स्थावरा द्विजैः।

नीलपङ्कजविख्यातं आनीय नाभिमध्यतः ॥
महात्मानं चतुर्बाहुकेयूरन्तं हरिं स्मरेत्।
हृत्पद्मे कुम्भके ध्यायेद् ब्रह्माणं पङ्कजासनम् ॥
रक्तेन्दीवरवर्णाभं चतुर्वक्त्रं पितामहम्।
रेचके शङ्करं ध्यायेत् ललाटस्थं त्रिशूलिनम् ॥
शुद्धस्फटिकसङ्काशं संसारार्णवतारकम्।
एवं श्वसनसरोधो देवतात्रयचिन्तनात्।
अग्नितोयश्वसंयोगादन्तरं शुद्ध्यते त्रिभिः ॥
निरोधादभवद्वायु स्तस्मादग्निस्ततोजलम्।
इति त्रिदेवतायोगात् शुद्धन्त्येनं पुनर्द्विजाः ॥
भवन्ति प्रणवोपेताः प्राणायामस्तु षोड़श।
अपि भ्रूणहनं मासात् पुनात्यहरहः क्षतः ॥
प्रातरहस्तसायञ्च पूरकं ब्रह्मणोऽन्तिकम्।
रेचकेन तृतीयेन प्राप्नुयात् परमं पदम्।
न प्राणेनाप्यपानेन वायुवेगेन रेचयेत् ॥
प्रागुक्तेन प्रयोगेण मोचयेत्प्राणसंयमी।
शरीरञ्च शिरोग्रीवं विहत्पाणि च पादयम् ॥
सर्वाङ्गं निश्चलं धार्य्यमापूर्य्य सर्वनाड़िकाः।
संधृत्याङ्गानि सर्वाणि कर्मविज्ञानकृद्द्विजः ॥
बद्धासनो चलाङ्गस्तु कुर्यादसुनिरोधनम्।
कृत्वासुसञ्चयं विद्वान् विधिवत्सुः समुपस्पृशेत् ॥
अन्तरे शुध्यते यस्मात् कुर्यादाचमनं स्मृतम्।
इत्युक्तः प्राणसंरोधो देवतात्रयसंयुतः ॥
त्रिमात्रप्रणवस्तत्र ध्यातव्यः सर्वयोगिभिः।

स्मर्यमाणस्य यातस्य विश्रान्तिः स्याद्मात्रकैः ॥
तत्परं निष्कलं ज्ञानं तद्विदु ब्रह्मचिन्तकाः।
मृदुमध्योत्तमत्वाच्च स्थूलसूक्ष्मानुभावतः ॥
त्रिविधं प्राणसंरोधं विदुस्तत्त्ववेदिनः ।
क्रियमाणो विशेषेण प्रत्याहारोऽय मुच्यते ॥
सर्वं प्रागुक्तमेव स्याद्विशेषं तु निबोधत ।
वाह्यं वायुं यथोत्साहं आकृष्य यच्छनैः शनैः ॥
निरुध्य विधिवद्योगी प्रत्याहारः स उच्यते ।
व्यावृत्यातिमुखी यत्र खानि यत्र निरुध्य च ॥
चिन्तयेन्निश्चलीकृत्य प्रत्याहारः स उच्यते ।
प्राणाद्यवयवस्थूलाः संकल्पाद्यास्तुवायवः ॥
निरोद्धव्या दशोऽप्येते प्राणसंयमकारिभिः ।
वायुरेकोऽपि देहस्थः क्रियाभेदेन भिद्यते ॥
प्रकर्षेण समन्तात्र न यानादिक्रिया स्मृताः ।
भविष्यातीतकालेभ्यः कर्मभ्यश्चास्तु संयमी ॥
सर्वानिलांस्तथा खानि निरुध्यैकत्र धारयेत् ।
स धीमान्वेदविद्विद्वान् स योगी ब्रह्मवित्तमः ॥

स्थानं द्विजन्मा विधिवत् अन्तस्थ माशस्थ यदूयातिविधिः परस्य पाराशरोक्तैर्बहुभिः प्रकारै रुक्तोविधिः प्राणनिरोधनस्य ॥

प्रत्याहारो विशेषस्तु प्रोक्तस्तस्यैव वित्तमाः ! ।
यदभ्यस्याप्नुयाद्ब्रह्म सर्वदा नैदमव्ययम् ॥

इति श्रीबृहत्पाराशरे प्राणायामप्रत्याहारविधिः ।

यातैस्तु पुनरावृत्तिः कदाचिदिह दृश्यते ।
संसृतिं नाप्नुयाद्येन शक्रस्तु सुखदाब्रवीत् ॥
उक्तोऽसि संयमं पूर्वं विधिहीनोऽपि नाशनः ।
निबोधध्वं चतुर्थन्तु ध्यानं प्रणववैभवाः ॥
विधिवत्प्रणवध्यानमेकचित्तस्तु योऽभ्यसेत् ।
ब्रह्माभ्येति स मुक्तात्मा स योगी योगिनां वरः ॥
तद्ध्यानमसुसंरोधं तुर्यमभ्यगितोच्यते ।
तद्ध्याध्यान पिचन्तु चिन्तापिचविवर्जितम् ॥
तच्छान्तं निर्मलं शुद्धं ध्यातव्यं हृत्सरोरुहे ।
तद्धे यन्तद्वरेण्यन्तु मुक्तिबीजं तदुच्यते ॥
सञ्चिन्त्य व्याहृतीः सप्त प्रणवाद्या स्तदन्तकाः ।
सम्यगुक्त मिदं ध्यात्वा परब्रह्मणि योजयेत् ॥
हुतभुक् पवनो जीवस्त्रयोऽप्येते हृदि स्थिताः ।
ये तत्सर्वन्तु वैकत्र संसारे ध्यानकृद्द्विजः ॥
ॐङ्कारावर्त्तनालेन उद्धृत्य परियोजयेत् ।
योजयेत्सर्वमेवैतस्मिन्नयोगी स उच्यते ॥
शून्यभूतं तु यत्प्राणो ह्यासजीवितसंज्ञितम् ।
यस्मादुत्पद्यते श्वासः पुनस्तत्र निवेशयेत् ॥
आद्यन्तप्रणवं विद्वान् घटाकाशवदुत्सृजेत् ।
स पश्यन् निर्गलं योगीपुरुषं सम संशयम् ॥
अन्तर्वक्रः बहिः सम्यक्कुण्डलीभूतसर्पवत् ।
ध्यातव्यः प्रणवस्तस्य मध्यमं धाम संस्मरेत् ॥
स ध्याताल्मा स विन्दुश्च तदेवं परमं पदम् ।
तदभ्यस्तं हि तज्ज्ञात्वा स तस्मिन्नेव लीयते ॥

प्रथमं प्रणवो वक्ता स्वप्नचर: परमाक्षर: ।
ऋजत्वमन्यदाप्नोति संप्राप्य परमं पदम् ॥
पञ्चमं तु पदं विद्वन् ! तन्मूर्धन्यवतिष्ठते ।
नादविन्दु: समाख्यातोद्विजेन्द्रा: । परमंपदम् ॥
यत्प्राप्य न निवर्त्तन्ते भारत्यस्तात्यमेव च ।
सर्वेभ्यो मातृकावर्णा: पुनस्तत्र विशन्ति च ।
वर्णात्मासन्नवर्णास्तु समस्तं वर्णजीवनम् ॥
न दीर्घं न च ह्रस्वञ्च न घोषं नाप्यघोषवत् ।
न विसर्गस्य वा विद्वान् नानुस्वारविपर्यय: ॥
हृद्याकाशनिविष्टं यदचलत्व प्रयाति चेत् ।
ज्ञानयोगे त्रिषष्टिर्वै यो विभर्त्यक्षराणि तु ॥
तत्परं योगिभिर्ध्येयं व्योम यस्य तु मध्यमम् ।
व्योमान्तगं यत्तुध्येयमनन्ताकाशमव्ययम् ॥
चिन्तयामो वयं तत्त्वं धियो यो न: प्रचोदयात् ।
ये तद्ब्रह्मत्रयीरूप मेतद्धर्म स्त्रयीमया: ॥
येषां स परमा मुक्ति र्गत्वा यां न निवर्त्तते ।
आदाय चापं प्रणवं च वाणं सन्ध्याय चात्मानमवेघलक्ष्यम्॥
सम्यग्विधिं तं प्रविविश्य तस्मिन् प्राप्नोति योगी स तु मुक्तिधाम
उद्दिश्यभक्तिं विधिनादि विद्वन्! ध्यानं विधेयं ध्वनिपूर्वकञ्च ॥
सर्वं विधानं विधिवच्च सम्यक् यत्तु समर्योविधिरेव चास्य ॥

इति श्रीबृहत्पाराशरीये योगाध्यायप्रणव-
ध्यानविधि: सम्पूर्ण: ।

अथान्यत्संप्रवक्ष्यामि विधानं ध्यानकर्मणाम्।
नानामतोदितं कार्यं परब्रह्माप्तिकारकम्॥
कामात्मकमिह प्रोक्तं परमात्मा किमुच्यते।
वक्ष्यमाणमिदं विप्राः! शृणुध्वं भक्तितत्पराः!॥
स्वीयेर कर्मणा येषां शरीरग्रहणं भवेत्।
कर्मात्मन स्तदुच्यन्ते निर्गताः परमात्मनः॥
ये न स्पृशन्ति सत्त्वांशं स्तथा सत्त्वद्योगुणाः।
कदाचित्केन कर्माणि परमात्मा ततः परम्।
निष्ठानाशौचविद्येति गुणत्रयं स्पृशन्ति हि॥
सो यस्मिन् कथमेतस्मिन् लोकपालो विधीयते।
स्वात्मानमेव चात्मानं वेष्टकोष्टककारवत्॥
कर्मणैव प्रजातस्तु बाह्यस्वार्थविमोहितः।
तस्माद्विवर्जयेत्कर्म स्वर्गादेरपि साधकम्॥
संसारेस्वर्गतिः कर्मक्षयः सतु पुनर्यतः।
सीमैषा परमाविप्रा ब्रह्मणः पातमोक्षयोः॥
कर्मस्थानमिदं धात्री कृतमत्रोपभुज्यते।
वैदिकः कर्मयोगश्च दिवोऽप्यावत कस्य तु॥
योतेद्वाद्वन्तिकस्तस्य ज्ञानयोगमतोऽभ्यसेत्।
हृद्विनिःसृतनाडीनां सहस्राणां द्विसप्ततिः॥
तन्मध्यावस्थितं तेजः शशिप्रभया भाति यत्।
यन्मध्यमण्डलेत्यात्मा विधूमाननदीववत्।
संज्ञातव्योविदित्वा तं संसरेन्न पुनर्यतः॥
भूरिभुवमधोवक्त्रं तत्रज्ञातव्यं व्यवस्थितम्।
नालुच्छेदेन वातेन कृत्वोद्घास्य विकासयेत्॥
विकास्य तस्य मध्यस्य मचलं दीपशिखेव तत्।

तदूर्द्ध्वं निःसरेत्शुभ्रं सूक्ष्मं तत्तु विचिन्तयेत् ॥
ललनद्वारनिर्गच्छन् कुर्वन्योगीच चिन्तयेत् ।
तावत्तु चिन्तयेद्यावन्निरालम्बञ्च इच्छति ॥
निरालम्बं यदा ध्यानं कुर्वाणो निश्चलो भवेत् ॥
तदा तदुच्यते ब्रह्म स योगी ब्रह्मवित्तमः ।
तत्पदञ्च पदातीनां तत्प्राप्ती मुक्त उच्यते ॥
इति ध्यानं विधातव्यं मुक्तिकाङ्क्षि द्विजैर्द्विजाः ! ।
भूतानामात्मभूतस्य तानि सम्यक् प्रपश्यतः ॥
विमुह्यत्यमरो मार्गं पदं किं न पदस्य तु ।
यो न तिष्ठति यो याति न कश्चित्सर्वथैव यः ॥
अवाच्यो वाङ्मयोऽन्यस्तु सर्वश्रुति प्रचोदितः ।
योऽन्तिकेऽपि दवीयांश्च योऽस्तिनास्तिस्वरूपकः ॥
यस्येदं ममेति स तत्रैव च प्रलीयते ।
यस्तु सर्वाणि भूतानि पश्यत्यात्मगतानि तु ॥
आत्मानं तेषु सर्वेषु ततो यो न विमुह्यते ।
सर्वभूतानि भूतात्मा यत्र तिष्ठति धीमते ! ॥
शौचमोहौ च कौ तस्य शोकञ्च ह्यनुपश्यतः ।
समाम्नावुत्तमादीनां यन्मन्त्रं ब्रह्म यो द्विजः ॥
ॐ खं ब्रह्मेति चाम्नायो दर्शकश्चैष वेधसः ।
आत्मज्ञानबहूपाया उक्ता स्त्वन्ये च कोविदैः ॥
ते स्तैः सर्वैः स मन्तव्यो र ज्ञातव्योपदेशतः ।
ज्ञातव्यः परमात्मैवं भक्तिं कृत्वा परेण तु ।
ध्यानज्ञानस्य तद्भक्तो यत्र विश्रमते मनः ॥
तदेवोपदिशेत्तस्य वस्तुज्ञानोपदेशकम् ।

मनो यस्य विशत्यन्तु यत्र ज्ञाति च वस्तुनि॥
ध्यायेत्स तु तद्देवेति यावत्स्यात् ध्यानसन्ततिः।
ध्याने तत्र तु संलग्ने हरावात्मनि वा पुनः॥
ध्यानं नियोजयेद्योगी तं निरालम्बतां नयेत्।
योगशास्त्रेषु यत्प्रोक्तं रहस्यारण्यकेषु च॥
तत्तथोपदिशेद्ध्यानं ध्यायेदपि तथैव च।
प्रवदन्त्यन्यथा केचिच्छुभादिभेदवांस्ततः॥
त्रैविध्यं विदुषो विद्वन्विद्धि तत्त्वपरे पदम्।
चित्तजं स्मृतिजं भावं भावनाभावमेव च॥
त्रिविद्यमात्मविद्येत योगाभ्यासफलाफलम्।
आत्मशक्तिशिवस्येति चैतन्यमतिसंस्थितम्॥
उत्तरोत्तरवैशिष्यात् योगाभ्यासः प्रवर्त्तते।
स एको निष्कलीभूतः कर्मात्मा यत्र योजितः॥
न बिभेति सचैकाकी भयं वै जायतेऽन्यतः।
न देवगतिर्भिन्नाद्यां ध्यानं यस्यास्ति योगिनः॥
सम्बित्सोऽव ह्यजं शान्तं कदाचित् कुवरेण तत्।
त्र्यम्बकश्च चतुर्वक्त्र श्चतुर्बाहुः परेश्वरः॥
एकएव महेशो वै ततस्त्रिधेति कीर्तिता।
नाभिमध्यस्थितं विद्वन्विज्ञानेन सुनिर्मलम्॥
रविवद्भजमानन्तु काशद्रश्मिगणैर्द्विजाः!।
चिन्तयेद्धृदि मध्यस्थं दीप्तिमत् सूर्य्यमण्डलम्॥
तस्य मध्यगतो सोमवह्निचन्द्रशिखा महान्।
तन्मध्यन्तु परं सूक्ष्मन्तद्ध्यायेद्योगमात्मनः॥
तन्मध्ये चिन्तयेद्देवं वक्ष्यमाणक्रमेण तु।

विम्बमध्यगतो नादो नादमध्यगतो ध्वनिः ॥
ध्वनिमध्यतः सारः सारमध्यगतोऽंशुमान् ।
तस्य मध्यगतं ब्रह्म शान्तं तस्य तु मध्यगम् ॥
परं पदन्तु यच्छान्तं सम्यगुद्दृत्य यो व्रजेत् ।
जीवात्मा कायमध्यस्थस्तदापि देहवर्जितः ॥
वक्त्रनासापुटस्थस्तु भुञ्जीत हृदयान् प्रभुः ।
इत्येतद्ध्यानमार्गन्तु वदन्ति कवयो द्विजाः ! ॥
क्वचिदन्यान्यथा ब्रूयुरूपं ब्रह्मविदो विदुः ।
न ममापि हि दुःखस्य शर्म यत्र निरन्तरम् ॥
ब्रह्मणोरूपमानन्दन्तन्मुक्तरूप मुच्यते ।
सर्वव्यापी य एकस्तु यश्चानन्तश्च भावकः ॥
स मन्तव्योऽजरोह्यात्मा सर्वं व्याप्य च यः स्थितः ।
एकं व्योम यथानेकं प्रविभे रुपलभ्यते ॥
एकोऽप्यात्मा तथानेकोजलाधारेषु सूर्य्यवत् ।
विश्वरूपोमणिर्यद्वद्वर्णान् गृह्णात्यनेकशः ॥
उपाधिस्थ स्तथा त्वेको न नादेहेषु कर्मतः ।
कलाकाष्ठादिभेदेन वर्त्तमानादिभेदतः ॥
एकः कालो यथा नाना तथात्मैकोऽप्यनेकधा ।
देहमध्यस्थितं देवं यो न ध्यायति मूढधीः ॥
सोऽर्कलब्धं मधु त्यक्त्वा क्लेशायाच्चो गिरौ व्रजेत् ।
यत्तीर्थयानं जपयागहोमान् कुर्य्याद्विपुष्मान् सतु वैष्णवः स्यात्
सचैव पिण्डं परिहृत्य दूरादन्नंप्रभावैस्स वरिष्ठपृष्ठे ॥
संभ्रमस्य वै विधिवशात्करणोग्रचक्रे
पापेन कुम्भदवधात्त्वरेण नूनम् ।

आरोप्य सोऽर्थव्रत दण्डमुखेन तूर्णं
हृत्पद्मसंस्थशिवतत्वमतिप्रहीणम् ।
द्वौ मार्गावात्मनो ज्ञेयौ ब्राह्मणैर्ब्रह्मचिन्तकैः ।
अभियाति विदित्वाथ सायुज्यं परवेधसः ॥
विद्वन्धूमादिरेको वै द्वितीयस्तु विराडिकः ।
यत्र देवौ प्रतीतव्यौ यत्प्रतीतिरजायत ॥
धूमः क्षिप्रं सितः पक्षो दक्षिणायनमेव च ।
लोकपित्यञ्च चान्द्रञ्च मातरिश्वानुकर्षणाः ॥
पाथोधात्री कषादेने सम्भवन्ति समाश्रिताः ।
अर्चिरहः सितः पक्ष स्तथाचैवोत्तरायणम् ॥
देवलोक स्तथा सूर्यः विद्युतश्च क्रमादिमान् ।
मनसा पुरुषा यान्ति तानतो ब्रह्मलोकताम् ॥
यत्र जातो पुनर्देहं संसरन्ति पुनर्द्विजाः ! ।
मार्गं ह्यय पुनर्धीमन्मन्तव्यं सद्द्विजैर्द्विजः ॥
यन्न ज्ञातेन विज्ञातुं नाकमोक्षौ च सिध्यतः ।
स आरण्यस्यभिक्षूणां त्रयाणामपि स द्विजाः ! ॥
समानज्ञानमेतद्वदन्ति ब्रह्मविदो विदुः ।
यथा दहति वेधांसि समिद्धस्त्वाशुशुक्षणिः ॥
ज्ञानमभ्यस्यमानन्तु तथा दहति संहृतीः ।
तस्मान्मार्गद्वयेनापि ह्यात्माज्ञेयो भवेद्द्विजैः ॥
ये न जानन्ति तेषान्तु द्वन्द्वं यूकादियोनिषु ।
पन्नगत्वं कृमित्वं वा कीटत्व मथवाप्नुयुः ॥
एतेभ्यस्त्वधमेभ्यश्च जायन्ते तासु योनिषु ।
विद्याविद्भिः स मन्तव्यः स हेतुः स्वर्गमोक्षयोः ॥

विद्यामोक्षप्रदासा च अविद्यामन्युनाशकृत् ।
ज्ञानयोग स्तथाकर्म विद्याविद्भिः स्मृतो बुधैः ॥
अपवर्गाय वै नृणां कर्म त्रिविष्टपाय च ।
कर्मापि क्रियमाणं निरपेक्षं मोक्षकृद्भवेत् ॥
विष्णवे गुरवे वापि कर्म कृत्वा निवेदयेत् ।
आत्मनः फलमिच्छद्भि र्यत्कर्म क्रियते नृभिः ॥
तेनैव वाञ्छितावाप्ति स्तेनान्यद्योपजायते ।
हरिं वानित्यमभ्यस्य सर्वभावेन सद्विजैः ॥
तदभ्यासवदाप्नोति मृत्युदाहात् हरिस्मृतेः ।
एक एव हि स ध्येयो यत्पर नास्ति किञ्चन ॥
विनाशमान् महानेष स ध्येयः संयतेन्द्रियैः ।
महान्त पुरुष देवं हृदिरूप मतःपरम् ॥
ब्रह्मविन्मृत्यमृत्युर्वै प्रयाति ह्यनिवर्त्तकम् ।
एष एव नृणां पन्था ब्रह्मा वै य मुपासते ॥
दास्य जन्मस्वनेकेषु विचित्यश्चैकचेतसाम् ।
नाभिभक्तापि वै केन नान्यभ्यासकृतेरपि ॥
ब्रह्माप्तिजन्मनां पुंसां किन्तु सा भूरिजन्मभिः ।
यतयः सर्वदाभ्यास.ब्रह्म यन्न प्रपेदिरे ॥
तन्मनुष्यैः कथं प्राप्य मेकेनैव तु जन्मना ।
ज्ञानाभ्यासेन तद्ब्रह्म तैश्च दम्भस्वरूपकैः ॥
न प्राप्यते परं ब्रह्म न.वाप्यासनमुद्रया ।
बहुभिः किमुपायैस्तु प्रोक्तैर्वा ग्रन्थविस्तरैः ॥
एकमेवाभ्यसेत्तन्तु ये न चित्ते भवेद्धरिः ।
एकैव शुद्धिस्तु सदा यथा स्यात् क्रियतां तथा ॥

नैव कुर्य्यान्मनस्त्वन्यं विरुद्धमिति सर्वथा।
भावः स्वर्गाय मोक्षाय नरकायापि स स्मृतः॥
तस्मात्तं शोधयेद्यत्नाच्छुचिः स्याद्भावशुद्धितः।
एकस्य पुत्रकर्त्तारौ भक्तस्यापिच योषितः॥
भिन्नभावौ भवेतान्तावतीव वै विशोधयेत्।
परिष्कृतो नरो नार्य्याः संह्लादयति यौवनम्॥
तल्पस्थोऽपि सकामान्तां भावहीनो न कामयेत्।
एकीभावो ह्यसैकार्थौ यथा स तु न वै चलेत्॥
तद्बुद्धा पञ्चतामिच्छन् स्वर्गमोक्ष मवाप्नुयात्।
कृत्वापि विविधान्यागांस्तपस्तप्त्वा सुदुष्करम्॥
मृत्युकाले मतिर्य्यस्याद्गतिं तानेव विन्दति।
योगप्रयोगः कथितः द्विजेन्द्रा! ध्यानस्य मार्गौ बहुधापि वापि।
योऽभ्यस्यमानस्तु भवद्विधानां ब्रह्माप्तिकृदस्तु तथा द्विजानाम्।
प्रत्याहारश्च योगश्च ध्यानविस्तरतस्तथा।
उक्तं द्विजहितार्थं वै ब्रह्मावाप्तिकरं द्विजाः!॥
अङ्गुल्यङ्गुष्ठयोर्नादक्षणं स्यात्तद्वयं तुटिः।
द्वाभ्याञ्चैव लवस्ताभ्यां निमेषोऽपि लवद्वयम्॥
तैः पञ्चदशभिः काष्ठास्ताश्च त्रिंशत्कलाः स्मृताः।
द्वाविंशति त्रिभागस्तु तुटिकेति प्रकीर्तिता॥
तद्द्वयञ्च मूहूर्त्तः स्यात्ते त्रिंशत्तुक्षयादिनम्।
तत्पञ्चदशकं पक्षस्तद्द्वयं मास उच्यते॥
तद्द्वयं ऋतुरित्युक्तं तद्द्वयं काल उच्यते।
तस्माद्धमयनं प्रोक्तं तद्द्वयं वत्सरस्तथा।
पञ्चभिस्तैर्युगः प्रोक्तो तद्द्वादशकषष्ठकम्॥

षष्ठकः षष्टिगुणितो वाक्पते युगमुच्यते ।
षष्टिघ्नः सोऽपि कालज्ञैः प्रजानाञ्च युगः स्मृतः ॥
तद्दयन्तु कलिः प्रोक्तो तद्द्वयं द्वापरं भवेत् ।
कलित्रयाणां त्रेता स्यात् कृतं कलिचतुष्टयम् ॥
कलिभिर्दशभिर्विद्वान् चतुर्युग मिति स्मृतम् ।
चतुर्युगसहस्रेण त्वजाह्नः कल्प उच्यते ॥
अष्टयुगा पितृसन्ध्या सायंसन्ध्या पितावती ।
तदेकसप्ततिगुणं मन्वन्तर मिति स्मृतम् ॥
मन्वन्तरद्वयेनेह शक्रक्षयः प्रकीर्तितः ।
एवं मानेन वर्षाणां शतं ब्रह्मक्षयः स्मृतः ॥
ब्रह्मक्षयशतेनापि विष्णोरेक महर्भवेत् ।
एतद्विधाः समासेन प्रयान्तेऽव्ययशते द्विजाः ! ॥
रुद्रस्यात्मनि लीयन्ते भूतभौतिकसृष्टयः ।
लब्धं ययानेन परंपदं तत्तद्ध्यानयोगात् सतु तत्र लीयते।
परम्पराणां परमन्त्वचिन्त्यं परात्परं दिष्टपदादतीतम् ॥
त्वणादिकालं क्रमशोऽप्यमत्तः प्रयाति चैतत्पदमव्ययं तत् ।
कालज्ञानेन योगेन योगिभि र्ध्यानकारिभिः ॥
मुमुक्षुभिः सदा ज्ञेयं निरालम्बं परं पदम् ।
पराशरोक्तशास्त्रन्तु चातुर्वर्ण्यं जनाश्चरेत् ॥
हितमुक्तं प्रयत्नेन सदा ध्येयं विजायते ।
श्रावयिष्यति यः श्राद्धे ब्रह्मणान् भक्तितत्पराः ॥
प्राप्स्यन्ति पितरस्तस्य तृप्तिं वै शाश्वतीं द्विज ! ।
द्वादशं दश वा सप्त षड्ष्टौवाथवा नव ॥

दैविके पैतृके वापि श्लोकाः श्राव्या द्विजातिभिः ।
य इदं शृणुयाद्विप्रः श्रावयेत्पाठयेदपि ॥
स प्रध्वस्तसमस्तैना ब्रह्मलोक मवाप्नुयात् ।
त्रिभिः श्लोकसहस्रैस्तु त्रिभि र्द्दतशतैरपि ॥
पाराशरोदितं शास्त्रं सुव्रतः प्रोक्तवान् मुनिः ॥

इति श्रीवृहत्पाराशरस्मृतिः सम्पूर्णा ।

लघुव्याससंहितायाम्।

प्रथमोऽध्यायः।

ऋषय ऊचुः।

अहन्यहनि कर्त्तव्यं क्रमाणां हि क्रमाद्विधिम्।
ब्राह्मे मुहूर्त्ते उत्थाय धर्मार्थाननुचिन्तयेत्॥
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेवच।
उषःकाले तु संप्राप्ते कृत्वाचावश्यकं बुधः॥
स्नायान्नदीषु शुद्धासुः शौचं कृत्वा यथाविधि।
प्रातः स्नानेन पूयन्ते येऽपि पापकृतो जनाः॥
तस्मात्सर्वः प्रयत्नेन प्रातःस्नानं समाचरेत्।
प्रातः स्नानं प्रशंसन्ति दृष्टादृष्टफलप्रदम्॥
ऋषीणां कुर्वतां नित्यं प्रातःस्नानं न संशयः।
मुखे सुप्तस्य सततं लालानित्यं स्रवन्ति हि॥
ततो नैवाचरेत्कर्माण्यकृत्वा स्नानमादितः।
अलक्ष्मी कालकर्णीच दुःस्वप्नं दुर्विचिन्तनम्॥
प्रातःस्नानेन पूयन्ते सर्वपापान्न संशयः।
न हि स्नानं विना पुंसां प्राशस्त्यं कर्मसु स्मृतम्॥
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्।
अशक्तोऽविशिरस्कं वा स्नानमात्रं विधीयते॥
आर्द्रेण वाससा चाङ्गमार्जनं कापिलं स्मृतम्।

अप्राशस्त्ये समुत्पन्ने स्नानमेव समाचरेत् ॥
ब्राह्मादीन्यथवाशक्तौ स्नानान्याहुर्मनीषिणः।
ब्राह्ममाग्नेय मुद्दिष्टं वायव्यं दिव्यमेव च ॥
वारुणं यौगिकं चैव सदा स्नानं प्रकीर्त्तितम्।
ब्राह्मं तु मार्जनं मन्त्रैः कुशैः सोदकविन्दुभिः॥
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्।
यत्तु सातपवर्षेण तत् स्नानं दिव्यमुच्यते ॥
वारुणञ्चावगाहञ्च मानसञ्चात्मवेदनम्।
यौकिकं स्नानमाख्यातं योगोऽयं विष्णुचिन्तनम् ॥
आत्मतीर्थमिदं ख्यात सेवितं ब्रह्मवादिभिः।
मनःशुद्धिकरं पुंसां नित्यं तत् स्नानमाचरेत् ॥
शक्तश्चे द्वारुणं विद्वानप्राशस्त्ये तथैवच।
प्रक्षाल्य दन्तकाष्ठञ्च भक्षयित्वा विधानतः॥
आचम्य प्रयतोनित्यं प्रातःस्नानं समाचरेत्।
मध्यांङ्गुलिसमस्थौल्यं द्वादशाङ्गुलिसम्मितम्॥
सत्वचन्दन्तकाष्ठं स्यात्तस्याग्रेण तु धावयेत्।
क्षीरवृक्षसमुद्भूतं मालिनीसम्भवं शुभम् ॥
अपामार्गञ्च विल्वञ्च करवीरं विशेषतः।
वर्जयित्वा निषिद्धानि गृहीत्वैकं यथोदितम् ॥
अपहृत्य दिनं पापं भक्षयित्वा विधानवित्।
आचम्य प्रयतोनित्यं स्नानं प्रातः समाचरेत् ॥
नोत्पाटयेद्दन्तकाष्ठमङ्गुल्या धावयेत् क्वचित्।
प्रक्षाल्य भङ्क्त्वा तर्जन्या शुचौ देशे समाहितः॥
स्नात्वा सन्तर्पयेद्देवान् ऋषीन् पितृगणान् क्रमात्।

आचम्य मन्त्रवन्नित्यं पुनराचम्य वाग्यतः ॥
मार्जनं वारुणैर्मन्त्रैरात्मानं सकुशोदकैः ।
आपोहिष्ठादिव्याहृतिभिः सावित्र्या वारुणैस्तथा ॥
ओङ्कारव्याहृतियुक्तां गायत्रीं वेदमातरम् ।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः ॥
प्राक् तु तेन समासीनो दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत्सन्ध्यामिति श्रुतिः ॥
या सन्ध्या सा जगत्सृष्टिस्थितिसंयमकारिणी ।
ऐश्वरी तु पराशक्ति स्तत्र यत्र समुद्भवा ॥
सवितु र्मण्डलगतां गायत्रीं वै जपेद्बुधः ।
प्राङ्मुखः प्रयतोविप्रः सन्ध्योपासन माचरेत् ॥
सन्ध्याहीनोऽशुचिर्नित्य मनर्हः सर्वकर्मसु ।
यदन्यत् कुरुते कर्म न तस्य फलमाप्नुयात् ॥
अनन्यचेतसो शान्ता ब्राह्मणा वेदपारगाः ।
उपास्य विधिवत्सन्ध्यां प्राप्ताः पूर्वे पराङ्गतिम् ॥
योऽन्यतः कुरुते यत्नं धर्मकार्ये द्विजोत्तमः ।
विहाय सन्ध्याप्रणतिं स याति नरकायुतम् ॥
तस्मात्सर्वप्रयत्नेन सन्ध्योपासं समाचरेत् ।
उपासितो भवेत्तेन देवयोगतनुः परः ॥
सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीं वै जपेद्विद्वान् ब्राह्मणः प्रयतः स्थितः ॥

इति लघुव्यासस्मृतौ प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः।

अथागम्य गृहं विप्रः समाचम्य यथाविधि।
अग्निं प्रज्वाल्य विधिवत् जुहुयाज्जातवेदसम्॥
ऋत्विक् पुत्रोऽथवा पत्नी शिष्योऽपि च सहोदरः।
प्राप्यानुज्ञां विशेषेण जुहुयाद्वा यथाविधि॥
पवित्रपाणिः शुद्धात्मा शुक्लाम्बरधरोऽपरः।
अनन्यमानसो वह्नौ जुहुयात्संयतेन्द्रियः॥
विना दर्भेण यत्कर्म विना सूत्रेण वा पुनः।
नाक्षयस्तद्भवेत्सर्वं नेहामुत्र फलप्रदम्॥
देवतादीन्नमस्कुर्यादुपहारं निवेदयेत्।
दद्यात्पुष्पादिकां तासां वृद्धांश्चैवाभिवादयेत्॥
गुरुञ्चैवाप्युपासीत हितं तस्य समाचरेत्।
वेदाभ्यास ततः कुर्यात्प्रयत्नाच्छक्तितोद्विजः॥
वेदमध्यापयेच्छिष्यान् धारयेच्च विपाठयेत्।
अपेक्षेत च शास्त्राणि मन्वादीनि द्विजोत्तमाः!।
वैदिकान्नियमान्वेदान्वेदाङ्गानि च सर्वशः॥
उपेयादीश्वरञ्चैव योगक्षेमार्थसिद्धये।
साधयेद्विविधानर्थान् कुटुम्बार्थे तथैव च॥
ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत्।
पुष्पाक्षतान्कुशतिलान् गोमयं गन्धमेव च॥
नदीषु देवखातेषु तटाकेषु सरित्सु च।
स्नानं समाचरेन्नित्यं नदीप्रस्रवणेषु च॥
परकीयनिपानेषु न स्नायाद्वै कदाचन।
पञ्च पिण्डान् समुद्धृत्य स्नायाद्वा सम्भवात् पुनः॥

षड्भैकया शिरः क्षाल्य द्वाभ्यां नाभे स्तथोपरि ।
अतश्चतसृभिः कार्यं पादौ षड्भि स्तथैव च ॥
मृत्तिका च समाविष्टा त्वार्द्रामलकमात्रतः ।
गोमयस्य प्रमाणं तत् तेनाङ्गं लेपयेत्ततः ॥
लेपयेद्यतीरस्थस्तल्लिङ्गेनैव मन्त्रतः ।
प्रक्षाल्याचम्य विधिवत् ततः स्नायात्समाहितः ॥
अभिमन्त्र्य जलैर्मन्त्रैरब्लिङ्गैर्वारुणैः शुभैः ।
आपो नारायणोद्भूता स्तानेवास्यायनं पुनः ॥
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः ।
प्रोक्ष्यसोङ्कारमादित्यं त्रिर्निमज्जेज्जलाशये ॥
आचान्तः पुनराचामेन्मन्त्रेणानेन मन्त्रवित् ।
अन्तश्चरति भूतेषु गुहायां विश्वतोमुखः ॥
त्वं यज्ञस्त्वं वषट्कार आपोज्योतिरसोऽमृतम् ।
द्रुपदां वा त्रिरभ्यसेद्व्याहृतिं प्रणवादिकाम् ॥
सावित्रीं वा जपेद्विद्वान् स्तथैवाघमर्षणम् ।
ततः सम्मार्जनं कुर्य्यादापोहिष्टामयोभुवः ॥
इदमापः प्रवहत व्याहृतिभिस्तथैव च ।
ततोऽभिमन्त्र्य तत्तीर्थमापोहिष्टादिमन्त्रकैः ॥
अन्तर्गत जलेमग्नो जपेत् त्रिरघमर्षणम् ।
द्रुपदां वाथ गायत्रीं तद्विष्णोः परमम्पदम् ॥
आवर्त्तयेद्वा प्रणवं देवं वा संस्मरेद्धरिम् ।
द्रुपदोहि परो मन्त्रो यजुर्वेदे प्रतिष्ठितः ॥
अन्तर्जलात्त्रिरावृत्त्या सर्वपापैः प्रमुच्यते ।
आपः पाणौ समादाय जप्त्वा वा मार्जने कृते ॥

विन्यस्य मूर्ध्नि तत्तोयं सर्वपापैः प्रमुच्यते ।
यथाश्वमेधः क्रतुराट् सर्वपाप प्रणोदनः ॥
तथाघमर्षणं सूक्त सर्वपाप प्रणोदनम् ।
अथोपतिष्ठेतादित्य मूर्ध्वं पुष्पाञ्जलान्वितम् ॥
प्रक्षिप्य देवमादित्यं ऋग्यजुः सामरूपिणम् ।
उदित्यञ्चित्रमित्येतत् तच्चक्षुरितिमन्त्रतः ॥
हंसः शुचिषु इत्येतत्सावित्या च विशेषतः ।
अन्यैश्च वैदिकैर्मन्त्रैः सर्वपाप प्रणाशनैः ॥
सावित्रीं वै जपेत् पश्चाज्जपयज्ञः प्रकीर्तितः ।
विविधानि पवित्राणि गुह्यविद्यास्तथैव च ॥
तिष्ठन् तदेक्षमाणोऽर्कं जपं कुर्यात्समाहितः ।
आसीनः प्राङ्मुखो नित्यं जपं कुर्याद्यथाविधि ॥
स्फटिकेन्द्राक्षपद्माद्यैः पत्र दीप कुशाक्षकैः ।
कर्तव्या त्वक्षमाला स्यात् विशिष्टा चोत्तरोत्तरा ॥
जपकाले न भाषेत नाङ्गानि चालयेत्तथा ।
न कम्पयेच्छिरोग्रीवां दन्तान्वै न प्रकाशयेत् ॥
गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभं हि तत् ।
एकान्ते तु शुचौ देशे तस्माज्जप्यं समाचरेत् ॥
चण्डाला शुद्र पतितान् दृष्ट्वाचम्य पुनर्जपेत् ।
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ॥
सौरान्मन्त्रान्यथोत्साहं पावमानांश्च शक्तितः ।
आचम्य च यथाशास्त्रं शक्त्या स्वाध्यायमाचरेत् ॥
ततः सन्तर्पयेद्देवान् ऋषीन् पितृगणान् क्रमात् ।
आदौ ॐकारमुच्चार्य नाम्नोऽन्ते तर्पयामि च ॥

देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः।
पितॄन् तिलोदकैश्चैव विधिना तर्पयेद्बुधः॥
अपसव्येन सव्येन पाणिना दक्षिणेन तु।
देवर्षीं स्तर्पयेद्धीमान् उदकाञ्जलिभिः पितॄन्॥
यज्ञोपवीती देवानां निवीति ऋषितर्पणे।
प्राचीनावीति पित्र्येषु स्वेन तीर्थेन भाषितम्॥
निष्पीड्येव तु वस्त्रञ्च समाचम्य यथाविधि।
यैर्मन्त्रैरर्चयेद्देवान् पुष्पैः पत्रैस्तथाम्बुभिः॥
ब्रह्माणं शङ्करं सूर्यन्तथैव मधुसूदनम्।
अन्यांश्चाभिमतान् देवान् पूजयेद्भक्तितो द्विजः॥
प्रदद्यादाथ पुष्पाणि विन्यसेच्च पृथक् पृथक्।
न विष्णवाराधनात् पुण्यं विद्यते कर्म वैदिकम्॥
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्।
तद्विष्णोरितिमन्त्रेण सूक्तेनापौरुषेण च॥
नैताभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि।
निवेदयित्वा चात्मानं विमलन्तत्र तेजसि॥
तदात्मा तन्मनः शान्तः तद्विष्णोरितिमन्त्रतः।
अथवा देवमीशानम्भगवन्तं सनातनम्॥
आराधयेन्महेशानं महादेवं महेश्वरम्।
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः॥
ईशानेनाथ वा रुद्रैस्त्र्यम्बकेन समाहितः।
पुष्पैः पत्रैरथाद्भिर्वा चन्दनाद्यैर्महेश्वरम्॥
अथोनमः शिवायेति मन्त्रेणानेन वाचयेत्।
नमस्कुर्यान्महादेवं ऋतं परमेश्वरम्॥

निवेदयित्वा स्वात्मानं यो ब्रह्माणमतःपरम्।
प्रदक्षिणन्ततः कुर्यात्ततो ब्रह्माणि वै जपेत्॥
ध्यायेत देवमीशानं व्योममध्यगतं शुभम्।
अथवा लोकयेदर्कं हंसः शुचिषदित्यृचा॥
कुर्यात् पञ्चमहायज्ञान् गृहङ्गत्वा समाहितः।
देवयज्ञं पितृयज्ञम्भूतयज्ञन्तथैव च॥
मनुष्य ब्रह्मयज्ञञ्च पञ्चयज्ञान् प्रचक्षते।
यदि स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि।
कृत्वामनुष्य यज्ञं हि ततः स्वाध्याय मारभेत्॥
अग्नेः पश्चिमतो देशे भूतयज्ञान्तरेऽथवा।
कुशपूतैः समासीनं कुशपाणिः समाहितः॥
श्रौताग्नौ लौकिकेचापि जले भूम्या मथापिवा।
वैश्वदेवश्च कर्त्तव्यो देवयज्ञः स संस्कृतः॥
यदि स्याल्लौकिके पक्वं तदन्नं तत्र हूयते।
शालाग्नौ तत्रचेदग्नौ विधिरेषः सनातनः॥
देवेभ्यश्च हुतादन्नाच्छेषाद्भूत बलिं हरेत्।
श्वभ्यश्च श्वपदेभ्यश्च पतितादिभ्यएव च॥
दद्याद्भूमौ भूत बलिं क्रिमिभ्योऽथ द्विजोत्तमः।
सायन्तनस्य सिद्धस्य पक्वमन्नं बलिं हरेत्॥
वैश्वदेवं विनार्थेन सायम्प्रातर्विधीयते।
एकन्तु भोजयेद्विप्रं पितृनुद्दिश्य यत्सदा॥
नित्यश्राद्धं तदुद्दिष्टं पितृयज्ञो गतिप्रदः।
उद्धृत्य वायवायत्नः किञ्चिदन्नं समाहितः॥
वेदार्थ तत्व विदुषे द्विजायै वोप पादयेत्।

पूजयेद्ब्राह्मणं नित्यं नमस्येदर्चयेच्च तम् ॥
मनोवाक्कर्मभिः शान्तम् आगतं स्व गृहं गतम् ।
हन्तकार मथाग्रं वा भिक्षां वा शक्तितोद्विजः ॥
दद्यादतिथये नित्यं बुध्येत परमेश्वरम् ।
भिक्षामाहुर्ग्राससमात्रम् अग्रं तस्य चतुष्टयम् ॥
पुष्कलं हन्तकारस्यात्तच्चतुर्गुणमुत्तमम् ।
गोदोह कालमात्रं वै प्रतीक्ष्यं ह्यतिथिं स्वयम् ॥
अभ्यागतान्यथाशक्ति भोजयेदतिथीं सदा ।
अदत्वा देवताभूत भुत्वा तिथि पितृष्वपि ॥
भुञ्जीत चेत्समूढात्मातिर्यग्योनिञ्च गच्छति ।
वेदाभ्यासोऽन्वहंशक्त्या महायज्ञक्रिया क्रमाः ॥
नाशयन्त्याशु पापानि वेदानामर्चनं तथा ।
यो मोहादथवा लोभादकृत्वा देवतार्चनम् ॥
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते ।
तस्मात्सर्वं प्रयत्नेन कृत्वा कर्माणि वै शनैः ॥
भुञ्जीत स्वजनैः सार्धं स याति परमाङ्गतिम् ।
प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुखएव वा ।
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखोभुङ्क्ते ऋणं भुङ्क्ते उदङ्मुखः ॥
आसीनस्त्वासनेशुद्धे भूम्यां पादौ निधाय च ।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः ॥
पञ्चार्द्रोभोजनं कुर्य्यात् भूम्यां पादौ निधाय च ।
उपलिप्त शुचौ देशेपादौ प्रक्षाल्य वै करौ ॥
आर्द्रवाणाननोभूत्वा पञ्चार्द्रोभोजनञ्चरेत् ।

महाव्याहृतिभिश्चान्नं परिधायोदकेन तु ॥
अमृतोपस्तरणमसीत्यापोशनक्रियाञ्चरेत्।
स्वाहा प्रणवसंयुक्तं प्राणायान्नाहुतिं ततः ॥
अपानाय ततोहुत्वा व्यानाय तदनन्तरम्।
उदानाय ततोहुत्वा समानायेति पञ्चमम् ॥
विज्ञाय चार्थमेतेषां जुहुयादात्मवान् द्विजः।
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम् ॥
ध्यात्वा तन्मनसा देवमात्मानं वै प्रजापतिम्।
अमृतापिधानमसीत्युपरिष्टाज्जलं पिबेत् ॥
आचम्याङ्गुष्ठमात्रेण पादाङ्गुष्ठेतु दक्षिणे।
निश्रावयेद्धस्तजलं मूर्द्ध्वहस्तः समाहितः ॥
हुत्वानुमन्त्रणं कुर्य्याच्छ्रद्धायामिति मन्त्रतः।
अथाक्षरेण स्वात्मानं योजयेत् ब्रह्मणेति हि ॥
सर्वेषामेव योगानामात्मयोगं परं स्मृतः।
योगेन विधिना कुर्य्यात् स याति ब्रह्मणः पदम् ॥
यज्ञोपवीती भुञ्जीत सुगन्धालङ्कृतोत्तमम्।
सायम्प्रातस्तु भुञ्जीत विशेषेण समाहितम् ॥
नाद्यात्सूर्य्यग्रहात्पूर्वं मह्निसायं शशिग्रहात्।
ग्रहकाले च नाश्नीयात् स्नात्वाश्नीयात्प्रमुक्तयोः ॥
अमुक्तयोरस्तगयोरद्याद्दृष्ट्वा परेऽहनि।
नाश्नीयात्प्रेक्षमाणानां मप्रदायापि दुर्गतः ॥
न यज्ञशिष्टादन्यत्वात्क्रुद्धोमान्यो ममातुरः।
आत्मार्थं भोजनं यस्य सुखार्थं यस्य मैथुनम् ॥
वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम्।

यो भुङ्क्ते वेष्टित शिरा यस्तु भुङ्क्ते विदिङ्मुखः॥
सोपानत्कश्च यो भुङ्क्ते सर्वं विद्यात्तदासुरम्।
नार्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक्॥
न च भिन्नासनगतो न शयान स्थितोऽपि वा।
नोपानत्पादुकी चापि न च संविलपन्नपि॥
भुङ्क्ते च सुखमास्थाय तदन्नं परिणामयेत्।
इतिहास पुराणाभ्यां वेदार्थं सुपवृंहयेत्॥
ततः सन्ध्या मुपासीत पूर्वोक्त विधिना द्विजः।
आसीनस्तु जपेद्देवीं गायत्रीं पश्चिमाम्प्रति॥
नानुतिष्ठति यः पूर्वामुपास्ते न च पश्चिमाम्।
स शूद्रेण समोलोके सर्वकर्म विगर्हितः॥
हुत्वाग्नौ विधिवन्मन्त्रैर्भुक्त्वा यज्ञावशिष्टकम्।
विसृज्य बान्धवजनं शपेच्छुष्कपदो निशि।
नोत्तराभि मुखः सुप्यात् पश्चिमाभिमुखो न च॥
अप्राङ्मुखो न नग्नो वा न च भिन्नासने क्वचित्।
न भग्नायान्तु खट्वायां शून्यागारे तथैव च॥
इत्येव मखिलं प्रोक्तं अहन्यहनि वै पुरा।
ब्राह्मणोक्तं कृत्यजातं अपवर्ग फलप्रदम्॥
नास्तिक्यादथवालस्यात् ब्राह्मणो न करोति यः।
स याति नरकान् घोरान् शूकरेष्वभि जायते॥
नान्यो विमुक्तये पन्था मुक्त्वाश्रमविधिं स्वकम्।
तस्मात्सर्वाणि भूतानि मुक्तये परमेष्ठिनः॥

इति लघुव्यासस्मृतौ द्वितीयोऽध्यायः।

लघुव्याससंहिता समाप्ता।

व्याससंहितायाम् ।

प्रथमोऽध्यायः ।

वाराणस्यां सुखासीनं वेदव्यासं तपोनिधिम् ।
पप्रच्छुर्मुनयोऽभ्येत्य धर्म्मान् वर्णव्यवस्थितान् ॥
स पृष्टः स्मृतिमान् स्मृत्वा स्मृतिं वेदार्थगर्भिताम् ।
उवाचाथ प्रसन्नात्मा मुनयः श्रूयता मिति ॥
यत्र यत्र स्वभावेन कृष्णसारोमृगः सदा ।
चरते तत्र वेदोक्तोधर्मोभवितुमर्हति ॥
श्रुतिस्मृतिपुराणानां विरोधोयत्र दृश्यते ।
तत्र श्रौतं प्रमाणन्तु तयोर्द्वैधे स्मृतिर्वरा ॥
ब्राह्मणक्षत्रिय विशस्त्रयोवर्णाद्विजातयः ।
श्रुतिस्मृतिपुराणोक्तधर्मयोग्यास्तु नेतरे ॥
शूद्रोवर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ।
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥
विप्रवद्विप्रविन्नासु क्षत्रविन्नासु विप्रवत् ।
जातकर्म्माणि कुर्व्वीत ततः शूद्रासु शूद्रवत् ॥
वैश्यासु विप्रक्षत्राभ्यां ततः शूद्रासु शूद्रवत् ।
अधमादुत्तमायान्तु जातः शूद्राधमः स्मृतः ॥
ब्राह्मण्यां शूद्रजनितश्चण्डालोधर्मवर्जितः ।
कुमारीसम्भवस्त्वेकः सगोत्रायां द्वितीयकः ॥

ब्राह्मण्यां शूद्रजनितश्चाण्डालस्त्रिविधः स्मृतः ।
वर्द्धकीनापितोगोपश्चाशापः कुम्भकारकः ॥
वणिक्किरातकायस्थमालाकार कुटुम्बिनः ।
वरटोमेदचण्डालदासश्वपचकोलकाः ॥
एतेऽन्त्यजाः समाख्याता ये चान्ये च गवाशनाः ।
एषां सम्भाषणात् स्नानं दर्शनादर्कवीक्षणम् ॥
गर्भाधानं पुंसवनं सीमन्तोजातकर्म च ।
नामक्रियानिष्क्रमणेऽन्नाशनं वपनक्रिया ॥
कर्णवेधोव्रतादेशो वेदारम्भक्रियाविधिः ।
केशान्तः स्नानमुद्वाहोविवाहाग्निपरिग्रहः ॥
त्रेताग्निसंग्रहश्चेति संस्काराः षोड़श स्मृताः ।
नवैताः कर्णवेधान्तामन्त्रवर्जं क्रियाः स्त्रियाः ॥
विवाहोमन्त्रतस्तस्याः शूद्रस्यामन्त्रतोदश ।
गर्भाधानं प्रथमतस्तृतीये मासि पुंसवः ॥
सीमन्तश्चाष्टमे मासि जाते जातक्रिया भवेत् ।
एकादशेऽह्नि नामार्कस्येवा मासि चतुर्थके ॥
षष्ठे मास्यान्नमश्नीयाच्चूड़ाकर्म कुलोचितम् ।
कृतचूड़े च वाले च कर्णवेधोविधीयते ॥
विप्रोगर्भाष्टमे वर्षे क्षत्रएकादशे तथा ।
द्वादशे वैश्यजातिस्तु व्रतोपनयमर्हति ॥
तस्य प्राप्तव्रतस्यायं कालः स्यात्द्विगुणाधिकः ।
वेदव्रतच्युतोव्रात्यः स व्रात्यस्तोममर्हति ॥
द्वे जन्मनी द्विजातीनां मातुः स्यात् प्रथमं तयोः
द्वितीयं छन्दसां मातुर्ग्रहणाद्विधिवद्गुरोः ॥

एवं द्विजातिमापन्नोविमुक्तोवान्यदोषतः ।
श्रुतिस्मृतिपुराणानां भवेदध्ययनक्षमः ॥
उपनीतो गुरुकुले वसेत्‌नित्यं समाहितः ।
बिभृयाद्दण्डकौपीनोपवीताजिनमेखलाः ॥
पुण्येऽह्नि गुर्वनुज्ञातः कृतमन्त्राहुतिक्रियः ।
स्मृत्वोङ्कारञ्च गायत्रीमारभेद्वेदमादितः ॥
शौचाचारविचारार्थं धर्मशास्त्रमपि द्विजः ।
पठेत गुरुतः सम्यक् कर्म तद्दिष्टमाचरेत् ॥
ततोऽभिवाद्य स्थविरान् गुरुञ्चैव समाश्रयेत् ।
स्वाध्यायार्थं तदा यत्नः सर्वदा हितमाचरेत् ॥
नापच्छिन्नोऽपि भाषेत न व्रजेत्ताड़ितोऽपिवा ।
विद्वेषमथ पैशुन्यं हिंसनञ्चार्कवीक्षणम् ॥
तौर्यत्रिकानृतोन्मादपरिवादानलङ्क्रियाम् ।
अञ्जनोद्वर्त्तनादर्शस्रग्विलेपनयोषितः ॥
वृथाटनमसन्तोषं ब्रह्मचारी विवर्ज्जयेत् ।
ईषच्चलितमध्याह्नेऽनुज्ञातोगुरुणा स्वयम् ॥
आलोलुपश्चरेद्भैक्षं व्रतिषूत्तमवृत्तिषु ।
सद्योभिक्षान्नमादाय वित्तवत्तदुपस्पृशेत् ॥
कृतमाध्याह्निकोऽश्नीयादनुज्ञातोयथाविधि ।
माद्यादेकान्नमुच्छिष्टं भुक्त्वा चाचामिताक्रियात् ॥
नाभ्यङ्गितमाद्याद्यादापन्नोद्रविणादिकम् ।
अनिन्द्यामन्त्रितः श्राद्धे पैत्र्येऽद्याद्गुरुचोदितः ॥
एकान्नमप्यविरोधे व्रतानां प्रथमाश्रमी ।
भुक्त्वा गुरुमुपासीत कृत्वा सन्ध्युदयादिकम् ॥

समिधोऽग्नावादधीत ततः परिचरेद्गुरुम् ।
अधीत गुर्व्वनुज्ञातः प्रह्वश्च प्रथमं गुरोः ॥
एवमन्वहमभ्यासी ब्रह्मचारी व्रतञ्चरेत् ।
हितोपवादः प्रियवाक् सम्यग्गुर्व्वर्थसाधकः ॥
नित्यमाराधयेदेनमासमाप्तेः श्रुतिग्रहात् ।
अनेन विधिनाधीतोवेदमन्त्रोद्विजं नयेत् ॥
शापानुग्रहसामर्थ्यमृषीणाञ्च सलोकताम् ।
पयोऽमृताभ्यां मधुभिः साज्यैः प्रीणन्ति देवताः ॥
तस्मादहरहर्वेदमनध्यायवर्ज्जितं पठेत् ।
यदङ्गं तदनध्याये गुरोर्व्वचनमाचरन् ॥
व्यतिक्रमादसम्पूर्णमनहंकृतिराचरेत् ।
परत्रेह च तद्ब्रह्म अनधीतमपि द्विजम् ।
यस्तूपनयनादेतदामृत्योर्व्रतमाचरेत् ॥
स नैष्ठिकोब्रह्मचारी ब्रह्मसायुज्यमाप्नुयात् ।
उपकुर्व्वाणकोयस्तु द्विजः षड्विंशवार्षिकः ॥
केशान्तकर्म्मणा तत्र यथोक्तचरितव्रतः ।
समाप्य वेदान् वेदौ वा वेदं वा प्रसभं द्विजः ॥
स्नायीत गुर्व्वनुज्ञातः प्रदत्तोदितदक्षिणः ।
इति श्रीवेदव्यासीये धर्म्मशास्त्रे प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः।

एवं स्नातकतां प्राप्तो द्वितीयाश्रमकाङ्क्षया।
प्रतीक्षेत विवाहार्थमनिन्द्यान्वयसम्भवाम्॥
अरोगादुष्टवंशोत्थामशुल्कादानदूषिताम्।
सवर्णामसमानार्षाममातृपितृगोत्रजाम्॥
अनन्यपूर्व्विकां लघ्वीं शुभलक्षणसंयुताम्।
धृताधोवसनां गौरीं विख्यातदशपूरुषाम्॥
ख्यातनाम्नः पुत्त्रवतः सदाचारवतः सतः।
दातुमिच्छोर्दुहितरं प्राप्य धर्म्मेण चोद्वहेत्॥
ब्राह्मोद्वाहविधानेन तदभावे परोविधिः।
दातव्यैषा सदृक्षाय वयोविद्यान्वयादिभिः॥
पितृतत्पितृभ्रातृषु पितृव्यज्ञातिमातृषु।
पूर्व्वाभावे परोदद्यात् सर्व्वाभावे स्वयं व्रजेत्॥
यदि सा दातृवैकल्याद्रजः पश्येत् कुमारिका।
भ्रूणहत्याश्च यावत्यः पतितः स्यात्तदप्रदः॥
तुभ्यं दास्याम्यहमिति ग्रहीष्यामीति यस्तयोः।
कृत्वा समयमन्योन्यं भजते न स दण्डभाक्॥
त्यजन्नदुष्टां दण्ड्यः स्याद्दूषयंश्चाप्यदूषिताम्।
ऊढायां हि सवर्णायामन्या वा काममुद्वहेत्॥
तस्यामुत्पादितः पुत्त्रो न सवर्णात् प्रहीयते॥
उद्वहेत् क्षत्त्रियां विप्रो वैश्याञ्च क्षत्त्रियो विशाम्।

नतु शूद्रां द्विजः कश्चिन्नाधमः पूर्व्ववर्णजाम् ॥
नानावर्णासु भार्य्यासु सवर्णा सहचारिणी।
धर्म्या धर्मेषु धर्मिष्ठा ज्येष्ठा तस्य स्वजातिषु ॥
पाटितोऽयं द्विजाः पूर्व्वमेकदेहः स्वयम्भुवा।
पतयोऽर्द्धेन चार्द्धेन पत्न्योऽभूवन्निति श्रुतिः॥
यावन्न विन्दते जायां तावदर्द्धो भवेत् पुमान्।
नार्द्धं प्रजायते सर्व्वं प्रजायेतेत्यपि श्रुतिः ॥
गुर्व्वी सा भूस्त्रिवर्गस्य वोढुं नान्येन शक्यते।
यतस्ततोऽन्वहं भूत्वा स्ववशोविभृयाच्च ताम् ॥
कृतदारोऽग्निपत्नीभ्यां कृतवेश्मा गृहं वसेत्।
स्वकृत्यं वित्तमासाद्य वैतानाग्निं न हापयेत् ॥
स्मार्त्तं वैवाहिके वह्नौ श्रौतं वैतानिकाग्निषु।
कर्म कुर्य्यात् प्रतिदिनं विधिवत् प्रीतिपूर्व्वतः ॥
सम्यग्धर्मार्थकामेषु दम्पतिभ्यामहर्निशम्।
एकचित्ततया भाव्यं समानव्रतवृत्तितः ॥
न पृथग्विद्यते स्त्रीणां त्रिवर्गविधिसाधनम्।
भावतो ह्यतिदेशाद्वा इति शास्त्रविधिः परः ॥
पत्युः पूर्व्वं समुत्थाय देहशुद्धिं विधाय च।
उत्थाप्य शयनाद्यानि कृत्वा वेश्मविशोधनम् ॥
मार्ज्जनैर्लेपनैः प्राप्य स्वाग्निशालं स्वमङ्गनम्।
शोधयेदग्निकार्य्याणि स्निग्धान्युष्णेन वारिणा ॥
प्रोक्षणैरिति तान्येव यथास्थानं प्रकल्पयेत्।
द्वन्द्वपात्राणि सर्व्वाणि न कदाचिद्वियोजयेत् ॥
शोधयित्वा तु पात्राणि पूरयित्वा तु धारयेत्।

महानसस्य पात्राणि वहिः प्रक्षाल्य सर्व्वथा ॥
स्वद्भिश्च शोधयेच्चूल्लीं तत्राग्निं विन्यसेत्ततः।
स्मृत्वा नियोगपात्राणि रसांश्च द्रविणानि च ॥
कृतपूर्व्वाह्णकार्य्या च स्वगुरूनभिवादयेत्।
ताभ्यां भर्तृपितृभ्यां वा भ्रातृमातुलवान्धवैः ॥
वस्त्रालङ्काररत्नानि प्रदत्तान्येव धारयेत्।
मनोवाक्कर्मभिः शुद्धा पतिदेशानुवर्त्तिनी ॥
छायेवानुगता स्वच्छा सखीव हितकर्मसु।
दासीवादिष्टकार्य्येषु भार्य्या भर्त्तुः सदा भवेत् ॥
ततोऽन्नसाधनं कृत्वा पतये विनिवेद्य तत्।
वैश्वदेवकृतैरन्नैर्भोजनीयांश्च भोजयेत् ॥
पतिञ्चैतदनुज्ञातः शिष्टमन्वाद्यमात्मना।
भुक्त्वा नयेदहःशेषमायव्ययविचिन्तया ॥
पुनः सायं पुनः प्रातर्गृहशुद्धिं विधाय च ॥
कृतान्नसाधना साध्वी सुभृशं भोजयेत् पतिम्।
नातितृप्त्या स्वयं भुक्त्वा गृहनीतिं विधाय च ॥
आस्तीर्य्य साधुशयनं ततः परिचरेत् पतिम्।
सुप्ते पतौ तदभ्यासे स्वपेत्तद्गतमानसा।
अनग्ना चाप्रमत्ता च निष्कामा च जितेन्द्रिया ॥
नोच्चैर्वदेन्न परुषं न बहून् पत्युरप्रियम्।
न केनचित् विवदेच्च अप्रलापविलापिनी ॥
नचातिव्ययशीला स्यान्न धर्मार्थविरोधिनी।
प्रमादोन्मादरोषेर्ष्यावञ्चनञ्चातिमानिताम् ॥
पैशुन्यहिंसाविद्वेषमहाहङ्कारधूर्त्तताः।

नाशिक्यसाहसस्तेयदम्भान् साध्वी विवर्जयेत् ॥
एवं परिचरन्ती सा पतिं परमदैवतम् ।
यशः शमिह यात्येव परत्र च सलोकताम् ॥
योषितो नित्यकर्म्मोक्तं नैमित्तिकमथोच्यते ।
रजोदर्शनतोदोषात् सर्वमेव परित्यजेत् ॥
सर्व्वैरलक्षिता शीघ्रं लज्जितान्तर्गृहे वसेत् ।
एकाम्बरावृता दीना स्नानालङ्कारवर्जिता ॥
मौनिन्यधोमुखी चक्षुःपाणिपद्भिरचञ्चला ।
अश्नीयात् केवलं भक्तं नक्तं मृन्मयभाजने ॥
स्वपेद्भूमावप्रमत्ता क्षपेदेवमहस्त्रयम् ।
स्नायीत च त्रिरात्रान्ते सचैलमुदिते रवौ ॥
विलोक्य भर्त्तुर्वदनं शुद्धा भवति धर्म्मतः ।
कृतशौचा पुनः कर्म पूर्ववच्च समाचरेत् ॥
रजोदर्शनतो याः स्युरात्रयः षोड़शर्त्तवः ।
ततः पुंवीजमक्लिष्टं शुद्धे क्षेत्रे प्ररोहति ॥
चतस्रश्चादिमा रात्रीः पर्ववच्च विवर्जयेत् ।
गच्छेद्युग्मासु रात्रीषु पौष्णपित्र्यर्क्षराक्षसान् ॥
प्रच्छादितादित्यपथे पुमान् गच्छेत् स्वयोषितः ।
क्षामालङ्कृतवाप्नोति पुत्रं पूजितलक्षणम् ॥
ऋतुकालेऽभिगस्यैवं ब्रह्मचर्य्यं व्यवस्थितः ।
गच्छन्नपि यथाकामं न दुष्टः स्यादनन्यकृत् ॥
भ्रूणहत्यामवाप्नोति ऋतौ भार्य्यापराङ्मुखः ।
सा त्ववाप्याऽन्यतोगर्भं त्याज्या भवति पापिनी ॥
महापातकदुष्टा च पतिगर्भविनाशिनी ।

सहधर्मचारिणीं पत्नीं त्यक्त्वा पतति धर्मतः ॥
महापातकदुष्टोऽपि नाप्रतीक्ष्यस्तया पतिः ।
अशुद्धे चप्रमा दूरं स्थितायामनुचिन्तया ॥
व्यभिचारेण दुष्टानां पतीनां दर्शनादृते ।
धिक्कृतायामवाच्यायामन्यत्र वासयेत् पतिः ॥
पुनस्तां मार्त्तवस्नातां पूर्ववद्व्यवहारयेत् ।
धूर्त्तां च धर्मकामघ्नीमपुत्रां दीर्घरोगिणीम् ॥
सुदुष्टां व्यसनासक्तामहितामधिवासयेत् ।
अधिविन्नामपि विभुः स्त्रीणान्तु समतामियात् ॥
विवर्णा दीनवदना देहसंस्कारवर्जिता ।
पतिव्रता निराहारा शोष्यते प्रोषिते पतौ ॥
मृतं भर्त्तारमादाय ब्राह्मणी वह्निमाविशेत् ।
जीवन्ती चेत्त्यक्तकेशा तपसा शोधयेद्वपुः ॥
सर्व्वावस्थासु नारीणां न युक्तं स्यादरक्षणम् ।
तदेवानुक्रमात् कार्य्यं पितृभर्तृसुतादिभिः ॥
जाताः सुरक्षिता या ये पुत्रपौत्रप्रपौत्रकाः ।
ये यजन्ति पितॄन् यज्ञैर्मोक्षप्राप्तिमहोदयैः ॥
मृतानामग्निहोत्रेण दाहयेद्विधिपूर्वकम् ।
दाहयेदविलम्बेन भार्य्याञ्चात्र व्रजेत सा ॥
इति श्रीवेदव्यासीये धर्मशास्त्रे द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

नित्यं नैमित्तिकं काम्यमिति कर्म त्रिधा मतम् ।
त्रिविधं तच्च वक्ष्यामि गृहस्थस्यावधार्य्यताम् ॥

यामिन्याः पश्चिमे यामे त्यक्तनिद्रो हरिं स्मरेत् ।
आलोक्य मङ्गलद्रव्यं कर्मावश्यकमाचरेत् ॥
कृतशौचो निषेव्याग्निं दन्तान् प्रक्षाल्य वारिणा ।
स्नात्वोपास्य द्विजः सन्ध्यां देवादींश्चैव तर्पयेत् ॥
वेदवेदाङ्गशास्त्राणि इतिहासानि चाभ्यसेत् ।
अध्यापयेच्च सच्छिष्यान् सद्विप्रांश्च द्विजोत्तमः ॥
अलब्धं प्रापयेल्लब्ध्वा क्षणमात्रं समापयेत् ॥
समर्थो हि समर्थेन नाविज्ञातः क्वचिद्वसेत् ॥
सरित्सरसि वापीषु गर्तप्रस्रवणादिषु ।
स्नायीत यावदुद्धृत्य पञ्च पिण्डानि वारिणा ॥
तीर्थाभावेऽप्यशक्त्या वा स्नायात्तोयैः समाहृतैः ।
गृहाङ्गनगतस्तत्र यावदम्बरपीडनम् ॥
स्नानमब्दैवतैः कुर्यात् पावनैश्चापि मार्ज्जनम् ।
मन्त्रैः प्राणांस्त्रिरायम्य सौरैश्चार्कं विलोकयेत् ॥
तिष्ठन् स्थित्वा तु गायत्रीं ततः स्वाध्यायमारभेत् ।
ऋचाञ्च यजुषां साम्नामथर्व्वाङ्गिरसामपि ॥
इतिहासपुराणानां वेदोपनिषदां द्विजः ।
शक्त्या सम्यक् पठेन्नित्यमल्पमप्यासमापनात् ॥
स यज्ञदानतपसामखिलं फलमाप्नुयात् ।
तस्मादहरहर्वेदं द्विजोऽधीयीत वाग्यतः ॥
धर्मशास्त्रेतिहासादि सर्वेषां शक्तितः पठेत् ।
कृतस्वाध्यायः प्रथमं तर्पयेच्चाथ देवताः ॥
जान्वा च दक्षिणं दर्भैः प्रागग्रैः सयवैस्तिलैः ।
एकैकाञ्जलिदानेन प्रकृतिस्थोपवीतकः ॥

समजानुद्वयो ब्रह्मसूत्रहार उदङ्मुखः।
तिर्य्यग्दर्भैश्च वामाग्रैर्यवैस्तिलविमिश्रितैः॥
अम्भोभिरुत्तरच्छिन्नैः कनिष्ठामूलनिर्गतैः।
द्वाभ्यां द्वाभ्यामञ्जलिभ्यां मनुष्यांस्तर्पयेत्ततः॥
दक्षिणाभिमुखः सव्यं जान्वा च द्विगुणैः कुशैः।
तिलैर्जलैश्च देशिन्या मूलदर्भाद्विनिःसृतैः।॥
दक्षिणां सोपवीतः स्यात् क्रमेणाञ्जलिभिस्त्रिभिः।
सन्तर्पयेद्दिव्यपितॄंस्तत्परांश्च पितॄन् स्वकान्॥
मातृमातामहांस्तद्वत्तीनेवं हि त्रिभिस्त्रिभिः।
मातामहाश्च येऽप्यन्ये गोत्रिणो दाहवर्जिताः॥
तानेकाञ्जलिदानेन तर्पयेच्च पृथक् पृथक्।
असंस्कृतप्रमीता ये प्रेतसंस्कारवर्जिताः॥
वस्त्रनिष्पीड़नाम्भोभिस्तेषामाप्यायनम्भवेत्।
अतर्पितेषु पितृषु वस्त्रं निष्पीड़येच्च यः॥
निराशाः पितरस्तस्य भवन्ति सुरमानुषैः।
पयोदर्भस्वधाकारगोत्रनामतिलैर्भवेत्॥
सुदत्तं तत्पुनस्तेषामेकेनापि वृथा विना।
अन्यचित्तेन यद्दत्तं यद्दत्तं विधिवर्जितम्॥
अनासनस्थितेनापि तज्जलं रुधिरायते।
एवं सन्तर्पिताः कामैस्तर्पकांस्तर्पयन्ति च॥
ब्रह्मविष्णुशिवादित्यमित्रावरुणनामभिः।
पूजयेल्लक्षितैर्मन्त्रैर्जलमन्त्रोक्तदेवताः॥
उपस्थाय रवेः काष्ठां पूजयित्वा च देवताः।
ब्रह्माग्नीन्द्रौषधी जीवविष्णुनामहतांहसाम्॥

अपां यन्तेति सत्कायं नमस्कारैः स्वनामभिः ।
कृत्वा मुखं समालभ्य स्नानमेवं समाचरेत् ॥
ततः प्रविश्य भवनमावसथ्ये हुताशने ।
पाकयज्ञांश्च चतुरो विदध्याद्विधिवद्विजः ॥
अनाहिताबसथ्याग्निरादायान्नं घृतप्लुतम् ।
शाकलेन विधानेन जुहुयाल्लौकिकेऽनले ॥
व्यस्ताभिर्व्याहृतीभिश्च समस्ताभिस्ततः परम् ।
षड्भिर्देवकृतस्येति मन्त्रवद्भिर्यथाक्रमम् ॥
प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः ।
ओङ्कारपूर्वः स्वाहान्तस्त्यागः स्विष्टविधानतः ।
भुवि दर्भान् समास्तीर्य्य बलिकर्म समाचरेत् ।
विश्वेभ्योदेवेभ्यइति सर्वेभ्यो भूतेभ्यएव च ॥
भूतानां पतये चेति नमस्कारेण शास्त्रवित् ।
दद्याद्बलित्रयञ्चाग्रे पितृभ्यश्च स्वधा नमः ॥
पात्रनिर्णेजनं वारि वायव्यां दिशि निःक्षिपेत् ।
उद्धृत्य षोड़शग्रासमात्रमन्नं घृतोक्षितम् ।
इदमन्नं मनुष्येभ्यो हन्तेत्युक्त्वा समुत्सृजेत् ।
गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः ॥
षड्भ्योऽन्नमन्वहं दद्यात् पितृयज्ञविधानतः ।
वेदादीनां पठेत् किञ्चिदल्पं ब्रह्ममखाप्तये ॥
-ततोऽन्यदन्नमादाय निर्गत्य भवनाद्बहिः ।
काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्ग्रासमेव च ॥
उपविश्य गृहद्वारि तिष्ठेद्यावन्मुहूर्त्तकम् ।
अप्रमुक्तोऽतिथिं लिप्सुर्भावशुद्धः प्रतीक्षकः ॥

आगतं दूरतः श्रान्तं भक्तुकाममकिञ्चनम् ।
दृष्ट्वा संमुखमभ्येत्य सत्कृत्य प्रश्रयार्च्चनैः ॥
पादधावनसम्मानाभ्यञ्जनादिभिरर्च्चितः ।
त्रिदिवं प्रापयेत्सद्यो यज्ञस्याभ्यधिकोऽतिथिः ॥
कालागतोऽतिथिर्दृष्टवेदपारो गृहागतः ।
द्वावेतौ पूजितौ स्वर्गं नयतोऽधस्त्वपूजितौ ।
विवाह्यस्नातकक्ष्माभृदाचार्यसुहृदृत्विजः ॥
अर्घ्या भवन्ति धर्मेण प्रतिवर्षं गृहागताः ।
गृहागताय सत्कृत्य श्रोत्रियाय यथाविधि ॥
भक्त्योपकल्पयेदेकं महाभागं विसर्जयेत् ।
विसर्जयेदनुव्रज्य सुतृप्तश्रोत्रियातिथीन् ।
मित्रमातुलसम्बन्धिबान्धवान् समुपागतान् ॥
भोजयेद्गृहिणीभिक्षां सत्कृतां भिक्षुकोऽर्हति ।
स्वाद्वन्नमश्नन्नस्वादु ददन्नच्छत्यधोगतिम् ॥
गर्भिण्यातुरभृत्येषु बालवृद्धातुरादिषु ।
बुभुक्षितेषु भुञ्जानो गृहस्थोऽश्नाति किल्बिषम् ॥
नाद्याद्गृहस्थेन्न पाकाद्यं कदाचिदनिमन्त्रितः ।
निमन्त्रितोऽपि निन्द्येन प्रत्याख्यानं द्विजोऽर्हति ॥
शूद्राभिशस्तवार्धुष्यवाग्दुष्टक्रूरतस्कराः ।
कुण्डापविद्धवण्डोग्र वधबन्धनजीविनः ॥
शैलूषशौण्डिकोन्मत्तोन्मत्तव्रात्यव्रतच्युताः ।
नग्ननास्तिकनिर्लज्ज पिशुनव्यसनान्विताः ॥
कदर्य्यस्त्रीजितानार्य्यपरवादकृता नराः ।
अनीशाः कीर्तिमन्तोऽपि राजदेवस्वहारकाः ॥

शयनासनसंसर्गवृत्तकर्मादिदूषिताः ।
अश्रद्दधानाः पतिता भ्रष्टाचारादयश्च ये ॥
अभोज्यान्नाः सुरन्नादो यस्य यः स्यात् स तत्समः ।
नापितान्वयमित्रार्द्धसीरिणो दासगोपकाः ॥
शूद्राणामप्यमीषान्तु भुक्त्वान्नं नैव दुष्यति ।
धर्मेणान्योन्यभोज्यान्ना द्विजास्तु विदितान्वयाः ॥
स्ववृत्तोपार्जितं मेध्यमाकरस्थममाक्षिकम् ।
अश्वलीढमगोघ्रातमस्पृष्टं शूद्रवायसैः ॥
अनुच्छिष्टमसंदुष्टमपर्य्युषितमेव च ।
अम्लानवाह्यमन्नाद्यमाद्यं नित्यं सुसंस्कृतम् ॥
कृशरापूपसंयावपायसं शष्कुलीति च ।
नाश्नीयाद्ब्राह्मणो मांसमनियुक्तः कथञ्चन ॥
क्रतौ श्राद्धे नियुक्तो वा अनश्नन् पतति द्विजः ।
मृगयोपार्जितं मांसमभ्यर्च्य पितृदेवताः ॥
क्षत्रियो द्वादशोनं तत् क्रीत्वा वैश्योऽपि धर्मतः ।
द्विजो जग्ध्वा वृथा मांसं हत्वाप्यविधिना पशून् ॥
निरयेष्वक्षयं वासमाप्नोत्याचन्द्रतारकम् ।
सर्वान् कामान् समासाद्य फलमश्वमखस्य च ॥
मुनिसाम्यमवाप्नोति गृहस्थोऽपि द्विजोत्तमः ।
द्विजभोज्यानि गव्यानि माहिष्याणि पयांसि च ॥
निर्द्दशासन्धिसम्बन्धिवत्सवन्तीपयांसि च ।
पलाण्डुश्वेतवृन्ताकरक्तमूलकमेव च ॥
गृञ्जनारुणवृक्षासृग्जतुगर्भफलानि च ।

अकालकुसुमादीनि द्विजोजग्ध्वैन्दवं चरेत् ॥
वाग्दूषितमविज्ञातमन्यपीड़ितकार्य्यपि ।
धूनिभ्योऽन्नमदत्त्वा च तदन्नं गृहिणोदहेत् ॥
हैमराजतकांस्येषु पात्रेष्वद्यात् सदा गृही ।
तदभावे साधुगन्धलोध्रद्रुमलतासु च ॥
पलाशपद्मपत्रेषु गृहस्थोभोक्तुमर्हति ।
ब्रह्मचारी यतिश्चैव श्रेयोयज्ञोक्तुमर्हति ॥
अभ्युत्थानं नमस्कारैर्भुवि दद्याद्वलित्रयम् ।
भूपतये भुवः पतये भूतानां पतये तथा ॥
अपः प्राश्य ततः पश्चात् पञ्चप्राणाहुतिक्रमात् ।
स्वाहाकारेण जुहुयाच्छेषमद्याद्यथासुखम् ॥
अनन्यचित्तोभुञ्जीत वाग्यतोऽन्नमकुत्सयन् ।
आतृप्तेरन्न मश्नीयादन्तुष्टं पात्रमुत्सृजेत् ॥
उच्छिष्टमन्नमुद्धृत्य ग्रासमेकं भुवि क्षिपेत् ।
आचान्तः साधुसङ्गेन सद्विद्यापठनेन च ॥
वृत्तवृद्धकथाभिश्च शेषाहर्मतिवाहयेत् ।
सायं सन्ध्यामुपासीत हुत्वाग्निं भृत्यसंयुतः ॥
आपोशानक्रियापूर्वमश्नीयादन्वहं द्विजः ।
सायमप्यतिथिः पूज्यो होमकालागतोऽनिशम् ॥
श्रद्धया शक्तितोनित्यं श्रुतं हन्यादपूजितः ।
नातितृप्तउपस्पृश्य प्रक्षाल्य चरणौ शुचिः ॥
अप्रत्यगुत्तरशिराः शयीत शयने शुभे ।
शक्तिमानुदिते काले स्नानं सन्ध्यां न हापयेत् ॥

ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेद्धितमात्मनः।
शक्तिमान् मतिमान् नित्यं वृत्तमेतत् समाचरेत्॥

इति वेदव्यासीये धर्मशास्त्रे तृतीयोऽध्यायः॥

चतुर्थोऽध्यायः।

इति व्यासकृतं शास्त्रं धर्मसारसमुच्चयम्।
आश्रमे यानि पुण्यानि मोक्षधर्माश्रितानि च॥
गृहाश्रमात् परोधर्मोनास्ति नास्ति पुनः पुनः।
सर्वतीर्थफलं तस्य यथोक्तं यस्तु पालयेत्॥
गुरुभक्तोभृत्यपोषी दयावाननसूयकः।
नित्यजापी च होमी च सत्यवादी जितेन्द्रियः॥
स्वदारे यस्य सन्तोषः परदारनिवर्त्तनम्।
अपवादोऽपि नो यस्य तस्य तीर्थफलं गृहे॥
परदारान् परद्रव्यं हरते यो दिने दिने।
सर्व्वतीर्थाभिषेकेण पापं तस्य न नश्यति॥
गृहेषु सवनीयेषु सर्वतीर्थफलं ततः।
अन्नदस्य त्रयो भागाः कर्त्ता भागेन लिप्यते॥
प्रतिश्रयं पादशौचं ब्राह्मणानाञ्च तर्पणम्।
न पापं संस्पृशेत्तस्य बलिभिक्षां ददाति यः॥
पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम्।
योददाति ब्राह्मणेभ्यो नोपसर्पति तं यमः॥
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी।
तावत् पुष्करपात्रेषु पिबन्ति पितरोऽमृतम्॥

यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे ।
तत्फलं ऋषयः श्रेष्ठा विप्राणां पादशौचने ॥
स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः ।
पितरः पादशौचेन अन्नाद्येन प्रजापतिः ॥
मातापित्रोः परं तीर्थं गङ्गा गावो विशेषतः ।
ब्राह्मणात् परमं तीर्थं न भूतं न भविष्यति ॥
इन्द्रियाणि वशीकृत्य गृहएव वसेन्नरः ।
तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥
गङ्गाद्वारञ्च केदारं सन्निहत्य तथैव च ।
एतानि सर्वतीर्थानि कृत्वा पापैः प्रमुच्यते ॥
वर्णानामाश्रमाणाञ्च चातुर्वर्ण्यस्य भो द्विजाः ! ।
दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितम् ॥
यद्ददाति विशिष्टेभ्यो यच्चाश्नाति दिने दिने ।
तच्च वित्तमहं मन्ये शेषं कस्याभिरक्षति ॥
यद्ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीड़न्ति दारैरपि धनैरपि ॥
किं धनेन करिष्यन्ति देहिनोऽपि गतायुषः ।
यद्वर्द्धयितुमिच्छन्तस्तच्छरीरमशाश्वतम् ॥
अशाश्वतानि गात्राणि विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः कर्त्तव्यो धर्मसंग्रहः ॥
यदि नाम न धर्माय न कामाय न कीर्त्तये ।
यत्परित्यज्य गन्तव्यं तद्धनं किं न दीयते ॥
जीवन्ति जीविते यस्य विप्रा मित्राणि बान्धवाः ।
जीवितं सफलं तस्य आत्मार्थे को न जीवति ॥

पशवोऽपि हि जीवन्ति केवलात्मोदरम्भराः ।
किं कायेन सुगुप्तेन बलिना चिरजीविनः ॥
ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते ।
इच्छानुरूपोविभवः कदा कस्य भविष्यति ॥
अदाता पुरुषस्त्यागी धनं संत्यज्य गच्छति ।
दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति ॥
प्राणनाशस्तु कर्त्तव्यो यः कृतार्थो न सोऽमृतः ।
अकृतार्थस्तु यो मृत्युं प्राप्तः खरसमोहि सः ॥
अनाहूतेषु यद्दत्तं यच्च दत्तमयाचितम् ।
भविष्यति युगस्यान्तस्तस्यान्तो न भविष्यति ॥
मृतवत्सा यथा गौश्च कृष्णा लोभेन दुह्यते ।
परस्परस्य दानानि लोकयात्रा न धर्मतः ॥
अदृष्टे चाशुभे दानं भोक्ता चैव न दृश्यते ।
पुनरागमनं नास्ति तत्र दानमनन्तकम् ॥
मातापितृषु यद्दद्याद्भ्रातृषु श्वशुरेषु च ।
जायापत्येषु यद्दद्यात् सोऽनन्तः स्वर्गसंक्रमः ॥
पितुः शतगुणं दानं सहस्रं मातुरुच्यते ।
भगिन्यां शतसाहस्रं सोदरे दत्तमक्षयम् ॥
अहन्यहनि दातव्यं ब्राह्मणेषु मुनीश्वराः ! ।
आगमिष्यति यत् पात्रं तत्पात्रं तारयिष्यति ॥
किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम् ।
पात्राणामुत्तमं पात्रं शूद्रान्नं यस्य नोदरे ॥
यस्य चैव गृहे मूर्खो दूरे चापि गुणान्वितः ।
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ॥

देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च॥
ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते।
ज्वलन्तमग्निमुत्सृज्य नहि भस्मनि हूयते॥
सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्।
भोजने चैव दाने च हन्यात्त्रिपुरुषं कुलम्॥
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः॥
ग्रामस्थानं यथा शून्यं यथा कूपश्च निर्जलः।
यश्चविप्रोऽनधीयानस्त्रयस्ते नामधारकाः।
ब्राह्मणेषु च यद्दत्तं यच्च वैश्वानरे हुतम्।
तद्धनं धनमाख्यातं धनं शेषं निरर्थकम्॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
सहस्रगुणमाचार्य्ये ह्यनन्तं वेदपारगे॥
ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः।
जातिमात्रोपजीवी च स भवेद्ब्राह्मणः समः॥
गर्भाधानादिभिर्मन्त्रैर्वेदोपनयनेन च।
नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः॥
अग्निहोत्री तपस्वी च वेदमध्यापयेच्च यः।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते॥
इष्टिभिः पशुबन्धैश्च चातुर्मास्यैस्तथैव च।
अग्निष्टोमादिभिर्यज्ञैर्येन चेष्टं स इष्टवान्॥
मीमांसते च योवेदान् षड्भिरङ्गैः सविस्तरैः।
इतिहासपुराणानि स भवेद्वेदपारगः॥

ब्राह्मणा येन जीवन्ति नान्योवर्णः कथञ्चन ।
ईदृक्पथमुपस्थाय कोऽन्यन्तं त्यक्तुमुत्सहेत् ॥
ब्राह्मणः स भवेच्चैव देवानामपि दैवतम् ।
प्रत्यक्षञ्चैव लोकस्य ब्रह्मतेजोहि कारणम् ॥
ब्राह्मणस्य मुखं क्षेत्रं निष्कर्करमकण्टकम् ।
वापयेत्तत्र वीजानि सा कृषिः सार्वकामिकी ॥
सुक्षेत्रे वापयेद्बीजं सुपात्रे दापयेद्धनम् ।
सुक्षेत्रे च सुपात्रे च क्षिप्तं नैव विदुष्यति ॥
विद्याविनयसम्पन्ने ब्राह्मणे गृहमागते ।
क्रीडन्त्योषधयः सर्व्वा यास्यामः परमां गतिम् ॥
नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते ।
दीयमानं रुदत्यन्नं भयाद्वै दुष्कृतं कृतम् ॥
वेदपूर्णमुखं विप्रं सुभुक्तमपि भोजयेत् ।
नच मूर्खं निराहारं षड्रात्रमुपवासिनम् ॥
यानि यस्य पवित्राणि कुक्षौ तिष्ठन्ति भो द्विजाः ॥
तानि तस्य प्रयोज्यानि न शरीराणि देहिनाम् ॥
यस्य देहे सदाश्नन्ति हव्यानि त्रिदिवौकसः ।
कव्यानि चैव पितरः किम्भूतमधिकं ततः ॥
यद्भुङ्क्ते वेदविद्विप्रः स्वकर्मनिरतः शुचिः ।
दातुः फलमसङ्ख्यातं प्रतिजन्म तदक्षयम् ॥
हस्त्यश्वरथयानानि केचिदिच्छन्ति पण्डिताः ।
अहं नेच्छामि मुनयः कस्यैताः शस्यसम्पदः ॥
वेदलाङ्गलकृष्टेषु द्विजश्रेष्ठेषु सत्सु च ।

यत्पुरा पातितं वीजं तस्यैताः शस्यसम्पदः ॥
शतेषु जायते शूरः सहस्रेषु च पण्डितः ॥
वक्ता शतसहस्रेषु दाता भवति वा नवा।
न रणे विजयाच्छूरोऽध्ययनान्न च पण्डितः ॥
न वक्ता वाक्पटुत्वेन न दाता चार्थदानतः।
इन्द्रियाणां जये शूरो धर्मं चरति पण्डितः ॥
हितप्रियोक्तिभिर्वक्ता दाता सम्मानदानतः ॥
यद्येकपङ्क्त्यां विषमं ददाति
स्नेहाद्भयाद्वा यदि वार्थहेतोः।
वेदेषु दृष्टं ऋषिभिश्च गीतम्
तद्ब्रह्महत्यां मुनयोवदन्ति ॥
ऊषरे वापितं वीजं भिन्नभाण्डेषु गोदुहम्।
हुत भस्मनि हव्यञ्च मूर्खे दानमशाश्वतम् ॥
ब्रतस्नुतकपुष्टाङ्गोद्विजः शूद्रान्नभोजने।
अहमेवं न जानामि कां योनिं स गमिष्यति ॥
शूद्रान्नेनोदरस्थेन यदि कश्चिन्म्रियेत यः।
स भवेत् शूकरो नूनं तस्य वा जायते कुलम् ॥
गृध्रो द्वादश जन्मानि सप्त जन्मानि शूकरः।
श्वानश्च सप्त जन्मानि इत्येवं मनुरब्रवीत्।
अमृतं ब्राह्मणान्नेन दारिद्र्यं क्षत्रियस्य च॥
वैश्यान्नेन तु शूद्रान्नं शूद्रान्नान्नरकं ब्रजेत्।
यश्च भुङ्क्तेऽथ शूद्रान्नं मासमेकं निरन्तरम् ॥
इह जन्मनि शूद्रत्वं ब्रतः श्वा चैव जायते।

यस्य शूद्रा पचेन्नित्यं शूद्रा वा गृहमेधिनी ॥
वर्जितः पितृदेवैस्तु रौरवं याति स द्विजः ।
भाण्डसङ्करसङ्कीर्णा नानासङ्करसङ्कराः ॥
योनिसङ्करसङ्कीर्णा निरयं यान्ति मानवाः ।
पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिन्दकः ॥
आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः ॥
इदं व्यासमतं नित्यमध्येतव्यं प्रयत्नतः ।
एतदुक्ताचारवतः पतनं नैव विद्यते ॥

इति श्रीवेदव्यासीये धर्म्मशास्त्रे चतुर्थोऽध्यायः ।
समाप्ता चेयं व्याससंहिता ।

शङ्खसंहितायाम् ।

प्रथमोऽध्यायः ।

स्वयम्भुवे नमस्कृत्य सृष्टिसंहारकारिणे ।
चातुर्वर्ण्यहितार्थाय शङ्खः शास्त्रमथाकरोत् ॥
यजनं याजनं दानं तथैवाध्यापनक्रियाम् ।
प्रतिग्रहञ्चाध्ययनं विप्रः कर्माणि कारयेत् ॥
दानमध्ययनञ्चैव यजनञ्च यथाविधि ।
क्षत्रियस्य तु वैश्यस्य कर्मेदं परिकीर्त्तितम् ॥
क्षत्रियस्य विशेषेण प्रजानां परिपालनम् ।
कृषिगोरक्षवाणिज्यं वैश्यस्य परिकीर्त्तितम् ॥
शूद्रस्य द्विजशुश्रूषा सर्व्वशिल्पानि चाप्यथ ।
क्षमा सत्यं दमः शौचं सर्वेषामविशेषतः ॥
ब्राह्मणाः क्षत्रिया वैश्यास्त्रयोवर्णा द्विजातयः ।
तेषां जन्म द्वितीयन्तु विज्ञेयं मौञ्जिबन्धनम् ॥
आचार्य्यस्तु पिता प्रोक्तः सावित्री जननी तथा ।
ब्रह्मक्षत्रविशाञ्चैव मौञ्जिबन्धनजन्मनि ॥
विप्राः शूद्रसमास्तावद्विज्ञेयास्तु विचक्षणैः ।
यावद्वेदे न जायन्ते द्विजा ज्ञेयास्तु तत्परम् ॥

इति शाङ्खीये धर्मशास्त्रे प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः।

गर्भस्य स्फुटताज्ञाने निषेकः परिकीर्त्तितः।
ततस्तु स्पन्दनात् कार्य्यं सवनन्तु विचक्षणैः॥
अशौचे तु व्यतिक्रान्ते नामकर्म विधीयते।
नामधेयञ्च कर्त्तव्यं वर्णानाञ्च समाक्षरम्।
माङ्गल्यं ब्राह्मणस्योक्तं क्षत्रियस्य बलान्वितम्॥
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्।
शर्म्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु॥
धनान्तं चैव वैश्यस्य दासान्तं चान्त्यजन्मनः।
चतुर्थे मासि कर्त्तव्यमादित्यस्य प्रदर्शनम्॥
षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम्।
गर्भाष्टमेऽब्दे कर्त्तव्यं ब्राह्मणस्योपनायनम्॥
गर्भादेकादशे राज्ञोगर्भात्तु द्वादशे विशः।
षोड़शाब्दस्तु विप्रस्य द्वाविंशः क्षत्रियस्य तु॥
विंशतिः सचतुष्का च वैश्यस्य परिकीर्त्तिता।
नाभिभाषेत सावित्रीमतऊर्द्धं निवर्त्तयेत्॥
विज्ञातव्यास्त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्री पतिता व्रात्याः सर्वधर्मबहिष्कृताः॥
मौञ्जीबन्धोद्विजानान्तु क्रमान्मौञ्जी प्रकीर्त्तिता।
मार्गवैयाघ्रवास्तानि चर्माणि ब्रह्मचारिणाम्॥
पर्णपिप्पलबिल्वानां क्रमाद्दण्डाः प्रकीर्त्तिताः।
कर्णकेशललाटैस्तु तुल्याः प्रोक्ताः क्रमेण तु॥
अवक्राः सत्वचः सर्वे नाग्निदग्धास्तथैव च।

यज्ञोपवीतं कार्पासक्षौमोर्णानां यथाक्रमम् ॥
आदिमध्यावसानेषु भवच्छब्दोपलक्षितम्।
भैक्षस्य चरणं प्रोक्तं वर्णानामनुपूर्वशः ॥
इति शाङ्खीये धर्मशास्त्रे द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

उपनीय गुरुः शिष्यं वेदमस्मै प्रयच्छति।
भृतकाध्यापको यस्तु उपाध्यायः स उच्यते ॥
प्रयतः कल्यमुत्थाय स्नातो हुतहुताशनः।
कुर्व्वीत प्रयतोभूत्वा गुरूणामभिवादनम् ॥
अनुज्ञातश्च गुरुणा ततोऽध्ययनमाचरेत्।
कृत्वा ब्रह्माञ्जलिं पश्यन् गुरोर्वदनमानतः ॥
ब्रह्मावसाने प्रारम्भे प्रणवञ्च प्रकीर्त्तयेत्।
अनध्यायेष्वध्ययनं वर्जयेच्च प्रयत्नतः ॥
चतुर्द्दशीं पञ्चदशीमष्टमीं राहुसूतकम्।
उल्कापातं महीकम्पमशौचं ग्रामविप्लवम् ॥
इन्द्रप्रयाणं सुरतं घनसंघातनिस्वनम्।
वाद्यकोलाहलं युद्धमनध्यायं विवर्जयेत् ॥
नाधीयीताभियुक्तोऽपि प्रयत्नान्न च वेगतः।
देवायतनवल्मीकश्मशानशिवसन्निधौ।
भैक्षचर्य्यान्तथा कुर्य्याद्ब्राह्मणेषु यथाविधि।
गुरुणा चाभ्यनुज्ञातः प्राश्नीयात् प्राङ्मुखः शुचिः।
हितं प्रियं गुरोः कुर्य्यादहङ्कारविवर्जितः ॥

उपास्य पश्चिमां सन्ध्यां पूजयित्वा हुताशनम् ।
अभिवाद्य गुरुं पश्चाद्गुरोर्वचनकृद्भवेत् ॥
गुरोः पूर्वं समुत्तिष्ठेच्छयीत चरमं तथा ।
मधुमांसाञ्जन श्राद्धं गीतं नृत्यञ्च वर्जयेत् ॥
हिंसापवादवादांश्च स्त्रीलीलाञ्च विशेषतः ।
मेखलामजिनं दण्डं धारयेच्च प्रयत्नतः ।
अधःशायी भवेन्नित्यं ब्रह्मचारी समाहितः ॥
एवंकृत्यन्तु कुर्व्वीत वेदस्वीकरणं बुधः ।
गुरवे च धनं दत्त्वा स्नायाच्च तदनन्तरम् ॥
इति शाङ्खीये धर्मशास्त्रे तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

विन्देत विधिवद्भार्य्यामसमानार्षगोत्रजाम् ।
मातृतः पञ्चमीञ्चापि पितृतस्त्वथ सप्तमीम् ॥
ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
एते धर्मास्तु चत्वारः पूर्वं विप्रे प्रकीर्तिताः ।
गान्धर्वो राक्षसश्चैव क्षत्रियस्य प्रशस्यते ॥
अप्रार्थितः प्रयत्नेन ब्राह्मस्तु परिकीर्तितः ।
यज्ञेषु ऋत्विजे दैव आदायार्षस्तु गोद्वयम् ॥
प्रार्थितापप्रदानेन प्राजापत्यः प्रकीर्तितः ।
आसुरोद्रविणादानाद्गान्धर्वः समयान्मिथः ॥
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात् ।

तिस्रस्तु भार्य्या विप्रस्य द्वे भार्य्ये क्षत्रियस्य तु ॥
एकैव भार्य्या वैश्यस्य तथा शूद्रस्य कीर्तिता।
ब्राह्मणी क्षत्रिया वैश्या ब्राह्मणस्य प्रकीर्तिताः ॥
क्षत्रिया चैव वैश्या च क्षत्रियस्य विधीयते।
वैश्यैव भार्य्या वैश्यस्य शूद्रा शूद्रस्य कीर्तिता ॥
आपद्यपि न कर्त्तव्या शूद्रा भार्य्या द्विजन्मना।
अस्यां तस्य प्रसूतस्य निष्कृतिर्न विधीयते ॥
तपस्वी यज्ञशीलश्च सर्व्वधर्मभृतां वरः।
ध्रुवं शूद्रत्वमाप्नोति शूद्रश्राद्धे त्रयोदशे ॥
नीयते तु सपिण्डत्वं येषां श्राद्धं कुलोद्भवम्।
सर्वे शूद्रत्वमायान्ति यदि स्वर्गजितास्तु ते ॥
सपिण्डीकरणं कार्यं कुलजस्य तथा ध्रुवम्।
श्राद्धं द्वादशकं कृत्वा श्राद्धे प्राप्ते त्रयोदशे ॥
सपिण्डीकरणं नार्हं नच शूद्रस्तथार्हति।
तस्मात् सर्व्वप्रयत्नेन शूद्राभार्य्यां विवर्जयेत् ॥
पाणिग्राह्यः सवर्णासु गृह्णीयात् क्षत्रिया शरम्।
वैश्या प्रतोदमादद्याद्वेदने तु द्विजन्मनः ॥
सा भार्य्या या वहेदग्निं सा भार्य्या या पतिव्रता।
सा भार्य्या या पतिप्राणा सा भार्य्या या प्रजावती ॥
लालनीया सदा भार्य्या ताड़नीया तथैव च।
लालिता ताड़िता चैव स्त्री श्रीर्भवति नान्यथा ॥

इति शाङ्खीये धर्मशास्त्रे चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः ।

पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च तस्य पापस्य शान्तये ॥
पञ्चयज्ञविधानञ्च गृही नित्यं न हापयेत् ।
पञ्चयज्ञविधानेन तत्पापं तस्य नश्यति ॥
देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च ।
ब्रह्मयज्ञो नृयज्ञश्च पञ्च यज्ञाः प्रकीर्तिताः ॥
होमो दैवोबलिर्भौतः पित्र्यः पिण्डक्रियास्मृतः ।
स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम् ॥
वानप्रस्थोब्रह्मचारी यतिश्चैव तथा द्विजः ।
गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधि ॥
गृहस्थएव यजते गृहस्थस्तप्यते तपः ।
दाता चैव गृहस्थः स्यात्तस्माच्छ्रेष्ठो गृहाश्रमी ॥
यथा भर्त्ता प्रभुः स्त्रीणां वर्णानां ब्राह्मणोयथा ।
अतिथिस्तद्वदेवास्य गृहस्थस्य प्रभुः स्मृतः ॥
न व्रतैर्नोपवासेन धर्मेण विविधेन च ।
नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ॥
न स्नानेन न होमेन नैवाग्निपरितर्पणात् ।
ब्रह्मचारी दिवं याति स याति गुरुपूजनात् ॥
नाग्निशुश्रूषया चाऽप्या स्नानेन विविधेन च ।
वानप्रस्थोदिवं याति यथा भोजनवर्जनात् ॥
न भैक्षैर्नैच मौनेन शून्यागाराश्रयेण च ।
योगी सिद्धिमवाप्नोति यथा मैथुनवर्जनात् ॥

न यज्ञैर्दक्षिणाभिश्च वह्निशुश्रूषया न च।
गृही स्वर्गमवाप्नोति तथा चातिथिपूजनात्॥
तस्मात् सर्वप्रयत्नेन गृहस्थोऽतिथिमागतम्।
आहारशयनाद्येन विधिवत् परिपूजयेत्॥
सायं प्रातश्च जुहुयादग्निहोत्रं यथाविधि।
दर्शञ्च पौर्णमासञ्च जुहुयाच्च यथाविधि॥
यज्ञैर्वा पशुबन्धैश्च चातुर्मास्यैस्तथैव च।
त्रैवार्षिकाधिकान्नेन पिबेत् सोममतन्द्रितः॥
इष्टिं वैश्वानरीं कुर्य्यात्तथा चाल्पधनो द्विजः।
न भिक्षेत धनं शूद्रात् सर्व्वं दद्यादभीप्सितम्॥
वृत्तिन्तु न त्यजेद्विद्वानृत्विजं पूर्वमेव तु।
कर्मणा जन्मना शुद्धं विद्यात् पात्रं वलीततम्॥
एतैरेव गुणैर्युक्तं धर्मार्जितधनं तथा।
याजयेत्तु सदा विप्रो ग्राह्यस्तस्मात् प्रतिग्रहः॥
इति शाङ्खीये धर्मशास्त्रे पञ्चमोऽध्यायः।

षष्ठोऽध्यायः।

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥
पुत्त्रेषु दारान्निःक्षिप्य तया वानुगतो वने।
अग्नीनुपचरेन्नित्यं वन्यमाहारमाहरेत्॥
यदाहारो भवेत्तेन पूजयेत् पितृदेवताः।
तेनैव पूजयेन्नित्यमतिथिं समुपागतम्॥

ग्रामादाहृत्य चाश्नीयादष्टौ ग्रासान् समाहितः ।
स्वाध्यायञ्च सदा कुर्य्याज्जटाश्च बिभृयात्तथा ॥
तपसा शोषयेन्नित्यं स्वकञ्चैव कलेवरम् ।
आर्द्रवासास्तु हेमन्ते ग्रीष्मे पञ्चतपास्तथा ॥
प्रावृष्याकाशशायी स्यान्नक्ताशी च सदा भवेत् ।
चतुर्थकालिकोवा स्यात् स्याच्च षष्ठक एवच ॥
कृच्छ्रैर्वापि नयेत् कालं ब्रह्मचर्य्यञ्च पालयेत् ।
एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत् ॥

इति शाङ्खीये धर्मशास्त्रे षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

कृत्वेष्टिं विधिवत् पश्चात् सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य द्विजो ब्रह्माश्रमी भवेत् ॥
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवर्जने ।
अतीते पादसम्पाते नित्यं भिक्षां यतिश्चरेत् ॥
न व्यथेत तथालाभे यथालब्धेन वर्तयेत् ।
न पाचयेत्तथैवान्नं नाश्नीयात् कस्यचिद्गृहे ॥
मृण्मयालावुपात्राणि यतीनान्तु विनिर्दिशेत् ।
तेषां सम्मार्जनाच्छुद्धिरद्भिश्चैव प्रकीर्तिता ॥
कौपीनाच्छादनं वासो बिभृयादसखश्चरन् ।
शून्यागारनिकेतः स्याद्यत्र सायं गृहोमुनिः ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥

चन्दनैर्लिप्यतेऽङ्गं वा भस्मचूर्णैर्विगर्हितैः।
कल्याणमप्यकल्याणं तयोरेव न संश्रयेत् ॥
सर्वभूतहितो मैत्रः समलोष्टाश्मकाञ्चनः।
ध्यानयोगरतोनित्यं भिक्षुर्यायात् परां गतिम् ॥
जन्मना यस्तु निर्विण्णो मृत्युने च तथैवच।
आदिभिर्व्याधिभिश्चैव तं देवा ब्राह्मणं विदुः ॥
अशुचित्वं शरीरस्य प्रियस्य च विपर्य्ययः।
गर्भवासे च वसतिस्तस्मान्मुच्येत नान्यथा ॥
जगदेतन्निराक्रन्दं नतु सारमनर्थकम्।
भोक्तव्यमिति निर्विण्णो मुच्यते नात्र संशयः ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्।
प्रत्याहारैश्च संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिःपठेदायतप्राणः प्राणायामः स उच्यते ॥
मनसः संयमस्तज्ज्ञैर्धारणेति निगद्यते।
संहारश्चेन्द्रियाणाञ्च प्रत्याहारः प्रकीर्त्तितः ॥
हृदयस्थस्य योगेन देवदेवस्य दर्शनम्।
ध्यानं प्रोक्तं प्रवक्ष्यामि सर्वस्माद्योगतः शुभम् ॥
हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः।
हृदि ज्योतींषि भूयश्च हृदि सर्वं प्रतिष्ठितम् ॥
स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्।
ध्याननिर्मथनाभ्यासात् विष्णुं पश्येद्धृदि स्थितम् ॥
हृद्यर्कश्चन्द्रमाः सूर्य्यः सोमो मध्ये हुताशनः।
तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितोऽच्युतः ॥

अणोरणीयान् महतो महीया-

नात्मास्य जन्तोर्निहितो गुहायाम् ।

तेजोमयं पश्यति वीतशोको-

धातुः प्रसादान्महिमानमात्मनः ॥

वासुदेवस्तमोऽन्धानां प्रयत्नो नैव जायते ।

अज्ञानपटसंवीतैरिन्द्रियैर्विषयैप्सुभिः ॥

एष वै पुरुषोविष्णुर्व्यक्ताव्यक्तः सनातनः ।

एष धाता विधाता च पुराणोनिष्कलः शिवः ॥

विदेहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।

मन्त्रैर्विदित्वा न बिभेति मृत्योर्नान्यः पन्थाविद्यतेऽयनाय ॥

पृथिव्यापस्तथा तेजोवायुराकाशमेव च ।

पञ्चेमानि विजानीयान्महाभूतानि पण्डितः ॥

चक्षुः श्रोत्रं स्पर्शनञ्च रसना घ्राणमेव च ।

बुद्धीन्द्रियाणि जानीयात् पञ्चेमानि शरीरके ॥

शब्दो रूपं तथा स्पर्शो रसो गन्धस्तथैवच ।

इन्द्रियस्थान् विजानीयात् पञ्चैव विषयान् बुधः ॥

हस्तौ पादावुपस्थञ्च जिह्वा पायुस्तथैव च ।

कर्मेन्द्रियाणि पञ्चैव नित्यं सति शरीरके ॥

मनोबुद्धिस्तथैवात्मा व्यक्ताव्यक्तं तथैवच ।

इन्द्रियेभ्यः पराणीह चत्वारि प्रवराणि च ॥

तथात्मानं तद्व्यतीतं पुरुषं पञ्चविंशकम् ।

तन्तु ज्ञात्वा विमुच्यन्ते ये जनाः साधवृत्तयः ॥

इदन्तु परमं शुद्धमेतदक्षरमुत्तमम् ।

अशब्दमरसस्पर्शमरूपं गन्धवर्जितम् ॥

निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम् ।
विज्ञानसारथिर्यस्तु मनःप्रग्रहबन्धनः ॥
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।
बालाग्रशतशो भागः कल्पितस्तु सहस्रधा ॥
तस्यापि शतशो भागाज्जीवः सूक्ष्म उदाहृतः ॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ॥
एष सर्वेषु भूतेषु तिष्ठत्यविरलः सदा ।
दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥
इति शाङ्खीये धर्मशास्त्रे सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकम् ।
मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि ॥
जले निमज्य उन्मज्य उपस्पृश्य यथाविधि ।
तीर्थस्यावाहनं कुर्य्यात् तत्प्रवक्ष्याम्यशेषतः ॥
प्रपद्ये वरुणं देवमम्भसां पतिमर्च्चितम् ।
याचेत देहि मे तीर्थं सर्वपापापनुत्तये ॥
तीर्थमावाहयिष्यामि सर्व्वाघविनिसूदनम् ।
सान्निध्यमस्मिन् तोये च क्रियतां मदनुग्रहात् ॥
रुद्रात् प्रपद्य वरदान् सर्व्वानप्सु सदस्तथा ।
सर्व्वानप्सु सदश्चैव प्रपद्ये प्रयतः स्थितः ॥
देवमप्सुसदं वह्निं प्रपद्याघनिसूदनम् ।

आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा ॥
रुद्रश्चाग्निश्च सर्पश्च वरुणस्त्वाप एव च ।
शमयन्त्वाशु मे पापं माञ्च रक्षन्तु सर्वशः ॥
हिरण्यवर्णेति तिसृभिर्ज्जगतीति चतसृभिः ।
शन्नोदेवीति तथा शन्नआप स्तथैव च ॥
इदमापः प्रवहते द्यूतञ्च समुदीरयेत् ।
एवं सम्मार्जनं कृत्वा च्छन्दआर्षञ्च देवताः ॥
अघमर्षणसूक्तञ्च प्रपठेत् प्रयतः सदा ।
छन्दोऽनुष्टुप् च तस्यैव ऋषिश्चैवाघमर्षणः ॥
देवता भाववृत्तश्च पापक्षये प्रकीर्तितः ॥
ततोऽम्भसि निमग्नः स्यात्त्रिःपठेदघमर्षणम् ।
प्रपद्यान्मूर्द्ध नि तथा महाव्याहृतिभिर्जलम् ॥
यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्वपापप्रणाशनम् ॥
अनेन विधिना स्नात्वा स्नातवान् धौतवाससा ।
परिवर्जितवासास्तु तीर्थनामानि संजपेत् ॥
उदकस्याप्रदानात्तु स्नानशाटीं न पीड़येत् ।
अनेन विधिना स्नातस्तीर्थस्य फलमश्नुते ॥

इति शाङ्खीये धर्मशास्त्रेऽष्टमोऽध्यायः ।

नवमोऽध्यायः।

अतः परं प्रवक्ष्यामि शुभामाचमनक्रियाम्।
कायं कनिष्ठिकामूले तीर्थमुक्तं करस्य तु॥
अङ्गुष्ठमूले च तथा प्राजापत्यं प्रकीर्तितम्।
अङ्गुल्यग्रे स्मृतं दैवं पित्र्यं तर्जनिमूलकम्॥
प्राजापत्येन तीर्थेन त्रिः प्राश्नीयाज्जलं द्विजः।
द्विः प्रक्षज्य मुखं पश्चादद्भिः खं समुपस्पृशेत्॥
हृद्गाभिः पूयते विप्रः कण्ठगाभिश्च भूमिपः।
तालुगाभिस्तथा वैश्यः शूद्रः स्पृष्टाभिरन्ततः॥
अन्तर्जानुः शुचौ देशे प्राङ्मुखः सुसमाहितः।
उदङ्मुखोऽपि प्रयतो दिशश्चानवलोकयन्॥
अद्भिः समुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः।
वह्निना चाप्यदग्धाभिरङ्गुलीभिरुपस्पृशेत्॥
तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः।
अङ्गुष्ठानामिकाभ्यान्तु श्रवणौ समुपस्पृशेत्॥
कनिष्ठाङ्गुष्ठयोगेन स्पृशेत् स्कन्धद्वयं ततः।
सर्व्वासामेव योगेन नाभिञ्च हृदयं ततः॥
संस्पृशेत्तु तथा मूर्द्ध्ना यथाचाचमने विधिः॥
त्रिः प्राश्नीयाद्यदम्भस्तु प्रीतास्तेनास्य देवताः।
ब्रह्मा विष्णुश्च रुद्रश्च भवन्तीत्यनुशुश्रुम॥
गङ्गा च यमुना चैव प्रीयेते परिमार्जनात्।
नासत्यदस्रौ प्रीयेते स्पृष्टे नासापुटद्वये॥
स्पृष्टे लोचनयुग्मे च प्रीयेते शशिभास्करौ।

कर्णयुग्मे तथा स्पृष्टे प्रीयेते अनिलानलौ ॥
स्कन्धयोः स्पर्शनादस्य प्रीयन्ते सर्वदेवताः ।
मूर्द्धस्तु स्पर्शनादस्य प्रीतस्तु पुरुषो भवेत् ॥
विना यज्ञोपवीतेन तथा मुक्तशिखोऽपि वा ।
अप्रक्षालितपादस्तु आचान्तोऽप्यशुचिर्भवेत् ॥
बहिर्जानुरुपस्पृश्य एकहस्तार्पितैर्जलैः ।
सफेनाभिस्तथाद्भिश्च नैव शुद्धिमवाप्नुयात् ॥
आचम्य च पुरा प्रोक्तं तीर्थसंमार्जनं ततः ।
उपस्पृश्य ततः पश्चान्मन्त्रेणानेन धर्मतः ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपोज्योतीरसोऽमृतम् ॥
आचम्य च ततः पश्चादादित्याभिमुखोजलम् ।
उदुत्यं जातवेदसं मन्त्रेण प्रक्षिपेत्ततः ।
एष एव विधिः प्रोक्तः सन्ध्यायाञ्च द्विजातिषु ।
पूर्वां सन्ध्यां जपंस्तिष्ठेदासीनः पश्चिमां तथा ॥
ततोजपेत् पवित्राणि पवित्रान् वाथ शक्तितः ।
ऋषयो दीर्घसन्ध्यात्वाद्दीर्घमायुरवाप्नुयुः ॥

इति शाङ्खीये धर्मशास्त्रे नवमोऽध्यायः ।

दशमोऽध्यायः ।

सर्व्ववेदपवित्राणि संप्रवक्ष्याम्यतः परम् ।
येषां जपैश्च होमैश्च पूयन्ते मानवाः सदा ॥
अघमर्षणं देवव्रतं शुद्धवत्यस्तु यत्सदा ।

कूष्माण्ड्यः पावमान्यश्च सर्वसाविन्य एव च ॥
अभीष्टरूपदा चैव स्तोमानि व्याहृतिस्तथा।
भारुण्डानि च सामानि गायत्या वै व्रतं तथा ॥
पुरुषव्रतञ्च भाषञ्च तथा सोमव्रतानि च।
अविन्नं वार्हस्पत्यञ्च वाक्सूक्तममृतं तथा ॥
शतरुद्रीमथर्व्वशिरास्त्रिसुपर्णं महाव्रतम्।
गोसूक्तमश्वसूक्तञ्च इन्द्रसूक्तञ्च सामनी ॥
त्रीणि पुण्याज्यदोहानि रथन्तरञ्चाग्निव्रतं वामदेव्यञ्च।
एतानि गीतानि पुनन्ति जन्तून् जातिस्मरत्वं लभते यदीच्छेत् ॥
इति शाङ्खीये धर्मशास्त्रे दशमोऽध्यायः।

एकादशोऽध्यायः।

इति वेदपवित्राण्यभिहितानि एभ्यः सावित्री विशिष्यते।
नास्त्यघमर्षणात् परमं तज्जलेन व्याहृतिभिः परम् होमः॥
न सावित्र्याः परं जप्यं। कुशवृष्यामासीनः कुशोत्तरीयः कुशपाणिः प्राङ्मुखः सूर्य्याभिमुखो वाक्षमालामादाय देवताध्यायी तज्जपं कुर्य्यात्। सुवर्णमणिमुक्तास्फाटिकपद्मपत्रवीजाद्यानामन्यतमेनाक्षमालां कुर्यात्। ध्यायन् वामहस्तोपरि व्यागणयेत्। आदौ देवतामार्षं छन्दश्च स्मरेत्। ततः सप्रणवव्याहृतिकामादावन्ते च शिरसा गायत्रीमावर्तयेत् तथास्याः सविता ऋषिर्विश्वामित्रो गायत्रीछन्दः। प्रणवाद्या भूर्भुवः स्व र्मह र्जन स्तपः सत्यमिति व्याहृतयः। आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् ॥

सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह ।
ये जपन्ति सदा तेषां न भयं विद्यते क्वचित् ॥
दशजप्ता तु सा देवी दिनपापप्रणाशिनी ।
शतं जप्ता तथा सा तु सर्वकल्मषनाशिनी ॥
सहस्रं जप्ता सा नृणां पातकेभ्यः समुद्धरेत् ।
स्वर्णस्तेयी कृतघ्नश्च ब्रह्महा गुरुतल्पगः ॥
सुरापश्च विशुद्ध्येत लक्षजप्येन सर्वदा ।
प्राणायामत्रयं कृत्वा स्नानकाले समाहितः ॥
अहोरात्रकृतात् पापात्तत्क्षणादेव शुद्ध्यति ।
सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोड़श ॥
अपि भ्रूणहणं मासात् पुनन्त्यहरहः कृताः ।
हुता देवी विशेषेण सर्वकामप्रदायिनी ।
सर्वपापक्षयकरी वरदा भक्तवत्सला ।
शान्तिकामस्तु जुहुयाद्गायत्रीमयुतैः शुचिः ॥
हन्तुकामोऽपमृत्युञ्च घृतेन जुहुयात्तथा ।
श्रीकामस्तु तथा पद्मैर्बिल्वैः काञ्चनकामतः ॥
ब्रह्मवर्च्चस्कामस्तु जुहुयात् पूर्ववत्तथा ।
घृतयुक्तैस्तिलैर्वह्नौ हुत्वा तु सुसमाहितः ॥
गायत्र्यायुतहोमात्तु सर्वपापैः प्रमुच्यते ।
पापात्मा लक्षहोमेन पातकेभ्यः प्रमुच्यते ॥
ब्रह्मलोकमवाप्नोति प्राप्नुयात् काममीप्सितम् ।
गायत्री चैव जननी गायत्री पापनाशिनी ॥
गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम् ।
हस्तत्राणप्रदा देवी पततां नरकार्णवे ॥

तस्मात्तामभ्यसेन्नित्यं ब्राह्मणोनियतः शुचिः ।
गायत्रीजप्यनियतो हव्यकव्येषु भोजयेत् ।
तस्मिन्न तिष्ठते पापमब्बिन्दुरिव भास्करे ॥
जपेनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशय. ।
कुर्य्यादन्यन्नवा कुर्य्यान्मैत्रोब्राह्मण उच्यते ॥
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ।
नोच्चैर्जप्यं बुधः कुर्य्यात् सावित्र्यास्तु विशेषतः ॥
सावित्रीजप्यनिरतः स्वर्गमाप्नोति मानवः ।
सावित्रीजप्यनिरतो मोक्षोपायञ्च विन्दति ॥
तस्मात् सर्वप्रयत्नेन स्नातः प्रयतमानसः ।
गायत्रीञ्च जपेद्भक्त्या सर्वपापप्रणाशिनीम् ॥
इति शाङ्खीये धर्मशास्त्रे एकादशोऽध्यायः ।

द्वादशोऽध्यायः ।

स्नातः कृतजपस्तदनु प्राङ्मुखो दिव्येन तीर्थेन देवानुदकेन तर्पयेत् । प्रत्यहं पुरुषसूक्तेनोदकाञ्जलीन् दद्यात् पुष्पाञ्जलीन् भक्त्या । अथ कृतापसव्यो दक्षिणामुखोऽन्तर्जानुः पित्र्येण पितॄणां श्राद्धप्रकारमुदकं दद्यात् । पित्रे पितामहाय पितामह्यै सप्तमात् पुरुषात् पितृपक्षे यावतां नाम जानीयात् । पितृपक्षीयाणां त्रयाणां दत्त्वा मातृपक्षीयाणां गुरूणां सम्बन्धिबान्धवानाञ्च कृत्वा सुहृदां कुर्य्यात् । भवन्ति चात्र श्लोकाः ।

विना रौप्यसुवर्णेन विना ताम्रतिलेन च ।
विना दर्भैश्च मन्त्रैश्च पितॄणां नोपतिष्ठति ॥
सौवर्णराजताभ्याञ्च खड्गेनो डुम्बरेण वा ।
दत्तमक्षयतां याति पितॄणान्तु तिलोदकम् ॥
कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितॄणां प्रीतिमावहन् ॥
स्नातस्तु तर्पणं कृत्वा पितॄणान्तु तिलाम्भसा ।
पितृयज्ञमवाप्नोति प्रीणन्ति पितरस्तथा ॥
इति शाङ्खीये धर्मशास्त्रे द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः ।

ब्राह्मणान्न परीक्षेत दैवे कर्मणि धर्मवित् ।
पित्र्ये कर्मणि संप्राप्ते स्यात्मार्गैः परीक्षणम् ॥
ब्राह्मणा ये विकर्माणो वैड़ालव्रतिकाः शठाः ।
हीनाङ्गा अतिरिक्ताङ्गा ब्राह्मणाः पङ्क्तिदूषकाः ॥
गुरूणां प्रतिबलाश्च तथाग्न्युत्पातिनश्च ये ।
गुरूणां त्यागिनश्चैव ब्राह्मणाः पङ्क्तिदूषकाः ॥
अनध्यायेष्वधीयानाः शौचाचारविवर्जिताः ।
शूद्रान्नरससंपुष्टा ब्राह्मणाः पङ्क्तिदूषकाः ॥
षड़ङ्गवेदवेत्तारो बह्वृचश्चैव सामगाः ।
त्रिणाचिकेतः पञ्चाग्निर्ब्राह्मणाः पङ्क्तिपावनाः ॥
ब्रह्मदेयानुसन्ताना ब्रह्मदेयाप्रदायकाः ।
ब्रह्मदेया पतिर्यश्च ब्राह्मणाः पङ्क्तिपावनाः ॥

ऋग्यजुःपारगो यश्च साम्नां यश्चापि पारगः।
अथर्व्वाङ्गिरसोऽध्येता ब्राह्मणाः पङ्क्तिपावनाः॥
नित्यं योगरतो विद्वान् समलोष्टाश्मकाञ्चनः।
ध्यानशीलो यतिर्विद्वान् ब्राह्मणाः पङ्क्तिपावनाः॥
द्वौ दैवे प्राङ्मुखौ त्रींश्च पित्र्ये चोदङ्मुखांस्तथा।
भोजयेद्विविधान् विप्रानेकैकमुत यत्र वा॥
भोजयेदथवाप्येकं ब्राह्मणं पङ्क्तिपावनम्।
दैवे कृत्वा तु नैवेद्यं पश्चाद्वह्नौ तु तत्क्षिपेत्॥
उच्छिष्टसन्निधौ कार्य्यं पिण्डनिर्वपणं बुधैः।
अभावे च तथा कार्य्यमग्निकार्य्यं यथाविधि॥
श्राद्धं कृत्वा तु यत्नेन त्वरा क्रोधविवर्जितः।
उष्णमन्नं द्विजातिभ्यः श्रद्धया विनिवेदयेत्॥
भोजयेद्विविधान् विप्रान् गन्धमाल्यानुलेपनैः।
पङ्क्तिविदात्मनो गेहे भक्ष्यं वा भक्ष्यमेक वा।
अनिवेद्य न भोक्तव्यं पिण्डमूले कथञ्चन॥
उग्रगन्धान्यगन्धानि चैत्यवृक्षभवानि च।
पुष्पाणि वर्जनीयानि तथा पर्वतजानि च।
तोयोद्भूतानि देयानि रक्तान्यपि विशेषतः॥
ऊर्णासूत्रं प्रदातव्यं कार्पासमथवा नवम्।
दशा विवर्जयेत् प्राज्ञो यद्यनाहतवस्त्रजाः॥
घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः॥
धूपार्थं गुग्गुलं दद्याद् घृतयुक्तं मधूत्कटम्।
चन्दनञ्च तथा दद्यादिष्टं यत् कुङ्कुमं शुभम्॥
कृष्णाकं शरशिम्बञ्च पलञ्च सुप्तकं तथा।

कूष्माण्डालावुवार्त्ताकूकोविदारांश्च वर्जयेत्॥
पिप्पलीं मरिचञ्चैव तथावै पिण्डमूलकम्।
कृतञ्च लवणञ्चैव वंशागन्तु विवर्जयेत्॥
राजमासान् मसूरांश्च प्रवालकोरदूषकान्।
लोहितान् वृक्षनिर्य्यासान् श्राद्धकर्मणि वर्जयेत्॥
आम्रातलवलीमूलमूलकान् दधिदाड़िमान्।
स कोविदार्व्वसत्कन्दराजेन मधुना सदा॥
शक्तून् शर्करया सार्द्धं दद्याच्छ्राद्धे प्रयत्नतः।
पायसादिभिरुष्णैश्च भोजयित्वा तथा द्विजान्॥
भक्त्या प्रणम्य आचान्तान् तथा वै दत्तदक्षिणाम्॥
अभिवाद्य प्रसन्नात्मा अनुव्रज्य विसर्जयेत्।
निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः॥
श्राद्धं भुक्त्वा च दत्त्वा च युक्तः स्यान्महतैनसा।
कालशाकं महाशल्कं मांसं वा शकुनस्य च॥
खड्गमांसं तथानन्त्यं यमः प्रोवाच धर्मवित्।
इति शाङ्खीये धर्मशास्त्रे त्रयोदशोऽध्यायः।

चतुर्दशोऽध्यायः।

यद्ददाति गयाक्षेत्रे प्रभासे पुष्करेऽपि च।
प्रयागे नैमिषारण्ये सर्वमानन्त्यमुच्यते॥
गङ्गायमुनयोस्तीरे तीर्थे•वामरकण्टके।
नर्मदायां गयातीरे सर्वमानन्त्यमुच्यते॥
वाराणस्यां कुरुक्षेत्रे भृगुतुङ्गे महालये।

समारण्येऽसिकूपे च यत्तदत्तयमुच्यते ॥
म्लेच्छदेशे तथा रात्रौ सन्ध्ययोश्च विशेषतः।
न श्राद्धमाचरेत् प्राज्ञो म्लेच्छदेशे नच व्रजेत् ॥
हस्तिच्छायासूर्य्यमितचन्द्रार्द्धे राहुदर्शने।
विषुवत्ययने चैव सर्वमानन्त्यमुच्यते ॥
पौष्ठपद्यामतीतायां मघायुक्ता त्रयोदशी।
प्राप्य श्राद्धन्तु कर्त्तव्यं मधुना पायसेन च ॥
प्रजां पुष्टिं तथा स्वर्गमारोग्यञ्च धनं तथा।
नृणां प्राप्य सदा प्रीतिं प्रयच्छन्ति पितामहाः ॥
इति शाङ्खीये धर्मशास्त्रे चतुर्दशोऽध्यायः।

पञ्चदशोऽध्यायः।

जनने मरणे चैव सपिण्डानां द्विजोत्तमाः।
त्यहाच्छुद्धिमवाप्नोति योऽग्निवेदसमन्वितः ॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
जनने मरणे विप्रा दशाहेन विशुद्ध्यति ॥
क्षत्रियो द्वादशाहेन वैश्यः पक्षेण शुद्ध्यति।
मासेन तु तथा शूद्रः शुद्धिमाप्नोति नान्तरा ॥
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यति।
अजातदन्तबाले तु सद्यःशौचं विधीयते ॥
अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूड़के।
तथैवानुपनीते तु त्यहाच्छुद्ध्यन्ति मानवाः ॥
मृतानां कन्यकानान्तु तथैव शूद्रजन्मनः।

अनूढभार्य्यः शूद्रस्तु षोड़शाद्वत्सरात् परम् ॥
मृत्युं समवगच्छेत्तु मास तस्यापि बान्धवाः।
शुद्धिं समवगच्छन्ति नात्र कार्य्या विचारणा ॥
पितृवेश्मनि कन्या या रजः पश्यत्यसंस्कृता।
तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति ॥
हीनवर्णाद्यदा नारी प्रमादात् प्रसवं व्रजेत्।
प्रसवे मरणे तज्जमशौचं नोपशाम्यति ॥
समानं खल्वशौचन्तु प्रथमे तु समापयेत्।
असमानं द्वितीयेन धर्मराजवचो यथा ॥
देशान्तरगतः श्रुत्वा सूतकानां मरणोद्भवौ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥
अतीते दशरात्रे तु तावदेवाशुचिर्भवेत्।
तथा सम्वत्सरेऽतीते स्नातएव विशुद्ध्यति ॥
अनौरसेषु पुत्त्रेषु भार्य्यास्वन्यगतासु च।
परपूर्वासु च स्त्रीषु त्र्यहाच्छुद्धिरिहेष्यते ॥
मातामहे व्यतीते तु आचार्य्ये च तथा मृते।
गृहे मृतासु दत्तासु कन्यासु च त्र्यहं तथा ॥
विनष्टे राजनि तथा जाते दौहित्रके गृहे।
आचार्य्यपत्नीपुत्त्रेषु दिवसेन च मातुले ॥
मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च।
सब्रह्मचारिणि तथा अनूचाने तथा मृते ॥
एकरात्रं त्रिरात्रं वा षड्रात्रं मासमेव च।
शूद्राः सपिण्डवर्णानामशौचं क्रमतः स्मृतम् ॥
सपिण्डे क्षत्रिये शुद्धिः षड्रात्रं ब्राह्मणस्य च।

वर्णानां परिशिष्टानां द्वादशेऽह्नि विनिर्द्दिशेत् ॥
सपिण्डे ब्राह्मणा वर्णाः सर्वएवाविशेषतः।
दशरात्रेण शुध्येयुरित्याह भगवान् यमः ॥
भृग्वग्निपतनाम्भोभिर्मृतानामात्मघातिनाम्।
पतितानामशौचञ्च शस्त्रविद्युद्धताश्च ये ॥
यती व्रती ब्रह्मचारी सूपकारश्च दीक्षितः।
नाशौचभाजः कथिता राजाज्ञाकारिणश्च ये ॥
यस्तु भुङ्क्ते पराशौचे वर्णी सोऽप्यशुचिर्भवेत्।
अमुष्य शुद्धौ शुद्धिश्च तस्याप्युक्ता मनीषिभिः ॥
पराशौचे नरो भुक्त्वा क्रमियोनौ प्रजायते।
भुक्तान्नं म्रियते यस्य तस्य जातौ प्रजायते ॥
दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च।
प्रेतपिण्डक्रियावर्जमशौचं विनिवर्त्तते ॥
इति शाङ्खीये धर्मशास्त्रे पञ्चदशोऽध्यायः।

षोड़शोऽध्यायः।

मृण्मयं भाजनं सर्वं पुनः पाकेन शुद्ध्यति।
मलैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः ॥
संसृष्टं नैव शुध्येत पुनः पाकेन मृण्मयम्।
एतैरेव यदि स्पृष्टं ताम्रसौवर्णराजतम् ॥
शुद्ध्यत्यावर्त्तितं पश्चादन्यथा केवलाम्भसा।
अम्लोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा ॥
क्षारेण शुद्धिः कांस्यस्य लौहस्यापि विनिर्द्दिशेत्।

मुक्तामणिप्रवालानां शुद्धिः प्रक्षालनेन तु ॥
अब्जानां चैव भाण्डानां सर्वस्याश्ममयस्य च ।
शाकमूलफलानाञ्च विदलानां तथैव च ॥
मार्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्मणि ।
उष्णाम्भसा तथा शुद्धिः सकेशानां विनिर्दिशेत् ॥
शय्यासनापणानान्तु सूर्य्यस्य किरणैस्तथा ।
शुद्धिस्तु प्रोक्षणाद्यज्ञे करकेन्धनगोस्तथा ॥
मार्जनाद्वेश्मनां शुद्धिः क्षितेः शोधस्तु तत्क्षणात् ।
संमार्जनेन तोयेन वाससां शुद्धिरिष्यते ॥
बहूनां प्रोक्षणाच्छुद्धिर्धान्यादीनां विनिर्दिशेत् ।
प्रोक्षणात् संहतानाञ्च काष्ठानाञ्चैव तक्षणात् ॥
सिद्धार्थकाणां कल्केन शृङ्गदन्तमयस्य च ।
गोबालैः फलपात्राणामस्थ्नां शृङ्गवतां तथा ॥
निर्यासानां गुडानाञ्च लवणानां तथैव च ।
कुसुम्भकुसुमानाञ्च ऊर्णाकार्पासयोस्तथा ॥
प्रोक्षणात् कथिता शुद्धिरित्याह भगवान् यमः ।
भूमिष्ठमुदकं शुद्धं तथा शुचि शिलागतम् ॥
वर्णगन्धरसैर्दुष्टैर्वर्जितानां तथा भवेत् ।
शुद्धं नदीगतं तोयं सर्वदैव सुखाकरम् ॥
शुद्धं प्रसारितं पण्यं शुद्धाश्वाश्वादयो मुखे ।
मुखवर्जन्तु गौः शुद्धा मार्जारश्चाश्रमे शुचिः ॥
शय्या भार्य्या शिशुर्वस्त्रमुपवीतं कमण्डलुः ।
आत्मनः कथितं शुद्धं न तच्छुद्धं परस्य च ॥
नारीणाञ्चैव वत्सानां शकुनीनां शुनां मुखम् ।

रात्रौ प्रसरणे वृत्ते मृगयायां सदा शुचि ॥
शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नाता नारी रजस्वला।
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति ॥
रथ्याकर्दमतोयेन ष्ठीवनाद्येन वाप्यथ।
नाभेरूर्द्धं नरः स्पृष्टः सद्यःस्नानेन शुद्ध्यति ॥
कृत्वा मलपुरीषञ्च लेपगन्धापहन्तथा।
उद्धृतेनाम्भसा स्नानं सदा चैव समाचरेत् ॥
मेहने मृत्तिकाः सप्त लिङ्गे द्वे च प्रकीर्त्तिते।
एकस्मिन् विंशतिर्हस्ते द्वयोर्देयाश्चतुर्दश ॥
तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम्।
तिस्रस्तु पादयोर्देयाः शौचकामस्य सर्वदा ॥
शौचमेतद्गृहस्थानां द्विगुणं ब्रह्मचारिणाम्।
द्विगुणञ्च वनस्थानां यतीनां द्विगुणं तथा ॥
मृत्तिका च विनिर्दिष्टा त्रिपर्वं पूर्य्यते यया ॥
इति शाङ्खीये धर्मशास्त्रे षोड़शोऽध्यायः।

सप्तदशोऽध्यायः।

नित्यं त्रिषवणस्नायी कृत्वा पर्णकुटीं वने।
अधःशायी जटाधारी पर्णमूलफलाशनः ॥
ग्रामं विशेत भिक्षार्थं स्वकर्म परिकीर्त्तयन्।
एकं कालं समश्नानो वर्षे च द्वादशे गते ॥
रुक्मस्तेयी सुरापायी ब्रह्महा गुरुतल्पगः।
व्रतेनैतेन शुध्यन्ति महापातकिनश्च ये ॥

यागस्थं क्षत्रियं हत्वा वैश्यं हत्वा तु याजकम् ।
एतदेव व्रतं कुर्य्यादात्रेयं विनिदूषकः ॥
कूटसाक्ष्यं तथैवोक्त्वा निक्षेपञ्च प्रहृत्य च ।
एतदेव व्रतं कुर्य्याच्छक्त्या च शरणागतम् ॥
आहिताग्निः स्त्रियं हत्वा मित्रं हत्वा तथैव च ।
हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत् ॥
व्रतस्थञ्च द्विजं हत्वा पार्थिवञ्चाकृताश्रमम् ।
एतदेव व्रतं कुर्य्याद्द्विगुणञ्च विशुद्धये ॥
क्षत्रियस्य तु पादोनं तदर्द्धं वैश्यघातने ।
अर्द्धमेव सदा कुर्य्यात् स्त्रीवधे पुरुषस्तथा ॥
पादन्तु शूद्रहत्यायामुदक्यागमने तथा ।
गोवधे च तथा कुर्य्यात् परदारगतस्तथा ॥
पशून् हत्वा तथा ग्राम्यान् मासं कुर्य्याद्द्विजः क्षणः ।
आरण्यानां वधे चैव तदर्द्धन्तु विधीयते ॥
हत्वा द्विजं तथा सर्पं जलेशयबिलेशयौ ।
सप्तरात्रं तथा कुर्य्याद्व्रतन्तु ब्राह्मणस्तथा ॥
अनस्थ्नान्तु शतं हत्वा सास्थ्नां दशशतं तथा ।
ब्रह्महत्याव्रतं कुर्य्यात् पूर्णं सम्वत्सरं तथा ॥
यस्य यस्य च वर्णस्य वृत्तिच्छेदं समाचरेत् ।
तस्य तस्य बधप्रोक्तं प्रायश्चित्तं समाचरेत् ॥
अपहृत्य तु वर्णानां भुवमेव प्रमादतः ।
प्रायश्चित्तमथ प्रोक्तं ब्राह्मणानुमतञ्चरेत् ॥
गोऽजाश्वस्यापहरणे सीसानां रजतस्य च ।
जलापहरणे चैव कुर्य्यात् सम्वत्सरं व्रतम् ॥

तिलानां धान्यवस्त्राणां शस्त्राणामामिषस्य च ।
सम्वत्सरार्द्धं कुर्व्वीत व्रतमेतत् समाहितः ॥
तृणकाष्ठे च तक्राणां रसानामपहारकः ।
मासमेकं व्रतं कुर्य्याद्दन्तानां सर्पिषान्तथा ॥
लवणानां गुड़ानाञ्च मूलानां कुसुमस्य च ।
मासार्द्धन्तु व्रतं कुर्य्यादेतदेव समाहितः ॥
लौहानां वैदलानाञ्च सूत्राणां चर्म्मणां तथा ।
एकरात्रं व्रतं कुर्य्यात्तद्वदेव समाहितः ॥
भुक्त्वा पलाण्डुं लसुनं मद्यञ्च करकाणि च ।
नारं मलं तथा मांसं विड्वराहं खरं तथा ॥
गौधेरकुञ्जरोष्ट्रञ्च सर्वं पञ्चनखं तथा ।
क्रव्यादं कुक्कुटं ग्राम्यं कुर्य्यात् सम्वत्सरं व्रतम् ॥
भक्ष्याः पञ्चनखास्त्वेते गोधाकच्छपशल्लकाः ।
खड्गश्च शशकश्चैव तान् हत्वा तु चरेद्व्रतम् ॥
हंसं मद्गुरकं काकं काकोलं खञ्जरीटकम् ।
मत्स्यादांश्च तथा मत्स्यान् वलाकाशुकसारिकाः ॥
चक्रवाकं प्लवं कोकं मण्डूकं भुजगन्तथा ।
मासमेतद्व्रतं कुर्य्यान्नात्र कार्य्या विचारणा ॥
राजीवान् सिंहतुण्डांश्च शकुलांश्च तथैव च ।
पाठीनरोहितौ भक्ष्यौ मत्स्येषु परिकीर्त्तितौ ॥
जलेचरांश्च जलजान् मुखपादान् सुविष्किरान् ।
रक्तपादान् जालपादान् सप्ताहं व्रतमाचरेत् ॥
तित्तिरिञ्च मयूरञ्च लावकञ्च कपिञ्जरम् ।
वार्द्धीणसं वर्त्तकञ्च भक्ष्यानाह यमः सदा ॥

भुक्त्वा चैवोभयदतं तथैकशफदंष्ट्रिणः।
तथा भुक्त्वा तु मासं वै मासार्द्धं व्रतमाचरेत्॥
स्वयंमृतं वृथामांसं माहिषं वाजमेव च।
गोश्च क्षीरं विवत्सायाः महिष्याश्च तथा पयः॥
सन्धिन्यमेध्यं भक्षित्वा पक्षन्तु व्रतमाचरेत्।
क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः॥
सप्तरात्रं व्रतं कुर्य्याद्यदेतत् परिकीर्त्तितम्।
लोहितान् वृक्षनिर्यासान् व्रणानां प्रभवांस्तथा॥
केवलानि तथाम्लानि तथा पर्य्युषितञ्च यत्।
गुड़पक्वं तथा भुक्त्वा त्रिरात्रन्तु व्रती भवेत्॥
दधिभक्तञ्च शुक्तेषु यच्चान्यद्दारुसम्भवम्।
गुड़युक्तं भक्षयित्वा तक्रं निन्द्यमिति श्रुतिः॥
यवगोधूमजं सर्वं विकाराः पयसाश्च ये।
राजवाड़ञ्च कुल्यञ्च भैक्षं पर्य्युषितं भवेत्॥
सजीवपक्वमांसञ्च सर्वं यत्नेन वर्जयेत्।
सम्वत्सरं व्रतं कुर्य्यात् प्राश्यैतान् ज्ञानतस्तथा॥
शूद्रान्नं ब्राह्मणोभुक्त्वा तथा रङ्गावतारिणः।
बद्धस्य चैव चौरस्यावीरायाश्चतथा स्त्रियः॥
कर्मकारस्य वेणश्च कीरस्य पतितस्य च।
रुक्मकारस्य तक्ष्णश्च तथा वार्द्धुषिकस्य च॥
कदर्य्यस्य नृशंसस्य वेश्यायाः कितवस्य च।
गणान्नं भूमिपालान्नमन्नञ्चैवास्त्रजीविनः॥
सौनपान्नं सूतिकान्नं भुक्त्वा मासं व्रतञ्चरेत्।
शूद्रस्य सततं भुक्त्वा षण्मासान् व्रतमाचरेत्॥

वैश्यस्य च तथा स्त्रीणां मासमेकं व्रतञ्चरेत् ।
क्षत्रियस्य तथा भुक्त्वा द्वौ मासौ च व्रतञ्चरेत् ॥
ब्राह्मणस्य तथा भुक्त्वा मासमेकं समाचरेत् ।
अपः सुराभाजनस्थाः पीत्वा पक्षं व्रती भवेत् ॥
शूद्रोच्छिष्टाशने मासं पक्षमेकं तथा विशः ।
क्षत्रियस्य तु सप्ताहं ब्राह्मणस्य तथा दिनम् ॥
अथाश्राद्धाशने विद्वान् मासमेकं व्रती भवेत् ।
परिवित्तिः परीवेत्ता यया च परिविद्यते ॥
व्रतं सम्वत्सरं कुर्य्याद्दातृयाजकपञ्चमः ।
शुनोच्छिष्टं तथा भुक्त्वा मासमेकं व्रतीभवेत् ॥
दूषितं केशकीटैश्च मूषिकानकुलेन च ।
मक्षिकामशकेनापि त्रिरात्रन्तु व्रती भवेत् ॥
वृथाकृशरसंयावपायसापूपशष्कुलीः ।
भुक्त्वा त्रिरात्रं कुर्वीत व्रतमेतत् समाहितः ॥
नील्या चैव क्षतो विप्रः शुना दष्टस्तथैव च ।
त्रिरात्रन्तु व्रतं कुर्य्यात् पुंश्चलीदर्शनक्षतः ॥
पादप्रतापनं वह्नौ क्षिप्त्वा वह्नौ तथाप्यधः ।
कुशैः प्रमृज्य पादौ च दिनमेकं व्रतञ्चरेत् ॥
क्षत्रियस्तु रणे हत्वा पृष्ठं प्राणपरायणम् ।
सम्वत्सरव्रतं कुर्य्याच्छित्वा पिप्पलपादपम् ॥
दिवा च मैथुनं कृत्वा स्नात्वा दुष्टजले तथा ।
नग्नां परस्त्रियं दृष्ट्वा दिनमेकं व्रती भवेत् ॥
क्षिप्ताग्नावशुचि द्रव्यं तद्वदम्भसि मानवः ।
मासमेकं व्रतं कुर्य्यादपक्रुध्य तथा गुरुम् ॥

तथा विशेषजं पीत्वा पानीयं ब्राह्मणस्तथा ।
त्रिरात्रन्तु व्रतं कुर्य्याद्वामहस्तेन वा पुनः ॥
एकपङ्क्त्युपविष्टेषु विषमं यः प्रयच्छति ।
स च तावदसौ पक्षं प्रकुर्य्याद्ब्राह्मणो व्रतम् ॥
धारयित्वा तुलाञ्चैव विषमं वणिजस्तथा ।
सुरालवणपात्रेषु भुक्ता क्षीरं व्रतञ्चरेत् ॥
विक्रीय पाणिना मद्यं तिलानि च तथाचरेत् ।
त्वङ्कारं ब्राह्मणस्योक्ता त्वङ्कारञ्च गरीयसः ॥
दिनमेकं व्रतं कुर्य्यात् प्रयतः सुसमाहितः ॥
प्रेतस्य प्रेतकार्य्याणि कृत्वा वै धनहारकः ।
वर्णानां यद्व्रतं प्रोक्तं तद्व्रतं प्रयतश्चरेत् ॥
कृत्वा पापं न गूहेत गुह्यमानं हि वर्द्धते ।
कृत्वा पापं बुधः कुर्य्यात् पर्षदानुमत व्रतम् ॥
स्थित्वा च श्वपदाकीर्णे बहु व्याधमृगे वने ।
न ब्राह्मणोव्रतं कुर्य्यात् प्राणबाधभयात् सदा ॥
सतोहि जीवतःजीवं सर्वपापमपोहति ।
व्रतैः कृच्छ्रैस्तथा दानैरित्याह भगवान् यमः ॥
शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः ।
शरीरात्स्रवते धर्मः पर्वतात् सलिलं यथा ॥
आलोच्य सर्वशास्त्राणि समेत्य ब्राह्मणैः सह ।
प्रायश्चित्तं द्विजो दद्यात् स्वेच्छया न कदाचन ॥

इति शाङ्खीये धर्मशास्त्रे सप्तदशोऽध्यायः ॥

अष्टादशोऽध्यायः॥

त्र्यहं त्रिषवणस्नाने प्रकुर्य्यादघमर्षणम्।
निमज्य नक्तं सरिति न भुञ्जीत दिनत्रयम्॥
वीरासनं सदा तिष्ठेद्गाञ्च दद्यात् पयस्विनीम्।
अघमर्षणमित्येतत् कृतं सर्वाघनाशनम्॥
त्र्यहं सायं त्र्यहं प्रात स्त्र्यहमद्यादयाचितम्।
परं त्र्यहञ्च नाश्नीयात् प्राजापत्यं चरन् व्रतम्॥
त्र्यहमुष्णं पिवेदापस्त्र्यहमुष्णं घृतं पिवेत्।
त्र्यहमुष्णं पयः पीत्वा वायुभक्षो दिनत्रयम्॥
तप्तकृच्छ्रं विजानीयादेतदुक्तं सदा व्रतम्।
द्वादशेनोपवासेन पराकः परिकीर्त्तितः॥
विधिनोदकसिद्धानि समश्नीयात् प्रयत्नतः।
शक्तून् हि सोदकान् मासं कृच्छ्रं वारुणमुच्यते॥
विल्वैरामलकैर्वापि कपित्थैरथवा शुभैः।
मासेन लोकेऽतिकृच्छ्रः कथ्यते द्विजसत्तमैः॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासस्तु कृच्छ्रं सान्तपनं स्मृतम्॥
एतैस्तु त्र्यहमभ्यस्तैर्महासान्तपनं स्मृतम्।
पादद्वयं तथा त्यक्त्वा शक्तूनां परिवासनात्।
उपवासान्तराभ्यासात्तुलापुरुष उच्यते॥
गोपुरीषाशनो भूत्वा मासं नित्यं समाहितः।
व्रतन्तु वार्द्धिकं कुर्य्यात् सर्वपापापनुत्तये॥
ग्रासं चन्द्रकलावृद्ध्या प्राश्नीयाद्वर्द्धयन् सदा।

ह्रासयंस्तु कलाह्रानौ व्रतं चान्द्रायणं स्मृतम् ॥
मन्त्रं विद्वान् जपेद्भक्त्या जुहुयाच्चैव शक्तितः ।
अयं विधिस्तु विज्ञेयः सुधीभिर्विमलात्मभिः ।
पापात्मनस्तु पापिभ्यो नात्र कार्य्या विचारणा ॥
शङ्खप्रोक्तमिदं शास्त्रं योऽधीते प्रयतः सुधीः ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥
इति शाङ्खीये धर्मशास्त्रेऽष्टादशोऽध्यायः ।

इति श्रीमन्महर्षिशिरोरत्नायमानत्रयीनितराङ्गेगीयमानमहाविद्यान्यकृताखण्डनोपदेशधीषणाशङ्खविरचितं धर्मशास्त्रं समाप्तम् ॥

इष्टापूर्त्ते तु कर्त्तव्ये ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते स्वर्गं पूर्त्ते मोक्षमवाप्नुयात् ॥
एकाहमपि कर्त्तव्यं भूमिष्ठमुदकं शुभम् ।
कुलानि तारयेत् सप्त यत्र गौर्वितृषी भवेत् ॥
भूमिदानेन ये लोका गोदानेन च कीर्त्तिताः ।
तल्लोकान् प्राप्नुयान्मर्त्यः पादपानां प्ररोपणे ॥
वापीकूपतड़ागानि देवतायतनानि च ।
पतितान्युद्धरेद्‌यस्तु स पूर्त्तं फलमश्नुते ॥
अग्निहोत्रं तपः सत्यं वेदानाञ्चैव पालनम् ।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते ॥
इष्टापूर्त्ते द्विजातीनां सामान्योधर्मउच्यते ।
अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके ॥
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति ।
तावद्वर्षं सहस्राणि स्वर्गलोके महीयते ॥
देवतानां पितृणाञ्च जले दद्याज्जलाञ्जलिम् ।
असंस्कृतमृतानाञ्च स्थले दद्याज्जलाञ्जलिम् ॥
एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ।

मुच्यते प्रेतलोकात्तु, पितृलोकं स गच्छति ॥
एष्टव्या बहवः पुत्रा यद्यप्येको गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
वाराणस्यां प्रविष्टस्तु कदाचिन्निष्क्रमेद्यदि ।
हसन्ति तस्य भूतानि अन्योन्यं करताड़नैः ॥
गयाशिरे तु यत्किञ्चिन्नाम्ना पिण्डन्तु निर्वपेत् ।
नरकस्थोदिवं याति स्वर्गस्थोमोक्षमाप्नुयात् ॥
आत्मनोवा परस्यापि गयाक्षेत्रे यतस्ततः ।
यन्नाम्ना पातयेत् पिण्डं तं नयेद्ब्रह्म शाश्वतम् ॥
लोहितो यस्तु वर्णेन शङ्खवर्णखुरस्तथा ।
लाङ्गूलशिरसोश्चैव स वै नीलवृषः स्मृतः ॥
नवश्राद्धं त्रिपक्षे च द्वादशश्चैव मासिकम् ।
षण्मासौ चाब्दिकश्चैव श्राद्धान्येतानि षोड़श ॥
यस्यैतानि न कुर्वीत एकोद्दिष्टानि षोड़श ।
पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥
सपिण्डीकरणादूर्द्ध्वं प्रतिसम्बत्सरं द्विजः ।
मातापित्रोः पृथक्कुर्य्यादेकोद्दिष्टं मृतेऽहनि ॥
वर्षे वर्षे तु कर्त्तव्यं मातापित्रोस्तु सन्ततम् ।
अदैवं भोजयेच्छ्राद्धं पिण्डमेकन्तु निर्वपेत् ॥
सङ्क्रान्तावुपरागे च पर्वण्यपि महालये ।
निर्वाप्यस्तु त्रयः पिण्डा एकतस्तु क्षयेऽहनि ॥
एकोद्दिष्टं परित्यज्य पार्वणं कुरुते द्विजः ।
अकृतं तद्विजानीयात् स नाम पितृघातकः ।
अमावस्यां क्षयोयस्य प्रेतपक्षे ऽथवा यदि ।

सपिण्डीकरणादूर्द्धं तस्योक्तः पार्वणोविधिः ॥
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते।
अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते ॥
यस्य सम्वत्सरादर्वाक् सपिण्डीकरणं स्मृतम्।
प्रत्यहं तत्सोदकुम्भं दद्यात् सम्वत्सरं द्विजः ॥
पत्यां चैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पितामह्यापि तत्तस्मिन् सत्येवन्तु क्षयेऽहनि ॥
तस्या सत्यां प्रकर्त्तव्यं तस्याः श्वश्र्वेति निश्चितम् ॥
विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु।
एकत्वं सा गता भर्त्तुः पिण्डे गोत्रे च सूतके ॥
स्वगोत्राद्भ्रश्यते नारी उद्वाहात् सप्तमे पदे।
भर्त्तृगोत्रेण कर्तव्यं दानं पिण्डोदकक्रिया ॥
द्विमातुः पिण्डदानन्तु पिण्डे पिण्डे द्विनामतः।
षसां देयास्त्रयः पिण्डा एवं दाता न मुह्यति ॥
अथ चेन्मन्त्रवित्युक्तः शारीरैः पङ्क्तिदूषणैः।
अदोषन्तं यमः प्राह पङ्क्तिपावनएव सः ॥
अग्नौ करणशेषन्तु पितृपात्रे प्रदापयेत्।
प्रतिपाद्य पितॄणाञ्च न दद्याद्वैश्वदेविके ॥
अनग्निको यदा विप्रः श्राद्ध करोति पार्वणम्।
तत्र मातामहानाञ्च कर्तव्यमभयं सदा ॥
अपुत्त्रा ये मृताः केचित् पुरुषावा स्त्रियोऽपिवा।
तेभ्यएव प्रदातव्यमेकोद्दिष्टं न पार्वणम् ॥
यस्मिन् राशिगते सूर्ये विपत्तिः स्याद्द्विजन्मन.।
तस्मिन्नहनि कर्तव्यं दानं पिण्डोदकक्रिया ॥

वर्षवृद्ध्यभिषेकादि कर्तव्य मधिकेन तु।
अधिमासे तु पूर्वं स्याच्छ्राद्धं सम्वत्सरादपि॥
सएव हेयोद्दिष्टस्य येन केन तु कर्मणा।
अभिघातान्तरं कार्य्यं तत्रैवाब्दःकृतं भवेत्॥
शालाग्नौ पचते अन्नं लौकिकेनापि नित्यशः।
यस्मिन्नेव पचेदन्नं तस्मिन् होमो विधीयते॥
वैदिके लौकिके वापि नित्य हुत्वा ह्यतन्त्रितः।
वैदिके स्वर्गमाप्नोति लौकिके हन्ति किल्बिषम्॥
अग्नौ व्याहृतिभिः पूर्वं हुत्वा मन्त्रैस्तु शाकलैः।
संविभागन्तु भूतेभ्यस्ततोऽश्नीयादनग्निमान्॥
उच्छेषणन्तु नोत्तिष्ठेद्यावद्विप्रविसर्जनम्।
ततोगृहवलिं कुर्य्यादिति धर्मोव्यवस्थितः॥
दर्भाः कृष्णाजिनं मन्त्राब्राह्मणा स्व विशेषतः।
नैते निर्म्माल्यतां यान्ति योक्तव्यास्ते पुनः पुनः॥
पानमाचमनं कुर्य्यात् कुशपाणिः सदा द्विजः।
भुक्ता नोच्छिष्टतां याति एष एव विधिः सदा॥
पान आचमने चैव तर्पणे दैविके सदा।
कुशहस्तो न दूष्येत यथा पाणिस्तथा कुशः॥
वामपाणौ कुशान् कृत्वा दक्षिणेन उपस्पृशेत्।
विनाचमन्ति ये मूढा रुधिरेणाचमन्ति ते॥
नीवीमध्येषु ये दर्भाब्रह्मसूत्रेषु ये कृताः।
पवित्रांस्तान् विजानीयाद्यथा कायस्तथा कुशाः॥
पिण्डे कृतास्तु ये दर्भा यैः कृतं पितृतर्पणम्।
मूत्रोच्छिष्टपुरीषञ्च तेषां त्यागोविधीयते॥

दैवपूर्वन्तु यच्छ्राद्धमदैवञ्चापि यद्भवेत्।
ब्रह्मचारी भवेत्तत्र कुर्य्याच्छ्राद्धन्तु पैतृकम्॥
मातुः श्राद्धन्तु पूर्वं स्यात् पितॄणां तदनन्तरम्।
ततोमातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम्॥
क्रतुर्दक्षोवसुः सत्यः कालकामौ धुरिलोचनौ।
पुरूरवामाद्रवाश्च विश्वेदेवाः प्रकीर्तिताः॥
आगच्छन्तु महाभागाविश्वेदेवामहाबलाः।
ये यत्र विहिताः श्राद्धे सावधानाभवन्तु ते॥
इष्टिश्राद्धे क्रतुर्दक्षोवसुः सत्यश्च दैविके।
कालः कामेऽग्निकार्य्येषु अम्बरे धुरिलोचनौ।
पुरूरवामाद्रवाश्च पार्वणेषु नियोजयेत्॥
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता।
नोपयच्छेत तां प्राज्ञः पुत्रिकाकर्मशङ्कया॥
अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्।
अस्यां योजायते पुत्रः स मे पुत्रोभविष्यति॥
मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः।
द्वितीयन्तु पितुस्तस्यास्तृतीयन्तत्पितुः पितुः॥
स्वर्णमयेषु च पात्रेषु श्राद्धे यो भोजयेत् पितॄन्।
अन्नदाता पुरोधाश्च भोक्ता च नरकं व्रजेत्॥
अलाभे स्वर्णमयं दद्यादनुज्ञातस्तु तैर्द्विजैः।
घृतेन प्रोक्षणं कार्य्यं मृदः पात्रं पवित्रकम्॥
श्राद्धं कृत्वा परश्राद्धे यस्तु भुञ्जीत विह्वलः।
पतन्ति पितरस्तस्य लुप्तपिण्डोदकक्रियाः॥
श्राद्धं दत्त्वा च भुक्त्वा च अध्वानं योऽधिगच्छति।

भवन्ति पितरस्तस्य तन्मासं पांशुभोजनाः ॥
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्।
दानं प्रतिग्रहं होमं श्राद्धं कृत्वाष्ट वर्जयेत् ॥
अध्वगामी भवेदश्वः पुनर्भोक्ता च वायसः।
कर्मकृज्जायते दासः स्त्रीगमने च शूकरः ॥
दशकृत्वः पिवेदापः सावित्र्या चाभिमन्त्रिताः।
ततः सन्ध्यामुपासीत शुद्ध्येत तदनन्तरम् ॥
आर्द्रवासास्तु यत् कुर्य्याद्बहिर्जानु च यत् कृतम्।
सर्वं तन्निष्फलं कार्य्यं जपहोमप्रतिग्रहम् ॥
चान्द्रायणं नवश्राद्धे पराको मासिके तथा।
पक्षत्रये तु कृच्छ्रं स्यात् षण्मासे कृच्छ्रमेवच ॥
ऊनाब्दिके त्रिरात्रं स्यादेकाहः पुनराब्दिके।
शावे मासन्तु भुक्त्वा वा पादकृच्छ्रं विधीयते ॥
सर्पविप्रहतानाञ्च शृङ्गिदंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत् ॥
गोभिर्हतं तथोद्बद्धं ब्राह्मणेन तु घातितम्।
तं स्पृशन्ति च ये विप्रा गोजाश्वाश्च भवन्ति ते ॥
अग्निदाता तथा चान्ये पाशच्छेदकराश्च ये।
तप्तकृच्छ्रेण शुध्यन्ति मनुराह प्रजापतिः ॥
त्र्यहमुष्णं पिवेदापस्त्र्यहमुष्णं पयः पिवेत्।
त्र्यहमुष्णं घृतं पीत्वा वायुभक्ष्यो दिनत्रयम्।
गोभूहिरण्यहरणे स्त्रीणां क्षेत्रगृहस्य च।
यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम् ॥
उद्यताः सह धावन्ते यद्येकोधर्मघातकः।

सर्वे ते शुद्धिमृच्छन्ति स एको ब्रह्मघातकः ॥
पतितान्नं यदा भुङ्क्ते भुङ्क्ते चाण्डालवेश्मनि ।
स मासार्द्धं चरेद्वारि मासं कामकृतेन तु ॥
योयेन पतितेनैव स्पृष्टो स्नानं विधीयते ।
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ॥
ब्रह्मघ्ना च सुरापायी स्तेयी च गुरुतल्पगः ।
महान्ति पातकान्याहुस्तत्संसर्गी च पञ्चमः ।
स्नेहाद्वा यदिवा लोभाद्भयादज्ञानतोऽपिवा ।
कुर्वन्त्यनुग्रहं ये च तत्पापं तेषु गच्छति ॥
उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणस्तु कदाचन ।
तत्क्षणात् कुरुते स्नानमाचमेन शुचिर्भवेत् ॥
कुब्जवामनषण्ढेषु गद्गदेषु जडेषु च ।
जात्यन्धे वधिरे मूके न दोषः परिवेदने ॥
क्लीवे देशान्तरस्थे च पतिते व्रजितेऽपिवा ।
योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥
पूरणे कूपवापीनां वृक्षच्छेदनपातने ।
विक्रीणीत गजञ्चाश्वं गोवधन्तस्य निर्दिशेत् ॥
पादेऽङ्गरोमवपनं द्विपादे श्मश्रु केवलम् ।
तृतीये तु शिखावर्ज्जं चतुर्थे तु शिखावपः ॥
चाण्डालोदकसंस्पर्शे स्नानं येन विधीयते ।
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्य समाचरेत् ॥
चण्डालघटभाण्डस्थं यत्तोयं पिबति द्विजः ।
तत्क्षणात् क्षिपते यस्तु प्राजापत्यं समाचरेत् ॥
यदि नोत्क्षिप्यते तोयं शरीरे तस्य जीर्य्यति ।

प्राजापत्यं न दातव्यं कृच्छ्रं सान्तपनं चरेत् ॥
चरेत् सान्तपनं विप्रः प्राजापत्यन्तु क्षत्रियः ।
तदर्द्धन्तु चरेद्वैश्यः पादं शूद्रे तु दापयेत् ॥
रजस्वला यदा स्पृष्टा शुना शूकरवायसैः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥
अज्ञानतः स्नानमात्रमानाभेस्तु विशेषतः ।
अत ऊर्द्धं त्रिरात्रं स्यात्तु दीयस्पर्शने मतम् ॥
बालस्यैव दशाहे तु पञ्चत्वं यदि गच्छति ।
सद्य एव विशुद्ध्येत नाशौचं नोदकक्रिया ॥
शावसूतक उत्पन्ने सूतकन्तु सदा भवेत् ।
शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी ॥
षष्ठेन शुद्ध्यत्येकाहं पञ्चमे त्र्यहमेव तु ।
चतुर्थे सप्तरात्रं स्यात्त्रिपुरुषे दशमेऽहनि ॥
मरणारब्धमाशौचं संयोगो यस्य नाग्निभिः ।
आदाहात्तस्य विज्ञेयं यस्य वैतानिको विधिः ॥
आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः ।
अन्यभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः ॥
मार्जनीरजसामक्ते स्नानवस्त्रघटोदके ।
नवाम्भसि तथा चैव हन्ति पुण्यं दिवाकृतम् ॥
दिवा कपित्थच्छायायां रात्रौ दधिषु शक्तुषु ।
धात्रीफलेषु सर्वत्र अलक्ष्मीर्वसते सदा ।
यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमं गायत्र्यष्टशतं जपेत् ॥
इति श्रीमहर्षिलिखितप्रोक्तं धर्मशास्त्रं समाप्तम् ॥

दक्षसंहितायाम्।

प्रथमोऽध्यायः।

सर्वधर्मार्थतत्त्वज्ञः सर्ववेदविदां वरः।
पारगः सर्व्वविद्यानां दक्षो नाम प्रजापतिः॥
उत्पत्तिः प्रलयश्चैव स्थितिः संहारएव च।
आत्मा चात्मनि तिष्ठेत आत्मा ब्रह्मण्यवस्थितः॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थोयतिस्तथा।
एतेषान्तु हितार्थाय दक्षः शास्त्रमकल्पयत्॥
जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः।
सहि गर्भसमोज्ञेयोव्यक्तिमात्रप्रदर्शितः॥
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते।
तस्मिन् काले न दोषोऽस्ति स यावन्नोपनीयते॥
उपनीतस्य दोषोऽस्ति क्रियमाणैर्विगर्हितैः।
अप्राप्तव्यवहारोऽसौ यावत् षोड़शवार्षिकः॥
स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च।
ब्रह्मचारी भवेत्तावदूर्द्ध्वं स्नातो भवेद्गृही॥
द्विविधोब्रह्मचारी तु स्मृतः शास्त्रे मनीषिभिः।
उपकुर्वाणकस्त्वाद्योद्वितीयोनैष्ठिकः स्मृतः॥

योऽगृहाश्रममास्थाय ब्रह्मचारी भवेत् पुनः।
न यतिर्न वनस्थश्च सर्व्वाश्रमविवर्ज्जितः॥
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः॥
जपे होमे तथा दाने स्वाध्याये च रतस्तु यः।
नासौ तत्फलमाप्नोति कुर्वाणोऽप्याश्रमाच्युतः।
त्रयाणामानुलोम्यं हि प्रातिलोम्यं न विद्यते॥
प्रातिलोम्येन यो याति न तस्मात् पापकृत्तमः।
मेखलाजिनदण्डेन ब्रह्मचारी तु लक्ष्यते॥
गृहस्थोदेवयज्ञाद्यैर्नखलोम्ना वनाश्रितः।
त्रिदण्डेन यतिश्चैव लक्षणानि पृथक् पृथक्॥
यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती नचाश्रमी।
उक्तं कर्म क्रमोनोक्तो न कालोमुनिभिः स्मृतः॥
द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत्॥
इति दाक्षे धर्मशास्त्रे प्रथमोऽध्यायः।

द्वितीयोऽध्याय।

प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने।
तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम्॥
उदयास्तमयं यावन्न विप्रः क्षणिकोभवेत्।
नित्यनैमित्तिकैर्युक्तः काम्यैश्चान्यैरगर्हितैः॥
यः स्वकर्म परित्यज्य यदन्यत् कुरुते द्विजः।
अज्ञानादथवा मोहात् स तेन पतितो भवेत्।

दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते ।
द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा ॥
षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् ।
विभागेष्वेषु यत्कर्म तत्प्रवक्ष्याम्यशेषतः ॥
उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्वकम् ॥
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।
स्रवत्येष दिवारात्रौ प्रातःस्नानं विशोधनम् ॥
क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि स्रवन्ति च ।
अङ्गानि समतां यान्ति उत्तमान्यधमैः सह ॥
नानास्वेदसमाकीर्णः शयनादुत्थितः पुमान् ।
अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन ॥
प्रातरुत्थाय योविप्रः प्रातःस्नायी भवेत् सदा ।
समस्तजन्मजं पापं त्रिभिर्वर्षैर्व्यपोहति ॥
उषस्युषसि यत् स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।
सर्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम् ॥
स्नानादनन्तरं तावदुपस्पर्शनमुच्यते ।
अनेन तु विधानेन आचान्तः शुचितामियात् ॥
प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम् ।
संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततोमुखम् ॥
संहत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत् ।
ततः पादौ समभ्युक्ष्य अङ्गानि समुपस्पृशेत् ॥

अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् ।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः ॥
कनिष्ठाङ्गुष्ठया नाभिं हृदयञ्च तलेन वै ।
सर्व्वाभिस्तु शिरः पश्चाद्वाहू चाग्रेण संस्पृशेत् ॥
सन्ध्यायाञ्च प्रभाते च मध्याह्ने च ततः पुनः ।
सन्ध्यां नोपासते यस्तु ब्राह्मणोहि विशेषतः ॥
स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते ।
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥
यदन्यत् कुरुते कर्म न तस्य फलमश्नुते ॥
सन्ध्याकर्मावसाने तु स्वयं होमोविधीयते ।
स्वयंहोमे फलं यत्तु तदन्येन न जायते ॥
ऋत्विक् पुत्त्रोगुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेवहि ॥
देवकार्य्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् ।
देवकार्य्याणि पूर्व्वाह्णे मनुष्याणाञ्च मध्यमे ॥
पितॄणामपराह्णे च कार्य्याण्येतानि यत्नतः ।
पौर्व्वाह्णिकन्तु यत् कर्म यदि तत् सायमाचरेत् ॥
न तस्य फलमाप्नोति वन्ध्यास्त्रीमैथुनं यथा ।
दिवसस्याद्यभागे तु सर्वमेतद्विधीयते ॥
द्वितीये च तथाभागे वेदाभ्यासोविधीयते ।
वेदाभ्यासोहि विप्राणां परमं तपउच्यते ॥
ब्रह्मयज्ञः स विज्ञेयः षड़ङ्गसहितस्तु सः ।
वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ॥
ततोदानञ्च शिष्येभ्यो वेदाभ्यासोहि पञ्चधा ।

समित्पुष्पकुशादीनां स कालः समुदाहृतः ॥
तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम्।
पिता माता गुरुर्भार्य्या प्रजादीनाः समाश्रिताः ॥
अभ्यागतोऽतिथिश्चान्यः पोष्यवर्गउदाहृतः।
ज्ञातिर्बन्धुजनः क्षीणस्तथानाथः समाश्रितः ॥
अन्येऽप्यधनयुक्ताश्च पोष्यवर्गउदाहृतः।
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ॥
नरकं पीड़ने चास्य तस्माद्यत्नेन तं भरेत्।
सार्वभौतिकमन्नाद्यं कर्त्तव्यन्तु विशेषतः।
ज्ञानविद्भ्यः प्रदातव्यमन्यथा नरकं व्रजेत् ॥
स जीवति यएवैकोबहुभिश्चोपजीव्यते।
जीवन्तोमृतकाश्चान्ये य आत्मम्भरयो नराः।
बह्वर्थे जीव्यते कश्चित् कुटुम्बार्थे तथा परैः ॥
आत्मार्थेऽन्यो न शक्नोति स्वोदरेणापि दुःखितः।
दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता ॥
अदत्तदाना जायन्ते परभाग्योपजीविनः।
यद्ददाति विशिष्टेभ्यो यज्जुहोति दिने दिने ॥
तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति।
चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् ॥
तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले।
नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ॥
तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा।
मलापहरणं पश्चान्मन्त्रवत्तु जले स्मृतम् ॥
सन्ध्यास्नानमुभाभ्याञ्च स्नानभेदाः प्रकीर्तिताः।

मार्जनं जलमध्ये तु प्राणायामोयतस्ततः ॥
उपस्थानं ततः पश्चात् सावित्र्या जप उच्यते ।
सविता देवता यस्या मुखमग्निस्त्रिधा स्थितः ॥
विश्वामित्रऋषिश्छन्दोगायत्री सा विशिष्यते ।
पञ्चमे च तथाभागे संविभागोयथार्हतः ॥
पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते ।
देवैश्चैव मनुष्यैश्च तिर्य्यग्भिश्चोपजीव्यते ॥
गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठाश्रमी गृही ।
त्रयाणामाश्रमाणान्तु गृहस्थो योनिरुच्यते ॥
तेनैव सीदमानेन सीदन्तीहेतरे त्रयः ।
मूलप्राणो भवेत् स्कन्दः स्कन्दाच्छाखाः सपल्लवाः ॥
मूलेनैव विनष्टेन सर्वमेतद्विनश्यति ।
तस्मात् सर्वप्रयत्नेन रक्षितव्यो गृहाश्रमी ॥
राज्ञा चान्यैस्त्रिभिः पूज्यो माननीयश्च सर्वदा ।
गृहस्थोऽपि क्रियायुक्तो न गृहेण गृहाश्रमी ॥
नचैव पुत्रदारेण स्वकर्मपरिवर्जितः ।
अस्नात्वा चाप्यहुत्वा चाजप्त्वाऽदत्त्वा च मानवः ॥
देवादीना मृणी भूत्वा नरकं प्रतिपद्यते ।
एकएव हि भुङ्क्तेऽन्नमपरोऽन्नेन भुज्यते ॥
न भुज्यते सएवैको योभुङ्क्तेऽन्नं ससाक्षिणा ।
विभागशीलो योनित्यं क्षमायुक्तोदयापरः ॥
देवतातिथिभक्तश्च गृहस्थः स तु धार्मिकः ।
दया लज्जा क्षमा श्रद्धा प्रज्ञा योगः कृतज्ञता ॥
एते यस्य गुणाः सन्ति स गृही मुख्यउच्यते ।

सम्बिभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् ॥
भुक्का तु सुखमास्थाय तदन्नं परिणामयेत् ।
इतिहासपुराणाद्यैः षष्ठञ्च सप्तमं नयेत् ॥
अष्टमे लोकयात्रा तु वहिःसन्ध्या ततः पुनः ।
होमो भोजनकञ्चैव यञ्चान्यद्गृहकृत्यकम् ॥
कृत्वा चैवं ततः पश्चात् स्वाध्यायं किञ्चिदाहरेत् ।
प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् ॥
यामद्वयं शयानोहि ब्रह्मभूयाय कल्पते ।
नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ॥
तथा तथैव कार्य्याणि न कालस्तु विधीयते ।
अस्मिन्नेव प्रयुञ्जानो ह्यस्मिन्नेव तु लीयते ॥
तस्मात् सर्वप्रयत्नेन कर्त्तव्यं सुखमिच्छता ।
सर्वत्र मध्यमौ यामौ हुतशेषं हविश्च यत् ॥
भुञ्जानश्च शयानश्च ब्राह्मणो नावसीदति ॥

इति दाक्षे धर्मशास्त्रे द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

सुधा नवगृहस्थस्य सद्वयामि नवैव तु ।
तथैव नव कर्माणि विकर्माणि तथा नव ॥
प्रच्छन्नानि नवान्यानि प्रकाश्यानि तथा नव ।
सफलानि नवान्यानि निष्फलानि नवैव तु ॥
अदेयानि नवान्यानि वस्तुजातानि सर्वदा ।

नवका नव निर्दिष्टा गृहस्थोन्नतिकारकाः ॥
सुधावस्तूनि वक्ष्यामि विशिष्टे गृहमागते ।
मनश्चक्षुर्मुखं वाचं सौम्यं दद्याच्चतुष्टयम् ॥
अभ्युत्थानमिहागच्छ पृच्छालापप्रियान्वितः ।
उपासन मनुव्रज्या कार्य्याण्येतानि यत्नतः ॥
ईषद्दानानि चान्यानि भूमिरापस्तृणानि च ।
पादशौचं तथाभ्यङ्गमाश्रयः शयनन्तथा ॥
किञ्चिच्चान्नं यथाशक्ति नास्यानश्नन् गृहे वसेत् ।
मृज्जलं चार्थिने देय मेतान्यपि सदा गृहे ॥
सन्ध्यास्नानं जपोहोमः स्वाध्यायो देवतार्च्चनम् ।
वैश्वदेवं तथातिथ्यमुद्धृतञ्चापि शक्तितः ॥
पितृदेवमनुष्याणां दीनानाथतपस्विनाम् ।
मातापितृगुरूणाञ्च संविभागोयथार्हतः ॥
एतानि नव कर्म्माणि विकर्म्माणि तथा पुनः ।
अनृतं पारदार्य्यञ्च तथाभक्ष्यस्य भक्षणम् ॥
अगम्यागमनापेयपानं स्तेयञ्च हिंसनम् ।
अश्रौतकर्म्माचरणं मित्रधर्म्मवहिष्कृतम् ॥
नवैतानि विकर्म्माणि तानि सर्व्वाणि वर्जयेत् ।
आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ॥
तपोदानावमानौ च नव गोप्यानि यत्नतः ।
प्रायोग्यमृणशुद्धिश्च दानाध्ययनविक्रयाः ॥
कन्यादानं वृषोत्सर्गो रहःपापमकुत्सनम् ।
प्रकाश्यानि नवैतानि गृहस्थाश्रमिणस्तथा ॥
मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि ।

दीनानाथविशिष्टेभ्योदत्तन्तु सफलं भवेत्॥
धूर्त्ते वन्दिनि मन्दे च कुवैद्ये कितवे शठे।
चाटुचारणचौरेभ्योदत्तं भवति निष्फलम्॥
सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम्।
क्रमायातञ्च निक्षेपः सर्वस्वञ्चान्वये सति॥
आपत्स्वपि न देयानि नव वस्तूनि सर्वदा।
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः॥
नवनवकवेत्तारमनुष्ठानपरं नरम्।
इह लोके परे च श्रीः स्वर्गस्थञ्च न मुञ्चति॥
यथैवात्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता।
सुखदुःखानि तुल्यानि यथात्मनि तथा परे॥
सुखं वा यदि वा दुःखं यत्किञ्चित् क्रियते परे।
ततस्तत्तु पुनः पश्चात् सर्वमात्मनि जायते॥
न क्लेशेन विना द्रव्यं द्रव्यहीने कुतः क्रिया।
क्रियाहीने न धर्मः स्याद्धर्महीने कुतः सुखम्॥
सुखं वाञ्छन्ति सर्वे हि तच्च धर्मसमुद्भवम्।
तस्माद्धर्मः सदा कार्य्यः सर्ववर्णैः प्रयत्नतः॥
न्यायागतेन द्रव्येण कर्त्तव्यं पारलौकिकम्।
दानञ्च विधिना देयं काले पात्रे गुणान्विते॥
समद्विगुणसाहस्रमानन्त्यञ्च यथाक्रमम्।
दाने फलविशेषः स्याद्धिंसायां तावदेव तु॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
सहस्रगुणमाचार्य्ये त्वनन्तं वेदपारगे॥
विधिहीने तथा पात्रे यो ददाति प्रतिग्रहम्।

न केवलं तद्विनश्येच्छेषमप्यस्य नश्यति ॥
व्यसनप्रतिकाराय कुटुम्बार्थञ्च याचते ।
एवमन्विष्य दातव्यमन्यथा न फलं भवेत् ॥
मातापितृविहीनन्तु संस्कारोद्वहनादिभिः ।
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ॥
न तच्छ्रेयोऽग्निहोत्रेण नाग्निष्टोमेन लभ्यते ।
यच्छ्रेयः प्राप्यते पुंसा विप्रेण स्थापितेन तु ॥
यद्यदिष्टतमं लोके यच्चापि दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥
इति दाक्षे धर्मशास्त्रे तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

पत्नीमूलं गृहं पुंसां यदि च्छन्दोऽनुवर्तिनी ।
गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा ॥
तया धर्मार्थकामानां त्रिवर्गफलमश्नुते ।
प्राकाम्ये वर्त्तमाना तु स्नेहान्नतु निवारिता ॥
अवश्या सा भवेत् पश्चाद्यथा व्याधिरुपेक्षितः ।
अनुकूला नवाग्दुष्टा दक्षा साध्वी प्रियम्बदा ॥
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी ॥
अनुकूलकलत्रीय स्तस्य स्वर्ग इहैवहि ।
प्रतिकूलकलत्रस्य नरको नात्र संशयः ॥
स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम् ।

रक्त एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम् ॥
गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम् ।
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी ॥
दुःखा ह्यन्या सदा खिन्ना चित्तभेदः परस्परम् ।
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः ॥
योषित् सर्व्वा जलौकेव भूषणाच्छादनाशनैः ।
सुभृत्यापि कृता नित्यं पुरुषं ह्यपकर्षति ॥
जलौका रक्तमादत्ते केवलं सा तपस्विनी ।
इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम् ॥
सशङ्का बालभावे तु यौवने विमुखी भवेत् ।
तृणवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम् ॥
अनुकूला नवाग्दुष्टा दक्षा साध्वी पतिव्रता ।
एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः ॥
या हृष्टमनसा नित्यं स्थानमानविचक्षणा ।
भर्त्तुः प्रीतिकरी नित्यं सा भार्य्या ह्यितरा जरा ॥
शिष्योभार्य्या शिशुर्भ्राता पुत्रोदासः समाश्रितः ।
यस्यैतानि विनीतानि तस्य लोके हि गौरवम् ॥
प्रथमा धर्मपत्नी च द्वितीया रतिवर्द्धिनी ।
दृष्टमेव फलं तत्र नादृष्टमुपजायते ॥
धर्मपत्नी समाख्याता निर्द्दोषा यदि सा भवेत् ।
दोषे सति न दोषः स्यादन्या भार्य्या गुणान्विता ॥
अदुष्टापतितां भार्य्यां यौवने यः परित्यजेत् ।
स जीवनान्ते स्त्रीत्वञ्च वन्ध्यत्वञ्च समाप्नुयात् ॥
दरिद्रं व्याधितं चैव भर्त्तारं यावमन्यते ।

शुनी गृध्री च मकरी जायते सा पुनः पुनः ॥
मृते भर्तरि या नारी समारोहेद्धुताशनम् ।
सा भवेत्तु शुभाचारा स्वर्गलोके महीयते ॥
व्यालग्राही यथा व्यालं बलादुद्धरते विलात् ।
तथा सा पतिमुद्धृत्य तेनैव सह मोदते ॥
चाण्डालप्रत्यवसितपरिव्राजकतापसाः ।
तेषां जातान्यपत्यानि चाण्डालैः सह वासयेत् ॥
इति दाक्षे धर्मशास्त्रे चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

उक्तं शौचमशौचञ्च कार्य्यं त्याज्यं मनीषिभिः ।
विशेषार्थं तयोः किञ्चिद्वक्ष्यामि हितकाम्यया ॥
शौचे यत्नः सदाकार्य्यः शौचमूलो द्विजः स्मृतः ।
शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ॥
शौचञ्च द्विविधं प्रोक्तं वाह्यमाभ्यन्तरन्तथा ।
मृज्जलाभ्यां स्मृतं वाह्यं भावशुद्धिस्तथान्तरम् ॥
अशौचाद्धि वरं वाह्यं तस्मादाभ्यन्तरं वरम् ।
उभाभ्याञ्च शुचिर्यस्तु स शुचिर्नेतरः शुचिः ॥
एका लिङ्गे गुदे तिस्रोदश वामकरे तथा ।
उभयोः सप्त दातव्या मृदस्तिस्रस्तु पादयोः ॥
गृहस्थशौचमाख्यातं त्रिष्वन्येषु यथाक्रमम् ।
द्विगुणं त्रिगुणञ्चैव चतुर्थस्य चतुर्गुणम् ॥

अर्द्धप्रसृतिमात्रन्तु प्रथमा मृत्तिका स्मृता ।
द्वितीयाच तृतीया च तदर्द्धं परिकीर्तिता ॥
लिङ्गेऽप्यत्र समाख्याता त्रिपर्वी पूर्य्यते यया ।
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ॥
त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम् ।
दातव्यमुदकन्तावन्मृद्भावोयथा भवेत् ॥
मृदा जलेन शुद्धिः स्यान्नक्लेशो न धनव्ययः ।
यस्य शौचेऽपि शैथिल्यं चित्तं तस्य परीक्षितम् ॥
अन्यदेव दिवाशौचं रात्रावन्यद्विधीयते ।
अन्यदापत्सु विप्राणामन्यदेव ह्यनापदि ॥
दिवोदितस्य शौचस्य रात्रावर्द्धं विधीयते ।
तदर्द्धमातुरस्याङ्गत्वरायामर्द्धमध्वनि ॥
न्यूनाधिकं न कर्तव्यं शौचे शुद्धिमभीप्सता ।
प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते ॥
इति दाक्षे धर्मशास्त्रे पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

सूतकन्तु प्रवक्ष्यामि जन्ममृत्युसमुद्भवम् ।
यावज्जीवं तृतीयन्तु यथावदनुपूर्वशः ॥
सद्यः शौचं तथैकाहोद्वित्रिचतुरहस्तथा ।
दशाहो द्वादशाहश्च पक्षोमासस्तथैव च ॥
मरणान्तं तथा चान्यद्दशपक्षन्तु सूतके ।

उपन्यस्तक्रमेणैव वक्ष्याम्यहमशेषतः ॥
ग्रन्थार्थतोविजानाति वेदमङ्गैः समन्वितम् ।
सकल्पं सरहस्यञ्च क्रियावांश्चेन्न सूतकी ॥
राजर्त्विग्दीक्षितानाञ्च बाले देशान्तरे तथा ।
व्रतिनां सत्रिणाञ्चैव सद्यः शौचं विधीयते ॥
एकाहस्तु समाख्यातो योऽग्निवेदसमन्वितः ।
हीने हीनतरेचैव द्वित्रिचतुरहस्तथा ॥
जातिविप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
अस्नात्वा चाप्यहुत्वा च भुङ्क्तेऽदत्त्वा च यः पुनः ।
एवंविधस्य सर्वस्य सूतकं समुदाहृतम् ।
व्याधितस्य कदर्य्यस्य ऋणग्रस्तस्य सर्वदा ।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ।
श्रद्धात्यागविहीनस्य भस्मान्तं सूतकं भवेत् ॥
न सूतकं कदाचित् स्याद्यावज्जीवन्तु सूतकम् ।
एवंगुणविशेषेण सूतकं समुदाहृतम् ॥
सूतके मृतके चैव तथाच मृतसूतके ।
एतत्संहतशौचानां मृतशौचेन शुध्यति ॥
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते ।
दशाहात्तु परं शौचं विप्रोऽर्हति च धर्मवित ॥
दानञ्च विधिना देयं अशुभात्तारकं हि तत् ।
मृतकान्ते मृतो यस्तु सूतकान्ते च सूतकम् ॥
एतत्संहतशौचानां पूर्वाशौचेन शुध्यति ।

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ॥
चतुर्थेऽहनि कर्तव्यमस्थि सञ्चयनं द्विजैः ।
ततः सञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते ॥
वर्णानामानुलोम्येन स्त्रीणामेकोयदा पतिः ।
दशषट्त्र्यहमेकाहः प्रसवे सूतकं भवेत् ॥
यज्ञकाले विवाहे च देशभङ्गे तथैव च ।
हूयमाने तथाग्नौ च नाशौचं मृतसूतके ॥
सुस्थकाले त्विदं सर्वमशौचं परिकीर्तितम् ।
आपद्गतस्य सर्वस्य सूतके नतु सूतकम् ॥
इति दाक्षे धर्मशास्त्रे षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

लोको वशीकृतो येन येन चात्मा वशीकृतः ।
इन्द्रियार्थो जितो येन तं योगं प्रब्रवीम्यहम् ॥
प्राणायामस्तथा ध्यानं प्रत्याहारस्तु धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योगउच्यते ॥
नारण्यसेवनाद्योगो नानेकग्रन्थचिन्तनात् ।
व्रतैर्यज्ञैस्तपोभिश्च न योगः कस्यचिद्भवेत् ।
नच पद्माशनाद्योगो न नासाग्रनिरीक्षणा ।
नच शास्त्रातिरिक्तेन शौचेन स भवेत् क्वचि
न मौनमन्त्रकुहकैरनेकैः सुकृतैस्तथा ।
लोकयात्रावियुक्तस्य योगो भवति कस्यचित् ॥

अभियोगात्तथाभ्यासात्तस्मिन्नेव तु निश्चयात्।
पुनः पुनश्च निर्वेदाद्योगः सिद्ध्यति नान्यथा॥
आत्मचिन्ताविनोदेन शौचक्रीडनकेन च।
सर्व्वभूतसमत्वेन योगः सिध्यति नान्यथा॥
यश्चात्मनि रतोनित्यमात्मक्रीडस्तथैवच।
आत्मनिष्ठश्च सततमात्मन्येव स्वभावतः॥
रतश्चैव स्वयं तुष्टः सन्तुष्टो नान्यमानसः।
आत्मन्येव सुतृप्तोऽसौ योगस्तस्य प्रसिद्ध्यति॥
सुप्तोऽपि योगयुक्तः स्याज्जाग्रच्चापि विशेषतः।
ईदृक्चेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम्॥
य आत्मव्यतिरेकेण द्वितीयं नैव पश्यति।
ब्रह्मीभूय सएवं हि दक्षपक्षउदाहृतः॥
विषयासक्तचित्तोहि यतिर्मोक्षं न विन्दति।
यत्नेन विषयासक्तिं तस्माद्योगी विवर्जयेत्॥
विषयेन्द्रियसंयोगः केचिद्योगं वदन्ति हि।
अधर्मो धर्मरूपेण गृहीतन्तैरपण्डितैः॥
मनसश्चात्मनस्चैव संयोगञ्च तथापरे।
उक्तानामधिका ह्येते केवलं योगवञ्चिताः॥
वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते॥
कषायमोहविक्षेपलज्जाशङ्कादिचेतसः।
व्यापारास्तु समाख्यातास्तान् जित्वा वशमानयेत्॥
कुटुम्बैः पञ्चभिर्ग्राम्यैः षष्ठस्तत्र महत्तरः।

देवासुरमनुष्यैस्तु स जेतुं नैव शक्यते ॥
बलेन परराष्ट्राणि गृह्णन् शूरस्तु नोच्यते ।
जितो येनेन्द्रियग्रामः स शूरः कथ्यते बुधैः ॥
बहिर्मुखानि सर्व्वाणि कृत्वा चाभिमुखानि वै ।
सर्वञ्चैवेन्द्रियग्रामं मनश्चात्मनि योजयेत् ॥
सर्वभावविनिर्मुक्तः क्षेत्रज्ञं ब्रह्मणि न्यसेत् ।
एतद्ध्यानञ्च योगश्च शेषाः स्युर्ग्रन्थविस्तराः ॥
त्यक्त्वा विषयभोगांश्च मनोनिश्चलतां गतम् ।
आत्मशक्तिस्वरूपेण समाधिः परिकीर्त्तितः ॥
चतुर्णां सन्निकर्षेण पदं यत्तदशाश्वतम् ।
द्वयोस्तु सन्निकर्षेण शाश्वतं ध्रुवमक्षयम् ॥
यन्नास्ति सर्व्वलोकस्य तदस्तीति विरुद्ध्यते ।
कथ्यमानं तथान्यस्य हृदये नावतिष्ठते ॥
स्वसम्वेद्यं हि तद्ब्रह्म कुमारीमैथुनं यथा ।
अयोगी नैव जानाति जातान्धोहि यथा घटम् ॥
नित्याभ्यसनशीलस्य सुसंवेद्यं हि तद्भवेत् ।
तत्सूक्ष्मत्वादनिर्देश्यं परं ब्रह्म सनातनम् ॥
बुधस्त्वाभरणं भावं मनसालोचनं यथा ।
मन्यते स्त्री च मरणश्च तदेव बहु मन्यते ॥
सत्त्वोत्कटाः सुराश्चापि विषयेण वशीकृताः ।
प्रमादिभिः क्षुद्रसत्त्वैर्मानुषैरत्र का कथा ॥
तस्मात्त्यक्तकषायेण कर्त्तव्यं दण्डधारणम् ।
इतरस्तु न शक्नोति विषयैरभिभूयते ॥

न स्थिरं क्षणमप्येकमुदकं हि यथोर्म्मिभिः ।
वाताहतं तथा चित्तं तस्मात्तस्य न विश्वसेत् ॥
त्रिदण्डव्यपदेशेन जीवन्ति बहवो नराः ।
योहि ब्रह्म न जानाति न त्रिदण्डार्हएव सः ॥
ब्रह्मचर्य्यं सदा रक्षेदष्टधा मैथुनं पृथक् ।
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥
न ध्यातव्यं न वक्तव्यं न कर्त्तव्यं कदाचन ।
एतैः सर्वैः सुसम्पन्नो यतिर्भवति नेतरः ॥
पारिव्रज्यं गृहीत्वा च योधर्मे नावतिष्ठते ।
श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत् ॥
एकोभिक्षुर्यथोक्तस्तु द्वौ चैव मिथुनं स्मृतम् ।
त्रयो ग्रामस्तथा ख्यातऊर्द्धन्तु नगरायते ॥
नगरं हि न कर्त्तव्यं ग्रामोवा मिथुनं तथः ।
एतत्त्रयं प्रकुर्व्वाणः स्वधर्माच्च्यवते यतिः ॥
राजवार्त्तादि तेषान्तु भिक्षावार्त्ता परस्परम् ।
स्नेहपैशुन्यमात्सर्य्यं सन्निकर्षादसंशयम् ॥
लाभपूजानिमित्तं हि व्याख्यानं शिष्यसंग्रहः ।
एते चान्ये च बहवः प्रपञ्चाः कुतपस्विनाम् ॥
ध्यानं शौचं तथा भिक्षा नित्यमेकान्तशीलता ।
भिक्षोश्चत्वारि कर्माणि पञ्चमो नोपपद्यते ॥

तपोजपैः कृशीभूतोव्याधितोऽवसथावहः।
वृद्धोगृहस्थहीनश्च यश्चान्योविकलेन्द्रियः॥
नीरुजश्च युवा चैव भिक्षुर्नावसथावहः।
स दूषयति तत्स्थानं बुधान् पीडयतीति च॥
नीरुजश्च युवा चैव ब्रह्मचर्य्याद्विनश्यति।
ब्रह्मचर्य्याद्विनष्टन्तु कुलञ्चैव तु नाशयेत्॥
वसन्नावसथे भिक्षुर्मैथुनं यदि सेवते।
तस्यावसथनाथस्य मूलान्यपि निकृन्तति॥
आश्रमे तु यतिर्यस्य मुहूर्त्तमपि विश्रमेत्।
किन्तस्यान्येन धर्मेण कृतकृत्योऽभिजायते॥
सञ्चितं यद्गृहस्थेन पापमामरणान्तिकम्।
स निर्दहति तत् सर्व्वमेकरात्रोषितोयतिः॥
योगाश्रमपरिश्रान्तं यस्तु भोजयते यतिम्।
निखिलं भोजितं तेन त्रैलोक्यं सचराचरम्॥
यस्मिन् देशे वसेद्योगी ध्यानयोगविचक्षणः।
सोऽपि देशो भवेत् पूतः किंपुनस्तस्य बान्धवाः॥
द्वैतञ्चैव तथाद्वैतं द्वैताद्वैतं तथैव च।
न द्वैतं नापि चाद्वैतमित्येतत् पारमार्थिकम्॥
नाहं नैवान्यसम्बन्धो ब्रह्मभावेन भावितः।
ईदृशायामवस्थायामवाप्यं परमं पदम्॥
द्वैतपक्षाः समाख्याता येऽद्वैते तु व्यवस्थिताः।
अद्वैतिनां प्रवक्ष्यामि यथा धर्मः सुनिश्चितः॥

तत्त्वात्मव्यतिरेकेण द्वितीयं यदि पश्यति।
ततः शास्त्राण्यधीयन्ते श्रूयन्ते ग्रन्थसञ्चयाः॥
दक्षशास्त्रं यथा प्रोक्तमशेषाश्रममुत्तमम्।
अधीयन्ते तु ये विप्रास्ते यान्त्यमरलोकताम्॥
इदन्तु यः पठेद्भक्त्या शृणुयादधमोऽपिवा।
स पुत्रपौत्रपशुमान् कीर्त्तिञ्च समवाप्नुयात्॥
श्रावयित्वा त्विदं शास्त्रं श्राद्धकालेऽपिवा द्विजः।
अक्षयं भवति श्राद्धं पितृभ्यश्चोपजायते॥

इति दाक्षे धर्मशास्त्रे सप्तमोऽध्यायः।
समाप्ता चेयं दक्षसंहिता।

गौतमसंहितायाम्

प्रथमोऽध्यायः।

वेदो धर्ममूलं तद्विदाञ्च स्मृतिशीले दृष्टो धर्मव्यतिक्रमः साहसञ्च महतां न तु दृष्टेऽर्थोऽवरदौर्बल्यात्तुल्यबलविरोधे विकल्पः। उपनयनं ब्राह्मणस्याष्टमे नवमे पञ्चमे वा काम्यं गर्भादिः सङ्ख्यावर्षाणां तद्द्वितीयं जन्म। तद्यस्मात् स आचार्य्यो वेदानुवचनाच्च। एकादशद्वादशयोः क्षत्रियवैश्ययोः। आषोड़शाद्ब्राह्मणस्यापतिता सावित्री द्वाविंशतेराजन्यस्य द्व्यधिकाया वैश्यस्य। मौञ्जीज्यामौर्व्वीसौत्र्यो मेखलाः क्रमेण कृष्णरुरुवस्ताजिनानि वासांसि शाणक्षौमचीरकुतपाः सर्वेषां कार्पासञ्चाविकृतम्। काषायमप्येके। वार्क्षं ब्राह्मणस्य माञ्जिष्ठहारिद्रे इतरयोः वैल्वपालाशौ ब्राह्मणस्य दण्डावश्वत्थपैलवौ शेषे यज्ञियावा सर्वेषामपीरिता यूपचक्राः सवल्कला मूर्द्ध ललाटनासाग्रप्रमाणाः। मुण्डजटिलशिखाजटाश्च। द्रव्यहस्त उच्छिष्टोऽनिधायाचामेद्द्रव्यशुद्धिः परिमार्जन प्रदाहतक्षणनिर्णेजनानि तैजसमार्त्तिकदारवतान्तवानां तैजसवदुपलमणिशङ्खशुक्तीनां दारुवदस्थिभूम्योरावपनञ्च भूमेश्चैलवद्रज्जुविदलचर्मणामुत्सर्गोवात्यन्तोपहतानाम्। प्राङ्मुखउदङ्मुखोवा शौचमारभेत्। शुचौ देशआसीनो दक्षिणं बाहुं जान्वन्तरा कृत्वा यज्ञोपवीत्यामणिबन्धनात् पाणी प्रक्षाल्य

वाग्यतोहृदयस्पृशस्त्रिश्चतुर्वापश्चाचामेद्भिः प्रमृज्यात् पादौ चाभ्युचेत् खानि चोपस्पृशेच्छीर्षण्यानि मूर्द्धनि च दद्यात्। सुप्त्वा भुक्त्वा क्षुत्वा च पुनः। दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्षणात्। प्राक्च्युतेरित्येके। च्युतेरास्रावविद्यान्निगिरन्नेव तच्छुचिः। न मुख्याविप्रुषउच्छिष्टं कुर्वन्ति ताश्चेदङ्गे निपतन्ति। लेपगन्धापकर्षणे शौचममेध्यस्य। तदद्भिः पूर्वं मृदा च मूत्रपुरीषरेतोविस्रंसनाभ्यवहारसंयोगेषु च यत्र चाम्नायोविदध्यात्। पाणिना सव्यमुपसंगृह्याङ्गुष्ठमधीहि भोइत्यामन्त्रयेत गुरुः। तत्र चक्षुर्मनःप्राणोपस्पर्शनं दर्भैः प्राणायामास्त्रयः पञ्चदशमात्राः प्राक्कूलेष्वासनञ्च ओँपूर्व्वा व्याहृतयः पञ्चसप्तान्ताः। गुरोः पादोपसंग्रहणं प्रातर्ब्रह्मानुवचनेचाद्यन्तयोरनुज्ञातउपविशेत्। प्राङ्मुखोदक्षिणतः शिष्य उदङ्मुखोवा सावित्रीञ्चानुवचनमादितो ब्रह्मणआदाने ओँकारस्याऽन्यत्रापि। अन्तरागमने पुनरुपसदनं श्वनकुलसर्पमण्डूकमार्ज्जाराणां त्र्यहमुपवासोविप्रवासश्च प्राणायामा घृतप्राशनञ्चेतरेषाम्। श्मशानाध्ययने चैवम्।

इति गौतमीये धर्मशास्त्रे प्रथमोऽध्यायः।

द्वितीयोऽध्यायः।

प्रागुपनयनात् कामचारवादभक्षोऽहुतोऽब्रह्मचारी यथोपपादमूत्रपुरीषोभवति नास्याचमनकल्पो विद्यतेऽन्यत्रापमार्जनप्रधावनावोक्षणेभ्यो न तदुपस्पर्शनादशौचं नत्वेवैनमग्निहव-

नवलिहरणयोर्नियुञ्ज्यान्न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात्। उपनयनादिर्नियमः। उक्तं ब्रह्मचर्य्यमग्नीन्धनभैक्षचरणे सत्यवचनमपामुपस्पर्शनम्। एके गोदानादि। बहिः सन्ध्यार्थश्चातिष्ठेत् पूर्व्वमासीतोत्तरां सज्योतिष्या ज्योतिषोदर्शनाद्वाग्यतो नादित्यमीक्षेत। वर्जयेन्मधुमांसगन्धमाल्यादिवास्वप्नाञ्जनाभ्यञ्जनयानोपानच्छत्रकामक्रोधलोभमोहवाद्यवादनस्नानदन्तधावनहर्षनृत्यगीतपरिवादभयानि गुरुदर्शने कण्ठप्रावृतावसक्थिकापाश्रयणपादप्रसारणानि निष्ठीवितहसितविजृम्भितास्फोटनानि स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायां द्यूतं हीनवर्णसेवामदत्तादानं हिंसां आचार्य्यतत्पुत्रस्त्रीदीक्षितनामानि शुष्कां वाचं मद्यं नित्यं ब्राह्मणः। अधः शय्याशायी पूर्व्वोत्थायी जघन्यसम्वेशी वाग्बाहूदरसंयतः। नामगोत्रे गुरोः समानतोनिर्दिशेत्। अर्च्चिते श्रेयसि चैवम्। शय्यासनस्थानानि विहाय प्रतिश्रवणमभिक्रमणं वचनाहृष्टेनाधःस्थानासनस्तिर्य्यग्वा तत्सेवायाम्। गुरुदर्शने चोत्तिष्ठेत् गच्छन्त मनुव्रजेत् कर्म विज्ञाप्याख्यायाहूताध्यायी युक्तः प्रियहितयोस्तद्भार्य्यापुत्त्रेषु चैवम्। नोच्छिष्टाशनस्नपनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानि। विप्रोष्योपसंग्रहणं गुरुभार्य्याणां तत्पुत्त्रस्य च। नैके युवतीनां। व्यवहारप्राप्तेन सार्व्ववर्णिकं भैक्षचरणमभिशस्तपतितवर्ज्जं। आदिमध्यान्तेषु भवच्छब्दः प्रयोज्यो वर्णानुपूर्व्वेण। आचार्य्यज्ञातिगुरुस्वेष्वलाभेऽन्यत्र। तेषां पूर्वं परिहरन्निवेद्य गुरवेऽनुज्ञातोभुञ्जीत। असन्निधौ तद्भार्य्यापुत्त्रसब्रह्मचारिसद्भ्यः। वाग्यतस्तृप्यन्न लोलुप्यमानः सन्निधायोदकं स्पृशेत्। शिष्यशिष्टिरवधेनाशक्तौ-

रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा शास्यः। द्वादशवर्षाण्येकैकवेदे ब्रह्मचर्य्यं चरेत् प्रतिद्वादशवर्षेषु ग्रहणान्तं वा। विद्यान्ते गुरुरर्थेन निमन्त्र्यः। ततः कृतानुज्ञानस्य स्नानम्। आचार्य्यः श्रेष्ठोगुरूणां मातेत्येके।

इति गौतमीये धर्मशास्त्रे द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

तस्याश्रमविकल्पमेके ब्रुवते ब्रह्मचारी गृहस्थोभिक्षुर्वैखानस इति तेषां गृहस्थो योनिरप्रजनत्वादितरेषाम्। तत्रोक्तं ब्रह्मचारिण्याचार्य्याधीनत्वमान्तं गुरोः कर्मशेषेण जपेत् गुर्वभावे तदपत्यवृत्तिस्तदभावे वृद्धे सब्रह्मचारिण्यग्नौ वा। एवं वृत्तोब्रह्मलोकमवाप्नोति जितेन्द्रियः। उत्तरेषाञ्चैतदविरोधी अनिचयो भिक्षुरूर्द्धरेता ध्रुवशीलो वर्षासु भिक्षार्थी ग्राममियात्। जघन्यमनिवृत्तञ्चरेत्। निवृत्ताशीर्वाक्चक्षुः कर्मसंयतः। कौपीनाच्छादनार्थं वासोविभृयात्। प्रहीणमेके निर्णेजनाविप्रयुक्तं। ओषधिवनस्पतीनामङ्गमुपाददीत। न द्वितीयामुपहर्त्तुं रात्रिं ग्रामे वसेत्। मुण्ड शिखी वा वर्जयेज्जीववधम्। समोभूतेषु हिंसानुग्रहयोरनारती। वैखानसो वने मूलफलाशी तपःशीलः श्रामणकेनाग्निमाधायाग्राम्यभोजी देवपितृमनुष्यभूतर्षिपूजकः सर्व्वातिथिः प्रतिषिद्धवर्जं भैक्षमप्युपयुञ्जीत न फालकृष्टमधितिष्ठेत् ग्रामञ्च न प्रविशेज्जटिलश्चीराजिनवासा नातिशयं भुञ्जीत। एकाश्रम्यं त्वाचार्य्याः प्रत्यक्षविधानाद्गार्हस्थस्य।

इति गौतमीये धर्मशास्त्रे तृतीयोऽध्यायः।

चतुर्थोऽध्यायः ।

गृहस्थः सदृशीं भार्य्यां विन्देतानन्यपूर्व्वां यवीयसीम् । असमानप्रवरैर्व्विवाह ऊर्द्ध्वं सप्तमात् पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात् । ब्राह्मो विद्याचारित्रबन्धुशीलसम्पन्नाय दद्यादाच्छाद्यालङ्कृतां संयोगमन्त्रः प्राजापत्ये सह धर्म्मञ्चरतामिति आर्षे गोमिथुनं कन्यावते दद्यादन्तर्व्वेद्यृत्विजे दानं दैवोऽलङ्कृत्येच्छन्त्या स्वयं संयोगो गान्धर्व्वो वित्तेनानतिस्त्रीमतामासुरः प्रसह्यादानाद्राक्षसोऽसंविज्ञातोपसङ्गमनात् पैशाचः । चत्वारो धर्म्म्याः प्रथमाः षडित्येके । अनुलोमानन्तरैकान्तरद्व्यन्तरासु जाताः सवर्णाम्बष्ठोग्रनिषाददौष्मन्तपारशवाः । प्रतिलोमास्तु सूतमागधायोगवक्षत्तृवैदेहकचाण्डालाः । ब्राह्मण्यजीजनत् पुत्रान् वर्णेभ्य आनुपूर्व्व्यात् ब्राह्मणसूतमागधचाण्डालान् तेभ्यएव क्षत्त्रिया मूर्द्धावषिक्तक्षत्त्रियधीवरपुक्कशान् तेभ्यएव वैश्या भृज्जकण्ठकमाहिष्यवैश्यवैदेहान् तेभ्यएव पारशवयवनकरणशूद्रान् शूद्रेत्येके । वर्णान्तरगमनमुत्कर्षापकर्षाभ्यां सप्तमेन पञ्चमेन चाचार्य्याः । सृष्ट्यन्तरजातानाञ्च प्रतिलोमास्तु धर्म्महीनाः शूद्रायाञ्च असमानायाञ्च शूद्रात् पतितवृत्तिरन्त्यः पापिष्ठः । पुनन्ति साधवः पुत्रास्त्रिपौरुषानार्षाद्दश दैवाद्दशैव प्राजापत्याद्दशपूर्व्वान् दशावरानात्मानञ्च ब्राह्मीपुत्राः ।

इति गौतमीये धर्म्मशास्त्रे चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः।

ऋतावुपेयात् सर्वत्र वा प्रतिषिद्धवर्जम्। देवपितृमनुष्यभूतर्षिपूजकोनित्यस्वाध्यायः। पितृभ्यश्चोदकदानं यथोत्साहमन्यद्भार्य्यादिरग्निर्दायादिर्वा। तस्मिन् गृह्याणि देवपितृमनुष्ययज्ञाः स्वाध्यायश्च। बलिकर्माग्नावग्निर्धन्वन्तरिर्विश्वे देवाः प्रजापतिः स्विष्टिकृदिति होमः। दिग्देवताभ्यश्च यथा स्वद्वारेषु मरुद्भ्यो गृहदेवताभ्यः प्रविश्य ब्रह्मणे मध्ये अद्भ्य उदकुम्भे आकाशायेत्यन्तरीक्षे नक्तञ्चरेभ्यश्च सायम्। स्वस्तिवाच्यभिक्षादानमप्पूर्वन्तु ददातिषु चैवंधर्मेषु। समद्विगुणसाहस्रानन्त्यानि फलान्यब्राह्मणब्राह्मणश्रोत्रियवेदपारगेभ्यः। गुर्वर्थनिवेशौषधार्थं वृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोगवैश्वजितेषु द्रव्यसंविभागोवहिर्वेदि भिक्षमाणेषु कृतान्नमितरेषु। प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्। क्रुद्धहृष्टभीतार्त्तलुब्धबालस्थविरमूढमत्तोन्मत्तवाक्यान्यनृतान्यपातकानि। भोजयेत् पूर्वमतिथिकुमारव्याधितगर्भिणीस्ववासिनीस्थविरान् जघन्यांश्च। आचार्य्यपितृसखीनान्तु निवेद्य वचनक्रियाऋत्विगाचार्य्यश्वशुरपितृव्यमातुलानामुपस्थाने मधुपर्कः सम्वत्सरे पुनः पूजितायज्ञविवाहयोरर्वाक् राज्ञश्च श्रोत्रियस्य। अश्रोत्रियस्यासनोदके श्रोत्रियस्य तु पाद्यमर्घ्यमन्नविशेषांश्च प्रकारयेन्नित्यं वा संस्कारविशिष्टं मध्यतोऽन्नदान मवैद्य साधुवृत्ते विपरीते तु तृणोदकभूमिः स्वागतमन्ततः पूज्यानत्याशश्च शय्यासनावसथानुव्रज्योपासनानि सदृक्श्रेयसोः समान्यल्पशोऽपि हीनेऽसमानग्रामोऽतिथिरैकरात्रिको ऽधिवृक्षसूर्य्योप-

स्थायी कुशलानामयारोग्याणामनुप्रश्नोऽन्त्यं शूद्रस्याब्राह्मणस्यानतिथिरब्राह्मणोयज्ञे संवृतश्चेत् भोजनन्तु चत्रियस्योर्द्धं ब्राह्मणेभ्योऽन्यान् भृत्यैः सहानृशंसार्थमानृशं सार्थं॥

इतिगौतमीये धर्मशास्त्रे पञ्चमोऽध्यायः॥

षष्ठोऽध्यायः।

पादोपसंग्रहणं गुरुसमवायेऽन्वहम्। अभिगम्य तु विप्रोष्य मातृपितृतद्बन्धूनां पूर्वजानां विद्यागुरूणां तत्तद्गुरूणाञ्च सन्निपाते परस्य। नाम प्रोच्याहमयमित्यभिवादोऽज्ञसमवाये स्त्रीपुंयोगेऽभिवादतोऽनियममेके नाविप्रोष्य स्त्रीणाममातृपितृव्यभार्य्याभगिनीनां नोपसंग्रहणं भ्रातृभार्य्याणां श्वश्र्वाश्च। ऋत्विक्श्वशुरपितृव्यमातुलानान्तु यवीयसां प्रत्युत्थानमनभिवाद्यास्तथान्यः पूर्वः पौरोऽशीतिकावरः शूद्रोऽप्यपत्यसमेनावरोऽप्यार्य्यः शूद्रेण नाम चास्य वर्जयेद्राज्ञश्चाजपः प्रेष्यो भो भवन्निति वयस्यः समानेऽहनि जातो दशवर्षवृद्धः पौरः पञ्चभिः कलाभरः श्रोत्रियश्चारणस्त्रिभिः राजन्यो वैश्यकर्म विद्याहीनोदीक्षितस्य प्राक्क्रयात्। वित्तबन्धुकर्मजातिविद्यावयांसि मान्यानि परबलीयांसि श्रुतन्तु सर्वेभ्योगरीयस्तन्मूलत्वाद्धर्मस्य श्रुतेश्च। चक्रिदशमीस्थाणुग्राह्यवधूस्नातकराजभ्यः पयोदानं राज्ञा तु श्रोत्रियाय श्रोत्रियाय॥

इतिगौतमीये धर्मशास्त्रे षष्ठोऽध्यायः॥

सप्तमोऽध्यायः।

आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा समाप्तेर्ब्राह्मणोगुरुर्याजनाध्यापनप्रतिग्रहाः सर्वेषां पूर्वः पूर्वो गुरुस्तदलाभे क्षत्रवृत्तिस्तदलाभे वैश्यवृत्तिः। तस्यापण्यं गन्धरसः कृतान्नतिलशाणक्षौमाजिनानि रक्तनिर्णिक्ते वाससी क्षीरञ्च सविकारं मूलफलपुष्पौषधमधुमांसतृणोदकापथ्यानि पशवश्च हिंसासंयोगे पुरुषवशाकुमारीहेतवश्च नित्यं भूमिव्रीहियवाजाव्यश्व ऋषभधेन्वनडुहश्चैके। विनिमयस्तु रसानां रसैः पशूनाञ्च न लवणाकृतान्नयोस्तिलानाञ्च समेनामेन तु पक्वस्य संप्रत्यर्थे सर्वथातुवृत्तिरशक्तावशूद्रेण तदप्येके प्राणसंशये तद्वर्णसङ्करोऽभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत राजन्योवैश्यकर्म वैश्यकर्म॥

इतिगौतमीये धर्मशास्त्रे सप्तमोऽध्यायः॥

अष्टमोऽध्यायः।

द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुतस्तयोश्चतुर्विधस्य मनुष्यजातस्यान्तः संज्ञानाश्चलनपतनसर्पणानामायत्तं जीवनं प्रसूतिरक्षणमसङ्करोधर्मः। सएष बहुश्रुतो भवति लोकवेदवेदाङ्गविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चत्वारिंशता संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वासामयचारिकेष्वभिविनीतः षड्भिः परिहार्य्यो राज्ञा बध्यश्चाबध्यश्चादण्ड्यश्चावहिष्कार्य्यश्चापरिवाद्यश्चापरिहार्य्यश्चेति। गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौड़ोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः

पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामेतेषाञ्चा-ष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्राश्वयुजीति सप्त पाक-यज्ञसंस्था अग्न्याधेयमग्निहोत्रदर्शपौर्णमासावाग्रयणं चातुर्मास्य निरूढपशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोड़शि वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाइत्येते चत्वारिंशत् संस्काराः। अथाष्टावात्मगुणा-दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्य मस्पृहेति यस्यैते न चत्वारिंशत् संस्कारा नवाष्टावात्मगुणा न स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति। यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्रह्मणः सायुज्यं सालोक्यञ्च गच्छति गच्छति॥

इतिगौतमीये धर्मशास्त्रेऽष्टमोऽध्यायः॥

नवमोऽध्यायः।

स विधिपूर्वं स्नात्वा भार्य्यामभिगम्य यथोक्तान् गृहस्थ-धर्मान् प्रयुञ्जान इमानि व्रतान्यनुकर्षेत् स्नातकोनित्यं शुचिः सुगन्धः स्नानशीलः सति विभवे न जीर्णमलवद्वासाः स्यान्न रक्तमलवदन्यधृतं वा वासोबिभृयान्न स्रगुपानहौ निर्णिक्त-मशक्तौ न रूढश्मश्रुरकस्मान्नाग्निमपश्च युगपद्धारयेन्नाञ्ज-लिना पिबेन्न तिष्ठन्नुद्धृतोदकेनाचामेन्न शूद्राशुच्येकपाण्या-वर्जितेन न वाय्वग्निविप्रादित्यापोदेवतागाश्च प्रतिपश्यन् वा मूत्रपुरीषामेध्यान्युदस्येनैव देवताः प्रति पादौ प्रसारयेन्न

पर्णलोष्टाश्मभिर्मूत्रपुरीषापकर्षणं कुर्य्यान्न भस्मकेशतुषकपालान्यधितिष्ठेन्न म्लेच्छाशुच्यधार्मिकैः सह सम्भाषेत सम्भाष्य पुण्यकृतोमनसा ध्यायेद्ब्राह्मणेन वा सह सम्भाषेत। अधेनुं धेनुभव्येति ब्रूयादभद्रं भद्रमिति कपालं भगालमिति मणिधनुरितीन्द्रधनुः। गां धयन्तीं परस्मै नाचक्षीत नचैनां वारयेन्न मिथुनीभूत्वा शौचं प्रति विलम्बेत नच तस्मिन् शयने स्वाध्यायमधीयीत नचापररात्रमधीत्य पुनः प्रतिसंश्विशेन्नाकल्पां नारीमभिरमयेन्न रजस्वलां नचैनां श्लिष्येन्न कन्यामग्निमुखोपधमनविगृह्यवादवहिर्गन्धमाल्यधारणपापीयसावलेखनभार्य्यासहभोजनाञ्जत्यवेक्षणकुद्वारप्रवेशनपादधावनासन्दिग्धभोजननदीवाहुतरणवृक्षविषमारोहणावरोहणप्राणव्यवस्थानानि च वर्जयेन्न सन्दिग्धां नावमधिरोहेत् सर्वतएवात्मानं गोपायेन्न प्रावृत्य शिरोऽहनि पर्य्यटेत् प्रावृत्य तु रात्रौ मूत्रोच्चारे च न भूमावनन्तर्धाय नाराच्चावसथान्न भस्मकरीषकृष्टच्छायापथिकाम्येषु उभे मूत्रपुरीषे दिवा कुर्य्यादुदङ्मुखः सन्ध्ययोश्च रात्रौ तु दक्षिणामुखः पालाशमासनं पादुके दन्तधावनमिति वर्जयेत्। सोपानत्कश्चाशनासनशयनाभिवादननमस्कारान् वर्जयेत्। न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्य्याद्यथाशक्ति धर्मार्थकामेभ्यस्तेषु च धर्मोत्तरः स्यान्न नग्नां परयोषितमीक्षेत न पदासनमाकर्षेन्न शिश्नोदरपाणिपादवाक्चक्षुश्चापलानि कुर्य्याच्छेदनभेदनविलिखनविमर्दनावस्फोटनानि नाकस्मात् कुर्य्यान्नोपरिवत्सतन्त्रीं गच्छेन्न जलकुलः स्यान्न यज्ञमष्टतोगच्छेद्दर्शनाय तु कामं न भक्ष्यानुत्सङ्गे भक्षयेन्न रात्रौ प्रेष्या-

हृतमुद्धृतस्नेहविलपनपिण्याकमथितप्रभृतीनि चात्तवीर्य्याणि नाश्नीयात् सायं प्रातस्त्वन्नमभिपूजितमनिन्दन् भुञ्जीत न कदाचिद्रात्रौ नग्नः स्वपेत् स्नायाद्वा यच्चात्मवन्तो वृद्धाः सम्यग्विनीता दम्भलोभमोहवियुक्ता वेदविद आचक्षते तत् समाचरेत् योगक्षेमार्थमीश्वरमधिगच्छेन्नान्यमन्यत्र देवगुरुधार्मिकेभ्यः प्रभूतैधोदकयवसकुशमाल्योपनिष्क्रमणमार्य्यजनभूयिष्ठमनलसमृद्धं धार्मिकाधिष्ठितं निकेतनमावसितुं यतेत प्रशस्तमङ्गल्यदेवतायतनचतुष्पथादीन् प्रदक्षिणमावर्त्तेत। मनसा वा तत्समग्रमाचारमनुपालयेदापत्कल्पः। सत्यधर्मा आर्य्यवृत्तः शिष्टाध्यापकशौचशिष्टः श्रुतिनिरतः स्यान्नित्यमहिंस्रो मृदु दृढकारी दमदानशीलएवमाचारो मातापितरौ पूर्वापरान् सम्बन्धान् दुरितेभ्यो मोक्षयिष्यन् स्नातकः शश्वद्ब्रह्मलोकान्न च्यवते न च्यवते॥

इति गौतमीये धर्मशास्त्रे नवमोऽध्यायः।

दशमोऽध्यायः।

द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमस्त्वाचार्य्यज्ञातिप्रियगुरुधनविद्याविनिमयेषु ब्रह्मणः सम्प्रदानमन्यत्र यथोक्तात् कृषिवाणिज्ये चास्वयं कृते कुसीदञ्च। राज्ञोऽधिकं रक्षणं सर्वभूतानां न्याय्यदण्डत्वं बिभृयात् ब्राह्मणान् श्रोत्रियान् निरुत्साहांश्चाब्राह्मणानकरांश्चोपकुर्वाणांश्च योगश्च विजये भये विशेषेण चर्य्या च रथधनुर्भ्यां संग्रामे संस्थानमनिवृत्तिश्च न

दोषोहिंसायामाहवेऽन्यत्र व्यश्वसारथ्यायुधकृताञ्जलिप्रकीर्ण-
केशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्यः क्षत्रि-
यश्चेदन्यस्तमुपजीवेत्तद्वृत्तिः स्यात् जेता लभेत सांग्रामिकं
वित्तं वाहनन्तु राज्ञउद्धारश्चापृथग्जयेऽन्यत्तु यथार्हं भाजये-
द्राजा राज्ञो वलिदानं कर्षकैर्दशममष्टमं षष्ठं वा पशुहिरण्य-
योरप्येके पञ्चाशद्भागं विंशतिभागः शुल्कः पण्ये मूलफलपुष्पौ-
षधमधुमांसतृणेन्धनानां षष्ठं तद्रक्षणधर्मित्वात्तेषु तु नित्य-
युक्तः स्यादधिकेन वृत्तिः शिल्पिनोमासि मास्येकैकं कर्म
कुर्य्युरेतेनात्मोपजीविनो व्याख्याता नौचक्रीवन्तश्च भक्तं तेभ्यो
दद्यात् पण्यं वणिग्भिरर्घापचये न देयं प्रणष्टमस्वामिकमधि-
गम्य राज्ञे प्रब्रूयुर्विख्याप्य सम्वत्सरं राज्ञा रक्ष्यमूर्द्ध्वमधिगन्तु-
श्चतुर्थं राज्ञः शेषः स्वामी रिक्थक्रयसम्विभागपरिग्रहाधि-
गमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं
वैश्यशूद्रयोर्निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्या-
ब्राह्मणो व्याख्यातः षष्ठं लभेतेत्येके चौरहृतमुपजित्य यथा-
स्थानं गमयेत् कोशाद्वा दद्याद्रक्ष्यं बालधनमाव्यवहारप्रापणात्
समावृत्तेर्वा । वैश्यस्याधिकं कृषिवणिक्पाशुपाल्यकुसीदम् ।
शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचम-
नार्थे पाणिपादप्रक्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदार-
वृत्तिः परिचर्य्या चोत्तरेषां तेभ्योवृत्तिं लिप्सेत जीर्णान्यु-
पानच्छत्रवासःकूर्चान्युच्छिष्टाशनं शिल्पवृत्तिश्च यञ्चार्यमाश्रि-
तोभर्त्तव्यस्तेन क्षीणोऽपि तेन चोत्तरस्तदर्थोऽस्य निचयः
स्यादनुज्ञातोऽस्य नमस्कारोमन्त्रः पाकयज्ञैः स्वयं यजेतेत्येके ।

सर्वे चोत्तरोत्तरं परिचरेयुरार्य्यानार्य्ययोर्व्यतिक्षेपे कर्मणः साम्यं साम्यम् ॥

इति गौतमीये धर्मशास्त्रे दशमोऽध्यायः।

एकादशोऽध्यायः।

राजा सर्वस्येष्टे ब्राह्मणवर्जं साधुकारी स्यात् साधुवादी त्रय्यामान्वीक्षिक्याञ्चाभिविनीतः शुचिर्जितेन्द्रियो गुणवत्सहायोऽपायसम्पन्नः समः प्रजासु स्याद्धितञ्चासां कुर्वीत तमुपर्य्यासीनमधस्था उपासीरन्नन्ये ब्राह्मणेभ्यस्तेऽप्येनं मन्येरन् वर्णानाश्रमांश्च न्यायतोऽभिरक्षेच्चलतश्चैनान् स्वधर्मे स्थापयेद्धर्मस्योह्यंशभाग्भवतीति विज्ञायते ब्राह्मणञ्च पुरोदधीत विद्याभिजनवाग्रूपवयःशीलसम्पन्नं न्यायवृत्तं तपस्विनं तत्प्रसूतः कर्माणि कुर्वीत ब्रह्मप्रसूतं हि क्षत्रमृध्यते न व्यथत इति च विज्ञायते यानि च दैवोत्पातचिन्तकाः प्रब्रूयुस्तान्याद्रियेत तदधीनमपि ह्येके योगक्षेमं प्रतिजानते शान्तिपुण्याहस्वस्त्ययनायुष्यमङ्गलसंयुक्तान्याभ्युदयिकानि विद्वेषिणां सम्वलनमभिचारद्विषद्व्याधिसंयुक्तानि च शालाग्नौ कुर्य्याद्यथोक्तमृत्विजोऽन्यानि तस्य व्यवहारो वेदोधर्मशास्त्राण्यङ्गान्युपवेदाः पुराणं देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणं कृषिवणिक्पाशुपाल्यकुसीदकारवः स्वे स्वे वर्गे तेभ्योयथाधिकारमर्थान् प्रत्यवहृत्य धर्मव्यवस्था न्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गमयेद्विप्रतिपत्तौ त्रयीविद्यावृद्धेभ्यः प्रत्यवहृत्य निष्ठां गमयेत्तथाह्यस्य निःश्रेयसं भवति ब्रह्मक्षत्रेण

सम्यगुक्तं देवपितृमनुष्यान् धारयतीति विज्ञायते दण्डोदमनादित्याहुस्तेनादान्तान् दमयेद्वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते विष्वञ्चो विपरीता नश्यन्ति तानाचार्य्योपदेशोदण्डश्च पालयति तस्माद्राजाचार्य्यावनिन्द्यावनिन्द्यौ॥

इति गौतमीये धर्मशास्त्रे एकादशोऽध्यायः।

द्वादशोऽध्यायः।

शूद्रोद्विजातीनभिसन्धायाभिहत्य च - वाग्दण्डपारुष्याभ्यामङ्गं मोच्यो येनोपहन्यादार्य्यस्त्र्यभिगमने लिङ्गोद्वारः स्वहरणञ्च गोप्ता चेद्वधोऽधिकोऽथाहास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेद आसनशयनवाक्पथिषु समप्रेप्सुर्दण्ड्यः शतम्। क्षत्रियो ब्राह्मणाक्रोशे दण्डपारुष्ये द्विगुणमध्यर्द्धं वैश्योब्राह्मणस्तु क्षत्रिये पञ्चाशत्तदर्द्धं वैश्ये न शूद्रे किञ्चित् ब्राह्मणराजन्यवत् क्षत्रियवैश्यावष्टापाद्यं स्तेयकिल्बिषं शूद्रस्य द्विगुणोत्तराणीतरेषां प्रतिवर्णं विदुषोऽतिक्रमे दण्डभूयस्त्वं फलहरितधान्यशाकादाने पञ्चकृष्णलमल्पे पशुपीड़िते स्वामिदोषः पालसंयुक्ते तु तस्मिन् पथि क्षेत्रेऽनावृते पालक्षेत्रिकयोः पञ्च माषा गवि षडुष्ट्रे खरेऽश्वमहिष्योर्दशाजाविषु द्वौ द्वौ सर्व्वविनाशे शतं शिष्टाकरणे प्रतिषिद्धसेवायाञ्च नित्यं चेलपिण्डादूर्द्धं स्वहरणञ्च गोऽग्न्यर्थे तृणमेधान् वीरुद्वनस्पतीनाञ्च पुष्पाणि स्ववदाददीत

फलानि चापरिहृतानाम् कुसीदवृद्धिर्धर्म्या विंशतिः पञ्च-माषकी मासं नातिसांवत्सरीमेके चिरस्थाने द्वैगुण्यं प्रयोगस्य मुक्ताधिर्न वर्द्धते दित्सतोऽवरुद्धस्य च चक्रकालवृद्धिः कारिता-कायिकाशिखाधिभोगाश्च कुसीद पशूपजलोमक्षेत्रशतवाह्येषु नातिपञ्चगुणमजड़ापोगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरश्रोत्रियप्रव्रजितराजन्यधर्मपुरुषैः पशुभूमिस्त्रीणामन-तिभोगऋक्थभाजि ऋणं प्रतिकुर्य्युः प्रातिभाव्यवणिक्शुल्क मद्य द्यूतदण्डान् पुत्रानध्याभवेयुर्निध्यं वाधियाचितावक्रीताध-योनष्टाः सर्व्वा न निन्दिता न पुरुषापराधेन स्तेनः प्रकीर्ण-केशो मुषली राजानमियात् कर्माचक्षाणः पूतोवधमोक्षाभ्या-मघ्नन्नेनस्वी राजा न शारीरो ब्राह्मणदण्डः कर्मवियोगविख्या-पनविवासनाङ्ककरणान्यप्रवृत्तौ प्रायश्चित्ती स चौरसमः स च-वोमतिपूर्वं प्रतिग्रहीताप्यधर्मसंयुक्ते पुरुषशक्त्यपराधानुबन्ध-विज्ञानाद्दण्डनियोगोऽनुज्ञानं वा वेदवित्समवायवचनात् वेदवित्समवायवचनात्।

इति गौतमीये धर्मशास्त्रे द्वादशोऽध्यायः।

त्रयोदशोऽध्यायः।

विप्रतिपत्तौ साक्षिणि मिथ्यासत्यव्यवस्था बहवः स्युरनि-न्दिताः स्वकर्मसु प्रात्ययिका राज्ञाञ्च निश्रीत्यनभितापाश्चान्य-तरस्मिन्नपि शूद्राब्राह्मणवचनादनुरोध्योऽनिबन्धश्चेन्नासमवेता दृष्टाः प्रब्रूयुरवचने च दोषिणः स्युः स्वर्गः सत्यवचने विपर्य्यये नरकः। अनिबन्धैरपि वक्तव्यं पीड़ाकृते निबन्धः प्रमत्तोक्ते

च साक्षिसभ्यराजकर्तृषु दोषोधर्मतन्त्रपीड़ायां शपथैनैके सत्यकर्मणा तद्देवराजब्राह्मणसंसदि स्यादब्राह्मणानां क्षुद्रपश्वनृते साक्षी दश हन्ति गोऽश्वपुरुषभूमिषु दशगुणोत्तरान् सर्वं वा भूमौ हरणे नरकोभूमिवदप्सु मैथुनसंयोगे च पशुवन्मधुसर्पिषोर्गोवद्वस्त्रहिरण्यधान्यब्रह्मसु यानेष्वश्ववान्मिथ्यावचने याप्यो दण्ड्यश्च साक्षी नानृतवचने दोषोजीवनञ्चेत्तदधीनं नतु पापीयसोजीवनं राजा प्राड्विवाकोब्राह्मणोवा शास्त्रवित् प्राड्विवाको मध्योभवेत् सम्वत्सरं प्रतीक्षेत प्रतिभायां धेन्वनडुहस्त्रीप्रजनसंयुक्तेषु शीघ्रमात्ययिके च सर्वधर्मेभ्योगरीयः प्राड्विवाके सत्यवचनं सत्यवचनम्।

इति गौतमीये धर्मशास्त्रे त्रयोदशोऽध्यायः।

चतुर्दशोऽध्यायः।

शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डानामेकादशरात्रं क्षत्रियस्य द्वादशरात्रं वैश्यस्यार्द्धमासमेकं मासं शूद्रस्य तच्चेदन्तःपुनरापतेत्तच्छेषेण शुद्ध्येरन् रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिर्गोब्राह्मणहतानामन्वक्षं राजक्रोधाच्च युद्धे प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतां पिण्डनिवृत्तिः सप्तमे पञ्चमे वा जननेऽप्येवं मातापित्रोस्तन्मातुर्वा गर्भमाससमा रात्रिः स्रंसने गर्भस्य त्र्यहं वा श्रुत्वा चोर्द्ध्वं दशम्याः पक्षिण्यसपिण्डयोनिसम्बन्धे सहाध्यायिनि च सब्रह्मचारिण्येकाहं श्रोत्रिये चोपसम्पन्ने प्रेतोपस्पर्शने दशरात्रमाशौचमभिसन्धाय चेदुक्तं वैश्यशूद्रयोरार्त्तवीर्वा

पूर्वयोश्च त्र्यहं वाचार्य्यतत्पुत्त्रस्त्रीयाज्यशिष्येषु चैवमवरश्चेद्वर्णः पूर्वं वर्णमुपस्पृशेत् पूर्व्वोवावरं तत्र शावोक्तमाशौचं पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचेलोदकोपस्पर्शनाच्छुध्येच्छवानुगमे च शुनश्च यदुपहन्यादित्येके उदकदानं सपिण्डैः कृतचूड़स्य तत्स्त्रीणाञ्चानतिभोगएकेऽप्रदत्तानामधः शय्यासनिनो ब्रह्मचारिणः सर्वे न मार्जयेरन्न मांसं भक्षयेयुराप्रदानात् प्रथमतृतीयपञ्चमसप्तमनवमेषूदकक्रिया वाससाञ्च त्यागः अन्त्ये त्वन्त्यानां दन्तजन्मादि मातापितृभ्यां तूष्णीं माता बालदेशान्तरितप्रव्रजितासपिण्डानां सद्यःशौचं राज्ञाञ्च कार्य्यविरोधाद्ब्राह्मणस्य च स्वाध्यायानिवृत्त्यर्थं स्वाध्यायानिवृत्त्यर्थम्।

इति गौतमीये धर्मशास्त्रे चतुर्द्दशोऽध्यायः।

पञ्चदशोऽध्यायः।

अथ श्राद्धममावस्यायां पितृभ्योदद्यात् पञ्चमीप्रभृति वापरपक्षस्य यथाश्राद्धं सर्वस्मिन् वा द्रव्यदेशब्राह्मणसन्निधाने वा कालनियमः शक्तितः प्रकर्षे गुणसंस्कारविधिरन्नस्य नवावरान् भोजयेदयुजो यथोत्साहं वा ब्राह्मणान् श्रोत्रियान् वाग्रूपवयःशीलसम्पन्नान् युवभ्योदानं प्रथममेके पितृवन्नच तेन मित्रकर्म कुर्य्यात् पुत्त्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्य्यौ तिलमासव्रीहियवोदकदानैर्मासं पितरः प्रीणन्ति मत्स्यहरिणरुरुशशकूर्मवराहमेषमांसैः सम्वत्सराणि गव्यपयःपायसैर्द्वादश वर्षाणि वार्ध्रीणसेन मांसेन

कालशाकच्छागलोहखड्गमांसैर्मधुमिश्रैश्चानन्त्यम् । न भोजयेत् स्तेनक्लीवपतितनास्तिकतद्वृत्तिवीरहाग्रेदिधिषुदिधिषुपतिस्त्री-ग्रामयाजकाजपालोत्सृष्टाग्निमद्यपकुचरकूटसाक्षिप्रातिहारिकानुपपत्तिर्यस्य च कुण्डाशी सोमविक्रय्यगारदाही गरदाव-कीर्णिगणप्रेष्यागम्यागामिहिंस परिवित्तपरिवेत्तृपर्य्याहितपर्य्याधातृत्यक्तात्मदुर्बला: कुनखिश्यावदन्त: श्वित्रिपौनर्भवकितवाज प्रेष्य प्रातिरूपकशूद्रापतिर्निराकृतिकिलासी कुसीदी वणिक्-शिल्पोपजीविज्यावादित्रतालनृत्यगीतशीलान् पित्रा चाकामेन विभक्तान् शिष्यांश्चैके सगोत्रांश्च । भोजयेदूर्द्ध्वं त्रिभ्योगुणव-न्तम् । सद्यश्राद्धी शूद्रातल्पगस्तत्पुरीषे मासं नयति पितॄं-स्तस्मात्तदहर्ब्रह्मचारी स्यात् श्वचण्डालपतितावेक्षणे दुष्टं तस्मात् परिश्रुते दद्यात्तिलैर्वा किरेत् पङ्क्तिपावनोवा शमयेत् पङ्क्तिपावना: षडङ्गविज्ज्येष्ठसामिकस्त्रिणाचिकेतस्त्रिमधुस्त्रि-सुपर्ण: पञ्चाग्नि: स्नातकोमन्त्रब्राह्मणविद्धर्मज्ञोब्रह्मदेयानुसं-तानइति हवि:षु चैवं दुर्बलादीन् श्राद्धएवैके श्राद्धएवैके ।

इति गौतमीये धर्मशास्त्रे पञ्चदशोऽध्याय: ।

षोडशोऽध्याय: ।

श्रवणादि वार्षिकं प्रोष्ठपदीं वोपाकृत्याधीयीत च्छन्दां-स्यर्द्धपञ्चममासान् पञ्चदक्षिणायनं वा ब्रह्मचार्य्युत्सृष्टलोमा न-मांसं भुञ्जीत द्वैमास्योवा नियमो नाधीयीत वायौ दिवा पांशुहरे कर्णश्राविणि नक्तं वाणभेरीमृदङ्गगर्त्तार्त्तशब्देषु च श्वसृगालगर्दभसंह्रादे लोहितेन्द्रधनुर्नीहारेष्वभ्रदर्शने चा-

पत्त्यौ मूत्रित उच्चारिते निशासन्ध्योदकेषु वर्षति चैके वल्मीकसन्तानमाचार्य्यपरिवेषणे ज्योतिषोश्च भीतो यानस्थ: शयान: प्रौढपाद: श्मशानग्रामान्तमहापथाशौचेषु पूतिगन्धान्त:शवदिवाकीर्त्ति शूद्रसन्निधाने सूतके चोद्गारे ऋग्यजुषञ्च सामशब्दो यावदाकालिका निर्घातभूमिकम्पराहुदर्शनोल्कास्तनयित्नुवर्षविद्युत: प्रादुष्कृताग्निष्ववृतौ विद्युति नक्तञ्चापरराचात्त्रिभागादिप्रवृत्तौ सर्वमुल्का विद्युत्समत्येकेषां। स्तनयित्नुरपराह्णेऽपि प्रदोषे सर्वं नक्तमर्द्ध रात्रादहश्चेत् सज्योतिर्विषयस्थे च राज्ञि प्रेते विप्रोष्य चान्योन्येन सह सङ्कुलोपाहितवेदसमाप्तिच्छर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रममावास्यायाञ्च द्व्यहं वा कार्त्तिकी फाल्गुन्याषाढी पौर्णमासी तिस्रोऽष्टकास्त्रिरात्रमन्त्यामेके अभितोवार्षिकं सर्वे वर्षविद्युत्स्तनयित्नुसन्निपाते प्रस्यन्दिन्यूर्द्ध्वं भोजनादुत्सवे प्राधीतस्य च निशायां चतुर्मुहूर्त्तं नित्यमेके नगरे मानसमप्यशुचि श्राद्धिनामाकालिकमकृतान्नश्राद्धिकसंयोगे च प्रतिविद्यञ्च यावत् स्मरन्ति प्रतिविद्यञ्च यावत् स्मरन्ति॥

इति गौतमीये धर्मशास्त्रे षोडशोऽध्याय:।

सप्तदशोऽध्याय:।

प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणोभुञ्जीत प्रतिगृह्णीयाच्चैधोदकयवसमूलफलमध्वभयाभ्युद्यतशय्यासनयानपयोदधिधानाशफरिप्रियङ्गुस्रङ्मार्गशाकान्यप्रणोद्यानि सर्वेषां पितृदेवगुरुभृत्यभरणे चान्यवृत्तिश्चेन्नान्तरेण शूद्रात् पशु-

पालक्षेत्रकर्षककुलसङ्गतकारपितृपरिचारका भोज्यान्ना व-
णिक् चाशिल्पी नित्यमभोज्यं केशकीटावपन्नं रजस्वला-
कृष्णशकुनिपदोपहतं भ्रूणघ्नप्रेक्षितं गवोपघ्रातं भावदुष्टं शुक्तं
केवलमदधि पुनःसिद्धं पर्य्युषितमशाकभक्ष्यस्नेहमांसमधून्युत्-
सृष्टपुंश्चल्यभिशस्तानपदेश्यदण्डिकतक्षकदर्य्यबन्धनिकचिकि-
त्सकमृगयुशार्य्युच्छिष्टभोजिगणविद्विषाणामपाङ्क्तानां प्राग्-
दुर्बलाद्वृथान्नाचमनोत्थानव्यपेतानि समासमाभ्यां विषमसमे
पूजान्तरानर्चितश्च गोश्च क्षीरमनिर्दशाया; सूतके चाजाम-
हिष्योश्च नित्यमाविकमपेयमौष्ट्रमैकशफञ्च स्यन्दिनीयमसूस-
न्धिनीनाञ्च याश्च व्यपेतवत्साः पञ्चनखाश्चाशल्यकशशश्वाविड्गो-
धाखड्गकच्छपा उभयतोदत्केशलोमैकशफकलविङ्कप्लवचक्रवाक-
हंसाः काककङ्कगृध्रश्येनाजलजारक्तपादतुण्डा ग्राम्यकुक्कुटशू-
करौ धेन्वनडुहौ चापन्नदावसन्नवृथामांसानि किसलयक्या-
कुलशुननिर्यासलोहितावश्चनाश्चनिचिदारुवकवलाकटिट्टिभ-
मान्धातृनक्तञ्चरा अभक्ष्याः। भक्ष्याः प्रतुदाविष्किराजालपादा
मत्स्याश्चाविकृतावध्याश्च धर्मार्थे व्यालहता दृष्टदोषवाक्प्रश-
स्तान्यभ्युक्ष्योपयुञ्जीतोपयुञ्जीत॥

इति गौतमीये धर्मशास्त्रे सप्तदशोऽध्यायः।

अष्टादशोऽध्यायः।

अस्वतन्त्रा धर्मे स्त्री नातिचरेद्भर्त्तारं वाक्चक्षुःकर्मसंयता
पतिरपत्यलिप्सुर्देवराद्गुरुप्रसूता नर्त्तुमतीयात् पिण्डगोत्र-
र्षिसम्बन्धिभ्योयोनिमात्राद्वा नादेवरादित्येके नातिद्वितीयं

जनयितुरपत्यं समयादन्यत्र जीवतश्च क्षेत्रे परस्मात्तस्य द्वयोर्वा रक्षणाद्भर्त्तुरेव नष्टे भर्त्तरि षाड्वार्षिकं क्षपणं श्रूयमाणेऽभिगमनं प्रव्रजिते तु निवृत्तिः प्रसङ्गात्तस्य द्वादशवर्षाणि ब्राह्मणस्य विद्यासम्बन्धे भ्रातरि चैवं ज्यायसि यवीयान् कन्याग्न्युपयमेषु षड़ित्येके त्रीन् कुमार्य्यृतूनतीत्य स्वयं युज्येतानिन्दितेनोत्सृज्य पित्र्यानलङ्कारान् प्रदानं प्रागृतोरप्रयच्छन् दोषी प्राग्वाससः प्रतिपत्तेरित्येके द्रव्यादानं विवाहसिद्ध्यर्थं धर्मतन्त्रसंयोगे च शूद्रादन्यत्रापि शूद्राद्बहुपशोर्हीनकर्मणः शतगोरनाहिताग्नेः सहस्रगोश्च सोमपात् सप्तमीञ्चाभुक्त्वा निचयायाप्यहीनकर्मभ्य आचक्षीत राज्ञा पृष्टस्तेन हि भर्तव्यः श्रुतशीलसम्पन्नश्चेद्धर्मतन्त्रपीडायां तस्याकरणे दोषादोषः॥

इति गौतमीये धर्मशास्त्रे अष्टादशोऽध्यायः।

एकोनविंशोऽध्यायः।

उक्तो वर्णधर्मश्चाश्रमधर्मश्चाथ खल्वयं पुरुषो येन कर्मणा लिप्यतेऽथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति च तत्र प्रायश्चित्तं कुर्य्यान्न कुर्य्यादिति मीमांसन्ते न कुर्य्यादित्याहुर्नहि कर्म क्षीयत इति कुर्य्यादित्यपरे पुनस्तोमेनेष्ट्वा पुनः सवनमायातीति विज्ञायते व्रात्यस्तोमेनेष्ट्वा तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजतेऽग्निष्टुताभिशस्यमानं याजयेदिति च। तस्य निष्क्रयणानि जपस्तपोहोमउपवासोदानमुपनिषदो वेदान्ताः सर्वच्छन्दःसु संहिता मधून्यघमर्षणमथर्वशिरो-

रुद्राः पुरुषसूक्तं राजनरौहिणे सामनी बृहद्रथन्तरे पुरुषगतिर्महानाम्यो महावैराजं महादिवाकीर्त्त्यं ज्येष्ठसाम्नामन्यतमद्बहिष्यवमानं कुष्माण्डानि पावमान्यः सावित्री चेति पावनानि। पयोव्रतता शाकभक्षता फलभक्षता प्रसृतयावको हिरण्यप्राशनं घृतप्राशनं सोमपानमिति च मेध्यानि। सर्वे शिलोच्चयाः सर्वाः स्रवन्त्यः पुण्या ह्रदास्तीर्थानि ऋषिनिवासगोष्ठपरिस्कन्दा इति देशाः। ब्रह्मचर्य्यं सत्यवचनं सवनेषूदकोपस्पर्शनमार्द्रवस्त्रताधःशायितानाशक इति तपांसि। हिरण्यं गौर्व्वासोऽश्वोभूमिस्तिलाघृतमन्नमिति देयानि। सम्वत्सरः षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्व्विंशत्यहोद्वादशाहः षडहस्त्र्यहोऽहोरात्र इति कालाः। एतान्येवानादेशे विकल्पेन क्रियेरन्। एनःसु गुरुषु गुरूणि लघुषु लघूनि कृच्छ्रातिकृच्छ्रं चान्द्रायणमिति सर्वप्रायश्चित्तं सर्वप्रायश्चित्तम्॥

इति गौतमीये धर्मशास्त्रे एकोनविंशोऽध्यायः।

विंशतितमोऽध्यायः।

अथ चतुःषष्टिषु यातनास्थानेषु दुःखान्यनुभूय तत्रेमानि लक्षणानि भवन्ति ब्रह्महार्द्रकुष्ठी सुरापः श्यावदन्तोगुरुतल्पगः पङ्गुः स्वर्णहारी कुनखी श्चित्री वस्त्रापहारी हिरण्यहारी दर्द्दुरी तेजोऽपहारी मण्डली स्नेहापहारी क्षयी तथा जीर्णवानन्नापहारी ज्ञानापहारी मूकः प्रतिहन्ता गुरोरपस्मारी गोघ्नो जात्यन्धः पिशुनः पूतिनासः पूतिवक्त्रस्तु सूचकः शूद्रोपाध्यायः श्वपाकस्त्रपुसीसचामरविक्रयी मद्यप एकशफ-

विक्रयी मृगव्याधः कुण्डाशी भृतकश्चैलिकोवा नक्षत्री चार्बुदी नास्तिकोरङ्गोपजीव्यंभक्ष्यभक्षी गण्डरी ब्रह्मपुरुषतस्कराणां देशिकः पिण्डितः षण्डोमहापथिकोगण्डिकश्चण्डाली पुक्कसी सोष्कवकीर्णो मध्वामिही धर्मपत्नीषु स्यान्मैथुनप्रवर्तकः खल्वाटसगोत्रसमयस्त्र्यभिगामी पितृमातृभगिनीस्त्र्यभिगाम्यावीजितस्तेषां कुब्जकुष्ठमण्डव्याधितव्यङ्गदरिद्राल्पायुषोऽल्पबुद्धयश्च-ण्डपण्डशैलूषतस्करपरपुरुषप्रेष्यपरकर्मकराः खल्वाटचक्राङ्ग-सङ्कीर्णाः क्रूरकर्माणः क्रमशश्चान्त्याश्चोपपद्यन्ते तस्मात् कर्तव्यमेवेह प्रायश्चित्तं विशुद्धैर्लक्षणैर्जायन्ते धर्मस्य धारणादिति धर्मस्य धारणादिति॥

इति गौतमीये धर्मशास्त्रे विंशतितमोऽध्यायः।

एकविंशतितमोऽध्यायः।

त्यजेत् पितरं राजघातकं शूद्रयाजकं वेदविप्लावकं भ्रूणहनं यश्चान्त्यावसायिभिः सह सम्वसेदन्त्यावसायिन्या वा तस्य विद्यागुरून् योनिसम्बन्धांश्च सन्निपात्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्य्युः पात्रञ्चास्य विपर्य्यस्येयुः। दासः कर्मकरोवावकरादमेध्यपात्रमानीय दासी घटान् पूरयित्वा दक्षिणामुखः पदा विपर्य्यस्येदमुमनुदकं करोमीति नामग्राहन्तं सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो योनिसम्बन्धाश्च वीक्षेरन्नप उपस्पृश्य ग्रामं प्रविशन्ति। अतऊर्द्ध्वं तेन सम्भाष्य तिष्ठेदेकरात्रं जपन् सावित्रीमज्ञानपूर्वं ज्ञानपूर्वञ्चेत्त्रिरात्रम्। यस्तु प्रायश्चित्तेन शुद्ध्येत्तस्मिन् शुद्धे

शातकुम्भमयं पात्रं पुण्यतमाद्ध्रदात् पूरयित्वा स्रवन्तीभ्योवा त एनमपउपस्पर्शयेयुः। अथास्मै तत्पात्रं दद्युस्तत् सम्प्रतिगृह्य जपेच्छान्ता द्यौः शान्ता पृथिवी शान्तं शिवमन्तरीक्षं योरोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः पावमानीभिस्तरत्समन्दीभिः कुष्माण्डैश्चाज्यं जुहुयाद्धिरण्यं ब्राह्मणाय वा दद्याद्गामाचार्याय। यस्य तु प्राणान्तिकं प्रायश्चित्तं स मृतः शुध्येत्तस्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्य्युरेतदेव शान्त्युदकं सर्वेषूपपातकेषु सर्वेषूपपातकेषु॥

इति गौतमीये धर्मशास्त्रे एकविंशतितमोऽध्यायः।

द्वाविंशतितमोऽध्यायः।

ब्रह्महा सुरापगुरुतल्पगमातृपितृयोनिसम्बन्धगस्तेननास्तिकनिन्दितकर्माभ्यासिपतितत्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्च तैश्चाब्दं समाचरन्। द्विजातिकर्मभ्योहानिः पतनं परत्र चासिद्धिस्तामेके नरकं त्रीणि प्रथमान्यनिर्देश्यानि मनुर्न स्त्रीष्वगुरुतल्पगः पततीत्येके भ्रूणहनि। हीनवर्णसेवायाञ्च स्त्री पतति कौटसाक्ष्यं राजगामिपैशुनं गुरोरनृताभिशंसनं महापातकसमानि अपांक्तयानां प्राग्दुर्बलाद्गोहन्तृब्रह्मोज्झ्यतन्मन्त्रकृदवकीर्णिपतितसावित्रीकेषूपपातकं याजनाध्यापनादृत्विगाचार्यौ पतनीयसेवायाञ्च हेयावन्यत्र हानात् पतति तस्य च प्रतिग्रहीतेत्येके न कर्हिचिन्मातापित्रोरवृत्तिर्दायं तु न भजेरन् ब्राह्मणाभिशंसने दोषस्तावान् द्विरनेनसि दुर्बलहिंसायामपि मोचने शक्तश्चेत्। अभिक्रुद्धाव-

गोरणं ब्राह्मणस्य वर्षशतमस्वर्ग्यं निघाते सहस्रं लोहितद-र्शने यावतस्तत्प्रस्कन्द्य पांशून् संगृह्णीयात् सङ्गृह्णीयात् ॥

इति गौतमीये धर्मशास्त्रे द्वाविंशतितमोऽध्यायः।

त्रयोविंशतितमोऽध्यायः।

प्रायश्चित्तमग्नौ सक्तिर्ब्रह्मघ्नस्त्रिरवच्छादितस्य लक्ष्य वा स्याज्जन्ये शस्त्रभृताम्। खट्वाङ्गकपालपाणिर्वा द्वादशसम्वत्स-रान् ब्रह्मचारी भैक्षाय ग्रामं प्रविशेत् स्वकर्माचक्षाणः पथोपक्रामेत् संदर्शनादार्य्यस्य स्थानासनाभ्यां विहरन् सव-नेषूदकोपस्पर्शी शुद्ध्येत् प्राणलाभे वा तन्निमित्ते ब्राह्मणस्य द्रव्यापचये वा त्र्यवरं प्रति राज्ञोऽश्वमेधावभृथे वान्ययज्ञेऽ प्यग्निष्टदन्तश्चेत् हृष्टश्चेद्ब्राह्मणवधे। हत्वापि आत्रेय्याश्चैवं गर्भे चाविज्ञाते वा। ब्राह्मणस्य राजन्यवधे षड्वार्षिकं प्राकृतं ब्रह्मचर्य्यं ऋषभैकसहस्राश्च गा दद्यात्। वैश्ये त्रैवार्षिकं ऋष-भैकशताश्च गा दद्यात्। शूद्रे सम्वत्सरं ऋषभैकदशाश्च गा दद्यादनात्रेय्याश्चैवं गाश्च। वैश्यवन्मण्डूकनकुलकाकविवद् हरमूषिकाश्च। हिंसासु चास्थिमतां सहस्रं हत्वानस्थिमता मनडुह्भारे च। अपि वास्थिमतामेकैकस्मिन् किञ्चित् किञ्चि-द्दद्यात्। षण्डे च पलालभारः सीसमाषश्च वराहे घृतघटः सर्पे लौहदण्डो ब्रह्मबन्ध्वाश्चललनायां जीवोवैशिके न किञ्चित्त-ल्पान्नधनलाभवधेषु पृथग्वर्षाणि द्वे परदारे त्रीणि श्रोत्रियस्य द्रव्यलाभे चोत्सर्गो यथास्थानं वा गमयेत् प्रतिसिद्धमन्त्रसंयोगे सहस्रवाक्चेदग्न्युत्सादिनिराकृत्युपपातकेषु चैवं स्त्री चाति-

चारिणी गुप्ता पिण्डं तु लभेत अमानुषीषु गोवर्जं स्त्रीकृते कुष्माण्डैर्घृतहोमो घृतहोमः ।

इति गौतमीये धर्मशास्त्रे त्रयोविंशतितमोऽध्यायः ।

चतुर्विंशतितमोऽध्यायः ।

सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः सुरामास्ये मृतः शुद्ध्येदमत्या पाने पयोघृतमुदकं वायुं प्रति त्र्यहं तप्तानि सकृच्छ्रस्ततोऽस्य संस्कारः । मूत्रपुरीषरेतसाञ्च प्राशने श्वापदोष्ट्रखराणाञ्चाङ्गस्य ग्राम्यकुक्कुटशूकरयोश्च गन्धाघ्राणे सुरापस्य प्राणायामो घृतप्राशनञ्च पूर्वैश्च दष्टस्य । तल्पे लोहशयने गुरुतल्पगः शयीत सूर्म्मीं वा ज्वलन्तीं श्लिष्येल्लिङ्गं वा सवृषणमुत्कृत्याञ्जलावाधाय दक्षिणाप्रतीचीं व्रजेदजिह्ममाशरीरनिपातान्मृतः शुद्ध्येत । सखीसयोनिसगोत्राशिष्यभार्य्यासु स्नुषायां गवि च तल्पसमोऽवकर इत्येके श्वभिरादयेद्राजा निहीनवर्णगमने स्त्रियं प्रकाशं पुमांसं खादयेद्यथोक्तं वा गर्द्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजते तस्याजिनमूर्द्धबालं परिधाय लोहितपात्रः सप्त गृहान् भैक्षञ्चरेत् कर्माचक्षाणः सम्वत्सरेण शुद्ध्येत् । रेतस्कन्दने भये रोगे स्वप्नेऽग्नीन्धनभैक्षचरणानि सप्तरात्रं कृत्वाज्यहोमः साभिसन्धेर्वा रेतस्याभ्यां •सूर्य्याभ्युदिते ब्रह्मचारी तिष्ठेदहरभुञ्जानोऽभ्यस्तमिते च रात्रिं जपन् सावित्रीमशुचिं दृष्ट्वादित्यमीक्षेत प्राणायामं कृत्वाऽभोज्यभोजनेऽमेध्यप्राशने वा निष्पुरीषीभावस्त्रिरात्रावरमभोजनं सप्तरात्रं वा स्वयं शीर्णान्युपयुञ्जानः फलान्य-

नतिक्रामन् प्राक्पञ्चनखेभ्यश्छर्दिनं घृतप्राशनञ्चाक्रोशानृतहिंसासु त्रिरात्रं परमन्तपः सत्यवाक्ये चेद्वारुणीपावमानीभिर्होमो विवाहमैथुननिर्मोहसंयोगेष्वदोषमेकेऽनृतं नतु खलु गुर्वर्थेषु यतः सप्त पुरुषानितश्च परतश्च हन्ति मनसापि गुरोरनृतं वदन्नल्पेष्वप्यर्थेष्वन्त्यावसायिनीगमने कृच्छ्राब्दोऽमत्या द्वादशरात्रमुदक्यागमने त्रिरात्रं त्रिरात्रम्।

इति गौतमीये धर्मशास्त्रे चतुर्विंशतितमोऽध्यायः।

पञ्चविंशतितमोऽध्यायः।

रहस्यं प्रायश्चित्तमविख्यातदोषस्य चतुर्ऋचं तरत्समन्दीत्यप्सु जपेदप्रतिग्राह्यं प्रतिजिघृक्षन् प्रतिगृह्य वाऽभोज्यं बुभुक्षमाणः पृथिवीमावपेदृत्वन्तरारमण उदकोपस्पर्शनाच्छुद्धिमेके स्त्रीषु पयोव्रतो वा दशरात्रं घृतेन द्वितीयमद्भिस्तृतीयं दिवादिष्वेकभक्तको जलक्लिन्नवासा लोमानि नखानि त्वचं मांसं शोणितं स्नाय्वस्थिमज्जानमितिहोम आत्मनोमुखे मृत्योरास्ये जुहोमीत्यन्ततः। सर्वेषामेतत् प्रायश्चित्तं भ्रूणहत्यायाः। अथान्य उक्तोनियमोऽग्ने त्वं पारयेति महाव्याहृतिभिर्जुहुयात् कुष्माण्डैश्चाज्यं तद्व्रतएव वा ब्रह्महत्यासुरापानस्तेयगुरुतल्पेषु प्राणायामैः स्नातोऽघमर्षणं जपेत् सममश्वमेधावभृथेन सावित्रीं वा सहस्रकृत्व आवर्त्तयन् पुनीते हैवात्मानमन्तर्जले वाघमर्षणं त्रिरावर्त्तयन् पापेभ्यो मुच्यते मुच्यते।

इति गौतमीये धर्मशास्त्रे पञ्चविंशतितमोऽध्यायः।

षड्विंशतितमोऽध्यायः ।

तदाहुः कतिधावकीर्णी प्रविशतीति मरुतः प्राणेनेन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवेतरेण सर्वेणेति सोऽमावास्यायां निश्यग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहेति समिधमाधायानुपर्युक्ष्य यज्ञवास्तु कृत्वोपस्थाय सम्मासिञ्चत्वित्येतया त्रिरुपतिष्ठेत त्रय इमे लोका एषां लोकानामभिजित्या अभिक्रान्त्या इत्येतदेवैकेषां कर्माधिकृत्ययोः पूतइव स्यात् स इत्थं जुहुयादित्यमनुमन्त्रयेद्वरो दक्षिणेति । प्रायश्चित्तमविशेषादनार्जवपैशुनप्रतिषिद्धाचारानाद्यप्राशनेषु । शूद्रायाञ्च रेतः सिक्त्वा योनौ च दोषवति कर्मण्यभिसन्धिपूर्वेष्वलिङ्गाभिरप उपस्पृशेद्वारुणीभि रन्यैर्वापवित्रैः प्रतिषिद्धवाङ्मनसयोरपचारे व्याहृतयः संख्याताः पञ्च सर्व्वास्वपोवाचा मे दहश्च मादित्यश्च पुनातु स्वाहेति प्रातः रात्रिश्च मा वरुणश्च पुनात्विति सायमष्टौ वा समिधमादध्याद्देवकृतस्येति हुत्वैवं सर्वस्मादेनसोमुच्यते मुच्यते ।

इति गौतमीये धर्मशास्त्रे षड्विंशतितमोऽध्यायः ।

सप्तविंशतितमोऽध्यायः ।

अथातः कृच्छ्रान् व्याख्यास्यामो हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयादथापरं त्र्यहं नक्तं भुञ्जीत अथापरं त्र्यहं न कञ्चन याचेदथापरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावा-

सीत चित्रकामः सत्यं वदेदनार्य्यैर्न सम्भाषेत रौरवयौधाजिने नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापोहिष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयेत् हिरण्यवर्णाः शुचयः पावका इत्यष्टाभिः। अथोदकतर्पणं ॐनमोहमाय मोहमाय संहमाय धुन्वते तापसाय पुनर्वसवे नमोनमोमौञ्ज्यायोर्म्याय वसुविन्दाय सर्वविन्दाय नमोनमः पाराय सुपाराय महापाराय पारयिष्णवे नमोनमो रुद्राय पशुपतये महते देवाय त्र्यम्बकायैकचराधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्द्दिने नमोनमः सूर्य्यायादित्याय नमोनमोनीलग्रीवाय शितिकण्ठाय नमोनमः कृष्णाय पिङ्गलाय नमोनमोज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्द्धरेतसे नमोनमः सत्याय पावकाय पावकवर्णाय कामाय कामरूपिणे नमो नमो दीप्ताय दीप्तरूपिणे नमोनमस्तीक्ष्ण रूपिणे नमोनमः सौम्याय सुपुरुषाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमो नमश्चन्द्रललाटाय कृत्तिवाससे पिनाकहस्ताय नमोनम इति। एतदेवादित्योपस्थानमेता एवाज्याहुतयो द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयादग्नये स्वाहा सोमाय स्वाहाग्नीषोमाभ्यामिन्द्राग्निभ्यामिन्द्राय विश्वेभ्योदेवेभ्योब्रह्मणे प्रजापतये अग्नये स्विष्टिकृतइति। ततोब्राह्मणतर्पणम्। एतेनैवातिकृच्छ्रोव्याख्यातो-यावत् सकृदाददीत तावदश्नीयादवृभक्षस्तृतीयः स कृच्छ्रातिकृच्छ्रः। प्रथमं चरित्वा शुचिः पूतः कर्मण्योभवति द्वितीयं चरित्वा यत्किञ्चिदन्यन्महापातकेभ्यः पापं कुरुते तस्मात् प्रमुच्यते तृतीयं चरित्वा सर्वस्मादेनसोमुच्यते अथैतांस्त्रीन्

कृच्छ्रान् चरित्वा सर्वेषु वेदेषु स्नातो भवति सर्वैर्देवैर्ज्ञातो भवति यश्चैवं वेद यश्चैवं वेद ॥

इति गौतमीये धर्मशास्त्रे सप्तविंशतितमोऽध्यायः ॥

अष्टाविंशतितमोऽध्यायः ।

अथातश्चान्द्रायणं तस्योक्तो विधिः कृच्छ्रे वपनं व्रतञ्चरेत् श्वोभूतां पौर्णमासीमुपवसेदाप्यायस्व सन्ते पयांसि नवो-नव इति चैताभिस्तर्पणमाज्यहोमोहविषश्चानुमन्त्रणमुपस्थानं चन्द्रमसोयद्देवा देवहेलनमिति चतसृभिराज्यं जुहुयाद्देव-कृतस्येति चान्ते समिद्भिरों भूर्भुवः स्वस्तपः सत्यं यशः श्रीरूर्जं गिरौजस्तेजः पुरुषोधर्मः शिवः शिवइत्येतैर्ग्रासानुमन्त्रणं प्रतिमन्त्रं मनसा नमः स्वाहेति वा सर्वग्रासप्रमाणमास्याविका-रेण चरुभैक्षशक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रशस्तानि पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वैकापचयेन परपक्षमश्नीयादमावास्यायामुपोष्यैकोपचयेन पूर्वपक्षं विपरीतमेकेषाम् । एष चान्द्रायणोमासोमासमेत-माप्त्वा विपापोविपाप्मा सर्वमेनोहन्ति द्वितीयमाप्त्वा दशपूर्वान् दशावरानात्मानञ्चैकविंशं पङ्क्तीश्च पुनाति सम्वत्सरं चाप्त्वा चन्द्रमसः सलोकतामाप्नोति ॥

इतिगौतमीये धर्मशास्त्रेऽष्टाविंशतितमोऽध्यायः ॥

एकोनत्रिंशत्तमोऽध्यायः।

ऊर्द्ध्वं पितुः पुत्रा ऋक्थं भजेरन्निवृत्ते रजसि मातुर्जीवति चेच्छति सर्वं वा पूर्वजस्येतरान् बिभृयात्। पूर्ववद्विभागे तु धर्मवृद्धिर्विंशतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो रथो गोवृषः काणखोरकूटवण्टा मध्यमस्यानेकाश्चेदविर्धान्यायसी गृहमनोयुक्तं चतुष्पदाञ्चैकैकं यवीयसः समञ्चेतरत् सर्वं द्व्यंशी वा पूर्वजः स्यादेकैकमितरेषामेकैकं वा धनरूपं काम्यं पूर्वः पूर्वो लभेत दशतः पशूनां नैकशफः नैकशफानां ऋषभोऽधिको ज्येष्ठस्य वृषभषोड़शा ज्यैष्ठिनेयस्य समं वा ज्यैष्ठिनेयेन यवीयसां प्रतिमातृ वा स्ववर्गे भागविशेषः। पितोत्सृजेत् पुत्रिकामनपत्योऽग्निं प्रजापतिञ्चेष्ट्वास्मदर्थमपत्यमिति संवाद्याभिसन्धिमात्रात् पुत्रिकेत्येकेषां तत्संशयान्नोपयच्छेदभ्रातृकाम्। पिण्डगोत्रर्षिसम्बन्धा ऋक्थं भजेरन् स्त्री चानपत्यस्य बीजं वा लिप्सेत देवरवत्यन्यतोजातमभागम्। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च भगिनीशुल्कं सोदर्य्याणामूर्द्ध्वं मातुः पूर्वञ्चैके। संसृष्टविभागः प्रेतानां ज्येष्ठस्य संसृष्टिनि प्रेते असंसृष्टी ऋक्थभाक् विभक्तजः पित्र्यमेव। स्वयमर्जितं वैद्योऽवैद्येभ्यः कामं भजेरन्। पुत्रा औरसक्षेत्रजदत्तकृत्रिमगूढोत्पन्नापविद्धा ऋक्थभाजः कानीनसहोढपौनर्भवपुत्रिकापुत्रस्वयन्दत्तक्रीता गोत्रभाजश्चतुर्थांशभागिनश्चौरसाद्यभावे ब्राह्मणस्य राजन्यापुत्रो ज्येष्ठोगुणसम्पन्नस्तुल्यांशभाक् ज्येष्ठांशहीनमन्यत् राजन्यावैश्यापुत्रसमवाये स यथा ब्राह्मणीपुत्रेण क्षत्रियाच्चेत् शूद्रापुत्रोऽप्यनपत्यस्य शुश्रूषुश्चे-

लभेत वृत्तिमूलमन्तेवासिविधिना सवर्णापुत्रोऽप्यन्यायवृत्तो न लभेतैकेषां श्रोत्रिया ब्राह्मणस्यानपत्यस्य ऋक्थं भजेरन् रा-जेतरेषां जड़क्लीवौ भर्त्तव्यावपत्यं जड़स्य भागार्हं शूद्रापुत्र-वत् प्रतिलोमास्तूदकयोगक्षेमकृतान्नेष्वविभागः स्त्रीषु च संयु-क्तास्वनाज्ञाते दशावरैः शिष्टैरूहवद्भिरलुब्धैः प्रशस्तं कार्य्यम् । चत्वारश्चतुर्णां पारगा वेदानां प्रागुत्तमा स्त्रय आश्रमिणः पृथग्ध-र्मविदस्त्रयएतान् दशावरान् परिषदित्याचक्षते असम्भवे त्वेते-षामश्रोत्रियो वेदविच्छिष्टोविप्रतिपत्तौ यदाह यतोऽयमप्रभवो-भूतानां हिंसानुग्रहयोगेषु धर्मिणां विशेषेण स्वर्गं लोकं धर्म-विदाप्नोति ज्ञानाभिनिवेशाभ्यामिति धर्मो धर्मः ।

इतिगौतमीये धर्मशास्त्रे एकोनत्रिंशत्तमोऽध्यायः ॥

समाप्ता चेयं गौतमसंहिता ।

प्रथमोऽध्यायः ।

प्रायश्चित्तविहीनानां महापातकिनां नृणाम् ।
नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् ॥
प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचितम् ।
प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः ॥
महापातकजं चिह्नं सप्तजन्मनि जायते ।
उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् ॥
दुष्कर्मजा नृणां रोगा यान्ति चोपक्रमैः शमम् ।
जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमोभवेत् ॥
पूर्वजन्मकृतं पापं नरकस्य परिक्षये ।
बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः ॥
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकासा अतीसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः ॥
जलोदरं यकृत् प्लीहा शूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः ।
रक्तार्बुद विसर्पाद्या उपपापोद्भवा गदाः ॥
दण्डापतानकश्चित्रवपुः कम्पविचर्चिकाः ।
वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः ॥

अर्शआद्या नृणां रोगा अतिपापाद्भवन्ति हि ।
अन्ये च बहवो रोगा जायन्ते वर्णसङ्कराः ॥
उच्यन्ते च निदानानि प्रायश्चित्तानि वै क्रमात् ।
महापापेषु सर्व्वं स्यात्तदर्द्धमुपपातके ॥
दद्यात् पापेषु षष्ठांशं कल्प्यं व्याधिबलाबलम् ।
अथ साधारणन्तेषु गोदानादिषु कथ्यते ॥
गोदाने वत्सयुक्ता गौः सुशीला च पयस्विनी ॥
वृषदाने शुभोऽनड्वान् शुक्लाम्बरसकाञ्चनः ।
निवर्तनानि भूदाने दश दद्याद्द्विजातये ॥
दशहस्तेन दण्डेन त्रिंशद्दण्डं निवर्तनम् ।
दश तान्येव गोचर्म दत्त्वा स्वर्गे महीयते ॥
सुवर्णशतनिष्कन्तु तदर्द्धार्द्धप्रमाणतः ।
अश्वदाने मृदु श्लक्ष्णमश्वं सोपस्करं दिशेत् ॥
महिषीं माहिषे दाने दद्यात् स्वर्णायुधान्विताम् ।
दद्याद्गजं महादाने सुवर्णफलसंयुतम् ॥
लक्षसंख्याहणं पुष्पं प्रदद्याद्देवतार्च्चने ।
दद्याद्द्विजसहस्राय मिष्टान्नं द्विजभोजने ॥
रुद्रं जपेल्लक्षपुष्पैः पूजयित्वा च त्र्यम्बकम् ।
एकादश जपेद्रुद्रान् दशांशं गुग्गुलैर्घृतैः ॥
हुत्वाभिषेचनं कुर्य्यान्मन्त्रैर्वरुणदैवतैः ।
शान्तिके गणशान्तिश्च ग्रहशान्तिकपूर्वकम् ॥
धान्यदाने शुभं धान्यं खारी यष्टिमितं स्मृतम् ।
वस्त्रदाने पट्टवस्त्रद्वयं कर्पूरसंयुतम् ॥
दशपञ्चाष्टचतुर उपदेश्य द्विजान् शुभान् ।

विधाय वैष्णवीं पूजां सङ्कल्प्य निजकाम्यया ॥
धेनुं दद्याद्द्विजातिभ्यो दक्षिणाञ्चापि शक्तितः ।
अलङ्कृत्य यथाशक्ति वस्त्रालङ्करणैर्द्विजान् ॥
याचेद्दण्डप्रमाणेन प्रायश्चित्तं यथोदितम् ।
तेषामनुज्ञया कृत्वा प्रायश्चित्तं यथाविधि ॥
पुनस्तान् परिपूर्णार्थानर्चयेद्विधिवद्द्विजान् ।
सन्तुष्टा ब्राह्मणा दद्युरनुज्ञां व्रतकारिणे ॥
जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ।
सर्व्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः ॥
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ।
सर्वदेवमया विप्रा न तद्वचनमन्यथा ॥
उपवासो व्रतञ्चैव स्नानं तीर्थफलं तपः ।
विप्रैः सम्पादितं सर्व्वं सम्पन्नं तस्य तत्फलम् ॥
सम्पन्नमिति यद्वाक्यं वदन्ति क्षितिदेवताः ।
प्रणम्य शिरसा धार्य्यमग्निष्टोमफलं लभेत् ॥
ब्राह्मणा जङ्गमं तीर्थं निर्जलं सार्वकामिकम् ।
तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ॥
तेभ्योऽनुज्ञामभिप्राप्य प्रगृह्य च तथाशिषः ।
भोजयित्वा द्विजान् शक्त्या भुञ्जीत सह बन्धुभिः ॥

इति शातातपीये कर्मविपाके साधारणविधिः प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

ब्रह्महा नरकस्यान्ते पाण्डुकुष्ठी प्रजायते ।
प्रायश्चित्तं प्रकुर्वीत स तत्पापक्षयाय वै ॥

चत्वारः कलशाः कार्य्याः पञ्चरत्नसमन्विताः ।
पञ्चपल्लवसंयुक्ताः सितवस्त्रेण संयुताः ॥
अश्वस्थानादिमृद्युक्तास्तीर्थोदकसुपूरिताः ।
कषायपञ्चकोपेता नानाविधफलान्विताः ॥
सर्वौषधिसमायुक्ताः स्थाप्याः प्रतिदिशं द्विजैः ।
रौप्यमष्टदलं पद्मं मध्यकुम्भोपरि न्यसेत् ॥
तस्योपरि न्यसेद्देवं ब्रह्माणञ्च चतुर्मुखम् ।
पलार्द्धार्द्धप्रमाणेन सुवर्णेन विनिर्मितम् ॥
अर्चेत् पुरुषसूक्तेन त्रिकालं प्रतिवासरम् ।
यजमानः शुभैर्गन्धैः पुष्पैर्धूपैर्यथाविधि ॥
पूर्वादिकुम्भेषु ततो ब्राह्मणा ब्रह्मचारिणः ।
पठेयुः स्वस्ववेदांस्ते ऋग्वेदप्रभृतीन् शनैः ॥
दशांशेन ततो होमो ग्रहशान्तिपुरःसरम् ।
मध्यकुम्भे विधातव्यो घृताक्तैस्तिलहेमभिः ॥
द्वादशाहमिदं कर्म समाप्य द्विजपुङ्गवः ।
तत्र पीठे यजमानमभिषिञ्चेद्यथाविधि ॥
ततोदद्याद्यथाशक्ति गोभूहेमतिलादिकम् ।
ब्राह्मणेभ्यस्तथा देयमाचार्य्याय निवेदयेत् ।
आदित्या वसवो रुद्रा विश्वे देवा मरुद्गणाः ।
प्रीताः सर्वे व्यपोहन्तु मम पापं सुदारुणम् ॥
इत्युदीर्य्य सुरुभक्त्या तमाचार्य्यं क्षमापयेत् ।
एवं विधाने विहिते श्वेतकुष्ठी विशुध्यति ॥
कुष्ठी गोवधकारी स्यान्नरकान्तेऽस्य निष्कृतिः ।
स्थापयेद्घटमेकन्तु पूर्वोक्तद्रव्यसंयुतम् ॥

रक्तचन्दनलिप्ताङ्गं रक्तपुष्पाम्बरान्वितम्।
रक्तकुम्भे तु तं कृत्वा स्थापयेद्दक्षिणां दिशम्॥
ताम्रपात्रं न्यसेत्तत्र तिलचूर्णेन पूरितम्।
तस्योपरि न्यसेद्देवं हेमनिष्कमयं यमम्॥
यजेत् पुरुषसूक्तेन पापं मे शाम्यतामिति।
सामपारायणं कुर्य्यात् कलसे तत्र सामवित्॥
दशांशं सर्षपैर्हुत्वा पावमान्यभिषेचने।
विहिते धर्मराजानमाचार्य्याय निवेदयेत्॥
यमोऽपि महिषारूढो दण्डपाणिर्भयावहः।
दक्षिणाशापतिर्देवो मम पापं व्यपोहतु॥
इत्युच्चार्य्य विसृज्यैनं मासं सङ्क्तिमाचरेत्।
ब्रह्मगोवधयोरेषा प्रायश्चित्तेन निष्कृतिः॥
पितृहा चेतनाहीनो मातृहान्धः प्रजायते।
नरकान्ते प्रकुर्वीत प्रायश्चित्तं यथाविधि॥
प्राजापत्यानि कुर्व्वीत त्रिंशच्चैव विधानतः।
व्रतान्ते कारयेन्नावं सौवर्णपलसम्मिताम्॥
कुम्भं रौप्यमयञ्चैव ताम्रपात्राणि पूर्ववत्।
निष्कहेम्ना तु कर्त्तव्यो देवः श्रीवत्सलाञ्छनः॥
पट्टवस्त्रेण संवेष्ट्य पूजयेत्तं विधानतः।
नावं द्विजाय तां दद्यात् सर्व्वोपस्करसंयुताम्॥
वासुदेव! जगन्नाथ! सर्वभूताशयस्थित!।
पातकार्णवमग्नं मां तारय प्रणतार्त्तिहृत्!॥
इत्युदीर्य्य प्रणम्याथ ब्राह्मणाय विसर्जयेत्।
अन्येभ्योऽपि यथाशक्ति विप्रेभ्यो दक्षिणां ददेत्॥

स्वरघाती तु बधिरो नरकान्ते प्रजायते।
मूको भ्रातृवधे चैव तस्येयं निष्कृतिः स्मृता॥
सोऽपि पापविशुद्ध्यर्थं चरेच्चान्द्रायणव्रतम्।
व्रतान्ते पुस्तकं दद्यात् सुवर्णफलसंयुतम्॥
इमं मन्त्रं समुच्चार्य्य ब्राह्मणीं तां विसर्जयेत्।
सरस्वति! जगन्मातः! शब्दब्रह्माधिदेवते!॥
दुष्कर्मकरणात् पापात् पाहि मां परमेश्वरि!।
बालघाती च पुरुषो मृतवत्सः प्रजायते॥
ब्राह्मणोद्वाहनञ्चैव कर्त्तव्यं तेन शुद्धये।
श्रवणं हरिवंशस्य कर्त्तव्यञ्च यथाविधि॥
महारुद्रजपञ्चैव कारयेच्च यथाविधि।
षडङ्गैकादशैरुद्रै रुद्रः समभिधीयते॥
रुद्रैस्तथैकादशभिर्महारुद्रः प्रकीर्त्तितः।
एकादशभिरेतैस्तु अतिरुद्रश्च कथ्यते॥
जुहुयाच्च दशांशेन दूर्वयायुतसंख्यया।
एकादश स्वर्णनिष्काः प्रदातव्याः सदक्षिणाः॥
पलान्येकादश तथा दद्याद्द्विजानुसारतः।
अन्येभ्योऽपि यथाशक्ति द्विजेभ्यो दक्षिणान्दिशेत्॥
स्नापयेद्दम्पती पश्चान्मन्त्रैर्वरुणदैवतैः।
आचार्य्याय प्रदेयानि वस्त्रालङ्करणानि च॥
गोवधी पुरुषः कुष्ठी निर्वंशश्चोपजायते।
स च पापविशुद्ध्यर्थं प्राजापत्यशतञ्चरेत्॥
व्रतान्ते मेदिनीं दत्त्वा शृणुयादथ भारतम्।
स्त्रीहन्ता चातिसारी स्यादश्वत्थान् रोपयेद्दश॥

दद्याच्च शर्कराधेनुं भोजयेच्च शतं द्विजान्।
राजहा क्षयरोगी स्यादेषा तस्य च निष्कृतिः॥
गोभूहिरण्यमिष्टान्नजलवस्त्रप्रदानतः।
घृतधेनुप्रदानेन तिलधेनुप्रदानतः॥
इत्यादिना क्रमेणैव क्षयरोगः प्रशाम्यति।
रक्तार्बुदी वैश्यहन्ता जायते सच मानवः॥
प्राजापत्यानि चत्वारि सप्त धान्यानि चोत्सृजेत्।
दण्डापतानकयुतः शूद्रहन्ता भवेन्नरः॥
प्राजापत्यं सकृच्चैवं दद्याद्धेनुं सदक्षिणाम्।
कारूणाञ्च वधे चैव रूक्षभावः प्रजायते॥
तेन तत्पापशुद्ध्यर्थं दातव्यो वृषभः सितः।
सर्वकार्य्येष्वसिद्धार्थो गजघाती भवेन्नरः॥
प्रासादं कारयित्वा तु गणेशप्रतिमां न्यसेत्।
गणनाथस्य मन्त्रं तु मन्त्री लक्षमितं जपेत्॥
कुलत्थशाकैः पूपैश्च गणशान्तिपुरःसरम्।
उष्ट्रे विनिहते चैव जायते विकृतस्वरः॥
स तत्पापविशुद्ध्यर्थं दद्यात् कर्पूरकं फलम्॥
अश्वे विनिहते चैव वक्रतुण्डः प्रजायते।
शतं पलानि दद्याच्च चन्दनान्यघनुत्तये॥
महिषीघातने चैव कृष्णगुल्मः प्रजायते।
खरे विनिहते चैव खररोमा प्रजायते॥
निष्कत्रयस्य प्रकृतिं सम्यग्दद्याद्धिरण्मयीम्।
तरक्षौ निहते चैव जायते केकरेक्षणः।
दद्याद्रत्नमयीं धेनुं स तत्पातकशान्तये॥

शूकरे निहते चैव दन्तुरो जायते नरः ।
स दद्यात्तु विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् ॥
हरिणे निहते खञ्जः शृगाले तु विपादकः ।
अश्वस्तेन प्रदातव्यः सौवर्णपलनिर्मितः ॥
अजाभिघातने चैव अधिकाङ्गः प्रजायते ।
अजा तेन प्रदातव्या विचित्रवस्त्रसंयुता ॥
उरभ्रे निहते चैव पाण्डुरोगः प्रजायते ।
कस्तूरिकापलं दद्याद्ब्राह्मणाय विशुद्धये ॥
मार्जारे निहते चैव पीतपाणिः प्रजायते ।
पारावतं स सौवर्णं प्रदद्यान्निष्कमात्रकम् ॥
शुकशारिकयोर्घाते नरः स्खलितवाग्भवेत् ।
सच्छास्त्रपुस्तकं दद्यात् स विप्राय सदक्षिणम् ॥
वकघाती दीर्घनसो दद्याद्गां धवलप्रभाम् ।
काकघाती कर्णहीनो दद्याद्गामसितप्रभाम् ॥
हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता ।
तदर्द्धार्द्धप्रमाणेन क्षत्रियादिष्वनुक्रमात् ॥

इति शातातपीये कर्मविपाके हिंसाप्रायश्चित्तविधिर्नाम द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

सुरापः श्यावदन्तः स्यात् प्राजापत्यन्तरन्तया ।
शर्करायास्तुलाः सप्त दद्यात् पापविशुद्धये ॥
जपित्वा तु महारुद्रं दशांशं जुहुयात्तिलैः ।

ततोऽभिषेकः कर्त्तव्यो मन्त्रैर्वरुणदैवतैः॥
मद्यपो रक्तपित्ती स्यात्स दद्यात् सर्पिषोघटम्।
मधुनोऽर्द्धघटञ्चैव सहिरण्यं विशुद्धये॥
अभक्ष्यभक्षणे चैव जायते कृमिकोदरः।
यथावत्तेन शुद्ध्यर्थमुपोष्यं भीष्मपञ्चकम्॥
उदक्यावीक्षितं भुक्त्वा जायते कृमिलोदरः।
गोमूत्रयावकाहारस्त्रिरात्रेणैव शुद्ध्यति॥
भुक्त्वा चास्पृश्यसंस्पृष्टं जायते कृमिलोदरः।
त्रिरात्रं समुपोष्याथ स तत्पापात् प्रमुच्यते॥
परान्नविघ्नकरणादजीर्णमभिजायते।
लक्षहोमं स कुर्वीत प्रायश्चित्तं यथाविधि॥
मन्दोदराग्निर्भवति सति द्रव्ये कदन्नदः।
प्राजापत्यत्रयं कुर्य्याद्भोजयेच्च शतं द्विजान्॥
विषदः स्याच्छर्दिरोगी दद्याद्दश पयस्विनीः।
मार्गहा पादरोगी स्यात् सोऽश्वदानं समाचरेत्॥
पिशुनो नरकस्यान्ते जायते श्वासकासवान्।
घृतं तेन प्रदातव्यं सहस्रपलसम्मितम्॥
धूर्त्तोऽपस्माररोगी स्यात् स तत्पापविशुद्धये।
ब्रह्मकूर्चमयीं धेनुं दद्याद्दत्त्वा सदक्षिणाम्॥
शूली परोपतापेन जायते तत्प्रमोचने।
सोऽन्नदानं प्रकुर्वीत तथा रुद्रं जपेन्नरः॥
दावाग्निदायकश्चैव रक्तातिसारवान् भवेत्।
तेनोदपानं कर्त्तव्यं रोपणीयस्तथा वटः॥
सुरालये जले वापि शकृन्मूत्रं करोति यः।

गुदरोगी भवेत्तस्य पापरूपः सुदारुणः॥
मासं सुरार्चनेनैव गोदानद्वितयेन तु।
प्राजापत्येन चैकेन शाम्यन्ति गुदजा रुजः॥
गर्भपातनजा रोगा यकृत्प्लीहजलोदराः।
तेषां प्रशमनार्थाय प्रायश्चित्तमिदं स्मृतम्॥
एतेषु दद्याद्विप्राय जलधेनुं विधानतः।
सुवर्णरूप्यताम्राणां पलत्रयसमन्विताम्॥
प्रतिमाभङ्गकारी च अप्रतिष्ठः प्रजायते।
सम्वत्सरत्रयं सिञ्चेदश्वत्थं प्रतिवासरम्॥
उद्वाहयेत्तमश्वत्थं स्वगृह्योक्तविधानतः।
तत्र संस्थापयेद्देवं विघ्नराजं सुपूजितम्॥
दुष्टवादी खण्डितः स्यात् स वै दद्याद्द्विजातये।
रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम्॥
खल्लीटः परनिन्दावान् धेनुं दद्यात् सकाञ्चनाम्।
परोपहासकृत् काणः स गां दद्यात् समौक्तिकाम्॥
सभायां पक्षपाती च जायते पक्षघातवान्।
निष्कत्रयमितं हेम स दद्यात् सत्यवर्त्तिनाम्॥

इति शातातपीये कर्मविपाके प्रकीर्णप्रायश्चित्तं नाम तृतीयोऽध्यायः।

चतुर्थोऽध्यायः।

कुलघ्नो नरकस्यान्ते जायते विप्रहेमहृत्।
स तु स्वर्णशतं दद्यात् कृत्वा चान्द्रायणत्रयम्॥

औडुम्बरी ताम्रचौरो नरकान्ते प्रजायते।
प्राजापत्यं स कृत्वाऽथ ताम्रं पलशतं दिशेत्॥
कांस्यहारी च भवति पुण्डरीकसमन्वितः।
कांस्यं पलशतं दद्यादलङ्कृत्य द्विजातये॥
रीतिहृत् पिङ्गलाक्षः स्यादुपोष्य हरिवासरम्।
रीतिं पलशतं दद्यादलङ्कृत्य द्विजं शुभम्॥
मुक्ताहारी च पुरुषो जायते पिङ्गमूर्द्धजः।
मुक्ताफलशतं दद्यादुपोष्य स विधानतः॥
त्रपुहारी च पुरुषो जायते नेत्ररोगवान्।
उपोष्य दिवसं सोऽपि दद्यात् पलशतन्त्रपु॥
सीसहारी च पुरुषो जायते शीर्षरोगवान्।
उपोष्य दिवसं दद्यादूघृतधेनुं विधानतः॥
दुग्धहारी च पुरुषो जायते बहुमूत्रकः।
स दद्याद्दुग्धधेनुञ्च ब्राह्मणाय यथाविधि॥
दधिचौर्य्येण पुरुषो जायते मदवान् यतः।
दधिधेनुः प्रदातव्या तेन विप्राय शुद्धये॥
मधुचौरस्तु पुरुषो जायते नेत्ररोगवान्।
स दद्यान्मधुधेनुञ्च समुपोष्य द्विजातये॥
इक्षोर्विकारहारी च भवेदुदरगुल्मवान्।
गुडधेनुः प्रदातव्या तेन तद्दोषशान्तये॥
लोहहारी च पुरुषः कर्व्वूराङ्गः प्रजायते।
लोहं पलशतं दद्यादुपोष्य स तु वासरम्॥
तैलचौरस्तु पुरुषो भवेत् कण्ड्वादिपीडितः।
उपोष्य स तु विप्राय दद्यात्तैलघटद्वयम्॥

आमान्नहरणाच्चैव दन्तहीनः प्रजायते।
स दद्यादश्विनौ हेमनिष्कद्वयविनिर्मितौ॥
पक्वान्नहरणाच्चैव जिह्वारोगः प्रजायते।
गायत्र्याः स जपेल्लक्षं दशांशं जुहुयात्तिलैः॥
फलहारी च पुरुषो जायते व्रणिताङ्गुलिः।
नानाफलानामयुतं स दद्याच्च द्विजन्मने॥
ताम्बूलहरणाच्चैव श्वेतौष्ठः सम्प्रजायते।
सदक्षिणं प्रदद्याच्च विद्रुमस्य द्वयं वरम्॥
शाकहारी च पुरुषोजायते नीललोचनः।
ब्राह्मणाय प्रदद्याद्वै महानीलमणिद्वयम्॥
कन्दमूलस्य हरणाद्ध्रस्वपाणिः प्रजायते।
देवतायतनं कार्य्यमुद्यानं तेन शक्तितः॥
सौगन्धिकस्य हरणाद्दुर्गन्धाङ्गः प्रजायते।
स लक्षमेकं पद्मानां जुहुयाज्जातवेदसि॥
दारुहारी च पुरुषः स्विन्नपाणिः प्रजायते।
स दद्याद्विदुषे शुद्धो काश्मीरजपलद्वयम्॥
विद्यापुस्तकहारी च किल मूकः प्रजायते।
न्यायेतिहासं दद्यात् स ब्राह्मणाय सदक्षिणम्॥
वस्त्रहारी भवेत् कुष्ठी सम्प्रदद्यात्प्रजापतिम्।
हेमनिष्कमितञ्चैव वस्त्रयुग्मं द्विजातये॥
ऊर्णाहारी लोमशः स्यात् स दद्यात् कम्बलान्वितम्।
स्वर्णनिष्कमितं हेमवह्निं दद्याद्विजातये॥
पट्टसूत्रस्य हरणान्निर्लोमा जायते नरः।
तेन धेनुः प्रदातव्या विशुद्ध्यर्थं द्विजन्मने॥

औषधस्यापहरणे सूर्य्यावर्तः प्रजायते।
सूर्य्यायार्घः प्रदातव्यो मासं देयञ्च काञ्चनम्॥
रक्तवस्त्रप्रवालादिहारी स्याद्रक्तवातवान्।
सवस्त्रां महिषीं दद्यान्मणिरागसमन्विताम्॥
विप्ररत्नापहारी चाप्यनपत्यः प्रजायते।
तेन कार्य्यं विशुद्ध्यर्थं महारुद्रजपादिकम्॥
मृतवत्सोदितः सर्वो विधिरत्र विधीयते।
दशांशहोमः कर्तव्यः पलाशेन यथाविधि॥
देवस्व हरणाच्चैव जायते विविधो ज्वरः।
ज्वरोमहाज्वरश्चैव रौद्रो वैष्णवएव च॥
ज्वरे रौद्रं जपेत् कर्णे महारुद्रं महाज्वरे।
अतिरौद्रं जपेद्रौद्रे वैष्णवे तद्द्वयं जपेत्॥
नानाविधद्रव्यचौरो जायते ग्रहिणीयुतः।
तेनान्नोदकवस्त्राणि हेम देयञ्च शक्तितः॥
इति शातातपीये कर्मविपाके स्तेयप्रायश्चित्तं नाम चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः।

मातृगामी भवेद्यस्तु लिङ्गं तस्य विनश्यति।
चाण्डालीगमने चैव हीनकोषः प्रजायते॥
तस्य प्रतिक्रियां कर्त्तुं कुम्भमुत्तरतोन्यसेत्।
कृष्णवस्त्रसमाच्छन्नं कृष्णमाल्यविभूषितम्॥
तस्योपरि न्यसेद्देवं कांस्यपात्रे धनेश्वरम्।

सुवर्णनिष्कषट्केन निर्मितं नरवाहनम् ॥
यजेत् पुरुषसूक्तेन धनदं विश्वरूपिणम् ।
अथर्ववेदविद्विप्रो ह्याथर्वणं समाचरेत् ॥
सुवर्णपुत्तलिकां कृत्वा निष्कविंशतिसङ्ख्यया ।
दद्याद्विप्राय सम्पूज्य निष्पापोऽहमिति ब्रुवन् ॥
निधीनामधिपो देवः शङ्करस्य प्रियः सखा ।
सौम्याशाधिपतिः श्रीमान् मम पापं व्यपोहतु ॥
इमं मन्त्रं समुच्चार्य्य आचार्य्याय यथाविधि ।
दद्याद्देवं हीनकोषे लिङ्गनाशे विशुद्धये ॥
गुरुजायाभिगमनान्मूत्रकृच्छ्रः प्रजायते ।
तेनापि निष्कृतिः कार्य्या शास्त्रदृष्टेन कर्मणा ॥
स्थापयेत् कुम्भमेकन्तु पश्चिमायां शुभे दिने ।
नीलवस्त्रसमाच्छन्नं नीलमाल्यविभूषितम् ॥
तस्योपरि न्यसेद्देवं ताम्रपात्रे प्रचेतसम् ।
सुवर्णनिष्कषट्केन निर्मितं यादसाम्पतिम् ॥
यजेत् पुरुषसूक्तेन वरुणं विश्वरूपिणम् ।
सामविद्ब्राह्मणस्तत्र सामवेद समाचरेत् ॥
सुवर्णपुत्तलिकां कृत्वा निष्कविंशतिसङ्ख्यया ।
दद्याद्विप्राय सम्पूज्य निष्पापोऽहमिति ब्रुवन् ॥
यादसामधिपो देवोविश्वेषामपि पावनः ।
संसाराब्धौ कर्णधारो वरुणः पावनोऽस्तु मे ॥
इमं मन्त्रं समुच्चार्य्य आचार्य्याय यथाविधि ।
दद्याद्देवमलङ्कृत्य मूत्रकृच्छ्रप्रशान्तये ॥
स्वसुतागमने चैव रक्तकुष्ठं प्रजायते ।

भगिनीगमने चैव पीतकुष्ठं प्रजायते ॥
तस्य प्रतिक्रियां कर्त्तुं पूर्व्वतः कलसं न्यसेत् ।
पीतवस्त्रसमाच्छन्नं पीतमाल्यविभूषितम् ॥
तस्योपरि न्यसेत् स्वर्णपात्रे देवं सुरेश्वरम् ।
सुवर्णनिष्कषट्केन निर्म्मितं वज्रधारिणम् ॥
यजेत् पुरुषसूक्तेन वासवं विश्वरूपिणम् ।
यजुर्वेदं तत्र साम ऋग्वेदञ्च समाचरेत् ॥
सुवर्णपुत्रिकां कृत्वा सुवर्णदशकेन तु ।
दद्याद्विप्राय सम्पूज्य निष्पापोऽहमिति ब्रुवन् ॥
देवानामधिपोदेवो वज्री विष्णुनिकेतनः ।
शतयज्ञः सहस्राक्षः पापं मम निकृन्ततु ॥
इमं मन्त्रं समुच्चार्य्य आचार्य्याय यथाविधि ।
दद्याद्देवं सहस्राक्षं स पापस्यापनुत्तये ॥
भातृभार्य्याभिगमनान्नलत्कुष्ठं प्रजायते ।
स्ववधूगमने चैव कृष्णकुष्ठं प्रजायते ॥
तेन कार्य्यं विशुद्ध्यर्थं प्रागुक्तस्यार्द्धमेवहि ।
दशांशहोमः सर्व्वत्र घृताक्तैः क्रियते तिलैः ॥
यदगम्याभिगमनाज्जायते भ्रुवमण्डलम् ।
कृत्वा लोहमयीं धेनुं तिलषष्टिरमाणतः ॥
कार्पासभारसंयुक्तां कांस्यदोहां सवत्सिकाम् ।
दद्याद्विप्राय विधिवदिमं मन्त्रमुदीरयेत् ॥
सुरभी वैष्णवी माता मम पापं व्यपोहतु ।
तपस्विनीसङ्गमने जायते चाश्मरीगदः ॥

सतु पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ॥
दद्याद्विप्राय विदुषे मधुधेनुं यथोदितम् ।
तिलद्रोणशतञ्चैव हिरण्येन समन्वितम् ॥
पितृष्वस्रभिगमनाद्दक्षिणांशव्रणी भवेत् ।
तेनापि निष्कृतिः कार्य्या अजादानेन शक्तितः ॥
मातुलान्यान्तु गमने पृष्ठकुब्जः प्रजायते ।
कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत् ॥
मातृष्वस्रभिगमने वामाङ्गे व्रणवान् भवेत् ।
तेनापि निष्कृतिः कार्य्या सम्यग्दासप्रदानतः ॥
मृतभार्य्याभिगमने मृतभार्य्यः प्रजायते ।
तत्पातकविशुद्ध्यर्थं द्विजमेकं विवाहयेत् ॥
सगोत्रस्त्रीप्रसङ्गेन जायते च भगन्दरः ।
तेनापि निष्कृतिः कार्य्या महिषीदानयत्नतः ॥
तपस्विनीप्रसङ्गेन प्रमेही जायते नरः ।
मासं रुद्रजपः कार्य्यो दद्याच्छक्त्या च काञ्चनम् ॥
दीक्षितस्त्रीप्रसङ्गेन जायते दुष्टरक्तदृक् ।
स पातकविशुद्ध्यर्थं प्राजापत्यद्वयञ्चरेत् ॥
स्वजातिजायागमने जायते हृदयव्रणी ।
तत्पापस्य विशुद्ध्यर्थं प्रजापत्यद्वयञ्चरेत् ॥
पशुयोनौ च गमने मूत्राघातः प्रजायते ।
तिलपात्रद्वयञ्चैव दद्यादात्मविशुद्धये ॥
अश्वयोनौ च गमनाद्गुदस्तम्भः प्रजायते ।
रुद्रसूक्तमलस्नानं मासं कुर्य्यात् शिवस्य च ॥

एते दोषा नराणां स्युर्नरकान्ते न संशयः ।
स्त्रीणामपि भवन्त्येते तत्तत्पुरुषसङ्गमात् ॥

इति शातातपीये कर्मविपाके अगम्यागमन प्रायश्चित्तं नाम पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

अश्वशूकरश्रृङ्ग्यद्रिद्रुमादिशकटेन च ।
भृग्वग्निदारुशस्त्राश्मविषोद्बन्धनजैर्हताः ॥
व्याघ्राहिगजभूपालचौरवैरिवृकाहताः ।
काष्ठशल्यमृता ये च शौचसंस्कारवर्जिताः ॥
विसूचिकान्नकवलदवातीसारतोमृताः ।
शाकिन्यादिग्रहैर्ग्रस्ता विद्युत्पातहताश्च ये ॥
अस्पृश्या अपवित्राश्च पतिताः पुत्त्रवर्जिताः ।
पञ्चविंशत्प्रकारैश्च नाप्नुवन्ति गतिं मृताः ॥
पित्राद्याः पिण्डभाजः स्युस्त्रयो लेपभुजस्तथा ।
ततोनान्दीमुखाः प्रोक्ता स्त्रयोऽप्यश्रुमुखास्त्रयः ॥
द्वादशैते पितृगणास्तर्पिताः सन्ततिप्रदाः ।
गतिहीनाः सुतादीनां सन्ततिं नाशयन्ति ते ॥
दश व्याघादिनिहता गर्भं निघ्नन्त्यमी क्रमात् ।
द्वादशास्त्रादिनिहता आकर्षन्ति च बालकम् ॥
विषादिनिहताघ्नन्ति दशसु द्वादशस्वपि ।
वर्षैकबालकं कुर्य्यादनपत्योऽनपत्यताम् ॥
व्याघ्रेण हन्यते जन्तुः कुमारीगमनेन च ।

विषदश्चैव सर्पेण गजेन नृपदुष्टकृत्॥
राज्ञा राजकुमारघ्नश्चौरेण पशुहिंसकः ।
वैरिणा मित्रभेदी च वज्रवृत्तिर्वृकेण तु ॥
गुरुघाती च शय्यायां मत्सरी शौचवर्जितः
द्रोही संस्काररहितः शुना निक्षेपहारकः ॥
नरोविहन्यतेऽरण्ये शूकरेण च पाशिकः ।
कृमिभिः कृत्तनाशश्च कृमिणा च निकृन्तनः ॥
शृङ्गिणा शङ्करद्रोही शकटेन च सूचकः ।
भृगुणा मेदिनीचौरो वह्निना यज्ञहानिकृत्॥
दवेन दक्षिणाचौरः शस्त्रेण श्रुतिनिन्दकः ॥
अश्मना द्विजनिन्दाकृद्विषेण कुमतिप्रदः ।
उद्बन्धनेन हिंस्रः स्यात् सेतुभेदो जलेन तु ॥
द्रुमेण राजदन्तिहृद्दतीसारेण लौहहृत् ।
साकिन्याद्यैश्च म्रियते सदर्पकार्य्यकारकः ॥
अनध्यायेऽप्यधीयानो म्रियते विद्युता तथा ।
अस्पृश्यस्पर्शसङ्गी च वान्तमाश्रित्य शास्त्रहृत् ।
पतितोमरविक्रेतानपत्योद्विजवस्त्रहृत् ॥
अथ तेषां क्रमेणैव प्रायश्चित्तं विधीयते ।
कारयेन्निष्कमात्रन्तु पुरुषं प्रेतरूपिणम् ॥
चतुर्भुजं दण्डहस्तं महिषासनसंस्थितम् ।
पिष्टैः कृष्णतिलैः कुर्य्यात् पिण्डं प्रस्थप्रमाणतः ॥
मध्वाज्यशर्करायुक्तं स्वर्णकुण्डलसंयुतम् ।
अकालमूलं कलसं पञ्चपल्लवसंयुतम् ॥
कृष्णवस्त्रसमाच्छन्नं सर्वौषधिसमन्वितम् ।

तस्योपरिन्यसेदेवं पात्रं धान्यफलैर्युतम् ॥
सप्तधान्यन्तु सफलं तत्र तत् सफलं न्यसेत्।
कुम्भोपरि च विन्यस्य पूजयेत् प्रेतरूपिणम् ॥
कुर्य्यात् पुरुषसूक्तेन प्रत्यहं दुग्धतर्पणम्।
षड़ङ्गञ्च जपेद्रुद्रं कलसे तत्र वेदवित् ॥
यमसूक्तेन कुर्वीत यमपूजादिकं तथा।
गायत्र्याश्चैव कर्त्तव्योजपः स्वात्मविशुद्धये ॥
ग्रहशान्तिकपूर्वञ्च दशांशं जुहुयात्तिलैः।
अज्ञातनामगोत्राय प्रेताय सतिलोदकम् ॥
प्रदद्यात् पितृतीर्थेन पिण्डं मन्त्रमुदीरयेत्।
इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् ॥
ददामि तस्मै प्रेताय यः पीड़ां कुरुते मम।
सजलान् कृष्णकलसांस्तिलपात्रसमन्वितान्।
द्वादश प्रेतमुद्दिश्य दद्यादेकञ्च विष्णवे ॥
ततोऽभिषिञ्चेदाचार्य्यो दम्पती कलसोदकैः।
शुचिर्वरायुधधरो मन्त्रैर्वरुणदैवतैः।
यजमानस्ततोदद्यादाचार्य्याय सदक्षिणाम् ॥
ततोनारायणवलिः कर्त्तव्यः शास्त्रनिश्चयात्।
एष साधारणविधिरगतीनामुदाहृतः ॥
विशेषस्तु पुनर्ज्ञेयो व्याघ्रादिनिहतेष्वपि।
व्याघ्रेण निहते प्रेते परकन्यां विवाहयेत् ॥
सर्पदंशे नागवलिर्देयः सर्वेषु काञ्चनम्।
चतुर्निष्कमितं हेम गजं दद्याद्गजैर्हते ॥
राज्ञा विनिहते दद्यात् पुरुषन्तु हिरण्मयम्।

चौरेण निहते धेनुं वैरिणा निहते वृषम् ॥
वृकेण निहते दद्याद्यथाशक्ति च काञ्चनम् ।
शय्यामृते प्रदातव्या शय्या तुलीसमन्विता ॥
निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता ।
शौचहीने मृते चैव द्विनिष्कस्वर्णजं हरिम् ॥
संस्कारहीने च मृते कुमारञ्च विवाहयेत् ।
शुना हते च निक्षेपं स्थापयेन्निजशक्तितः ॥
शूकरेण हते दद्यान्महिषं दक्षिणान्वितम् ।
कृमिभिश्च मृते दद्याद्गोधूमान्नं द्विजातये ॥
शृङ्गिणा च हते दद्याद्वृषभं वस्त्रसंयुतम् ।
शकटेन मृते दद्यादश्वं सोपस्करान्वितम् ॥
भृगुपाते मृते चैव प्रदद्याद्धान्यपर्वतम् ।
अग्निना निहते दद्यादुपानहं स्वशक्तितः ॥
दवेन निहते चैव कर्त्तव्या सदने सभा ।
शस्त्रेणाच निहते दद्यान्महिषीं दक्षिणान्विताम् ॥
अश्मना निहते दद्यात् सवत्सां गां पयस्विनीम् ।
विषेण मृते दद्यान्मेदिनीं क्षेत्रसंयुताम् ॥
उद्बन्धनमृते चापि प्रदद्याद्गां पयस्विनीम् ।
मृते जलेन वरुणं हैमं दद्यात्त्रिनिष्ककम् ॥
वृक्षं वृक्षहते दद्यात् सौवर्णं स्वर्णसंयुतम् ।
अतीसारमृते लक्षं सावित्र्याः संयतोजपेत् ॥
साकिन्यादिमृते चैवं जपेद्रुद्रं यथोचितम् ।
विद्युत्पातेन निहते विद्यादानं समाचरेत् ॥
अस्पर्शे च मृते कार्य्यं वेदपारायणं तथा ।

सच्छास्त्रपुस्तकं दद्याद्दान्तमाश्रित्य संस्थिते ॥
पातित्येन मृते कुर्य्यात् प्राजापत्यानि षोड़श ।
मृते चापत्यरहिते कृच्छ्राणां नवतिञ्चरेत् ॥
निष्कत्रयमितस्वर्णं दद्यादश्वं हयायते ।
कपिना निहते दद्यात् कपिं कनकनिर्मितम् ॥
विसूचिकामृते स्वादु भोजयेच्च शतं द्विजान् ।
तिलधेनुः प्रदातव्या कण्ठेऽन्नकवले मृते ॥
केशरोगमृते चापि अष्टौ कृच्छ्रान् समाचरेत् ॥
एवं कृते विधानेन विदध्यादौर्द्ध्वदेहिकम् ।
ततः प्रेतत्वनिर्मुक्ताः पितरस्तर्पितास्तथा ॥
दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसम्पदः ।
इतिशातातपप्रोक्तोविपाकः कर्मणामयम् ।
शिष्याय शरभङ्गाय विनयात् परिपृच्छते ॥

इतिशातातपीये कर्मविपाके अगतिप्रायश्चित्तं नाम षष्ठोऽध्यायः ॥

समाप्ता चेयं शातातपसंहिता ।

———

वशिष्ठसंहितायाम्।

प्रथमोऽध्यायः।

अथातः पुरुषनिःश्रेयसार्थं धर्मजिज्ञासा। ज्ञात्वा चानुतिष्ठन् धार्मिकः प्रशस्यतमो भवति। लोके प्रेत्य वा विहितोधर्मः। तदलाभे शिष्टाचारः प्रमाणाम्। दक्षिणेन हिमवत उत्तरेण विन्ध्यस्य ये धर्मा ये चाचारास्ते सर्वे प्रत्येतव्या नत्वन्ये प्रतिलोमकल्पधर्माः। एतदार्य्यावर्त्तमित्याचक्षते। गङ्गायमुनयोरन्तराप्येके। यावद्वा कृष्णमृगोविचरति तावद्ब्रह्मवर्च्चस मिति। अथापि भाल्लविनोनिदाने गाथामुदाहरन्ति।

पश्चात् सिन्धुर्विहरिणी सूर्य्यस्योदयनं पुरा।
यावत् कृष्णोऽभिधावति तावद्वै ब्रह्मवर्च्चसम्।
त्रैविद्यवृद्धा यंब्रूयुर्धर्मं धर्मविदोजनाः।
पवने पावने चैव स धर्मोनात्र संशयइति।

देशधर्मजातिधर्मकुलधर्मान् श्रुत्यभावादब्रवीन्मनुः॥ सूर्य्याभ्युदितः सूर्य्याभिनिर्मुक्तः कुनखी श्यावदन्तः परिवित्तिः परिवेत्ता अग्रेदिधिषूर्दिधिषूपतिर्वीजहा ब्रह्मघ्नइत्येतएनस्विनः। पञ्च महापातकान्याचक्षते गुरुतल्पं सुरापानं भ्रूणहत्यां ब्राह्मणसुवर्णहरणं पतितसंप्रयोगञ्च ब्राह्मेण वा यौनेन वा।

अथाप्युदाहरन्ति।

सम्वत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनादन्नपानासनादपि।

अथाप्युदाहरन्ति।

विद्याविनाशे पुनरभ्युपैति
जातिप्रणाशे त्विह सर्वनाशः।
कुलापदेशेन हयोऽपि पूज्य-
स्तस्मात् कुलीनां स्त्रिय मुद्वहन्तीति॥

त्रयोवर्णा ब्राह्मणस्य वशे वर्त्तेरन् तेषां ब्राह्मणो धर्मं यद्ब्रूयात्तद्राजा चानुतिष्ठेत्।

राज तु धर्मेणानुशासन् षष्ठं षष्ठं धनस्य हरेदन्यत्र ब्राह्मणात्। इष्टापूर्त्तस्य तु षष्ठमंशं भजति। इतिह ब्राह्मणोवेदमाद्यं करोति ब्राह्मणआपदउद्धरति तस्माद्ब्राह्मणोऽनाद्यः सोमोऽस्य राजा भवतीतीह प्रेत्य चाभ्युदयिकमिति ह विज्ञायते॥

इति वाशिष्ठे धर्मशास्त्रे प्रथमोऽध्यायः॥

द्वितीयोऽध्यायः।

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः। त्रयोवर्णा द्विजातयोब्राह्मणक्षत्रियवैश्याः। तेषां,

मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने।
तत्रास्य माता सावित्री पिता त्वाचार्य्य उच्यते।
वेदप्रदानात् पितेत्याचार्य्यमाचक्षते।

अथाप्युदाहरन्ति।

इयमिह वै पुरुषस्य रेतोब्राह्मणस्योर्द्ध्वं नाभेरर्वाचीनं मन्येत। तद्यदूर्द्ध्वं नाभेस्तेनास्यानौरसी प्रजा जायते यदुपनयति यत् साधुकरोति। अथ यदर्वाचीनं नाभेस्तेनास्यौरसी प्रजा जायते जनन्यां जनयति तस्माच्छ्रोत्रियमनूचानमपृन्योऽसीति न वदन्तीति हारीताः।

अथाप्युदाहरन्ति।

नत्वस्य विद्यते कर्म किञ्चिदामौञ्जिबन्धनात्।
वृत्त्या शूद्रसमो ज्ञेयो यावद्वेदे न जायतइति॥

अन्यत्रोदकर्मस्वधापितृसंयुक्तेभ्यः॥ विद्याह वै ब्राह्मणमाजगाम गोपाय मां सेवधिस्तेऽहमस्मि।

असूयकायानृजवेऽव्रताय न मां ब्रूया वीर्य्यवती तथा स्यां।
यमातृणोत्यवितथेन कर्मणा बहुदुःखं कुर्वन्नमृतंवसंप्रयच्छन्
तन्मन्येत पितरं मातरञ्च तस्मै न द्रुह्येत् कतमच्च नाहम्।
अध्यापिताये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा।
यथैव तेन गुरोर्भोजनीयास्तथैव तान्न युनक्ति श्रुतं तत्।
यमेव विद्याच्छुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम्।
यस्ते तद्द्रुह्येत् कतमच्च नाह तस्मै मां ब्रूयान्निधिपाय ब्रह्मन्निति।

दहत्यग्निर्यथा कक्षं ब्रह्म त्वब्दमनादृतम्।
न ब्रह्म तस्मै प्रब्रूयाच्छक्यमानमकृत्ततइति॥

षट्कर्माणि ब्राह्मणस्याध्यायनमध्यापनं यजनं दानं प्रतिग्रहश्चेति। त्रीणि राजन्यस्याध्ययनं यजनं दानं शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेत्। एतान्येव त्रीणि वैश्यस्य कृषिवाणिज्यपाशुपाल्यकुसीदञ्च। एतेषां परिचर्य्या शूद्रस्य। अनियता वृत्तिरनियतकेशवेशाः सर्वेषां मुक्तशिखावर्जम्।

अजीवतः स्वधर्मेणान्यतरामपापीयसीं वृत्तिमातिष्ठेरन्न तु कदाचित् पापीयसीम्। वैश्यजीविकामास्थाय पण्येन जीवतोऽश्म लवणमपण्यं पाषाणकौ पचौ माजिनानि च तान्तवञ्च रक्तं सर्वञ्च कृतान्नं पुष्पमूलफलानि च गन्धरसा उदकञ्चौषधीनां रसः सोमश्च शस्त्र विषं मांसञ्च चीरं सविकारं अयस्त्रपु जतु सीसञ्च।

अथाप्युदाहरन्ति।

सद्यः पतति मांसेन लाक्षया लवणेन च।

त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात्॥

ग्राम्यपशूनामेकशफाः केशिनश्च सर्वे चारण्याः पशवो वयांसि दंष्ट्रिणश्च॥ धान्यानां तिलानाहुः। अथाप्युदाहरन्ति।

भोजनाभ्यञ्जनाद्दानाद्यदन्यत् कुरुते तिलैः।

कृमिभूतः स विष्ठायां पितृभिः सह मज्जति।

कामं वा स्वयं कृष्योत्पाद्य तिलान् विक्रीणीरन्॥

अन्यत धान्यविक्रयात्। रसारसैः समतोहानतो वा निमातव्यः नत्वेव लवणं रसैस्तिलतण्डुलपक्वान्नं विद्यान्मनुष्याश्च विहिताः। परिवर्त्तकेन ब्राह्मणराजन्यौ वार्द्धुषान्नं नाद्यातां। अथाप्युदाहरन्ति।

समर्घं धान्यमुद्धृत्य महार्घं यः प्रयच्छति।

स वै वार्द्धुषिकोनाम ब्रह्मवादिषु गर्हितः॥

वृद्धिञ्च भ्रूणहत्याञ्च तुलया समतोलयन्।

अतिष्ठद्भ्रूणहा कोट्यां वार्द्धुषिर्न्यकृपपातहेति॥

काम वा परिलुप्तकृत्याय पापीयसे दद्यात् द्विगुणं हिरण्यं

त्रिगुणं धान्यं धान्येनैव रसाव्याख्याताः पुष्पमूलफलानि च। तुलाधृतमष्टगुणम्। अथाप्युदाहरन्ति।

राजानुमतभावेन द्रव्यवृद्धिं विनाशयेत्।
पुनाराजाभिषेकेण द्रव्यवृद्धिञ्च वर्जयेत्॥
द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं स्मृतम्।
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः।
वशिष्ठवचनप्रोक्तां वृद्धिं वार्द्धुषिके शृणु॥
पञ्चमाषांस्तु विंशत्या एवं धर्मो न हीयत इति॥

इति वाशिष्ठे धर्मशास्त्रे द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

अश्रोत्रियाननुवाका अनग्नयः शूद्रधर्माणो भवन्ति। नानृग्ब्राह्मणोभवति। मानवञ्चात्र श्लोकमुदाहरन्ति।

योऽनधीत्य द्विजोवेदमन्यत्र कुरुते श्रमम्॥
स जीवन्नेवशूद्रत्वमाशु गच्छति सान्वयः।

न वणिक् न कुसीदजीवी। ये च शूद्रप्रेषणं कुर्वन्ति। न स्तेनो न चिकित्सकः।

अव्रता ह्यनधी याना यत्र भैक्षचरा द्विजाः।
तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदो हि सः॥
चत्वारोऽपि त्रयोवापि यं ब्रूयुर्वेदपारगा।
स धर्मइतिविज्ञेयो नेतरेषां सहस्रशः॥
अव्रतानाममन्त्राणां जातिमात्रोपजीविनां।
सहस्रशः समेतानां पर्षत्त्वं नैव विद्यते॥

यद्वदन्त्यन्यथा भूत्वा मूर्खा धर्ममतद्विदः।
तत्पापं शतधा भूत्वा तद्वक्तृष्वनु गच्छति॥
श्रोत्रियायैव देयानि हव्यकव्यानि नित्यशः।
अश्रोत्रियाय दत्तानि तृप्तिं नायान्ति देवताः॥
यस्य चैव गृहे मूर्खो दूरे चैव बहुश्रुतः।
बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः॥
ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते।
ज्वलन्तमग्निमुत्सृज्य नहि भस्मनि हूयते॥
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।
यश्च विप्रोऽनधीयान स्त्रयस्ते नामधारकाः॥
विद्वद्भोज्यानि चान्नानि मूर्खा राष्ट्रेषु भुञ्जते।
तदन्नं नाशमायाति महद्वा जायते भयम्॥

अप्रज्ञायमानवृत्तं योऽधिगच्छेद्राजा तद्धरेत् अधिगन्त्रे षष्ठमंशं प्रदाय। ब्राह्मणश्चेदधिगच्छेत् षट्कर्मसु वर्त्तमानो न राजा हरेत्। आततायिनं हत्वा नात्र प्राणमिच्छोः किञ्चित् किल्बिषमाहुः। षड्विधास्त्वाततायिनः। अथाप्युदाहरन्ति।

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारहरश्चैव षडेते आततायिनः॥
आततायिनमायान्तमपि वेदान्तपारगम्।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्॥
स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम्।
न तेन भ्रूणहा स स्यान्मन्युस्तन् मन्युमृच्छति॥

त्रिणाचिकेतस्त्रिपञ्चाग्निः सुपर्णवान् चतुर्मेधा वाजसनेयी

षड़ङ्गविद्ब्रह्मदेयानुसन्तानश्छन्दोगोज्येष्ठसामगोमन्त्रब्राह्मणवित् यश्च धर्मानधीते यस्य च पुरुषमातृपितृवंशः श्रोत्रियोविज्ञायते विद्वांसः स्नातकाश्चेति पङ्क्तिपावनाः ।

चातुर्विद्योविकल्पी च अङ्गविद्धर्मपाठकः ।
आश्रमस्थास्त्रयोमुख्या परिषत् स्याद्दशावरा ॥

उपनीय तु यः कृत्स्नं वेदमध्यापयेत् स आचार्य्यो यस्त्वेकदेशं सउपाध्यायोयश्च वेदाङ्गानि । आत्मत्राणे वर्णसंस्कारे वा ब्राह्मणवैश्यौ शस्त्रमाददीयाताम् । क्षत्रियस्य तु तन्नित्यमेव रक्षणाधिकारात् । प्राग्वोदग्वासीनः प्रक्षाल्य पादौ पाणी चामणिबन्धनात् । अङ्गुष्ठमूलस्योत्तरतो रेखाब्राह्मं तीर्थं तेन त्रिराचामेदशब्दवत् । द्विःपरिमृज्यात् खान्यद्भिः संस्पृशेत् मूर्द्धन्यपो निनयेत् । सव्ये च पाणौ व्रजंस्तिष्ठन् शयानः प्रणतो वा नाचामेत् । हृदयङ्गमाभिरद्भिरबुद्बुदाभिरफेनाभिर्ब्राह्मणः कण्ठगाभिः क्षत्रियः शुचिः । वैश्योऽद्भिः प्राशिताभिस्तु स्त्रीशूद्रौ स्पृष्टाभिरेव च । पुत्रदारादि यागास्तर्पणानि स्युः । न वर्णगन्धरसदुष्टाभिः । याश्च स्युरशुभागमाः । न मुख्या विप्रुषउच्छिष्टं कुर्वन्त्यनङ्गश्लिष्टाः । सुप्त्वा भुक्त्वा पीत्वा स्नात्वा चाचान्तः पुनराचामेत् ॥

वासश्च परिधाय चोष्ठौ संस्पृश्य यात्रालोमकौ । न श्मश्रुगतालेपः दन्तवदन्तसक्तेषु यच्चान्त र्मुखे भवेदाचान्तस्यावशिष्टं स्यान्निगिरन्नेव तच्छुचिः ।

परानप्याचामयतः पादौ वा विप्रुषोगताः ।
भूम्या तास्तु समाः प्रोक्तास्ताभिर्नोच्छिष्टभाग्भवेत् ॥
प्रचरन्नभ्यवहार्य्येषु उच्छिष्टं यदि संस्पृशेत् ।

भूमौ निःक्षिप्य तद्द्रव्यमाचान्तः प्रचरेत् पुनः ॥
यद्द्यन्मीमांस्यं स्यात्तत्तदद्भिस्तु संस्पृशेत् ।
श्वहताश्च मृगा वन्या पातितञ्च खगैः फलम् ॥
बालैरनुपविज्ञान्तः स्त्रीभिराचरितञ्च यत् ।
परिसंख्याय तान् सर्व्वान् शुचीनाह प्रजापतिः ॥
प्रसारितञ्च यत्पण्यं ये दोषाः स्त्रीमुखेषु च ।
मशकैर्म्मक्षिकाभिश्च निलीनो नोपहन्यते ॥
क्षितिस्थाश्चैव या आपो गवां प्रीतिकराश्च याः ।
परिसंख्याय तान् सर्व्वान् शुचीनाह प्रजापतिरिति ॥

लेपगन्धापकर्षणं शौचममेध्यलिप्तस्याद्भिर्म्मृदा च । तैजसमृण्मयदारवतान्तवानां भस्मपरिमार्जनप्रदाहतक्षणनिर्णेजनानि । तैजसवदुपलमणीनां मणिवच्छङ्खशुक्तीनां दारुवदस्थ्नां रज्जुविदलचर्म्मणां चैलवच्छौचं । गोवालैः फलचमसानां गौरसर्षपकल्केन क्षौमजानां । भूम्यास्तु संमार्जनप्रोक्षणोपलेपनोल्लेखनैर्यथास्थानं दोषविशेषात् प्राजापत्यमुपैति । अथाप्युदाहरन्ति ॥

खननाद्दहनाद्वर्षाद्गोभिराक्रमणादपि ।
चतुर्भिः शुद्ध्यते भूमिः पञ्चमाच्चोपलेपनात् ॥
रजसा शुद्ध्यते नारी नदी वेगेन शुद्ध्यति ।
भस्मना शुद्ध्यते कांस्यं ताम्रमम्लेन शुद्ध्यति ॥
मद्यैर्मूत्रैः पुरीषैर्व्वा श्लेष्मपूयाश्रुशोणितैः ।
संस्पृष्टं नैव शुद्ध्येत पुनः पाकेन मृण्मयम् ॥
अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥

अग्निरेव काञ्चनं पूर्येत्तथा रजनम् । अङ्गुनिकनिष्ठिका-मूले दैवं तीर्थम् । अङ्गुल्यग्रे मानुषं । पाणिमध्यमाग्नेयम् । प्रदेशिन्यङ्गुष्ठयोरन्तरा पित्र्यं ॥ रोचन्त इति सायं प्रातरश-नान्यभिपूजयेत् । स्वदितमितिपित्र्येषु । सम्पन्नमित्याभ्युद-यिकेषु ॥

इति वाशिष्ठे धर्मशास्त्रे तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

प्रकृतिविशिष्टं चातुर्वर्ण्यं संस्कारविशेषाच्च । ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायतेति । गायत्र्या छन्दसा ब्राह्मणमसृजत् त्रिष्टुभा रा-जन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रमित्यसंस्कार्यो-विज्ञायते । त्रिष्वेव निवासः स्यात् सर्वेषां सत्यमक्रोधोदान-महिंसा प्रजननञ्च पितृदेवतातिथिपूजायां पशुं हिंस्यात् ।

मधुपर्के च यज्ञे च पितृदैवतकर्मणि ।
अत्रैव च पशुं हिंस्यान्नान्यथेत्यब्रवीन्मनुः ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
नच प्राणिवधः स्वर्ग्यस्तस्माद्यागे वधोऽवधः ॥

अथापि ब्राह्मणाय राजन्याय वा अभ्यागताय वा महोक्षं वा महाजम्वा पचेदेवमस्यातिथ्यं कुर्वन्तीति । उदकक्रिया-मशौचञ्च द्विवर्षात् प्रभृति मातउभयं कुर्य्यात् । दन्तजनना-दित्येके । शरीरमग्निना संयोज्यानवेक्षमाणा अपोऽभ्यवयन्ति ।

ततस्तत्रस्था एव सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वन्ति। अयुग्मा दक्षिणामुखाः। पितृणां वा एषा दिग्या दक्षिणा। गृहान् व्रजित्वा स्रस्तरे त्र्यहमनश्नन्त आसीरन्। अशक्तौ क्रीतोत्पन्नेन वर्त्तेरन्।

दशाहं मरणाशौचं सपिण्डेषु विधीयते।

मरणात् प्रभृति दिवसगणना। सपिण्डता सप्तपुरुषं विज्ञायते। अप्रत्तानां स्त्रीणां त्रिपुरुषं त्रिदिनं विज्ञायते। प्रत्तानामितरे कुर्व्वीरन्। तांश्च तेषां जननेऽप्येवमेव निपुणां शुद्धिमिच्छतां मातापित्रोर्वीजनिमित्तत्वात्। अथाप्युदाहरन्ति।

नाशौचं सूतके पुंसः संसर्गञ्चेन्नगच्छति।
रजस्तत्राशुचि ज्ञेयं यच्च पुंसि न विद्यते॥
ब्राह्मणो दशरात्रेण पञ्चदश रात्रेण भूमिपः।
विंशतिरात्रेण वैश्यः शूद्रोमासेन शुद्ध्यति॥
अशौचे यस्तु शूद्रस्य सूतके वापि भुक्तवान्।
स गच्छेन्नरकं घोरं तिर्य्यग्योनिषु जायते॥
अनिर्दशाहे पक्वान्नं नियोगाद्यस्तु भुक्तवान्।
कृमिर्भूत्वा स देहान्ते तद्विष्ठामुपजीवति॥

द्वादशमासान् द्वादशार्द्धमासान् वा अनश्नन् संहिताम‍धीयानः पूतोभवतीति विज्ञायते। ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमाशौचं सद्यःशौचमिति गौतमः। देशान्तरस्थे प्रेते ऊर्द्ध्वं दशाहाच्चैकरात्रमाशौचम्। आहिताग्निश्चेत् प्रवसन् म्रियते पुनःसंस्कारं कृत्वा शववच्छौच

मिति गौतमः यूपयनिश्मशानरजस्वलासूतिकाशुचीनुपस्पृश्य सशिरा अभ्युपेयादपः ।

इति वाशिष्ठे धर्मशास्त्रे चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

अस्वतन्त्रा स्त्री पुरुषप्रधाना अनग्निरनुदक्या च अनृतमिति विज्ञायते । अथाप्युदाहरन्ति ।

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
पुत्राश्च स्थविरे भावे न स्त्री स्वातन्त्र्य मर्हति ॥
तस्या भर्त्तुरभिचार उक्तः प्रायश्चित्तरहस्येषु ।
मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥

त्रिरात्रं रजस्वलाऽशुचिर्भवति सा नाञ्ज्यात् नाभ्यञ्ज्यात् नाप्सुस्नायात् अधःशयीत दिवा न स्वप्यात् नाग्निं स्पृशेत् न रज्जुं प्रसृजेत् न दन्तान् धावयेत् न मांसमश्नीयात् न ग्रहान् निरीक्षेत न हसेत् न किञ्चिदाचरेत् नाञ्जलिना जलं पिबेत् न खर्व्वेण न लोहितायसेन वा । विज्ञायते हीन्द्रस्त्रिशीर्षाणं त्वाष्ट्रं हत्वा पाप्मना गृहीतो मन्यत इति । तं सर्व्वाणि भूतान्यभ्याक्रोशन् भ्रूणहन् भ्रूणहन् भ्रूणहन्निति । स स्त्रिय उपाधावत् । अस्यै मे ब्रह्महत्यायै तृतीयं भागं गृह्णीतेति गत्वैवमुवाच । ता अब्रुवन् किं नोऽभूदिति । सोऽब्रवीद्वरं वृणीध्वमिति । ता अब्रुवन्नृतौ प्रजां विन्दामह इति कामं मा विजानीमोऽलम्भवाम इति यथेच्छया आप्रसवकालात् पुरुषेण सह मैथुनभावेन सम्भवाम इति चैषोऽस्माकं वरस्तथे-

न्वेणोक्तास्ताः प्रतीजगृहुस्तृतीयं भ्रूणहत्यायाः । सैषा भ्रूणहत्या मासि मास्याविर्भवति । तस्माद्रजस्वलान्नं नाश्नीयात् । अतश्च भ्रूणहत्याया एवैतद्रूपं प्रतिमास्यान्ते कञ्चुकमिव। तदाहुर्ब्रह्मवादिनः । अञ्जनाभ्यञ्जनमेवास्या न प्रतिग्राह्यं तद्धि स्त्रियोऽन्नमिति तस्मात्तस्यास्तत्र नच मन्यन्ते आचारा याश्च योषित इति । सेयमुपयाति ।

उदक्यास्त्वासते तेषां येच केचिदनग्नयः ।
गृहस्थाः श्रोत्रियाः पापाः सर्व्वे ते शूद्रधर्म्मिणः ॥
इति वाशिष्ठे धर्मशास्त्रे पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

आचारः परमोधर्मः सर्व्वेषामितिनिश्चयः ।
हीनाचारपरीतात्मा प्रेत्य चेह विनश्यति॥
नैनं तपांसि न ब्रह्म नाग्निहोत्रं न दक्षिणा ।
हीनाचाराश्रितं भ्रष्टं तारयन्ति कथञ्चन ॥

आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः ।
छन्दांस्येनं मृत्युकाले त्यजन्ति नीड़ं शकुन्ता इव जातपक्षाः॥
आचारहीनस्य तु ब्राह्मणस्य वेदाः षड़ङ्गा अखिलाः सपक्षाः ।
कां प्रीतिमुत्पादयितुं समर्था अन्धस्य दारा इव दर्शनीयाः॥
नैनं छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्त्तमानम्
तत्राक्षरे सम्यगधीयमाने पुनाति तद्ब्रह्म यथावदिष्टम् ॥

दुराचारो हि पुरुषो लोके भवति निन्दितः ।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥

आचारात् फलते धर्ममाचारात् फलते धनम्।
आचारात् श्रियमाप्नोति आचारो हन्त्यलक्षणम्॥
सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति॥
आहारनिर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्याः।
वाग्बुद्धिवीर्याणि तपस्तथैव धनायुषी गुप्ततमे च कार्ये॥
उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः।
रात्रौ कुर्याद्दक्षिणास्य एवं ह्यायु र्न रिच्यते॥
प्रत्यग्निं प्रतिसूर्यञ्च प्रतिगां प्रति च द्विजम्।
प्रतिसोमोदकं सन्ध्यां प्रज्ञा नश्यति मेहतः॥
न नद्यां मेहनं कार्य्यं न पथि न च भस्मनि।
न गोमये नवा कृष्टे नोप्ते चेत्रे न शाद्वले॥
छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथा सुखमुखः कुर्य्यात् प्राणबाधभयेषु च॥
उद्धृताभिरद्भिः कार्य्यं कुर्य्यात्स्नानमनुद्धृताभिरपि।
आहरेन्मृत्तिकां विप्रः कूलात् ससिकतां तथा॥
अन्तर्जले देवगृहे वल्मीके मूषिकस्थले।
कृतशौचावशिष्टे च न ग्राह्याः पञ्च मृत्तिकाः॥
एका लिङ्गे करे तिस्र उभाभ्यां द्वे तु मृत्तिके।
पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः॥
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः।
वानप्रस्थस्य त्रिगुणं यतीनान्तु चतुर्गुणम्॥
अष्टौ ग्रासा मुनेर्भक्तं वानप्रस्थस्य षोड़श।
द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः॥

अनड्वान् ब्रह्मचारी च आहिताग्निश्च ते त्रयः।
भुञ्जाना एव सिध्यन्ति नैषां सिद्धिरनश्नताम्॥
तपोदानोपहारेषु व्रतेषु नियमेषु च।
इज्याध्ययनधर्मेषु यो नासक्तः स निष्क्रियः॥
योगस्तपोदमोदानं सत्यं शौचं दया श्रुतम्।
विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्॥
सर्वेव दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः।
प्रतिग्रहे सङ्कुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः॥
असूयकः पिशुनश्चैव कृतघ्नो दीर्घरोषकः।
चत्वारः कर्मचाण्डाला जन्मतश्चापि पञ्चमः॥
दीर्घवैरमसूयाञ्च असत्यं ब्रह्मदूषणम्।
पैशुन्यं निर्दयत्वञ्च जानीयाच्छूद्रलक्षणम्॥
किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम्।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे॥
शूद्रान्नरसपुष्टाङ्गो ह्यधीयानोऽपि नित्यशः।
जुह्वत्वापि यजित्वापि गतिमूर्द्ध्वां न विन्दति॥
शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः।
स भवेच्छूकरो ग्राम्यस्तस्य वा जायते कुले॥
शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति।
यस्यान्नं तस्य ते पुत्रा नच स्वर्गार्हको भवेत्॥
स्वाध्यायाढ्यं योनिमित्रं प्रशान्तं चैतन्यस्थं पापभीरुं बहुज्ञम्।
स्त्रीषुक्षान्तं धार्मिकं गोशरण्यं व्रतैः क्षान्तं तादृशं पात्रमाहुः॥
आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु।
विनश्येत् पात्रदौर्बल्यात्तच्च पात्रं रसाय ते॥

एवं गाश्च हिरण्यञ्च वस्त्रमश्वं महीं तिलान् ।
अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत् ॥

नाङ्गं नखञ्च वादित्रं कुर्य्यात् । नवापोऽञ्जलिना पिवेत् । न पादेन पाणिना वा राजानमपि हन्यात् न जलेन जलम् । नेष्टकाभिः फलानि पातयेत् न फलेन फलम् । न कल्कपुटकोभवेत् । न म्लेच्छभाषां शिक्षेत । अथाप्युदाहरन्ति ।

न पाणिपादचपलो न नेत्रचपलो भवेत् ।
नचाङ्गचपलोविप्र इति शिष्टस्य गोचरः ॥
पारम्पर्य्यागतो येषां वेदः सपरिवृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥
यन्न सन्तं नचासन्तं नाश्रुतं न बहुश्रुतम् ।
न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स ब्राह्मण इति ॥

इति वाशिष्ठे धर्मशास्त्रे षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

चत्वार आश्रमा ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाः । तेषां वेदमधीत्य वेदौ वा वेदान् वा अविशीर्णब्रह्मचर्य्योऽपनिक्षेत्समावशेत् । ब्रह्मचार्य्याचार्य्यं परिचरेदाशरीरविमोक्षात् । आचार्य्ये प्रमीतेऽग्निं परिचरेत् । विज्ञायते हि चाहवाग्निराचार्य्य इति । संयतवाक् चतुर्थषष्ठाष्टमकालभोजी भैक्षमाचरेत् । गुर्वधीनो जटिलः शिखाजटो वा गुरुं गच्छन्तमनुगच्छेदासीनश्चानुतिष्ठेत् शयानश्चासीन उपवसेदाहूता-

शायी सर्वभैक्षं निवेद्य तदनुज्ञया भुञ्जीत। खट्वाशयनदन्तप्रक्षालनाभ्यञ्जनवर्जी तिष्ठेदहनि रात्रावासीत। त्रिः कृत्वोऽभ्युपेयादपोऽभ्युपेयादपः।

इति वाशिष्ठे धर्मशास्त्रे सप्तमोऽध्यायः।

अष्टमोऽध्यायः॥

गृहस्थो विनीतक्रोधहर्षो गुरुणानुज्ञातः स्नात्वा असमानार्षामस्पृष्टमैथुनां यवीयसीं सदृशीं भार्य्यां विन्देत्। पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः। वैवाह्यमग्निमिन्धीत्। सायमागतमतिथिं नावरुन्ध्यात्। नास्यानश्नन् गृहे वसेत्।

यस्य नाश्नाति वासार्थी ब्राह्मणो गृहमागतः।
सुकृतं तस्य यत् किञ्चित् सर्वमादाय गच्छति॥
एकरात्रन्तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्यं हि स्थितिर्यस्मात्तस्मादतिथिरुच्यते॥
नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा।
काले प्राप्ते अकाले वा नास्यानश्नन् गृहे वसेत्॥

श्रद्धाशीलोऽस्पृहयालुः। अलमग्न्याधेयाय नानाहिताग्निः स्यादलञ्च सोमपानाय नासोमयाजी स्यात्। युक्तः स्वाध्याये प्रजनने यज्ञे च गृहेष्वभ्यागतं प्रत्युत्थानासनशयनवाक्सूनृताभिर्मानयेत्। यथाशक्ति चान्नेन सर्वभूतानि।

गृहस्थएव यजते गृहस्थस्तप्यते तपः।

चतुर्णामाश्रमाणान्तु गृहस्थस्तु विशिष्यते ॥
यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम् ।
एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥
यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षुकाः ॥
नित्योदकी नित्ययज्ञोपवीती
नित्यस्वाध्यायी पतितान्नवर्जी ।
ऋतौ गच्छन् विधिवच्च जुह्वन् ब्राह्मण-
श्च्यवते ब्रह्मलोकात् ब्रह्मलोकादिति ॥

इतिवाशिष्ठे धर्मशास्त्रेऽष्टमोऽध्यायः ॥

नवमोऽध्यायः ।

वानप्रस्थोजटिलश्चीराजिनवासा ग्रामञ्च न प्रविशेत् । न फालकृष्टमधितिष्ठेत् । अकृष्टं मूलफलं सञ्चिन्वीत । ऊर्द्धरेताः क्षमाश्रयः । मूलफलभैक्षेणाश्रमागतमतिथिमर्च्चयेत् । दद्यादेव न प्रतिगृह्णीयात् । त्रिषवणमुदकमुपस्पृशेत् । श्रावणकेनाग्निमाधायाहिताग्निः स्याद्वृक्षमूलिक ऊर्द्धं षड्भ्यो मासेभ्योऽनग्निरनिकेतः । दद्याद्देवपितृमनुष्येभ्यः । स गच्छेत् स्वर्गमानन्त्यमानन्त्यम् ॥

इति वाशिष्ठे धर्मशास्त्रे नवमोऽध्यायः ॥

दशमोऽध्यायः ।

परिव्राजकः सर्वभूताभयदक्षिणां दत्त्वा प्रतिष्ठेत् अथाप्युदाहरन्ति ॥

अभयं सर्वभूतेभ्योदत्त्वा चरति योद्विजः।
तस्यापि सर्वभूतेभ्यो न भयं जातु विद्यते॥
अभयं सर्वभूतेभ्यो दत्त्वा यद्भुवि वर्त्तते।
हन्ति जातानजातांश्च प्रतिगृह्णाति यस्य च॥
संन्यसेत् सर्वकर्माणि वेदमेकं न संन्यसेत्।
वेदसन्न्यासतः शूद्रस्तस्माद्वेदं न संन्यसेत्॥
एकाक्षरं परं ब्रह्म प्राणायमः परन्तपः।
उपवासात् परं भैक्षं दया दानाद्विशिष्यते॥

मुण्डोऽममत्वपरिग्रहः सप्तागाराण्यसङ्कल्पितानि चरेद्भैक्षं विधूमे सन्नमुषले एकशाटीपरिहितोऽजिनेन वा गोप्रलूनैस्तृणैर्वेष्टितशरीरः स्थण्डिलशाय्यनित्यां वसतिं वसेत् ग्रामान्ते देवगृहे शून्यागारे वृक्षमूले वा मनसा ज्ञानमधीयानः। अरण्यनित्यो न ग्राम्य पशूनां सन्दर्शने विहरेत्। अथाप्युदारन्ति॥

अरण्यनित्यस्य जितेन्द्रियस्य सर्वेन्द्रियप्रीतिनिवर्त्तकस्य।
अध्यात्मचिन्तागतमानसस्य ध्रुवा ह्यनावृत्तिरपेक्षकस्य॥
अव्यक्तलिङ्गोऽव्यक्ताचारो ऽनुन्मत्तउन्मत्तवेशः।
अथाप्युदाहरन्ति॥
न शब्दशास्त्राभिरतस्य मोक्षो नचापि लोके ग्रहणे रतस्य।
न भोजनाच्छादनतत्परस्य नचापि रम्यावसथप्रियस्य॥
नचोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
अनुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः॥

न कुड्यां नोदके सङ्गे न चैले न त्रिपुष्करे ।
नागारे नासने नान्ते यस्य वै मोक्षवित्तमः ॥

ब्राह्मणकुले वा यल्लभेत्तद्भुञ्जीत सायं मधुमांससर्पिर्वर्जम् । यतीन् साधुन् वा गृहस्थान् सायं प्रातश्च तर्पयेत् । ग्रामे वा वसेदजिह्मोऽशरणोऽसङ्कुसुकः । नचेन्द्रियसंयोगं कुर्वीत केनचित् । उपेक्षकः सर्वभूतानां हिंसानुग्रहपरिहारेण । पैशुन्यमत्सराभिमानाहङ्काराश्रद्धानार्जवात्मस्तवपरगर्हादम्भलोभमोहक्रोधासूयाविवर्जनं सर्वाश्रमिणां धर्मिष्ठो यज्ञोपवीत्युदकमण्डलुहस्तः शुचिर्ब्राह्मणोवृषलान्नपानवर्जी न हीयते ब्रह्मलोकात् ॥

इति वाशिष्ठे धर्मशास्त्रे दशमोऽध्यायः ॥

एकादशोऽध्यायः ।

षट् कर्मी गृहदेवताभ्योबलिं हरेत् । श्रोत्रियायान्नं दत्त्वा ब्रह्मचारिणे-वानन्तरं पितृभ्योदद्यात्ततोऽतिथिं भोजयेत् स्वेष्टायासमानुपूर्व्येण स्वगृह्याणां कुमारबालवृद्धतरुण प्रभृतीं स्ततोऽपरान् गृह्यान् श्वचाण्डाल पतितवायसेभ्योभूमौ निर्वपेत शूद्रेभ्यर्उच्छिष्टं वा दद्याच्छेषं यती भुञ्जीत सर्वोपयोगेन पुनःपाको यदि निवृत्ते वैश्वदेवेऽतिथिरागच्छेद्विशेषेणास्मात्रन्नं कारयेद्विजायते ऽग्निं वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणोगृहम् । तस्मादपयानमन्यत्र वर्षाभ्यस्तां हि शान्तिजनाविद्भिरिति तं भोजयित्वोपसीतासीमान्तादनुव्रजेदनुज्ञाताद्वा । परपक्षाजर्द्धं चतुर्थ्यां पितृभ्योदद्यात् पूर्वेद्यु र्ब्राह्मणान्

संनिपात्य यतीन् गृहस्थान् साधून्वा परिणतवयसोऽविकर्मस्थान् श्रोत्रियान् शिष्यानन्तेवासिनः शिष्यानपि गुणवतो भोजयेद्दिलग्नशुक्लविश्टधिश्यावदन्तकुष्ठिकुनखिवर्जम्। अथाप्युदाहरन्ति॥

अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः।
अदूष्यन्तं यमः प्राह पङ्क्तिपावन एव सः॥
श्राद्धेनोद्वासनीयानि उच्छिष्टान्यादिनक्षयात्।
खे पतन्ति हि या धारास्ता पिबन्त्यकृतोदकाः॥
उच्छिष्टेन प्रपुष्टास्ते यावन्नास्तमितो रविः।
क्षीरधारास्ततोयान्त्यक्षयाः सञ्चरभागिनः॥
प्राक्संस्कारप्रमीतानां प्रवेशनमिति श्रुतिः।
भागधेयं मनुः प्राह उच्छिष्टोच्छेषणे उभे॥
उच्छेषणं भूमिगतं विकिरेल्लेपसोदकम्।
अनुप्रेतेषु विसृजेदप्रजानामनायुसाम्॥
उभयोः शाखयोर्मुक्तं पितृभ्योऽन्नं निवेदितम्।
तदन्तरं प्रतीक्षन्ते ह्यसुरा दुष्टचेतसः॥
तस्मादशून्यहस्तेन कुर्य्यादन्नमुपागतम्।
भोजनं वा समालभ्य तिष्ठतोच्छेषणे उभे॥
द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा।
भोजयेत् सुसमृद्धोऽपि न प्रसज्येत विस्तरे॥
सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदः।
पञ्चैतान् विस्तरो हन्ति तस्मात्तं परिवर्जयेत्॥
अपि वा भोजयेदेकं ब्राह्मणं वेदपारगम्।
शुभशीलोपसंपन्नं सर्वलक्षणवर्जितम्॥

यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् ।
अन्नं पात्रे समुद्धृत्य सर्व्वस्य प्रकृतस्य तु ॥
देवतायतने कृत्वा ततः श्राद्धं प्रवर्त्तते ।
प्रास्येदग्नौ तदन्नन्तु दद्याद्वा ब्रह्मचारिणे ॥
यावदुष्णं भवत्यन्नं यावदश्नन्ति वाग्यताः ।
तावद्धि पितरोऽश्नन्ति यावन्नोक्ता हविर्गुणाः ॥
हविर्गुणा न वक्तव्याः पितरोभावतर्पिताः ।
पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ॥
नियुक्तस्तु यदा श्राद्धे दैवे तन्तु समुत्सृजेत् ।
यावन्ति पशुरोमाणि तावन्नरकमृच्छति ॥
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
त्रीणि चात्र प्रशंसन्ति शौचक्रोधमत्वराम् ॥
दिवसस्याष्टमे भागे मन्दीभवति भास्करः ।
स कालः कुतपोनाम पितॄणां दत्तमक्षयम् ॥
श्राद्धं दत्त्वा च भुक्त्वा च मैथुनं योऽधिगच्छति ।
भवन्ति पितरस्तस्य तन्मासं रेतसोभुजः ॥
यतस्ततोजायते च दत्त्वा भुक्त्वा च पैतृकम् ।
न स विद्यामवाप्नोति क्षीणायुश्चैव जायते ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
उपासते सुतं जातं शकुन्ताइव पिप्पलम् ॥
मधुमांसैश्च शाकैश्च पयसा पायसेन वा ।
अधनो दास्यति श्राद्धं वर्षासु च मघासु च ॥
सन्तानवर्द्धनं पुत्त्रं तृप्यन्तं पितृकर्मणि ।
देवब्राह्मणसम्पन्नमभिनन्दन्ति पूर्व्वजाः ॥

नन्दन्ति पितरस्तस्य सुवृष्टैरिव कर्षकाः।
यद्गयास्थो ददात्यन्नं पितरस्तेन पुत्त्रिणः॥

श्रावण्याग्रहायण्योश्चान्वष्टकायाञ्च पितृभ्योदद्याद्द्रव्यदेशब्राह्मणसन्निधाने वा कालनियमोऽवश्यं। योब्राह्मणोऽग्निमादधीत दर्शपूर्णमासाग्रयणेष्टिचातुर्मास्यपशुसोमैश्च यजेत। नैयमिकंह्येतदृणं संस्तुतञ्च विज्ञायते हि त्रिभिर्ऋणैर्ऋणवान् ब्राह्मणोजायते यज्ञेन देवेभ्यः प्रजया पितृभ्योब्रह्मचर्य्येण ऋषिभ्यः। इत्येष वा अनृणो यज्वा यः पुत्त्री ब्रह्मचर्य्यवानिति गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यम्। पालाशोदण्डो बैल्वोवा ब्राह्मणस्य नैयग्रोधः क्षत्रियस्य वा औडुम्बरोवा वैश्यस्य। कृष्णाजिनमुत्तरीयं ब्राह्मणस्य रौरवं क्षत्रियस्य गव्यं वस्ताजिनं वैश्यस्य। शुक्लमाहतं वासोब्राह्मणस्य माञ्जिष्ठं क्षत्रियस्य हारिद्रं कौशेयं वैश्यस्य सर्वेषां वा तान्तवमरक्तम्। भवत्पूर्वां ब्राह्मणोभिक्षां याचेत भवन्मध्यां राजन्योभवदन्त्यां वैश्यस्य। आषोड़शाद्ब्राह्मणस्यानतीतः काल आद्वाविंशात् क्षत्रियस्याचतुर्विंशाद्वैश्यस्यातऊर्द्धं पतितसावित्रीका भवन्ति।

नैनानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्विवाहयेयुः।
पतितसावित्रीकउद्दालकव्रतञ्चरेत्॥

द्वौ मासौ यावकेन वर्त्तयेन्मासं माक्षिकेणाष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमभक्षोऽहोरात्रमेवोपवसेत्। अश्वमेधावभृथंगच्छेद्व्रात्यस्तोमेन वा यजेत्।

इति वाशिष्ठे धर्मशास्त्रे एकादशोऽध्यायः।

द्वादशोऽध्यायः।

अयातः स्नातकव्रतानि। स न कञ्चिद्याचेतान्यत्र राजान्तेवासिभ्यः क्षुधापरीतस्तु किञ्चिदेव याचेत कृतमकृतं वा क्षेत्रं गामजाविकं सन्ततं हिरण्यं धान्यमन्नं वा नतु स्नातकः क्षुधावसीदेदित्युपदेशो न नद्यां स सहसा संविशेन्न रजस्वलायामयोग्यायाम्। न कुलं कुलं स्याद्वत्सन्तीं विततां नातिक्रमेन्नोद्यन्तमादित्यं पश्येन्नादित्यं तपन्तं नाप्सु मूत्रपुरीषे कुर्य्यान्न निष्ठीवेत् परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरन्तर्द्धाय मूत्रपुरीषे कुर्य्यादुदङ्मुखश्चाहनि नक्तं दक्षिणामुखः सन्ध्यामासीतोत्तरामुदाहरन्ति।

स्नातकानान्तु नित्यं स्यादन्तर्व्वासस्तथोत्तरम्।
यज्ञोपवीते द्वे यष्टिः सोदकश्च कलण्डलुः॥
अप्सु पाणौ च काष्ठे च कथितं पावकं शुचि।
तस्मादुदकपाणिभ्यां परिमृज्यात् कमण्डलुम्॥
पर्य्यग्निकरणं ह्येतन्मनुराह प्रजापतिः।
कृत्वाचावश्यकार्य्याणि आचामेच्छौचवित्ततइति॥

प्राङ्मुखोऽन्नानि भुञ्जीत तूष्णीं साङ्गुष्ठं कृत्स्नग्रासं ग्रसेत न च मुखशब्दं कुर्य्यादृतुकालाभिगामी स्यात् पर्ववर्जं स्वदारे वा तीर्थमुपेयदथाप्युदाहरन्ति।

यस्तु पाणिगृहीताया आस्ये कुर्वीत मैथुनम्।
भवन्ति पितरस्तस्य तन्मासं रेतसोभुजः।
या स्यादनतिचारेण रतिसाधर्म्यसंश्रिता॥

अपिच पावकोऽपि ज्ञायते। अद्य श्वोवा विजनिष्यमाणाः

पतिभिः सह शयन्तइति स्त्रीणामिन्द्रदत्तोवरः। उच्च वृक्ष-मारोहेन्न कूपमवरोहेन्नाग्निं मुखेनोपधमेन्नाग्निं ब्राह्मणं चान्तरेण व्यपेयान्नाग्न्योर्ब्राह्मणयोरनुज्ञाप्य वा। भार्य्यया सह नाश्नीयादवीर्य्यवदपत्यं भवतीति वाजसनेयके विज्ञायते। नेन्द्रधनुर्नाम्ना निर्द्दिशेन्मणिधनुरितिब्रूयात्। पालाशमास-नपादुके दन्तधावनमिति वर्जयेत्। नोत्सङ्गे भक्षयेदंशो न भुञ्जीत वैणवं दण्डं धारयेद्रुक्मकुण्डले च। न वहिर्मालां धारयेदन्यत्र रुक्ममय्याः सभासमवायांश्च वर्जयेत्। अथाप्यु-दाहरन्ति।

अप्रामाण्यञ्च वेदानामार्षाणाञ्चैव दर्शनम्।
अव्यवस्था च सर्व्वत्र एतन्नाशनमात्मनइति॥

दानाहृतो यज्ञं गच्छेद्यदि व्रजेदधिवृक्षसूर्य्यमध्वानं न प्रतिपद्यते नावञ्च सांशयिकीं बाहुभ्यां न नदीन्तरेदुत्थायाप-ररात्रमधीत्य न पुनः प्रतिसंविशेत्। प्राजापत्ये मुहूर्त्ते ब्राह्मणः स्वनियमाननुतिष्ठेदिति।

इति वाशिष्ठे धर्मशास्त्रे द्वादशोऽध्यायः।

त्रयोदशोऽध्यायः।

अथातः स्वाध्यायस्योपाकर्म श्रावण्यां पौर्णमास्यां प्रौष्ठ-पद्यां वाग्निमुपसमाधाय कृता धानो जुहोति देवेभ्यश्छन्दोभ्य-श्चेति। ब्राह्मणान् स्वस्तिवाच्य दधि प्राश्य तत उपांशु कुर्व्वीत अर्द्धपञ्चममासानर्द्धषष्ठानत ऊर्द्ध्वं शुक्लपक्षेष्वधीयीत। कामन्तु वेदाङ्गानि। तस्यानध्यायाः सन्ध्यास्तमिते स्युस्तत्र

शवे दिवाकीर्त्ये नगरेषु कामं गोमयपर्युपिते परिलिखिते वा श्मशानान्ते शयानस्य श्राह्निकस्य। मानवञ्चात्र श्लोकमुदाहरन्ति।

फलान्यापस्तिलान् भक्ष्यमथान्यच्छ्राद्धिकं भवेत्।
प्रतिगृह्याप्यनध्यायः पाण्यास्या ब्राह्मणाः स्मृता इति॥

धावतः पूतिगन्धिप्रसृतेरिरिणस्थमारूढस्य नावि सेनायाञ्च भुक्त्वा चार्द्रपाणौ वाणशब्दे चतुर्दश्याममावास्यायामष्टम्यामष्टकासु प्रसारितपादोपस्थस्योपाश्रितस्य गुरुसमीपे मिथुनव्यपेतायां वाससा मिथुनव्यपेते नानिर्मुक्ते। न ग्रामान्तेच्छर्दितस्य मूत्रितस्योच्चरितस्य यजुषाञ्च सामशब्दे वाजीर्णे निर्घातभूमौ च। न चन्द्रसूर्य्योपरागेषु दिङ्नादपर्व्वतनादकम्पप्रपातेषूपलरुधिरपांशुवर्षेष्वाकालिकम्। उल्काविद्युत्सज्योतिषमपर्त्वाकालिकं वा। आचार्य्ये च प्रेते त्रिरात्रमाचार्य्यपुत्त्रशिष्यभार्य्यास्वहोरात्रम्। ऋत्विग्योनिसम्बन्धेषु च। गुरोः पादोपसंग्रहणं कार्य्यं ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेद्दू ये चैव पादग्राह्यास्तेषां भार्य्या गुरोश्च माता पितरौ यो विद्यादभिवन्दितुमहमयमस्मीरितिब्रूयादूयश्च न विद्यात् प्रत्यभिवादं नाभिवदेत्। पतितः पिता परित्याज्यो माता तु पुत्त्रे न पतति। अथाप्युदाहरन्ति।

उपाध्यायाद्दशाचार्य्य आचार्य्याणां शतं पिता।
पितुर्द्दशशतं माता गौरवेणातिरिच्यते॥
भार्य्याः पुत्त्राश्च शिष्याश्च संसृष्टाः पापकर्मभिः।
परिभाष्य परित्याज्याः पतितो योऽन्यथा भवेत्॥

ऋत्विगाचार्य्यावयाजकानध्यापकौ हेयावन्यत्र हानात्

पतितो नान्यत्र पतितो भवतीत्याहुरन्यत्र स्त्रियाः सा हि परगामिनी तद्रिक्थमुपेयात्।

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिरिष्यते।
गुरुवद्गुरुपुत्त्रस्य वर्तितव्यमितिश्रुतिः॥

शास्त्रं वस्त्रं तथान्नानि प्रतिग्राह्याणि ब्राह्मणस्य। विद्याविजयजः सम्बन्धः कर्म च मान्यं पूर्वः पूर्वो गरीयान्। स्थविरबालातुरभारिकचक्रवतां पन्थाः समागमे परस्मै देयो राजस्नातकयोः समागमे राज्ञा स्नातकाय देयः सर्वैरेव वा उत्तमाय। तृणभूम्यग्न्युदकवाक्सूनृतानसूयाः सत्र गृहे नोच्छिद्यन्ते कदाचन कदाचनेति।

इति वाशिष्ठे धर्मशास्त्रे त्रयोदशोऽध्यायः।

चतुर्दशोऽध्यायः।

अथातो भोज्याभोज्यञ्च वर्णयिष्यामः। चिकित्सकमृगयुपुंश्चलीदण्डिकस्तेनाभिशस्तषण्डपतितानामभोज्यं कदर्यदीक्षितबद्धातुरसोमविक्रयितक्षकरजकशौण्डिकसूचकवार्द्धुषिकचर्मावकृत्तानां शूद्रस्य चायुधस्योपपत्तेः यश्चोपपतिं मन्यते यश्च गृहीततद्धेतुर्वध्य बधार्हं नोपहन्यात् कौ बन्धमोचौ इति चाभिक्रुश्येत् गणान्नं गणिकान्नमथाप्युदाहरन्ति।

नाश्नन्ति श्वपतेर्देवा नाश्नन्ति वृषलीपतेः।
भार्य्याजितस्य नाश्नन्ति यस्य चोपपतिर्गृहे इति॥

एधोदकयवसकुशलाजाभ्युद्यतपानावसथसफरिप्रियङ्गुस्रजमधुमांसानि नैतेषां प्रतिगृह्णीयादथाप्युदाहरन्ति।

गुर्वर्थंदारमुज्जिहीषन्नर्चिष्यन् देवतातिथीन् ।
सर्वतः प्रतिगृह्णीयान्नतु तृप्येत् स्वयं तत इति ॥

न मृगयोरिषुचारिणः परिवर्जमन्नं विज्ञायते ह्यगस्त्यो वर्ष-साहस्रिके सत्रे मृगयाञ्चकार तस्यासंस्तु रसमयाः पुरो-डाशा मृगपक्षिणां प्रशस्तानामपि ह्यत्र प्राजापत्याञ्श्लोका-नुदाहरन्ति ।

उद्यतामाहृतां भिक्षां पुरस्तादप्रचोदिताम् ।
भोज्यां प्रजापतिर्मेने अपि दुष्कृतकारिणः ॥
श्रद्दधानैर्न भोक्तव्यं चौरस्यापि विशेषतः ।
नत्वेव बहुधा तस्य यावानपहृता भवेत् ॥
न तस्य पितरोऽश्नन्ति दशवर्षाणि पञ्च च ।
न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥
चिकित्सकस्य मृगयोः शल्यहस्तस्य पाशिनः ।
षण्डस्य कुलटायाश्च उद्यतापि न गृह्यत इति ॥

उच्छिष्टमगुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतञ्च । यद-शनं केशकीटोपहतञ्च । कामन्तु केशकीटानुद्धृत्याद्भिः प्रोक्ष्य भस्मनावकीर्य्य वाचा च प्रशस्तमुपभुञ्जीतापि ह्यन्नम् । प्राजा-पत्याञ्श्लोकानुदाहरन्ति ।

त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् ।
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥
देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च ।
काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विसर्जयेत् ॥
तस्मात्तदन्नमुद्धृत्य शेषं संस्कारमर्हति ।

द्रवाणां प्लावनेनैव घनानां चरणेन तु ॥

पाकेन मुखसंस्पृष्टं शुचिरेव हि तद्भवेत्।

अन्नं पर्य्युषितं भावदुष्टं हृल्लेखं पुनः सिद्धमामस्वजीशपक्वञ्च कामन्तु दध्नाद्घृतेन चाभिघारितमुपभुञ्जीतापि ह्यन्नम्। प्राजापत्यानुश्लोकानुदाहरन्ति।

हस्तदत्तास्तु ये स्नेहा लवणं व्यञ्जनानि च।

दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते च किल्बिषमिति ॥

लशुनपलाण्डुकेसुकटञ्जनश्लेष्मातकवृक्षनिर्यासलोहिताव्रश्चनाश्वखकाकावलीढशूद्रोच्छिष्टभोजनेषु कृच्छ्रातिकृच्छ्र इतरेऽप्यन्यत्र मधुमांसफलविकर्षेष्वग्राम्यपश्वविषयः सन्धिनीक्षीरमवत्साक्षीरं गोमहिष्यजातरोमानिर्दशाहानामनामन्त्र्यं नाव्युदकमपूपधानाकरम्भशक्तुचरकतैलपायसशाकानिलशुक्तानि वर्जयेदन्यांश्च क्षीरयवपिष्टवीरान्। श्वाविच्छल्लकशशकच्छपगोधाः पञ्चनखा नाभक्ष्याः अनुष्ट्राः पशूनामन्यतोदतश्च मत्स्यानां वा वेहगवयशिशुमारनक्रकुलीरा विकृतरूपाः सर्पशीर्षाश्च गौरगवयशलभाश्चानुद्दिष्टास्तथा धेन्वनडुहौ मेध्यौ वाजसनेयने। खड्गे तु विवदन्त्यग्राम्यशूकरे च। शकुनानाञ्च विशुविविष्किरजालपादाः कलविङ्कप्लवहंसचक्रवाकभासमद्गुटिट्टिभाटबान्धनकञ्जरा दार्व्वाघाटाश्टकवैलातकहारितखञ्जरीटग्राम्यकुक्कुटशुकसारिकाकोकिलक्रव्यादा ग्रामाचारिणश्च ग्रामाचारिणश्चेति।

इति वाशिष्ठे धर्मशास्त्रे चतुर्दशोऽध्यायः।

पञ्चदशोऽध्यायः।

शोणितशुक्रसम्भवः पुरुषो मातापितृनिमित्तकः। तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा सहि सन्तानाय पूर्वेषाम्। न स्त्री दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुः। पुत्रं प्रतिग्रहीष्यन् बन्धू-नाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिर्हुत्वा दूरे-बान्धवमसन्निकृष्टमेव। सन्देहे चोत्पन्ने दूरे बान्धवं शूद्रमिव स्थापयेत्। विज्ञायते ह्येकेन बहून् जायत इति। तस्मिंश्चेत् प्रतिगृहीते औरसः पुत्र उत्पद्यते चतुर्थभागभागी स्यात्। यदि नाभ्युदयिके युक्तः स्याद्वेदविप्लविनः सव्येन पादेन प्रवृ-त्ताग्रान् दर्भान् लोहितान् वोपस्तीर्य्य पूर्णं पात्रमस्मै निनये-न्निनेतारश्चास्य प्रकीर्य्य केशान् ज्ञातयोऽन्वारभेरन्नपसव्यं कृत्वा गृहेषु स्वैरमापाद्येरन्नत ऊर्द्ध्वं तेन सहधर्ममीयुस्तद्धर्माणस्त-द्धर्मापन्नाः। पतितानान्तु चरितव्रतानां प्रत्युद्धारोऽथाप्यु-दाहरन्ति।

अग्न्यभ्युद्धरतां गच्छेत् क्रीडन्ति च हसन्ति च।

यश्चोत्पातयतां गच्छेच्छोचन्नित्याचार्य्यमातृपितृहन्तार-स्तत्प्रसादाद्भायाद्वा एषा प्रत्यापत्तिः पूर्णाब्दात् प्रवृत्ताद्वा काञ्चनं पात्रं माहेयं वा पूरयित्वापोहिष्ठाभिरेव षड्भिर्ऋ-ग्भिः सर्वत्र वाभिरिक्तस्य प्रत्युद्धारपुत्रजन्मना व्याख्यातः।

इति वाशिष्ठे धर्मशास्त्रे पञ्चदशोऽध्यायः।

षोड़शोऽध्यायः ।

अथ व्यवहाराः। राजमन्त्री सदःकार्य्याणि कुर्य्याद्द्वयोर्विवदमानयोरन्न पद्यान्तरं गच्छेद् यथासनमपराधोह्यन्ते नापराधः। समः सर्वेषु भूतेषु यथामनमपराधोह्याद्यवर्णयोर्विधानतः सम्पन्नतामाचरेत्। राजा बालानामप्राप्तव्यवहाराणां प्राप्तकाले तु तद्वत्।

लिखितं साक्षिणोभुक्तिः प्रमाणं त्रिविध स्मृतम्।
धनस्वीकरणं पूर्वं धनी धनमवाप्नुयादिति॥

मार्गक्षेत्रयोर्विसर्गे तथा परिवर्त्तनेन ऋणग्रहेष्वर्थान्तरेषु त्रिपादमात्रम्। गृहक्षेत्रविरोधे सामन्तप्रत्ययः सामन्तविरोधेऽपि लेख्यप्रत्ययः प्रत्यभिलेख्यविरोधे ग्रामनगरवृद्धश्रेणिप्रत्ययोऽथाप्युदाहरन्ति।

य एकं क्रीतमाधेयमन्वाधेयं प्रतिग्रहम्।
यज्ञादुपगमोवोर्णा स्तथा धूमशिखा स्वामी इति॥

तत्र भुक्ते दशवर्षमेवोदाहरन्ति।

आधिः सीमाधिकश्चैव निक्षेपोपनिधिः स्त्रियः।
राजस्वं श्रोत्रियद्रव्यं न राजा दातुमर्हतीति॥

तत्र सम्भोगेन ग्रहीतव्यम्। गृहिणां द्रव्याणि राजगामीनि भवन्ति। तथा राजा मन्त्रिभिः सह नागरैश्च कार्य्याणि कुर्य्यादसौ वा राजा श्रेयान् वसुपरिवारः स्याद्गृहस्थपरिवारं वा राजा श्रेयानगृहस्थपरिवारः स्यान्न गृहीगृहस्थपरिवारः स्यान्न परिवाराद्दोषाः प्रादुर्भवन्ति: स्तेयद्वारविनाशनं तस्मात् पूर्वमेव परिवारं वर्जयेन्। अथ साक्षिणः। श्रोत्रिया

रूपवान् शीलवान् पुण्यवान् सत्यवान् साक्षिणः सर्व्व एव वा स्त्रीणान्तु साक्षिणः स्त्रियः कुर्य्यात् द्विजानां सदृशा द्विजाः शूद्राणां सन्तः शूद्राश्च अन्त्यानामन्त्याः। अथाप्युदाहरन्ति।

प्रातिभाव्यं वृथादानमाक्षिकं सौरिकञ्च यत्।
दण्डशुल्कावशिष्टञ्च न पुत्रो दातुमर्हतीति॥
ब्रूहि साक्षिन्! यथातत्त्वं लम्बन्ते पितरस्तव।
तव वाक्यमुदीर्य्यन्तमुत्पतन्ति पतन्ति च॥
नग्नोमुण्डः कपाली च भिक्षार्थं क्षुत्पिपासितः।
अन्धः शत्रुकुले गच्छेद् यस्तु साक्ष्यनृतं वदेत्॥
पञ्च कन्यानृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥
व्यवहारे मृते दारे प्रायश्चित्ते कुलस्त्रियः।
तेषां पूर्वपरिच्छेदाच्छेद्यन्ते वा यवादिभिः॥

उद्वाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे।
विप्रस्य चार्थे अनृतं वदेयुः पञ्चानृतान्याहुरपातकानि॥
स्वजनस्य अर्थे यदिवार्थहेतोः पक्षाश्रयेणैव वदन्ति कार्यम्।
वैशब्दवादं स्वकुलानपूर्व्वान् स्वर्गस्थितान् तानपि पातयन्त्यपि॥

इति वाशिष्ठे धर्मशास्त्रे षोड़शोऽध्यायः।

सप्तदशोऽध्यायः।

ऋणामस्मिन् सन्नयति अमृतत्वञ्च गच्छति।
पितापुत्त्रस्य जातस्य पश्येच्च जीवतोमुखम्।
अनन्ताः पुत्रिणां लोका नापुत्रस्य लोकोऽस्तीति श्रूयते॥

प्रजाः सन्त्वपुत्रिण इत्यपि शापः। प्रजाभिरग्नेऽमृतत्वमश्यामित्यपि नियमो भवति॥

पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपमिति॥

क्षेत्रिणः पुत्रो जनयितुः पुत्र इति विवदन्ते। तत्रोभयथाप्युदाहरन्ति॥

यद्यन्यो गोषु वृषभो वत्सान् जनयते सुतान्।
गोमिनामेव ते वत्सा मोघं स्कन्दनमार्षभमिति॥

अप्रमत्ता रक्षत तु वैनं मा च क्षेत्रे परे बीजानि वाप्सौ जनयितुः पुत्रो भवति। सम्पराये मोघं रेतोऽकुरुत तन्तुमेतमिति।

बह्वीनामेकजातानामेकश्चेत् पुत्रवान्नरः।
सर्वे ते तेन पुत्रेण पुत्रवन्त इति श्रुतिः॥

बह्वीनां द्वादश ह्येव पुत्राः पुराणदृष्टाः स्वयमुत्पादितः स्वक्षेत्रे संस्कृतायां प्रथमः तदलाभे नियुक्तायां क्षेत्रजो द्वितीयः तृतीयः पुत्रिका विज्ञायते अभ्रातृका पुंसः पितॄनभ्येति प्रतीचीनं गच्छति पुत्रत्वम्। श्लोकः॥

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥

पौनर्भवश्चतुर्थः पुनर्भूः कौमारं भर्त्तारमुत्सृज्यान्यैः सह चरित्वा तस्यैव कुटुम्बमाश्रयति सा पुनर्भूर्भवति। या च क्लीबं पतितमुन्मत्तं वा भर्त्तारमुत्सृज्यान्यं पतिं विन्दते मृते वा सा पुनर्भूर्भवति। कानीनः पञ्चमो या पितुर्गृहेऽसंस्कृता कामादुत्पादयेन्मातामहस्य पुत्रो भवतीत्याहुः। अथाप्युदाहरन्ति॥

अभ्रात्ता दुहिता यस्य पुत्त्रं विन्दति तुल्यतः।
पुत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनमिति॥

गूढे च गूढोत्पन्नः षष्ठ इत्येते दायादा बान्धवास्त्रातारो-महतोभयादित्याहुः। अथादायादास्तत्र सहोढ एव प्रथमो या गर्भिणी संस्क्रियते तस्यां जातः सहोढः पुत्रोभवति। दत्तकोद्वितीयो यं मातापितरौ दद्याताम्। क्रीतस्तृतीयस्त-च्छुनःशेफेन व्याख्यातं हरिश्चन्द्रोहवै राजा सोजीगर्त्तस्य सौपवत्सैः पुत्रं विक्राय्य स्वयं क्रीतवान्। स्वयमुपागतश्चतुर्थः तच्छुनः शेफेन व्याख्यातं शुनः शेफो हवै यूपे नियुक्तो देवता-स्तुष्टाव तस्येह देवताः पाशं विमुमुचुस्तमृत्विजऊचुर्ममैवायं पुत्रो ऽस्त्विति तानाह न सम्पेदे ते सम्पादयामासुरेष एव यं कामयेत तस्य पुत्रोऽस्त्विति तस्येह विश्वामित्रो होतासीत्तस्य पुत्रत्वमि-याय। अपविद्धः पञ्चमो यं मातापितृभ्यामपास्तं प्रति गृह्णी-यात्। शूद्रापुत्रएव षष्ठोभवतीत्याहुरित्येतेऽदायादा बान्धवाः। अथाप्युदाहरन्ति। यस्य पूर्वेषां वर्णानां न कश्चिद्दायादः स्यादेते तस्यापहरन्ति। अथ भ्रातृणां दायविभागो द्व्यंशं ज्येष्ठोहरेद्गवाश्वस्य चानुसदृशमजावयोर्गृहञ्च कनिष्ठस्य काष्ठंगां यवसं गृहोपकरणानि च मध्यमस्य मातुः पारिणेयं स्त्रियो विभजेरन्। यदि ब्राह्मणस्य ब्राह्मणीक्षत्रियावैश्यासु पुत्राः स्युस्त्र्यंशं ब्राह्मण्याः पुत्रोहरेत् द्व्यंशं राजन्यायाः पुत्रः सममितरे विभजेरन्नन्येन चैषां स्वयमुत्पादितस्यात् द्व्यंशमेव हरेदन्येषान्त्वाश्रमान्तरगताः क्लीबोन्मत्तपतिताश्च भरणम्। क्लीबोन्मत्तानां प्रेतपत्नी षण्मासं व्रतचारिण्यक्षारलवणं भुञ्जा-नाः शयीतोर्द्ध्वं षड्भ्योमासेभ्यः स्नात्वा श्राद्धञ्च पत्ये दत्त्वा

विद्याकर्मगुरुयोनिसम्बन्धान् सन्निपात्य पिता भ्राता वा नियोगं कारयेत्तपसे वोन्मत्तामवशां व्याधितां वा नियुञ्ज्यात् ज्यायसीमपि षोड़शवर्षां नचेदामयाविनी स्यात् प्राजापत्ये मुहूर्त्ते पाणिग्रहणवदुपचारोऽन्यत्र संस्थाप्य वाक्पारुष्याद्दण्ड-पारुष्याच्च ग्रासाच्छादनस्नानलेपनेषु प्राग्यामिनी स्यादनियुक्तायामुत्पन्नउत्पादयितुः पुत्रोभवतीत्याहुः स्याच्चेन्नियोगिनो दृष्टा लोभान्नास्ति नियोगः। प्रायश्चित्तं वाप्युपनियुञ्ज्यादित्येके। कुमार्य्यृतुमती त्रिवर्षाण्युपासीतोर्द्ध्वं त्रिभ्यः वर्षेभ्यः पतिं विन्देत्तुल्यम्। अथाप्युदाहरन्ति॥

पितुः प्रदानात्तु यदाहि पूर्वं कन्या वयो यः समतीत्य दीयते।
सा हन्ति दातारमपीक्षमाणा कालातिरिक्ता गुरुदक्षिणेव॥

प्रयच्छेन्नग्निकां कन्यां ऋतुकालभयात् पिता।
ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति॥

यावच्च कन्यामृतवः स्पृशन्ति
तुल्यैः सकामामभियाच्यमानाम्।
भ्रूणानि तावन्ति हतानि ताभ्यां
मातापितृभ्यामिति धर्मवादः॥

अद्भिर्वाचा च दत्तायां म्रियेताथो वरोयदि।
नच मन्त्रोपनीता स्यात् कुमारी पितुरेव सा॥

यावच्चेदाहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥

पाणिग्रहे मृते बाला केवलं मन्त्रसंस्कृता।
साच त्वक्षतयोनिः स्यात् पुनः संस्कारमर्हतीति।

प्रोषितपत्नी पञ्चवर्षाण्युपासीतोर्द्ध्वं... प्रवसेद्यद्यकामा यथा प्रेतस्य एवञ्च

र्ज्जितव्यं स्यात्। एवं पञ्च ब्राह्मणीप्रजाता चत्वारि राजन्या प्रजाता त्रीणि वैश्याप्रजाता द्वे शूद्राप्रजातां अतऊर्द्धं समानोदकपिण्डजन्मर्षिगोत्राणां पूर्वः पूर्वोगरीयान् न खलु कुलीने विद्यमाने परगामि स्यात्। यस्य पूर्वेषां षण्णां न कश्चिद्दायादः स्यात् सपिण्डाः पुत्रस्थानीया वा तस्य धनं विभजेरंस्तेषामलाभे आचार्य्यान्तेवासिनौ हरेयातां तयोरलाभे राजा हरेत् न तु ब्राह्मणस्य राजा हरेद्ब्रह्मस्वन्तु विषं घोरम्॥

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्त्रपौत्रकमिति॥

त्रैविद्यसाधुभ्यः संप्रयच्छेदिति॥

इति वाशिष्ठे धर्मशास्त्रे सप्तदशोऽध्यायः॥

अष्टादशोऽध्यायः।

शूद्रेण ब्राह्मण्यामुत्पन्नश्चाण्डालो भवतीत्याहुः राजन्यायां वैश्यायामन्त्यावसायी। वैश्येन ब्राह्मण्यामुत्पन्नोरामकोभवति इत्याहुः राजन्यायां पुक्कशः राजन्येन ब्राह्मण्यामुत्पन्नः सूतोभवतीत्याहुः। अथाप्युदाहरन्ति।

च्छिन्नोत्पन्नास्तु ये केचित् प्रातिलोम्यगुणाश्रिताः।
गुणाचारपरिभ्रंशात् कर्मभिस्तान् विजानीयुरिति॥

एकान्तरद्व्यन्तरत्र्यन्तरानुजाता ब्राह्मणक्षत्रियवैश्यैरवच्छिन्ना निषादा भवन्ति। शूद्रायां पारशवः पारयन्नेव जीवन्नेव शवोभवतीत्याहुः शवइति मृताख्या। एतच्छावं यच्छूद्र-

स्तस्माच्छूद्रसमीपे तु नाध्येतव्यं। अथापि यमगीतान् श्लोकानुदाहरन्ति।

श्मशानमेतत् प्रत्यक्षं ये शूद्राः पापचारिणः।
तस्माच्छूद्रसमीपे च नाध्येतव्यं कदाचन॥
न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्।
नचास्योपदिशेद्धर्मं नचास्य व्रतमादिशेत्॥
यश्चास्योपदिशेद्धर्मं यश्चास्य व्रतमादिशेत्।
सोऽसंवृतं तमोघोरं सह तेन प्रपद्यतइति॥
व्रणद्वारे क्रमिर्यस्य सम्भवेत कदाचन।
प्राजापत्येन शुद्ध्येत हिरण्यं गौर्वासोदक्षिणेति।

नाग्निचित् परामुपेयात् कृष्णवर्णाया: सरमायाइव न धर्माय न धर्मायेति।

इति वाशिष्ठे धर्मशास्त्रेऽष्टादशोऽध्यायः।

एकोनविंशोऽध्यायः।

धर्मौराज्ञः पालनं भूतानां तस्यानुष्ठानात् सिद्धिः। भयकारणं ह्यपालनं वै एतत्स्मृत मार्ज्ञाविंद्वांसस्तस्माद्गार्हस्थ्यनैयमिकेषु। पुरोहिते दद्यादिन्नायते ब्राह्मणः पुरोहितोराष्ट्रं दधातीति। तस्य भयमपालनादसामर्थ्याच्च। देशधर्मं जातिधर्मं कुलधर्मान् सर्वान् वैताननुप्रविश्य राजा चतुरोवर्णान् स्वधर्मे स्थापयेत्तेष्वधर्मपरेषु दण्डन्तु देशकालधर्माधर्मवयोविद्यास्थानविशेषैर्हिंशेत्। आगमादृष्टाभावात् पुष्पफलोगान्यदेयानि हिंस्यात्। कर्षणकरणार्थश्चोपहत्यागार्हस्थ्यं गाश्च मानोन्माने

र्थंचते स्यातां अविष्ठानान्नौनीहारसार्थोनामस्मान्न मूल्य-मात्रं नैहारिकं स्यान्महामहस्यः स्यात् संमानयेद्वाहवा-हनीयद्विगुणकारिणी स्यात् प्रत्येकं प्रयास्यः पुमान् । शतं वा राज्ञां वा तदेतदप्यर्थाः स्त्रियः स्युः कराष्टौ मानाधारमध्यमाः पादः कार्षापणस्य निरुक्तोऽन्तरोमानाकरः श्रोत्रियोराज-पुमानथ प्रव्रजितबालवृद्धतरुणप्रदाता प्रागामिकाः कुमा-र्योऽहतापत्यास्य वाङ्भ्यामुत्तरं शतगुणं दद्यान्नदीकच्छवनशै-लोपमाङ्गा निष्कराः स्युस्तदुपजीविनो वा दद्युः प्रतिमासमु-द्वाहकरैस्त्वागमयेद्राजनि च प्रेते दद्यात् । प्रासङ्गिकं तेन मातृवृत्तिर्व्याख्याता राजमहिष्याः पितृव्यमातुलांश्चजापितृ-व्यान् राजा विभृयात्तद्बामित्वादंशस्य स्युः तद्बन्धूंश्चान्यांश्च राजपत्न्योग्रासाच्छादनं लभेरन् । अनिच्छन्तो वा प्रव्रजेरन् क्लीवोन्मत्तांश्च वापि । मानवं श्लोकमुदाहरन्ति ।

न रिक्तकार्षापणमस्ति शुल्कं
न शिल्पवृत्तौ न शिशौ न धर्मे ।
न भैक्षवृत्तौ न हृतावशेषे
न श्रोत्रिये प्रव्रजिते न यज्ञे इति ।

स्तेनाभिशस्तदुष्टशस्त्रधारिसद्योढव्रणसम्पन्नव्यपविष्टेष्वेकेषां दण्डोत्सर्गे राजैकरात्रमुपवसेत् त्रिरात्रं पुरोहितः कृच्छ्र-मदण्ड्यदण्डने पुरोहितस्त्रिरात्रं वा अथाप्युदाहरन्ति ।

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणि ।
गुरौ शिष्यस्तु याज्यश्च स्तेनो राजनि किल्बिषम् ॥
राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥

एनो राजानमृच्छत्यप्युत्सृजन्तं सकिल्बिषम्।
तच्चेन्न घातयेद्राजा राजधर्म्मेण दुष्यतीति ॥
राज्ञामन्येषु कार्य्येषु सद्यः शौचं विधीयते।
तथा तान्यपि नित्यानि काल एवात्र कारणमिति ॥
यमगीतञ्चात्र श्लोकमुदाहरन्ति।
नात्र दोषोऽस्ति राज्ञां वै व्रतिनां नच मन्त्रिणाम्।
ऐन्द्रस्थानमुपासीना ब्रह्मभूता हि ते सदेति।
इति वाशिष्ठे धर्मशास्त्रे एकोनविंशोऽध्यायः।

विंशतितमोऽध्यायः।

अनभिसन्धिकृते प्रायश्चित्तमपराधे सविकृतेऽप्येके।
गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम्।
इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमइति॥

तत्र च सूर्य्याभ्युदयितः सन्नहस्तिष्ठेत् सावित्रीञ्च जपेदेवं सूर्य्याभिनिर्मुक्तोरात्रावासीत। कुनखी श्यावदन्तस्तु कृच्छ्रं द्वादशरात्रञ्चरित्वा पुनर्निर्विशेत्। अग्रदिधिषूपतिः कृच्छ्रं द्वादशरात्रञ्चरित्वा निर्विशेत्। ताञ्चैवोपयच्छेद्दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा निर्विशेत्। वरणमहरहस्तद्धस्तामो-ब्रह्मघ्नः कृच्छ्रं द्वादशरात्रञ्चरित्वा पुनरुपनीतो वेदमाचार्य्यात्। गुरुतल्पगः सवृषणं शिश्नमुत्कृत्याञ्जलावाधाय दक्षिणामुखोगच्छेत् यत्रैव प्रतिहन्यात्तत्र तिष्ठेदाप्रलयान्निष्कालकोवा घृताक्तस्तप्तां सूर्मिं परिष्वजेन्मरणात्मुक्तो भवतीति विज्ञायते। आचार्य्यपुत्रशिष्यभार्य्यासु चैवं योनिषु

च गुर्वीं सखीं गुरुसखीञ्च पतिताञ्च गत्वा कृच्छ्राब्दं चरेत्। एतदेव चाण्डालपतितान्नभोजनेषु ततः पुनरुपनयनं वपनादीनान्तु निवृत्तिः। मानवञ्चात्र श्लोकमुदाहरन्ति।

वपनं मेखला दण्डोभैक्षचर्य्या व्रतानि च।
निवर्त्तन्ते द्विजातीनां पुनः संस्कारकर्मणीति॥

मद्यपाने क्लीवव्यवहारेषु चैवं। मद्यभाण्डे स्थिता आपो-यदि कश्चिद्द्विजोऽर्थवित्। पद्मोडुम्बरविल्वपलाशानामुदकं पीत्वा त्रिरात्रेणैव शुद्ध्यति। अभ्यासे सुरायाअग्निवर्णान्तां द्विजः पिबेत्। भ्रूणहनञ्च वक्ष्यामोब्राह्मणं हत्वा भ्रूणहा भवत्यविज्ञातञ्च गर्भं अविज्ञाता हि गर्भाः पुमांसोभवन्ति तस्मात् पुंस्कृत्य जुहुयात् लोमानि मृत्यो र्जुहोमि लोमभिर्मृत्युं वासय इति प्रथमां त्वचं मृत्यो र्जुहोमि त्वचा मृत्युं वासयइति द्वितीयं लोहितं मृत्यो र्जुहोमि लोहितेन मृत्युं वासयइति। तृतीयां त्वचं मृत्योर्जुहोमि तावति मृत्युं वासयइति। चतुर्थीं मांसानि मृत्योर्जुहोमि मांसैर्मृत्युं वासयइति। पञ्चमीं मेदेन मृत्योर्जुहोमि मेदसा मृत्युं वासयइति। षष्ठीमस्थीनि मृत्यो-र्जुहोमि अस्थिभिर्मृत्युं वासयइति। सप्तमीं मज्जानं मृत्यो-र्जुहोमि मज्जाभिर्मृत्युं वासयइति। अष्टमीं राजार्थे ब्राह्मणार्थे वा ग्रामेऽभिमुखमात्मानं घातयेत्त्रिरञ्जितोवापराद्धः पूतोभवतीति विज्ञायते। द्विरुक्तं ह्यतः कनीयोभवतीति। तदप्युदाहरन्ति।

पतितं पतितं त्यक्त्वा चौरं चौरेति वा पुनः।
वचसा तुल्यदोषः स्यान्मिथ्याद्विदोषतां व्रजेदिति॥

एवं राजन्यं हत्वाष्टौ वर्षाणि चरेत् षड्वैश्यं त्रीणि

शूद्रं ब्राह्मणीश्चात्रेयीं हत्वा सवनगतौ च राजन्यवैश्यौ चात्रेयीं वक्ष्यामोरजस्वलामृतुस्नातामात्रेयीमाहुः। अत्र ह्येषामपत्यं भवतीति चात्रेयी। राजन्यहिंसायां वैश्यहिंसायां शूद्रं हत्वा सम्वत्सरम्। ब्राह्मणसुवर्णहरणात् प्रकीर्य केशान् राजानमभिधावेत् स्तेनोऽस्मि भोः शास्तु भवानिति तस्मै राजौदुम्बरं शस्त्रं दद्यात्तेनात्मानं प्रमापयेन्मरणात् पूतो भवतीति विज्ञायते। निष्कालकोवा घृताक्तोगोमयाग्निना पादप्रभृत्यात्मानमभिदाहयेन्मरणात् पूतोभवतीति विज्ञायते। अथाप्युदाहरन्ति।

पुराकालात् प्रमीतानामानाकविधिकर्मणाम्।
पुनरापन्नदेहानामङ्गं भवति तच्छृणु॥
स्तेनः कुनखी भवति श्वित्री भवति ब्रह्महा।
सुरापः श्यावदन्तस्तु दुश्चर्मा गुरुतल्पग इति॥

पतितैः सम्प्रयोगे च ब्राह्मेण वा यौनेन वा तेभ्यः सकाशान्मात्रा उपलब्धास्तासां परित्यागस्तैश्च न सम्वसेदुदीचीं दिशं गत्वाऽनश्नन् संहिताध्ययनमधीयानः पूतोभवतीति विज्ञायते। अथाप्युदाहरन्ति।

शरीरपातनाच्चैव तपसाध्ययनेन च।
मुच्यते पापकृत् पापाद्दानाच्चापि प्रमुच्यते॥

इति विज्ञायते।

इति वाशिष्ठे धर्मशास्त्रे विंशतितमोऽध्यायः।

एकविंशतितमोऽध्यायः।

शूद्रश्चेद्‌ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येद्‌ब्राह्मण्याः शिरसि वापनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुव्राजयेत् पूता भवतीति विज्ञायते। वैश्यश्चेद्‌ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येद्‌ब्राह्मण्याः शिरसि वापनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरथमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते। राजन्यश्चेद्‌ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येद्‌ब्राह्मण्याः शिरोवापनं कारयित्वा सर्पिषाभ्यंज्य नग्नां रक्तखरमारोप्य महापथमनुव्राजयेत्। एवं वैश्योराजन्यायां शूद्रश्च राजन्यावैश्ययोर्मनसा भर्तुरतिचारे त्रिरात्रं यावकं क्षीरं भुञ्जानाधः शयाना त्रिरात्रमप्सु निमग्नायाः सावित्र्यष्टशतेन शिरोभिर्वा जुहुयात् पूता भवतीति विज्ञायते।

इति वाशिष्ठे धर्मशास्त्रे एकविंशतितमोऽध्यायः।

समाप्ता चेयं वशिष्ठसंहिता।

वृद्धगौतमसंहितायाम्।

प्रथमोऽध्यायः।

अश्वमेधे पुरावृत्ते केशवं केशिसूदनम्।
धर्मसंशयकं हृष्य किमपृच्छत गौतमः॥
गौतमः। पञ्चमेनापि मेधेन यदा स्नातो युधिष्ठिरः।
तदा राजा नमस्कृत्य केशवं वाक्यमब्रवीत्॥
युधिष्ठिरः। भगवन्! वैष्णवा धर्माः किं फलं किं परायणाः।
किं धर्ममधिकृत्यासीत् भवतोत्पादिता पुरा।
यदि ते न मनोग्राह्यः प्रियोवा मधुसूदन!॥
श्रोतव्यः स तु वा कृष्ण! तन्मे कथय सुव्रत!।
पवित्राः किल ते धर्माः सर्वपापप्रणाशनाः॥
सर्वधर्मोत्तराः पुण्या भगवन्ननवोत्थिताः।
यच्छ्रुत्वा ब्रह्मणागोघ्नो मन्त्रिणा गुरुतल्पगः॥
पाकभेदीकृतघ्नश्च सुरापोब्रह्मविक्रयी।
मित्रविश्वासघाती च ब्रह्मणा विष्णुणा तथा॥
आत्मविक्रयिणो ये च जीवेयुश्च कुकर्मभिः।
पापाः शठा नैकृतिका व्यभिचारपरास्तथा॥
रसभेदकरा ये च ये च नीरप्रदूषकाः॥
श्रीविप्रेण करास्रौरव विप्रा ये च पुरोहिताः।
कूपपरिवारणाः स्निग्धा स्तया ये परदारकाः॥
ये तेचान्ये च बहवः पश्च ते तेऽपि किल्बिषान्।

तानाचक्ष्व सुरश्रेष्ठ! त्वद्भक्तोऽस्म्यहमच्युत!॥

वैशम्पायनः। इत्येवङ्कथितो देवो धर्मपुत्त्रेण संसदि।

वशिष्ठाद्यास्तपोयुक्ता मुनय स्तत्वदर्शिनः॥

श्रोतुकामाः परं गुह्यं भक्तिमन्तो हरेः कथाः।

तथा भागवताश्चैव ततस्तं पर्य्यवारयन्॥

युधिष्ठिरः। यदि जानासि मां भक्तं स्निग्धस्त्वा भक्तवत्सल।

सर्व्वधर्म्माणि गुह्यानि श्रोतुमिच्छामि तत्त्वतः॥

धर्मान् कथय देवेश! यद्यनुग्रहभागहम्।

श्रुता मे मानवा धर्मा वाशिष्ठाः काश्यपास्तथा॥

गार्ग्येया गौतमीयाश्च तथागोपालितस्य च।

पराशरकृताः पूर्व्वमात्रेयस्य च धर्मतः॥

उमामहेश्वराश्चैव नन्दिधर्माश्च पावनाः।

ब्रह्मणा कथिता ये च कौमाराश्च श्रुतामया॥

धूम्रवर्णाः कृताधर्माः कौश्चवैश्वानरा अपि।

भार्गव्या याज्ञवल्क्यश्च माण्डव्या कौशिकास्तथा॥

भारद्वाजकृता ये च बृहस्पतिकृताश्च ये।

कणिने च कृष्णीबाहो! विश्वामित्रकृताश्च ये॥

सुमन्तुजैमिनिकृताः शाकनेयास्तथैव च।

पुलस्त्यपुलहोद्गीताः पाराशर्य्यास्तथैव च॥

अगस्त्यगीता मौद्गल्याः शाण्डिल्यास्तुलहायनाः।

बालखिल्यकृता ये च सप्तर्षिरचिताश्च ये॥

आपस्तम्बकृता धर्माः शङ्खस्य लिखितस्य च।

प्राजापत्यास्तथा याम्या माहेन्द्राश्च श्रुता मया॥

वैश्वानराख्या गीताश्च विभाण्डककृताश्च ये।

नारदीयकृता धर्माः कापोताश्च श्रुता मया ॥
तथापि पुरवाक्यानि भृगोरङ्गिरसस्तथा।
क्रौञ्चमातङ्गगीताश्च सौधहारीतकास्तथा ॥
पिङ्गवर्मकृताकान्ता ये च वा वसुपालिताः।
उद्दालककृताधर्मा औशनसा स्तथैव हि ॥
वैश्यपा धनगीताश्च ये चान्येऽप्येव मागधाः।
एतेभ्यः सर्वधर्मेभ्यो देवत्वायाश्रनिश्चिताः ॥
पावनत्वात्पवित्रत्वाद्विशिष्टा इतिमे मतिः।
तस्माच्छ्रुत्वा प्रपन्नस्य त्वद्भिन्नस्य च माधव ! ॥
गुह्यतरीयान् परान् धर्मान् पुण्यान् कथय मेऽच्युत !।
वैशम्पायनः। एवमुक्तस्तु धर्मज्ञो धर्मपुत्रेण माधवः ॥
उवाच धर्मान् सूक्ष्माख्यान् धर्मपुत्रस्य धीमतः।
श्रीभगवानुवाच। यावन्तोयस्य कौन्तेय ! एतद्धर्मेषु सुव्रत !।
त्वत्समो मत्समो लोके न कश्चिदिह विद्यते ॥
धर्मः श्रुतो वा दृष्टो वा कृतो वा कथितोऽपि वा।
आमोदितो वा राजेन्द्र ! पुनाति हि नरं सदा ॥
धर्मः पिता च माता च धर्मश्च सुहृदस्तथा।
धर्मो भ्राता सखा चैव धर्मः स्वामी परन्तपः ॥
धर्मादर्थश्च कामश्च धर्माद्भोगाः सुखानि च।
धर्मादैश्वर्यमेवञ्च धर्मः स्वर्गगतिः प्रभो ! ॥
धर्मो वंशे विपन्नञ्च त्रायते महतो भयात्।
द्विजत्वं देवतात्वञ्च धर्मः प्रापयते नरम् ॥
यदा च क्षियते पापः कालेन परुषस्य च।
तदा सञ्जायते बुद्धिर्धर्मं कर्तुं युधिष्ठिर ! ॥

जन्मान्तरसहस्रैस्तु मानुषत्वं सुखी भव ।
तत्त्वापीह यो धर्मन् न करोति स वञ्चितः ॥
कीटाश्च पूरिषस्यैव विरूपा व्याधितास्तथा ।
परद्वेष्याश्च मूर्खाश्च न तैः धर्माः कृताः पुरा ॥
एकदीर्घायुषः शूराः पण्डिता भोगिनस्तथा ।
अरोगा रूपसम्पन्ना स्तैर्धर्माः स्युः कृताः पुरा ॥
एवं धर्मः कृतः सद्यो नयति गतिमुत्तमाम् ।
अधर्मः सेव्यमानस्तु तिर्यग्योनिं नयत्यसौ ॥
इदं रहस्यं कौन्तेय ! श्रूयतामिदमुत्तमम् ।
कथयिष्येपरं गुह्यं मम भक्तस्य पाण्डव ! ॥
इष्टस्त्वमसि मे त्यक्तुं प्रपन्नाश्चापि मां सदा ।
परमात्मर्मपि ब्रूयां किं पुनर्धर्मसंहिताम् ॥
इदं मे मानुषं जन्म कृतमात्मनि मायया ।
धर्मसंस्थापनायैव दुष्टानां शासनाय च ॥
मानुष्यं भावमापन्नं ये मां स्द्युं तवाज्ञया ।
संसरन्ति ह ते मूर्खा स्तिर्यग्योनिष्वनेकशः ॥
ये च मां सर्वरक्तात्वे पश्यन्ति ज्ञानचक्षुषा ।
मद्भक्तांस्तान् सदा युक्तान् मत्समीपं नयाम्यहम् ॥
मद्भक्तानान्तु मानुष्ये सर्वजन्म च पाण्डव ! ।
अपि वा ये अभिरता मद्भक्ताः पाण्डुनन्दन ! ॥
मुच्यते पातकैः सर्वैः पद्मपत्रमिवाम्भसा ।
जन्मान्तरसहस्रेषु तपसा भावितात्मनाम् ॥
मद्भक्तिः क्रियते तात ! मनुष्याणां न संशयः ।
यच्च रूप्यपरं पुण्यं तैस्तदचलवत् ध्रुवम् ॥

न द्रष्यति तथा देवैर्मद्भक्तैः क्रुष्यति यथा ।
अपरं यच्च मे रूपं प्राणाभावेषु नाक्षति ॥
तद्द्यति च सर्वार्थैः सर्वभूतैश्च पाण्डव ! ।
कल्पकोटिसहस्रेषु व्यतीतेष्वागतेषु च ॥
दर्शयामीति यद्रूपं तत्प्रपश्यन्ति मे सुराः ।
स्थित्युत्पत्तिलयकर्त्तारं यो मां ज्ञात्वा प्रपद्यते ॥
अनुगृह्णाम्यहं तस्य संसारान्मोचयामि च ।
अहमादीति भूतानां सृष्टा ब्रह्मादयोमया ॥
प्रकृतिं स्वामवष्टभ्य जगत्सर्वं सृजाम्यहम् ।
ततो मूलोऽहमव्यक्तो रजोमध्ये प्रतिष्ठितम् ॥
ऊर्द्ध्वं सत्त्वविशालोऽहं ब्रह्मादि स्तम्बसंस्थितम् ।
मूर्धानं मे दिवं विद्धि चन्द्रादित्यौ च लोचने ॥
देवादिब्राह्मणा वक्त्रं मरुतः श्वसनञ्च मे ।
दिशो मे बाहवश्चाष्टौ नक्षत्राणि विभूषणम् ॥
अन्तरिक्षकरं विद्धि सर्वभूतावकाशकम् ।
मार्गो मेघानिलाभ्यान्तु यमं सोदरमव्ययम् ॥
पृथिवीञ्च बलं यद्वै द्वीपार्णो च नगैर्युतम् ।
सर्वसत्त्वारणोपितं पादौ मम युधिष्ठिर ! ॥
स्थितोऽह्येकगुणाख्ये च द्विगुणश्चाग्नि मारुते ।
अगुणस्तैः स्थितोऽहं वै सलिले तु चतुर्गुणः ॥
महान्तो मे गुणाः पञ्च महाभूतेषु पञ्चसु ।
तन्मात्रेऽसंस्थितः सोऽहं पृथिव्यां पञ्चधा स्मृतः ॥
अहं सहस्रशीर्षस्तु सहस्रचरणेक्षणः ।
सहस्रशाह्नुदरहृक् सहस्राङ्गः सहस्रगात् ॥

स्थितोऽस्मि सर्वतः रुद्रो ह्यद्य तिष्ठेद्दशाङ्गुलम्।
सर्वभूतात्मभूतः सन् सर्वव्यापी ततो ह्यहम्॥
अचिन्त्योऽहमनन्तोऽहमचलोऽह मजो ह्यहम्।
अनाद्योऽहमप्रमेयोऽहमव्ययोवेद्योऽहमयम्॥
निर्गुणोऽहन्निर्गन्धात्मा नित्योऽहं निर्ममोऽपि च।
निर्द्वन्द्वो निर्विकारोऽहं निधानञ्चामृतस्य च॥
मृतस्य तस्य चाहञ्च स्वाहाकारो नराधिप!।
तेजसा तपसा चाहं भूतग्रामेष्वनव्ययः॥
स्नेहपाशगणैर्बध्वा धारयाम्यात्ममायया।
चतुराश्रमवर्णोऽहं चातुर्होत्रफलाशनः।
चतुर्मूर्तिश्चतुर्व्यूह श्चतुराश्रमभाजनम्॥
संहृत्याहं जगत्सर्वं कृत्वाहं गर्भमात्मनः।
शयामि दिव्ययोगेन प्रलयेषु युधिष्ठिर!॥
सहस्रयुगपर्यन्ता ब्राह्मी रात्रि र्महार्णवे।
स्थित्वा सृजामि भूतानि जङ्गमानि स्थिराणि च॥
कल्पे कल्पे च भूतानि संहरामि सृजामि च।
न च मां तानि जानन्ति मायया मोहितानि हि॥
मम चैवान्धकारस्य मार्गितव्यस्य नित्यशः।
प्रशान्तस्येव दीपस्य गतिर्नैवोपलभ्यते॥
न तदस्ति क्वचिद्राजन् यत्र नाहं प्रतिष्ठितः।
न च तद्विद्यते भूतं मयि यन्न प्रतिष्ठितम्॥
यावन्मात्रं शरीरं हि स्थूलसूक्ष्ममिदं क्वचित्।
जीवभूतो ह्यहं तस्मिन् हिताय मां प्रतिष्ठितः॥
किञ्चात्र बहुनोक्तेन सत्यमेतत् ब्रवीमि ते।

यद्भूत यत् भविष्यच्च तत्सर्वं मद्दमेव तु ॥
मया श्रद्दधनानि यानि भूतानि कानि पाण्डव ! ।
ममैव न च जानन्ति मायया मोहितानि मे ॥
एवं सर्वं जगदिदं सदेवासुरमानुषम् ।
मत्तः प्रभवते राजन् मम विप्र ! विनाशिनः ॥
इति गौतमीये श्रीवैष्णवधर्मशास्त्रे प्रथमोऽध्यायः !

द्वितीयोऽध्यायः।

वैशम्पायनः ।

एवमात्मोद्भवद्रूप्य भगवद्दृष्टकेशवम् ।
धर्माद्धर्मात्मजस्यैव पुण्यानकथयद्द बहून् ॥

श्रीभगवानुवाच ।

शृणु पाण्डव ! यत्नेन पवित्रं पावनं परम् ।
कथ्यमानं मया पुण्यं धर्मशास्त्रं महाफलम् ॥
यच्छृणोति शुचिर्भूत्वा एकचित्तस्तपोधनः ।
धर्मं यशस्य मायुष्य धर्मात्मानं युधिष्ठिर ! ॥
श्रद्दधानस्य तस्येह यत्पापमा पूर्वसञ्चितः ।
विनश्यत्याशु तत्सर्वमभक्तस्य विशेषतः ॥
एवं श्रुत्वा वचः पुण्य वाक्यं केशवभाषितम् ।
प्रणष्टमनसो भूत्वा चिन्तयन्त्युत्तमं परम् ॥
देवा ब्रह्मर्षयः सर्वे गन्धर्वाप्सरसस्तथा ।
भूतास्त्रयक्षग्रहा गुह्यका भुजगास्तथा ॥
वालखिल्या महात्मानो योगिनस्तत्वदर्शिनः ।

तथा भागवताश्चापि पञ्चकालमुपासकाः ॥
कौतूहलसमाविष्टाः प्रणष्टाः परमर्षयः।
श्रोतुकामः परं गुह्यं वैष्णवं धर्मशासनम् ॥
हृदि कर्तुश्च तद्वाक्यं प्रणम्यं शिशुना तदा।
ततस्ते वासुदेवेन दृष्टाः सौम्येन चक्षुषा ॥
विमुक्तपापानालोक्य प्रणम्य शिरसा हरिम्।
पप्रच्छ केशवं धर्मं धर्मपुत्रः प्रतापवान् ॥
युधिष्ठिरः। ततस्ते वासुदेवेन दृष्टाः सौम्येन मानुषाः।
कीदृशी ब्राह्मणस्याथ कीदृशी चत्रियस्य वै ॥
वैश्यस्य कीदृशी देव! गतिः शूद्रस्य कीदृशी।
कथं गच्छेत पापेन ब्राह्मणस्तु यमालये ॥
चत्रियोवाथ शूद्रोवा वैश्योवो गच्छते कथम्।
एतत्कथय देवेश! लोकनाथ! नमोऽस्तु ते ॥
वैशम्पायनः। स पृष्टः केशवश्चैव धर्मपुत्रेण धीमता।
उवाच संसारगतिं चतुर्वर्णस्य कर्मजाम् ॥

श्रीभगवानुवाच।

शृणु वर्णक्रमेणैव धर्माद्धर्मभृताम्वर!।
नास्ति किञ्चिन्नरश्रेष्ठ! ब्राह्मणस्य तु विक्रयः ॥
येतु तासु सदा ध्यात्वा सन्ध्यां ये च उपासते।
यैश्च पूर्णाहुतिः प्राप्ता विधिवज्जुह्वति च ये ॥
वैश्वदेवाश्च ये कुर्युः पूजन्त्यतिथींश्च ये।
नित्यस्वाध्यायशीलाश्च पञ्चयज्ञपरायणाः ॥
सायं प्रात र्हुताशाश्च शुद्रभोजनवर्जिताः।
दम्भाचारविमुक्ताश्च स्वदारनिरताः सदा ॥

पञ्चयज्ञरताश्चैव अग्निहोत्रमुपासते।
ते नमस्कृतकर्माणो ब्रह्मलोकं व्रजन्ति ते॥
ब्रह्मलोके ततः कामं गन्धर्वै ब्रह्मगायकैः।
उपगीयमानाः प्रिय! तैः पूज्यमानाः स्वयम्भुवा॥
ब्रह्मलोके प्रमोदन्ते यावद्भूतस्य विप्लवम्।
क्षत्रियोऽपि स्थितो राज्ये स्वधर्मं परिपालयन्॥
सम्यक् प्रजाः पालयिता स्वधर्मनिरतः सदा।
यज्ञदानरतो धीरः स्वधर्मनिरतः शुचिः॥
शास्त्रानुकारी तत्त्वज्ञः प्रजाकार्यपरायणः।
विप्रेभ्यः कामदो नित्यं भृत्यानां भरणे रतः॥
सत्यसन्धः शुचिर्नित्यलोभदम्भविवर्जितः।
क्षत्रिय उत्तमां याति गतिं देवनिषेविताम्॥
तत्र दिव्याप्सरोभिस्तु गन्धर्वैश्च प्रयत्नतः।
सेव्यमानो महातेजाः क्रियते शक्रपूजितः॥
चतुर्युगानि वै त्रिंशत् मोदित्वा तत्र देववत्।
इहैव मानुषे लोके चतुर्वेदीद्विजोभवेत्॥
कृषिगोपालनिरतः स्वधर्मावेक्षणेरतः॥
वणिक् स्वकर्मवाप्नोति पूज्यमानोऽप्सरोगणैः।
चतुर्युगानि वै त्रिंशत् ऋद्धि द्वादश पञ्च च॥
इह मानुष्यके राजन्! राजा भवति वीर्यवान्।
त्रयाणामपि वर्णानां शुश्रूषानिरतः सदा॥
विशेषेण तु विप्राणां दासवद्यस्तु तिष्ठति।
अयाचितप्रदाता च सत्यशौचसमन्वितः॥
गुरुदेवेषु निरतः परदारविवर्जितः।

परपीड़ाम हृत्वैव भृत्यवर्गं बिभर्त्ति यः ।
मृतोऽपि स्वर्गमाप्नोति जीवाना मभयप्रदम् ॥
स स्वर्गलोके ऋषित्वा वर्षकोटीर्महातपाः ।
इह मानुष्यलोके वै वैश्यो धनपतिर्भवेत् ॥
एवं धर्मात्परं नास्ति महत् संगर्गसाह्विषाः ।
स स्वधर्मात्परं किञ्चित् पापकर्मव्यपोहनम् ॥
तस्माद्धर्मः सदा कार्यो मानुष्यं प्राप्य दुर्लभम् ।
युधिष्ठिरः । भगवन् ! देव देवेश वदस्व मधुसूदन ! ॥
शुभस्याप्यशुभस्यापि चयवृद्धीर्यथाक्रमम् ।
श्रीभगवानुवाच । शृणु पाण्डव ! तत्सर्वं धर्मं सूक्ष्मं सनातनम् ॥
दुर्विज्ञेयं प्रमोदन्ते यं ज्ञात्वा ते महाजनाः ।
यथैव शीतमुदकमुष्णेन बहुधा व्रतम् ॥
भवेत्तु तत्क्षणादुष्णं शीतत्वञ्च विनश्यति ।
यथोष्णं वा भवेदल्पं शीतेनापि यथाव्रतम् ॥
शीतत्वञ्च भवेत्सर्वं मुष्णत्वञ्च विनश्यति ।
एवन्तु यद्भवेत् भूमन् ! सुकृतं वाथ दुष्कृतम् ॥
तदल्पं चपयेद्दिमं नात्र कार्या विचारणा ।
समत्वे सति राजेन्द्र ! तयोः सुकृतपापयोः ॥
गृहीतस्य भवेद्वृद्धिः कीर्तिर्यस्य भवेत् स्वयम् ।
ख्यापनेनानुतापेन प्रायः पापं प्रणश्यति ॥
तथा कृतस्तु राजेन्द्र! धर्मोनश्यति भारत ! ।
गृहीतौ ता वुभौ सम्यक् वृद्धियातौ न संशयः ॥
तस्मात्सर्वप्रयत्नेन न पापं ग्राहयेद्बुधम् ।
तस्मादेतत्प्रयत्नेन कीर्तितमक्षयं महत् ॥

तस्मात् सङ्कीर्तयेत्पापं नित्यधर्मञ्च ग्राहयेत्।
इति गौतमीये श्रीवैष्णवधर्मशास्त्रे द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

वैशम्पायनः। एवं श्रुत्वा वचस्तस्य धर्मपुत्रोऽच्युतस्य तु॥
पप्रच्छ पुनरप्यन्यान् धर्माद्धर्मात्मजोऽरिहः।
युधिष्ठिरः। वृथा चरति जन्मानि वृथा दानानि वा कृतिः॥
वृथा च जीवितं चेमो नराणां पुरुषोत्तम!।
कीदृशासु व्यवस्थासु दानं देयं जनार्दन!॥
इह लोकेच भवति पुरुषः पुरुषोत्तम!।
गर्भस्थे कर्म चायाति किं बाल्ये चापि केशव!।
यौवनत्वेऽपि किं कृष्ण! वृद्धत्वेचापि किं भवेत्॥
सात्विकं कीदृशं दानं राजसं कीदृशं भवेत्।
तामसं कीदृशं देव! तमधीष्यति किं प्रभो!॥
उत्तमं कीदृशं दानं मध्यमं कीदृश भवेत्।
अधमं कीदृशं दानं तेषां यादव! किं फलम्॥
किं दानं नयतेर्बुद्धिर्गतिं किं मध्यमां नयेत्।
गतिं जघन्या मथवा देवदेव! प्रयान्ति मे॥
एतदिच्छामि विज्ञातुं परं कौतुहलं हि मे।
त्वदीयं वचनं सत्यं पुण्यञ्च मधुसूदन!॥
वैशम्पायनः। एवं धर्मप्रसक्तेन पृष्टः पाण्डुसुतेन वै।
उवाच वासुदेवोऽथ धर्माद्धर्मेण पाण्डवम्॥
श्रीभगवानुवाच॥ शृणु राजन्यथान्यायं वचनं तथ्यमुत्तमम्।

कथ्यमानं सदा पुण्यं सर्वपापव्यपोहनम् ॥
वृथा च दश दानानि चत्वारि च नराधिप ! ।
वृथा दानानि पञ्चाशत् पञ्च चैव यथाक्रमम् ॥
वृथा च जीवितं येषां ते च सर्षपकीर्त्तिताः ।
अनुक्रमेण सर्वाणि तानि वक्ष्यामि पाण्डव ! ॥
धर्मघ्नानां तथा चैव लुब्धानां पापिनां तथा ।
वृथापाकञ्च पचन्ति परदाररताश्च ये ॥
पाकभेदकरा ये च यथा स्युः सत्यवर्जिताः ।
मृष्टमश्नाति यश्चैको दृश्यमानस्तु बान्धवैः ॥
पितरं मातरञ्चैव उपाध्यायं गुरुं तथा ।
मातुलं मातुलानीञ्च यो हि हन्यात्क्षपेत्तथा ॥
ब्राह्मणाश्चैव ये भूत्वा सन्ध्योपासनवर्जिताः ।
निर्ब्राह्मणो निःस्वधश्चैव यश्च गुर्वन्नभुक्द्विजः ।
मम वा शङ्करस्यापि ब्रह्मणो वा युधिष्ठिर ! ॥
पूर्वाह्नब्राह्मणानान्तु ये न भक्ता नराधिप ! ।
वृथा जन्मान्यथैतेषां पापानां बिद्धि पाण्डव ! ॥
अश्रद्धया च यद्दत्तं चौर्य्येणावर्जितन्तु यत् ।
अभिशस्ताहृतं यत्तु यद्दानं पतिते द्विजे ॥
अब्रह्माभिहितं यत्तु यद्दत्तं सर्वयाचके ।
प्राप्ते तु यद्धि तद्दान मारूढपतिते च यत् ॥
यत्ग्रामयाचकर्णान्तं यत्कृतघ्नहृतस्तथा ।
उपपातकिने दत्तं वेदविक्रयिणे च यत् ॥
स्त्रीजीविते च यद्दत्तं यच्च देवलकाय च ।
देवपूर्वाग्निने दत्तं नित्यकर्म.न कारिणे ॥

रङ्गोपजीविने दत्तं यच्च मांसोपजीविने।
सेवकाय च यद्दत्तं यद्दत्तं ब्राह्मणब्रुवे॥
अदेशिने च यद्दत्तं दत्तं वार्धुषिकाय च।
यदनाचारिणे दत्तं यच्च दत्तं वृथाग्निने॥
असभ्योपासिने दत्तं यच्च ग्रामनिवासिने।
यन्मिथ्यालिङ्गिने दत्तं दत्तं सर्वाशिने च यत्॥
नास्तिकाय च यद्दत्तं धर्मविक्रयिणे च यत्।
कारकाय च यद्दत्तं दत्तं यत् कूटसाक्षिणे॥
नचात्मानं तरन्त्येते न दातारं युधिष्ठिर!।
यत्तेभ्यो दत्तमात्राणि दानानि सुबहून्यपि॥
वृथा भवन्ति राजेन्द्र! भस्मन्याज्याहुतिर्यथा।
यद्येष्टं यत्फलं किञ्चित् भविष्यति कथञ्चन॥
राक्षसाश्च पिशाचाश्च तद्विलुम्पन्ति संस्थिताः।
वृथा ह्येतानि दानानि कथितानि समासतः॥
जीवितञ्च वृथा तेषां तच्छृणुष्व युधिष्ठिर!।

श्रीभगवानुवाच।

ये च मां न प्रपद्यन्ते शङ्करं वा नराधमाः।
ब्रह्माणं वा महीदेवा वृथा जीवन्ति ते नराः॥
येच निन्दन्ति मां मूढाः शङ्करं वा नराधमाः।
कुशलैः कृतशास्त्राणि पठित्वा ये नराधमाः॥
विप्रा निन्दन्ति यज्ञांश्च वृथा जीवन्ति ते नराः।
विद्यमानधनोयस्तु दानधर्मविवर्जितः॥
मृष्टमश्नाति यश्चैको वृथा जीवति सोऽपि च।
वृथा जीवितमाख्यातं दानकालं ब्रवीमि ते॥

तमोनिविष्टचित्तेन दत्तं दानञ्च यद्भवेत्।
न तस्य फलमश्नाति नरो गर्भगतो नृप!॥
ईर्ष्यामात्सर्य्यसंयुक्तो भगवद्वाक्यकारणम्।
ददाति दानं यो मर्त्यो बालभावस्तदश्नुते॥
श्रद्धायुक्तः शुचिः स्नातः प्रसन्नोभयमानसः।
ददाति दानं यो मर्त्यो यौवने स तदश्नुते॥
स्वयं नीत्वा तु यद्दानं भक्त्या पात्रे प्रदीयते।
तत् सार्वकामिकं विद्धि दान मामरणान्तिकम्॥
सात्विकं राजसञ्चैव तामसञ्च युधिष्ठिर!।
दानं दानफलञ्चैव गतिञ्च त्रिविधां शृणु॥
दानं दातव्यमित्येव मतिं कृत्वा द्विजाय वै।
उपकारवियुक्ताय दत्त यत्तद्धि सात्विकम्॥
श्रोत्रियाय दरिद्राय बहुभृत्याय पाण्डव!।
दीयते यत्प्रणष्टाय तत् सात्विकमुदाहृतम्॥
वेदाक्षरविहीनाय यत्तु पूर्वोपकारिणे।
समृद्धाय च यद्दानं तद्राजसमुदाहृतम्॥
सम्बन्धिने च यद्दानं व्रताय चैव पाण्डव!।
लाभादिभिरपात्राय तद्राजसमुदाहृतम्॥
वैश्वदेवविहीनाय यद्दानं श्रोत्रियाय च।
दीयते तस्करायापि तद्दानं तामसं स्मृतम्॥
सरोषमवधूतञ्च शोकयुक्तमवज्ञया।
सेवकाय च यद्दत्तं तद्दानं तामसं स्मृतम्॥
देवाः पितृगणाश्चैव जनयश्चाग्नयस्तथा।

सात्विकं दानमश्नन्ति तुष्यन्ति च नरेश्वर ! ॥
अथवा दैत्यसङ्घाश्च गृह्यकाश्च राक्षसाः ।
राजसं दानमश्नन्ति वर्जितं पितृदैवतैः ।
पिशाचाः प्रेतसङ्घाश्च कश्मला ये मलीमसाः ।
तामसं दानमश्नन्ति गतिञ्च त्रिविधां शृणु ॥
सात्विकानां तु दानाना मुत्तमं फलमिष्यते ।
मध्यमं राजसानान्तु तामसानां तु पश्चिमम् ॥
अभिगत्योपनीतानां दानानामुत्तमं फलम् ।
मध्यमन्तु समाधाय जघन्याय च ते फलम् ॥
अयाचितप्रदाता वै स याति गतिमुत्तमाम् ।
समाहूय तु वै दद्यात् मध्यमां स गतिं व्रजेत् ॥
याचितोयस्तु वै दद्यात् जघन्यां स गतिं व्रजेत् ।
उत्तमा देवकी ज्ञेया मध्यमा मानुषी गतिः ॥
जघन्या याति तिर्य्यक्षु गतिरेषा क्रिया मता ।
पात्रभूतेषु विप्रेषु स्थितेषु चाहिताग्निषु ॥
यश्च यच्छति तीव्रोष्णं चयकृत् स प्रकीर्त्यते।
श्रोत्रियाणां दरिद्राणां भरणं कुरु पाण्डव ! ॥
सद्वृत्तानां द्विजातीनां कार्य्यन्ते परिरक्षणम् ।
दरिद्रान् वृत्तिहीनानां प्रदानैस्तांस्तु पूजयेत् ॥
आतुरस्यौषधैः कार्य्यं नीरुजस्य किमौषधैः ।
पापं प्रतिगृहीतारं प्रदातु मुपगच्छति ।
प्रतिगृहीतुर्यत्पुण्यं प्रदातारमुपैति तत् ॥
तस्माद्दानं सदा कार्य्यं परमं हितमिच्छता ।
वेदविद्यावता तेषु सदा गुर्वन्तवर्जनम् ॥

प्रयत्नेन हि दातव्यो महादानमयोनिधिः।
यस्तु दाता प्रयच्छेत सहस्रस्यावलम्बनम्॥
भुक्तशेषस्य भक्तस्य तं निमन्त्रय भारत!।
अमन्त्रन्तु निराशास्ते न कर्तव्या हि पाण्डव!॥
कुलानि सन्ततिः प्राणा नैषामाशा हता भवेत्।
मद्भक्ता ये नरश्रेष्ठ! मद्गता मत्परायणाः।
मद्याजिनो मन्नियमास्तान् प्रयत्नेन पूजयेत्॥
तेषान्तु पावनायाहं नित्यमेव युधिष्ठिर!।
उभे सर्वं प्रतिष्ठामि व्यसनं तच्च सुव्रतम्॥
तस्मादष्टाक्षरं मन्त्रं मद्भक्तै र्वीतकल्मषैः।
सन्ध्याकालेष्वकालेषु जप्तव्यञ्चात्मशुद्धये॥
अन्येषामपि विप्राणां किल्बिषं हि प्रणश्यति।
उभे सर्वे च पुरुषा स्तस्माद्विप्रो विशुद्धये॥
दैवे श्राद्धे च विप्रः सन् विधियुक्तो जुगुप्सितः।
जुगुप्सितन्तु तत् श्राद्धं दहत्यग्निरिवेन्धनम्॥
भारतं मानवोधर्मः साङ्गवेदश्चिकित्सितम्।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥
न ब्राह्मणान् परीक्षेत दैवे कर्मणि मन्त्रवित्।
महान् भवेत् परीवादो ब्राह्मणानां परीक्षणे॥
ब्राह्मणानां परीवादं यः करोति नराधमः।
सहसैव शुनां योनिं स गच्छेत् ब्रह्मदूषकः॥
स्वल्पपापेन निन्दित्वा परीवादात् खरो भवेत्।
परिभाय क्रमिर्भवति कीटो भवति मत्सरी॥
दुर्वृत्ता वा सुवृत्ता वा प्राकृता वा सुसंस्कृताः।

ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः॥
क्षत्रियञ्चैव स पञ्च ब्राह्मणञ्च बहुश्रुतम्।
नावमन्येत मेधावी कृशानपि कदाचन॥
इह तञ्चापि पुरुषं निर्दहेदवमानितम्।
तस्मादेतं प्रयत्नेन नावमन्येत बुद्धिमान्॥
यथासर्वास्ववस्थासु पावको दैवतं महत्।
तथासर्वास्ववस्थासु ब्राह्मणो दैवतं महत्॥
व्यङ्गान् काणांश्च कुब्जांश्च वामनान् गास्तथैव च।
स निर्वदेदयुक्तञ्च मिश्रिता वेदपारगैः॥
मन्यूनोत्पादयेत्तेषां नचानिष्टं समाचरेत्।
मन्युप्रहरणा विप्रा न विप्राः शस्त्रपाणयः॥
मन्युना घ्नन्ति ते शत्रून् वज्रेणेन्द्र इवासुरान्।
ब्राह्मणो हि महद्दैवं कथितं वेदपारगैः॥
द्विजाश्च सर्वभूतानां धर्मकोशस्य गुप्तये।
किं पुनस्ते च कौन्तेय! सर्वे नित्यमुपासते॥
यस्यास्येन सदाश्नन्ति हव्यानि विविधानि च।
तरामस्तान् द्विजान् वै किमभूतमधिकन्ततः॥
उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते॥
भुक्तेषु तेषु स्ववशे तस्य धर्मं ददाति च।
अनुशंसात् ब्राह्मणस्य भुञ्जतेऽपीतरे जनाः॥
तस्मात्ते नावमन्तव्या मद्भक्ताश्च द्विजाः सदा।
आरण्यकोपनिषदि ये तु पश्यन्ति मां द्विजाः॥
कलावस्थान् द्विजान् सर्वान् प्रयत्नेन प्रपूजयेत्।
स्वगृहे वा प्रवासे वा दिवा रात्रौ तथैव च॥

वृद्धाश्च ब्राह्मणाः पूज्या मद्भक्ता येच पाण्डव ! ।
नास्ति विप्रसमो देवो नास्ति विप्रसमो गुरुः ॥
नास्ति विप्रात् परो बन्धु र्नास्ति विप्रात् परोनिधिः ।
नास्ति विप्रात् परं तीर्थं न पुण्यं ब्राह्मणात्परम् ॥
नास्ति विप्रात् परो धर्मो नास्ति विप्रात् परा गतिः ।
पापकर्मसमाक्षिप्तं पतन्तं नरके नरम् ॥
त्रायते दानमप्येकं पात्रभूते कृते द्विजे ।
बाला द्विताग्नयो येच श्रान्ताः स्युर्वान्नवर्जिताः ॥
मामर्चयन्ति मद्भक्तास्तेभ्यो दत्तं महाफलम् ।
प्रदानैः पूजितो विप्रो वन्दितो वापि कृत्स्नशः ॥
संभावितो वा विप्रो वै मद्भक्तो दिवमुन्नयेत् ।
ये पठन्ति नमस्यन्ति ध्यायन्ति पुरुषास्तुतम् ॥
तं श्रुत्वा वाथवा दृष्ट्वा नरैः पापात् प्रमुच्यते ।
मद्भक्ता मद्गतप्राणा मद्भक्त्या मत्परायणाः ॥
बीजयोनिविशुद्धा ये श्रोत्रियाः संयतेन्द्रियाः ।
शुचान्नविरता नित्यन्ते पुनन्तीह दर्शनात् ॥
स्वयं नीत्वा विशेषेण दानन्तेषां गृहेष्वथ ।
निधापयेत्तु मद्भक्त्या तद्दानङ्कोटिसम्मितम् ॥
जाग्रतः स्वपतोवापि प्रवासे स्वगृहेऽथ वा ।
हृदयान्नि प्रपश्यामि यस्य विप्रस्य भारत ! ॥
स पूजितो वास्पृष्टो वा पृष्टोवापि द्विजोत्तमः ।
सम्भाषितो वा राजेन्द्र ! पुनातीह नरः सदा ॥
एवं सर्वास्ववस्थासु सर्वदानानि पाण्डव ! ।
मद्भक्तेभ्यः प्रदत्तानि तानि स्वर्गप्रदानि वै ॥

इति गौतमीये श्रीवैष्णवधर्मशास्त्रे तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

वैशम्पायनः । श्रुत्वैवं सात्विकं दानं राजसन्तामसन्तथा ।
पृथक् पृथक् फलञ्चैव गतिश्चैव पृथक् पृथक् ॥
अवितृप्तः प्रसन्नात्मा पुण्यधर्मांस्ततं पुनः ।
युधिष्ठिरो धर्मनित्यः केशवं पुनरब्रवीत् ॥

युधिष्ठिरः । द्विजयोनिविशुद्धानां लक्षणानि वदस्व मे ।
वीजदोषेण लोके च जायते च कथन्तराम् ॥
आचारदोषं देवेश । वक्तुमर्हस्यशेषतः ।
ब्राह्मणानां विशेषश्च गुणदोषौ च केशव ! ॥
चातुर्वर्ण्यस्य कृत्स्नस्य वर्तमानाः प्रतिग्रहे ।
केन विप्रा विशेषेण तरन्ते तारयन्ति च ॥
एतत्कथय देवेश ! त्वद्भक्तस्य नमोऽस्तु ते ।

श्रीभगवानुवाच । शृणु राजन्यथातत्वं वीजयोनिशुभाशुभम् ।
येन तिष्ठति लोकोऽयं विनश्यति च पाण्डव ! ॥
अवस्थितब्रह्मचर्य्योयं च विप्रो यथाविधि ।
स द्विजानामविज्ञेय स्तस्य वीजं शुभम्भवेत् ॥
कन्या चाक्षतयोनिः स्यात् कुलीना पितृमातृतः ।
ब्राह्मादिषु विवाहेषु परिणीता यथाविधि ॥
सा प्रशस्ता वरारोहा शुद्धयोनिः प्रशस्यते ।
कानीनश्च सहोढश्च तावुभौ कुण्डगोलकौ ॥
आरूढवनितो ज्ञातः पतितस्यापि यः सुतः ।
षडेते विप्रचण्डाला निषिद्धाः श्वपचादपि ॥
यो यत्र तत्र वा रेतः क्षिप्त्वा गुर्वीषु वाचयेत् ।
कामचारी स पापात्मा वीजं तस्याशुभम्भवेत् ॥
अशुभं तद्भवेद्वीजं शुद्धां योनिन्नचार्हति ।

दूषयत्येव तां वाणीं शृणुध्वं च हविर्यथा॥
गुर्वीयोनौ पतत् बीजं हाहाशब्दो द्विजन्मनाम्।
कुर्यात् पुरीषगर्तेषु पतितास्मि मतिः कुतः॥
मामधः पातयेदेष कामात्मा पापमोहितः।
अधोगतिं व्रजेत् क्षिप्र मिति शप्त्वा पतेत्तु यत्॥
आत्मा हि शुक्रमुद्दिष्टं दैवतं परम महत्।
तस्मात्सर्वप्रयत्नेन निरुन्ध्यात् शुक्रमात्मनः॥
आयुस्तेजो बलं वीर्य्यं प्रज्ञा श्रीश्च महायशः।
पुण्यञ्च मत्प्रियत्वञ्च हन्यते ब्रह्मचर्य्यया॥
ऋषिभिस्तत्र ह्मचर्य्यैर्गृहस्थाश्रममाश्रितैः।
पञ्चयज्ञपरैर्धर्मः स्थाप्यते पृथिवीतले॥
सायं प्रातस्तु ये सन्ध्यां सम्यक् नित्यमुपासते।
नावं वेदमधिकृत्य तारयन्ति तरन्ति च॥
यो जपेत् पावनीं देवीं गायत्रीं वेदमातरम्।
न सीदेत् प्रत्यगृह्णीत पृथिवीञ्चससागराम्॥
ये च स्युः संस्थिताः केचित् गृहे सूर्य्योदयादिव।
ते चास्य सौम्या जायन्ते शिवाशुभकरास्तथा॥
यत्र यत्रास्थितास्त्वेव दारुणाः पिशिताशनाः।
घोररूपा महाकाया वीजं न घोषयन्ति च॥
पुनन्तीह पृथिव्यां हि चीर्णा स्तत्व्रता नराः।
ये चीर्णा व्रतवेदा ये विकर्मपथमाश्रिताः॥
ब्राह्मणा नाममात्रेण तेऽपि पूज्या युधिष्ठिर!।
किं पुनर्यश्च सन्ध्ये द्वे नित्यमेवोपतिष्ठति॥
शीलमध्ययनं दानं शौचमार्दवमार्जवम्।

तस्माद्वेदान् विशिष्टान्वै मनुराह प्रजापतिः ॥
भूर्भुवः स्वरिति ब्रह्म यो वेद परमद्विजः।
स्वदारनिरतोदान्तः स च विद्वान् स भूसुरः।
सन्ध्यामुपासते विप्रा नित्यमेव द्विजोत्तमाः ॥
ते यान्ति नरशार्दूल ! ब्रह्मलोक मसंशयम्।
सावित्रीमात्रसारोऽपि वरोऽपि प्रसुयन्त्रितः ॥
नायन्त्रित श्चतुर्वेदी सर्वाशी सर्वविक्रयी।
सावित्रीञ्चैव वेदांश्च तुलया तुलयन् पुरा ॥
देवा ऋषिगणाश्चैव सर्वे ब्रह्मपुरःसराः।
चतुर्णामपि वेदानां साहि राजन् ! गरीयसी ॥
यथा विकसिते पुष्पे मधु गृह्णन्ति षट्पदाः।
समुत्सृज्य रसं सर्वं निरातङ्कमशारवत् ॥
एवं हि सर्ववेदानां सावित्री प्राणमुच्यते।
निर्जपा हीतरे वेदा सावित्री मन्तरेणच ॥
एवं हि यश्चतुर्वेदी शीलभ्रष्टः स कुत्सितः।
शीलव्रतसमायुक्तः सावित्रीपाठको वरः ॥
सहस्रं परमां देवीं शतमध्यान्दशावराम्।
सावित्रीं जप कौन्तेय ! सर्वपापप्रणाशिनीम् ॥
युधिष्ठिरः। त्रिलोकनाथ ! भोः कृष्ण ! सर्वभूतात्मकोह्यसि।
नानायोगपरश्रेष्ठ ! तुष्यसे केन कर्मणा ॥
श्रीभगवानुवाच। यदि भारसहस्रन्तु गुग्गुल्यादि प्रधूपयेत्।
करोषि च नमस्कार सुपहारञ्च कारयेत् ॥
पूजयेत् स्तुतिभिर्माञ्च ऋग्यजुःसामतस्तथा।
न तुष्यन्ति ते विप्रा नाहन्तुष्यामि भारत ! ॥

ब्राह्मणे पूजिते नित्यं पूजितोऽस्मि न संशयः ।
आतुष्टेचाहमाक्रुष्टोभवामि भरतर्षभ ! ॥
परमाधिगतिस्तेषां पूजयन्ति च मां हि ते ।
यदहं द्विजरूपेण वसामि वसुधातले ॥
यस्तान् पूजयति प्राज्ञो मद्गतेनान्तरात्मना ।
तमहंस्तेन रूपेण पश्यामि नरपुङ्गव ! ॥
काणाः कुब्जा वामनाश्च दरिद्रा व्याधितास्तथा ।
नावमान्या द्विजाः प्राज्ञैर्मम रूपा हि ते द्विजाः ॥
ये तेऽपि सागरान्तायां पृथिव्यां द्विजसत्तमाः ।
मम रूपेषु तेष्वेव मर्चितैर्ष्वर्चितो भवान् ॥
बहवस्तु न जानन्ति नरा ज्ञानबहिष्कृताः ।
यथाहं द्विजरूपेण वसामि वसुधातले ॥
अवमन्यन्ति ये विप्रान्विकर्मोपादयन्ति च ।
प्रेषयन्ते च सततं सुश्रूषाङ्कारयन्ति च ॥
भूतांस्तान् करपत्रेण यमदूता महाबलाः ।
निष्कृन्तन्ति यथाकाष्ठं सूत्रमार्गेण शिल्पिना ॥
आक्रोशपरिवादाभ्यां ये रमन्ते द्विजादिषु ।
तान् दूता यमलोकस्थान् निपात्य धरणीतले ॥
आक्रुश्योरसि पादेन अङ्गासंरक्तलोचनाः ।
अग्निवर्णैस्तु सदंशैर्यैर्मो हिंसन माचरेत् ॥
येच विप्रा निरीक्षन्ते पापाः पापेन चक्षुषा ।
अब्रह्मण्यश्रुतेर्बाह्या नित्यं ब्रह्मद्विषो नराः ॥
तेषां घोरमहाकायं वज्रतुल्या महाबलाः ।
उद्धरन्ति मुहूर्तेन खगाश्चक्षुर्यमाज्ञया ।

यः प्रहारं द्विजेन्द्राय दद्यात्कुर्य्याच्च शोणितम्।
अस्थिभागञ्च कः कुर्यात् प्राणैर्वा विप्रयोजयेत्॥
सोऽनुपूर्वेण यानीमान्नरकानेकविंशतिम्।
शूलमारोपितो गत्वा ज्वलनेनापि दह्यते॥
बहुवर्षसहस्राणि पच्यमानस्तथाकृशिराः।
नावमुच्येत दुर्मेधा न तस्य क्षीयते गतिः॥
ब्राह्मणानविचार्य्यैव जयन्वै धर्म्मकाङ्क्षया।
शतवर्षसहस्राणि तामिस्रोपरि पच्यते॥
उत्पाद्य शोणितं गात्रात् संरम्भा इति पूर्वकम्।
स पर्यायेण यातीमानरकानेकविंशतिम्॥
तस्मान्नाकुशलं ब्रूयात् न शुष्काङ्गिरमीरयेत्।
तच्छ्रुत्वापरुषां वाणीं चैवैतानप्यतिक्रमेत्।
ये विप्रं स्निग्धया वाचा पूजयन्ति नरोत्तमाः॥
तच्छ्रुत्वा वै स्तुतश्चैव भवामि च युधिष्ठिर!॥
सञ्जयन्ति च ये विप्रान् क्रोधयन्ति च भारत!।
आक्रुष्टस्तर्जितश्चाहं तैर्भवामि न संशयः॥
यच्चन्दनैश्चागुरुधूपदीपैरभ्यर्च्य यत्काष्ठमधूम मर्च्चात्।
तेनार्च्चितो नैव भवामि सद्यो विप्रार्चनादर्च्चितोऽहं भवामि॥
विप्रप्रसादाद्द धरणीधरोऽहं विप्रप्रसादादसुरान् जयामि।
विप्रप्रसादाच्च सदक्षिणोऽहं विप्रप्रसादादजितोऽहमस्मि॥
इति गौतमीये श्रीवैष्णवधर्मशास्त्रे चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः ।

युधिष्ठिरः । देव ! देवेश ! दैत्यघ्न ! परं कौतुहलं हि मे ।
एतत्कथय सर्वज्ञ ! त्वद्भक्तस्य ममाच्युत ! ॥
मानुष्यस्य च लोकस्य यमलोकस्य चान्तरे ।
कीदृशं किं प्रमाणं वा किमधिष्ठानमेव च ॥
तरन्ति मानवा देवाः केनोपायेन मानवाः ।
क्व वास्थिमांसनिर्मुक्ते पञ्चभूतविवर्जिते ॥
कथयस्व महादेव ! सुखदुःख मशेषतः ।
जीवस्य यमलोकेतु कर्मभिश्च शुभाशुभैः ॥
अनुबद्धस्य तैः पाशन्नीयमानस्य दारुणैः ।
स्वतुग्रदूतै दुराधर्षै र्घोरै र्घोरपराक्रमैः ॥
बद्धस्य ह्रियमाणस्य जनस्य च यमाज्ञया ।
पुण्यं पापं कथन्तिष्ठेत् सुखदुःखमशेषतः ॥
दुराधर्षैर्ह्रीयते वा मानुषैस्तैः कथं पुनः ।
किं वा तत्र महादेवाः कर्म कुर्वन्ति मानवाः ॥
कथं धर्मरता यान्ति देवता द्विजपूजकाः ।
कथं वा प्रेतकर्माणो धर्मं प्रेतपुरं नराः ॥
किं रूपं किं प्रदानं वा वर्णः को वास्य केशव ! ।
जीवस्य क्रोशतो नित्यं यमलोकं ब्रवीषि मे ॥
श्रीभगवानुवाच । शृणु राजन्यथातत्वं यमात्थ यत्प्रपृच्छसि ।
तत्वाहं कथयिष्यामि मद्भक्तस्य नरेश्वर ! ॥
षडशीतिसहस्राणि योजनानां शतानि च ।
मानुषस्य च लोकस्य यमलोकस्य चान्तरम् ॥

न तत्र वृक्षच्छाया च न तटाकं सरोऽपि वा।
न वाप्यो दीर्घिका वापि न कूपं वा युधिष्ठिर!॥
न मण्डपं सभा वापि न प्रभा न निवेशनम्।
न पर्वतो नदी वापि न भूमेर्विवरं क्वचित्॥
न ग्रामो नाश्रमोवापि नोद्यानं काननानि च।
न किञ्चिद्विश्रमस्थानं पथि तस्मिन्युधिष्ठिर!॥
जन्तोः सम्प्राप्तकालस्य वेदनार्त्तस्य वै भृशम्।
करणैस्त्यक्तदेहस्य प्राणैः कण्ठगतैः पुनः॥
शरीरांद्वाप्यते जीवो ह्यवशो मातरिश्वना।
निर्गतो वायुभूतस्तु षट्पकौशिकविग्रहात्॥
शारीरं यच्च तद्रूपं तद्वर्णस्तत्प्रमाणकम्।
अदृश्यं संप्रविष्टन्तु सोऽप्यदृष्टो न केनचित्॥
सोऽन्तरात्मा देहवतामष्टाङ्गो यस्तु सञ्चरेत्।
छेदनाद्भेदनाद्दाहात्तोदनाद्वा न नश्यति॥
नानारूपधरैर्घोरैः प्रचण्डैश्चण्डशासनैः।
नीयमानो दुराधर्षैर्यमदूतैर्यमाज्ञया॥
पुत्त्रदारं यैश्च पाशैः सन्निरुद्धो वशीकृतात्।
कर्मभिश्चापि नुगतैः कृतैः सुकृतदुष्कृतैः॥
अकृत्यमानकरणं बन्धुभि र्दुःखपीडितैः।
त्यक्त्वा बन्धुजनं सर्वं निरपेक्षस्तु गच्छति॥
मातृभिः पितृभिश्चैव भ्रातृभिर्मातुलैस्तथा।
दारैः पुत्रै र्वयस्यैश्च रुदद्भिस्त्यज्यते पुनः॥
अदृश्यमानस्तैर्दीनै रश्रुपूर्णमुखेक्षणैः।
स्वशरीरं परित्यज्य वायुभूतस्तु गच्छति॥

अन्धकारं परतरं महाघोरं तमोवृतिम् ।
दुःखाय दुष्प्रकाशञ्च तमाशु पापकर्मणाम् ॥
दुःसहं यमपूरञ्च दुर्निरीक्ष्यं दुरासदम् ।
दुराप मतिदुर्गञ्च पापिष्ठान्वान्नरोत्तमम् ॥
ऋषिभिः कथ्यमानन्तु पारम्पार्येण पार्थिव ! ।
त्रासं जनयति प्रायः पूयमानकथास्वपि ॥
अपि तैश्चैव गन्तव्या स्तद्दर्शान् वा युधिष्ठिर ! ।
प्राप्तकालेन सन्त्यज्य बन्धून् भोगान् धनानि च ॥
जरायुजैश्चाण्डजैश्च उद्भिज्जैः स्वेदजैस्तथा ।
जङ्गमैः स्थिरसंज्ञैश्च गन्तव्यं हि यमालयम् ॥
देवासुरमनुष्याद्यै र्वैवस्वतवशानुगैः ।
स्त्रीपुंनपुंनकैश्चापि पृथिव्यां जीवसंज्ञकैः ॥
मध्यमै र्युवभिर्बालै र्वृद्धैर्वापि तथैव च ।
जातमात्रैश्च गर्भस्थैर्गन्तव्यः स महालयः ॥
पूर्वाह्णे वा पराह्णे वा सन्ध्याकालेऽथवा पुनः ।
प्रदोषे पाश्चरात्रे वा प्रत्यूषे वाप्युपस्थिते ॥
प्रवासस्थैर्वनस्थैर्वा पर्वतस्थै र्जलस्थितैः ।
क्षेत्रस्थैर्वा स्थलस्थैर्वा गृहमध्यस्थितैरपि ॥
भुञ्जद्भिर्वा लिखद्भिर्वा खादद्भिर्वा नरोत्तम ! ।
आसीनैःश्चास्थितैर्वापि शयनीयागतैरपि ॥
जाग्रद्भिर्वा प्रसुप्तैर्वा गन्तव्यः स महापथः ।
यमदूतैर्दुराधर्षैः प्रचण्डैश्चण्डविक्रमैः ॥
आक्षिप्यमाणा ह्यवशा यान्ति शीघ्रं यमालयम् ।
क्वचिद्भीतैः क्वचित्स्तब्धैः प्रस्खलद्भिः क्वचित्क्वचित् ॥

दह्यद्भिर्वेदनार्त्तैस्तु गन्तव्यं यमसादनम् ।
निर्भर्त्स्यमानै रुदद्भिर्विक्रोशैर्भयविह्वलैः ॥
कण्टकाकीर्णमार्गेण तप्तवल्यङ्कपांशुना ।
दह्यमानैस्तु गन्तव्यं वानरैर्दानवर्जितैः ॥
काष्ठोपलशिलाघातैर्दण्डोल्मुककशाङ्कुशैः ।
हन्यमानैर्यमपुरं गन्तव्यं धर्मवर्जितैः ॥
मेदःशोणितपूयार्द्रैर्वस्त्रैर्गात्रैश्च भीषणैः ।
विह्वलेन प्रपाकीर्णं गन्तव्यं जीवघातकैः ॥
क्रुध्यद्भिश्च रुदद्भिश्च क्रोशद्भिश्चापि विस्वरम् ।
वेदनार्त्तैः पतद्भिश्च गन्तव्यं जीवघातकैः ॥
श्वभिर्व्याघ्रैर्वृकैः कङ्कैर्भक्ष्यमाणाः समन्ततः ।
तुद्यमानाश्च गच्छन्ति राक्षसैर्मांसखादिभिः ॥
महिषैश्च मृगैश्चापि शूकरैः क्रूरकर्मभिः ।
पीड्यमानाः खरध्वानं गन्तव्यं मांसखादिभिः ॥
सूचीसूतीक्ष्णदंष्ट्राभिर्मक्षिकाभिः समन्ततः ।
तुद्यमानैस्तु गन्तव्यं पापिष्ठैर्मधुघातकैः ॥
विवस्त्रं स्वामिनमिमं स्त्रियं वा घ्नन्ति ये नराः ।
शास्त्राणि निन्द्यमानैस्तु गन्तव्यं तैर्यमक्षयम् ॥
घातयन्ति च ये पापा दुःखमापादयन्ति च ।
राक्षसैश्च श्वभिश्चैव भक्ष्यमाणा व्रजन्ति ते ॥
ये हरन्तीह वस्त्राणि शय्याप्रावरणानि च ।
ते यान्ति विद्रुता नग्नाः पिशाचा इव तत्पथम् ॥
गोधयान् ये हिरण्यञ्च खलु धनगृहं तथा ।
ये हरन्ति दुरात्मानः परस्वरं पापकारिणः ॥

पाषण्डैस्तस्करैर्दण्डैः काष्ठघातैर्निरीश्वरैः।
हन्यमानैः क्षताकीर्णैर्गन्तव्यं यमसादनम्॥
ये ब्रह्मस्वं हरन्तीह नरा नाकनिपातिनम्।
आक्रोशयन्ति वा नित्यमाहरन्ति च ये द्विजान्॥
शुष्ककण्ठा निबध्यन्ते छिन्नजिह्वाच्छिन्ननासिकाः।
पूयशोणितदुर्गन्धैर्भक्ष्यमाणाश्च जम्बुकैः॥
चण्डालैर्दृष्टयैश्चण्डैर्भक्ष्यमाणाः समन्ततः।
क्रोशन्तः करुणं घोरं गच्छन्ति यमसादनम्॥
तत्रैव पतिताः पापाः विष्ठापूयेष्वनेकशः।
मज्जन्ते वर्षकोटीसु क्लिश्यन्ते वेदनान्विताः॥
ततश्च मुक्ताः कालेन लोके चास्मिन्नराधमाः।
विष्ठाक्रिमित्वं गच्छन्ति पतन्ति च ततोऽर्णवे॥
विद्यमानधनैर्यैस्तु लोभदम्भादृतान्वितैः।
श्रोत्रियेभ्यो न दत्तानि धनानि बहुधा नृप!॥
श्रीपाशनिबद्धास्ते हन्यमानाश्च राक्षसैः।
क्षुत्पिपासाश्रमार्तास्तु यान्ति प्रेतपुरन्नराः॥
अदत्तदाना गच्छन्ति शुष्ककण्ठास्यतालुकाः।
अन्नं पानीयसहितं प्रार्थयन्तः पुनः पुनः॥
श्वासैर्विभक्षात्तृष्णार्त्ता गन्तुं नैवाद्यशक्नुमम्।
ममान्ते दीयतां स्वामिन्! पानीयं दीयतामिति॥
इति ब्रुवन्तस्ते दूताः प्राप्नुवन्ति यमालयम्॥
वैशम्पायनः। तच्छ्रुत्वा वचनं विष्णोः पपात भुवि पाण्डवः।
निःसंज्ञोऽभूद्भयत्रस्तो निश्चेष्टो भयविह्वलः॥
ततो लब्ध्वा शनैः संज्ञां समाश्वस्तोऽच्युतेन सः।

नेत्रे प्रक्षाल्य तोयेन भूयः केशव मब्रवीत् ॥
युधिष्ठिरः। भीतोऽस्म्यहं महादेव! श्रुत्वा वाक्यस्य विस्तरम्।
केन दानेन तं मार्गं तरन्ति पुरुषाः सुखम् ॥
श्रीभगवानुवाच। इह ये धार्मिका लोके जीवघातकवर्जिताः।
गुरुशुश्रूषया युक्ता देवब्राह्मणपूजकाः ॥
अस्मान्मानुष्यलोकान्ते ससहायाः सबान्धवाः।
यमध्वानन्तु ते यान्ति यथावत्तु निबोध मे ॥
ब्राह्मणेभ्यः प्रदानानि नानारूपाणि पाण्डव!।
ये प्रयच्छन्ति विद्वांस्ते सुखा यान्ति तत्पदम् ॥
अन्नञ्च ये प्रयच्छन्ति ब्राह्मणेभ्यः सुसंस्कृतम्।
श्रोत्रियेभ्यो विशेषेण भक्त्या परमया युताः ॥
ते विमानै र्महात्मानो यान्ति चित्रै र्यमालयम्।
सेव्यमाना वरस्त्रीभि र्देवसङ्घै र्महापथे ॥
ये तु नित्यं प्रभाषन्ते प्रिय मकिल्बिषं वचः।
ते च यान्ति महाशुभै र्विमानै स्तै र्यमालयम् ॥
कपिलादीनि दानानि श्रद्धायुक्ताश्च ये नराः।
ब्राह्मणेभ्यः प्रयच्छन्ति श्रोत्रियेभ्यो विशेषतः ॥
ते यान्त्यादित्यवर्णाभै र्विमानै र्हेमभूषणैः।
वैवस्वतपुरं रम्य मप्सरोभिर्निषेविताः ॥
उपानहौ च छत्रञ्च शयनान्यासनानि च।
विप्रेभ्यो ये प्रयच्छन्ति वस्त्राण्याभरणानि च ॥
ते यान्त्यश्वै र्वृषैश्चैव कुञ्जरैश्चाप्यलङ्कृतैः ॥
धनदस्य पुरं रम्यं दण्डच्छत्रविभूषिताः।
येच हृत्वांश्च दास्यन्ति भोज्यं रम्य तथैव च।

स्निग्धतां चापि विप्रेभ्यश्छायया परया युताः॥
ते यान्ति काञ्चनैर्यानैर्युता वैवस्वतक्षयम्।
वरस्त्रीभिर्युवतिभिः सेव्यमानाः समन्ततः॥
येच क्षीरं प्रयच्छन्ति घृतं दधि गुड़ं मधु।
ब्राह्मणेभ्यः प्रयच्छन्ति श्रद्दधानाः सुसंस्कृताः॥
चक्रवाकप्रयुक्तैस्तु यानैरुक्ममयैः शुभैः।
यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम्।
ये फलानि प्रयच्छन्ति पुष्पाणि सुरभीणि च॥
हंसयुक्तैर्विमानैस्तु यान्ति ब्रह्मपुरं नराः।
ये प्रयच्छन्तिविप्रेभ्यो विविधान्नं घृतप्लुतम्॥
ते यान्त्यमलवर्णाभै र्विमानैर्वायुवेगिभिः।
पुरं तत्प्रेतनाथस्य नानाजलसमाकुलम्॥
पानीयं ये प्रयच्छन्ति सर्वभूतप्रजीवनम्।
ते सुतृप्ताः सुखा यान्ति विमानैर्हंसचोदितैः॥
ये तिलांस्तिलधेनुं वा घृतं सर्वं मधापि वा।
श्रोत्रियेभ्यः प्रयच्छन्ति सौम्यभावसमन्विताः॥
सोममण्डलसङ्काशैर्यानैस्ते यान्ति निर्मलैः।
गीयमानास्तु गन्धर्वैर्वैवस्वतपुरन्नरः॥
येषां वाप्यश्चतुः पञ्च तटाकानि सरांसि च।
दीर्घिकाः पुष्करिण्यश्च सजलाश्च जलाशयाः॥
यानैस्ते यान्तिस्वर्णाभैर्दिव्यघण्टानिनादितैः।
चामरैस्तालवृन्तैश्च वीज्यमाना महाप्रभाः॥
नित्यतृप्ता महात्मानो गच्छन्ति यमसादनम्।
येषां देवगृहाणीह च्छत्राण्याभरणानि च॥

मनोहराणि कान्तानि दर्शनीयानि भूमिप !।
ते व्रजन्त्यमलाभ्राभै विमानैर्वायुवेगिभिः॥
पुरं तत् प्रेतनाथस्य नानाजनसमाकुलम्।
वैवस्वतञ्च पश्यन्ति सुखचित्तं सुखस्थितम्॥
यमेन पूजिता यान्ति यमसालोक्यतां गतिम्।
मृतानुद्दिश्य लोकेषु प्रपातशालमुच्छ्रितम्॥
शीतलं सलिलं रम्यं तिष्ठ तेभ्यो दिशन्ति ये।
ते तु तृप्तिं परां प्राप्ताः सुखं यान्ति महापथम्॥
काष्ठपादुकतर्दायां तमध्वानं सुखन्तथा।
सुवर्णमणिपीठेषु पादौ कृत्वा रथोत्तमम्।
आरामान् वृक्षषण्डांश्च रोपयन्ति च ये नराः॥
सम्वर्धयन्तिचाव्यग्राः फलपुष्पोपशोभितान्।
वृक्षच्छायासु रम्यासु तमध्वानं स्वलङ्कृतम्॥
यानैस्तु वाहनैर्दिव्यैः पूज्यमाना मुहुर्मुहुः।
सुवर्णं रजतं वापि विद्रुमं मौक्तिकं तथा॥
ये प्रयच्छन्ति ते यान्ति विमानैः कनकोज्ज्वलैः।
ते व्रजन्ति वरस्त्रीभि सेव्यमाना यथासुखम्॥
भूमिदा यान्ति तं लोकं सर्वकामैः सुतर्पिताः।
उदितादित्यसङ्काशैर्विमानै हंसयोजितैः।
कन्याश्च ये प्रयच्छन्ति विप्राय श्रोत्रियाय च॥
दिव्यकन्यावृता यान्ति विमानैस्ते यमालयम्।
सुगन्धान् गन्धसंयोगान् पुष्पाणि सुरभीणि च॥
प्रयच्छन्ति द्विजाग्रेभ्यो ये भक्त्या परया युताः।
दीपदा यान्ति यानैश्च दीपयन्तो दिशो दश॥

आदित्यसदृशाकारै र्दीप्यमाना यथाग्नय:।
गृहावसथदाना ये गृहै: काञ्चनवेदिभि:॥
व्रजन्ति बालसूर्य्याभै र्धर्मराजपुरन्नरा:।
जलभाजनदातार: कुण्डिकाकरकाप्रदा:॥
पूज्यमाना वरस्त्रीभि र्यान्ति तस्मान्महागजै:।
पादाभ्यङ्गं शिरोऽभ्यङ्गं यानपादोदकं तत:॥
ये प्रयच्छन्ति विप्रेभ्यस्ते यान्त्यश्वैर्य्यमालयम्।
विश्रामयति यो विप्रं श्रान्तमध्वनि कर्शितम्॥
चक्रवाकै: प्रयुक्तेन याति यानेन सोऽपि च।
स्वागतेन च यो विप्रं पूजयेदासनानि च॥
स गच्छति त मध्वानं परमनिर्वृतम्।
नमोब्रह्मण्यदेवाय सर्वदाचाभिवादयेत्॥
प्रयत प्रयतोनित्यं स सुखं याति तत्फलम्।
नम: सर्वसमेभ्यश्च त्वभियाय दिने दिने॥
नमस्करोति यो भक्त्या स सुखं याति तत्फलम्।
नमोऽस्तु विप्रदत्ताय तुभ्यं देहि दिने दिने॥
भूमिमाक्रमतेप्रात: शयनादुत्थितस्तु य:।
स सर्वकामतृप्तात्मा सर्वभूषणभूषित:॥
याति यानेन दिव्येन सुखं वैवस्वतालयम्।
अनन्तराशितोये तु दम्भाहङ्कारवर्जित:॥
तेऽपि सारसयुक्तेन यान्ति यानेन वै सुखम्।
येचाप्येकेन भक्तेन वर्तन्ते दम्भवर्जिता:॥
हंसयुक्तैर्विमानैस्ते सुखं यान्ति यमालयम्।
चतुर्थेनैव भुक्तेन वर्तन्ते ये जितेन्द्रिया:॥

यान्ति ते धर्मनगरं यानैर्वह्नियोजितैः।
आनीय दिवसेनेह भुञ्जन्ते ये जितेन्द्रियाः॥
तेऽपि हस्तिरथैर्यान्ति तत्पथं कनकोज्ज्वलैः।
षष्ठानुकामिकोयस्तु वर्षमेकन्तु वर्तते॥
कामक्रोधविनिर्मुक्तः शुचिर्नित्यजितेन्द्रियः।
स याति कुञ्जरस्थस्तु जयशङ्खरवैर्युतः।
पक्षोपवासिनो यान्ति यानैः शार्दूलयोजितैः।
धर्मराजपुरं रम्यं दिव्यस्त्रीगणसेवितम्॥
ये मासोपवासं वै कुर्वन्ते संयतेन्द्रियाः।
तेऽपि सूर्योदयप्रख्यै र्यान्ति यानै र्यमालयम्॥
अग्निप्रवेशं पञ्चापि कुरुते मद्गतात्मना।
स यात्यग्निप्रकाशेन विमानेन यमालयम्॥
प्राणांस्त्यजति यो विप्रो मां प्रपन्नोऽप्यनाशकम्।
स बालार्कप्रकाशेन व्रजेद्यानेन तत्फलम्॥
प्रविष्टोऽन्तर्जले यस्तु प्राणांस्त्यजति मानवः।
सोममण्डलकल्पेन याति यानेन तत्पथम्॥
स्वशरीरं हि रक्षार्था मज्जनाय प्रयच्छति।
स याति रथमुख्येन काञ्चनेन यमालयम्॥
गोकृते स्त्रीकृते चैव तथापि प्रकृतेऽपि च।
ते यान्त्यमरकन्याभिः सेव्यमानो रविप्रभः।
ये यजन्ति द्विजश्रेष्ठाः क्रतुभिर्भूरिदक्षिणैः॥
हंससारसयुक्तेन याति यानेन तत्पथम्।
परपीड़ामकृत्वैव भृत्यान् बिभ्रति ये नराः॥
तत्पथं ते सुखं यान्ति विमानैः काञ्चनोज्ज्वलैः।

ये समाख्याय भूतेषु जीवानामभयप्रदाः ॥
क्रोधलोभविनिर्मुक्ता निगृहीतेन्द्रियास्तथा ।
पूर्णचन्द्रप्रतिकाशै र्विमानैस्ते महाप्रभाः ॥
यान्ति वैवस्वतपुरं देवगन्धर्वसेविताम् ।
ये मामेकात्मभावेन भक्त्या त्र्यम्बकमेव वा ॥
पूजयन्ति नमस्यन्ति स्तुवन्ति च दिने दिने ।
धर्मराजपुरं यान्ति याने स्तव समप्रभैः ॥
पूजितास्तत्र धर्मेण स्वधर्माद्यादिभिर्गुणैः ॥
यान्त्येव मम लोकं वा रुद्रलोक मथापिवा ॥
इति श्रीगौतमीये वैष्णवधर्मशास्त्रे पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

वैशम्पायनः । श्रुत्वा धर्मपुरार्थं वा जीवानां गमनं तथा ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ।
युधिष्ठिरः । देव ! देवश ! दैत्यघ्न ! सदा देवैरभिष्टुत ! ॥
भवान् भवकर ! श्रीमान् सहस्रादित्यतेजसः ।
सर्वसंहारसर्वज्ञ ! सर्वधर्मप्रवर्तक ! ॥
सर्वदानफलं सौम्य ! कथयस्व ममाच्युत ! ।
दानं कृत्वा कथं कृष्ण ! कीदृशाय द्विजाय वै ॥
कीदृशं वा तपः कृत्वा तत्फलं वाथ भुज्यते ।
वैशम्पायनः । एवमुक्तो हृषीकेशो धर्मपुत्रेण धीमता ॥
उवाच धर्मपुत्राय धर्मान् पुण्यान् महोदयान् ।
श्रीभगवानुवाच । शृणुष्वावहितो राजन् ! पूतम्पावनमुत्तमम् ।
सर्वदानफलं सौम्य ! तेन आद्यमकर्मणाम् ॥

यच्छ्रुत्वा पुरुषः स्त्री वा नष्टपापाः समाहिताः।
तच्छ्रवणात्पूततां यान्ति पापकर्मरता अपि॥
एकाहमपि कौन्तेय! भूमावुत्पादितं जलम्।
सप्तं तारयते पूर्वां तृष्णा यत्र च गौर्भवेत्॥
पानीयं परमं लोके जीवानां जीवनं परम्।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती॥
पानीयस्य गुणा दिव्याः परलोकसुखावहाः।
तत्र पुण्योदकी नाम नदी परमपावनी॥
कामन्ददाति राजेन्द्र! तोयदानं यमालये।
शीतलं सलिलं तस्यामक्षय्यममृतोपमम्॥
क्षीरतोयं प्रदातॄणां भवेद्दीर्घं सुखावहम्।
ये चापि तोयदातारो भूयस्तेषां विधीयते।
प्रशान्त्यत्यन्नपानेन विभक्ता च युधिष्ठिर!।
तृषितस्य नचान्येन पिपासापि प्रशाम्यति॥
तस्मात्तोयं सदा देयं तृषितेभ्यो विजानता।
अग्निर्मूर्त्तिः क्षितिर्योनिः सृतस्य च सुखम्भुवा॥
तत्तोयं सर्वदानानां मूलमित्युच्यते बुधैः।
यतः सर्वाणि भूतानि जीवन्ति प्रभवन्ति च॥
तस्मात्सर्वेषु दानेषु तोयदानं विशिष्यते।
सर्वदानतपोयज्ञैर्यत्प्राप्यं फलमुत्तमम्॥
तत्सर्वं तोयदानेन प्राप्यते नात्र संशयः।
ये प्रयच्छन्ति विप्रेभ्यः स्वन्नदानं सुसंस्कृतम्।
तस्माज्जाताः स्वयं प्राणा भवन्ति पुरुषर्षभ!॥
अन्नभुक्तश्च भुक्तश्च अन्ने जीवः प्रतिष्ठितः।

इन्द्रियाणि च बुद्धिश्च पुष्यन्तेऽन्नेन नित्यशः ॥
अन्नेनैव हि जीवन्ति सर्वभूतानि पाण्डव ! ।
तेजोबलञ्च रूपञ्च सत्वं वीर्यं द्युतिर्मतिः ॥
ज्ञानमेव तथायुश्च सर्वमन्ने प्रतिष्ठितम् ।
देवदानवतिर्यक्षु सर्वलोकेषु सर्वथा ॥
सर्वकालं हि सर्वेषा मन्नं प्राणाः प्रतिष्ठिताः ।
अन्नं पूज्यं यतो रूप मन्नं नित्यं नमस्कृतम् ॥
सर्वभूतमयञ्चैव सर्वप्राणमयं स्थितम् ।
अन्नेनाधिष्ठितप्राणोऽन्नपानो व्यानमेव च ॥
उदानञ्च समानञ्च धारयन्ति शरीरिणः ।
शयनोत्थानगमनग्रहणाकर्षणानि च ॥
सर्वसत्वकृतं कर्म अन्नादेव प्रवर्तते ।
चतुर्विधानि भूतानि जङ्गमानि स्थिराणि च ॥
अन्नाद्भवन्ति राजेन्द्र ! श्रुतिरेषा सनातनी ।
विद्यास्थानानि सर्वाणि सर्वयज्ञाश्च पावनाः ॥
अन्नाद्यस्मात् प्रवर्त्तन्ते तस्मादन्नं परं स्मृतम् ।
देवा रुद्रादयः सर्वे पितरो जनयस्तथा ॥
यस्मादन्नेन तुष्यन्ति तस्मादन्नं विशिष्यते ।
यस्मादन्नात्प्रजाः सर्वाः कल्पे कल्पेऽसृजत्प्रभुः ॥
तस्मादन्नात्परं दानं न भूतो न भविष्यति ।
यस्मादन्नं प्रवर्तन्ते धर्मार्थकाममेव हि ॥
तस्मादन्नात्परं दानं नामुत्रेह च पाण्डव ! ।
यक्षरक्षोगणा नागा भूता दैत्याश्च दानवाः ॥
तुष्यन्त्यन्नेन यस्मात्तु तस्मादन्नं परम्भवेत् ।

परान्नमुपभुञ्जानो यत्कर्म कुरुते शुभम् ॥
तच्छुभैकस्य भागस्तु कर्तुर्भवति भारत ! ।
अन्नदस्य त्रयो भागा भवन्ति भरतर्षभ ! ॥
तस्मादन्नं प्रदातव्यं ब्राह्मणेभ्यो विशेषतः ।
ब्राह्मणाय दरिद्राय योऽन्नं सम्वत्सरं नृप ! ॥
श्रोत्रियाय प्रयच्छन् वै पाकवेदविवर्जितः ।
दम्भाचारवियुक्तस्तु परां भक्तिमुपागतः ॥
स्वधर्मेणार्जितायान्नं तस्य पुण्यफलं शृणु ।
गोसहस्रप्रदानेन यत्पुण्यं समुदाहृतम् ॥
तत्पुण्यफलमाप्नोति नरो वै नात्र संशयः ।
अर्धसम्वत्सरं दद्यादग्रभैक्षमयाचने ॥
विविधं परमं भूप ! तस्य पुण्यफलं शृणु ।
कपिलाद्यसहस्रे तु दत्ते यत्पुण्यमिष्यते ॥
तत्पुण्यमखिलं प्राप्य शक्रलोकं महीयते ।
स शक्रभवने रम्ये वर्षकोटिशतं नृप ! ॥
यथाकामं महातेजाः क्रीड़त्यप्सरसाङ्गणैः ।
अग्रान्नं यो दिनं दद्याद्द्विजाय नियतव्रतम् ॥
दशवर्षाणि राजेन्द्र ! तस्य पुण्यफलं शृणु ।
कपिलाशतसहस्रस्य विधिदत्तस्य यत्फलम् ॥
तत्पुण्यफलमादाय पुरन्दरपुरं व्रजेत् ।
स शक्रभवने रम्ये कामरूपी यथासुखम् ॥
दशकोटिसमा राजन् ! क्रीड़ते सुरपूजितः ।
शक्रतुल्यावतीर्णस्य अक्लेशेन महद्युतिम् ॥
चतुर्वेदी द्विजः श्रीमान् जायते राजपूजितः ।

अध्वश्रान्ताय विप्राय क्षुधितायान्नकाङ्क्षिणे ॥
देशकालाभियाताय दीयते पाण्डुनन्दन ! ।
याचतेऽन्नं न दद्याद्वा ह्यसमाने पराक्रमे ॥
स लुब्धो नरकं याति कर्मणां कालसूत्रकम् ।
स तत्र नरके घोरे लोभमोहितचेतसः ॥
शतवर्षसहस्राणि क्लिश्यते वेदनार्दितः ।
तस्माच्च नरकान्मुक्तः कालेन महता हि सः ॥
दरिद्रो मानुषे लोके चण्डालेष्वेव जायते ।
यस्तु पांसुलपादस्तु दूराध्वश्रमकर्षितः ॥
क्षुत्पिपासाश्रमार्त्तश्च श्रमखिन्नमति र्द्विजः ।
प्रयच्छन् वै तु दातारं गृहस्यान्ते च यस्य वै ॥
तं पूजयति वान्नेन सोऽतिथिः स्वर्गसंक्रमः ।
तस्मिंस्तुष्टे नरश्रेष्ठ ! तुष्टाः स्युः सर्वदेवताः ॥
न तथा हविषा होमैर्न पुष्पैर्नानुलेपनैः ।
अग्नयः प्रार्थयिष्यन्ति यथा ह्यतिथिपूजनात् ॥
कपिलायान्तु दत्तायां विधिवज्ज्येष्ठपुष्करे ।
न तत्फलमवाप्नोति यत्पुनर्विप्रभोजनात् ॥
द्विजपादजलक्लिन्ना यावत्तिष्ठति मेदिनी ।
तावत् पुष्करपर्णेन पिबन्ति पितरो जलम् ॥
देवमाल्यापनयनं द्विजोच्छिष्टापमार्जनम् ।
श्रान्तसं वाहनञ्चैव तथा पादावसेचनम् ॥
प्रतिश्रयप्रदानञ्च तथा शय्यासनस्य च ।
एकैकं पाण्डवश्रेष्ठ ! गोप्रदानाद्विशिष्यते ॥
पादोदकं पादघृतं जीवमन्नं प्रतिश्रयम् ।

ये प्रयच्छन्ति विप्रेभ्यो नोपसर्पति तान् यमः ॥
विप्रातिथ्ये कृते राजन्! भक्त्या शुश्रूषितेऽपि च ।
देवाः शुश्रूषिताः सर्वे त्रयस्त्रिंशद्भवन्त्यतः ॥
अभ्यागतो ज्ञानपूर्वस्त्वज्ञातोऽतिथिरुच्यते ।
तयोः पूजामधः कुर्यादिति पौराणिकी श्रुतिः ॥
पादाभ्यङ्गोऽन्नपानैस्तु योऽतिथिं पूजयेन्नरः ।
पूजितस्तेन राजेन्द्र! भवेद्देव न संशयः ॥
शीघ्रं पापविनिर्मुक्तो मया चानुगृहीतकः ।
विमानेनैव कल्पेन यमलोकं स गच्छति ॥
अभ्यागतं श्रान्तमनुव्रजन्ति देवाश्च सर्वे पितरोऽग्नयश्च ।
अस्मिन् द्विजे तत्र च पूजिताः स्युर्गते निराशा अपि ते प्रयान्ति॥
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च ॥
वर्जितः पितृभिर्लुब्धः स देवैरग्निभिः सदा ।
निरयं रौरवं गत्वा दशवर्षाणि पच्यते ॥
ततश्चापि च्युतः कालादिह लोके नराधमः ।
श्वा वै द्वादशवर्षाणि जायते क्षुत्पिपासितः ॥
चण्डालोऽप्यतिथिः प्राप्तो देशकालौ च काङ्क्षया ।
अभ्युद्गतगृहस्थेन पूजनीयः स सर्वथा ॥
अनर्चयित्वा योऽश्नाति लोभमोहितचेतसः ।
चण्डालत्व मवाप्नोति दशवर्षाणि पाण्डव! ॥
निराशमतिथिं कृत्वा भुक्तवान् सं प्रणष्टवान् ।
न जानात्यात्मनात्मानं विष्ठाकूपे निपातितम् ॥
मोघं धूपं प्रोत्नयन्ति मोघं स्यात्तत्तु पच्यते ।

मोघमन्नस्य चाश्नन्ति योऽतिथिं न प्रपूजयेत् ॥
साङ्गोपाङ्गांस्तु यो वेदान् पठतीह दिने दिने।
नचातिथिं पूजयति वृथा स पठति द्विजः ॥
नित्यमग्नौ पाकयज्ञैः सोमसंस्थाभिरेव च।
ये यजन्ति नचाश्नन्ति गृहेष्वतिथिमागतम् ॥
तेषां यशोभिः कामानां दत्तमिष्टञ्च यद्भवेत्।
वृथा भवति तत्सर्वमाशया यतया हृतम् ॥
देशं कालञ्च पात्रञ्च स्वशक्तिञ्च निरीक्ष्य च।
अल्पं वा सुमहद्वापि कुर्य्यादातिथ्यमात्मवान् ॥
सुमुखः सुप्रसन्नात्मा धीमानतिथिमागतम्।
स्वागतेनासनेनाद्भिरन्नाद्येन च पूजयेत् ॥
प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डितएव वा।
प्राप्तो यो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः ॥
क्षुत्पिपासाश्रमार्त्ताय देशकालगताय च।
सत्कृत्यान्नं प्रदातव्यं यज्ञस्य फलमिच्छता ॥
भोजयेदात्मनश्रेष्ठान्विधिवत्पूजितात्मनः।
अन्नं प्राणो मनुष्याणां मन्नदः प्राणदोभवेत् ॥
तस्मादन्नं विशेषेण दातव्यं भूति मिच्छता।
अन्नदः सर्वकामैस्तु सूपत्नस्त्वलङ्कृतः ॥
पूर्णचन्द्रप्रकाशेन विमानेन विराजितः।
सेव्यमानो वरस्त्रीभि र्देवलोकं स गच्छति ॥
क्रीड़ित्वा तु तत स्तस्मिन्वर्षकोटिं यथामरम्।
ततश्चापि च्युतः कालादिह लोके महायशाः ॥
वेदशास्त्रार्थतत्वज्ञो भोगवान् ब्राह्मणो भवेत्।

सर्वातिथ्यन्तु यः कुर्य्यान्मनुष्य स्तूपजायते॥
महाधनपतिः श्रीमान् वेदवेदाङ्गपारगः।
सर्वशास्त्रार्थविद्विद्वान् भोगवान् ब्राह्मणोभवेत्॥
सर्वातिथ्यन्तु यः कुर्य्याद्वर्षमेकमकल्मषम्।
धर्मार्जितधनोभूत्वा पाकभेदविवर्जितः॥
देवानिव स्वयं विप्रानर्चयित्वा पितॄनपि।
विप्रो नाशाशनाशी य स्तस्य पुण्यफलं शृणु॥
वर्षेणैकेन यावन्ति पुण्यानश्नन्ति वै द्विजाः।
तावद्वर्षसहस्राणि मम लोके महीयते॥
ततश्चापि च्युतः कालादिह लोके महीयते।
वेदशास्त्रार्थतत्त्वज्ञो भोगवान् ब्राह्मणोभवेत्॥
सर्वातिथ्यन्तु यः कुर्य्याद्यथाश्रद्धन्नरेश्वर!।
अकालनियमेनापि सत्यवादी जितेन्द्रियः॥
सत्यसन्धो जितक्रोधः सदा धर्मेषु निष्ठितः।
अधर्मभीरु र्धर्मिष्ठो मायामात्सर्य्यवर्जितः॥
श्रद्दधानः शुचिर्नित्यं पाकभेदविवर्जितः।
स विमानेन दिव्येन दिव्यरूपी महायशाः॥
पुरन्दरपुरं याति गीयमानोऽप्सरोगणैः।
मन्वन्तरञ्च तत्रैव क्रीड़ित्वा देवपूजितः॥
मानुष्यं लोकमागम्य भोगवान् ब्राह्मणोभवेत्।
दशजन्मानि भूपत्वं प्राप्नुयाद्राजपूजितः॥
जातिस्मरश्च भवति यत्र तत्रैव जायते।
अतः परं प्रवक्ष्यामि भूमिदान मनुत्तमम्॥
यः प्रयच्छति विप्राय भूमिं रम्यां सुदक्षिणाम्।

श्रोत्रियाय दरिद्राय साग्निहोत्राय पाण्डव ! ॥
स सर्वकामतृप्तात्मा सर्वरत्नविभूषितः ।
सर्वपापविनिर्मुक्तो दीप्यमानो रविर्यथा ॥
बालसूर्य्यप्रकाशेन विचित्रध्वजशोभिना ।
याति यानेन दिव्येन मम लोकं महातपाः ॥
तत्र दिव्याङ्गनाभिस्तु सेव्यमानो यथासुखम् ।
कामगः कामरूपी च क्रीडत्यप्सरसाङ्गणैः ॥
यावद्विभर्त्ति लोकान्वै भूमिः कुरुकुलोद्वह ! ।
भूमिदानस्य पुण्यस्य क्षयो नैवोपपद्यते ॥
ब्राह्मणाय दरिद्राय भूमिं दत्त्वा तु यो नरः ।
न हिंनस्ति नरव्याघ्र ! तस्य पुण्यफलं शृणु ॥
सप्तद्वीपसमं प्राप्तं यत्र धान्यसमाकुला ।
सशैलवनदुर्गान्ता तेन दत्ता भवेन्मही ॥
भूमिं हि दीयमानाञ्च श्रोत्रियायाग्निहोत्रिणे ।
सर्वभूतानि मन्यन्ते मे ददातीति हि श्रुतिः ॥
सुवर्णमणिरत्नानि धनधान्यवसूनि च ।
सर्वदानानि वै राजन् ददाति वसुधान्ददत् ॥
सागरान् सरितः शैलान् ! समानि विषमाणि च ।
सर्वगन्धान्रसान् स्नेहान् ददाति वसुधां ददत् ॥
ओषधिः फलसम्पन्नान् नगान् पुष्पफलोपगान् ।
कमलोत्पलषण्डानि ददाति वसुधां ददत् ॥
धर्मान् कामान् तथार्थञ्च वेदान् यज्ञांस्तथैव च ।
स्वर्गमोक्षगतिञ्चैव ददाति वसुधां ददत् ॥
अग्निष्टोमादिभिर्यज्ञैर्ये यजन्ति सदक्षिणैः ।

न तत्फलं भवेत्तेषां भूमिदानस्य यत्फलम् ॥
श्रोत्रियाय महीं दत्त्वा यो हिनस्ति न पाण्डव!
तज्जनाः कथयिष्यन्ति यावल्लोकाः प्रतिष्ठिताः ॥
तावत्स्वर्गोपभोगानां भोक्तारं पाण्डुनन्दन!।
शस्यपूर्णां महीं यस्तु श्रोत्रियाय प्रयच्छति ॥
पितरस्तस्य तुष्यन्ति यावदाभूतसंप्लवम्।
मम रुद्रस्य सवितुस्त्रिदशानां तथैव च ॥
प्रीतये विद्धि राजेन्द्र! भूमिं दत्त्वा द्विजाय वै।
स च पुण्येन पूतात्मा दाता भूमे युधिष्ठिर! ॥
मयि सायुज्यतां याति नात्र कार्या विचारणा।
यत्किञ्चित्कुरुते पापं पुरुषो वृत्तिकर्षितः ॥
स च गोकर्णमात्रेण भूमिदानेन शुध्यति।
वेदानां पारगो यस्तु परं पुण्य मुदाहृतम् ॥
भूमेर्गोकर्णमात्रेण तत्फलन्तु विधीयते।
मासोपवासे यत्पुण्यं चीर्णे चान्द्रायणेऽपिवा ॥
भूमे गोकर्णमात्रेण तत्फलन्तु विधीयते ॥
युधिष्ठिरः। देवदेव! नमस्तेऽस्तु वासुदेव! सुरेश्वर!।
गोकर्णस्य प्रमाणं मे वक्तुमर्हसि मानद! ॥
श्रीभगवानुवाच। शृणु गोकर्णमात्रस्य प्रमाणं पाण्डुनन्दन!।
त्रिंशद्दण्डप्रमाणेन प्रमितं सर्वतोदिशम् ॥
प्रत्यक्परागपि राजेन्द्र! तत्तथा दक्षिणोत्तरम्।
तत् गोकर्णमिति प्राहुः प्रमाणाङ्करणे नृप! ॥
सर्वेषां गोशतं यत्र सुखं तिष्ठति यत्नतः।
स वत्स! नरशार्दूल! वै तद्गोकर्ण मुच्यते ॥

किङ्करा मृत्युदण्डाश्च कूमपाकाश्च दारुणाः।
घोराश्च वारुणाः पापा: नोपसर्पन्ति भूमिदम्॥
निराधारा रवाद्यास्तु तथा वैतरणी नदी।
तीव्रास्तु यातनाः कष्टाः नोपसर्पन्ति भूमिदम्॥
चित्रगुप्तः कलिः कालो मृहा वै मृत्युरेव च।
यमश्च भगवान् साक्षात्पूजयन्ति महीप्रदम्॥
रुद्रः प्रजापतिः शक्रः सुराः ऋषिगणास्तथा।
अहञ्च प्रीतिमान् राजन्! पूजयामो महीप्रदम्॥
कृशशक्तस्य वृत्तस्य कृशगोश्च कृशातिथेः।
भूमिर्देया नरश्रेष्ठ! सन्निधिः पारलौकिकम्॥
सीदमानं कुटुम्बाय श्रोत्रियायाग्निहोत्रिणे।
वृत्तस्थाय दरिद्राय भूमिर्देया नराधिप!॥
यथा जननी क्षीरेण पुत्रं वर्द्धयति स्वकम्।
दातारमनुगृह्णाति दत्ता ह्येवं वसुन्धरा॥
यथाविभर्ति गौर्वत्सं सृजति क्षीरमात्मनः।
तथासर्वगुणोपेतं भूमिदम्पाति सम्पदा॥
यथा द्विजा निराहन्ति जलसिक्तानि भूतले।
तथा कामरिपुरो हन्ति भूमिदस्य दिने दिने॥
यथोदयस्थसूर्य्यस्तु तमः सर्वं व्यपोहति।
तथा पापान्नरस्येह भूमिदानं व्यपोहति॥
दानाद्दशानुगृह्णाति यो हरेद्दश हन्तिसः।
अतीतानागतानीह कुलानि कुरुनन्दन!॥
आश्रित्य भूमिमदत्ता ऽदत्त्वा वा यो हरेत् पुनः।
सचान्धो वारुणैः पाशैः क्षिप्यते पूयशोणिते॥

स्वदत्तां परदत्तां वा यो हरेत् वै वसुन्धराम्।
न तस्य नरका घोरा निवर्त्तन्ते न निष्कृतिः॥
ब्राह्मणस्य हृते चेत्रे हन्याद् द्वादशपूरुषान्।
प्राप्नोति भूमियोनिञ्च नच मुच्येत जातु सः॥
दत्त्वा भूमिं द्विजेन्द्राय यस्तामेवोपजीवति।
पशु शतसहस्रस्य हन्तुः सा लभ्यते फलम्॥
सोऽवाक्शिरास्तु पापात्मा कुम्भीपाकेषु पच्यते।
दिव्यैर्वर्षसहस्रैस्तु कुम्भीपाकाद्विनिर्गतः॥
इह लोके भवेच्छापैः शतजन्मानि पाण्डव!।
दत्त्वा भूमिं तु देवानां यस्तामेवोपजीवति॥
विनाश्य स्वकुलं याति नरकानेकविंशतिम्।
नरकेभ्योविनिर्मुक्तः शुनां योनिं स गच्छति॥
श्वयोनेश्च परिभ्रष्टो विष्ठाया जायते क्रिमिः।
तत्र तत्रैव जायेत नोत्तरं विन्दते पुनः॥
फालाकृष्टा मही देया सबीजा शस्यमालिनी।
अथवा सोदका देया दरिद्राय द्विजाय वै॥
एवं दत्त्वा महीं राजन्! प्रहृष्टेनान्तरात्मना।
सर्वान् कामानवाप्नोति मनसा चिन्तितानपि।
बहुभिर्वसुधा दत्ता दीयन्ते च नराधिपैः॥
यस्य यस्य यदा भूमि स्तस्य तस्य तदा फलम्।
यः प्रयच्छन्ति कन्यां वै सभूषां श्रोत्रियाय च॥
स ब्रह्मदो हि राजेन्द्र! तस्य पुण्यफलं शृणु।
दशीवर्दसहस्राणां दत्तानां धूर्यवाहिनाम्॥
यत्फलं लभ्यते राजन्! कन्यादानेन तत्फलम्।

षष्टिवर्षसहस्राणि मम लोके महीयते॥
ततश्चापि च्युतः कालादिह लोके स जायते।
पितरस्तस्य तृप्यन्ति ये प्रयच्छन्ति कन्यकाम्॥
यावन्ति चैव रोमाणि कन्यायाः कुरुनन्दन!।
तावद्वर्षसहस्राणि मम लोके महीयते॥
ततश्चापि च्युतः कालादिह लोके स जायते।
षड़ङ्गविच्चतुर्वेदी सर्वलोकार्चितो द्विजः॥
यः सुवर्णं दरिद्राय ब्राह्मणाय प्रयच्छति।
श्रोत्रियाय सुवृत्ताय बहु भूयश्च पाण्डव!॥
स मुक्तः सर्वपापेभ्यो बालसूर्य्यसमप्रभः।
दिव्यं विमानमारूढः कामगः कामरूपवान्॥
वर्षकोटिं महातेजा मम लोके महीयते।
ततः कालावतीर्णश्च सोऽस्मिन् लोके महीयते॥
वेदवेदाङ्गविद्विप्रः कोटियज्ञपति र्महान्।
यश्च रूप्यं प्रयच्छेत दरिद्राय द्विजातये।
शक्रहृत्तः शक्रसङ्गः स मुक्तः सर्वकिल्बिषैः॥
पूर्णचन्द्रप्रकाशेन विमानेन विराजता।
कामरूपी यथाकामं स्वर्गलोके महीयते॥
ततोऽवतीर्णः कालेन लोकेऽस्मिन् स महायशाः।
सर्वलोकार्चितः श्रीमान् राजा भवति वीर्यवान्॥
तिलपर्वतकं यस्तु श्रोत्रियाय प्रयच्छति।
विशेषेण दरिद्राय तस्यापि शृणु यत्फलम्।
पुण्यं वृषायुतोत्सर्गे यत्प्रोक्तं पाण्डुनन्दन!॥
तत्पुण्यं समनुप्राप्तस्तत्क्षणाद्विरजा भवेत्।

यथा त्वचं भुजङ्गो वै त्यक्त्वा शुभ्रतनुर्भवेत् ।
तथा तिलप्रदानाद्वै पापं त्यक्त्वा विशुध्यति ।
तिलवर्णप्रयुक्तश्च जाम्बूनदविभूषितः ॥
विमानवरमारूढः पितृलोकं स गच्छति ।
षष्टिवर्षसहस्राणि कामरूपी महायशाः ॥
तिलप्रदानाद्रमते पितृलोके यथासुखम् ।
यः प्रयच्छति विप्राय तिलधेनुं नराधिप ! ॥
श्रोत्रियाय दरिद्राय शृणु तस्यापि यत्फलम् ।
गोसहस्रप्रदानेन यत्पुण्यं समुदाहृतम् ॥
तत्पुण्यफलमाप्नोति तिलधेनुप्रदो नरः ।
तिलानान्तु यवैर्यस्तु तिलधेनुं प्रयच्छति ॥
तावत्कोटिसहस्राणि स्वर्गलोके महीयते ।
आषाढकैस्तिलैः कृत्वा तिलधेनुं नराधिप ! ॥
द्वात्रिंशन्निष्कसंयुक्तां विष्णवे यः प्रयच्छति ।
मद्भक्तो मद्गतात्मा च तस्य पुण्यफलं शृणु ।
कन्यादानसहस्रस्य विधिदत्तस्य यत्फलम् ॥
तत्पुण्यं समनुप्राप्तो मम लोके महीयते ।
मम लोकावतीर्णश्च सोऽस्मिन् लोके हि जायते ॥
ऋग्यजुःसामवेदानां पारगो ब्राह्मणर्षभः ।
गान्तु यस्तु दरिद्राय ब्राह्मणाय प्रयच्छति ॥
प्रसन्नाङ्गीरिणीं पुण्यां सवत्सां कांस्यदोहनाम् ।
यत्किञ्चित् दुष्कृतं कर्म तस्य पूर्वकृतं नृप ! ॥
तत्सर्वं तत्क्षणादेव विनश्यति न संशयः ।
यानञ्च दोषसंयुक्तं दीप्यमानमलङ्कृतम् ॥

स तेन पुण्यदानेन पञ्चकोटी युधिष्ठिर ! ।
यथा मम महातेजा मम लोके महीयते ॥
दरिद्रायैव दातव्यं न समृद्धाय पाण्डव ! ।
वर्षाणां हि तटाकेषु पञ्चदश्यां समाहितः ॥
योऽहि दद्यादनड्वाहौ द्वौ युक्तौ च धुरन्धरौ ।
सुवृत्ताय दरिद्राय श्रोत्रियाय विशेषतः ॥
तस्य यत्पुण्यमाख्यातं तच्छृणुष्व युधिष्ठिर ! ।
गोसहस्रप्रदानेन यत्प्रोक्तं फलमुत्तमम् ॥
तत्पुण्यफलमासाद्य याति लोकान् स मामकान् ।
यावन्ति चैव रोमाणि तयोश्चानडुहो नृप ! ॥
तावद्वर्षसहस्राणि मम लोके महीयते ।
दरिद्रायैव दातव्यं न समृद्धाय पाण्डव ! ॥
वर्षाणां हि तटाकेषु फलं नैव पयोधिषु ।
तस्मादनडुहन्दद्याद्दरिद्राय द्विजाय वै ॥
स तेन पुण्यदानेन पूतात्मा कुरुपुङ्गव ! ।
विमानन्दिव्यमारूढो दिव्यरूपी यथासुखम् ॥
मम लोकेषु रमते यावदाभूतसंप्लवम् ।
गृहं दीपप्रभायुक्तं शय्यासनविभूषितम् ॥
भाजनोपस्करैर्युक्तं धान्यं पूर्णमलङ्कृतम् ।
दासीर्गोभूमिसंयुक्तं संयुक्तं सर्वसाधनैः ॥
ब्राह्मणाय दरिद्राय श्रोत्रियाय युधिष्ठिर ! ।
दद्यात्सदक्षिणं यस्तु तस्य पुण्यफलं शृणु ॥
देवाः पितृगणाश्चैव सिद्धयक्षर्षयस्तथा ।
प्रयच्छन्ति प्रणष्टा वै यानमादित्यसन्निभम् ॥

तेन गच्छेच्छ्रियायुक्तो ब्रह्मलोकमनुत्तमम्।
स्त्रीसहस्रभृते दिव्ये भवने तत्र काञ्चने॥
मोदते ब्रह्मलोकेषु यावदाभूतसंप्लवम्।
शय्याप्रस्तरणोपेतां यः प्रयच्छति पाण्डव!॥
अर्चयित्वा द्विजं भक्त्या वस्त्रमाल्यानुलेपनैः।
भोजयेच्च विचित्राणि तस्य पुण्यफलं शृणु॥
आहिताग्निसहस्रं तु तर्पितस्य हि यत्फलम्।
तत्पुण्यफलमाप्नोति यस्तु विप्राय यच्छति॥
छन्दोभिः सह युज्यन्ते विमानेन विराजितः।
सप्तर्षिलोकान् व्रजति पूज्यते ब्रह्मवादिभिः॥
चतुर्युगानि वै तत्र क्रीड़ित्वा तत्र देववत्।
इहैव मानुषे लोके विप्रो भवति वेदवित्॥
विश्रामयति यो विप्रं श्रान्तमध्वपरिश्रमात्।
विनश्यति तदा पापं तस्य वर्षकृतं नृप!॥
अथ प्रक्षालयेत्पादौ तस्य तोयेन भक्तिमान्।
दशवर्षकृतं पापं व्यपोहति न संशयः॥
घृतेन वाथ तैलेन पादौ यस्तस्य पूजयेत्।
तद्द्वादशाब्द समारूढं पापमाशु व्यपोहति॥
येन दानस्य दत्तस्य यच्च पुण्यमुदाहृतम्।
तत्पुण्यफलमाप्नोति यस्त्वेवं विप्रमर्चयेत्॥
स्वागतेन च यो विप्र पूजयेदासनेन च।
प्रत्युत्थानेन वा राजन्! स देवानां प्रियो भवेत्॥
स्वागतेनानलोराजन्नासनेन शतक्रतुः।
प्रत्युत्थानेन पितरः प्रीतिं यान्त्यतिथिप्रियाः॥

अग्निशक्रपितॄणाञ्च तेषां प्रीत्या नराधिप !।
सम्वत्सरकृतं पापन्तत्र सद्यो विनश्यति॥
यः प्रयच्छति विप्राय यानमाल्यविभूषितः।
स याति मणिचित्रेण रथेनेन्द्रनिकेतनम्॥
पुरन्दरपुरे तत्र दिव्यनारीनिषेविते।
षष्टिवर्षसहस्राणि क्रीड़तेऽप्सरमाङ्गणैः॥
वाहनं ये प्रयच्छन्ति ब्राह्मणाय युधिष्ठिर !।
ते यान्ति रत्नचित्रेण वाहनेन सुरालयम्॥
स तत्र कामं क्रीड़ित्वा सेव्यमानोऽप्सरोगणैः।
इह लोके भवेद्विप्रो वेदवेदाङ्गतत्त्ववित्॥
पादपं पल्लवाकीर्णं पुष्पितं सफलन्तथा।
गन्धमाल्यार्चितं कृत्वा वस्त्राभरणभूषितम्।
यः प्रयच्छति विप्राय श्रोत्रियाय दरिद्रिणे।
भोजयित्वा यथाकामं तस्य पुण्यफलं शृणु॥
जाम्बूनदविचित्रेण विमानेन विराजता।
पुरन्दरपुरं याति जयशब्दरवैर्युतः॥
तत्र शक्रपुरे रम्ये शक्रस्य कल्पपादपम्।
ददाति चेप्सितं सर्वं मनसा यद्यदिच्छति॥
यावन्ति तस्य पत्राणि पुष्पाणि च फलानि च।
तावद्वर्षसहस्राणि शक्रलोके महीयते॥
शक्रलोकावतीर्णस्य मानुष्यं लोकमागतः।
रथाश्वगजसम्पूर्णं पुरं राष्ट्रञ्च रक्षति॥
स्थापयित्वा तु मद्भक्त्या यो मत्प्रकृतिमान् नरः।
न स्नानं विधिवत्कृत्वा पूजाकर्माणि कारयेत्॥

स्वयं वा पूजयेद्भक्त्या तस्य पुण्यफलं शृणु॥
अश्वमेधमखस्य यत्फलं समुदाहृतम्।
तत्फल समनुप्राप्य मत्सालोक्यं प्रपद्यते॥
न जाने निर्गमं तस्य मम लोकाद्युधिष्ठिर!।
देवालये विप्रगृहे गोवाटे चत्वरेऽपि वा॥
प्रज्वालयति यो दीपं तस्य पुण्यफलं शृणु।
आरुह्य काञ्चनं यानं द्योतयन् सर्वतोदिशम्॥
गच्छेदादित्यलोकं स सेव्यमानः सुरोत्तमैः।
तत्र प्रकारं क्रीडित्वा वर्षकोटिं महायशाः॥
इह लोके भवेद्विप्रो वेदवेदाङ्गपारगः।
देवालयेषु वा राजन्! ब्राह्मणावसथेषु वा॥
चत्वरेषु चतुष्के वा रात्रौ वा यदि वा दिवा।
नाट्यागान्धर्ववाद्यानि धर्मश्रावणिकाश्च याः॥
यस्तु कारयते भक्त्या मद्गतेनान्तरात्मना।
तस्य देवा नरश्रेष्ठ! पितरश्चापि हर्षिताः॥
सुप्रीताः सम्प्रयच्छन्ति विमानं कामगं शुभम्।
स च तेन विमानेन याति देवपुरं नरः॥
तत्र दिव्याप्सरोभिस्तु देवमानं प्रमोदते।
देवलोकावतीर्णश्च स लोकेऽस्मिन्नराधिप!॥
वेदवेदाङ्गतत्त्वज्ञो भगवान् ब्राह्मणो भवेत्।
चत्वरे वा सभायां वा तोरणे वा गृहाङ्गणे॥
कृत्वाग्निकुण्डं विपुलं स्थण्डिलं वा युधिष्ठिर!।
तत्राग्निश्चतुरोमासान् ज्वालयेद्यस्तु भक्तिमान्॥
समाप्तेषु तु मासेषु पौष्यादिषु तथा द्विजान्।

भोजयेत्पायसं हृष्टं सघृतं मद्गतात्मना ॥
दक्षिणाञ्च यथाशक्ति ब्राह्मणेभ्यो निवेदयेत् ।
एवं नित्यन्तु यः कुर्य्यात् नित्य मेवार्चयंस्तु माम् ॥
तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ! ।
तेनाहं शङ्करश्चास्मि पितरो ह्यग्नयस्तथा ॥
यास्यामः परमां प्रीतिं नात्र कार्य्या विचारणा ।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥
सोऽस्मत्प्रीतिकरः श्रीमान् मम लोके महायशाः ।
वेदवेदाङ्गविद्विप्रो जायतेऽमरपूजितः ॥
यः करोति नरश्रेष्ठभरणं ब्राह्मणस्य तु ।
श्रोत्रियस्याभिजातस्य दरिद्रस्य विशेषतः ॥
तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ! ।
गवां कोटिप्रदानेन यत्पुण्यं समुदाहृतम् ॥
तत्पुण्यफलमाप्नोति वर्षेणैकेन पाण्डव ! ।
काञ्चनेन विचित्रेण यानेनाम्बरशोभिना ॥
स याति मामकं लोकं दिव्यस्त्रीशतसेवितः ।
गीयमानोऽमरस्त्रीभि र्वर्षाणां कोटिविंशतिम् ॥
क्रीडित्वा मामके लोके तत्र देवैरभिष्टुतः ।
मानुष्य मवतीर्णस्तु वेदविद् ब्राह्मणो भवेत् ॥
करकं कुसिकां वापि यो मद्भ्जलभाजनम् ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु ॥
ब्रह्मचर्येतु यत्प्रीते फलं प्रोक्तं यथाविधि ।
तत्पुण्यफलमाप्नोति जलभाजनदो नरः ॥
सुरूपः सुप्रभः सौम्यः प्रहृष्टेन्द्रियमानसः ।

हंससारसयुक्तेन विमानेन विराजता ॥
स याति वारुणं लोकं दिव्यगन्धर्वसेवितम् ।
पानीयं यः प्रयच्छेद्वै जीवानां जीवनं परम् ॥
नैष्ठिकेषु च मासेषु तस्य पुण्यफलं शृणु ।
कपिलाकोटिदानस्य यत्पुण्यन्तु विधीयते ॥
तत्पुण्यफलमाप्नोति पानीयं यः प्रयच्छति ।
पूर्णचन्द्रप्रकाशेन विमानेन विराजता ॥
स गच्छेद्विभुसदनं सेव्यमानोऽप्सरोगणैः ।
त्रिंशत्कोटिसमास्तत्र दिव्यगन्धर्वसेवितः ॥
क्रीड़ित्वा मानुषे लोके चतुर्वेदी द्विजोभवेत् ।
शिरोऽभ्यङ्गप्रदानेन तेजस्वी प्रियदर्शनः ॥
सुभगो रूपवान् शूरः पण्डितश्च भवेन्नरः ।
वस्त्रदायीतु तेजस्वी रूपवान् प्रियदर्शनः ॥
भवेच्च सुभगश्रीणां स्त्रीणां नित्य मनोहरः ।
उपानहञ्च च्छत्रञ्च यो ददाति नरोत्तमम् ॥
स याति रथमुख्येन काञ्चनच्छत्रशोभिना ।
शक्रलोकं महातेजा सेव्यमानोऽप्सरोगणैः ॥
काष्ठपादुकदा यान्ति विमानैर्वृषयोजितैः ।
धर्मराजपुरं रम्यं सेव्यमाना सुरोत्तमैः ॥
दन्तकाष्ठप्रदानेन दृष्टधातु र्भवेन्नरः ।
सुगन्धवदनः श्रीमान् मेधासौभाग्यसंयुतः ।
क्षीरं दधि घृतं वापि गुडं मधु रसं तथा ॥
ये प्रयच्छन्ति विप्रेभ्यः परां भक्ति मुपागताः ।
ते वृषै रश्वयानैश्च श्वेतैः स्रग्दामभूषितैः ।

गीयमानैश्च गन्धर्वैर्यान्ति शक्रपुरं नरः ॥
तत्र दिव्याप्सरोऽभिस्तु सेव्यमानो यथासुखम् ।
षष्टिवर्षसहस्राणि मोदन्ते देवसन्निभाः ॥
ततः कालावतीर्णाश्च जायन्ते त्विह मानवाः ।
प्रभूतधनधान्याश्च भोगवन्तो नरोत्तमाः ॥
वैशाखे मासि वैशाखे दिवसे पाण्डुनन्दन ! ।
वैवस्वतं समुद्दिश्य परां भक्ति मुपागताः ॥
अभ्यर्च्य विधिवद्विप्रास्तिलान् गुडसमायुतान् ।
ये प्रयच्छन्ति विप्रेभ्य स्तेषां पुण्यफलं शृणु ॥
गोप्रदानेन यत्पुण्यं विधिवत् पाण्डुनन्दन ! ।
तत्पुण्यं समनुप्राप्तो यम लोके महीयते ॥
ततश्चापि च्युतः कालादिह राजा भविष्यति ।
तस्मिन्नेव दिने विप्रान् भोजयित्वा सदक्षिणम् ॥
तोयपूर्णानि रम्याणि भाजनानि दिशन्ति ये ।
ते यान्त्यादित्यवर्णाभै र्विमानै र्वरुणालयम् ॥
तत्र दिव्याङ्गनाभिस्तु रमन्ते कामगामिना ।
ततोऽवतीर्णाः कालेन तेचास्मिन् मानुषे पुनः ॥
भोगवन्तो द्विजश्रेष्ठा भविष्यन्ति न संशयः ।
अनन्तराशी यश्चापि वर्तते व्रतवत्सदा ॥
सत्यवान् क्रोधरहितः शुचिः स्नानरतः सदा ।
स विमानेन दिव्येन याति रत्नपुरं नरः ॥
तत्र दिव्याप्सरोभिस्तु वर्षकोटिं महातपः ।
क्रीडित्वा मानुषे लोके जायते वेदविद्द्विजः ॥
एक भुक्तेन यश्चापि वर्षमेकन्तु वर्तते ।

ब्रह्मचारी जितक्रोधः सत्यशौचसमन्वितः ॥
स विमानेन शुभ्रेण याति शक्रपुरं नरः ॥
दशकोटिसमास्तत्र क्रीड़ित्वाप्सरसाङ्गणैः ।
इह मानुष्यकेलोके ब्राह्मणो वेदविद्भवेत् ॥
चतुर्थेनेह भक्तेन ब्रह्मचारी जितेन्द्रियः ।
वर्त्तते वर्षमेकं यस्तस्य पुण्यफलं शृणु ॥
चित्तवर्हिणयुक्तेन विचित्रध्वजशोभिना ।
याति यानेन दिव्येन स महेन्द्रपुरन्नरः ॥
कर्कशाभि र्वरस्त्रीभिः सेव्यमानो यथासुखम् ।
तत्रच द्वादशकोटिसमाः सुखं प्रमोदते ॥
ततो लोकावतीर्णश्च लोके चास्मिन् नराधिप ! ।
भवेद्वै ब्राह्मणोविद्वान् क्षमावान् वेदपारगः ॥
षष्टकाले तु योऽश्नाति वर्षमेकन्तु कल्यशः ।
ब्रह्मचर्य्याकृते युक्तः शुचिः क्रोधविवर्जितः ॥
तपोयुक्तस्य तस्यापि शृणुष्व फलमुत्तमम् ।
अग्न्यादित्यप्रकाशेन विमानेनाग्निसन्निभः ॥
स याति मम लोकं वै दिव्यनारीनिषेवितः ।
तत्र सर्वैर्मरुद्भिश्च सेव्यमानो यथासुखम् ॥
पश्यत्येव सदा मान्तु क्रीडत्यप्सरसाङ्गणैः ।
पक्षोपवासं यश्चापि कुरुते मद्गतात्मना ॥
समाप्तेतु व्रते तस्मिंस्तर्पयेच्छ्रोत्रियं द्विजम् ।
सोऽपि यानेन दिव्येन सेव्यमानो महर्षिभिः ॥
द्योतयन् प्रथमं व्योम मम लोकं प्रवर्त्तते ।
तत्रवै मोदते कामं कामरूपी यथासुखम् ।

त्रिंशत्कोटिसमा राजन् ! क्रीड़ित्वा देववत् सुखम् ॥
इह मानुष्यके लोके पूजनीयो द्विजोत्तमः ।
त्रयाणामपि वेदानां साङ्गानां पारगो भवेत् ॥
यश्च मासोपवासं वै कुरुते मद्गतात्मना ।
जितेन्द्रियो जितक्रोधी जितधीः स्नानतत्परः ॥
समाप्ते नियमे तत्र भोजयित्वा द्विजोत्तमान् ।
दक्षिणाश्च ततोदद्यात् प्रहृष्टेनान्तरात्मना ।
स गच्छति महातेजा ब्रह्मलोक मनुत्तमम् ॥
सिंहयुक्तेन यानेन दिव्यस्त्रीगणसेवितः ।
तत्रैव ब्रह्मणो लोके देवर्षिगणसेवितः ॥
शतकोटिसमा राजन् ! यथाकामं प्रमोदते ।
ततः कालावतीर्णश्च सोऽस्मिन् लोके द्विजोभवेत् ॥
षड़ङ्गविच्चतुर्वेदी त्रिंशजन्मन्यरोगवान् ।
यः स्नात्वा सर्वकामस्तु शुचिः क्रोधविवर्जितः ॥
महाप्रस्थानमेकाग्रो याति तद्गतमानसः ।
स गच्छेदिन्द्रसदनं विमानेन महातपाः ॥
महामणिविचित्रेण सुवर्णेन विराजता ।
शतकोटिसमास्तत्र सुराधिपतिपूजितः ॥
नागपृष्ठे निवसति दिव्यस्त्रीशतसेवितः ।
शक्रलोकावतीर्णश्च मानुषेषु प्रजायते ॥
राज्ञां राजन् ! महातेजाः सर्वलोकार्चितः प्रभुः ।
प्रायोपवेशं यः कुर्यात् मद्गतेनान्तरात्मना ॥
नमो ब्रह्मण्यदेवायेत्युक्त्वा मन्त्रं समाहितः ।
पुनः स्नातो जितक्रोधस्तस्य पुण्यफलं शृणु ॥

कामगः कामरूपी च बालसूर्य्यसमप्रभः ।
स विमानेन दिव्येन याति लोकांस्तु मामकान् ॥
स्वर्गात्स्वर्गमहातेजा गत्वा दत्त्वा यथासुखम् ।
मम लोकेषु रमते यावदाभूतसंप्लवम् ॥
अग्निप्रवेशं यश्चापि कुरुते मद्गतात्मना ।
सोऽपि यानेन दिव्येन मम लोकं प्रपद्यते ॥
तत्र सर्वगुणोपेतः पश्यत्येवच मां सदा ।
त्रिंशत्कोटिसमा राजन् ! मोदते मम सन्निधौ ॥
ततोऽवतीर्णः कालेन वेदविद्ब्राह्मणो भवेत् ।
कारीषं साधयेद्यस्तु मां प्रपन्नः शुचिव्रतः ॥
नमो ब्रह्मण्यदेवायेत्येतन्मन्त्र मुदीरयेत् ।
बालसूर्य्यप्रकाशेन विमानेन विराजता ॥
मम लोकं समासाद्य पञ्चकोटीः प्रमोदते ।
मम लोकावतीर्णश्च लोकेऽस्मिन् क्षत्रियो भवेत् ॥
निवेदयति मन्मूर्त्यां मन्मना मद्गतः शुचिः ।
रुद्रं दक्षिणमूर्तिं वा चतुर्दश्यां विशेषतः ॥
सिद्धैर्ब्रह्मर्षिभिश्चैव देवैः सर्वैश्च पूजितः ।
गन्धर्वैर्भूतसङ्घैश्च गीयमानो महातपाः ॥
प्रविशेत् स महातेजा मां वा शङ्करमेव वा ।
तस्यापुनर्भवं राजन् ! विद्धि नात्र विचारणा ॥
स्त्रीग्रहे गोग्रहे वाथ गुरुविप्रग्रहेऽथवा ।
हन्यन्ते येस्तु राजेन्द्र ! शक्रलोकं व्रजन्ति ते ॥
तत्र जाम्बूनदमये विमाने कामगामिनि ।
मन्वन्तरं प्रमोदन्ते दिव्यनारीनिषेविताः ॥

अश्रुतस्याप्रदानेन दत्तस्य हरणेन च ।
जन्मप्रभृति यद्दत्तं सर्वं नश्यति भारत ! ॥
नागोप्रदा स्तत्र पयः पिबन्ति
न भूमिदा भूमि मथाश्नुवन्ति ।
अन्यान् कामान् ब्राह्मणेभ्यो ददाति
तां स्तान् कामान् स्वर्गलोके स भुङ्क्ते ॥
यद्यदिष्टतमं द्रव्यं न्यायेनोपार्जितञ्च यत् ।
तती गुणवते देयं न देवात् चयमिच्छता ॥
अनुपोष्य च रात्रिञ्च तीर्थान्यनभिगम्य च ।
अदत्त्वा काञ्चनञ्चाञ्च दरिद्री नाम जायते ॥
दानं यत्सफलं नैव श्रोत्रियाय न दीयते ।
न तद्गुणवति देयं न देवात् चय मिच्छता ॥
अनुपोष्य च रात्रिञ्च तीर्थान्यनभिगम्य च ।
श्रोत्रिया यत्र नाश्नन्ति न देवा स्तत्र भुञ्जते ॥
श्रोत्रियेभ्यः परं नास्ति दैवतं तारणं महत् ।
निधानञ्चापि राजेन्द्र ! नास्त्याश्रोत्रियभाजनात् ॥
इति गौतमीये श्रीवैष्णवधर्मशास्त्रे सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ॥

युधिष्ठिरः । विप्रयोगे शरीरस्य सेन्द्रियस्य विशेषतः ।
अन्तरा वर्तमानस्य गतिः प्राणस्य कीदृशी ॥
श्रीभगवानुवाच । शुभाशुभकृतं सर्वं प्राप्नोतीह फलं नरः ।
स तु सर्वस्य भूतस्य परत्वन्नाम विद्यते ॥

पञ्चत्वं पाण्डवश्रेष्ठ! पञ्चीभूतकरं परम्।
तेषां पञ्चमहायज्ञान् ये कुर्वन्ति द्विजोत्तमाः॥
पञ्चत्व पञ्चभिर्भूतै र्वियोगं सम्प्रपद्यति।
न जायते न म्रियते पुरुषः शाश्वतः सदा॥
प्रायेण मरणं नाम पापिनामेव पाण्डव!।
येषान्तु न गतिः पुण्या तेषां मरणमुच्यते॥
प्रायेण कृतकृत्यत्वाद् भूय उद्विजते जनः।
कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्॥
युधिष्ठिरः। पंञ्चयज्ञाः कथं देव! क्रियन्ते तु द्विजातिभिः।
तेषान्नाम च देवेश! वक्तुमर्हस्यशेषतः॥
भगवानुवाच। शृणु पञ्च महायज्ञान् कीर्त्यमानान् युधिष्ठिर!।
यैरेव ब्रह्मसालोक्यं लभ्यते गृहमेधिना॥
ऋषियज्ञं ब्रह्मयज्ञं भूतयज्ञञ्च पार्थिव!।
नृयज्ञं पितृयज्ञं पञ्चयज्ञान् प्रचक्षते।
तर्पणं ऋषियज्ञः स्यात् स्वाध्यायो ब्रह्मयज्ञकम्।
भूतयज्ञो वलियज्ञो नृयज्ञोऽतिथिपूजनम्॥
पितॄनुद्दिश्य यत्कर्म पितृयज्ञः प्रकीर्तितः।
हुतञ्चाप्यहुतञ्चैव तथा प्रहुतमेव च॥
प्राशितं बलिदानञ्च पाकयज्ञान् प्रचक्षते।
वैश्वदेवादयो होमा हुतमित्युच्यते बुधैः॥
आहुतन्तु भवेद्दत्तं प्रहुतं ब्राह्मणाशितम्।
प्राणाग्निहोत्रहोमञ्च प्राशितं विधिवद्द्विजः॥
वलिञ्च कर्म राजेन्द्र! पाकयज्ञाः प्रकीर्तिताः।
केचित्पञ्च महायज्ञाः पाकयज्ञान् प्रचक्षते॥

अपरे ऋषियज्ञादि महायज्ञं वदोविदु: ।
सर्व एते महायज्ञा: सर्वथा परिकीर्तिता: ॥
ब्राह्मणोभूपा रेतांस्तु यथाशक्तिमुपाहरेत् ।
अहन्यहनि ये त्वेतानकृत्वा भुञ्जते स्वयम् ॥
केवलं मलमश्नन्ति ते नरेन्द्र ! न संशय: ।
तस्मात् स्नात्वा द्विजो विद्वान् कुर्य्यादेतान् दिने दिने ॥
अतोऽन्यथा तु भुञ्जन्वै प्रायश्चित्तीयते द्विज: ।
युधिष्ठिर: । देवदेव ! नमस्तेऽस्तु त्वद्भक्तस्य जनार्दन ! ॥
वक्तुमर्हसि देवेश ! स्नानस्य तु विधिं मम ।
भगवानुवाच । शृणु पाण्डव ! तत्त्वेन पवित्रं पापनाशनम् ।
स्नात्वा येन विधानेन मुच्यते किल्बिषाद् द्विज: ॥
मृदञ्च गोमयं चैव तिलदर्भांस्तथैव च ।
पुष्पाण्यपि यथालाभमादाय तु जलं व्रजेत् ॥
नद्यां सत्यां न च स्नायादन्यत्र द्विजसत्तम: ।
सति प्रभूते पयसि नाल्पे स्नायात्कदाचन ॥
गत्वोदकसमीपेतु शुचौ देशे मनोहरे ।
ततो मृद्गोमयादीनि तत्र प्रोक्ष्य विनिक्षिपेत् ॥
प्रदक्षिणं समावृत्त्या नमस्कुर्य्यात्तु तज्जलम् ।
न च प्रक्षालयेत्तीर्थन्ताभिर्विद्वान् कदाचन ॥
न च पादेन वा हन्याद्धस्तेनैवच वा जलम् ।
सर्वदेवमया ह्यापो मम या: पाण्डुनन्दन ! ॥
तस्मात्तासु न हन्यव्यास्ताभिर्निग्राहयेत् स्थलम् ।
केवलं प्रथमं मज्जेत् नाङ्गानि विमृजेद्बुध: ॥
ततस्तीर्थं समासाद्य कुर्य्यादाचमनं बुध: ।

गोपुच्छाकृतिवत् कृत्वा करेश्च प्रपिवेज्जलम् ॥
हिस्तः परिमृजेद्वक्तं पादावभ्युक्ष्य चात्मनः।
शीर्षण्यांस्तु ततः प्राणान् सकृदेव समं स्पृशेत् ॥
बाहू द्वौ च ततः स्पृष्ट्वा हृदयं नाभिमेव च।
प्रत्यङ्गमुदकं स्पृष्ट्वा मूर्द्धानन्तु ततः स्पृशेत् ॥
आपः पुनन्त्वित्युक्त्वा च पुनराचमनञ्चरेत्।
सोङ्कारं व्याहृतिं वापि सदसस्पतिमित्यृचम् ॥
आचम्य प्रथमं पश्चात् तत्र कृत्वा समालभेत्।
ऋग्वेदं विष्णुरित्यङ्गमुत्तमाधममध्यमम् ॥
आलभ्य वारुणैः सूक्तैर्नमस्कृत्य जलं ततः।
स्रवन्त्याश्चेत्प्रतिस्रोतः प्रतिकूलञ्च वारिषु ॥
मज्जेदोमित्युदाहृत्य न च प्रक्षोभयेज्जलम्।
गोमयञ्च त्रिधा कृत्वा यथापूर्वं समालभेत् ॥
सव्याहृतिकां सप्रणवां सावित्रीञ्च जपेत् पुनः।
पुनराचमनं कृत्वा मद्गतेनान्तरात्मना ॥
आपोहिष्ठेति तिसृभि र्दर्भपूतेन वारिणा।
तथातरत् समन्दीति सिञ्चेच्चेतिजलं क्रमात् ॥
गोसूक्तेनाश्वसूक्तेन शुद्धवर्णेन चाप्यथ।
वैष्णवैर्वारुणैः सूक्तैः सावित्रै रुद्रदैवतैः ॥
वामदेवेन चात्मानं मन्त्रैर्मन्मयसामभिः।
सिक्तान्तः सलिले सूक्तं जपेच्चैवाघमर्षणम् ॥
सव्याहृतिकां सप्रणवां सावित्रीं वा ततो जपेत्।
आश्वासमोक्षात् प्रणवं जपेद्वा मामनुस्मरन् ॥
एकपादं वा जपेन्मन्त्र मष्टाक्षरमथापि वा।

समुत्थ तीर्थमासाद्य धौते शुक्ले च वाससी ॥
शुक्लेनाच्छादयेत् कच्छे न कुर्य्यात् कटिपार्श्वके ।
पार्श्वनिर्बन्धकच्छीयत् कुरुते कर्म वैदिकम् ॥
राक्षसा दानवा दैत्या तद्विलुम्पन्ति हर्षिताः ।
तस्मात्सर्वप्रयत्नेन कच्छं पार्श्वेन धारयेत् ॥
ततः प्रक्षाल्य पादौ द्वौ हस्तौ चैव मृदाशनैः ।
आचम्य पुनराचामेत् सावित्र्याञ्जलिना जपेत् ॥
जले जलगतः शुद्धः स्थलएव स्थलस्थितः ।
उभयत्र स्थितस्तस्मादाचामेदात्मशुद्धये ॥
दर्भेषु दर्भपाणिः सन् प्राङ्मुखस्तु समाहितः ।
प्राणायामन्ततः कुर्य्यान्मद्गतेनान्तरात्मना ॥
सहस्रकृत्वः सावित्रीं शतकृत्वस्तु वा जपेत् ।
समाप्ते तु जपे तस्मिन् सावित्र्या चानुमन्त्र्य च ॥
मन्देहानां विनाशाय रक्षसा विक्षिपेज्जलम् ।
मद्गर्गोऽसीत्यथाचान्तः प्रायश्चित्तजलं क्षिपेत् ॥
अथादाय स पुष्पाणि तोयान्यञ्जलिना क्षिपेत् ।
प्रक्षिप्य प्रतिसूर्य्यञ्च व्योममुद्रां प्रकल्पयेत् ॥
ततो द्वादशकृत्वस्तु सूर्य्यस्यैकाक्षरं जपेत् ।
ततस्त्वष्टाक्षरादीनि त्रिः कृत्वा परिवर्त्तयेत् ॥
प्रदक्षिणं परावृत्य मुद्रायाः स्वमुखन्तया ।
ऊर्द्ध्वबाहुस्ततो भूत्वा सूर्य्यमीक्षन् समाहितः ॥
तन्मण्डलस्थं मां ध्यायेत् ततो मूर्त्तिञ्चतुर्भुजम् ।
उदुत्यञ्च जपेन्मन्त्रं चित्रन्तच्चक्षुरित्यपि ॥
सावित्रीञ्च यथाशक्ति जप्त्वा सूक्तञ्च मामकम् ।

मन्त्रयानि च सामानि पूरुषं वृत्तमेव तु ॥
ततश्चालोकयेदर्कं हंसशुचिषदित्यृचा।
प्रदक्षिणं समावृत्त्या नमस्कृत्य दिवाकरम् ॥
ततस्तु तर्पयेदद्भिर्मां ब्रह्माणञ्च शङ्करम्।
प्रजापतिञ्च देवांश्च तथा देवमुनीनपि ॥
साङ्गानपि तथा वेदानितिहासपुराणांस्तथा।
पुराणानि च दिव्यानि कुलान्यप्सरसांस्तथा ॥
ऋतून् संवत्सरञ्चैव कालञ्चालात्मकं तथा।
भूतग्रामांश्च भूतानि सरितः सागरांस्तथा ॥
शैलांश्चैव स्थितान् देवानोषधीः सवनस्पतीन्।
तर्पयेदुपवीती तु प्रत्येकं तृप्यतामिति ॥
अन्वारभ्यतु सव्येन पाणिना दक्षिणेन तु।
निवीती तर्पयेत्पश्चादृषीन् मन्त्रकृतस्तथा ॥
मरीच्यादीन्मुनींश्चैव नारदान्तान् समाहितः।
प्राचिनावीत्यथैतांस्तु तर्पयेद्दैवतान् पितॄन् ॥
ततस्तु कव्यमानाग्निं सोमं वैवस्वतं तथा।
ततश्च पितरश्चापि चाग्निष्वात्ता स्तथैव च ॥
सोमपांश्चैव दर्भैस्तु सतिलैरेव वारिभिः।
तृप्यध्वमिति पश्चात्तु स्वपितॄंस्तर्पयेत्ततः ॥
पितॄन् पितामहांश्चैव तथैव प्रपितामहान्।
पितामहीं तथा चापि तथैव प्रपितामहीम् ॥
मातृष्वसा मथाचापि तथैव च पितृष्वसाम्।
मातर श्चात्मनश्चापि तथा मातामहीमपि ॥
मातुर्मातामहीं चापि गुरूनाचार्य्यमेव च।

उपाध्यायांस्तु सम्बन्धीन् शिष्यर्त्विक्ज्ञातिपुत्रकान् ॥
प्रीतिमानात्मशंस्थार्थं तर्पयेत्तान्नमत्सरः।
तर्पयित्वा तथाचम्य स्नानवस्त्रं प्रपीड़येत् ॥
तद्धि भृत्यजनस्यान्नं स्नानपानञ्च तद्विदुः।
अतर्पयित्वा तान् पूर्वं स्नानवस्त्रन्न पीड़येत् ॥
पीड़येद्यदि तन्मोहाद्देवाः सर्षिगणास्तथा।
पितरश्च निराशास्तं शप्त्वा यान्ति यथागमम् ॥
प्रक्षाल्य तु मृदा पादावाचम्य प्रयतः पुनः।
दर्भेषु दर्भपाणिः सन् स्वाध्यायन्तु समाचरेत् ॥
वेदवादौ समारभ्य तथोपर्युपरि क्रमात्।
यदधीते वदन् चित्या तत् स्वाध्यायं प्रचक्षते।
ऋचं वाथ यजुर्वापि सामगाथा मथापिवा ॥
इतिहासपुराणं वा यथाशक्ति न हापयेत्।
उत्थाय तु नमस्कृत्वा दिशोदिग्देवता अपि ॥
ब्रह्माणं स्वसनञ्चाग्निं पृथिवी मोषधीस्तथा।
वाचं वाचस्पतिञ्चापि विष्णुञ्च पितरं तथा ॥
नमस्कारान्तमद्भिस्तु प्रणवादि च पूजयेत्।
ततो नमोऽस्तु इत्युक्त्वा नमस्कुर्य्यात्तु तज्जलम्।
घृणी सूर्य्य स्तथादित्य इत्युक्त्वा त्रिः स्वमूर्धनि ॥
सिक्त्वावलोकयेदर्कं प्रणयेन समाहितः।
ततो मामर्चयेत्पुष्पै र्मत्प्रियैरेव नित्यशः ॥

युधिष्ठिरः। त्वत्प्रियाणि प्रसूनानि त्वदनिष्टानि माधव!।
सर्वाण्याचक्ष्व देवेश! त्वद्भक्तस्य ममाच्युत!॥

भगवानुवाच। शृणुष्वावहितोराजन्! पुष्पाणि विविधानि मे।

कुमुदं करवीरञ्च गणकञ्चम्पकन्तथा।
मल्लिका जातिपुष्पञ्च नद्यावर्त्तञ्च मे प्रियम्॥
पलाशपत्रं पुष्पञ्च दूर्वाभृङ्गकमेव च।
वनमाला च राजेन्द्र! मत्प्रियाणि विशेषतः॥
सर्वेषा मपि पुष्पाणां सहस्र गुणमुत्पलम्।
तस्मात्पद्मं तथा राजन्! पद्मात्तु शतपत्रकम्॥
तस्मात्सहस्रपत्रन्तु पुण्डरीकं ततः परम्।
पुण्डरीकसहस्रात्तु तुलसी गुणतोऽधिका।
वकपुष्पं ततस्तस्याः सौवर्णन्तु ततोऽधिकम्॥
सौवर्णाच्च प्रसूनात्तु मत्प्रियं नास्ति पाण्डव!।
पुष्पालाभे तुलस्यास्तु पत्रैर्मामर्चयेद्बुधः॥
पत्रालाभे तु शाखाभिः शाखालाभे शिफालवैः।
शिफालाभे मृदा तत्र भक्तिमानर्चयेत माम्॥
वर्जनीयानि पुष्पाणि शृणु राजन्! समाहितः।
किङ्किणीं मुनिपुष्पञ्च धूत्तूरं पाटलन्तथा।
तथामुक्तवैभितकं पुन्नागनक्तमालकम्।
यौधिकं क्षीरिकापुष्पं निर्गुण्डी जागली जपा।
कर्णिकारन्तथाशोकं शाल्मलीपुष्पमेव च॥
ककुभं कोविदारञ्च वैभीतकमथाऽपि च।
कुरण्डकप्रसूनञ्च तिलकं धातकी तथा॥
अङ्कोलं गिरिकर्णी च नीपादन्यच्च सर्वशः।
एवं वर्णानि चान्यानि सर्वाण्येव विवर्जयेत्।
अर्कपुष्पाणि वर्ज्याणि चार्कपत्रस्थितानि च॥
व्याघात मपि चान्यानि सर्वाण्येव विवर्जयेत्।

अन्यैस्तु शुक्लपुष्पैस्तु गन्धवद्भिर्नराधिप ! ॥
अवर्जितैर्यथालाभं मद्भक्तोमां सदार्चयेत् ।
युधिष्ठिरः । कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते ॥
वैखानसाः कथं ब्रूयुः कथं वा पञ्चरात्रिकाः ॥
भगवानुवाच ॥ शृणु पाण्डव ! तत्सर्वमर्चनाक्रममुत्तमम् ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ॥
अष्टाक्षरविधानेनाप्यथवा द्वादशाक्षरैः ।
वैदिकैरथवा मन्त्रैर्मम सूक्तेन वा पुनः ॥
स्थापितं मान्ततस्तस्मिन्नर्चयीत विचक्षणः ।
पूरुषञ्च ततः सत्य मच्युतञ्च युधिष्ठिर ! ॥
अनिरुद्धञ्च मां प्राहुर्वैखानसविदोजनाः ।
अन्ये त्वेवं विजानन्ति मां राजन् ! पाञ्चरात्रिकाः ॥
वासुदेवञ्च राजेन्द्र ! संकर्षणं मथापि वा ।
प्रद्युम्नञ्चाऽनिरुद्धञ्च चतुर्मूर्तिं प्रचक्षते ॥
एतान्यन्यानि राजेन्द्र ! संज्ञाभेदेन मूर्तयः ।
विद्ध्यनर्थान्तरायैव मामेवञ्चार्चयेद्बुधः ॥
युधिष्ठिरः । त्वद्भक्ताः कीदृशा देव ! कानि वृत्तानि तन्नृणाम् ।
एतत्कथय देवेश ! त्वद्भक्तस्य ममाच्युत ! ॥
भगवानुवाच । अनन्यदेवता भक्त्या ये मद्भक्तजनप्रियाः ।
मामेव शरणं प्राप्ता मद्भक्तास्ते प्रकीर्तिताः ॥
स्वर्गाण्यपि यशस्यानि मत्प्रियाणि विशेषतः ।
मद्भक्ताः पाण्डवश्रेष्ठ ! वृत्तानीमानि धारयेत् ॥
नान्यदाच्छादयेद्वस्त्रं मद्भक्तो जलतारणे ।
स्वस्थस्तु न दिवा स्वप्यात् मधुमांसानि वर्जयेत् ।

प्रदक्षिणं व्रजेद्विद्वान्गामश्वत्थं हुताशनम् ॥
निशाविपतिते वर्षे नाग्रभिक्षाञ्च लोपयेत्।
प्रत्यक्षलवणं नाद्यात्सौक्राशनकवञ्जिनौ ॥
श्राद्धमेपाङ्कवे दद्यात् धान्यान् पञ्चैव वर्जयेत्।
तथा पर्युषितञ्चान्नं पक्वं परगृहायुतम्।
वैदिकञ्चैव यद्द्रव्यं तत्प्रयत्नेन वर्जयेत्।
विभीतक करञ्जानां छायां दूरात्तु वर्जयेत् ॥
विप्रवादपरीवादं न वदेत् पीड़ितोऽपि सन्।
सात्विका राजसाश्चापि तामसाश्चापि पाण्डव ! ॥
मामर्चयन्ति भक्तास्तेषामीदृग्विधा गतिः।
तिर्यङ्मानुषदेहेषु तामसा भुञ्जते फलम् ॥
नागयक्षगृहस्थानि राजसा भुञ्जते फलम्।
सात्त्विकाः सत्वसम्पन्ना मत्पदं यान्ति मानवाः ॥
ये सिद्ध्यन्तिच साङ्ख्येन योगसत्वबलेन च।
नभस्यादित्यचन्द्राभ्यां पश्यन्ति पदविस्तरम् ॥
एकस्तम्भे नवद्वारे त्रिस्थूणे पञ्चधातुके।
एतस्मिन् देहनगरे ये वसन्ति कृतं शृणु ॥
उदिते तस्य विप्रस्य क्रियायुक्तस्य धीमतः।
चतुर्वेदविदश्चापि देहे षड्वृषलाः स्थिताः ॥
क्षत्रियः सप्तविज्ञेया वैश्यस्त्वष्टौ प्रकीर्तिताः।
नियताः पाण्डवश्रेष्ठ ! शूद्राणामेकविंशतिः ॥
कामः क्रोधश्च लोभश्च मानश्च मद एव च।
महामोहस्तथेत्येते देहे षड्वृषलाः स्थिताः ॥
गर्वो दम्भोऽप्यहङ्कार ईर्ष्याभिद्रोहएव वा।

पारूष्यं क्रूरताचेति एते ते क्षत्रियाश्रिताः ॥
तीक्ष्णता निकृतिर्माया शाठ्यं दम्भोह्यनार्जवम्।
पैशून्यमनृतञ्चैव वैश्यस्याष्टौ प्रकीर्तिताः ॥
तृष्णां बुभुक्षां चालस्यं निद्रां चाप्यक्षमां दमम्।
अधृतिश्च विवादश्च प्रमादश्च हीनसत्वता ॥
भयं वितथतां जाड्यं पापतां मन्युरेव च।
आशां चाश्रद्दधानत्वादनवस्थाप्य यन्नृणाम् ॥
अशौचं मलिनत्वंच शूद्रास्यै ते प्रकीर्त्तिताः।
यस्मिन्नेते न दृश्यन्ते सर्वै ब्राह्मणउच्यते।
येषु येषु हि भावेषु यत्कालं वर्तते द्विजः।
तत्कालं नैव विज्ञेयो ब्राह्मणो ज्ञानदुर्बलः ॥
प्राणायामन्तु यत्काले येन मात्रापि चिन्तयेत्।
तत्कालं वै द्विजोच्छेदः शेषकाल मथेरितः ॥
तस्मात्तु सात्विको भूत्वा शुचिः क्रोधविवर्जितः।
मामर्चयेद्गुयः सततं मत्प्रियत्व यदृच्छति ॥
अलोलजिह्वः समुपस्थितो धृतीर्निधाय चक्षुर्युगमात्र मेव।
मानञ्च वाचञ्च निगृह्य चञ्चलोभोगान्निवृत्तो भगवान्निहोच्यते।
संरम्भशाठ्यानि दलेति ब्राह्मणो नियतेन्द्रियाः।
येषां श्राद्धेषु भोक्ष्यन्ति तेषां तृप्ताः पितामहाः ॥
धर्मो जयति नाधर्मः सत्यं जयति नानृतम्।
क्षमा जयति न क्रोधः क्षमावान् ब्राह्मणो भवेत् ॥
इति गौतमीये वैष्णवधर्मशास्त्रे अष्टमोऽध्यायः।

नवमोऽध्यायः ।

वैशम्पायनः । दानधर्मफलं श्रुत्वा तपः पुण्यफलानि च ।
धर्मपुत्त्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥
या चैषा कपिला देया पूर्वं सम्पादिता विभो !
होमधेनुः सदा पुण्या चतुर्वक्त्रेण माधव ! ॥
सा कथं ब्राह्मणेभ्यो हि देया कस्मिन् दिनेऽपिवा
कीदृशाय च विप्राय दातव्या पुण्यलक्षणा ॥
कति वा कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा ।
कैर्वा देयाश्च ता देव ! ज्ञातुमिच्छामि तत्त्वतः ॥
एवमुक्तो हृषीकेशो धर्मपुत्त्रेण संसदि ।
अब्रवीत्कपिलासङ्ख्यां तासां माहात्म्यमेव च ॥
शृणु पाण्डव ! तत्त्वेन पवित्रं पापनाशनम् ।
यच्छ्रुत्वा पापकर्मापि नरः पापैर्विमुच्यते ॥
अग्निमध्योद्भवां दिव्यामग्निज्वालासमप्रभाम् ।
अग्निज्वालोज्ज्वलच्छीर्षां प्रदीप्ताङ्गारलोचनाम् ॥
अग्निपुच्छामग्निखुरामग्निरोमप्रभाविताम् ।
तामाग्नेयीमग्निजिह्वामग्निग्रीवां ज्वलत्प्रभाम् ॥
भुञ्जते कपिलां ये तु शूद्रा लोभेन मोहिताः ।
पतितांस्तान् विजानीयाच्चण्डालसदृशा हि ते ॥
न तेषां ब्राह्मणः कश्चिद्गृहे कुर्य्यात् प्रतिग्रहम् ।
दूराच्च परिहर्त्तव्या महापातकिनो हि ते ॥
सर्वकालं हि ते सर्वे वर्जिताः पितृदैवतैः ।
ते सदा ह्यप्रतिग्राह्या असम्भाष्याश्च पापिनः ॥
पिबन्ति कपिलां यावत्तावत्तेषां पितामहाः ।

अमेध्य मुपभुञ्जन्ति भूम्यां वै श्वशृगालवत् ॥
कपिलाया घृतं क्षीरं दधि तक्र मथा पिवा ।
ये शूद्रा उपभुञ्जन्ते तेषां गति मिमां शृणु ॥
कपिलोपजीवी शूद्रस्तु मृतो गच्छति रौरवम् ।
क्लिश्यते रौरवे घोरे वर्षकोटिशतं नृप ! ॥
ततश्च मुक्तः पापेन शुनां योनिशतं व्रजेत् ।
श्वयोन्याश्च परिभ्रष्टो विष्ठाया जायते क्रिमिः ॥
विष्ठावर्गेषु पापिष्ठो दुर्गन्धेषु सहस्रशः ।
तत्र तत्रैव जायेत नोत्तरं तत्र विन्दति ॥
ब्राह्मणश्चापि यस्तेषां गृहे कुर्य्यात्प्रतिग्रहम् ।
ततः प्रभृति तस्यापि पितरः स्युरमेध्यपाः ॥
न तेन सार्द्धं सम्भाषेन्नचाप्येकासनं व्रजेत् ।
स नित्यं वर्जनीयो हि दूराद्वर्ब्राह्मणोहि सः ॥
यस्तेन सह सम्भाषेदेकशय्यां व्रजेत वा ।
प्राजापत्यञ्चरेत्कृच्छ्रं स च तेनैव शुध्यति ॥
कपिलोपजीविनः शूद्राद्यः करोति प्रतिग्रहम् ।
प्रायश्चित्तं भवेत्तस्य विप्रस्येदं न संशयः ॥
वर्षं ब्रह्मकृच्छ्रात् कुर्वीत चान्द्रायण मथापिवा ।
मुच्यते किल्बिषात्तस्मात्तेन स्याद् ब्राह्मणो हि सः ॥
कपिला ह्यग्निहोत्रार्थे विप्रार्थे च स्वयम्भुवा ।
सर्वतेजः समुद्धृत्य निर्मिता ब्रह्मणा पुरा ॥
पवित्रञ्च पवित्राणां मङ्गलानाञ्च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला पाण्डुनन्दन ! ॥
तपसान्तप एवाग्र्यं व्रताना मुत्तमं व्रतम् ।

दानानामपरं दानं विमानं हैममक्षयम् ॥
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च।
पवित्राणि च रम्याणि सर्वलोकेषु पाण्डव! ॥
तेभ्य स्तेजः समुद्धृत्य ब्रह्मणा लोक कारिणा।
लोकनिस्तरणार्थाय निर्मिता कपिला स्वयम् ॥
सर्वतेजोमयी ह्येषा कपिला पाण्डुनन्दन!।
सदाव्रतवहा मेध्या शुचिः पावनमुत्तमम् ॥
क्षीरेण कपिलायास्तु दध्ना चैव घृतेन च।
होतव्यान्यग्निहोत्राणि सायम्प्रात र्द्विजातिभिः ॥
कपिलाया घृतेनापि दध्ना क्षीरेण वा नृप!।
जुह्वते येऽग्निहोत्राणि ब्राह्मणो विधिवत्सदा ॥
पूजयन्त्यतिथींश्चैव परां भक्ति मुपागताः।
शूद्रान्नविरता नित्यं दम्भानृतविवर्जिताः ॥
ते यान्त्यादित्यकल्पेन विमानेन द्विजोत्तमाः।
सूर्य्यमण्डलमध्येन ब्रह्मलोक मनुत्तमम् ॥
ब्रह्मणो भवने दिव्ये कामगाः कामरूपिणः।
ब्रह्मणा पूज्यमानास्तु मोदन्ते कल्प मक्षयम् ॥
एवं हि कपिला राजन्! पुण्यं पापौघतारिणी।
आदावेवाग्निहोत्रात्तु मन्त्रै र्ब्रह्मादिनिर्म्मिता ॥
शृङ्गाग्रे कपिलायास्तु सर्वतीर्थाणि पाण्डव!।
ब्रह्मणोहि नियोगेन निवसन्ति दिने दिने ॥
प्रातरुत्थाय यो मर्त्यो कपिलाशृङ्गमस्तकात्।
च्युतात्पयस्तुशीर्षेण धारयेत्प्रयतः शुचिः ॥
स तेन पुण्यस्नानेन तत्क्षणाद्धूतकिल्बिषः।

वर्षमेकमृणुहि (?)प्राप्य प्रदहत्यग्निवत्तृणाम् ॥
मूत्रेण कपिलायास्तु यस्तु प्रातरुपस्पृशेत् ।
स्नानेन तेन पुण्येन नष्टपापः समाहितः ॥
त्रिंशद्वर्षकृतात्पापात्पूयते नात्र संशयः ।
प्रातरुत्थाय यो भक्त्या प्रयच्छेत्तृणमुष्टिकम् ॥
तस्य नश्यति तत्पापं त्रिंशद्रात्रकृतं नृप ! ।
प्रातरुत्थाय मद्भक्त्या कुर्य्याद्यस्तां प्रदक्षिणाम् ॥
प्रदक्षीणीकृता तेन पृथिवी नात्र संशयः ।
प्रदक्षिणेन चैकेन श्रद्धायुक्तस्य पाण्डव ! ॥
दशरात्रकृतं पापं तत्क्षणादेव नश्यति ।
दृष्ट्वा तु कपिलां भक्त्या श्रुत्वा हम्बारवं तथा ॥
व्यपोहति नरः पाप महोरात्रकृतं नृप ! ।
यत्र वा तत्र वा चाङ्गे कपिलायाः स्पृशेच्छुचिः ॥
सं वत्सरकृतं पापं स नाशयति पाण्डव ! ।
गोसहस्रञ्च यो दद्यादेकाञ्च कपिलां नरम् ॥
समन्तस्य फलम्प्राह ब्रह्मलोके पितामहः ।
यस्त्वेतां कपिलां हन्यान्नरः किञ्चित्प्रमादतः ॥
गोसहस्रहतं तेन भवेन्नात्र विचारणा ।
यस्त्वेकां कपिलां दद्याच्छ्रोत्रियायाग्निहोत्रिणे ॥
गवां सहस्रन्तेनेह दत्तं भवति पाण्डव ! ।
दशेह कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा ॥
या दत्ता श्रोत्रियेभ्यो वै स्वर्गं गच्छति तत् शृणु ।
प्रथमा सुवर्णा कपिला द्वितीया गौरपिङ्गला ॥
तृतीया रक्तपिङ्गाक्षी चतुर्थी वह्निपिङ्गला ।

पञ्चमी ब्रह्मवर्णा स्यात् षष्ठी स्यात् श्वेतपिङ्गला ॥
सप्तमी कृष्णपिङ्गाक्षी अष्टमी खुरपिङ्गला।
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ॥
दशैताः कपिला प्रोक्ता स्तारयन्ति नरान् सदा।
मङ्गल्यश्च पवित्राश्च सर्वपापप्रणाशनाः ॥
एव मेवाग्य नडुाहो दश प्रोक्ता नरेश्वर ! ।
ब्राह्मणो वाहयेत्तांस्तु नान्यवर्णः कथाञ्चन।
वाहयेत्कपिलायास्तु क्षेत्रे वाध्वनि पाण्डव ! ॥
वाहयेद्धुङ्कृतेनैव शाखया वा सपत्रया।
सुतृप्तेषु तु भुञ्जीयात् पिवेत्पीतेषु चोदकम् ॥
गुर्व्वीषद्भावितास्चैते पितरस्ते प्रकीर्तिताः।
अन्नः पूर्वे त्रिभागे तु धूर्याणां वाहनं स्मृतम्।
विश्रामो मध्यमे भागे भाग्ये श्रान्ते यथासुखम् ॥
यत्र वा त्वरया कृत्य संशयो यत्र वाञ्छति।
वाहयेत्तत्र धुर्यांस्तु न स पापेन लिप्यते ॥
अन्यथा वाहनादेव निरयं याति रौरवम्।
रुधिरं पातयेत्तेषां यस्तु किञ्चिन्नराधमः॥
भ्रूणहत्यासमं पापं तस्या स्यात्पाण्डुनन्दन ! ।
तेन पापेन पापात्मा नरकं याति सर्वशः ॥
नरकेषु स सर्वेषु समाः स्थित्वा शत ततः।
इह मानुष्यके लोके बलीवर्दो भविष्यति ॥
तस्मात्त्वि मुक्तिमन्विच्छन् दद्यात्तु कपिलान्नरः।
कपिलां वाहयेद्यस्तु वृषलो लोभमोहितः॥

तेन देवास्त्रयस्त्रिंशत्पितरश्चापि वाहिताः।
स देवैः पितृभिर्नित्यं वर्जितास्तु सदुर्मतिः॥
नरकान्नरकं घोरं गच्छेदाप्रलयं नृप!।
ब्रह्मा रुद्रस्तथाग्निश्च कपिलानां गतिङ्गताः॥
तस्मात्ते तु न गन्तव्या पुण्याश्चैव विशेषतः।
निवसन्ति यदा यान्तास्त्रहारन्युय तत्कुलम्॥
यावन्ति तेषां रोमाणि तावद्वर्षशतन्नृप!।
नरके परिपच्यन्ते तत्र तद्वाहका नराः॥
कपिला सर्वयज्ञेषु दक्षिणार्थं विधीयते।
तस्मात्ता दक्षिणा देया यज्ञेष्वेव द्विजातिभिः॥
होमार्थे चाग्निहोत्रस्य यः प्रयच्छेत्स यत्नतः।
श्रोत्रियाय दरिद्राय प्रशान्ताय यतात्मने॥
तेन दानेन पूतात्मा सोऽग्निलोके महीयते।
यावन्ति चैव रोमाणि कपिलाया युधिष्ठिर!॥
तावद्वर्षसहस्राणि सोऽग्निलोके महीयते।
सुवर्णखुरशृङ्गीं यः कपिलां हि प्रयच्छति॥
विषुवेत्यापि येनैव सोऽश्वमेधफलं लभेत्।
तेनाश्वमेधतुल्येन मम लोकं स गच्छति॥
सुवर्णशृङ्गी रूप्यखुरा सवत्सा कांसदोहना।
वस्त्रैरलङ्कृता पुष्टा पुष्पमाल्यैश्च पूजिता॥
पवित्रं हि पवित्राणां सुवर्णमिति मे मतिः।
तस्मात् सुवर्णाभरणा दातव्या चाग्निहोत्रिणे॥
एवं दत्त्वा तु राजेन्द्र! सत्यपूर्वान् परानपि।

तारयिष्यति राजेन्द्र ! नात्रकार्या विचारणा ॥
अग्निष्टोमसहस्रञ्च वाजपेयञ्च तत्समम्।
वाजपेयसहस्रञ्च अश्वमेधञ्च तत्समम् ॥
अश्वमेधसहस्रञ्च राजसूयञ्च तत्समम्।
कपिलानां सहस्रेण विद्धि दत्तेन पाण्डव ! ॥
राजसूयफलं प्राप्य मम लोके महीयते।
न तस्य पुनरावृत्ति विद्यते कुरुपुङ्गव ! ॥

यच्छन्ति ये कपिलां सचैलां सकांस्यदोहां कनकाग्रशृङ्गीम्।
तैस्तैर्गुणैः कामदुघाभिभूत्वा नरं प्रदातार मुपैति सा गौः।
सा कर्मभिश्चाप्यनबुध्यमानातीव्रान्धकारे नरके पतन्तम् ॥
महार्णवे नौरिव वायुनीता दत्ताहि गौस्तारयते मनुष्यम्।
पुत्रांश्च पौत्रांश्च कुलञ्च सर्वमासन्ननाशं तारयते परत्र ॥
यावन्मनुष्यः पृथिवीं बिभर्ति तावत्प्रदातार मुपैति तत्र।
यथौषधं मन्त्रकृत नरस्य प्रयुक्तमात्रं विनिहन्ति रोगम्।
तथैव दत्ता कपिला सुपात्रे पापं निहन्याश्वनरस्य सर्वम् ॥
यथैव दृष्ट्वा भुजगाः सुपर्णं नश्यन्ति दूराद्विवशा भयार्ताः।
तथैव दृष्ट्वा कपिलाःप्रदानं नश्यन्ति पापानि नरस्य शीघ्रम् ॥
यथा त्वचं स्वां भुजगोविहाय पुनर्नवं रूपमुपैति पुण्यम्।
तथैव मुक्तः पुरुषः स्वपापाद्विराजते वै कपिलाप्रदानात् ॥
यथान्धकारं भुवनेषु लग्नं दीपो हि निर्वापयति प्रदीप्तः।
तथा नरे पाप मपि प्रलीनं निर्वापयेद्धि कपिलाप्रदानं ॥
यावन्ति रोमाणि भवन्ति तस्या वत्सान्वितायाः स्वशरीरजानि
तावत्प्रदाता युगवर्षकोटी स ब्रह्मलोके रमते मनुष्यः।

यथा हितोऽग्नेरतिथिः प्रियस्य पूर्वान्नदूरस्य जितेन्द्रियस्य ॥
सत्यव्रतस्याध्ययनान्वितस्य दत्ताहि गौस्तारयते परत्र ।

इति श्रीगौतमीये वैष्णवधर्मशास्त्रे कपिलादान
प्रशंसोनाम नवमोध्यायः ।

दशमोऽध्यायः ।

वैशम्पायनः । उक्तं श्रुत्वावचः पुण्यं कपिलादानमुत्तमम् ।
धर्मपुत्त्रः प्रहृष्टात्मा केशव पुनरब्रवीत् ॥
देवदेवेश ! कपिला सदा विप्राय दीयते ।
कथं सर्वेषु चाङ्गेषु तस्या स्तिष्ठन्ति देवताः ॥
याश्चैताः कपिलाः प्रोक्ता देवदेव ! त्वया मम ।
तासाङ्कति सुरश्रेष्ठ ! कपिलाः पुण्यलक्षणाः ॥
कथं वानुग्टहीतास्ता सुरैः पितृगणैरपि ।
के नात्मयुक्ता वर्णेन श्रोतुं कौतूहलं हि मे ।
वैशम्पायनः । युधिष्ठिरेणैवमुक्ते केशवः सत्यभल्लभः ॥
गुह्यानामपरङ्गुह्यं वक्तुमिवोप चक्र मे ।
भगवानुवाच । शृणु राजन् ! पवित्रं वै रहस्यन्धर्ममुत्तमम् ।
स्पृहणीयमिदं श्राव्यं उत्तमं हेतुवादिनाम् ।
यथा वत्सस्य पादौ द्वौ प्रसवे शिरसा सह ॥
दृश्यते कालदानन्तमाङ्क दान विदोजनाः ।
अन्तरीक्षगतोवत्सो यावद्भूमिं न यास्यति ।
गौस्तावत् पृथिवी ज्ञेया तस्माद्देया तु तादृशि ॥
यावन्ति धेन्वारोमाणि सवत्साया युधिष्ठिर ! ।

यावन्त्यः सिकताश्चापि गर्भोदकपरिस्रुताः ॥
तावद्वर्षसहस्राणि दाता स्वर्गे महीयते ।
सुवर्णाभरणां कृत्वा सवत्सां कपिलान्तु यः ॥
तिलैः प्रच्छादितां दद्यात् सर्वरत्नै रलङ्कृताम् ।
ससमुद्रनदी तेन सशैलद्वीपपत्तना ।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥
पृथिव्यास्तु स्वतुल्येन तेन दानेन मानवः ।
संसारसागरात्तीर्णो याति लोकं प्रजापतेः ॥
ब्रह्महत्यादि वा गोघ्नो भ्रूणहा गुरुतल्पगः ।
महापातकयुक्तोऽपि दानेनानेन शुध्यति ॥
इदं पठति यः पुण्यं कपिलादानमुत्तमम् ।
प्रातरुत्थाय भक्त्या तस्य पुण्यफलं शृणु ॥
मनसा कर्मणा वाचा मतिपूर्वं युधिष्ठिर ! ।
पापं रात्रिकृतं हन्यादस्याध्यायस्य पाठतः ॥
इदमावर्त्तमानस्तु श्राद्धे यस्तर्पयेद्द्विजान् ।
तस्याप्यमृत मश्नन्ति पितरोऽत्यन्त हर्षिताः ॥
यश्चेदं शृणुयाद्भक्त्या मङ्गलेनान्तरात्मना ।
तस्य रात्रि कृतं सर्वं पापमाशु व्यपोहति ॥
अतः परं विशेषन्तु कपिलानां शृणु क्रमात् ।
यश्चैताः कपिलाः प्रोक्ता दश राजन्मया तव ॥
तासाञ्च तस्य प्रवराः पुण्यं पापप्रणाशनम् ।
नमस्कृता वा स्पृष्टा वा घ्नन्ति पापं नरस्य तु ॥
यस्यैताः कपिला सन्ति गृहे पापप्रणाशनाः ।
तत्र श्रीर्विजयः कीर्तिः स्थितानित्यं युधिष्ठिर ! ॥

ये तासां प्रीतिमायान्ति ददतस्त्रिदशाः सदा ।
पयसा पितरः सर्वे घृतेनच हुताशनाः ॥
ततः पितामहाश्चैव तथैव प्रपितामहाः ।
सकृद्दत्तेन तुष्यन्ति वर्षकोटिं युधिष्ठिर ! ॥
कपिलाया घृतं क्षीरं दधिपायसमेव च ।
श्रोत्रियस्य सकृद्दत्त्वा नरः पापैर्विमुच्यते ॥
उपवासन्तु यः कृत्वा अहोरात्रं जितेन्द्रियः ।
कपिलापञ्चगव्यन्तु पीत्वा चान्द्रायणात्परम् ॥
सौम्ये मुहूर्त्ते तत्प्राश्य शुद्धात्माशुद्धमानसः ।
क्रोधानृतविनिर्मुक्तो मद्गतेनान्तरात्मना ॥
कपिलापञ्चगव्येन समन्त्रेण पृथक् पृथक् ।
यो मत्कृतिकृतं वापि शङ्कराकृतिमेव वा ॥
स्नापयेद्विष्णुवे भक्त्या सोऽश्वमेधफलं लभेत् ।
स मुक्तपापः पूतात्मा यानेनाम्बरशोभिना ॥
मम लोकं व्रजेद्युक्तो रुद्रलोक मथापिवा ।
ब्रह्मणा तु पुरा सृष्टा कपिला काञ्चनप्रभा ॥
अग्निकुण्डात्परैर्मन्त्रै र्होमधेनु र्महाप्रभा ।
सृष्टमात्रान्तु तां दृष्ट्वा देवाः रुद्रादयो दिवि ॥
सिद्धा ब्रह्मर्षयश्चैव वेदाः साङ्गाः सहाध्वराः ।
सागराः सरित श्चैव पर्वताः सबलाहकाः ॥
गन्धर्वाप्सरसो यक्षाः पन्नगाश्चाप्युपस्थिताः ।
सर्वे विस्मयमापन्ना अग्निमध्ये महाप्रभाम् ॥
मन्त्रै स्तोत्रैश्च विविधै स्तुष्टुवुस्तामनेकशः ।
कृताञ्जलिपुटाः सर्वे तान्त्विम्षङ्गीं त्रिलोचनाम् ॥

शिरोभिः प्रणता भूमौ वचसा स्ततारिणीम्।
ऊचुः प्राञ्जलयः सर्वे चतुर्वक्त्रं पितामहम्॥
किमिदं देव! देवेश! सर्वलोकपितामह!।
आज्ञापय महादेव! किं कुर्मस्ते प्रियं प्रभो!॥
एवमुक्तः सुरैः सर्वैः प्रहृष्टेनान्तरात्मना।
तत्र सानुनयं प्रीत्या ब्रह्मावचन मब्रवीत्॥
भवन्तो ह्यनुगृह्णन्तु दोग्ध्रीमेतां पयस्विनीम्।
होमधेनुरियं ज्ञेया ह्यग्निं सन्तर्पयिष्यति॥
पीतक्षीरा येहि चास्याः जातवीर्य्यपराक्रमाः।
जयिष्यथ यथाकामं दानवान् सर्व एवतु॥
जातवीर्य्यबलैश्वर्य्याः सत्ववन्तो जितारयः।
अदेवमातृकाः सर्वाः पालयिष्यथ वै प्रजाः॥
पालिताश्च प्रजाः सर्वा भवद्भिरिह धर्मतः।
पूजयिष्यति यो नित्यं यज्ञैर्विविधदक्षिणैः॥
एवमुक्ताः सुराः सर्वे ब्रह्मणा परमेष्ठिना।
ततः संहृष्टमनसः कपिलायै वरं ददुः॥
यस्माल्लोकहितायाद्य ब्रह्मणा त्वं विनिर्मिता।
तस्मात् पूता पवित्राच भव पापव्यपोहिनी॥
ये त्वां दृष्ट्वा नमस्यन्ति स्पृशन्ति च करैर्नराः।
तेषां वर्षकृतं पापं त्वद्भक्तानां विनश्यतु॥
कामतः कृतमज्ञात मनृतं यत्तु पातकम्।
त्वां दृष्ट्वा ये नमस्यन्ति गावः सर्वसहेति च॥
तेषां तद्विलयं यातु तमः सूर्य्योदये यथा।

भगवानुवाच । इत्युक्ता च वरं दत्त्वा प्रययुस्ते यथागतम् ॥

लोकनिस्तारणार्थन्तु सा च लोकं चचार ह ।
तस्या एव समुद्भूताः शेषास्तु कपिला अपि ॥
विचरन्ति महीमेतां लोकानुग्रहकारणात् ।
तस्मात्तु कपिला देया परत्र हितमिच्छता ।
यदा च दीयते राजन् ! कपिला ह्यग्निहोत्रिणे ॥
तदाग्रशृङ्गयोस्तस्या विष्णू रुद्रश्च तिष्ठतः ।
चन्द्रवज्रधरौवापि तिष्ठतः शृङ्गमूलयोः ॥
शृङ्गमध्ये तथा ब्रह्मा ललाटे गोवृषध्वजः ।
कर्णयो रश्विनीदेवौ चक्षुषोः शशिभास्करौ ॥
करयो र्वरुणो राजन् ! हृदये हव्यवाहनः ।
रोमान्ते मुनयः सर्वे चर्मण्येव प्रजापतिः ॥
निश्वासेषु स्थिता वेदाः सषडङ्गपदक्रमाः ।
नासापुटे स्थिता गन्धाः पुष्पाणि सुरभीणि च ॥
अधरे वसवः सर्वे मुखे चाग्निः प्रतिष्ठितः ।
साध्यु देवाः स्थिताः कण्ठे ग्रीवायां पार्वती स्थिता ॥
पृष्ठे च नक्षत्रगणाः कटिदेशे यमः स्थितः ।
अपाने सर्वतीर्थानि गोमूत्रे जाह्नवी स्वयम् ॥
श्रोणीतटस्थाः पितरो रोमलाङ्गूल माश्रिताः ।
पार्श्वयो रुभयोः सर्वे विश्वे देवाः प्रतिष्ठिताः ॥
तिष्ठत्युरसि तस्यास्तु प्रीतः शक्तिधरोगुहः ।
जानुजङ्घोरुदेशेषु पञ्च तिष्ठन्ति वायवः ॥
खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः ।
चत्वारः सागराः पूर्णा स्तस्याश्च सपयोधराः ॥

रतिर्मेधा स्वधा स्वाहा श्रद्धा शान्तिः स्मृतिर्धृतिः।
कीर्तिर्दीप्तिस्तथा कान्तिः पुष्टिस्तुष्टिस्तु सन्नतिः॥
दिशश्च विदिशश्चैव सेवन्ते कपिलां सदा।
देवाः पितृगणाश्चापि गन्धर्वाप्सरसाङ्गणाः॥
लोका द्वीपार्णवाश्चैव गङ्गाद्याः सरितस्तथा।
ग्रहा मातृगणाश्चैव वेदाः साङ्गाः सहाध्वरैः॥
वेदोक्तैर्विविधैर्मन्त्रैः स्तोत्रैः स्तुवन्ति हर्षिताः।
विद्याधराश्च ये सिद्धा भूतास्तारागणास्तथा॥
पुष्पवृष्टिं प्रमुञ्चन्ति प्रनृत्यन्ति च हर्षिताः।
ब्रह्मणोत्पादिते! देवि! वाग्निकुण्डान्महाप्रभे!॥
नमस्ते कपिले! पुण्ये! सर्वदेवैर्नमस्कृते!।
कपिले! च महासत्वे! सर्वतीर्थमये! शुभे!॥
दातारं स्वजनोपेतं ब्रह्मलोकं नय स्वयम्।
अहोरात्रमिदं पुण्यं सर्वदुःखघ्नमुत्तमम्॥
अहो धर्मार्जितश्चैव मिदमग्र्यं महाधनम्।
इत्याकाशगतास्ते तु जल्पन्ति च रमन्ति च॥
तस्याः प्रतिगृहीता च भङ्क्ते यां च द्विजोत्तमः।
तावद्देवगणाः सर्वे कपिलाञ्च नमन्ति वै॥
स्वर्णशृङ्गी रौप्यखुरा गन्धैः पुष्पैश्च पूजिता।
वस्त्राभ्यामेव ताभ्यान्तु धार्वस्तिष्टत्यलङ्कृताम्॥
तावद्यदिच्छेत् कपिला मन्त्रपूता सुसंस्कृता।
भूलोकवासिनः सर्वान् ब्रह्मलोकन्नयेत् स्वयम्॥
भूरश्वः कनकं गावो रौप्यं कृष्णतिला यवाः।
दीयमानानि विप्राय प्रहृष्यति दिने दिने।

अथवा श्रोत्रियेभ्यो वै तानि दत्तानि पाण्डव ! ।
तानि निन्दन्त्यथात्मानमशुभं किन्नु नः कृतम् ॥
अहोरात्रं पिशाचैश्च अर्च्यमानाः समन्ततः ।
यास्यामो विलयं शीघ्रमिति शोचन्ति तानि वै ॥
अथैतानि द्विजेभ्यो वै श्रोत्रियेभ्यो विशेषतः ।
दीयमानानि वर्धन्ते दातारं तारयन्ति च ॥

युधिष्ठिरः । देव ! देवेश ! दैत्यघ्न ! कालः को हव्यकव्ययोः ।
के तत्वपूजा मर्हन्ति वर्जनीयाश्च के द्विजाः ॥

भगवानुवाच । दैवं पूर्वाह्निकं कर्म पैतृकञ्चापराह्निकम् ।
कालहीनञ्च यद्दानं तद्दानं राक्षसं विदुः ॥
खादितं चावलीढञ्च कलिपूर्वञ्च यत्कृतम् ।
रजस्वलाभिस्पृष्टञ्च तद्दानं राक्षसं विदुः ॥
अवक्रुष्टञ्च यद्भक्त्या अव्रतेनापि भारत ! ।
परामृष्टं शुना चापि तद्भागं राक्षसं विदुः ॥
यावन्तः पतिता विप्रा संसर्गात् पतितास्तथा ।
दैवे वा पैतृके वापि राजन् ! नार्हन्ति सत्कृतिम् ॥
क्लीव श्वित्रीः च कुष्ठी च राजयक्ष्मान्वितश्च यः ।
अपस्मारी च यश्चाधः पित्र्ये नार्हन्ति सत्कृतिम् ॥
चिकित्सका देवलका वृद्धा नियमधारिणः ।
सोमविक्रयिणश्चापि श्राद्धे नार्हन्ति सत्कृतिम् ॥
एकोद्दिष्टस्य ये चान्नं भुञ्जते विधिवद्द्विजाः ।
चान्द्रायण मकृत्वा ते पुनर्नार्हन्ति सत्कृतिम् ॥
गायका नर्तकाश्चैव प्लावका वादकास्तथा ।

कथका योधकाश्चैव श्राद्धेनार्हन्ति सत्कृतिम्॥
अनग्नयश्च ये विप्रा मृतनिर्यातकाश्च ये।
ते नराः हि विकर्मस्था राजन्! नार्हन्ति सत्कृतिम्॥
अपरिज्ञातपूर्वश्च गणपुत्रश्च यो द्विजः।
पुत्रिकापूर्वपुत्रश्च श्राद्धेनार्हन्ति सत्कृतिम्॥
ऋणकर्ता च यो विप्रो यश्च वाणिजको द्विजः।
प्राणिविक्रयवृत्तिश्च श्राद्धेनार्हन्ति सत्कृतिम्॥
चीर्णव्रता गुणैर्युक्ता येच स्वाध्यायतत्पराः।
सावित्रीज्ञाः क्रियावन्त स्ते श्राद्धे सत्कृतिक्षमाः॥
श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृतं तथा।
दर्भाः सुमनसां क्षेत्रं तत्कालं श्राद्धदो भवेत्॥
चारित्रनियता राजन्! कृशा ये कृशवृत्तयः।
अर्थिनश्चोपगच्छन्ति तेभ्यो दत्तं महत्फलम्॥
तपस्विनश्च ये युक्ता स्तथा भैक्षचराश्च ये।
अर्थिनः किञ्चिदिच्छन्ति तेषां दत्तं महत्फलम्॥
एवं धर्मविदां श्रेष्ठ! ज्ञात्वा सर्वात्मना सदा।
श्रोत्रियाय दरिद्राय प्रयच्छानुपकारिणे॥
दानं यत्ते प्रियं किञ्चिच्छ्रोत्रियाणाञ्च यत्प्रियम्।
तत्प्रयच्छ स्वधर्मज्ञ! यदिच्छसि त मक्षयम्॥
निरयं ये च गच्छन्ति तच्छृणुष्व युधिष्ठिर!।
गुर्वर्थं वा गवार्थं वा नोचेदन्यत्र पाण्डव!॥
वदन्ति येऽनृतं विप्रास्ते वै निरयगामिनः।
परदारापहर्तारः परदाराभिमर्षकाः॥

परदारप्रयोक्तार स्ते वै निरयगामिनः।
अनाथान् प्रमदा बालान् वृद्धान् भीतान् तपस्विनः॥
प्रयच्छन्ति नरा ये च ते वै निरयगामिनः।
वृत्तिच्छेदं गृहच्छेदं दारच्छेदञ्च भारत!॥
मित्रच्छेदं तथा कुर्य्यु स्ते वै निरयगामिनः।
वर्णाश्रमाणां ये संस्थाः पाषण्डा येच पापिनः॥
उपासते चतान्येतु ते सर्वे नरकालयाः।
वेदविक्रयिणश्चैव वेदानाञ्चैव दूषकाः॥
वेदानां लेखिनश्चैव ते वै निरयगामिनः।
रसविक्रयिणो राजन्! विषविक्रयिणश्च ये॥
क्षीरविक्रयिणश्चापि ते वै निरयगामिनः।
चण्डालेभ्यश्च ये क्षीरं प्रयच्छन्ति नराधमाः॥
अर्थार्थमथवा स्नेहात्ते वै निरयगामिनः।
ब्राह्मणानाङ्गवाञ्चैव वृद्धानाञ्च युधिष्ठिर!॥
ये तरयन्ति कार्येषु ते वै निरयगामिनः।
उपाध्यायञ्च पितरं गुरुञ्च भरतर्षभ!।
ये त्यजन्ति सहायांश्च ते वै निरयगामिनः॥
अदातारं समर्था ये द्रव्याद्यालोभकारणात्।
दीनानाथान्न पश्यन्ति ते वै निरयगामिनः॥
क्षान्तान्दान्तान् कृशान् प्राज्ञान् दीर्घकालं सहोषितान्
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः॥
बालानामथ वृद्धानां श्रान्तानाञ्चापि ये नराः।
अदत्त्वाश्नन्ति मृष्टान्नन्ते वै निरयगामिनः॥

एते पूर्वर्षिभिः प्रोक्ताः पुराणानां च दूषकाः।
येच विप्रान् प्रदुष्यन्ति ते वै निरयगामिनः।
ये स्वर्गन्तु समायान्ति तान् शृणुष्व युधिष्ठिर! ॥
दानेन तपसा चैव सत्येन च दमेन च।
ये धर्ममनुवर्तन्ते ते नराः स्वर्गगामिनः॥
शुश्रूषाभिरुपाध्यायाच्छ्रुतिमादाय भारत!।
ये प्रतिग्रहनिस्नेहा स्ते नराः स्वर्गगामिनः॥
प्रतिप्रदानदातारः श्रद्धयाश्रद्धयापि वा।
दातारश्चापि विद्यानान्ते नराः स्वर्गगामिनः।
क्षमावन्तश्च धीराश्च धर्मकार्येषु चोत्थिताः॥
मङ्गलाचार युक्ताश्च ते नराः स्वर्गगामिनः।
मधुमांसासवेभ्यस्तु निवृत्ताऋतुमत्यापि॥
परदारनिवृत्ताश्च ते नराः स्वर्गगामिनः।
वैवाहिकन्तु कन्यानां दरिद्राणाञ्च ये नराः॥
कारयन्ति च कुर्वन्ति ते नराः स्वर्गगामिनः।
तपसा चैव दानेन येत्वशक्ता नरेश्वर!।
धर्मोपदेशान् कुर्वन्ति ते नराः स्वर्गगामिनः॥
दानाना मुपदेशञ्च तपसो नियमञ्च तु।
व्रतानामपि ये कुर्य्युस्ते नराः स्वर्गगामिनः॥
येच मार्गोपदेष्टार स्तथा संक्रमकारिणः।
मार्गशुद्धिकरा ये च ते नराः स्वर्गगामिनः।
रसानामथबीजाना मौषधानान्तथैव च।
दातारः श्रद्धयोपेता स्तेनराः स्वर्गगामिनः॥

सायं प्रातर्द्दिवा सन्ध्यां नित्यं ये चाप्युपासते।
हव्यकव्यकरा नित्यं ते नराः स्वर्गगामिनः॥
क्षेमाक्षेमञ्च मार्गेषु समानि विषमाणि च।
अध्वानं ये च वक्ष्यन्ति ते नराः स्वर्गगामिनः॥
हव्यकव्यविदो येच ते नराः स्वर्गगामिनः।
पर्वद्वये चतुर्दश्या मष्टम्यां सन्ध्ययोर्द्दयोः॥
आर्द्रायां जन्मनक्षत्रे विषुवे श्रावणे हि ये।
ग्रामधर्माद्धि विरता स्ते नराः स्वर्गगामिनः॥
धर्माधर्मौ च कथितौ भूयः श्रोतुं किमिच्छसि॥

इति श्रीगौतमीये वैष्णवशास्त्रे धर्माधर्मकथनोनाम
दशमोऽध्यायः।

एकादशोऽध्यायः।

युधिष्ठिरः। इदं मे तत्त्वतोदेव! वक्तुमर्हस्यशेषतः।
हिंसा मकृत्वा योमर्त्यो ब्रह्महत्या मवाप्नुयात्॥
भगवानुवाच। ब्राह्मणं स्वयमादाय भैक्षार्थं कृशवृत्तिकम्।
ब्रूयान्नास्तीति यः पश्चात् तमाहुर्ब्रह्मघातकम्।
उच्यते सद्धि विप्रस्य यस्य तस्य च भारत!।
वृत्तिं हरति दुर्बुद्धिस्तमाहु र्ब्रह्मघातकम्॥
यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम्।
दूषयेत्परमार्थं यस्तं विद्याद्ब्रह्मघातकम्॥
गोकुलस्य तृषार्त्तस्य बलात्तु वसुधाधिप!।

उत्पादयति यो विघ्नं तं विद्याद्ब्रह्मघातकम् ॥
आश्रमे वा वने वापि ग्रामे वा नगरेऽपि वा।
अग्निं यः प्रक्षिपेत्क्रूरस्तं विद्याद्ब्रह्मघातकम् ॥
मातरं पितरं वापि भृत्यं दत्त्वा भयं सुतम्।
त्यजेच्च करुणां भार्य्यां तं विद्याद्ब्रह्मघातकम् ॥
क्रोधाद्वा यदि वा द्वेषादाक्रुष्टस्तर्जितोऽपि वा।
ऋतौ स्त्रियं यो नोपेयात्तं विद्याद्ब्रह्मघातकम् ॥
यावत्स्मारी भवेद्धीनस्तन्नाशे यस्य दुःस्थितिः।
तत्सर्वं संहरेद्यो वै तं विद्याद्ब्रह्मघातकम् ॥

युधिष्ठिरः। सर्वेषामेव दानानां यत्तु दानं विशिष्यते।
अभोज्यान्नाश्च ये विप्रः तान् ब्रवीहि सुरेश्वर ! ॥

भगवानुवाच। अन्नमेव प्रशंसन्ति देवा ब्रह्मपुरःसराः।
अन्नेन सदृशं दानं न भूतं न भविष्यति ॥
अन्नकुण्डं शरीरं स्वंप्राणाश्चान्ने प्रतिष्ठिताः।
अभोज्यान्नानिमान् सर्वान् निखिलंतन्निबोध मे ॥
दीक्षितस्य कदर्य्यस्य बद्धस्य निगड़ेन तु।
अभिशस्तस्य षण्डस्य पाकभेदकरस्य च ॥
चिकित्सकस्य सर्वस्य तथाचोच्छिष्टभोजिनः।
शूद्रान्नं सूतकान्नञ्च शूद्रोच्छेषणमेव च।
द्विपदान्नं नगर्यन्नं पतितान्न मनर्च्चितम्।
तथा च पिशुनस्यान्नं यज्ञविक्रयिणस्तथा ॥
शैलूषान्नन्तु पापान्नं कृतघ्नस्यान्नमेव च।
अम्बष्ठस्य निषादस्य रङ्गावतरणस्य च ॥

सुवर्णिककस्य वैश्यस्य शस्त्रविक्रयिणस्तथा।
सुदुष्टं शौण्डिकान्नञ्च चेल निर्णेजकस्य च॥
अनिर्देशञ्च प्रेतान्नं गणिकान्नं तथैव च।
वन्दिनोद्यूतकर्त्तुश्च तथाद्यूतविदामपि॥
परिवित्तस्य यच्चान्नं परिवेत्तुस्तथैव च।
यश्चाग्रेदिधीषुर्विप्रो दिधीषरेव वा पति॥
तयोरप्युभयो रन्नं सर्वत्रापि विवर्जयेत्।
गोलकस्य च कुण्डस्य राजान्नञ्चापि वर्जयेत्॥
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्।
आयुः सुवर्णकारान्नं यशश्चर्मविकर्त्तिनः॥
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति।
पूयश्चिकित्सकस्यान्नं शुक्रन्तु वृषलीपतेः॥
विष्ठावार्द्धुषिकस्यान्नं तस्मात् तत्परिवर्जयेत्।
तेषां त्वगस्थिरोमाणि भुङ्क्ते योऽन्नं तु भक्षयेत्॥
दानानान्तु फलञ्चान्यत् शृणु पाण्डव! तत्त्वतः।
वारिद स्तृप्तिमाप्नोति सुखमक्षयमन्नदः।
तिलदस्तु प्रजामिष्टां दीपदाश्चक्षुरुत्तमम्॥
भूमिदो भूमिमाप्नोति दीर्घमायु र्हिरण्यदः।
गृहदोऽग्र्याणि वेश्मानि रूप्यदोरूपमुत्तमम्॥
वासदश्चन्द्रसालोक्य मश्विसालोक्यमश्वदः।
अनडुहः श्रिया जुष्टोऽन्नदोब्रध्नस्य विष्टपम्॥
यानशय्याप्रदो भार्य्या मैश्वर्य्य मभयप्रदः।
याति दशशतं सौख्यं ब्रह्मदो ब्रह्मसत्यताम्॥

सर्वेषान्तु प्रदानानां ब्रह्मदानं विशिष्यते ।
हिरण्यभूगवाश्वाज वस्त्रशय्यासनादिषु ॥
योवित्तं प्रतिगृह्णीति ददात्यर्चितमेव च ।
ता वुभौ गच्छतः स्वर्गं नरकन्तु विपर्य्यये ॥
अनृतं न वदेद्दत्वा तपस्तप्त्वा न विस्मयेत् ।
नातोह्यपवदेद्विप्रोविप्रान्नत्वात् प्रकीर्तयेत् ॥
यज्ञोऽनृतेन चरति तपः चरति विस्मयात् ।
आयुश्च पापवादेन दानन्तु परिकीर्तितम् ॥
एकः प्रजायते जन्तुरेकएव प्रलीयते ।
एकोहि भुङ्क्ते सुकृतमेकश्चाप्नोति दुष्कृतम् ॥
मृतं शरीरं मुत्सृज्य काष्ठलोष्ट्र समं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥
अनागतानि कार्य्याणि कर्तुङ्गणयते जनः ।
स शिरःकम्पमुद्वीक्ष्य सूयते दिनैमन्तकम् ॥
तस्माद्धर्म सहायोऽस्तु धर्मं सञ्चिनुयात्सदा ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥

येषान्तटाकानि समाः प्रपाश्च कूपांश्च यूपांश्च प्रतिश्रयांश्च ।
अन्नप्रदानं मधुराच वाणी यमस्य ते निर्वचना भवन्ति ।

इति गौतमीये वैष्णवधर्मशास्त्रे भोज्याभोज्यान्नविधिरेकादशोऽध्यायः ।

द्वादशोऽध्यायः।

युधिष्ठिरः। अनेकान्तं बहुद्वारं धर्ममाहुर्मनीषिणः।
किं लक्षणोऽसौ भवति तन्मे ब्रूहि सुरेश्वर!॥
भगवानुवाच। शृणु राजन्! समासेन धर्मशौचविधिक्रमम्
अहिंसा सत्यमस्तेय मानृशंस्यं दमः शमः॥
आर्जवञ्चैव राजेन्द्र! निश्चितं धर्मलक्षणम्।
ब्रह्मचर्य्यं तपः क्षान्तिर्मधुमांसस्य वर्जनम्॥
मर्यादाया स्थितिश्चैव मशौचस्यच लक्षणम्।
बाल्ये विद्यान्निषेवेत यौवने दारसंग्रहम्॥
स्थाविर्य्ये मोक्षमातिष्ठेत् सर्वदा धर्ममाचरेत्।
ब्राह्मणान्नावमन्येत गुरून् परिवदेन्नच॥
यतीना मनुकूलः स्यादेष धर्मः सनातनः।
यतिर्गुरुर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः॥
पतिरेव गुरुः स्त्रीणां सर्वेषां पार्थिवो गुरुः।
यद्गृहस्थार्जितं पापं ज्ञानतोऽज्ञानतोऽपि वा॥
निर्दहिष्यति तत्सर्व मेकरात्रोषितो यतिः।
दुर्वृत्तोवा सुवृत्तोवा ज्ञानिनोऽज्ञानिनोऽपि वा॥
गृहस्थैर्यतयः पूज्याः परत्र हितकाङ्क्षिभिः।
एकदण्डी त्रिदण्डीवा शिखी मुण्डी तथैव च।
काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिर!।
अपूजितो गृहस्थैर्वा तथाचाप्यवमानितः॥
यतिः सर्वातिथिर्वापि नरके पातयिष्यति।
तस्माच्च यतयः पूज्या मद्भक्ता मत्परायणाः॥

मयि सन्न्यस्तकर्माणः परत्र हितकाङ्क्षिभिः।
प्रहरेन्न द्विजान् प्राज्ञो गा न हन्यात् कदाचन॥
भ्रूणहत्यासमञ्चैतदुभयं यो निषेवते।
नाग्निमुखे नोपयमेन च पादौ प्रतापयेत्।
नान्तरागमनं कुर्य्यान्नचामेध्यं विनिक्षिपेत्।
उच्छिष्टो न स्पृशेदग्निमशौचस्थश्च जातुचित्॥
श्वचण्डालादिभिः स्पृष्टोनाङ्गमग्नौ प्रतापयेत्।
सर्वदेवमयो वह्निस्तस्माच्छुद्धतमः स्पृशेत्॥
प्राप्तमूत्रपुरीषस्तु न स्पृशेद्वह्निमात्मवान्।
यावत्तु धारयेद्वेदाः स्तावदप्रयतो भवेत्॥
पचनाग्निं न गृह्णीयां परवेश्मनि जातुचित्।
तेन दत्तेन चान्नेन यत्कर्म कुरुते शुभम्॥
ततत्कर्मणः फलस्यार्द्धं मग्निदस्य भवेत् नृप!।
तस्माच्च लिङ्गितं वह्निं कुर्याद्देवाविनाशिनम्॥
प्रमादाद्यदिवाज्ञानात् तस्य नाशो भविष्यति।
गृह्णीयात्तु मथित्वा वा श्रोत्रियागारतोऽपिवा॥
युधिष्ठिरः। कीदृशाः साधवो विप्राः केभ्यो दत्तं महत्फलम्।
कीदृशेभ्यो हि दातव्यं तन्मे ब्रूहि जनार्दन!।
भगवानुवाच। अक्रोधनाः सत्यपरा! धर्मनित्या दमे रताः।
तादृशाः साधवो लोके तेभ्यो दत्तं महत्फलम्॥
अमानिनः सर्वसहा अदृष्टार्था जितेन्द्रियाः।
सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महत्फलम्॥
अलुब्धार्चयो येषां श्रीमन्तः सत्यवादिनः।

स्वधर्मनिरताग्रेतु तेभ्यो दत्तं महत्फलम्॥
साङ्गांश्च चतुरो वेदान् योऽधीयीत दिने दिने।
शूद्रान्नं रस्य नो देहे तम्पात्र ऋषयो विदुः॥
प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः।
तारयेत् सकुलं सर्वमेकोऽपीह युधिष्ठिर!॥
गामन्नमश्वं वित्तं वा तद्विधे प्रतिपादयेत्।
नियच्छेच्च गुणोपेतं ब्राह्मणं साधुसम्मतम्॥
दूरादाभूय सत्कृत्य प्रयत्नेनैव पूजयेत्।
युधिष्ठिरः। धर्माधर्मविधिः कृत्स्नो मम भीष्मेण भाषितः।
भीष्मवाक्यात्सारभूतं वद धर्मं सुरेश्वर!॥
भगवानुवाच। अन्नेन धार्यते सर्वं जगदेतच्चराचरम्।
अन्नात्प्रभवति प्राणः प्रत्यक्षो नास्ति संशयः॥
अन्नं च पीडयित्वातु देशकालेच भक्षितः।
दातव्यं विषुवे चान्नं आत्मनो भूतिमिच्छता।
विप्रमध्वपरिश्रान्तं बालं वृद्धमथापि वा॥
अर्चयेद्गुरुवत् प्रीतो गृहस्थो गृहमागतम्।
क्रोधमुत्पादितं कृत्वा सुशीलो वीतमत्सरः॥
अर्चयेदतिथिं प्रीतः परत्रेह च भूतये।
अतिथीन्नावमन्येत न शुष्काङ्गिरमीरयेत्॥
न पृच्छेत् गोत्रचरणं नाधिकं वा कदाचन।
चण्डालो वा श्वपाको वा काले यः कश्चिदागतः॥
अन्नेन पूजनीयः स परत्र हितमिच्छता।
यः पिधाय गृहद्वारं भुङ्क्तेऽन्नेकः प्रहृष्टवत्॥
स्वर्गद्वारं विधानं वै कृतन्तेन युधिष्ठिर!।

विप्रदेवानृषीन् विप्रानतिथींश्च निराश्रयान्॥
योनरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत्।
कृत्वापि बहुशः पापं यो दद्यादन्नमर्थिने॥
ब्राह्मणाय विशेषेण सर्वपापैः प्रमुच्यते।
अन्नदः प्राणदो लोके प्राणदः सर्वदो भवेत्॥
तस्मादन्नं प्रयत्नेन दातव्यं भूतिमिच्छता।
अन्नं ह्यमृतमित्याहुरन्नं पूजितकं स्मृतम्॥
अन्नप्रणाशे सीदन्ति शरीरे सर्वधातवः।
बलं बलवतो न स्यादन्नं तस्य च देहिनः॥
तस्मादन्नं प्रदातव्यं श्रद्धयाऽश्रद्धयापि वा।
आदित्योऽपि रसं सर्वमादत्ते स गभस्तिभिः॥
वायुस्तस्मात्समाधाय रसमन्ने निषेचयेत्।
तत्तु मेघगतं भूमौ शक्रो वर्षति पाण्डव!॥
तस्यां शस्यानि रोहन्ति येर्जीवन्त्यखिलाः प्रजाः।
मांसमेदोऽस्थिमज्जानां सम्भवस्तन्न एव हि॥
एवमन्नञ्च सूर्यश्च पवनः शक्र एव च।
एक एव स्मृतोराशि र्यतो भूतानि जज्ञिरे॥
वरं ददाति भूतानां तेजश्च भरतर्षभ!।
अन्नदानेन सम्प्रीता देवाश्च पितृभिः सह॥
तस्मात्तेजो यशो वीर्य्यं बलायुर्वृद्धयः सदा।
श्रद्धयान्नं प्रदातव्यमिति पौराणिकी श्रुतिः॥
अन्नदानं तु ये लोके कुर्वन्ति श्रद्धया नराः।
भवनानि च दिव्यानि दिवि तेषां महात्मनाम्॥
नानासंस्थानि रूपाणि नानाभूतयुतानि च।

चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ॥
तरुणादित्यवर्णानि स्थावराणि महान्ति च।
अनेकशतसंख्यानि सान्तर्जलवनानि च ॥
वैदूर्यमणिचित्राणि रूप्यरुक्ममयानि च।
तत्र पुष्पफलोपिताः कामदाः सुरपादपाः ॥
वाप्यो वीथ्यः सभाः कूपाः दीर्घिकाश्चैव सर्वशः।
निर्घोषवन्ति यानानि युक्तानि च सहस्रशः ॥
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च।
क्षीरस्रवन्त्यः सरितस्तथा चैवान्नपर्वताः ॥
प्रासादाः पाण्डराभ्राभाः शय्याश्च कनकोज्वलाः।
अन्नदानात्तु सिध्यन्ति तस्मादन्नप्रदो भवेत् ॥

इति श्रीगौतमीये वैष्णवधर्मशास्त्रे अन्नदानविधिर्नाम द्वादशोऽध्यायः।

त्रयोदशोऽध्यायः।

अन्नदानफलं श्रुत्वा प्रीतोऽस्मासुरसूदन !।
भोजनस्य विधिं वक्तुं देवदेव ! त्वमर्हसि ॥
भगवानुवाच। भोजनस्य द्विजातीनां विधानं शृणु पाण्डव !।
स्नातः शुचिः शुचौ देशे निर्जने हुतपावकः ॥
मण्डलं कारयित्वा तु चतुरस्रं द्विजोत्तमः।
क्षत्रियस्य ततो वृत्तं वैश्यस्य धनुसन्निभम् ॥
कुर्वपादस्तु भुञ्जीयात् प्राङ्मुखश्चासने शुचौ।
पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः ॥

नैकग्रासास्तु भुञ्जीयान्नैवान्तर्धाय वै द्विजः।
न भिन्नपात्रे भुञ्जीत पर्णपृष्ठे तथैव च॥
अन्नं पूर्वं नमस्कुर्यात् प्रहृष्टेनान्तरात्मना।
नान्यदालोकयेदन्नान्नजुगुप्सेत वा पुनः॥
जुगुप्सितन्तु यच्चान्नं राक्षसा एव भुञ्जते।
पाणिना जलमुद्धृत्य कुर्यादन्नं प्रदक्षिणम्॥
अपेयं तद्विजानीयात् पीत्वा चान्द्रायणञ्चरेत्।
परिषेकजलादन्यत् पेयत्वे त्वनुमन्त्रवत्॥
पञ्चप्राणाहुतिं कुर्यात्समन्त्रन्तु पृथक् पृथक्।
यथा रसं न जानाति जिह्वा प्राणाहुतौ नृप !॥
तथा समाहितः कुर्यात् प्राणाहुतिमतन्द्रितः।
विदित्वा चान्नमन्नादं पञ्च प्राणांश्च पाण्डव !॥
यः कुर्यादाहुतीः पञ्च तेनेष्टाः पञ्च वायवः।
अतोऽन्यथा तु भुञ्जानो ब्राह्मणो ज्ञानदुर्बलः॥
तेनान्नेन सुरान् प्रेतान् राक्षसांस्तर्पयिष्यति।
वक्त्रप्रमाणपिण्डानि ग्रसेनेकैन वा पुनः॥
वक्त्राधिकन्तु यत्पिण्डमात्मोच्छिष्टन्तदुच्यते।
दष्टावशिष्टमन्नञ्च वक्त्रनिःसृतमेव च॥
अभोज्यन्तद्विजानीयात् भुक्त्वा चान्द्रायणञ्चरेत्।
स्वमुच्छिष्टन्तु यो भुङ्क्ते यो भुङ्क्ते मुक्तभाजने॥
चान्द्रायणञ्च यत्कृच्छ्रं प्राजापत्यमथापि वा।
पिबतः पतिते तोये भाजने मुखनिःसृते॥
अभोज्यन्तद्भवेदन्नं भुक्त्वा चान्द्रायणञ्चरेत्।
केशकीटावपन्नञ्च मुखमारुतवीजितम्॥

अभोज्यं तद्विजानीयाद् भुक्त्वा चान्द्रायणञ्चरेत्।
उत्थाय च पुनर्भुक्तं पादस्पृष्टञ्च लङ्घितम्॥
अन्नं तद्राक्षसं विद्यात्तस्मात्तत्परिवर्जयेत्।
राक्षसोच्छिष्टभुग्विप्रः सत्यपूर्वान् परानपि॥
निरये रौरवे घोरे स पितॄन् पातयिष्यति।
तस्मिन्नाचमनं कुर्यात् यस्मिन् पात्रे स भुक्तवान्॥
यश्चतिष्ठत्यनाचान्तो भुक्तवान्नासने ततः।
स्नानं सद्यः प्रकुर्वीत नान्यथा प्रयतो भवेत्॥

युधिष्ठिरः। तृणमुष्टिविधानञ्च तिलमाहात्म्यमेव च।
इक्षुसोमसमुद्भूतिं वक्तुमर्हसि मानद!॥

भगवानुवाच। पितरो वृषभा ज्ञेया गावो लोकस्य मातरः।
तासान्तु पूजया राजन्! पूजिताः पितृमातरः॥
सभा विप्रगृहाश्चापि देवतायतनानि च।
शुध्यन्ति स्वत एवासां किम्भूतमधिकं ततः॥
ग्रासमुष्टिं परगवे दद्यात् संवत्सरन्तु यः।
अकृत्वाऽऽत्मियमाहारं वृतवत्सार्वकामिकम्॥
गावो मे मातरः सर्वाः पितरश्चैव मे वृषाः।
ग्रासमुष्टिं मया दत्तां प्रतिगृह्णन्तु मातरः॥
इत्युक्त्वा तेन मन्त्रेण सावित्र्या वा समाहितः।
दद्यात्तु ग्रासमुष्टिं यस्तस्य पुण्यफलं शृणु॥
यत् कृतं दुष्कृतन्तेन ज्ञानतोऽज्ञानतोऽपि वा।
तस्य नश्यति तत्सर्वं दुःस्वप्नञ्च विनश्यति॥
तिलाः पवित्रा पापघ्ना नारायणसमुद्भवाः।
तिलाः श्राद्धे प्रशंसन्ति दानमेतदनुत्तमम्॥

तिलानद्यात्तिलान् दद्यात्तिलान् प्रातरुपस्पृशेत्।
तिलास्तिला इति ब्रूयात् महत्पापविमुक्तये॥
तिलास्तु देवतारूपा नावमन्या द्विजातिभिः।
भोजनाभ्यञ्जनाद्दानाद्यो न तत् कुरुते तिलैः॥
कृमिर्भूत्वाश्वविष्ठायां पितृभिः सह मज्जति।
तिलान् यो पीडयेद्विप्रो स्वचक्रेण स्वयं नृप!॥
पीडयेद्यदि तान् मोहान्नरकं याति रौरवम्।
इतिवंशोद्भवे सोमः सोमवंशोद्भवे द्विजः॥
इक्षून् यः पीडयेत्तस्माद्विजघात्यात्मघातकः।
इक्षुदण्डसहस्रेण एकैकेन द्विजोत्तम:॥
ब्रह्महत्यामवाप्नोति ब्राह्मणो यत्र पीडकः।
तस्मान्न पीडयेदिक्षून् मन्त्रचक्रे द्विजोत्तमः॥

इति श्रीगौतमीये वैष्णवधर्मशास्त्रे तिलान्नदानादिप्रशंसा-नाम त्रयोदशोऽध्यायः।

चतुर्दशोऽध्यायः।

युधिष्ठिरः। समुच्चयं तु धर्माणां भोज्याभोज्यञ्च केशव!।
श्रुत मया त्वत्प्रसादादापद्धर्मं ब्रवीहि मे॥
भगवानुवाच। दुर्भिक्षे राष्ट्रसम्पाते त्वशौचे सूतकसूतके।
कर्मकालेऽध्वनि तथा नियमस्थो न लुप्यति॥
दूराध्वगमनात्खिन्नो द्विजालाभे तु शूद्रतः।
अकृतान्नञ्च यत्किञ्चिद्गृह्णीयादात्मवृत्तये॥
आतुरो दुःखितो वापि भयार्त्तो वा बुभुक्षितः।

भुञ्जन्विधि ा विप्रः प्रायश्चित्तीयते न च॥
यत्किञ्चिदपि कुर्वाणो विद्वान् गुरुनियोगकः।
तेषां वचनसामर्थ्यात्प्रायश्चित्तीयते न च॥
अनृतावृतुकाले वा दिवा रात्रौ तथापि वा।
प्रोषितस्तु स्त्रियं गच्छेत् प्रायश्चित्तीयते न च॥
निमन्त्रितस्तु यो विप्रो विधिवद्धव्यकव्ययोः।
मांसादीन्यपि भुञ्जानः प्रायश्चित्तीयते न च॥
अष्टौ तान्यव्रतघ्नानि आपोमूलं घृतं पयः।
हवि ब्राह्मणकामाया गुरोर्वचन मौषधम्॥
अशक्तं विधिवत्कर्तुं प्रायश्चित्तानि यो नरः।
विदुषां वचनेनापि दानेनापि विशुद्ध्यति॥
युधिष्ठिरः। प्रशस्यः कीदृशो विप्रो निन्द्यश्चापि सुरेश्वर!।
अष्टकापञ्चकः कालस्तन्मे कथय माधव!॥
भगवानुवाच। सत्यं यदि द्विजं दृष्ट्वा स्थानाद्देपति भास्करः।
एष मे मण्डलं भित्वा याति ब्रह्म सनातनम्॥
कुलीनः कर्मकृद्वैद्य स्तथैवाप्यनृशंसकः।
सदानृजुः सत्यवादी पात्रं सर्वद्दूमे द्विजाः॥
ये ते चाग्राशने स्यातुं भुञ्जानाः प्रथम द्विजाः।
तस्यां पंक्त्यां तु ये चान्ये तत् पुनन्त्येव दर्शनात्॥
मद्भक्ता ये द्विजश्रेष्ठा मद्गता मत्परायणाः।
तान् पङ्क्तिपावनान् विद्धि पूज्यांश्चैव विशेषतः॥
निन्द्यान् शृणु द्विजान् राजन्! अपिवा वेदपारगान्।
ब्राह्मणेष्वात्मनालोक्य चरन्तः पापकर्मणः॥
अनग्निरनधीयानः प्रतिग्रहरुचिस्तु यः।

यत्र कुत्र च भुञ्जान स्तं विद्यात्पङ्क्तिदूषकम् ॥
घृतसूतकपुष्टाङ्गो यस्तु शूद्रान्नभोजनः।
अहञ्चापि न जानामि गतिमस्य नराधिप!॥
शूद्रान्नरसपुष्टाङ्गो ह्यधीयानोऽपि नित्यशः।
जपतोजुह्वतो वापि गतिरूर्द्धं न विद्यते॥
आहिताग्निस्तु यो विप्रः शूद्रान्नेनापि वर्त्तते।
पञ्च तस्य प्रणश्यन्ति आत्म ब्रह्म त्रयोऽग्नयः॥
शूद्रप्रेषणकर्त्तुश्च ब्राह्मणस्य युधिष्ठिर!।
भूम्यामन्नं प्रदातव्यं श्वसृगालसमो हि सः॥
प्रेतीभूतञ्च यः शूद्रं ब्राह्मणोज्ञानदुर्बलः।
अनुगच्छेन्नीयमान स्त्रिरात्र मशुचिर्भवेत्॥
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम्।
प्राणायामशतं कृत्वाघृतं प्राश्य विशुद्ध्यति॥
अनाथब्राह्मणं प्रेतं ये वहन्ति द्विजोत्तमाः।
पदे पदेऽश्वमेधस्य फलं ते प्राप्नुवन्ति हि॥
न तेषा मशुभं किञ्चित् पापं वा शुभकर्मणाम्।
जलावगाहनादेव सद्यः शौचं विधीयते॥
शूद्रवेश्मनि विप्रेण चीरं वा यदि वा दधि।
घृतन्तेन न भोक्तव्यं विद्धि शूद्रान्नमेव तत्॥
विप्राणां भोक्तुकामाना मत्यन्तश्चान्नकाङ्क्षया।
यो विघ्नं कुरुते मर्त्य स्ततोऽन्यो नास्ति पापकृत्॥
सर्वे च वेदाः ऋषिभिरुदाङ्गैः साङ्गं पुराणञ्च कुलञ्च जन्मनोः।
एतानि सर्वाणि गतौ भवन्ति शीलव्यपेतस्य न हि द्विजस्य॥
ग्रहोपरागे विषुवायनादि सुपुण्यतिथ्याञ्च सुते च जाते।

नवेषु पद्मेषु च पाण्डुपुत्र ! गच्छेत्तमनिष्कन्तु सहस्र तुल्यम्॥
नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पञ्चदशी च मासे।
उपप्लवे चन्द्रमसोरवेश्च श्राद्धस्य काले ह्ययनद्वयंन॥
य स्त्वेकपंक्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदिवार्थहेतोः।
क्रूरं दुराचार मनात्मवन्तं ब्रह्मघ्नमेनं मुनयो वदन्ति॥
धनानि येषां विफलानि सन्ति नित्यं रमन्ते परलोकमूढाः।
तेषा मयं शत्रु वरघ्नलोको नासौ सदेहः ससुखं रमेत॥
ये युक्तयोगास्तपसि प्रयुक्ताः स्वाध्यायशीला जरयन्ति देहम्।
जितेन्द्रिया भूतहिते निविष्टास्तेषा मसौ नायमरिघ्नलोकः॥
ये धर्ममेव प्रथमञ्चरन्ति श्रमण लब्ध्वा निधनानि काले।
दारानवाप्य क्रतुभि र्यजन्ति तेषा मयञ्चैव परश्च लोकः॥
ये नैवविद्या न तपो न दानं न चापि मूढाः प्रजने यतन्ते।
न चापि गच्छन्ति सुखान्यभावात् तेषामयञ्चैव परस्य नास्ति॥
युधिष्ठिरः। नारायण ! पुराणेश ! योगवास ! नमोऽस्तु ते।
श्रोतुमिच्छामि कार्त्स्न्येन धर्मसारसमुच्चयम्॥
भगवानुवाच। धर्मसारं महाराज। मनुना प्रोक्त मादितः।
प्रवच्छामि मनुप्रोक्तं पौराणं श्रुतिसन्ततम्॥
अग्निचित्कपिलासत्री राजा भिक्षु र्महोदधिः।
दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत तान् सदा॥
गौरेकस्य प्रदातव्या न बहूनां युधिष्ठिर !।
याश्चैर्विक्रयमापन्नादहत्यासप्तमं कुलम्॥
बहूनां न प्रदातव्या गौर्वस्त्रं शयनं स्त्रियः।
तादृक् भूतन्तु यद्दानं दातारं नोपतिष्ठति॥
आक्रम्य ब्राह्मणो मत्क मन्नं येषान्तु वेश्मनि।

गोभिश्च पुण्यकं तेषां राजसूयादि शिष्यते ॥

मादृश्या इति यो ब्रूयाद्गोरग्ने ब्राह्मणस्य च ।
तिर्य्यग्योनिशतं गत्वा चण्डालेषु प्रजायते ॥

ब्राह्मणस्य तु देवस्य दरिद्रस्य च यद्धनम् ।
गुरोश्चापि हृतं राजन् ! स्वर्गस्थमपि पातयेत् ॥

धर्मजिज्ञासमानानां प्रमाणं प्रथमं श्रुतिः ।
द्वितीयन्तु स्मृतिशास्त्राणि तृतीयं लोकसंग्रहः ॥

आसमुद्राच्च वै पूर्वादासमुद्राच्च पश्चिमात् ।
हिमवद्विन्ध्ययोर्मध्य मार्य्यावर्त्तं प्रचक्षते ।

सरस्वतीदृषद्वत्यो स्तया नद्योर्यदन्तरम् ॥
तद्देव मातृकं देशं ब्रह्मावर्त्तं प्रचक्षते ।

तस्मिन्देशे सदाचारः पारम्पर्य्यक्रमागतः ॥
वर्णानां सान्तरालानां स सदाचार उच्यते ।

कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसैनिकाः ॥
एते महर्षिदेशास्तु ब्रह्मावर्त्तादनन्तरम् ।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ॥
स्वं स्वं चरित्रं शिक्षन्ते पृथिव्यां सर्वमानवाः ।

हिमवद्विन्ध्ययोर्मध्ये यत्प्राग्विनशनादपि ॥
प्रत्यगेव प्रयागश्च मध्यदेशः प्रकीर्त्तितः ।

कृष्णसारस्तु चरति मृगोयत्र स्वभावतः ॥
संज्ञया ज्ञायते देशो म्लेच्छदेशस्तु तत्परम् ।

एतान् विज्ञाय देशांस्तु संश्रयेरन् द्विजातयः
शूद्रस्तु यस्मिन् कस्मिन् वा निवसेद्वृत्तिकर्शितः ।
आचारप्रभवोधर्मो ह्यहिंसा सत्यमेव च ॥

दानञ्चैव यथा शान्ति र्नियमानियमैः सह ।
वैदिकैः कर्म्मभिः पुण्यैः निषेकादि द्विजात्मनाम् ॥
कार्य्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ।
गर्भैर्होमैर्जातकर्म नामचौडोपनायनैः ॥
स्वाध्यायैस्तर्पणैश्चैव विवाहस्नातकव्रतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयः क्रियते ततः ॥
धर्मार्थौ यस्य महतां शुश्रूषा मपि तद्विधः ।
न तस्य विद्या वक्तव्या कदाचिदपि चोषरे ॥
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।
यतो ज्ञानागमं प्राप्त स्तं पूर्वमभिवादयेत् ॥
सव्येषु सव्यं स्पृष्टव्यो दक्षिणेन तु दक्षिणम् ।
न कुर्य्यादेकहस्तेन गुरोः पादाभिवन्दनम् ॥
निषेकादीनि कर्माणि यः करोति यथाविधि ।
अध्यापयन्ति वेदांश्च स विप्रो गुरुरुच्यते ॥
इहोपनयनं वेदान्योऽध्यापयति नित्यशः ।
सुकल्पान् इतिहासांश्च स उपाध्याय उच्यते ।
साङ्गान् वेदांश्च योऽध्याप्य शिक्षयित्वा व्रतानि च ॥
विव्रणोति च मन्त्रार्थां नाचार्यः सोऽभिधीयते ।
उपाध्यायाद्दशाचार्य्य आचार्य्याणां शतं पिता ॥
पितुर्दशगुणं माता गौरवेणातिरिच्यते ।
तस्मात्तेषां वशे तिष्टेत्तच्छुश्रूषापरो भवेत् ॥
अवमानात्तु तेषां हि नरकान्याति सर्वशः ।
अन्वङ्गानतिरिक्ताङ्गान् विद्याहीनान् वयोऽधिकान् ॥
रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत् ।

शपतो यत् कृतं पुण्यं सेव्यमानन्तु गच्छति ॥
सेव्यमानस्य यत्पापं शपन्त मनुगच्छति ।
नास्तिक्यं लोकनिन्दाञ्च देवतानाञ्च तुच्छनम् ।
द्वेषं स्तम्भञ्च मोहञ्च क्रोधन्त्वेत्तांश्च विवर्जयेत् ॥
यस्य यस्य हि यो भाव स्तेन तेन हि तं रथम् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशन्नयेत् ॥

इति गौतमीये श्रीवैष्णवधर्मशास्त्रे धर्मसारसमुच्चयोनाम चतुर्दशोऽध्यायः ।

पञ्चदशोऽध्यायः ।

युधिष्ठिरः । भगवंस्तव भक्तस्य मम धर्मजनप्रिय ! ।
धर्मं पुण्यतमं देव ! पृच्छतः कथयस्व मे ॥
यदेकमग्निहोत्रं वै सृष्टं वर्णत्रयस्य तु ।
मन्त्रस्य हुत्वा तं सम्यग्विधिना चाप्युपासितम् ॥
आहिताग्निन्नयत्यूर्द्धं सपत्नीकं सबान्धवम् ।
कथं तद्ब्राह्मणैर्देव ! होतव्यं क्षत्रियैः कथम् ॥
वैश्यैर्वा देव ! देवेश ! कथं वा सुकृतं भवेत् ।
कस्मिन् काले कथं कस्यचेयोऽग्निः स्यात् सुरेश्वर! ॥
आहितस्य कथं वापि सम्यगाचरणं भवेत् ।
कत्यग्नयः किमात्मानं स्थानं किं कस्य वा विभो! ॥
कतरस्मिन्नु वा स्थाने किं व्रजेदग्निहोत्रकः ।
अग्निहोत्रनिमित्तञ्च किमुत्पन्नं पुराऽनघ ! ॥

कथमेवाथ हूयन्ते प्रीयन्ते च सुरैः कथम्।
विधिवन्मन्त्रवद्भक्त्या पूजिता स्त्वग्नयः कथम्॥
कां गतिं वदतां श्रेष्ठ! नयन्ति ह्यग्निहोत्रिणम्।
दुर्हुताश्चाग्निहुताश्चाप्यविज्ञातास्त्रयोऽग्नयः॥
किमाहिताग्नेः कुर्वन्ति चीर्णावा अपि केशव!।
उत्सन्नाग्निस्तु पापात्मा कां योनिं देव! गच्छति॥
एतत्सर्वं हि देवेश! भक्त्या भूपगतस्य मे।
वक्तुमर्हसि धर्मज्ञ! सर्वावास! नमोऽस्तु ते॥

भगवानुवाच। शृणु राजन्! महत् पुण्यमिदं धर्मामृतं परम्।
यत्तु तारयते भक्तान् ब्राह्मणानग्निहोत्रिणः॥
ब्रह्मा त्वेतान् सृजन् लोकान् महदाद्यान् महाद्युतीन्।
सृष्टोऽग्निर्मुखतः पूर्वं लोकानां हितकाम्यया॥
यस्मादग्रे स भूतानां सर्वेषान्निर्मितो मया।
तस्मादग्नीत्यभिहितं पुराणज्ञैर्महर्षिभिः॥
यस्मात्तु सर्वकृत्येषु पूर्वमस्मै प्रदीयते।
आहुतिर्दीप्यमानाय तस्मादग्नीति कथ्यते॥
यस्माच्च नयति ह्यग्र्यां गतिं विप्रान् सुपूजितान्।
तस्माच्च नयनाद्राजन्! वेदेष्वग्नीति चोच्यते॥
यस्माच्च दुर्हुतान् सोऽय मलम्भक्षयितुं क्षणात्।
यजमाना नरश्रेष्ठाः क्रव्यादोऽग्निस्तु न स्थितः॥
सर्वभूताधिपो राजन्! देवानामेष वै मुखम्।
प्रथमं मन्मुखात् सृष्टो लोकार्थं पचनप्रभुः॥
सृष्टमात्रो जगत्सर्वं सुतमैश्च युतं खलु।

ततः प्रशमितः सोऽग्निरूपः स मायया पुरा॥
कृतादुपासनात् सोऽयमौपासन इति स्मृतः।
आहुतिः सर्वमाख्यातस्तस्मिन् वसति योऽनलः।
आवसथ इति ख्यातस्तेनासौ ब्रह्मवादिभिः॥
तस्मिन् पञ्च महायज्ञा वर्त्तन्ते यस्य धर्मतः।
सोममण्डलमध्येन गतिस्तस्य द्विजन्मनः॥
तेन सप्तर्षयः सिद्धाः संयतेन्द्रियबुद्धयः।
गतात्मभासा युज्यन्ते मेध्याग्निश्च न तत्पराः॥
अपरे चावसथं तन्तु पचनाग्निं प्रचक्षते।
तस्मिन् पञ्च महायज्ञा वैश्वदेवश्च वर्त्तते॥
स्थालीपाकश्च गृह्याश्च सर्वे तस्मिन् प्रतिष्ठिताः।
गृह्यकर्मवह्नो यस्माद् ततो गृहपतिस्तु सः॥
औपासनञ्चावसथं सभ्यं पचनपावकम्।
आहुर्ब्रह्मविदः केचिदेतमेव ममापि च॥
अग्निहोत्रप्रकारन्तु शृणु राजन्! समाहितः।
त्रयाणां गणनामापि अग्नीनामुच्यते मया॥
गृहाणान्तु पतित्वाद्धि गार्हपत्यमिति स्मृतम्।
यजमानन्तु यस्मात्तु दक्षिणान्तु गतिं नयेत्॥
दक्षिणाग्निं तदाहुस्ते दक्षिणत्वाच्च तद्द्विजाः।
आहुतीः सर्वमाख्यातं हवनं हव्यवाहनम्॥
आहूय योऽग्निं नियतं यश्चाहवनसंरतः।
आभिमुख्येन होमस्तु यस्माद्यज्ञेषु वर्त्तते॥
तेनास्याहवनीयत्वं गतोवह्निर्महाद्युतिः।

आहोमादग्निहोत्रेषु यज्ञे ये यत्र सर्वशः॥
यस्मादस्मिन् प्रवर्त्तन्ते ततोह्याहवनीयता।
आवसथन्तु येचाग्निं पचनाग्निं प्रचक्षते॥
तेषां सभागतोवह्निः सभ्यइत्यभिधीयते।
आवसथस्तु यो वह्निः प्रथमः स प्रजापतिः॥
ब्रह्मा वै गार्हपत्योऽग्नि स्तस्माद्देवो हि वा भवेत्।
दक्षिणाग्निः स्वयं रुद्रः क्रोधात्मा चण्ड एव सः॥
अहमाहवनीयोऽग्नि रन्तरीक्षञ्च दक्षिणः।
स्वर्गमाहवनीयोऽग्निरेव मग्नित्रयं स्मृतम्॥
वृत्तो वै गार्हपत्योऽग्नि र्यस्माद्वृत्ता च मेदिनी।
अर्द्धचन्द्राकृतिः खं वै दक्षिणाग्नि स्तथा भवेत्॥
चतुरस्रं ततः स्वर्गं निर्मलं ह्यग्निसन्निभम्।
तस्मादाहवनीयोऽग्नि श्चतुरस्रो भवेन्नृप!॥
जुहुयाद्गार्हपत्यं यो भुवं जयति स द्विजः।
जुहुयाद्दक्षिणाग्निं यः स जयत्यन्तरीक्षकम्॥
पृथिवी मन्तरीक्षं वा दिवस्त्वगणैः सह।
जयत्याहवनीयं यो जुहुयाद्भक्तिमान् द्विजः॥
यस्त्वावसथे जुहुयात्तुलाग्निं विधिवद्द्विजः।
सच सप्तर्षिलोकेषु सपत्नीकः प्रमोदते॥
यश्चाप्युपास्ते सभ्यं वा विधिवत्प्रयतात्मवान्।
स जयेद्वा यमभयं सर्वं तथाप्यहिसभामपि॥
अग्नीनामथवाग्नेस्तु यस्य होमः प्रदीयते।
दृष्टीभवति सर्वोऽग्निरग्निहोत्रञ्च वै भवेत्॥

त्रयाणामपि वह्नीनामग्निहोत्रमिति स्मृतम् ।
त्राणाद्धै यजमानस्य चाग्निहोत्र मिति स्मृतम् ॥
होइत्येष विवादो वै विषादो दुःख मुच्यते ।
दुःखं तापत्रयं प्रोक्तं तापो हि नरकं विदुः ॥
यस्माद्वा त्रायते दुःखाद्यजमानं हुतोऽनलः ।
तस्मात्तु विधिवत्प्रोक्त मग्निहोत्रमिति श्रुतम् ॥
तदग्निहोत्रं सृष्टं वै ब्रह्मणा लोककारिणा ।
वेदाश्चाप्यग्निहोत्रार्थं जज्ञिरे स्वयमेव तु ॥
अग्निहोत्रं फला वेदाः शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला नारी दानहोमफलं धनम् ॥
त्रिवेदमन्त्रसंयोगादग्निहोत्रं प्रचक्षते ।
ऋग्यजुःसामभिः पुण्यैः स्थाप्यते सूत्रसंयतैः ॥
वसन्ते ब्राह्मणस्य स्यादाधेयोऽग्नि र्नराधिप ! ।
वसन्तो ब्राह्मणः प्रोक्तो ब्रह्मयोनिः स उच्यते ॥
अग्न्याधानन्तु येनाद्य वसन्ते क्रियते नृप ! ।
तस्य श्रीर्ब्रह्मपुष्टिश्च ब्राह्मणस्य विवर्द्धते ॥
क्रतवः सर्व एवैते त्रिभिर्वेदैरलङ्कृताः ।
अग्निहोत्राः प्रवर्तन्ते यैरिदं ध्रियते जगत् ॥
ग्राम्यारण्याश्च पशवस्तथा वृक्षास्तृणानि च ।
फलान्योषधयश्चापि चाग्निहोत्रकृतेऽभवन् ॥
रसाः स्नेहा स्तथा गन्धा रत्नानि मणयस्तथा ।
काञ्चनाद्यानि लोहाणि चाग्निहोत्रकृतेऽभवन् ॥
आयुर्वेदो धनुर्वेदो मीमांसा न्यायविस्तरः ।

धर्मशास्त्रञ्च तत्सर्वं मग्निहोत्रकृतेऽभवत् ॥
छन्दः शिक्षाश्च कल्पाश्च तथा व्याकरणं नृप ! ।
ज्योतिर्ज्ञानं निरुक्तञ्च ह्यग्निहोत्रकृते कृतम् ॥
इतिहासपुराणञ्च गाथाश्चोपनिषद्‌तथा ।
आथर्वणानि कर्माणि अग्निहोत्रकृतेऽभवन् ॥
यच्चैतस्यां पृथिव्यां हि किञ्चिदस्ति चराचरम् ।
तत्सर्वं मग्निहोत्रस्य कृते सृष्टं स्वयम्भुवा ॥
अग्निहोत्रस्य दर्शस्य पौर्णमासस्य चाप्यथ ।
यूपेष्टिपशुबन्धानां सोमपानक्रियावताम् ॥
तिथिनक्षत्रयोगानां मुहूर्तकरणात्मनाम् ।
कालानां वेदनार्थन्तु ज्योतिर्ज्ञानं कृतं पुरा ॥
ऋग्यजुःसाममन्त्राणां लोकचिन्तार्थचिन्तनात् ।
प्रत्यापत्तिविकल्पार्थं छन्दोज्ञानं प्रकल्पितम् ॥
वर्णाक्षरपदार्थानां सुपि लिङ्गविभक्तितः ।
नामधातुविवेकार्थं पुरा व्याकरणं कृतम् ॥
यूपवेद्यध्वरार्थन्तु प्रोक्षणं ग्रहणाय तु ।
यज्ञदैवतयोगार्थं शिक्षाज्ञानं प्रकल्पितम् ॥
यज्ञपात्रपवित्रार्थं द्रव्यसम्भरणाय च ।
सर्वयज्ञविकल्पाय पुरा तुल्यं प्रकल्पितम् ॥
नाममन्त्रविभक्तानां तत्त्वार्थनियमाय च ।
सर्ववेदनिरुक्तञ्च निरुक्तं ऋषिभिः कृतम् ॥
वेद्यर्थं पृथिवी सृष्टा सम्भारार्थं तथैव च ।
इध्मनार्थञ्च यूपार्थं ब्रह्मा चक्रे वनस्पतीन् ॥

ग्राम्यारण्याश्च पशवः सूयन्ते यज्ञकारणात्।
मन्त्राणां विनियोगश्च प्रोक्षणं श्रवणं तथा॥
अनुयाजप्रयाजांश्च मरुतां शासिनस्तथा।
उद्गात्वञ्चैव साम्नां वै वहिप्रस्थानमेव च॥
विष्णुक्रमाणां क्रमणं दक्षिणावभृतं तथा।
त्रिकालं चैव भूमिश! स्थानेषूपभृतन्तथा॥
श्रवणम्मोक्षणञ्चैव हविषा श्रवणान्तथा।
नावतुल्यन्ति ये विप्रा निवृत्ताश्च पशोर्वशम्॥
ते यान्ति नरकं घोरं रौरवं तमसावृतम्।
शतवर्षसहस्राणि तत्र स्थित्वा नराधमाः॥
क्रिमिभि र्भक्ष्यमाणाश्च तिष्ठेयुः पूयशोणिते।
यूपास्तु उक्तसंस्कारै रोषध्यः पशवस्तथा॥
यजमानेन सहिताः स्वर्गं यान्ति नरेश्वर!।
यावत्कालं हि यज्ञो वै स्वर्गलोके महीयते॥
तावत्कालं प्रमोदन्ते पशवोऽप्यध्वरे हताः।
वृक्षा यूपत्वमिच्छन्ति पशुत्वं पशवस्तथा॥
तृणा इच्छन्ति दर्भत्व मोषध्यश्च हविष्मताम्।
सोमत्वञ्च लताः सर्वा वेदित्वञ्च वसुन्धरा॥
यस्मात्पशुत्वमिच्छन्ति पशवः स्वर्गलिप्सया।
तस्मात्पशुवधे हिंसा नास्ति यज्ञेषु पाण्डव!॥
अहिंसा वैदिकं कर्म ब्रह्मकर्मेति तत् स्मृतम्।
वेदोक्तं ये न कुर्वन्ति हिंसाबुध्या क्रतुं द्विजाः॥
सद्यः शूद्रत्वमायान्ति प्रेत्य चण्डालतामपि।
गावो यज्ञार्थं मुत्पन्ना दक्षिणार्थं तथैव च॥

सुवर्णं रजतञ्चैव पात्रिकं भार्य्यमेव च ।
दर्भसंस्कारणार्थन्तु रक्षसां रक्षणाय च ॥
यजनार्थं द्विजाः सृष्टा स्तारका भुवि देवताः ।
क्षत्रिया रक्षणार्थन्तु वैश्या वार्तानिमित्ततः ॥
शुश्रूषार्थं त्रयाणान्तु शूद्राः सृष्टाः स्वयम्भुवा ।
एवमेतत् जगत्सर्व मग्निहोत्रकृते कृतम् ॥
नावबुध्यन्ति ये वैतदीदृशन्तत्समावृतम् ।
ते यान्ति नरकं घोरं रौरवं नाम विश्रुतम् ॥
रौरवाद्विप्रमुक्तास्तु कृमियोनिं व्रजन्तिते ।
यथोक्तमग्निहोत्राणि शुश्रूषन्ति च ये द्विजाः ॥
तैस्तु दत्तं हुतं तप्तं जप्तमध्यापितं भवेत् ।
एवमिष्टञ्च पूर्तञ्च यद्द्विजैः क्रियते नृप ! ॥
तत्सर्वं सम्यगाहृत्य चादित्ये स्थापयाम्यहम् ।
मया स्थापितमादित्ये लोकस्य सुकृतं हि यत् ।
तारयेत्तत् सहस्रांशुः सुकृतं ह्यग्निहोत्रिणाम् ।
तावत्तेषां हि पुण्येन दीप्यते रविरम्बरे ॥
स्वर्गे स्वर्गं गतानान्तु वीर्याद्भवति वीर्यवान् ।
तत्र ते ह्युपयुज्यन्ति ह्यग्निहोत्रस्य यत् फलम् ॥
समानरूपा देवानां तिष्ठन्त्याभूतसम्प्लवम् ।
वृथाग्निना च ये केचिद्दह्यन्ते ह्यग्निहोत्रिणः ॥
न तेऽग्निहोत्रिणां लोकान् मनसापि व्रजन्ति वै ।
वीरघ्नास्ते दुराचाराः सुदरिद्रा नराधमाः ॥
विकला व्याधिकाश्चापि जायन्ते शूद्रयोनिषु ।
तस्मात्प्रोषितकै र्नित्य मग्निहोत्रं द्विजन्मभिः ॥

होतव्यं विधिवद्राजन्नूर्ध्वमिच्छन्ति ते गतिम्।
अमृज्यं सूत्रमेतस्मादग्निहोत्रं युधिष्ठिर!॥
न त्याज्य मप्येतद्गृहीतव्यं द्विजातिभिः।
वृद्धत्वेऽप्यग्निहोत्रं ये गृह्णन्ति विधिवद्द्विजा॥
शूद्रान्नाद्विरताः सन्तः संयतेन्द्रियबुद्धयः।
पञ्चयज्ञपरा नित्यं क्रोधलोभविवर्जिताः॥
द्विकाल मतिथिञ्चैव पूजयन्ति च भक्तितः।
तेऽपि सूर्य्योदयप्रख्यै विमानै र्वायुवेगिभिः॥
मम लोके प्रमोदन्ते दृष्ट्वा माञ्च युधिष्ठिर!।
मन्वन्तरञ्च तत्रैकं मोदित्वा द्विजसत्तमाः॥
इह मानुष्यके लोके भवन्ति द्विजपुङ्गवाः।
बाला हिताग्नयो ये च शूद्रान्नाद्विरताः सदा॥
क्रोधलोभविनिर्मुक्ताः प्रातःस्नानपरायणाः।
यथोक्त मग्निहोत्रं वै जुह्वति संयतेन्द्रियाः॥
संतिष्ठेद्वा सदा सौम्यो द्विकालं मत्परायणः।
ते यान्त्यपुनरावृत्तिं भित्वा चादित्यमण्डलम्॥
मम लोकं सपत्नीका यानैः सूर्योदयप्रभैः।
तत्र बालाः ससंस्काराः कालगाः कामरूपिणः॥
ऐश्वर्य्यगुणसम्पन्नाः क्रीड़न्ति च यथासुखम्।
इत्येषा ह्याहिताग्नीनां विभूतिः पाण्डुनन्दन!॥
ये च वेदश्रुतिङ्कॆचित् निन्दमाना ह्यबुद्धयः।
इति श्रीगौतमीये वैष्णवधर्मशास्त्रे पञ्चदशोऽध्यायः।

षोड़शोऽध्यायः।

युधिष्ठिरः। चक्रायुध! नमस्तेऽस्तु देवेश! गरुड़ध्वज!।
चान्द्रायणविधिं पुण्य माख्याहि भगवन्मम॥
भगवानुवाच। शृणु पाण्डव! तत्त्वेन सर्वपापप्रणाशनम्।
पापिनो येन शुद्ध्यन्ति तत्ते वक्ष्यामि सर्वशः॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाचरितव्रतः।
यथावत्कर्तुकामोयस्तस्य यं प्रथमन्तु यः।
शोधयेत्तु शरीरं स्वं पञ्चगव्ये पवित्रितः॥
सशिरः कर्तुं पक्षान्तं ततः कुर्वीत पावनम्।
शुक्लवासाः शुचिर्भूत्वा मौञ्जीं बध्नीत मेखलाम्॥
पालाशदण्डमादाय ब्रह्मचारीव्रते स्थितः।
कृतोपवासः पूर्वन्तु शुक्लप्रतिपदि द्विजः॥
नदीसङ्गमतीर्थेषु शुचौ देशे गृहेऽपि वा।
गोमयेनोपलिप्तेऽथ स्थण्डिलेऽग्निं निधापयेत्॥
आधारावाज्यभागौ च प्रणवं व्याहृतिस्तथा।
वारुणञ्चापि पञ्चैव हुत्वा सर्वान्यथाक्रमम्॥
सत्याय विष्णवे चेति ब्रह्मर्षिभ्योऽथ ब्रह्मणे।
विश्वेभ्यश्चैव देवेभ्योऽथ प्रजापतये तथा॥
षट् पञ्च जुहुयात्पश्चात्प्रायश्चित्ताहुतीर्द्विजः।
ततः समापयेद्वह्निं शान्तिं कृत्वाथ पौष्टिकम्॥
प्रणम्याग्निञ्च सोमञ्च भस्म दत्त्वा तथात्मनः।
नदीङ्गत्वा विविक्तानां सोमाय वरुणाय च॥
आदित्याय ततः स्नायादन्नं कृत्वा समाहितः।

शुचिर्वोदकमाचम्य स्वाधीनः पूर्वतोमुखः॥
प्राणायामन्ततः कृत्वा पवित्रैरभिषेचनम्।
आचान्तस्त्वभिवीक्षेत चोर्द्ध्वबाहुर्दिवाकरम्॥
कृताञ्जलिरुपश्रान्तः कुर्य्याच्चापि प्रदक्षिणम्।
नारायणं वा रुद्रं वा स्वाध्यायं ब्राह्मणान्तथा॥
आरण्यं मम सूक्तं वा प्राक् भोजनमथापि वा।
वीरघ्नमृषभस्यापि तथावाप्यघमर्षणम्॥
गायत्रीं मम वा देवीं सावित्रीं वा जपेत्ततः।
शतं वाऽष्टशतं वापि सहस्रमथवा परम्॥
ततो मध्याह्नकाले वै पायसं यावकन्तु वा।
पाचयित्वा प्रयत्नेन प्रयतः सुसमाहितः॥
ततः पात्रं समादाय सौवर्णं राजतन्तु वा।
ताम्रं वा मृण्मयं वापि ह्यौदुम्बरमथापि वा॥
वृक्षाणां याज्ञियानान्तु पर्णैरार्द्रैरकुत्सितैः।
पुटकेन तु गुप्तेन चरेद्भैक्षं समाहितः॥
ब्राह्मणानां गृहाणान्तु सप्तान्नान्नापरं व्रजेत्।
गोदोहमात्रन्तिष्ठेत्तु वाग्यतः संयतेन्द्रियः॥
न हसेच्च न वीक्षेत नाभिभाषेत वा स्त्रियम्।
विष्ठामूत्रपुरीषञ्च चण्डालं वा रजस्वलाम्॥
पतितञ्च तथाश्वानमादित्यमवलोकयेत्।
यो हि पादुकमारुह्य सर्वदा प्रचरेद्द्विजः॥
तद्दृष्ट्वा पापकर्म्माणमादित्यमवलोकयेत्।
ततस्त्वावसथं प्राप्तो भिक्षान्निक्षिप्य भूतले॥
प्रक्षाल्य पादावाचम्य हस्तौ वा कोऽपरः पुनः।

आचम्य वारुणान्तेन वह्निं विप्रांश्च पूजयेत् ॥
पञ्च सप्ताथ वा कुर्याद्भागान् भैक्षस्य तस्य वै ।
तेषामन्यतमं पिण्डमादित्याय निवेदयेत् ॥
ब्रह्मणे चाग्नये चैव सोमाय वरुणाय च ।
विश्वेभ्यश्चैव देवेभ्यो ह्यादित्याय यथाक्रमम् ॥
अवशिष्टमथैकन्तु वक्तुं मात्रं प्रकल्पयेत् ।
अङ्गुल्यग्रे स्थितं पिण्डं जायते चाभिमन्त्रयेत् ॥
अङ्गुलीभि स्त्रिभिः पुण्यं प्राश्नीयात्प्राङ्मुखः पुनः ।
यथाच वर्धते सोमो ग्रसते च तथा पुनः ॥
तथा पिण्डाश्च वर्धन्ते ह्रसन्ते च दिने दिने ।
त्रिकालस्नानमस्योक्तं द्विकालमथवा सकृत् ॥
ब्रह्मचारी सदा चापि न च वस्त्रं प्रपीड़येत् ।
स्थाने च दिवसे तिष्ठेत् रात्रौ वीरासनं व्रजेत् ॥
भवेत् स्थण्डिलशायी वा ह्यथवा वृक्षमूलकः ।
वल्कलं यदिवा क्षौमं शाणकार्पासकन्तथा ॥
आच्छादनं भवेत्तस्य वस्त्रार्थं पुरुषर्षभ ! ।
एवञ्चान्द्रायणे पूर्णे मासस्यान्ते प्रवृत्तिमान् ॥
ब्राह्मणान् भोजयेद्भक्त्या दद्याच्चैव तु दक्षिणाम् ।
चान्द्रायणेन चीर्णेन यत्कृतन्तेन दुष्कृतम् ।
तत्सर्वन्तत्क्षणादेव भस्मीभवति काष्ठवत् ।
ब्रह्महत्याथ गोहत्या सुवर्णस्तैन्यमेव तु ॥
भ्रूणहत्या सुरापानं गुरोर्दारव्यतिक्रमः ।
एवमन्यानि पापानि पतनीयानि यानि च ॥
चान्द्रायणेन नश्यन्ति वायुना पांशवो यथा ।

अनिर्दशाया गोः क्षीर मौष्ट्रमाविकमेव च ॥
मृतसूतकयोश्चान्नं भुक्त्वा चान्द्रायणञ्चरेत्।
सुरामांसामिषं सर्पिर्लाक्षा लवणमेव च ॥
तैलं सोमञ्च विक्रीणन् द्विजश्चान्द्रायणञ्चरेत्।
एकोद्दिष्टञ्च योभुङ्क्ते योभुङ्क्ते वासनस्थितः॥
भिन्नभाण्डेतु योभुङ्क्ते द्विजश्चान्द्रायणञ्चरेत्।
आकाशस्थितहस्तोय आसनस्थस्तथैव च॥
परहस्तस्थितश्चैव भुक्त्वा चान्द्रायणञ्चरेत्।
आसनस्थश्च योभुङ्क्ते शयनीयगतोऽपि वा॥
योभुङ्क्ते वासनस्थस्तु द्विजश्चान्द्रायणञ्चरेत्।
यो भुङ्क्तेऽनुपनीतेन यो भुङ्क्ते च स्त्रिया सह॥
योभुङ्क्ते अन्यथा सार्द्धं द्विजश्चान्द्रायणञ्चरेत्।
उच्छिष्टं स्थापयेद्विप्रो योमोहाद्भोजनान्तरे॥
दद्याद्वा यदि मोहाद्धि द्विजश्चान्द्रायणञ्चरेत्।
तुम्बं कोशातकञ्चैव पलाण्डुं गृञ्जनन्तथा॥
छत्राकं लशुनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत्।
तथा पर्युषितं चान्नं पक्वं परगृहागतम्॥
द्विपक्वञ्च हथामांसं जग्ध्वा चान्द्रायणञ्चरेत्।
उदक्या च शुना वापि चण्डालैर्वा नराधिप!॥
स्पृष्टमन्नन्तु भुञ्जानो द्विजश्चान्द्रायणञ्चरेत्।
एतत्परं हि शुध्यर्थमृषिभिश्चरितव्रतम्॥
पावनं सर्वपापानां पुण्यं पाण्डव! चोत्तमम्।
एनेन वसवो रुद्रा आदित्याश्च दिवङ्गताः॥
एतदाद्यं परं गुह्यं पवित्रं पावनं स्मृतम्।

यथोक्तमेतद्यः कुर्य्याद्द्विजः पापप्रणाशनम् ॥
स दिवं याति पूतात्मा निर्मलादित्यसन्निभः ॥
इति श्रीगौतमीये वैष्णवधर्मशास्त्रे षोड़शोऽध्यायः ।

सप्तदशोऽध्यायः ।

वैशम्पायनः । केशवेनैवमाख्याते चान्द्रायणविधिक्रमे ।
पप्रच्छ पुनरप्यन्यान् धर्मान् धर्मात्मजो नृपः ॥
युधिष्ठिरः । सर्वभूतहिते श्रीमन् ! सर्वभूतनमस्कृत ! ।
सर्वभूतहितं धर्मं सर्वज्ञ! कथयस्व मे ।
यद्दरिद्रजनस्यापि स्वर्गं सुखकरम्भवेत् ॥
सर्वपापप्रशमनन्तत् शृणुष्व युधिष्ठिर! ।
कार्तिकाद्यास्तु ये मासा द्वादशैव प्रकीर्त्तिताः ॥
तेष्वेकभक्तनियमः सर्वेषा मुच्यते मया ।
कार्तिके यस्तु वै मासे नन्द्या संयतो नरः ॥
एकभुक्तेन मद्भक्तो मासमेकं तु वर्तते ।
जलपानं पिबेन्मासो नान्तराभोजनात्परम् ।
आदित्यरूपमांश्चापि नित्यमर्ध्ये समाहितः ॥
व्रतान्ते भोजयेद्विप्रान् दक्षिणाञ्चापि तत्पुनः ।
क्रोधलोभादिमुक्तस्य तस्य पुण्यफलं शृणु ॥
विधिवत्कपिलान्दाने यत्पुण्यं समुदाहृतम् ।
तत्पुण्यं समनुप्राप्य सूर्य्यलोके महीयते ॥
ततश्चापि च्युतः कालान् मानुषेषूपजायते ।
तत्र प्रकामं क्रीड़ित्वा सर्वलोकेषु पूजितः ॥

राजराजार्च्चितोविप्रः कोटीधनपतिर्भवेत्।
मार्गशीर्षे तु यो मासे एकभुक्तेन वर्त्तते॥
कामं क्रोधञ्च लोभञ्च परित्यज्य यथाविधि।
स्नात्वा चादित्यरूपं मा मर्चयन्ति यतेन्द्रियाः॥
जपन्नेवतु गायत्रीं मामिकां वाग्यतः शुचिः।
मासे परिसमाप्ते तु भोजयित्वा द्विजान् शुचीन्॥
तानर्च्चयन्ति मद्भक्त्या तस्य पुण्यफलं शृणु।
अग्निहोत्रे कृतं पुण्य माहिताग्नेस्तु यद्भवेत्॥
तत्पुण्यफलमाप्नोति यानेनाम्बरयोगिना।
सप्तर्षिलोके चरति यथाकामं यथासुखम्॥
ततश्चापि च्युतः कालाद्हरिवर्षेषु जायते।
तत्र प्रकाम क्रीड़ित्वा राजा पश्चाद्भविष्यति॥
पौषमासं क्षपेदेक मेकभक्तेन यो नरः।
अर्च्चयेत्तुच मां नित्यं मद्गतेनान्तरात्मना॥
अहिंसासत्यनिरतः क्रोधहर्षविवर्जितः।
एवं युक्तस्य राजेन्द्र! शृणुयाः फलमुत्तमम्॥
विप्रातिथ्यसहस्रेतु यत्पुण्यं समुदाहृतम्।
तत्फलं समनुप्राप्तः शक्रलोके महीयते॥
अवतीर्णः स्ततः कालादिलावर्षेतुजायते।
तत्र स्थित्वा चिरं काल मिह विप्रो भविष्यति॥
माघमासन्तथा यस्तु वर्त्तते चैकभुक्ततः।
मदर्च्चनपरो भूत्वा दम्भक्रोधविवर्जितः।
मामिका मपि गायत्रीं सन्ध्यायां तु जपेद्द्विजः॥
दत्त्वा तु दक्षिणामन्ते भोजयित्वा द्विजानपि।

नमस्करोति तान् भक्त्या मद्गतेनान्तरात्मना ॥
त्रिकालस्नानयुक्तस्य तस्य पुण्यफलं शृणु ।
नीलकण्ठप्रयुक्तेन यानेनसचरो भवेत् ॥
पितृलोकं पूजयित्वा सेव्यमानोऽप्सरोगणैः ।
तत्र प्रकामं क्रीड़ित्वा भद्रश्वेषूपजायते ॥
तत्र च्युतश्चतुर्वेदी विप्रो भवति भूतले ।
क्षपेत् फाल्गुनमासं य एकभक्तेन संयतः ॥
नमो ब्रह्मण्यदेवायेत्यजस्रं विजपन् सदा ।
पायसं भोजयेद्विप्रान् व्रतान्ते संयतेन्द्रियः ॥
मदर्चनपरः क्रोधलोभमोहविवर्जितः ।
सदाचारव्रतपरस्तस्य पुण्यफलं शृणु ॥
विमानैः सारसैर्युक्तमारूढः कामगं सुखम् ।
नक्षत्रलोके रमते सर्वनक्षत्रशोभितः ॥
ततश्चापि च्युतः कालात् केतुमालेषु जायते ।
तत्र प्रकामं क्रीड़ित्वा मानुषे नृपतिर्भवेत् ॥
चैत्रमासेषु योमर्त्य एकभुक्तेन वर्तते ।
ब्रह्मचारी तु मद्भक्तस्तस्य पुण्यफलं शृणु ॥
यदग्निहोत्र'*यः पुण्य यथोक्तव्रतचारिणः ।
तत्पुण्यफलमासाद्य चन्द्रलोके महीयते ॥
ततोऽवतीर्णो जायेत वर्षे रमणके पुनः ।
भुक्त्वा कामन्ततस्तस्मिन्निह राजा भविष्यति ॥
वैशाखं यस्तु वै मास मेकभुक्तेन वर्तते ।
द्विजमग्रासने कृत्वा भुञ्जन् भूमौ च वाग्यतः ॥
नमो ब्रह्मण्यदेवायेत्यर्चयित्वा दिवाकरम् ।

व्रतान्ते भोजयेद्विप्रांस्तस्य पुण्यफलं शृणु॥
फलं यद्विधिवत्प्रोक्त मग्निष्टोमातिरात्रयोः।
तत्पुण्यफलमासाद्य देवलोके महीयते॥
ततो हैमवते वर्षे जायते कालपर्य्ययात्।
तत्र प्रकामं मोदित्वा विप्रः पश्चाद्भविष्यति॥
ज्यैष्ठमासे तु भो राजन्नेकभक्तेन वर्त्तते।
विप्रमग्रासनं कृत्वा भूमौ भुञ्जन् जितेन्द्रियः॥
नमो ब्रह्मण्यदेवायेत्यर्चयन्मां समाहितः।
दम्भानृतविनिर्मुक्तस्तस्य पुण्यफलं शृणु।
चीर्णे चान्द्रायणे सम्यक् यत्पुण्यं समुदाहृतम्॥
तत्पुण्यफलमासाद्य देवलोके महीयते।
अथोत्तरकुरुष्वेव जायते निर्गतस्ततः॥
ततश्चापि च्युतः कालादिह लोके द्विजो भवेत्।
आषाढमासं यो राजन्नेकभुक्तेन वर्त्तते॥
ब्रह्मचारी जितक्रोधो मदर्चनपरायणः।
विप्रमग्रासने कृत्वा भुञ्जन् भूमौ जितेन्द्रियः॥
कृत्वा त्रिषवणस्नान मष्टाक्षरविधानतः।
व्रतान्ते भोजयेद्विप्रान् पायसेन युधिष्ठिर!॥
गुड़ौदनेन वा राजंस्तस्य पुण्यफलं शृणु।
कपिलाशतदत्तस्य यत्पुण्यं पाण्डुनन्दन!॥
तत्पुण्यफलमासाद्य देवलोके महीयते।
ततोऽवतीर्णः कालेन शाकद्वीपे प्रजायते॥
तत्रश्चापि च्युतः कालादिह विप्रो भविष्यति।
श्रावणं यः क्षपेन्मासमेकं भक्ते न संशयः।

नमो ब्रह्मण्यदेवायेत्युक्त्वा मा मर्त्रयेत्सदा ।
विप्रमथासने कृत्वा भूमौ भुञ्ज्याद्यथाविधि ॥
पायसेनार्चयन्विप्रान् जितक्रोधो जितेन्द्रियः ।
लोभमोहविनिर्मुक्तस्तस्य पुण्यफलं शृणु ॥
कपिलाशतस्य यत्पुण्यं विधिदत्तस्य वासव ! ।
तत्पुण्यं समनुप्राप्तः शक्रलोके महीयते ॥
ततश्चापि च्युतः कालात् कुशद्वीपे प्रजायते ।
तत्र प्रकामं क्रीड़ित्वा विप्रो भवति मानुषे ॥
यस्तु भाद्रपदं मासमेकभुक्तेन वर्त्तते ।
ब्रह्मचारी जितक्रोधः सत्यवन्धो जितेन्द्रियः ॥
विप्रमथासने कृत्वा पाकभेदविवर्जितः ।
नमो ब्रह्मण्यदेवायेत्युक्त्वा सुचरणौ स्पृशेत् ॥
तिलान्वाथ घृतं वापि व्रतान्ते दक्षिणां दिशेत् ।
सद्भक्तस्य नरश्रेष्ठ ! तस्य पुण्यफलं शृणु ॥
यत्फलं विधिवत्प्रोक्तं राजसूयाश्वमेधयोः ।
तत्पुण्यफलमासाद्य शक्रलोके महीयते ॥
ततश्चापि च्युतः कालाज्जायते धनदालये ।
तत्र प्रकामं क्रीड़ित्वा राजा भवति मानुषे ॥
यश्चाप्याश्वयुजं मासमेकभुक्तेन वर्त्तते ।
यद्गायत्रीं जपन्विप्रो सद्गीनान्तरात्मना ॥
द्विसन्ध्यं वा त्रिसन्ध्यं वा शतमष्टशतन्तु वा ।
विप्रमथासने कृत्वा संयतेन्द्रियमानसः ॥
व्रतान्ते भोजयेद्विप्रांस्तस्य पुण्यफलं शृणु ।
अश्वमेधेन यत्पुण्यं विधिवत्पाण्डुनन्दन ! ॥

तत्पुण्यफलमासाद्य मम लोके महीयते ।
ततश्चापि च्युतः कालात् श्वेतद्वीपे प्रजायते ॥
तत्र भुक्त्वा महान् भोगांस्तत्र विप्रो हि जायते ।
इति श्रीगौतमीये वैष्णवधर्मशास्त्रे सप्तदशोऽध्यायः ।

अष्टादशोऽध्यायः ॥

युधिष्ठिरः । देव ! संवत्सरं पुण्यमेकभुक्तेन यः क्षपेत् ।
तस्य पुण्यफलं यद्वै तन्ममाचक्ष्व केशव ! ॥
भगवानुवाच । शृणु पाण्डव ! सत्यं मे वचनं पुण्यमुत्तमम् ।
यच्छ्रुत्वा वाथ कृत्वा वा नरः पापैर्विमुच्यते ॥
एकभुक्तेन वर्तेत नरः संवत्सरन्तु यः ।
ब्रह्मचारी क्षमी शान्तो जितक्रोधो जितेन्द्रियः ॥
शुचिः स्नानरतोऽव्यग्रः सत्यवागनसूयकः ।
अर्चयत्येव तु मां नित्यं मद्गतेनान्तरात्मना ॥
सन्ध्ययोस्तु जपेन्नित्यं मद्गायत्रीं समाहितः ।
नमो ब्रह्मण्यदेवायेत्यसकृन्मां प्रणम्य च ॥
विप्रमग्रासने कृत्वा यावकं भैक्षमेव वा ।
भूत्वा तु वाग्यतो भुक्त्वा वाचस्यास्य द्विजन्मनः ॥
नमोऽस्तु वासुदेवायेत्युक्त्वा तु चरणं स्पृशेत् ।
मासे मासे समाप्ते तु भोजयित्वा द्विजः शुचीन् ॥
संवत्सरे ततः पूर्णे दद्यात्तु घृतदक्षिणाम् ।
नवनीतमयीं गां वा तिलधेनुमथापि वा ॥
विप्रहस्तच्युतैस्तोयैः सहिरण्यैः समुक्षितः ।

तस्य पुण्यफलं राजन् ! कथ्यमानं मया शृणु ॥
दशजन्मकृतं पापं ज्ञानतोऽज्ञानतोऽपि वा ।
तद्विनश्यति तस्याशु नात्र कार्या विचारणा ॥
युधिष्ठिरः । सर्वेषामुपवासानां यच्च यत् सुमहाफलम् ।
तत्सर्वं श्रेयसे लोके तद्भवान् वक्तुमर्हति ॥
भगवानुवाच । शृणु राजन् ! यथापूर्वं यथाहीमन्तु भारत ! ।
कथान्ते कथयिष्यामि मद्भक्तस्य युधिष्ठिर ! ॥
यस्तु भक्त्या शुचिर्भूत्वा पञ्चम्यां मे नराधिप ! ।
उपवासकृतं कुर्यात्त्रिकालञ्चार्चयंस्तु माम् ॥
सर्वक्रतुफलं लब्ध्वा मम लोके महीयते ।
युधिष्ठिरः । भगवन् ! देवदेवेश ! पञ्चमी नामकातिथिः ॥
तामहं श्रोतुमिच्छामि कथयस्व ममाच्युत ! ॥
भगवानुवाच । पर्वद्वयञ्च द्वादश्यां श्रवणञ्च नराधिप ! ।
मत्पञ्चमीति विख्याता मत्प्रियञ्च विशेषतः ॥
तस्माद्भागवतैर्भुक्तैर्मन्निवेशितबुद्धिभिः ।
उपवासस्तु कर्तव्यो मत्प्रियार्थं युधिष्ठिर ! ॥
द्वादश्यामेव वा कुर्यादुपवासमशक्नुवन् ।
तेनाहं परमां प्रीतिं यास्यामि नरपुङ्गव ! ॥
अहोरात्रेण द्वादश्यां मार्गशीर्षे च केशवम् ।
उपोष्य पूजयेद्यो मां सोऽश्वमेधफलं लभेत् ॥
द्वादश्यां पुष्यमासे तु भक्त्या नारायणन्तु माम् ।
उपोष्य पूज्य सद्यः स वाजपेयफलं लभेत् ॥
द्वादश्यां माघमासे तु मामुपोष्य तु माधवम् ।
पूजयेद्यः समाप्नोति पौण्डरीकफलं नृप ! ॥

उपोष्य मां यो वैशाख्यां द्वादश्यां मधुसूदन ! ।
पूजयन् फलमाप्नोति सोऽग्निष्टोमस्य पाण्डव ! ॥
द्वादश्यां ज्यैष्टमासे मां समुपोष्य त्रिविक्रमम् ।
अर्चयेद्यः समाप्नोति गवां मेधफलं नृप ! ॥
आषाढे वामनाख्यं मां द्वादश्यां समुपोष्य यत् ।
पूजयेन्नरमेधस्य तत्फलं प्राप्नुयान्नृप ! ॥
द्वादश्यां श्रावणे मासि श्रीधराख्यमुपोष्य माम् ।
पूजयेद्यः समाप्नोति पञ्चयज्ञफलं नृप ! ॥
मासे भाद्रपदे यो मां हृषीकेशाख्यमर्चयेत् ।
उपोष्य पुनराप्नोति सौत्रामणिफलं नृप ! ॥
द्वादश्या माश्वयुङ्मासे पद्मनाभमुपोष्य माम् ।
अर्चयेद्यः समाप्नोति गोसहस्रफलं नृप ! ॥
द्वादश्यां कार्तिके मासि मां दामोदरसंज्ञितम् ।
उपोष्य पूजयेद्यः स सर्वक्रतुफलं लभेत् ।
केवलेनोपवासेन द्वादश्यां पाण्डुनन्दन ! ॥
फलं यत्पूर्व मुद्दिष्टन्तस्यार्द्धं लभते फलम् ।
अवणेऽप्येवमेवं मां योऽर्च्चयेद्भक्तिमान्नरः ।
मम सालोक्य मायाति नात्र कार्य्या विचारणा ।
मासे मासे समभ्यर्च्च्य योनरो मामतन्द्रितः ॥
एवं द्वादशवर्षाणि मद्भक्तो मत्परायणः ।
अविघ्न मर्च्चमानस्तु मम सालोक्यमाप्नुयात् ॥
अभ्यस्येत्प्रीतिमान् सम्यक् द्वादश्यां वेदसंहिताम् ।
स पूर्वोक्तफलं राजन् ! लभते नात्र संशयः ॥
गन्धं पुष्पं फलं तोयं पत्रं वा मूलमेव वा ।

द्वादश्यां मम यो दद्यात्ततो नैवास्ति मत्प्रियः॥
एतेन विधिना सर्वे देवाः शक्रपुरोगमाः।
मद्भक्ता नरशार्दूल! स्वर्गलोकांस्तु भुञ्जते॥
वैशम्पायनः। एवं वदति देवेशे केशवे पाण्डुनन्दनः।
कृताञ्जलिपुटं न्यस्य मिदं भक्त्या ह्युवाच ह॥
युधिष्ठिरः। यज्ञात्मन्यज्ञसम्भूत! यज्ञनाथ नमोनमः।
चतुर्मूर्त्ते! चतुर्बाहो! चतुर्व्यूह! नमोनमः॥
लोकात्मन्! लोकनाथेश! लोकवास! नमोनमः।
सर्वज्ञ! सर्वलोकेश! हृषीकेश! नमोनमः॥
सहस्रशिरसे तुभ्यं सहस्राक्ष! नमोनमः।
पञ्चयज्ञ! नमस्तेऽस्तु सर्वयज्ञ! नमोनमः॥
त्रयीमय! त्रयीनाथ! त्रयीलभ्य। नमोनमः।
सृष्टिसंहारकर्त्तेति नारसिंह! नमोनमः॥
भक्तप्रिय! नमस्तेऽस्तु सोमनाथ! नमोनमः।
हयवक्त्र नमस्तेऽस्तु चक्रपाणे! नमोनमः॥
पञ्चभूत! नमस्तेऽस्तु पञ्चायुध। नमोनमः।
वैशम्पायनः। भक्तिगद्गदया वाचा स्तुवन्नेव युधिष्ठिरः।॥
गृहीत्वा केशवो हस्ते प्रीतात्मा तं न्यवारयत्।
निवार्य्य च पुनर्वाचा भक्तिनम्रं युधिष्ठिरम्॥
वक्तुमेव नरश्रेष्ठं धर्मपुत्रं प्रचक्रमे।
भगवानुवाच। अन्यवर्त्मकमिदं राजन्मां स्तौसि नरपुङ्गव!॥
तिष्ठ पृच्छ यथापूर्वं धर्मानेव युधिष्ठिर!।
युधिष्ठिरः। भगवन्! त्वत्प्रसादं तु स्मृत्वा स्मृत्वा पुनः पुनः॥
न शान्तिरस्ति देवेश! तृप्यतीव च मे मनः।

इदञ्च मम संप्रश्नं वक्तु मर्हसि माधव!॥
द्वादश्यां कृष्णपक्षे तु अर्च्चनीयः कथं भवेत्।
भगवानुवाच। शृणु राजन्! यथातथ्यं तत्सर्वं कथयामि ते॥
माहात्म्यं कृष्णद्वादश्या मर्च्चनीयम् फल मम।
एकादश्या मुपोष्याथ द्वादश्यामर्च्चयेत्तु माम्॥
विप्रानपि यथालाभं भोजयेद्भक्तिमान्नरः।
स गच्छेद्दक्षिणामूर्तिर्मोक्ष नात्र विचारणा॥
चन्द्रसालोक्य मथवा ग्रहनक्षत्रपूजितः।

ऊनविंशोऽध्याय।

इति श्रीगौतमीये वैष्णवधर्मशास्त्रे अष्टादशोऽध्यायः।
वैशम्पायनः। केशवेनैव माख्याते धर्मपुत्त्रः पुनः प्रभुम्॥
पप्रच्छ दानकालस्य विशेषञ्च विधिं नृपः।
युधिष्ठिरः। देवकीफलमाख्यातं विषुवेष्वमरेश्वर!॥
सूर्यग्रहणवे चैव दत्ते दाने च किं फलम्।
भगवानुवाच। शृणुष्व राजन्! विषुवे सोमार्कग्रहणेषु च।
व्यतीपातेऽयने चैव दानं स्यादक्षयन्नृप!॥
राजन्नयनयोर्मध्यं विषुवं संप्रचक्षते।
समरात्रिदिने तत्र सन्ध्यायां विषुवे नृप!॥
ब्रह्माहं शङ्करश्चापि तिष्ठामः सहिता स्ततः।
तस्मिन् मुहूर्त्ते ते सर्वे चिन्तयन्तः परंपदम्॥
शक्रश्च पितरोरुद्रा वसवश्चाश्विनौ तथा।
साध्या विश्वे सगन्धर्वाः सिद्धा ब्रह्मर्षय स्तथा॥
सोमो ग्रहगणाश्चैव सागराः सरितस्तथा।

मरुतोऽप्सरसो नागा यक्षराक्षसगुह्यकाः ॥
एते चान्ये च राजेन्द्र ! विषुवे संयतेन्द्रियाः ।
सोपवासाः प्रयत्नेन भजन्ते ध्यानतत्पराः ॥
अन्नं गावस्तिलान् भूमिं कन्यादानं तथैव च ।
गृहमाच्छादनं धान्यं वाहनं शयनं तथा ॥
यच्चान्यच्च मया नोक्तं तत्प्रयच्छ युधिष्ठिर ! ।
दीयते विषुवे चैव श्रोत्रियेभ्यो विशेषतः ॥
तस्य दानस्य कौन्तेय ! क्षयो नैवोपपद्यते ।
वर्धते हरतः पुण्यं तद्दानं कोटिसम्मितम् ।
विषुवे स्नापनं यस्तु मम कुर्य्याद्धरस्य वा ॥
अर्च्चनाञ्च यथान्यायं तस्य पुण्यफलं शृणु ।
दशजन्मकृतं पापं तस्य सद्यो विनश्यति ॥
दशाना मश्वमेधाना मिष्टानां लभते फलम् ।
विमानं दिव्यमारूढः कामरूपी यथासुखम् ॥
स याति कामगं लोकं रुद्रलोक मथापि वा ।
तत्र वै देवगन्धर्वैः गीयमानो यथासुखम् ।
दिव्यवर्षसहस्राणि कोटिमेकन्तु मोदते ॥
ततश्चापि च्युतः कालादिह लोके द्विजोभवेत् ।
चतुर्णामपि वेदानां पारगो ज्ञानविद्भवेत् ॥
चन्द्रसूर्य्यग्रहे यान्ति ममं वा शङ्करस्य वा ।
गायते मम वा राजन् ! जपेद्वा शङ्करस्य वा ॥
शङ्खं कुर्व्वन्ति नादैश्च कांसघण्टाध्वनैरपि ।
कारयेत्तु ध्वनिं भक्त्या तस्य पुण्यफलं महत् ॥
गान्धर्वैः हौमजपैश्च शब्दैरुत्कृष्टनादिभिः ।

दुर्बलोऽभिभवेद्राहुः सोमश्च बलवान् भवेत् ॥
सूर्य्येन्दूपप्लवे यद्दै श्रोत्रियेभ्यः प्रदीयते।
तत्सहस्रगुणं भूत्वा दातार मुपतिष्ठति ॥
महापातकसंयुक्तो यद्यपि स्यान्नरो नृप!।
निर्लेप स्तत्क्षणादेव तेन दानेन जायते ॥
चन्द्रसूर्य्यप्रकाशेन विमानेन विराजता।
याति सोमपुरं रम्यं सेव्यमानोऽप्सरोगणैः॥
यावन्नक्षाणि तिष्ठन्ति गगने शशिना सह।
तावत्कालं स राजेन्द्र! सोमलोके महीयते ॥
ततश्चापि च्युतः कालादिह लोके युधिष्ठिर!।
वेदवेदाङ्गविद्विप्रः कोटीधनपति र्भवेत् ॥

युधिष्ठिरः। भगवं स्तव गायत्री जप्यते तु कथं नृभिः।
किं वा तस्याः फलं देव! ममाचक्ष्वसिताम्बर! ॥

भगवानुवाच। द्वादश्यां विषुवे चैव चन्द्रसूर्य्यग्रहे तथा।
अयने श्रवणे चैव व्यतीपाते तथैव च।
अश्वत्थदर्शनेचैव तथा मद्दर्शनेऽपि च ॥
जप्यात्तु मम गायत्री मथवाष्टाक्षरन्नृप!।
आजन्म दुष्कृतन्तस्य नाशयेन्नात्र संशयः॥

युधिष्ठिरः। अश्वत्थदर्शनं देव! किं त्वदर्शितसन्निभम्।
एतत्कथय देवेश! परं कौतूहलं हि मे॥

भगवानुवाच। अहमश्वत्थरूपेण पालयामि जगत्त्रयम्।
अश्वत्थो न स्थितो यत्र नाहन्तत्र प्रतिष्ठितः ॥
यत्राहं नं स्थितो राजन्नश्वत्थश्चापि तत्र न।
यस्त्वेनमर्च्चयेद्भक्त्या मां स साक्षात्समर्च्चति ॥

यस्त्वेनं प्रहरेत्कोपान्मामेव प्रहरेत्तु सः ।
तस्मात्प्रदक्षिणं कुर्यान्नभिवादेन प्रत्यहम् ॥
गावोविप्रा स्तथाश्वत्थो मम रूपं युधिष्ठिर ! ।
एतत्त्रयं हि मद्भक्तो नावमन्येत कर्हिचित् ॥
अवमानितं चेत्तु हन्याद्दहत्यासप्तमं कुलम् ।
अश्वत्थोब्राह्मणोगावो मन्मया स्तारयन्ति हि ।
तस्मादेतत्प्रयत्नेन राजन्! पूजितु मर्हसि ॥
युधिष्ठिरः । ब्राह्मणस्तेन देहेन शूद्रत्वं कथमाप्नुयात् ।
ब्रह्म वा नश्यति कथं तत् देव ! वक्तु मर्हसि ॥
भगवानुवाच । अपस्नानन्तु यो विप्रः कुर्य्याद्द्वादशवार्षिकम् ।
स तेनैव शरीरेण शूद्रत्वं याति पाण्डव ! ॥
शूद्रग्रामे तथाप्येको वसेद्वा दशवार्षिकम् ।
अहोत्कमपि कुर्वीत शूद्रत्वं याति वै द्विजः ॥
यस्तु राजाश्रयेणैव जीवेद्द्वादशवार्षिकम् ।
स शूद्रत्वं व्रजेद्विप्रो वेदानां पारगो यदि ॥
वर्त्तते नगरे वापि यो वा द्वादशमावसेत् ।
स शूद्रत्वं व्रजेद्विप्रो नात्र कार्य्या विचारणा ॥
उत्पादयति यत्पुत्रं शूद्रायां कामतोद्विजः ।
तस्य कायगतं ब्रह्म सर्वमेव विनश्यति ॥
मद्यपस्त्रीमुखं मोहादास्वादयति यो द्विजः ।
तस्य कायगतं ब्रह्म सद्यएव विनश्यति ॥
मैथुनं कुरुते यस्तु जिह्वायां ब्राह्मणो नृप ! ।
तस्य कायगतं ब्रह्म सद्यएव विनश्यति ॥
यः सोमलतिकां विप्रः केवलं भक्षयेद्वृथा ।

तस्य कायगतं ब्रह्म सद्यएव विनश्यति ॥
विप्रत्वं दुर्लभं प्राप्य वैमार्गैरेवमादिभि: ।
विनाशयन्तु यत्तत्तु तज्ज्ञोवापि युधिष्ठिर ! ॥
तस्मात्सर्वप्रयत्नेन मत्प्रियार्थं युधिष्ठिर ! ।
जातिभ्रंशकरं कर्म न कुर्यात् सदृशो द्विज: ॥
इति श्रीगोतमीये वैष्णवधर्मशास्त्रे एकोनविंशतिरध्याय: ।

विंशोऽध्याय: ।

युधिष्ठिर: । देशान्तरे गते विप्रे संयुक्ते कालधर्मणा ।
शरीरनाशे संप्राप्ते दृथा विप्रप्रकल्पना ॥
भगवानुवाच । श्रूयतामाहिताग्नेस्तु तथाद्दत्तस्य संस्क्रिया ।
पलाशवृन्दै: प्रतिमाकर्तव्या कल्पचोदिता ॥
त्रीणि षष्टिशतान्याङ्करस्थीन्यस्य नराधिप ! ।
तेषां विकल्पना कार्या यथाशास्त्रविनिश्चयम् ॥
अशीत्यर्थं तु शिरसि ग्रीवा वा दश एव च ।
बाह्वोश्चापि शतं दद्यादङ्गुलीषु पुनर्दश ।
शिरसि त्रिंशतं दद्याज्जाठरे वापि विंशतिम् ॥
वृषणे द्वादशार्थन्तु शिश्ने चाष्टार्द्धमेव च ।
दद्यात्तु शतमुर्वोस्तु षष्ठार्धं जानुजङ्घयो: ॥
दश दद्याच्चरणयोरेषा प्रेतविकल्पना ।
एवं विकल्पनां कृत्वा कुर्य्याद्विप्रस्तु संस्क्रियाम् ॥
युधिष्ठिर: । विशेषतीर्थं सर्वेषां संप्रुद्रानामनुग्रहात् ।
भक्तानान्तारणार्थं वै वक्तुमर्हसि धर्मत: ॥
भगवानुवाच । प्रवक्ष्ये सर्वतीर्थानां सत्यङ्गायन्ति सामगा: ।

सत्य अवचनन्तीर्थं हिंसातीर्थं समुच्यते ॥
दानन्तीर्थं दयातीर्थं शीलतीर्थं युधिष्ठिर ! ॥
अर्थसन्तोषणन्तीर्थं नारीतीर्थं पतिव्रता ॥
सन्तुष्टो ब्राह्मणस्तीर्थं ज्ञानं वै तीर्थमुच्यते ।
भक्ताः सततं तीर्थं यतयस्तीर्थमुच्यते ॥
शरण्यः पुरुषस्तीर्थमन्नं तत्तीर्थमुच्यते ।
आतिथेयिः परन्तीर्थं मतिथीस्तीर्थमुच्यते ॥
व्रतस्य धारणन्तीर्थं आर्जवन्तीर्थमुच्यते ।
देवशुश्रूषणन्तीर्थं गुरुशुश्रूषणन्तथा ॥
द्विजशुश्रूषणन्तीर्थं तीर्थं ज्ञानस्य धारणम् ।
दारसन्तोषणं तीर्थङ्गतं सत्तीर्थमुच्यते ॥
ब्रह्मचर्यं परन्तीर्थं त्रेताग्निस्तीर्थमुच्यते ।
मूलधर्मः स विज्ञेय मनस्तत्रैव वा युतम् ॥
गच्छं स्तीर्थानि कौन्तेय ! धर्मोधर्मेण वर्तते ।
द्विविधन्तीर्थमित्याहुः स्थावरं जङ्गमन्तथा ॥
स्थावराज्जङ्गमं श्रेष्ठं तत्त्वेज्ञानपरिग्रहात् ।
कर्मणा हि विशुद्धस्य पुरुषस्यैव भारत ! ॥
हृदये सर्वतीर्थानि तीर्थभूतः स उच्यते ।
गुरुतीर्थपरं ज्ञान मतस्तीर्थं न विद्यते ॥
ज्ञानतीर्थन्तपस्तीर्थं ब्रह्मतीर्थं सनातनम् ।
क्षमातु परमन्तीर्थं सर्वतीर्थेषु पाण्डव ! ॥
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
मानितोऽमानितोवापि पूजितोऽपूजितोऽपि वा ।
आक्रुष्टस्ताड़ितो वापि क्षमावां स्तीर्थमुच्यते ॥

क्षमा दमः क्षमा दानं क्षमा सत्यं क्षमा तपः ।
क्षमा हिंसा क्षमा धर्मः क्षमा चेन्द्रियनिग्रहः ॥
क्षमा दया क्षमा यज्ञः क्षमा धैर्ययुतं जगत् ।
क्षमावान् प्राप्नुयात् स्वर्गं क्षमावान् प्राप्नुयाद्यशः ॥
क्षमावान् प्राप्नुयान्मोक्षं क्षमावांस्तीर्थमुच्यते ।

आत्मा नदी भारत ! पुण्यतीर्थं नत्वा तीर्थं सर्वतीर्थं प्रधानतः ।
स्नुत्वा तीर्थं सर्वमात्मन्ययोच्चैः स्वर्गो मोक्षः सर्वमात्मन्यधीनम् ॥
आचारवक्रान्तरगात्रशोभिना सत्यप्रसन्नेन मनोहरेण ।
ज्ञानाम्बुना स्नातिच योहि नित्यं किन्तस्य भूयः सलिलेन कृत्यम्

युधिष्ठिरः । भगवन् ! सर्वपापघ्नं प्रायश्चित्तमनुत्तमम् ।
त्वद्भक्तस्य नरश्रेष्ठ ! मम वक्तुं त्वमर्हसि ॥
रहस्यमिदमत्यर्थं न श्राव्यं पापकर्मणाम् ।
अवैष्णवानामश्राव्यं प्रायश्चित्तं ब्रवीमि ते ॥
वामनं ब्राह्मणं दृष्ट्वा मद्गतेनान्तरात्मना ।
नमो ब्रह्मण्यदेवायेत्यभिवादनमाचरेत् ॥
प्रदक्षिणन्तु त्रिः कुर्यात् पुनरष्टाक्षरेण तु ।
तेन तुष्टो नरश्रेष्ठ ! तत्पापं क्षपयाम्यहम् ॥
पोत्रघृष्टां वराहस्य मृत्तिकां शिरसा वहन् ।
प्राणायामशतं कृत्वा नरः पापैर्विमुच्यते ॥
दक्षिणावर्तशङ्खाद्वा कपिलाशृङ्गमेव च ।
प्रातः स्नातो नदीं गत्वा मम सूक्तेन शंसतः ॥
सलिलेन तु यः स्नायात् सतिलेन रविग्रहे ।
तस्य यत्सञ्चितं पापन्तत्क्षणादेव नश्यति ॥
मस्तकान्निःसृतैस्तोयैः कपिलाया युधिष्ठिर !

गोमूत्रेणापि यः स्नायाद्गोर्हिंस्यान् ममवादिनः ॥
विप्रपादच्युतैर्वापि तोयैः पापं प्रणश्यति ।
नमस्येद्यस्तु मद्भक्त्या शिंशुमारप्रजापतिम् ॥
चतुर्दशाङ्गयुक्तस्य तस्य पापं प्रणश्यति ।
ततश्चतुर्दशाङ्गानि शृणु तस्य नराधिप ! ॥
शिरो धर्मो हनू ब्रह्म यज्ञमुत्तरदक्षिणौ ।
हृदयन्तु भवेद्विष्णुर्हस्तौ स्यातान्तथाश्विनौ ।
अत्रिर्मध्यं भवेद्राजन् ! लिङ्गं संवत्सरो भवेत् ॥
मित्रावरुणकौ पादौ पुच्छमूलं हुताशनः ।
ततः पश्चाद्भवेदिन्द्रः ततः पश्चात्प्रजापतिः ॥
अभयञ्च ततः पश्चात् स एव ध्रुवसंज्ञितः ।
एतान्यङ्गानि सर्वाणि शिंशुमारप्रजापतिः ॥
पिबेत्तु पञ्चगव्यं यः पौर्णमास्यामुपोषितः ।
तस्य नश्यति तत्सर्वं यत्पापं पूर्वसंज्ञितम् ॥
अथैव ब्रह्मकूर्चन्तु समन्त्रं तु पृथक् पृथक् ।
मासि मासि पिबेद्यस्तु तस्य पापं प्रणश्यति ॥
पात्रञ्च ब्रह्मकूर्चस्य शृणु मन्त्रञ्च भारत ! ।
पलाशं पद्मपत्रं वा ताम्रं वाथ हिरण्मयम् ॥
सादयित्वा तु गृह्णीयात्तत्तु पात्रमुदाहृतम् ।
गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम् ॥
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ।
आज्यं शुक्रमसीत्येव देवस्येति कुशोदकम् ।
आपोहिष्ठेति संमृह्य यवचूर्णं यथाविधि ॥
ब्रह्मणे च तथाहुत्वा समिद्धे तु हुताशने ।

आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ॥

उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु ।

महतापि स पापेन त्वचेवाहिर्विमुच्यते ॥

इन्द्रान इति यः पादं पठेद्यः संहितामिमाम् ।

अन्तर्जलेऽथवादित्ये तस्य पापं प्रणश्यति ॥

मम सूक्तं जपेद्यस्तु नित्यं मद्गतमानसः ।

न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥

इति श्रीगौतमीये वैष्णवधर्मशास्त्रे रहस्यप्रायश्चित्तं नाम विंशोऽध्यायः ।

एकविंशोऽध्यायः ।

युधिष्ठिरः । कीदृशा ब्राह्मणाः पुण्या भावसिद्धाः सुरेश्वर ! ।

तत्कर्म सफलं वेति कथयस्व ममाच्युत ! ॥

भगवानुवाच । शृणु पाण्डव ! तत्सर्वं ब्राह्मणानां यथाक्रमम् ।

सफलं निष्फलञ्चेति तेषां कर्म ब्रवीमि ते ॥

त्रिदण्डधारणं मौनं जटाधारणमुण्डनम् ।

वल्कलाजिनसर्वांशी व्रतचर्याभिषेचनम् ॥

अग्निहोत्रं वनेवासः स्वाध्यायो ध्यानसंस्क्रिया ।

सर्वाण्येतानि वै मिथ्या यदि भावो न निर्मलः ॥

अग्निहोत्रं वृथा राजन् ! वृथा वेदास्तथैव च ।

शीलो देवास्तु तुष्यन्ति श्रूयतां तत्र कारणम् ॥

क्षान्तोदान्तोजितक्रोधो जितात्मानं जितेन्द्रियम् ।

तमेव ब्राह्मणं मन्ये शेषाः शूद्रा इति स्मृताः ॥

अग्निहोत्रव्रतपरान् स्वाध्यायनिरतान् शुचीन्।
उपवासरतान् दान्तां स्तांन्देवा ब्राह्मणा विदुः॥
न जातिः पूज्यते राजन्! गुणाः कल्याणकारकाः।
चण्डालमपि वृत्तस्थं तन्देवा ब्राह्मणं विदुः॥
मनः शौचं कर्मशौचं कुलशौचञ्च भारत!।
शरीरशौचं वाक्शौचं शौचं पञ्चविधं स्मृतम्॥
पञ्चस्वेषु च शौचेषु हृतिशौचं विशिष्यते।
हृदयस्य तु शौचेन स्वर्गं गच्छन्ति मानवाः॥
अग्निहोत्रपरिभ्रष्टः प्रसक्तः क्रयविक्रये।
वर्णसङ्करकर्ता च ब्राह्मणो वृषलैः समः॥
यस्य वेदश्रुतिर्नष्टा कर्षकश्चापि यो द्विजः।
विकर्मस्थोऽपि कौन्तेय! स वै वृषल उच्यते॥
वृषो धर्मो हि विज्ञेयस्तस्य यः कुरुते लयम्।
विषदन्तं विदुर्देवा निन्दितं श्वपचादपि॥
स्तुतिभिः ब्रह्मपूर्वाभिर्यइन्द्रं स्तौति मान्नृप!।
न च मां स्तौति पापात्मा स मामाक्रोशते भृशम्॥
श्वच्छितौ च यथा चीरं ब्रह्म वै वृषले तथा।
अदुष्टो दुष्टतामेति शुना स्पृष्टं हविर्यथा॥
अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरम्।
धर्मशास्त्रपुराणानि विद्या ह्येताश्चतुर्दश॥
यान्युक्तानि मया सम्यक् विद्याजन्मानि भारत!।
उत्पन्नानि पवित्राणि पावनार्थन्तथैव च॥
तस्मात्तानि न शूद्राय स्पृष्टव्यानि युधिष्ठिर!।
सर्वं तच्छूद्रसंस्पृष्टं न पवित्रं न संशयः॥

लोके तीव्रपवित्राणि पञ्चामेध्यानि भारत ! ।
श्वा शूद्रश्च श्वपाकश्चेत्यपवित्राणि पाण्डव ! ॥
देवलः शूककीटो यूपश्चक्या वृषलीपतिः ।
पञ्चैते स्युरमेध्याश्च न स्प्रष्टव्याः कथञ्चन ॥
स्पृष्ट्वैतान्यष्ट वै विप्रः सचेलो जलमाविशेत् ।
मद्भक्तान् शूद्रसामान्यादवमन्यन्ति ये नराः ।
नरकेष्वेव तिष्ठन्ति वर्षकोटिं नराधमाः ॥
चण्डालमपि मद्भक्तन्नावमन्येत बुद्धिमान् ।
अवमन्य पतत्येव नरके रौरवे नरः ॥
मम मद्भक्तभक्तेषु सम्प्रीतिर्ह्यधिका भवेत् ।
तस्मान्मद्भक्तभक्ताश्च पूजनीया विशेषतः ॥
कीटपक्षिमृगाणाञ्च मयि सन्न्यस्तचेतसाम् ।
ऊर्द्ध्वामेव गतिं विद्धि किं पुन र्ज्ञानिनान्नृप ! ॥
पत्रं वाप्यथवा पुष्पं फलं वा तोयमेव वा ।
ददाति मम शूद्रोऽपि शिरसा धारयामि तम् ॥
विप्रानेवार्चयेद्भक्त्या शूद्रः प्राणैश्च मत्प्रियः ।
तेषान्तेनैव रूपेण पूजां गृह्णामि भारत ! ॥
वेदोक्तेनैव मार्गेण सर्वभूतहृदि स्थितम् ।
मामर्चयन्ति ये विप्राः सायुज्यं यान्ति ते मम ॥
परित्राणाय भक्तानां प्रादुर्भावः कृतोमया ।
प्रादुर्भावाकृतिः काचिदर्चयेत्तां युधिष्ठिर ! ।
आसामन्यातमं मूर्तिं यो भक्त्या च समर्चति ॥
तेनैवपरितुष्टोऽहं भविष्यामि न संशयः ।
कदाच मणिरत्नैश्च ताम्रेण रजतेन वा ॥

कृत्वा प्रतिकृतिं कुर्यादर्चनां काञ्चनेन वा ।
पुण्यं दशगुणं दद्यादेतेषामुत्तमोत्तमम् ॥
जयकामोऽर्चयेद्राजा: विद्याकामो द्विजोत्तमः ।
वैश्योऽपि धनकामस्तु शूद्रः पुण्यफलप्रियः ॥
सर्वकामाः स्त्रियो वापि सर्वान् कामानवाप्नुयुः ॥
इति श्रीगौतमीये वैष्णवधर्मशास्त्रे भक्त्यार्चनविधि
नाम एकविंशोऽध्यायः ।

द्वाविंशोऽध्यायः ।

युधिष्ठिरः । कीदृशानान्तु शूद्राणां नानुगृह्णासि वार्चनम् ।
उद्वेग स्तव कस्मात्तु तत् ब्रवीहि सुरोत्तम ! ॥
श्रीभगवानुवाच । अष्टतेनाप्यभक्तेन स्पृष्टा शूद्रेण यार्चना ।
तां वर्जयामि यत्नेन श्वपाकविहितामिव ॥
त्रैलोक्येऽस्मिन्निरुद्विग्नो न बिभेमि कुतश्चन ।
दिवा वा यदि वा रात्रौ वुद्विग्नं कुरु लाघवात् ॥
न भवेद्दे वदैत्येभ्यो रक्षोभ्यश्चैव यो नृप ! ।
शूद्रवक्त्रार्चिताद्वेदाद्भयन्तु सुमहन्मम ।
तस्मात्सप्रणवं शूद्रोमन्त्रं मे नैव कीर्तयेत् ॥
प्रणवं हि परं ब्रह्म नित्यं ब्रह्मविदो विदुः ।
द्विज शुश्रूषणं धर्मं शूद्राणां भक्तितो मयि ॥
तेन गच्छन्ति वै स्वर्गं चिन्तयन्तो हि मां सदा ।
द्विजशुश्रूषया शूद्रः परं श्रेयोऽधिगच्छति ॥
द्विजशुश्रूषणादन्यन्नास्ति शूद्रस्य निष्कृतिः ।

रागो द्वेषश्च मोहश्च पारुष्यञ्चानृशंसता ॥
शाम्यञ्च दीर्घवैरत्व मतिमान मनार्जवम्।
अनृतञ्चापवादश्च पैशुन्यमतिलोभता ॥
हिंसास्तेयास्वशावादो वञ्चना रोषलोलुता।
अबुद्धिता च नास्तिक्यं भयमालस्यमेव च॥
अशौचत्वञ्चाकृतज्ञत्वं दम्भता स्तम्भ एवच।
निकृतिश्चाप्यवज्ञानं ज्ञातके शूद्रमाविशेत् ॥
दृष्ट्वा पितामहः शूद्रमभिभूतन्तु तामसैः।
द्विजशुश्रूषणं धर्मं शूद्राणान्तु प्रयुक्तवान् ॥
नश्यन्ति तामसा भावाः शूद्रस्य मयि भक्तितः।
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥
तदहं भक्तिदत्तं यत् मूर्ध्ना गृह्णामि वद्रतः।
चण्डालो वा प्रियः कश्चित् सर्वपापसमन्वितः ॥
यदि मां सततं ध्यायेत् स पापेभ्यः प्रमुच्यते।
विद्याविनयसम्पन्ना ब्राह्मणा वेदपारगाः ॥
मयि भक्तिन्न कुर्वन्ति चण्डालसदृशा हि ते।
वृथा दत्तं वृथा जप्तं वृथाचेष्टं वृथाकृतम् ॥
वृथा तीर्थेतु दत्तंस्याद् यो न भक्तो मयि द्विजः।
यत्कृतञ्च कृतञ्चापि यदिष्टं दत्तमेव वा ॥
अवैष्णवोक्तं तत्सर्वं राक्षसा एवभुञ्जते।
स्थावरो जङ्गमो वापि सर्वभूतेषु पाण्डव ! ॥
समत्वेन दयां कुर्यान्मद्भक्तो मित्रशत्रुषु।
आनृशंस्य महिंसाच दया सत्यं तथार्जवम् ॥
अद्रोहं मम भक्तानाम्भूतानामभय नृप !।

इत्येवमादयो ब्रूयान्मद्भक्त्या श्रद्धयान्वितः ॥
तस्याच्चयो भवेल्लोकः श्वपाकस्यापि पार्थिव ! ।
किं पुनर्ये समर्चन्ति मद्भक्तविधि पूर्वकम् ॥
मद्भक्ता मद्गतप्राणाः स्तुवन्ति ये तु मां सदा ।
बहुवर्षसहस्राणि तपस्तप्यति यो नरः ॥
नासौ तत्पदमाप्नोति मद्भक्तैर्यदवाप्यते ।
मामेव तस्माद्राजर्षे ! ध्याहि नित्यमतन्द्रितः ॥
अवाप्स्यसि ततः सिद्धिं निश्चयं हि अनुत्तमाम् ।
अपार्थकं प्रभाषन्ते शूद्रा भागवता इति ॥
न शूद्रा भगवद्भक्ता विप्रा भागवता स्मृताः ।
द्वादशाक्षरतत्त्वज्ञ श्चतुर्व्यूहविधानवित् ॥
अच्छिद्रः पञ्चकालज्ञः सर्वे भागवताः स्मृताः ।
ऋग्वेद यजुषो होता यजुषाध्वर्युरेव च ॥
सामवेदेन चोद्गाता पुण्येनाभिस्तुवन्ति माम् ।
अथर्वशिरसा चैव नित्यमाथर्वणा द्विजाः ॥
स्तुवन्ति सततं येचतेहि भागवता स्मृताः ।
वेदाधीनाः सदा यज्ञा यज्ञाधीनाश्च देवताः ॥
देवता ब्राह्मणाधीना स्तस्माद्विप्रास्तु देवताः ।
अनाश्रितात्रयन्नास्ति मुख्यमाश्रय माश्रयेत् ॥
रुद्रं समाश्रिता देवा रुद्रो ब्रह्माण माश्रितः ।
ब्रह्मा मामाश्रितो राजन्नाहं किञ्चिदुपाश्रितः ॥
ममाश्रयो न किञ्चित्तु सर्वेषां माश्रयोऽस्म्यहम् ।
एवमेतन्मया प्रोक्तं रहस्यमिदमुत्तमम् ॥
धर्मप्रिय ! ब्रुवे राजन्नित्यमेव समाचर ।

इदं पवित्रमाख्यानं पुण्यं वेदेन सम्मितम् ॥
यः पठेन्मामकं धर्मं महन्यहनि भारत ! ।
धर्मोऽपि वर्धते तस्य बुद्धिश्चापि प्रसीदति ।
पापञ्च मुपैत्येव कल्याणञ्च विवर्धते ॥
एतत्पुण्यं पवित्रञ्च पापनाशनमुत्तमम् ।
श्रोतव्यं श्रद्धया युक्तैर्मद्भक्तैश्च विशेषतः ॥
श्रावयेद्यस्त्विदं भक्त्या प्रयतोऽथ शृणोति वा ।
स गच्छेन्मम सायुज्यं नात्र कार्य्या विचारणा ॥
यश्चेदं श्रावयेच्छ्राद्धे मद्भक्तो मत्परायणः ।
पितरस्तस्य तृप्यन्ति यावदाभूतसंप्लवम् ।
वैशम्पायनः । प्रहृष्टः सुमना भूत्वा चिन्तयेताद्भुतां कथाम्
पूजयामास गोविन्दं धर्मपुत्त्रः पुनः पुनः ।
देवा ब्रह्मर्षयः सिद्धा गन्धर्वाप्सरसस्तथा ॥
भूता यक्षा ग्रहाश्चैव गुह्यका भुजगास्तथा ।
बालखिल्या महात्मनो मुनयस्तत्त्वदर्शिनः ॥
तथा भागवताश्चैव पञ्चकालरतास्तथा ।
कौतूहलसमायुक्ता भगवद्भक्तिमागताः ॥
श्रुत्वा तु परमं पुण्यं वैष्णवं धर्मशासनम् ।
विमुक्तपापाः पूतास्ते संपूतास्तत्क्षणेन तु ॥
प्रणम्य शिरसा विष्णुं प्रसादसुमुखेक्षणाः ।
यथागतं ययुर्देवाः सिद्धाश्चर्षिगणैः सह ॥
गतेषु तेषु सर्वेषु केशवः केशिहा तदा ।
विसृज्य पाण्डवान् सर्वान् प्रणतान् द्वारकां ययौ ॥

ततः प्रणम्य गोविन्दं तदा प्रभृति पाण्डवाः ।
कपिलाद्यानि दानानि ददुः विष्णुपरायणाः ॥
मधुसूदनवाक्यानि स्मृत्वा चैव पुनः पुनः ।
मनसा पूजयामासुर्हृदिस्थं पञ्च पाण्डवाः ॥
युधिष्ठिरोऽपि धर्मात्मा हृदि कृत्वा जनार्दनम् ।
तद्भक्तस्तन्मना युक्तस्तद्याजी तत्परोऽभवत् ॥
एवमेतत्पुराप्रोक्तं वैष्णवं धर्मशासनम् ।
मया ते कथितं राजन्! पवित्रं पापनाशनम् ॥
चिन्तयस्व सदा विष्णुं अप्रमत्तः कुरूद्वह ! ।
लोका गच्छन्ति नान्येन तद्विष्णोः परमं पदम् ॥

इति श्रीवृद्धगौतमीये वैष्णवधर्मशास्त्रे द्वाविंशतितमोऽध्यायः

समाप्तमुत्तरार्द्धम् ।

समाप्तोऽयं ग्रन्थः ।